९८/१ (A)

अथ

98/1 (A)

ग्रन्थनामः-	"व्रतार्कः"	हस्तलिखित-समयः
कर्तृनामः-	"नीलकण्ठात्मज शङ्करप्रणीतः"	शके १६७४
विषयः-	व्रतम्	

A.D 1752

Vrita.k

1925

१८/१

अथ

"व्रतार्कः"

नीलकण्ठात्मज शङ्करप्रणीतः

98/1

श्रीगणेशाय नमः॥ ॥दिवाकरपदद्वंद्वं फलद्वंद्वप्रदायकं॥ त्रैलोक्यतमसो नाशकर्तृ तत्प्रणमाम्यहं॥१॥ यो जाग्रन्नि-
जकरमंदराद्रिमंथैर्निर्मथ्य प्रथिततराधकारसिंधुं॥ लोकेभ्यो वितरति सत्प्रकाशरत्नं तं वंदे वनजवनीविनोदबंधुं॥२॥
६ नामं नामं प्रणामोद्भुतभरतरलल्लोचनालिंगनेनात्राम्यद्दृग्गजेभ्रूविभ्रमजननपरो जानकीजानिपादौ॥ तातश्री-
नीलकंठामलपदकृपयालब्धशास्त्रार्थतत्त्वः कुर्वे श्रीशंकरोहं सहृदयहृदयप्रीतये सद्व्रतार्कं॥३॥ अत्र स्व-
कर्तव्यविषयो नियतः संकल्पो व्रतमिति श्रीदत्तः॥ तत्र अग्निहोत्रसंध्यावंदनादिविषये संकल्पेतिप्रसक्तेः
किंत्वभियुक्तव्रतप्रसिद्धिविषयः संकल्पविशेष एव व्रतं॥ न च व्रतं संकल्पयेदित्येनन्वय इति वाच्यं॥ पा-
कं पचेतिवदानं दद्यादितिवत्प्रत्ययानुग्रहार्थं प्रयोगोपपत्तेरिति नव्याः॥ तत्र व्रतकालमाह हेमाद्रौ गा-
र्ग्यः॥ ॥अस्तगे च गुरौ शुक्रे बाल्ये वृद्धे मलिम्लुचे॥ उद्यापनमुपारंभं व्रतानां नैव कारयेत्॥ तत्रैव वृद्धमनुबृह-
स्पतिः॥ अग्न्याधानं प्रतिष्ठां च यज्ञदानव्रतानि च॥ मांगल्यमभिषेकं च मलमासे विवर्जयेत्॥ बाले वा यदि
वा वृद्धे शुक्रे वास्तंगते गुरौ॥ मलमास इवैतानि वर्जयेद्देवदर्शनं॥ लल्लः॥ नीचस्थे वक्रसंस्थेप्यतिचरणगते बा-
लवृद्धास्तगे वा संन्यासो देवयात्राव्रतनियमविधिः कर्णवेधः स्तु दीक्षा॥ मौंजीबंधोथ चूडा परिणयनविधिर्वास्तु-
देवप्रतिष्ठा वर्ज्याः सद्भिः प्रयत्नात्त्रिदशपतिगुरौ सिंहराशिस्थिते चेति॥ नीचस्थो मकरस्थः॥ कल्पतरौ देवी-

पुराणे॥ सिंहसंस्थे गुरौ शुक्रे सर्वारंभेषु वर्जयेत्॥ आरब्धं न च सिध्येत महाभयकरं भवेत्॥ पुत्रमित्रकलत्रादि-
हन्याद्वीपं न संशयः॥ देवारामतडागेषु व्रतोद्यानगृहेषु च॥ सिंहस्थं मकरस्थं च गुरुं यत्नेन वर्जयेत्॥ वसिष्ठः॥
सिंहस्थे तु मघासंस्थे गुरौ यत्नेन वर्जयेत्॥ अन्यत्र सिंहभागेषु सिंहस्थोपि न दुष्यति॥ सिंहस्थगुरोर्वर्जनीय-
त्वं नर्मदोत्तरभाग एव॥ अन्यत्र तु सिंहांशकस्य वर्ज्यः॥ तथा च मदनरत्ने दिध्वलकाले विधाने॥ सिंहस्थितः सुर-
गुरुर्यदि नर्मदाया यस्तं वर्जयेत्सकलकर्मसु सौम्यभागे॥ विंध्यस्य दक्षिणदिशि प्रवदंति चार्याः सिंहांशके मृगप-
तावपि वर्जनीयमिति॥ सिंहांशस्तु पूर्वाफल्गुन्याः प्रथमपादः मृगपतौ मकरस्थे गुरौ॥ मकरस्थे गुरौ विशेष-
माह लल्लः॥ नर्मदापूर्वभागे तु शोणस्योत्तरदक्षिणे॥ गंडक्याः पश्चिमे भागे मकरस्थो न दूषतः॥ केषांचित्त्रीक-
ह्रिकाणामन्येषां च व्रतानामगस्त्योदये प्रारंभनिषेधात्॥ हेमाद्रौ लौगाक्षिः॥ उद्यानिका शिवपवित्रकमे-
घपूजा द्वर्वाष्टमीफलविरूढकजागरादि॥ स्त्रीणां व्रतानि निखिलान्यपि वार्षिकाणि कुर्यादगस्त्यसमु-
दितेन शुभानि लिप्सुः॥ उद्यानिकाव्रतविशेषः॥ ॥ शिवपवित्रकं आषाढ्यामथवा भाद्र्यां विहितं शिव-
स्य पवित्रारोपणं मेघपूजा व्रतविशेषः॥ दूर्वाष्टमी भाद्रशुक्लाष्टमी॥ फलविरूढकं भाद्रशुक्लचतुर्दश्यां
पारिव्रतं॥ कदलीव्रतापरनामकं॥ जागरं॥ आश्विनपौर्णमास्यां कोजागरव्रतं॥ कार्तिकशुद्धचतुर्दश्यां

२

विहितंजागरव्रतंवा॥अत्रोभयत्रागस्त्योदयस्यावश्यंभावित्वेनविधेरनवकाशापत्तेर्विकल्पोज्ञेयः॥वार्षि
काणीत्यत्रवर्षासुभवानिवार्षिकाणीत्येवव्युत्पत्तिर्नतुवर्षेभवानीतितथाशारदादिग्रीष्मपर्यंतमगस्त्योद
यानुवृत्तेःतन्मध्यविहितानांस्त्रीव्रतानांसर्वथानारंभएवापद्येतेतिअगस्त्योदयश्चदिवोदासीये॥उदे
तियाम्यांहरिसंक्रमाद्दिवेरेकाधिकेविंशतिमेह्न्यगस्त्यः॥ससप्तमेस्तंवृषसंक्रमाच्चप्रयातिगर्गादिभिरस्यभा
णि॥व्रतारंभसमाप्त्योस्तिथिंविशिनष्टिहेमाद्रौसत्यव्रतः॥उदयस्थातिथिर्याहिनभवेद्दिनमध्यभाक्॥सा
खंडानव्रतानांस्यादारंभश्चसमापनं॥एतद्व्यतिरिक्तयामरखंडायांप्रारंभमाहतत्रैवबृहद्वसिष्ठः॥खंडव्या
पिमार्तंडायाद्यखंडाभवतितिथिः॥तत्रप्रारंभणंतस्यामनस्तगुरुशुक्रयोरिति॥अनस्तमितगुरुशुक्रयांतिथौ
व्रतमारंभणीयमित्यर्थः॥रत्नमालायां॥सोमसौम्यगुरुशुक्रवासराःसर्वकर्मसुभवंतिसिद्धिदाः॥भानुभौ
मशनिवासरेषुचप्रोक्तमेवखलुकर्मसिध्यति॥विरुद्धसंज्ञाइहयेचयोगाःतेषामनिष्टःखलुपादआ
द्यः॥सवैधृतिस्तुव्यतिपातनामासर्वोप्यनिष्टःपरिघस्यचार्धं॥तिस्रस्तुयोगेप्रथमेसवज्रेव्याघातस
ज्ञेनवपंचशूले॥गंडेतिगंडेचषडेवनाड्यःशुभेषुकार्येषुविवर्जनीयाः॥ब्रह्मयामले॥दिवाभद्रायदा
रात्रौरात्रौभद्रायदादिवा॥नत्याज्याशुभकार्येषुप्राहुरेवंपुरातनाइति॥अथदेशाः॥व्यासः॥सर्वे

२

यज्ञदानसमाधिभिः॥ व्रतोपवासनियमैर्होमस्वाध्यायतर्पणैः॥ तेषां वै रुद्रसायुज्यं सामीप्यं वाति दुर्लभं॥ सलोक
तां च सारूप्यं जायते यत्प्रसादतः॥ देवलोपि॥ व्रतोपवासनियमैः शारीरोत्तापनैस्तथा॥ वर्णाः सर्वेपि मुच्यंते पातके
भ्यो न संशयः॥ अत्राधिकारिविशेषणपुंस्त्वस्याविवक्षितत्वात्स्त्रीणामप्यधिकारः॥ भारते॥ मामुपाश्रित्य कौं
तेय येपि स्युः पापयोनयः॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिमिति॥ क्वचित्तु म्लेच्छानामप्यधिकारो हे
माद्रौ देवीपुराणे॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः॥ वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैः॥
स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु॥ वैश्यशूद्रयोस्तु द्विरात्राधिकोपवासो न भवति वैश्याः शूद्राश्च
मोहादुपवासं प्रकुर्वते॥ त्रिरात्रं पंचरात्रं वा तयोर्व्युष्टिर्न विद्यते इति भार्ग्यलिखितनिषेधात्॥ व्युष्टिः फलं॥
सभर्तृकाणां भर्त्राद्याज्ञां विनानधिकारः॥ तथा च मदनरत्ने मार्कंडेयपुराणे॥ नारी खल्वननुज्ञाता भर्त्रा पित्रा
सुतेन वा॥ निःफलं तु भवेत्तस्या यत्करोति व्रतादिकं॥ भर्त्राज्ञया तु सर्वव्रतेष्वधिकारः॥ भार्या पत्युर्मतेनैव व्रता
दीनाचरेत्सदेति॥ कात्यायनोक्तेः॥ तथा च॥ पत्यौ जीवति या नारी उपवासव्रतं चरेत्॥ आयुष्यं हरते भर्तुः सा
नारी नरकं व्रजेदिति विष्णुवचनं॥ तदप्यननुज्ञापरं॥ यत्तु कश्चित् नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणं॥
भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति ताः॥ यद्वैवश्याय च पित्रादिकेभ्यः कुर्याद्भार्याभ्यर्चनसत्क्रि
यां च॥ तस्य त्वर्धं सा फलं नान्यचिंता नारी भुंक्ते भर्तृशुश्रूषयैवेति॥ स्कांदे तु सभर्तृकाणामेकादश्याद्युपवासादा

वनधिकार इति तन्न॥ तस्यापि पृथक्स्वातंत्र्येण भर्त्रननुज्ञापरत्वात्॥ अत एव व्यासः॥ कामं भर्तुरनुज्ञाता व्रता
दिष्वधिकारिणीति॥ शंखोपि॥ कामं भर्तुरनुज्ञया व्रतोपवासनियमाः स्त्रीधर्मा इति॥ न चानुज्ञया व्रतेष्विव य
ज्ञेपि पृथगधिकारापत्तिरिति शंक्यं तस्याः श्रुत्यध्ययनजन्यज्ञानाभावेनापत्यभावान्यथाकोदस्य भर्तृशु
श्रूषयास्तावत्कत्वेनाप्युपपन्नत्वादिति॥ न च भर्त्रनुज्ञयैवाधिकारसिद्धेर्विधवायाः व्रतादावधिकारापत्तिरिति वा
च्यं॥ नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा॥ विफलं तद्भवेत्तस्या यत्करोत्यौर्ध्वदैहिकमिति मार्कंडेयोक्तेः॥ पि
त्राद्याज्ञया तस्या अधिकार इति हेमाद्रिः॥ स्त्रीणां व्रतग्रहणे विशेषमाह माद्रौ हरिवंशे॥ स्नानं च कार्यं शिरसः स्त
तः फलमवाप्नुयात्॥ स्नाता स्त्री व्रतरुद्धाय पतिं विज्ञापयेत्सती॥ अथ व्रतधर्माः॥ व्रतसंकल्पविधिर्भारते॥
गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा संकल्पमत्ते वा कोयेद्बुधः॥ औदुंबरं ताम्र
मयं॥ उदुंबरस्तु ताम्रे स्यादिति विश्वोक्तेः॥ यद्वान्यल्लक्तादिकं कल्पयेदिति कल्पतरुः॥ श्रीदत्तः॥ कल्पतरुमते वाका
रश्चार्थे तेनायमर्थः यस्तु नरक्तादिकं तु भिद्येत तदप्युक्तविधिना गृह्णीयादिति तन्मतं परिष्कृत्य वाकारस्योप
वासपदस्य च वैयर्थ्यापत्तेः॥ यत्संकल्पयेत्तद्गृह्णीयादित्यनेनैवापपत्तेरित्यदूषयत्॥ ताम्रपात्राद्यभावे हस्तेनापि
जलं गृहीत्वा संकल्पयेदिति तु युक्तं॥ अत एवानंतभट्टैः यद्वा वार्यं च धारयेत् इति पाठः॥ मदनरत्ने देवलवा
क्यं तु यथा संकल्पयेदिति पाठः॥ यथा कामे फलमुल्लिखेदित्यर्थः॥ अत एव मार्कंडेयः॥ संकल्पं च यथाकु

यात्स्नानदानव्रतादिके ॥ अनंतरं कृत्यमाह मदनरत्ने देवलः ॥ अभुक्त्वा प्रातराहारं स्नात्वाचम्य समाहितः ॥ सूर्या
य देवताभ्यश्च निवेद्य व्रतमाचरेत् ॥ अत्र प्रातर्व्रतमाचरेदित्येवान्वयः ॥ प्रधानक्रियान्वयस्याभ्यर्हितत्वात् ॥ अ
भुक्त्वेति तु अशक्तस्याभ्यनुज्ञातेर्मध्याह्निकपापवादः ॥ केचित्तु व्रतदिने प्रातराहारमभुक्त्वा व्रतमाचरेदि
त्याहुः ॥ तत्र उपवासव्रतावकार्यमित्यनेनैव अभुक्तेव्रताधिकारस्य प्राप्तत्वादेतस्य वैयर्थ्यापत्तेः ॥ अन्यत्तु पूर्व
दिने प्रातराहारमभुक्त्वा अर्थादेकभक्तं कृत्वोत्तरदिने स्नात्वाचम्य व्रतादिकं कुर्यादित्याहुः ॥ परे तु सर्वत्र पूर्वेद्युः
एव सायं संध्योत्तरं व्रतयात्रादावारभ्यतामिति बहुशस्तथा दृष्टत्वात् ॥ प्रातस्नात्वेति चान्वय इत्याहुः ॥ समान्यध
र्मानाह भविष्ये ॥ क्षमा सत्यं दया दानं शौचमिंद्रियनिग्रहः ॥ देवपूजाग्निहवनं संतोषस्तेयवर्जनं ॥ सर्व
व्रतेष्वयं धर्मः समान्यो दशधा स्थितः ॥ देवपूजा यद्देवत्यं व्रतं तस्य पूजा ॥ अग्निहवनं पूज्यदेवतोद्देशेन होमः प्र
क्रमात् ॥ एतच्च सप्तमीव्रते सूर्यपूजा अग्निहवनं नवमीव्रते दुर्गापूजा ॥ अग्निहवनमित्यादिस्तु विष्णुरेव स्पष्टं ॥
व अनुक्ते देवता व्रते इष्टदेवतापूजा ॥ इदं व्याहृतिहोमकं वित्तु ॥ अत्र क्षमादीनां स्वतंत्रतया चतुर्वर्गसाधन
त्वेन विहितानां व्रतांगतया विधानं स्वादिरं वीर्यकामस्य यूपं कुर्यादितिवत्संयोगपृथक्त्वादुपपन्नमिति हेमा
द्रिः ॥ सर्वव्रतेष्वित्यत्र सर्वव्रतपदं भविष्यत्पुराणसर्वव्रतपरमतो व्रतांतरे विध्यंतरस्तत्र एव होमादि ४

शिलोच्चयाः पुण्यास्तु सागराः सरितस्तथा ॥ अरण्यानि च पुण्यानि विशेषान्नैमिषं तथा ॥ देवीपुराणे ॥ देशा नदी गयाशै
लगंगा नर्मदा पुष्करं ॥ वाराणसी कुरुक्षेत्रं प्रयागं जंबुकेश्वरं ॥ केदारं वामपादं च कुंडं च पुष्कराह्वयं ॥ सोमेश्वरं महापु
ण्यं तथा चामरकंटकं ॥ कालंजरं तथा विंध्यं यत्र वासो गुहस्य च ॥ गुहः स्वामिकार्तिकेयः ॥ मनुः ॥ सरस्वतीदृषद्वत्योर्दे
वनद्योर्यदंतरं ॥ तं ब्रह्मनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥ यस्मिन्देशे य आचारः पारंपर्यक्रमागतः ॥ वर्णानां सांतरालानां
सः सदाचार उच्यते ॥ कुरुक्षेत्रं च मत्स्याश्च पांचालाः शूरसेनिकाः ॥ एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनंतरः ॥ मत्स्या वि
राटाः पांचालाः कान्यकुब्जाः शूरसेनिका मथुरादेशाः ॥ अनंतरः समः ॥ हिमवद्विंध्ययोर्मध्ये यत्प्राग्विनशनादपि प्रत्यगे
व प्रयागाच्च मध्यदेशः उदाहृतः ॥ विनशनं कुरुक्षेत्रं ॥ आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ॥ तयोरेवांतरं गिर्यो
रार्यावर्तं विदुर्बुधाः ॥ सिंधुनदीपश्चिमतीरव्याप्त्यर्थमाह ॥ कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ॥ स ज्ञेयो यज्ञि
यो देशो म्लेच्छदेशस्ततः परः ॥ एतान् द्विजातयो देशान् संश्रयेरन्प्रयत्नतः ॥ याज्ञवल्क्योपि ॥ यस्मिन्देशे मृगः
कृष्णस्तस्मिन्धर्मान्निबोधतेति ॥ अथ व्रताधिकारिणः स्कांदे ॥ निजवर्णाश्रमाचारनिरतः शुद्धमानसः ॥ अलु
ब्धः सत्यवादी च सर्वभूतहिते रतः ॥ व्रतेष्वधिकृतो राजन्नन्यथा विफलः श्रमः ॥ श्रद्धावान्पापभीरुश्च मददंभविव
र्जितः ॥ पूर्वं निश्चयमाश्रित्य यथावत्कर्मकारकः ॥ अवेदनिंदको धीमानधिकारी व्रतादिषु ॥ निजवर्णाश्रमाचार इत्य
नेन चतुर्वर्णानामप्यधिकारो गम्यते ॥ अत एव कौर्मे ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव द्विजोत्तम ॥ अन्वयातिमहादेव

डनं शिरसोथवा॥ न चात्र प्रायश्चित्तोक्ते रिति क्रांतव्रतानाचरणमिति वाच्यं॥ प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेदिति
स्कांदात्॥ अथोपवासधर्माः॥ तत्रोपवासस्वरूपं कात्यायनवृद्धवसिष्ठाभ्यां दर्शितं॥ उपावृत्तस्य पापेभ्यो यस्तु वा
सो गुणैः सह॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः॥ गुणैः तज्जपध्यानतत्कथाश्रवणादयः॥ उपवासकृ
तामेते गुणाः प्रोक्ता मनीषिभिः॥ दयासर्वभूतेषु क्षांतिरनसूया शौचमनायासो मांगल्यमकार्पण्यमस्पृहेत्यादि
विष्णुधर्मोत्तरगौतमादिप्रतिपादितैः तच्छब्देनोपास्यदेवता व्रतदेवता एवं च पापनिवृत्त्या गुणानुष्ठानेन वस्तुहि
ताग्निराहारस्य वासोवस्थानमुपवास इत्युक्तं भवति॥ इदं च फलसाधनस्योपवासस्य स्वरूपमुक्तं॥ उपवासपदार्थ
स्तु स्मृतिपुराणेष्वाहारे रूढ्यनिराहारावस्थानमात्रं॥ वृद्धवसिष्ठः॥ उपवासे तथा श्राद्धे न कुर्याद्दंतधा
वनं॥ काष्ठेनेति शेषः॥ अत एव तन्निंदितं॥ दंतानां काष्ठसंयोगो हंति सप्त कुलानि वै इति वाक्यशेषात् द्वयोर्विनि
षेधस्यापि विशेषपरतायुक्तैव॥ तेन॥ अलाभे वा निषेधे वा काष्ठानां दंतधावने॥ पर्णादिना विशुद्धेत जिह्वोल्ले
खः सदैव हीति पैठीनसिवचसा॥ अलाभे दंतकाष्ठानां निषिद्धायां तथा तिथौ॥ अपां द्वादशगंडूषैर्विदध्याद्दं
तधावनमिति व्यासवचसा च पर्णादिना द्वादशगंडूषैर्वा दंतधावनं कार्यमेव॥ देवलः॥ असकृज्जलपानाच्च
सकृत्तांबूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ अशक्तौ तु तेनैव जलपानमभ्यनुज्ञातं॥
अत्यये चांबुपानेन नोपवासः प्रणश्यति॥ अत्यये जलपानं विना प्राणात्यये॥ विष्णुधर्मे॥ असकृज्जल

पानं च दिवास्वापाच्च मैथुने॥ तांबूलचर्वणं मांसं वर्जयेद्व्रतवासरे॥ असकृद्ग्रहणात् सकृज्जलपानेन न दोषः॥ अत्र॥
पाराणां तं व्रतं ज्ञेयं व्रतांते विप्रभोजनं॥ असमाप्ते व्रते पूर्णे कुर्यान्नैव व्रतांतरमिति॥ तस्यापि व्रतवासरत्वान्मां
सनिषेधः पारणादिन एव॥ न तूपवासदिने प्रसक्त्यभावात्॥ अत एव निर्णयामृते व्यासः॥ वर्जयेत्पारणे मांसं
व्रताहे पौषधं सदेति॥ अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः॥ हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधमिति
स्कांदवचसा प्रसक्तमौषधरूपमपि मांसं व्रताहे वर्जयेदित्यर्थः॥ विष्णुरहस्ये॥ स्मृत्यालोकनगंधादिस्वाद
नं परिकीर्तितं॥ अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकांक्षणं॥ गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं॥
व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृदिति॥ हारीतः॥ पतितपाषंडादिनास्तिकादिसंभाषणानृताश्लीला
दिकमुपवासादिषु वर्जयेदिति॥ अनृतादिपदेन यत्पुरुषार्थतया सर्वदा निषिद्धं तदपि व्रतार्थतया सेव्यते॥
अत एव व्रताधिकारस्तु मंतुः॥ विहितस्याननुष्ठानमिंद्रियाणामनिग्रहः॥ निषिद्धसेवनं नित्यं वर्जनीयं प्रय
त्नतः॥ पतितादर्शने तु विष्णुपुराणे॥ तस्यावलोकनात्सूर्यं पश्येत मतिमान्नरः॥ स्पर्शादौ विष्णुधर्मे॥
संस्पर्शे च नरः स्नात्वा शुचिरादित्यदर्शनात्॥ संभाष्य तान् शुचिषदं चिंतयेदच्युतं बुधः॥ योगयाज्ञवल्क्यः॥
यदि वाग्यमलोपः स्याद्व्रतदानक्रियादिषु॥ व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययं॥ यमः॥ मानसे नियमे

लुप्तेस्मरेद्विष्णुमनामयंमिति॥बृहन्नारदीये॥रजस्वलांचचांडालंमहापातकिनंतथा॥मानेसौनिस्तृतिकंपतितं
चैवउच्छिष्टरजकादिकं॥व्रतादिमध्येशृणुयाद्येषांवनिमुत्तमः॥अष्टोत्तरसहस्रंवाजपेद्वेदमातरं॥वेदमा
तागायत्री॥मिताक्षरायांदक्षः॥संध्याहीनोऽशुचिर्नित्यमनर्हःसर्वकर्मसु॥यदन्यत्कुरुतेकिंचिन्नतस्यफलमश्नु
ते॥अत्रप्रातःसंध्यैवांगमितिकेचित्॥तानचरणास्तु॥अविशेषात्तत्संध्योत्तरभाविनीकर्मादौसांगमित्यु
क्तमाहुः॥प्रातःकालीनव्रतादिसंकल्पस्तुप्रातःसंध्याकृत्यैवकार्यः॥प्रातःसंध्यांबुधःकृत्वासंकल्पंतत्र
आचरेदितिगौडनिबंधधृतस्मृतेः॥मार्कंडेयपुराणे॥सूर्योदयंविनानैवव्रतदानादिकःक्रमइति।क्रमः
उपक्रमः॥छंदोगपरिशिष्टे॥सदोपवीतिनाभाव्यंसदाबद्धशिखेनच॥विशिखोव्युपवीतश्चयत्करोतिन
तत्कृतं॥पित्र्यमंत्रानुद्रवणेआत्मालंभेऽवेक्षणे॥अधोवायुसमुत्सर्गेप्रहासेनृतभाषणे॥मार्जारमूषकस्प
र्शेआकृष्टेक्रोधसंभवे॥निमित्तेष्वेषुसर्वत्रकर्मकुर्वन्नपस्पृशेत्॥मार्कंडेयपुराणे॥शिरःस्नानंचकुर्वीत
दैवंपित्र्यमथापिवा॥वराहपुराणे॥स्नानसंध्यातर्पणादिजपहोमार्चनंसदा॥उपवासवताकार्यंसायंसंध्या
हुतीविना॥भगवद्गीतायां॥तस्माद्ॐमित्युदाहृत्ययज्ञदानतपःक्रियाः॥प्रवर्तंतेविधानोक्ताःसततंब्रह्मवा
दिनां॥आपस्तंबः॥त्रिमात्रस्तुप्रयोक्तव्यःकर्मारंभेषुसर्वशइति॥विस्तृताचेयंसामान्यपरिभाषा॥तानव ६

नांगत्वेनान्यथा॥अतएवकादंबरीव्रतादौशिष्टानांहोमाद्यनाचरणमितिकेचित्॥वस्तुतस्तुयेषुपुराणांतरोक्तव्रते
षुहोमादिविधिरस्तितद्विषयक्रमेवसर्वपदमन्यथातादृक्त्वेनुसंकोचापत्तेरिति॥प्राक्षीचंद्रोदयेग्निपुराणे॥स्ना
त्वाश्रुतव्रतःसर्वव्रतेषुव्रतमूर्तयः॥पूज्याःसुवर्णमय्याद्याःशक्त्याभूमिशायिना॥जपहोमश्चसामान्यंव्रतांते
दानमेवच॥चतुर्विंशाद्द्वादशवापंचवात्रयएववा॥विप्राःपूज्यायथाशक्त्यातेभ्योदद्याच्चदक्षिणां॥व्रतमूर्तयस्तद्दे
वताप्रतिमाःदेवलः॥ब्रह्मचर्यमहिंसाचसत्यमामिषवर्जनं॥व्रतेष्वेतानिचत्वारिचरितव्यानिनित्यशः॥स्त्रीणां
प्रेक्षणात्स्पर्शात्ताभिःसंकथनादपि॥विपद्यतेब्रह्मचर्यंनदारेष्वृतुसंगमात्इति॥स्वदारेष्वृतुसंगमादिनिषि
द्धः॥आमिषंमांसं॥आमिषंपतितंपानीयंगोचर्यक्षीरमामिषं॥मसूरमाषनिंबस्यफलंजंबीरमा
मिषं॥आमिषंशुक्तिकाचूर्णमारनालंतथामिषांमितिस्मृत्यंतरोक्तंच॥व्रताद्यारंभेदधिप्राशंकार्यं॥तदाह
शातातपः॥तानिदृष्ट्वानुपित्तन्स्याद्येकर्मकिंचित्समारभेत्॥गृहीतव्रतानामाचरणेमदनरत्नेछागयः॥पूर्वंव्रतं
गृहीत्वायोनाचरेत्काममोहितः॥जीवन्भवतिचांडालोमृतःश्वाचाभिजायते॥काममोहितइतिविशेषणाद्व्या
ध्यादिनानाचरणेनदोषः॥तथाचहेमाद्रौस्कांदे॥सर्वभूतभयंव्याधिःप्रमादोगुरुशासनं॥अव्रतघ्नानिपठ्यं
तेसकृदेतानिशास्त्रतः॥सर्वभूतेभ्यःसकाशाद्व्रतंकर्तुंभयं॥गुरुशासनंगुरोराज्ञासकृदुक्त्याऽसकृ
त्यागःप्रायश्चित्तं॥तदुक्तंस्कांदगारुडयोः॥क्रोधात्प्रमादाल्लोभाद्वाव्रतभंगोभवेद्यदि॥दिनत्रयंनभुंजीतमुं

प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥ अथ व्रतहविष्याणि हेमाद्रौ छांदोगपरिशिष्टे कात्यायनः ॥ हविष्येषु
यवा मुख्यास्तदनु व्रीहयः स्मृताः ॥ माषकोद्रवगौरादीन् सर्वाभावेपि वर्जयेत् ॥ तत्रैव अग्निपुराणे ॥ व्रीहि
षष्टिकमुद्गाश्च कलायाः सलिलं पयः ॥ श्यामाकाश्चैव नीवारा गोधूमाद्या व्रते हिताः ॥ कूष्मांडालाबुवार्ताकी
पालक्या ज्योत्स्निकास्त्यजेत् ॥ चरुभैक्ष्यं सक्तुकणाः शाकं दधि घृतं मधु ॥ श्यामाकाः शालिनीवाराः यावकं मूल
न्य तंडुलं ॥ हविष्यव्रतनक्तादावग्निकार्यादिके हितं ॥ मधुमांसं विहायान्यद्व्रते वा हितमीरितं ॥ पालकीति शाक ग्रं
विशेषः ॥ ज्योत्स्निका कोशातकी ॥ तत्रैव भविष्ये ॥ हैमंतिकं सिता स्विन्नं धान्यं मुद्गा यवास्तिलाः ॥ कला
पकंगुनीवारवास्तूकं हिलमोचिका ॥ षष्टिका कालशाकं च मूलकं केमुकेतरत् ॥ कंदः सैंधवसामुद्रे ग न वणे
मधु व्ये च दधिसर्पिषी ॥ पयोनुद्धृतसारं च पनसाम्रहरीतकी ॥ पिप्पलीजीरकं चैव नागरंगकतिंत्रीणी ॥ क
दलीलवलीधात्रीफलान्यगुडमैक्षवं ॥ अतैलपक्वं मुनयो हविष्यान्नं प्रचक्षते ॥ लवणे मधुसर्पिषी
ति क्वचित्पाठः ॥ हैमंतिकं धान्यं कलमः ॥ तदपि सितं स्विन्नं ॥ अस्विन्नं वा हविष्यं कलायाः सतीना परपर्या
याः मठर इति प्रसिद्धाः ॥ वाटाणा इति महाराष्ट्रभाषायां प्रसिद्धं धान्यं ॥ वास्तूकं बथुवाख्यः शाकः ॥ हिलमु
कं मोचयतीति क्षीरस्वामी सुक्तेः ॥ शुकसरी हिलसा इति प्रसिद्धः शाकः जलोद्भवः ॥ गोडेषु हिलांचे

ति प्रसिद्धाः ॥ कालशाकमुत्तरदेशे कालिके ति प्रसिद्धं ॥ केमुकं केमुत्रा इति पूर्वदेशे प्रसिद्धं ॥ नागरंगं नारिंग ॥
ऐरावतं नागरंगे नादेयी भूमिजंबुका इत्यमरः ॥ नागरं वेति पाठे नागरं शुंठी ॥ लवली राय अवले ॥ इति महारा
ष्ट्रे योच्यमानं फलं ॥ हरफारेवडी इति मध्यदेशभाषया ॥ अतैलपक्वमित्यत्र कथितं हविष्याणामेव विशेषणं ॥
न्य मनुः ॥ मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं ॥ अक्षारलवणं चैव प्रकृत्या हविरुच्यते ॥ अनुपस्कृतमप
क्वं ॥ अथ व्रतादिषु प्रयुक्तानि वस्तूनि ॥ तत्र पंचरत्नान्यादित्यपुराणे ॥ सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं ॥ र
त्नपंचकमाख्यातं शेषं वस्तु प्रवक्ष्यहं ॥ कनकं कुलिशं नीलं पद्मरागं च मौक्तिकं ॥ एतानि पंच रत्नानि रत्न
शास्त्रविदो विदुरिति समयप्रदीपधृतकालिकापुराणोक्तानि वा ॥ कुलिशं हीरकं ॥ स्मृत्यंतरे ॥ अभावे स
र्वरत्नानां हेम सर्वत्र योजयेत् ॥ विष्णुधर्मोत्तरे ॥ मुक्ताफलं हिरण्यं च वैडूर्यं पद्मरागकं ॥ पुष्परागं
च गोमेदं नीलं गारुत्मतं तथा ॥ प्रवालयुक्तान्युक्तानि महारत्नानि वै नव ॥ हेमाद्रौ ब्रह्मांडपुराणे ॥
अश्वत्थोदुंबरप्लक्षचूतन्यग्रोधपल्लवाः ॥ पंचभंगा इति प्रोक्ताः सर्वकर्मसु शोभनाः ॥ पंचभंगाः पं
च पल्लवाः ॥ पंचगव्यं तत्रैव स्कांदे ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिर्यथाक्रमं ॥ विष्णुधर्मे ॥ गोमूत्र
मागतश्चार्धं सकृत्क्षीरस्य च त्रयं ॥ द्वयं दध्नो घृतस्यैकमेकश्च कुशवारिजं ॥ गोमूत्रादिपरिमाणं

तात्त्वरणाकृतप्रायश्चित्तमयूखेवज्ञेयं ॥ विष्णुधर्मे ॥ गायत्र्यादाय गोमूत्रं गंधद्वारेति गोमयं ॥ आप्यायस्वेति
च क्षीरं दधिक्राव्णेति वै दधि ॥ तेजोसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकं ॥ एभिस्तु पूर्वविधियुक्तं पंचगव्यं
प्रचक्षते ॥ पंचामृतं हेमाद्रौ शिवधर्मे ॥ पंचामृतं दधिक्षीरं सिता मधु घृतं नृप ॥ मदनरत्ने कात्यायनः ॥ आ
ज्यं क्षीरं मधु तथा मधुरत्रयमुच्यते ॥ तत्रैव सन्त विष्णे(?) ॥ मधुरोम्लश्च लवणः कषायस्तिक्त एव च ॥ कटुक
श्चेति राजेंद्र रसषट्कमुदाहृतं ॥ चतुःसमं गारुडे ॥ कस्तूरिकाया द्वौ भागौ चत्वारश्चंदनस्य च ॥ कुंकुम
स्य त्रयश्चैकः शशिनः स्याच्चतुःसमं ॥ शशी कर्पूरः ॥ कर्पूरं चंदनं दर्पं कुंकुमं च समांशकं ॥ सर्वगंध
मिति प्रोक्तं समस्तसुरवल्लभं ॥ दर्पः कस्तूरिका ॥ तथा ॥ कर्पूरमगुरुश्चैव कस्तूरी चंदनं तथा ॥ कंकोलं च
सवेदभिः पंचभिर्यक्षकर्दमः ॥ छंदोगपरिशिष्टे ॥ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेय चंदनं ॥ वचा चंपक मु
स्तं च सर्वौषध्यो दश स्मृताः ॥ पद्मे ॥ इक्षवस्तपारजेंद्र(?) च निष्पावा ऽजाजि धान्यकं ॥ विकारवच्च गोक्षी
रं कुसुंभं कुंकुमं तथा ॥ लवणं चाष्टमं तत्र सौभाग्याष्टकमुच्यते ॥ तपारजास्तालुः अजाजी जीरकं ॥
अपः क्षीरं कुशाग्राणि दध्यक्षततिलास्तथा ॥ यवाः सिद्धार्थकाश्चेति ह्यर्घ्योष्टांगः प्रकीर्तितः ॥ पं ८
चरात्रे ॥ रजांसि पंचवर्णानि मंडलार्थं हि कारयेत् ॥ शालितंडुलचूर्णेन शुक्लं वा यवसंभवं ॥ रक्तंकु

रणकृतआचारमयूखे द्रष्टव्या ॥ अत्र स्त्रीणां विशेषो हेमाद्रौ पाद्मे ॥ गर्भिणी सूतिकादिश्च कुमारी वाथ रोगिणी ॥ य
दाशुद्धा तदान्येन कारयेत्प्रयता स्वयं ॥ प्रयता शुद्धा स्वयं कुर्यादित्यर्थः ॥ पुंसोप्येष विधिर्लिंगस्याविवक्षितत्वादि
ति हेमाद्रिः ॥ एवं स्त्रीभिरजोदर्शनेपि कार्यं ॥ तथा च सत्यव्रतः ॥ प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् ॥ न च तत्र व्र
तस्यास्यादुपरोधः कथंचन ॥ व्रतस्य उपवासस्येत्यर्थः ॥ पूजादिकं त्वन्येन कारयेत् ॥ तथा च मदनरत्ने मात्स्ये ॥ अं
तरा तु रजोयोगे पूजामन्येन कारयेत् ॥ सूतके प्रारब्धं स्वयमेव ॥ तथा च तत्रैव ॥ पूर्वसंकल्पितं यच्च व्रतं सुनिय
तव्रतैः ॥ तत्कर्तव्यं नरैः शुद्धं दानार्चनविवर्जितमिति ॥ केन कार्यमित्यपेक्षायां तत्रैव पठीनसिः ॥ भार्या प
त्युर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतं ॥ असामर्थ्ये पतिस्ताभ्यां व्रतभंगो न जायते ॥ तत्रैव वायुपुराणे ॥ उपवासे
त्वशक्तस्य आहिताग्निरथापि वा ॥ पुत्रान्वा कारयेदन्यान्ब्राह्मणान्वापि कारयेत् ॥ उपवासं प्रकुर्वाणः पुण्यं
शतगुणं लभेत् ॥ नारी च पतिमुद्दिश्य एकादश्यामुपोषिता ॥ पुण्यं शतगुणं यायादित्याह गालवो मुनिः ॥
मातामहादीनुद्दिश्य एकादश्यामुपोषणे ॥ कृते तु तत्फलं विप्राः समग्रं फलमाप्नुयुः ॥ यत्तु च प्रतिनिधय
न काम्ये ॥ तथा च मेंडनः(?) ॥ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके पि च ॥ काम्येप्युपक्रमादूर्ध्वं केचित्प्रति
निधिं विदुः ॥ न स्यात्प्रतिनिधिर्मंत्रस्वामि देवाग्निकर्मसु ॥ स देशकालयोर्नास्ति नारणे राग्निरेतसा ॥ नापि

सुंभसिंदूरगैरकादिसमुद्भवं ॥ हरितालोद्भवं पीतं रजनीसंभवं तथा ॥ कृष्णं दग्धयवैर्हरितं पीतकृष्णविमिश्रकं ॥ रजनी हरि
द्रा ॥ कौतुकसंज्ञानि भविष्ये ॥ दूर्वायवांकुराश्चैव बालकं चूतपल्लवाः ॥ हरिद्राद्वयसिद्धार्था शिखिपत्रोरगत्वचः ॥ कंक
णोषधयश्चैतां कौतुकाख्या नव स्मृताः ॥ सप्तमृदो मात्स्ये ॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् ॥ मृत्स्नानी
य कुंभेषु प्रक्षिपेच्चत्वरात्तथा ॥ गोकुलावधि सप्तं चत्वरेण सहाष्टौ मृदो भवति ॥ हेमाद्रौ भविष्ये ॥ सुवर्णं रजतं ताम्र
मारकूटं तथैव च ॥ लोहं त्रपु तथा सीसं धातवः सप्त कीर्तिताः ॥ आरकूटं पित्तलं ॥ तत्रैव षट्त्रिंशन्मते ॥ यवगोधू
मधान्यानि तिलाः कंगुस्तथैव च ॥ श्यामाकं चीनकं चैव सप्तधान्यमुदाहृतं ॥ सप्तदश धान्यानि मार्कंडेयपुराणे ॥
व्रीहयश्च यवाश्चैव गोधूमाः कंगुकास्तिलाः ॥ प्रियंगवः कोविदारः कोरदूषाः सतीनकाः ॥ माषा मुद्गा मसूराश्च
निष्पावाः सकुलित्थकाः ॥ आढक्यश्चणकाश्चैव गणाः सप्तदश स्मृताः ॥ कोरदूषः ॥ कोद्रवाः सतीनकाः कलापाः ॥
माठर इति प्रसिद्धाः ॥ तान्यष्टादशानि स्कांदे ॥ यवगोधूमधान्यानि तिलाः कंगुकुलत्थकाः ॥ माषा मुद्गा मसूराश्च निष्पा
वाः श्यामसर्षपाः ॥ गवमानमाह ॥ हेकस्थले रूप्यमाषो धरणं षोडशोच्यते ॥ शतमानं तु दशभिर्धरणैः पलमेव तु ॥ नि
ष्कः सुवर्णश्चत्वार इति ॥ ताम्रमानमाह ॥ कार्षिकः स्ताम्रिकः पण इति ॥ पण चतुर्थांशेन कर्षेण निमितः कार्षिकस्ता
म्रसंबंधी पणो भवती ॥ कर्षसंज्ञात्र निघंटौ ॥ तत्षोडशांशः कर्षो स्त्रिपलं कर्षचतुष्टयमिति मिताक्षरायां स्मृ
तेः ॥ तत्षोडशमाषः षोडशलाक्षः स एव कर्ष इत्यर्थः ॥ धरणस्यैव पुराणा इति संज्ञांतरं ॥ तत्षोडशास्याद्ध

रणं पुराणां श्चैव राजतमिति मिताक्षरायां स्मृतेः॥ शतमाने पलपर्याये सुवर्णचतुष्टयसंमतो लितं रूप्यं राजतो निष्क इ
त्यर्थः॥ सुवर्णनिष्कस्तु चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणाइति मनूक्तः॥ तं च पलसमान एवाकोत्र कर्षापण इत्य
पक्षायां देशभेदेन कार्षापणो भिन्नइत्याह हिमाद्रौ नारदः॥ कर्षापणो दक्षिणस्यां दिशि रौप्यः प्रवर्त्तते॥ पणो निब
द्धः पूर्वस्यां दिशि रौप्यः प्रवर्त्तते॥ षोडशैव पणाः संतु॥ षोडशपणा आष्टादकाः कार्षापणाः पूर्वस्यामित्यर्थः॥ तावता
लभ्यं रौप्यं दक्षिणस्यां स इति द्वैतनिर्णये पितामहचरणाः॥ लीलावत्यां॥ वराटकानां दशकद्वयं यत्सा काकिणी ताश्च प
णश्चतस्रः॥ ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः इति॥ अथ धान्यमानं कथ्यते॥ पलद्वयं तु प्र
सृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः॥
कुंभो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोडश॥ द्रोणद्वयस्यैव शूर्प इति संज्ञा॥ पलं च कुडवः प्रस्थ आढको द्रोण एव च॥
धान्यमानेषु बोद्धव्याः क्रमशोमी चतुर्गुणाः॥ द्रोणैस्तु षोडशभिः खारी विंशत्या कुंभ उच्यते॥ कुंभैस्तु दशभिर्वाहो
धान्यसंख्याः प्रकीर्तिताः॥ विंशत्येत्यत्रापि द्रोणैरिति संबध्यते॥ तथा कुंभो द्रोणद्वयमिति पक्षो द्वाविंशति द्रोणा
मितः कुंभ इति पक्षांतरं॥ एतेषां च न्यूनाधिकपक्षाणां शक्तिदेशकालाद्यपेक्षया व्यवस्था ज्ञेया॥ अथ होमद्रव्यमानं॥
सिद्धांतशेखरे॥ होमद्रव्यप्रमाणानि वक्ष्यंते यथयथाक्रमं॥ कर्षप्रमाणमाज्यं स्यान्मधुक्षीरं च तत्समं॥ तंडुलानां शु
क्तिमात्रं पायसं प्रसृते समं॥ कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः॥ अन्नग्रास समं ग्राह्यं शाकं ग्रासार्द्धमा ९

त्रकं॥ मूलानांतुत्रिभागंस्यात्कंदानामष्टमोंशकः॥ इक्षुःपर्वप्रमाणंस्यादंगुलद्वितयंलता॥ प्रादेशमात्रंसमिधोव्रीही
णामंजलीःसमाः॥ तिलसचुकपादीनांमृगीमुद्राप्रमाणतः॥ पत्रपुष्पफलादीनांप्रमाणाकृतिरिष्यते॥ चंदनश्रीखंडक
स्तूरीकुंकुमागरुकर्दमाः॥ हरिमंथसमाप्रोक्तागुग्गुलबदरोपमाः॥ हरिमंथश्चणकः॥ आहुतीनामिदंमानंकथितंवेदवे
दिभिः॥ स्यात्त्रिमुद्रामृगीमुद्राहोमेसर्वफलप्रदेति॥ मानांतरंशारदातिलकटीकायांपदार्थादर्शेत्ति॥ कर्षमात्रमिदं
होमेशुक्तिमात्रंपयःस्मृतं॥ उक्तानिपंचगव्यानिशुक्तिमात्राणिसाधुभिः॥ तत्समेमधुदुग्धान्नंग्रासमात्रमुदाहृतं॥
दधिप्रसृतमात्रंस्याल्लाजास्युर्मुष्टिसंमिताः॥ पृथुकास्तत्प्रमाणास्युःसक्तवोपितथाविधाः॥ पलार्धगुडमानंचशर्क
रापितथाविधा॥ ग्रासार्धमात्रमन्नानिमिक्षुःपर्वप्रमाणकः॥ एकंस्यात्पत्रपुष्पंचतथाधूपादिकल्पयेत्॥ मातुलिं
गंचतुःखंडंपनसंदशधाकृतं॥ अष्टधानारिकेरंचचतुर्धाकदलीफलं॥ त्रिधाकृतंफलंबैल्वंकपित्थंखंडितंद्विधा॥ व्री
हयोमुष्टिमानास्युर्मुद्गामाषायवास्तथा॥ तंडुलास्युस्तदर्धांशकोद्रवामुष्टिसंमिताः॥ लवणंशुक्तिमात्रंस्यान्मरीचा
न्येकविंशतिः॥ घृतस्यकर्षिकोहोमःक्षीरस्यमधुनस्तथा॥ शुक्तिमात्राकृतिर्दध्नःप्रसृतिःपायसस्यतु॥ खंडत्रयंतु
मूलानांफलानांस्वप्रमाणतः॥ ग्रासमात्रंतुहोमंस्यात्इतरेषांचतंडुलाः॥ अक्षताःसक्तयवाःप्रोक्ताःअभावेव्रीहयः
स्मृताः॥ तदभावेतुगोधूमानतुखंडितंतंडुलाः॥ येषांकेषांचिद्द्रव्याणामयसंभवे॥ सर्वत्राज्यमुपादेयंभार

द्वाजमुनेर्मतात् ॥ सर्वप्रमाणमाकृत्याप्यंचांगुलगृहीतयेति ॥ सर्वत्रसूक्ष्माणिपंचपंचव ॥ इक्षूणांपर्वकिंमानंलतानामंगु
लद्वयं ॥ चंद्रचंदनकाश्मीरकस्तूरीयक्षकर्दमात् ॥ कलायासंमितानेतान्गुग्गुलबदरास्थियत् ॥ द्रवंस्रुवेणहो
तव्यंपाणिनाकठिनंहविः ॥ स्रुवशूर्पाद्याःप्रोक्ताःकठिनायासमात्रकाः ॥ व्रीहयोयवगोधूमप्रियंगुतिलशालयः ॥ स्व
रूपेणैवहोतव्याइतरेषांचतंदुलाः ॥ अथऋत्विग्वरणं ॥ हेमाद्रौपाद्मे ॥ वाल्याग्निहोत्रिणांविप्रंसुरूपंचगुणान्वितं ॥
सपत्नीकंचसंपूज्यभूषयित्वाचभूषणैः ॥ पुरोहितेमुख्यतमंकृत्वान्यांश्चतथार्त्विजः ॥ चतुर्विंशद्गुणोपेतान्सप
त्नीकान्निमंत्रितान् ॥ अहतांबरसंपन्नान्स्रग्विणःशुचिभूषितान् ॥ अंगुलीकानिचतथाकर्णवेष्टान्प्रदापयेत् ॥ त
त्रैलिंगे ॥ वस्त्रयुग्मंतथोष्णीषंकुंडलेकंठभूषणं ॥ अंगुलीभूषणंचैवमपिबाहुस्यभूषणं ॥ एतानिचैवसर्वाणि
प्रारंभेधर्मकर्मणो ॥ पुरोहितायदत्त्वायऋत्विक्भ्यःसंप्रदापयेत् ॥ पूर्वोक्तभूषणंसर्वंसोष्णीषंवस्त्रसंयुतं ॥ द
द्यात्तदर्धयेत्तेभ्यआच्छादनपटंतथा ॥ वृतानांमधुपर्कमाह ॥ तत्रैवविश्वामित्रः ॥ संपूज्यमधुपर्केणऋत्विजः
कर्मकारयेत् ॥ अपूज्यात्कारयेत्कर्मकिल्बिषेनैवयुज्यते ॥ ऋत्विजांसंख्यामाह ॥ तत्रैवमात्स्ये ॥ हेमालंकारि
णःकार्याःपंचविंशतिऋत्विजः ॥ दक्षयेत्समसमःसर्वानाचार्यंद्विगुणंभवेदिति ॥ दक्षिणयातोषयेदित्यर्थः ॥ अ
थसर्वतोभद्रमंडलं ॥ हेमाद्रौस्कांदे ॥ प्रागुदीच्यांगतारेखाःकुर्यादेकोनविंशतिः ॥ एवंकृतेतुत्रिपदःकोणःश्रृंख १०

लापूर्वभिःपदैः॥एकादशपदावल्लीभद्रंतुनवभिःपदैः॥चतुर्विंशत्पदावापिपरिधिर्विंशतिःपदैः॥मध्येषोडश
भिःकोष्ठैःपद्ममष्टदलंस्मृतं॥तत्र॥आद्यंतत्तृतीयंततएवमृतंमृताद्द्वितीयंचततश्चतुर्थंआद्यवत्तस्मादितिचक्र
कारैर्बंधंभवेदष्टदलंतुपद्मं॥श्वेतेंदुःशृंखलाकल्पावल्लीनीलेनपूरयेत॥भद्राअरुणासितावापिपरिधिःपीतवर्ण
कः॥बाह्यांतरदलंश्वेतांकर्णिकापीतवर्णिका॥परिध्यावेष्टितंपद्मंबाह्येमलरजस्तमैः॥तन्मध्येस्थापयेद्देवां
ब्रह्माद्यांश्चसुरासुरान्॥इतिसर्वतोभद्रं॥आग्नेये॥चतुर्विंशतिरालेख्यारेखाःप्राग्दक्षिणायता॥कोणेषु
शृंखलापंचपदावल्यस्तुपार्श्वस्कोनतः॥पदैर्नवभिरालेख्याचतुर्भिर्लघुशृंखलाः॥लघुवल्ल्यःपदैःषड्भिस्त
तोष्टदशभिःपदैः॥कृत्वालिंगानिवाप्यस्तुत्रयोदशभिरंतरा॥ततोवीथीद्वयेनैवपीठंकुर्याद्विचक्षणः॥त
स्यःपदापंचपदाद्वाराण्यपि॥तथैवच॥एकाशीतिपदंमध्येपद्मंस्वस्तिकमुच्यते॥कोणेषुशृंखलाकार्यापदैस्त्रि
भिरनंतरं॥पदैश्चतुर्भिर्दिक्षुसुशुभ्रद्वाण्येषांसमंततः॥एकादशपदावल्योमध्येष्टदलमालिखेत॥पद्मंनवपदं
ह्येवंलिंगतोभद्रमुच्यते॥शृंखलाकृष्णवर्णेनवल्लीनीलेनपूरयेत॥रक्तेनशृंखलालघ्वीवल्लीःपीतेनपू
प्प रयेत॥लिंगानिकृष्णवर्णानिश्वेतेना[illegible]थवापिकाः॥पीठंसपादंश्वेतंनपीतेनद्वारपूरणं॥मध्येस्थःशृंख
लारक्ताःवल्लीनीलेनपूरयेत॥भद्राणिपीतवर्णानिपीतापंकजकर्णिका॥दलानिश्वेतवर्णानियद्वाचित्राणि
कल्पयेत॥त्रिस्त्रोरेखाबहिःकार्यासितरक्तासिताःक्रमादिति॥अथचतुर्लिंगोद्भवलिंगं॥रेखास्त्वष्टादश

प्रोक्तांश्चतुर्लिंगसमुद्भवे ॥ खंडेंदुस्त्रिपदश्वेतस्त्रिपदैः कृष्णशृंखलाः ॥ वल्ली सप्तपदा नीला भद्रं रक्तं चतुष्पदं ॥
भद्रपार्श्वे महारुद्रं कृष्णमष्टादशैः पदैः ॥ शिवस्य पार्श्वतो वापी कुर्यात्पंचपदां सितां ॥ पद्ममेकं तथा पीतं भद्रं
वाप्योरक्तमध्यमः ॥ शिरसि शृंखलायाश्च कुर्यात्पीतं पदत्रयं ॥ लिंगानां स्कंदतः कोष्ठा विंशती रक्तवर्णकाः ॥
परिधिः पीतवर्णः स्यात्पदैः षोडशभिः स्मृतः ॥ पदैः स्यात् नवभिः पश्चाद्भद्रं पद्मं सकर्णिकं ॥ अथ द्वादशलिंगोद्भवं ॥
तत्रैवांशपुदीच्यायक्ताररेखाः अष्टत्रिंशद्विप्रकल्पयेत् ॥ पदानि द्वादश शतं पंचविंशतिरेव च ॥ खंडेंदुः स्त्रिप
दः कोणे शृंखला षट्पदैः स्मृता ॥ त्रयोदशपदा वल्ली भद्रं तु नवभिः पदैः ॥ त्रयोदशपदा वापि लिंगमष्टादशैः
स्मृतं ॥ पदानि त्रीणि पातानि वल्लिवाप्योश्च मध्यतः ॥ लिंगत्रयस्य पंक्तौ तु शोभा कोष्ठाश्चतुर्दश ॥ तेषामुप
रि पंक्तौ तु कोष्ठाः सप्तदशैव तु ॥ पूजापंक्तिः स्मृता विज्ञेया परितः परिकल्पिताः ॥ पूजापंक्त्यांतरा पंक्तौ कोष्ठान्य
शीतिसंख्यया ॥ परिधिः सप्तविज्ञेयो मंडलयोरंतराद्वयोः ॥ परिध्यंतरकोष्ठेषु सर्वतोभद्रमालिखेत् ॥ विशे
षश्चात्र विज्ञेयः शृंखला षट्पदा भवेत् ॥ त्रयोदशपदा वल्ली भद्रं तु नवभिः पदैः ॥ पंचविंशत्पदा वापि परि
धिः षोडशात्मकः ॥ मध्ये नवपदं पद्मं कर्णिकाकेसरान्वितं ॥ सत्वरजस्तमोवर्णाः परितो मंडलस्य तु
त्रयः कार्यास्तत्र द्वाराणि कारयेत् ॥ सितेंदुः शृंखलाः कृष्णा वल्ली नीला प्रकीर्तिता ॥ भद्रं चैव वारुणं ज्ञेयं वापी
स्याद्धेतवर्णिका ॥ लिंगानि कृष्णवर्णानि पार्श्वतो द्वादशैव तु ॥ परिधिः पीतवर्णः स्यात्कमलं पंचवर्णकं ॥

इति लिंगतोभद्रमंडलानि ॥ ॥ अथ मंडलदेवताः ॥ ॥ तत्र मध्ये ब्रह्माणं ॥ ब्रह्मजज्ञानं गौतमो ब्रह्मा त्रिष्टुप् ॥ ब्रह्मस्था
पनस्य जने विनियोगः ॥ एवमग्रेपि ॥ ब्रह्मजज्ञानं ॥ ततउदीचीमारभ्य वायवीपर्यंतं सोमादयो वायवंता अष्टौ लोकपाल
स्थापनीयाः ॥ तत्र आप्यायस्व गौतमः सोमो गायत्री ॥ ॐ आप्यायस्व ॥ अभित्वाजीगर्तिः शुनःशेप ईशानो [illegible]त्री ॥ अ
भित्वा देवसवितः ॥ इंद्रो मधुछंदा इंद्रो गायत्री ॥ इंद्रं वो विश्वतः ॥ अग्निं काण्वो मेधातिथिरग्निर्गायत्री ॥ अग्निं दूतं ॥ य
माय सोमं यमोनुष्टुप् ॥ यमाय सोमं ॥ मोषुणो घोरः कण्वो निर्ऋतिर्गायत्री ॥ मोषुण ॥ तत्वायामि शुनःशेपो वरुण:
स्त्रिष्टुप् ॥ तत्वायामि ॥ वायो शतं गौतमो वायुरनुष्टुप् ॥ वायो शतं ॥ वायुसोममध्ये अष्टौ वसून् ॥ ज्मायां अत्र वसवो मै
त्रावरुणो वसिष्ठो वसवस्त्रिष्टुप् ॥ ज्मया अत्र ॥ सोमेशानमध्ये एकादश रुद्रान् ॥ आरुद्रासः श्यावाश्व एकादश रुद्रा
जगती ॥ आरुद्रासः ॥ इशानेंद्रमध्ये द्वादशादित्यान् ॥ त्यान्नु सामं दोभत्स्यो द्वादशादित्या गायत्री ॥ त्यान्नु क्षत्रिया
न् ॥ इंद्राग्निमध्ये अश्विना राहूगणो गौतमो अश्विना उष्णिक् ॥ अश्विनावर्तिः ॥ अग्नियममध्ये विश्वेदेवान् सपैत्र
कान् ॥ ओमासो मधुछंदा विश्वेदेवा गायत्री ॥ ओमासः ॥ यमनिर्ऋतिमध्ये सप्त यक्षान् ॥ अभित्यं देवं सप्त यक्षा
प्रकृतिः ॥ अभित्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मतिं कविं ॥ ऊर्ध्वायस्यामति
र्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः ॥ निर्ऋति वरुणमध्ये भूतनागान् ॥ आसं
गोः सार्परात्निः सर्पा गायत्री ॥ आयंगौः ॥ वरुणवायुमध्ये गंधर्वाप्सरसः ॥ अप्सरसामेत चात ऋष्यश्रृंगो गंध

कोम्सरसोनुष्टुप्॥ अप्सरसांगंधर्वाणां॥ ब्रह्मसोममध्येस्कंद नंदीश्वरशूल महाकालान्॥ कुमारंमातास्कंदस्त्रिष्टुप्
कुमारंमाता॥ ऋषभंमे वैराजोऋषभोनुष्टुप्॥ ऋषभंमा॥ ब्रह्मेशानामध्येदक्षादीन्सप्त॥ अदितिर्लोक्योबृहस्प
तिर्दक्षोनुष्टुप्॥ अदितिह्यजनिष्ट॥ ब्रह्मेंद्रमध्येदुर्गाविष्णुंच॥ तामग्निवर्णांसोभरिदुर्गास्त्रिष्टुप्॥ तामग्निवर्णां॥
इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री॥ इदंविष्णुः॥ ब्रह्माग्निमध्येस्वधा॥ उदीरतांशंखःस्वधात्रिष्टुप्॥ उदी
रतामवरः॥ ब्रह्मयममध्येमृत्युरोगान्॥ परंमृत्योःसंकुसकेमृत्युरोगास्त्रिष्टुप्॥ परंमृत्योअनुपरेहि॥ ब्रह्म
निर्ऋतिमध्येगणपतिं॥ गणानांत्वागृत्समदोगणपतिर्जगती॥ गणानांत्वा॥ ब्रह्मवरुणमध्ये॥ शन्नोदेवीःसिं
धुद्वीपआपोगायत्री॥ शन्नोदेवीः॥ ब्रह्मवायुमध्ये॥ मरुतोयस्यराहूगणोमरुतोगायत्री॥ मरुतोयस्य॥ ब्रह्म
णःपादमूलेकर्णिकाधःपृथ्वीं॥ स्योनामेधातिथिर्भूमिर्गायत्री॥ स्योनापृथिवि॥ तत्रैवगंगानद्यः॥ इमंमेगंगेसिं
धुक्षित्प्रैयमेधागंगायमुनासरस्वत्योजगती॥ इमंमेगंगेयमुने॥ तत्रैवसप्तसागरान्॥ धाम्नोधाम्नोराजन्नितो
वरुणनोमुंच॥ यदापोअघ्न्याइतिवरुणेतिशपामहेततोवरुणनोमुंच॥ मयिवापोमोषधीर्हिंसीरतोविश्वव्य
चाअभूस्त्वेतोवरुणनोमुंच॥ तदुपरिमेरवेनमइतिनाम्नामेकं॥ ततोमंडलाद्बहिः॥ सोमादिसमीपतःक्रमेण
युधानि॥ गदां॥ त्रिशूलं॥ वज्रं॥ शक्तिं॥ दंडं॥ खड्गं॥ पाशं॥ अंकुशं॥ तद्बाह्येपुनरीपतेनैवक्रमेण॥ गौ
तमं॥ भरद्वाजं॥ विश्वामित्रं॥ कश्यपं॥ जमदग्निं॥ वसिष्ठं॥ अत्रिं॥ अरुंधतीं॥ तद्बाह्ये॥ पूर्वादि॥ ऐंद्रीं॥

कौमारी। ब्राह्मी। वाराही॥ चामुंडा॥ वैष्णवी॥ माहेश्वरी॥ विनायकी॥ इत्यष्टौ शक्तयः॥ प्रतिष्ठाप्रत्येकंसह वा पूजये
त्॥ इतिमंडलदेवताः॥ ॥अथमुद्रालक्षणानिहमादौ॥ संमुखीकृत्यहस्तौद्वौकिंचित्संकुलितांगुली॥ मुकुली
तुसमाख्यातापंकजंप्रस्तुतेवसा॥ पूर्वोक्तामुकलीयाचप्रदेश्येयनिःसृतांगुलिः॥ व्याकोशमुद्राप्रफुलाप
द्ममुद्राप्रदर्शयेत्॥ अंगुष्ठौवर्त्तितौतौतुस्वकीयांगुलिवेष्टितौ॥ उच्चावाभिमुखौहस्तौयोजयित्वातुनिष्ठु
रा॥ तर्जिन्योकुंचितेकलातथैवचकनीयसी॥ अधोमुखीदृष्टनखास्थितामध्येकरस्यतु॥ चतस्रश्चोत्थिताः
पृष्ठेअंगुष्ठावेकतःकुरु॥ नालव्यवस्थितौद्वौतुव्योममुद्राप्रकीर्तिता॥ तत्रांतरेसर्वदेवतापूजनेनसाध
रण्येनषण्मुद्राउच्यते॥ देवतानेनसंतुष्टासर्वेसन्मुखीभवेत्॥ अंगुष्ठौनिक्षिपत्क्षेपमुद्रात्वावाहिनीम
ता॥ उच्छ्रिताउच्छ्रितौकुर्यासंमुखीकरणीभवेत्॥ प्रसृतांगुलिकौहस्तौमिथःश्लिष्टौतुसंमुखेः॥ कुर्यात्स्व
हृदयेसेयंमुद्राप्रार्थितसंज्ञिता॥ इत्येवंसर्वदेवानांपूजनेषट्प्रदर्शने॥ शिवपूजनेलिंगमुद्राउच्छ्रितंदक्षिणां
गुष्ठंवामांगुष्ठेनबंधयेत्॥ वामांगुल्लीर्दक्षिणाभिःअंगुलीभिश्चवेष्टयेत्॥ लिंगमुद्रेयमाख्याताशिवसान्नि
ध्यकारिणी॥ श्रीकामःश्रीर्बिंकुर्यात्तदाज्यकामस्तुनेत्रयो॥ मुखवत्तन्नाद्यकामस्तुश्रीवायांरोगशांतिकृ
त्॥ हृदयेसर्वकामीवज्ञानार्थीनाभिमंडे॥ राज्यकामस्तुगुह्येवैराष्ट्रकामस्तुपादयोः॥ रामपूजनेसप्त

दशमुद्रासंमुखीकरणंतथा॥संकुलीकरणंचैवमहामुद्रातथैवच॥शंखचक्रगदापद्मधेनुकौस्तुभगारुडाः
श्रीवत्सवनमालेचयोनिमुद्राःप्रदर्शयेत्॥एताभिःसप्तदशभिर्मुद्राभिस्तुविचक्षणः॥योराममर्चयेन्नित्यंमोह
यत्ससुरेश्वरं॥द्रावयेदपिविप्रेंद्रततःपार्थिवमाप्नुयात्॥मूलाधाराद्द्वादशांतमानीतकुसुमांजलिः॥त्रि
स्थानगततेजोभिर्विनीतःप्रतिमादिषु॥आवाहनीयमुद्रास्यादेवार्चनविधौमुने॥एषैवाधोमुखीचार्चनवि
धौमुने॥अंगुष्ठगर्भिणीसैवमुद्रास्यात्संनिरोधिनी॥उत्तानमुष्टियुगलासंमुखीकरणीमता॥अंगैर
वांगविन्यासःसकलीकरणंभवेत्॥अन्योन्यांगुष्ठसंलग्नाविस्तारितकरद्वयी॥महामुद्रेयमाख्यातान्यून
धिकसमापनी॥कनिष्ठानामिकामध्यात्तस्थांगुष्ठात्तदग्रतः॥गोपितांगुष्ठमूलेनसंन्नधामुकुलीकृता॥
करद्वयेनमुद्रास्याच्छंखाख्येयंसुरार्चने॥अन्योन्याभिमुखस्पष्टौव्यत्ययेनतुवेष्टयेत्॥अंगुलीभिःप्रयत्ने
नमंडलीकरणंमुने॥चक्रमुद्रेयमाख्यातागदामुद्राततःपरं॥अन्योन्याभिमुखाश्लिष्टाततःकौस्तुभ
संज्ञिता॥कनिष्ठेन्योन्यसंलग्नेमुखेबहिरपरस्परं॥वामस्थतर्जनीमध्येमध्यानामिकयोरपि॥वामानामि
कसंस्पृष्टातर्जनीमध्यशोभिता॥पर्यायेणानतांगुष्ठद्वयोकौस्तुभलक्षणा॥कनिष्ठोन्योन्यसंलग्नाविप
रीतंतुयोजिता॥अधस्तात्स्थापितांगुष्ठामुद्रागारुडसंज्ञिका॥तर्जन्यंगुष्ठमध्यस्थामध्यमानामिकाद्वयी॥

कनिष्ठानामिका मध्य तर्जनीभ्यां दिवौकसः॥ योनिमुद्रा समाख्याता घोतत्कारद्वयाश्रिता॥ तर्जन्याङ्गुष्ठम
ध्यांते स्थितानामिकयुग्मिका॥ मध्यस्थलस्थितांगुष्ठायेयं शस्तानुमेर्चयेइति॥ इतिमुद्रालक्षणं॥ अथोप
पचाराः पदार्थादर्शे ज्ञानमालायां॥ अष्टत्रिंशत्षोडशो वा दशपंचोपचारकाः॥ तान्विभज्य प्रवक्ष्यामि केतेतेस्य
कि॥ अर्घ्यं च पाद्याचमने मधुपर्कमुपस्पृशं॥ स्नानं नीराजनं वस्त्रमाचमं चोपवीतकं॥ पुनराचामभूषेच
दर्पणालोकनं ततः॥ गंधपुष्पे धूपदीपौ नैवेद्यं च ततः क्रमात्॥ पानीयं तोयमाचामं हस्तवासस्ततः परं॥ ह
स्तावासः करोद्वर्तनं॥ तांबूलमनुलेपं च दक्षिणां तु पुनःपुनः॥ गीतवाद्यं तथा नृत्यं स्तुतिं चैव प्रदक्षिणां॥ पुष्पां
जलिनमस्कारावष्टत्रिंशत्समीरिता॥ इत्यष्टत्रिंशत्॥ आसनं स्वागतं चार्घपाद्यमाचमनीयकं॥ मधुप
र्कासनस्नानवसनाभरणानि च॥ सुगंधसुमनोधूपदीपमन्नेन तर्पणं॥ माल्यानुलेपने चैव नमस्कार
विसर्जने॥ इतिषोडश॥ अर्घ्यपाद्याचमन्येव मधुपर्कोचमान्यपि॥ गंधाद्यो निवेद्यांता उपचारा दश
क्रमादिति दश॥ गंधपुष्पे धूपदीपौ नैवेद्यं पंचमं स्मृतं॥ इतिपंच॥ शारदातिलके षोडशोक्ताः तथा आ
सनस्नानवस्त्रभूषणानि परित्यज्य द्वादशमहाकपिलपंचरात्रे॥ गंधतैलमथादद्याद्देवस्याप्रतिमं

ततः॥ दूर्वांतु विष्णुक्रांतं च श्यामाकं पाद्यपाद्यमेव वा॥ पाद्यांगानि च चत्वारि कथितानि समासतः॥ कर्पूर
मगुरुं पुष्पं द्रव्याण्याचमनीयके॥ सिद्धार्थमक्षतं चैव दूर्वां तिलकमेव च॥ पंचगंधफलं पुष्पमष्टांगम
र्घ्यमुच्यते॥ स्नाने वस्त्रे तथा भक्ष्ये दद्यादाचमनीयकं॥ उद्वर्त्तनमपि तत्रैव॥ रजनी सहदेवी च शिरीषं ल
क्ष्मणापि वा॥ सहभद्राकुशाग्रापि उद्वर्त्तनमिहोच्यते॥ मंत्रप्रकाशे॥ अक्षता गंधपुष्पाणि स्नानपात्रे तथा त्रयं॥
तत्रैव॥ द्रव्याभावे प्रदातव्याः क्षालितास्तंडुलाः शुभाः॥ अगस्त्यसंहितायां॥ तथाचमनपात्रेपि दद्याज्जा
तीफलं मुने॥ लवंगमपि कंकोलं शस्तमाचमनीयके॥ उक्तद्रव्यालाभे तंत्रांतरे॥ तंडुलान् प्रक्षिपेत्तेषु
द्रव्याभावे तु तत्स्मरन्॥ प्रयोगपारिजाते व्यासः॥ प्रतिमापटयंत्राणां नित्यस्नानं न कारयेत्॥ कारयेत्प
र्वदिवसे यदा वा मलधारणं॥ ज्ञानमालायां॥ नाक्षतैरर्चयेद्विष्णुं न तुलस्या गणाधिपं॥ न दूर्वया य
जेद्देवीं बिल्वपत्रैर्दिवाकरं॥ उन्मत्तमर्कपुष्पं च विष्णोर्वर्ज्यं सदा बुधैः॥ अक्षतास्तु यवाः प्रोक्ता इति
पदार्थादर्शोक्तत्वाद्यवानामेवायं प्रतिषेधो न तंडुलादीनां तंत्रांतरे॥ महाभिषेकं सर्वत्र शंखेनैव
प्रकल्पयेत्॥ सर्वत्रैव प्रशस्तोब्जः शिवसूर्यार्चनं विनेति॥ विस्फुरस्फुरत्तात्तद्रणकृते आचारमयू १४

खेद्रष्टव्यः॥ अथ व्रतोद्यापनानुक्तौ विधिः॥ ॥पृथ्वीचंद्रोदये नंदिपुराणे॥ कुर्यादुद्यापनं तस्य समाप्तौ यदुदीरि-
तं॥ उद्यापनं विना यत्तु तद्व्रतं निष्फलं भवेत्॥ यत्र चोद्यापनं नोक्तं व्रतानुगुणतश्चरेत्॥ वित्तानुसारतो दद्यादनु-
क्तोद्यापने व्रते॥ गां चैव कांचनं दद्यात् व्रतस्य परिपूर्त्तये॥ समाप्ता उद्यापनविषये॥ उक्तोद्यापने तु आहोम
ध्येतथानोक्ते व्रतस्योद्यापनं भवेदिति वचनात्रितयत्रापि॥ अथ व्रतभंगे संपूर्णताविधिर्हेमाद्रौ भविष्ये॥
युधिष्ठिर उवाच॥ ॥संपूर्णतामनुष्ठानं व्रतानां तु जनार्दन॥ कुरु प्रसादं गुह्यार्थमेतन्मे वक्तुमर्हसि॥ ॥श्री
श्रीकृष्ण उवाच॥ ॥साधु साधु महाबाहो कुरुराज युधिष्ठिर॥ रहस्यानां रहस्यं ते कथयामि व्रतं तव॥ संपू-
र्णता कृता यत्र तत्तत्सम्यक्फलप्रदं॥ यच्चीर्णं नरनारीभिर्भवेत्संपूर्णकारकं॥ अवश्यं तच्च कर्त्तसंपूर्णफ-
लकांक्षिभिः॥ किंचिद्भग्नं प्रमादेन यद्व्रतं व्रतिनां स्थितं॥ तत्संपूर्णं भवेत्सर्वं व्रतेनानेन पांडव॥ रूपद्र-
व्ये बहुविधैर्महामोहाच्च पांडव॥ यद्भग्नं किंचिदेवस्यात्तद्व्रतं विघ्ननाशकं॥ तत्संपूर्णं भवेत्पार्थ सत्यं सत्यं
न संशयः॥ कांचनं रूपकं रूपं शिल्पिना तु घटापयेत्॥ भग्नव्रतस्य यो देवः तस्य रूप्यं विनिर्मितं॥ व्रतं
स्त्रीपुंसयोर्वापि प्रारब्धं यद्व्रतं किल॥ न च निष्पादितं किंचिद्दैवात्सर्वं तथा स्थितं॥ द्विभुजं पंकजारू-
ढं सौम्यप्रहसिताननं॥ निष्पादितं शिल्पिताथ तस्मिन्नेव दिने पुनः॥ तन्माने तु पुनः प्राप्ते ब्राह्म-

नोविधिनागृहे ॥स्नापयेत्पायसा दध्ना घृतक्षौद्ररसांबुभिः॥ गंधचंदनपुष्पैश्च पूजां कुर्यात्समाहितः॥ तोयपूर्णस्य
कुंभस्य मुखे विन्यस्य देवतां॥ धूपदीपाक्षतैर्वस्त्रै रत्नैर्बाहुपरारकैः॥ अर्घ्यं प्रदद्यात्तन्नाम्ना मंत्रेणानेन पांडव॥ रूपा
सनस्य दानस्य प्रायश्चित्तं कृतं जले॥ शरणं वः प्रपन्नास्मः कुरुध्वं दयां पुनः॥ प्रसन्ना भवती तस्य भिन्नं त्वयं व्रत
स्य॥ कुरु प्रसादं संपूर्णं व्रतं संजायतां मम॥ यज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि॥ तत्सर्वं त्वत्प्रसादेन संपूर्णं जा
यतां मम॥ पूर्वे दक्षिणपश्चात्सु उत्तरे च बलिं हरेत्॥ ऊर्ध्वाधस्तात्स्तेभ्यो दिक्पालेभ्यो नमो नमः॥ इदमर्घ्यमिदं
पाद्यं तेभ्यस्तेभ्यो नमो नमः॥ पादौ च जानुनी चैव कटिं शीर्षकवक्षसि॥ कुक्षी तु हृदयं पृष्ठं बाहू स्कंधौ शिरो गुहं॥
पूजयित्वास्य देवस्य तत्पश्चात्क्षमापयेत्॥ पूजां तस्य यथाशक्त्या न मत्तस्त्व सुरोत्तम॥ ऐहिकामुष्मिकी देव कार्यसि
द्धिं दिशस्व मे॥ एवं क्षमापयित्वा तु देवं रूपविधानतः॥ तन्मूर्तिं च द्विजातिभ्यो विधिवत्प्रतिपादयेत्॥ स्थिता पूर्वमु
खो विप्रो गृह्णीयाद्दर्भपाणिना॥ विप्रहस्ते प्रयच्छेच्च दाता चैवोत्तरामुखः॥ मंत्रेणानेन कौंतेय सोपवासः प्रयत्नतः॥
इदं व्रतं मया खंडं कृतमासीत्पुरा द्विज॥ तत्सर्वं पूर्णमेवास्तु कृतचमूर्तिप्रदानतः॥ ब्राह्मणोपि प्रयच्छेत्तं मंत्रेणानेन तद्व्र
तं॥ वक्ष्यं पूर्णो मतः पूजा व्रतेनानेन ते पुरा॥ संपूर्णं स्यात्प्रसादेन तव पूर्णमनोरथाः॥ ब्राह्मणाय प्रभाषेत्तत
मन्यंते दिवौकसः॥ सर्वदेवमया विप्रा नैतद्वचनमन्यथा॥ जलधिः क्षारतां नीतः पावकः सर्वभक्षतां॥ सहस्र

नेत्रःशक्रोऽपि कृती विप्रैर्महात्मभिः॥ ब्राह्मणानां तु वचनात् तस्माद्ब्रह्महत्या विनश्यति॥ अश्वमेधफलं सम्यग्लभते नात्र
संशयः॥ व्यासवाल्मीकवचनात् पाराशरवसिष्ठयोः॥ गांगेगौतमधौम्य त्रिवसिष्ठांगिरसस्तथा॥ वचनान्नारदा
दीनां पूर्णो भवतु मे व्रतं॥ एवंविधिविधानेन गृहीत्वा ब्राह्मणो व्रजेत्॥ दातात्तं(?) प्रेषयेत् सर्वं ब्राह्मणस्य गृहं स्वयं॥ ततः पं
चमहायज्ञान्निर्वपेद्द्विजनादिकं॥ एवं यः कुरुते भक्त्या व्रतमेतन्नरोत्तम॥ तस्य संपूर्णतां याति प्रसन्ने व्रतदेवते॥ फ
ग्नानियानि मद्मोहवशाद्गृहीत्वा जन्मांतरेष्वपि नरेण पासमत्सरेण॥ संपूर्णपूजनपरस्य पुरो भवंति पर्वव्रतानि परिपू
र्णफलप्रदानि॥ अथ सर्वव्रतेषु सामान्यतः पूजाविधिः॥ ॥ सहस्रशीर्षेत्यावाहनं॥ आगच्छ देवदेवेश तेजोराशि
गजत्पते॥ क्रियमाणां मया पूजां गृहाण सुरसत्तम॥ पुरुष एवेत्यासनं॥ नानारत्नसमायुक्तं कार्तस्वरविभूषितं॥ आसनं
देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां॥ एतावानिति पाद्यं॥ गंगादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं॥ तोयमेतत्सुखस्पर्शं पा
द्यार्थं प्रतिगृह्यतां॥ त्रिपादूर्ध्वेत्यर्घ्यं॥ नमस्ते देवदेवेश नमस्ते धरणीधर॥ नमस्ते कमलाकांत अर्घ्यं नः प्रतिगृह्यतां॥ ॥
तस्माद्विराळित्याचमनीयं॥ कर्पूरवासितं तोयं मंदाकिन्याः समाहृतं॥ आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः॥ य
त्पुरुषेणेति स्नानं॥ गंगा च यमुना चैव नर्मदा च सरस्वती॥ तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतं॥ तं यज्ञमिति
वस्त्रं॥ सर्वभूषाधिके देवलोकलज्जानिवारणे॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यतां॥ तस्माद्यज्ञात्सर्वहुतः संभृ
तमिति यज्ञोपवीतं॥ दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात्॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥ तस्माद्यज्ञात्स

सर्वहुतइतिगंधं॥श्रीखंडंचंदनंदिव्यंगंधाढ्यंसुमनोहरं।विलेपनंसुरश्रेष्ठप्रीत्यर्थंप्रतिगृह्यतां॥तस्मादश्वाइतिपुष्पं॥
माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो॥मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां॥तत्पुरुषमितिधूपं॥वनस्पतिर
सोधूपोगंधाढ्यःसुमनोहरः॥आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥ब्राह्मणोस्येतिदीपं॥आज्यंचवर्तिसंयुक्तंवह्निना
योजितंमया॥दीपंगृहाणदेवेशत्रैलोक्यतिमिरापह।चंद्रमाइतिनैवेद्यं॥अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं॥
भक्ष्यभोज्यसमायुक्तंनैवेद्यंप्रतिगृह्यतां॥इदंफलंमयादेवस्थापितंपुरतस्तवे।तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्म
नि॥नाभ्याआसीदितितांबूलं॥पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं॥कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां॥सप्त
तास्यासन्नितिदक्षिणां॥हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥चंद्रादित्यौ
चधरिणीविद्युदग्निस्तथैवच।त्वमेवसर्वज्योतींषिआर्तिक्यंप्रतिगृह्यतां॥इतिनिराजनं॥यज्ञेनेतिपुष्पांजलिः॥नम
स्तेपुंडरीकाक्षनमस्तेह्यमरप्रिये॥नमस्तेकमलाकांतवासुदेवनमोस्तुते॥यानिकानिचपापानिब्रह्महत्यासमा
निच॥तानितानिविनश्यंतिप्रदक्षिणपदेपदे॥इतिप्रदक्षिणा॥नमःसर्वहितार्थायजगदाधारहेतवे।साष्टांगोयंप्रणा
मस्तुप्रयत्नेनमयाकृतः॥इतिनमस्कारः॥इतिसामान्यपूजाविधिः॥इतिश्रीमीमांसकभट्टनीलकंठात्मजशंक
रकृतोव्रतार्कपरिभाषासमाप्तिमगमत्॥अथाद्येप्रतिपद्व्रतानि॥मात्स्ये॥वर्जयित्वामधौयस्तुदधिक्षीरघृतै
क्षवं॥दद्याद्वस्त्राणिसूक्ष्माणिरसपात्रैर्युतानिच॥रसपात्रंदध्यादिपात्रंसंपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति॥

हेमाद्रौपाद्मे॥ वर्जयेच्चैत्रमासे तु यस्तु गंधानुलेपनं॥ शुक्तिगंधस्तृतं दद्याद्द्विप्रायश्वेतवाससी॥ मत्स्यात्तु दक्षिणांद
द्यात्सर्वकामार्थसिद्धये॥ गंधदानवस्त्रदानमंत्रौ॥ चंद्रनावासमंदारसखे ष्टं दारकार्त्तिनं॥ चंदनत्वंप्रसादान्मेसांद्रा
नंदप्रदोभव॥ शरण्यं सर्वलोकानां लज्जयारक्षणपरं॥ सुवेषधारी त्वंयस्मोदतःशांतिप्रयच्छमे॥ इतिमंत्राभ्यांगंधवा
ससीदद्यात्॥ अथ चैत्रशुक्लप्रतिपदिसंवत्सरारंभविधिर्ब्राह्मे॥ अत्र प्रतिपत्सूर्योदयव्यापिनीग्राह्या॥ श्रीभगवानुवाच॥
चैत्रमासिजगद्ब्रह्मासससर्जप्रथमेहनि॥ शुक्लपक्षेसमग्रंतु तदासूर्योदयेसतीति ब्राह्मात्॥ प्रवृत्ते मधुमासे तु प्रति
पद्युदिते रवौ क्रियाश्च विष्णोत्तरात्॥ दिनद्वयेतद्व्याप्त्यव्याप्तौवापूर्वैव॥ वत्सरादौवसंतादौबलिराज्येतथैवच॥
पूर्वविद्धैव कर्तव्याप्रतिपत्सर्वदाबुधैरिति वृद्धवसिष्ठवचनादितिबहवः॥ युक्तंतु दिनद्वयेउदयसंबंधाभावे संवत्स
रारंभप्रयुक्तकार्यलोपप्रसक्तावित्यवचनं पूर्वयुताविधानकं दिनद्वये तत्संबंधे तु संपूर्णत्वाद्द्वपूर्वाप्राप्तेकदाक
र्यभिर्लोपिप्रसाविरहात्पूर्वयुतत्वाविरहाच्चैनेतद्वचनात्पूर्वेतिप्राप्ते प्रवर्तयामासतथाकालस्यगणनामपि॥ग्र
हादद्वादृतूमासान्पक्षात्संवत्सराधिपान्॥ इदोसहभगवान्ब्रह्मासर्वदेवसमागमे॥ ब्राह्मयसभायांब्रह्म
पापानिदृश्यतन्नुतत्कः॥ तथोक्तेस्तानमस्यंतुस्तुवंतश्चाप्युपासते॥ ततस्तेकृतशुश्रूषागत्वान्वैवस्त्रमालयं॥
स्वानिस्वान्यथ कर्माणितेनियुक्तास्तुचक्रिरे॥ ब्राह्मीसभाकामरूपावित्रोषणतदानच॥ धारयत्यमलंरू

पूमानिर्दृश्यमनोहराः॥ततःप्रभृतियोधर्मःपूर्वैःपूर्वतरैःकृतः॥अद्यापिगूढःसुतरांकर्त्तव्योसोप्रयत्नतः॥तत्रका
र्यमहाशांतिसर्वकल्मषनाशिनी॥सर्वोत्पातप्रशमनीकलिदुःखविनाशिनी॥आयुःप्रदापुष्टिकरीधनसौभा
ग्यवर्धिनी॥मांगल्याचपवित्राचलोकद्वयसुखावहा॥तस्यामादौवसेत्पूज्योब्रह्मालोकमलसंभवः॥पाद्यार्घ्य
पुष्पधूपैश्चवस्त्रालंकारभोजनैः॥होमैर्बल्युपहारैश्चतथाब्राह्मणतर्पणैः॥ततःक्रमेणदेवेभ्यःपूजाकार्यापृ
थक्पृथक्॥कृत्वोंकारनमस्कारौकुशोदकतिलाक्षतैः॥पुष्पधूपप्रदीपाद्यैर्भोजनैश्चयथाक्रमं॥मंत्रसंपूजनार्थं
तुबहुरूपंपरिस्पृशेत्॥मंत्रामितिजातवेकत्वेनवनेबहुरूपंमंत्रेनानारूपान्मंत्रान्परिगृह्णीयादित्यर्थः॥तेनॐ
नामोब्रह्मणइत्यादिविष्णवेपरमात्मनेनमइत्येवमंत्रवाक्यंदृष्टोपात्तदेवताशब्दार्थश्चचतुर्थ्यंताःप्रणवाद्योनमो
ताःमंत्रत्वेनग्राह्याः॥ॐनमोब्रह्मणेतुभ्यंकामायचमहात्मने॥नमस्तेस्तुनिमेषायत्रुटयेचनमोस्तुते॥लवायच
नमस्तुभ्यंनमस्तेस्तुक्षणायच॥नमोनमस्तेकाष्ठायैकालायैतेनमोनमः॥नाडिकायैसुसूक्ष्मायैमुहूर्त्तायै
नमोनमः॥नमोनिशाभ्यःपुण्येभ्योदिवसेभ्यश्चनित्यशः॥पक्षाभ्यामथमासेभ्यऋतुभ्यःषड्भ्यएवच॥अयना
भ्यांचपंचभ्योवत्सरेभ्यश्चसर्वदा॥नमस्कृत्ययुगादिभ्योग्रहेभ्यश्चनमोनमः॥राशिभ्यःकरणेभ्यश्चव्यतीपातेभ्य
एवच॥प्रतिवर्षाधिपेभ्यश्चविज्ञातेभ्योनमःसदा॥नमोस्तुकुलनागेसानुयात्रेभ्यएवच॥सानुयात्रेभ्यःसा

नुचरेभ्यः॥ नमश्चतुर्दशभ्यश्च तत्संख्येभ्यो नमोनमः॥ पंचाशते नयो नित्यं दक्षकन्याय एवच॥ नमो देव्यै सप्तद्वीपे
जयायै वाय सर्वदा॥ भृगुगस्त्राय नमस्तुभ्यं सर्वास्त्रजनकाय च॥ नमस्ते बहुपुत्राय पत्नीभिः सहिताय च॥ नमो बुध्यै
तथा बुध्यै निद्रायै धनदाय च॥ नलकूबरयक्षाय गुह्यकस्वामिने नमः॥ नमोस्तु शंखपद्माभ्यां निधिभ्याम
थ नित्यशः॥ भद्रकाल्यै नमो नित्यं सुरभ्यै च नमोनमः॥ वेदवेदांगवेदांतविद्यास्थानेभ्य एवच॥ नागायक्षसुव
र्णेभ्यो नमोस्तु गुरुडाय च॥ सप्तभ्यश्च समुद्रेभ्यः सागरेभ्यश्च सर्वदा॥ उत्तरेभ्यः कुरुभ्यश्च नमो हैरण्यता
यच॥ भद्राश्वकेतुमालाभ्यां नमः सर्वत्र सर्वदा॥ इलावृताय च नमो हरिवर्षाय वै तथा॥ नमः किंपुरुषेभ्यश्च भार
ताय नमोनमः॥ नमो भारतभेदेभ्यो नवभ्यश्चाथ सर्वदा॥ पातालेभ्यश्च सप्तभ्यो नरकेभ्यो नमोनमः॥ काला
ग्निरुद्रशेषाभ्यां हरये क्रोडरूपिणे॥ सप्तभ्यस्तु लोकेभ्यो महाभूतेभ्य एवच॥ नमस्ते बुद्धये चैव नमः प्रकृत
ये तथा॥ पुरुषायाभिमानाय नमोस्त्वव्यक्तमूर्तये॥ हिमवत्प्रमुखेभ्यः पर्वतेभ्यो नमस्तथा॥ पौराणिभ्यश्च गंगा
भ्यः सप्तभ्यश्च नमोनमः॥ नमोस्त्वाद्यमुनिभ्यश्च सप्तभ्यश्चाथ सर्वदा॥ नमोस्तु पुण्यादिभ्यः तीर्थेभ्यश्च पु
नःपुनः॥ निम्नगाभ्यो नमो नित्यं वितस्ताद्याभ्य एवच॥ चतुर्दशेभ्यो दीर्घेभ्यो धारिणीभ्यो नमोनमः॥ नमो धा
त्रे विधात्रेभ्यः छंदोभ्यश्च नमोनमः॥ सुरभ्यैरावणाभ्यां च नमोभ्यो नमोनमः॥ नमस्तथोच्चैःश्रवसे च वाय

नमो नमः ॥ नमोस्तु धन्वंतरये शास्त्राभ्यं नमः सदा ॥ विनायककुमाराभ्यां विघ्नेभ्यश्च नमः सदा ॥ शाखायचवि
शाखाय नैगमेयाय वै नमः ॥ नमस्कंदग्रहेभ्यश्च स्कंदमातृभ्य एव च ॥ जराय रोगपतये भस्मप्रहरणाय च ॥ ऋ
षिभ्यो वालिखिल्येभ्यः केशवाय नमः सदा ॥ अगस्त्याय नारदाय व्यासादिभ्यो नमो नमः ॥ अप्सरेभ्यः सोमपे
भ्यः देवेभ्यश्च नमो नमः ॥ असोमपेभ्यश्च नमस्तुषितेभ्यो नमः सदा ॥ आदित्येभ्यो नमो नित्यं द्वादशाभ्यश्च स
र्वशः ॥ एकादशेभ्यो रुद्रेभ्यस्तपस्विभ्यो नमो नमः ॥ नमो नासत्यदस्राभ्यामश्विभ्यां नित्यमेव हि ॥ साध्येभ्यो
द्वादशेभ्यश्च पौराणेभ्यो नमः सदा ॥ एकोनपंचाशते च मरुद्भ्यश्च नमः सदा ॥ शिल्पाचार्याय देवाय नमस्ते वि
श्वकर्मणे ॥ अष्टभ्यो लोकपालेभ्यः सानुगेभ्यश्च सर्वदा ॥ आयुधेभ्यो वाहनेभ्यो चर्मभ्यश्च नमः सदा ॥
आसनेभ्यो दुंदुभीभ्यो देवेभ्यश्च नमः सदा ॥ दैत्यराक्षसगंधर्वपिशाचेभ्यश्च नित्यशः ॥ पितृभ्यः सप्तभे
देभ्यः प्रेतेभ्यश्च नमो नमः ॥ सुसूक्ष्मेभ्यश्च देवेभ्यो भावगम्येभ्य एव च ॥ नमस्ते बकुरूपाय विप्लव परमात्म
ने ॥ अथ किं बकुनो केन मंत्रेणानेन वाचयेत् ॥ प्राङ्मुखो उदङ्मुखो विप्रान् देवानुद्दिश्य पूर्ववत् ॥ अथवा किं मन्त्र
विस्तारेण ब्राह्मणो नैवेद्यवता द्विजेन पूजयेदित्यर्थः ॥ पूर्ववत् मंत्रोक्तक्रमेणार्घ्यपुष्पैश्च धूपैश्च वस्त्रै १५
माल्यैः सदक्षिणं सरोमांचहृष्टरोमा सन्नर्चयेदित्यर्थः ॥ धनधान्यादिविभवैर्दक्षिणाभिश्च सर्वदा ॥ इति हा

सपुराणानांप्रश्रश्चद्विजोत्तमाः॥ कालज्ञान्वेदेदैवज्ञान्स्थ्यान्संबंधिबांधवान्॥ अनेनैवतुमंत्रेणस्वाहांते
नपृथक्पृथक्॥ यविष्टायाग्रहेहोमःकर्तव्यःसर्वसिद्धये॥ वेदविच्चक्षुषीदत्वास्थानेप्राधानिकेसति॥ यविष्टाय
यश्रेष्ठायवेदविन्वेदोक्तविधिज्ञः मदनरत्नेतुवेदवदेइतियष्ट्वावेदोक्तविधिनेतिव्याख्यानं॥ चक्षुषीआज्यभा
गौ॥ प्राधानिकेस्थानेप्रधानहोमारंभे॥ होमारंभेततःकुर्यान्मंगलालंभनंततः॥ मदनरत्ने॥ शालाशोभा
ततःकार्यामंगलालंभनंततइतिपाठः॥ भोजयित्वाद्विजान्सर्वान्सुहृत्संबंधिबांधवान्॥ विशेषेणचभोक्तव्यं
कार्यश्चापिमहोत्सवः॥ नवसंवत्सरारंभःसर्वसिद्धिप्रवर्तकः॥ इतिसंवत्सरारंभविधिः॥ ॥ अथात्रैवविष्णुध
र्मोत्तरोक्तमारोग्यप्रतिपद्व्रतं॥ पुष्करउवाच॥ संवत्सरावसानेतुपंचदश्यामुपोषितः॥ प्रातःप्रतिपदिस्नातःकु
र्याद्व्रतमनन्यधीः॥ पूजयेद्भास्करंदेवंवर्णकैःकमलेकृते॥ वर्णकैःरक्तश्वेतनीलपीतादिभिः॥ शुक्लेनगंधमा
ल्येनचंदनेनसितेनच॥ तथाकुंदुरुधूपेनभार्गवकुंदुरुसल्लकीनिर्यासः॥ अपूपैःसंस्कृतैर्दध्नापरमान्नेनभू
रिणा॥ संस्कृतैःशर्कराविकारैः॥ ओदनेनचशुक्लेनसताललवणसर्पिषा॥ सतालउत्तमेनचक्षीरेणचफलैःशुक्लै
र्वह्निब्राह्मणतर्पणे॥ पूजयित्वाजगन्नाथंदिनभागेचतुर्थके॥ आहारंप्रथमंकुर्यात्सघृतंमनुजोत्तम॥ स
र्वेषुमनुजश्रेष्ठघृतहीनंविवर्जयेत्॥ शुक्लांचसकृद्देवान्नमाहारंचसमाचरेत्॥ पानीयपानंकुर्वीतब्राह्म

पाल्दुमुतेपुनः॥ प्रथममाहारे प्रथमग्रासे॥ सर्वप्रथमे प्रथमे वाहारे॥ एकमेवग्रासं भक्षयित्वा शिष्टमन्नंत्यजेत॥
ब्राह्मणानुमत्यापुनराहारमवशिष्टान्नभोजनं॥ पुनः पानीयपानं च कुर्यादित्यर्थः॥ ब्राह्मणानुमत्या भुंजानोपि
घृतहीनं न भुंजीत॥ घृतहीनं विवर्जयेदिति निषेधात्॥ संवत्सरमिदं कृत्वाकृतः॥ सा स्नात्वा ज्ञानं देवतास्मिन्न हनिभा
र्गवि॥ संवत्सरं वत्सरस्शुक्लप्रतिपत्क॥ त्रयोदशामिति लिंगदर्शनात्॥ सवस्त्रं सहिरण्यं च ततो दद्याद्द्विजायते॥
पूजनं पूजोपकरणं प्रतिमादि॥ व्रतेनानेन धर्मज्ञ रोगमेवं व्यपोहति॥ आरोग्यमाप्नोति गतिं तथाप्यायशास्त्र
थाग्र्यं विपुलांश्च भोगान्॥ व्रतेन सम्यक्पुरुषोथनारी संपूजयेद्यस्तु जगत्प्रधानं॥ जगत्प्रधानं सूर्यं॥ आरो
ग्यप्रतिपद्व्रतं॥ अथास्यामेवोक्तविद्याप्रतिपद्व्रतं॥ मदनरत्ने विष्णुधर्मे॥ मार्कंडेय उवाच॥ अष्टपत्रं तु कमलं
विन्यसेद्वर्णकैः शुभैः॥ ब्राह्मणो कर्णिकायां तु न्यस्य संपूजयेद्द्विजः॥ ऋग्वेदं पूर्वपत्रे तु यजुर्वेदं तु दक्षिणे॥ पश्चि
मे सामवेदं तु उदगथर्वणं तथा॥ आग्नेयां च तथांगानि धर्मशास्त्राणि नैरृते॥ पुराणं चैव वायव्ये ऐशा
न्यां न्यायविस्तरात्॥ एवं विन्यस्य धर्मज्ञः सोमवासस्तु पूजयेत्॥ चैत्रशुक्ले तथा रम्य सोपवासो जितेंद्रियः॥
सद्यः प्रतिपदं प्राप्य शुक्लपक्षस्य पांडव॥ संवत्सरं महाराज शुक्लगंधानुलेपनैः॥ भूरिणा परमान्नेन तथा धूपदी १९
पैरलंकृतैः॥ संवत्सरांते गां दद्याद्ब्रह्मनेवी पनरोत्तम॥ इदं व्रतं यस्तु करोति राजन्स वेदवित्स्याद्बहुविधमनिष्ठः॥

कृत्वा द्वादशवत्सराणि विरिंचिलोकं पुरुषः प्रयाति॥ इति विद्याप्रतिपद्व्रतं॥ अथात्रैव भविष्योक्तं तिलकव्र
तं॥ श्रीकृष्ण उवाच॥ वसंते किंशुकाशोकशोभिते प्रतिपत्तिथिः॥ शुक्ला तस्यां प्रकुर्वीत स्नानं नियममास्थि
तः॥ नारी नरो वा राजेंद्र संतर्प्य पितृदेवताः॥ नद्यास्तीरे तडागे वा गृहे स्यात् दृढव्रतः॥ पिष्टातकेन विलिखे
द्वत्सरं पुरुषाकृतिः॥ पिष्टातकोपटवासको गंधचूर्णद्रव्यविशेषः॥ ततश्चंदनचूर्णेन पुष्पधूपादिनार्चये
त्॥ मासर्त्तुनामभिः पश्चान्नमस्कारांतयोजितैः॥ मासर्त्तुनामभिः चैत्र वसंतादिनामभिः॥ पूजयेद्ब्राह्मणो
विद्वान्मंत्रैर्वेदोदितैः शुभैः॥ संवत्सरोसीति पठन्मंत्रं वेदोदितं द्विजः॥ नमस्कारेण मंत्रेण शूद्रोपीत्थं प्रपू
जयेत्॥ शूद्रोपीत्यनेन तत्स्त्रीणां परिग्रहः॥ तासां विशेषविध्यभावे वैदिकमंत्रानधिकारात् संवत्सरोसि प
रिवत्सरोसीत्यादि यजुर्वेदप्रसिद्धो मंत्रः॥ नमस्कारेण मंत्रेण संवत्सराय नम इत्यादिना॥ एवमभ्यर्च्य वा
सोभिः पश्चात्तमभिवेष्टयेत्॥ कालोद्भवैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः॥ ततस्तं पूजयेत्पार्थ पुरस्थित्वा
कृतांजलिः॥ भगवंस्त्वत्प्रसादेन वर्षं क्षेममिहास्तु मे॥ संवत्सरोपसर्गा मे विलयं यांत्वशेषतः॥ एवमुक्त्वा य
था शक्त्या दत्वा विप्राय दक्षिणां॥ ललाटपट्टे तिलकं कुर्याच्चंदनपंकजं॥ ततः प्रभृत्यनुदिनं तिलकालं
कृतमुखं॥ धार्यं संवत्सरं यावच्छशिवन्नभस्तले॥ एवं नरो वा नारी वा व्रतमेतत्समाचरेत्॥ सदैव पुरुष

व्याघ्रभोगान्सुविनभत्यसौ ॥ भूतप्रेतपिशाचाद्येकुर्वाराश्चरिपोग्रहाः ॥ निरर्थका भवंत्येते तिलकं वीक्ष्य तद
र्शनात् ॥ निरर्थकाः प्रयोजनशून्याः अनिष्टकरणे असमर्था इत्यर्थः ॥ अत्रैवश्रूयते प्रतिपत्तिथिः ॥ शुक्लातस्या
प्रकुर्वीतेति वसंतशुक्लप्रतिपल्लवा ॥ तदाव्रतमिदं चैत्रे गृहीतं द्विजसंनिधौ ॥ संवत्सरं पूजयित्वा ध्यात्वा ह
द्विजनार्दनं ॥ हंतुमाक्षेप्तुकामो वा समागछतुमुपुरा ॥ प्रयाति प्रियकलत्रस्य दृष्ट्वा तु तिलकं नरः ॥ सपत्नीद
र्पप्रहारा वशीकृतमहीतला ॥ भर्तुर्हृष्टा प्रहृष्टा सा सुखमास्ते निराकुला ॥ यावत्करेपाक्षिप्तो भर्ताः पुत्र
सवेदनः ॥ शिरोर्तिनाशं प्रयातः सुहृद्दासुखदायकः ॥ शिरोर्तिना प्रयातः शिरोवेदनप्रयातः शिरोवेदनायु
क्तः ॥ धर्मराजपुरप्राप्तास्सर्वेश्रूता महारकाः ॥ तस्मिन्क्षणे महाराजधर्मराजस्य किंकराः ॥ पार्श्वस्थितां चि
त्रलेखां तिलकालंकृताननं ॥ दृष्ट्वा प्रनष्टसंकल्पा पराङ्मुखत्यगताः पुनः ॥ गतेषु तेषु च नृपः पुत्रेण सह भारत ॥
नीरुजो बुभुजे भोगान् पूर्वकर्मार्जितान् शुभान् ॥ अक्रूरेण समाख्यातं मम पूर्वं युधिष्ठिर ॥ एतत्त्रिलोक
तिलकाख्यं विकल्मषपावपुण्यव्रतं सकलदुष्टहरं परं च ॥ इत्थं समाचरति यः सुमुखं निहत्य मर्त्यः प्रयाति पद
मच्युतमिंदुमौल्ले ॥ इति तिलकव्रतं ॥ ॥ अथ श्रावणशुक्लप्रतिपद्दादिसोमवारमारभ्य वारव्रतंरोट
कव्रतं ॥ युधिष्ठिर उवाच ॥ ॥ हृषीकेश भयाकारि व्रतं दानान्यनेकधा ॥ श्रोतुमिच्छामि देवेश व्रतं संप

तिदायकं॥ येनव्रतेनदेवेश पुनराज्यंलभेमहे॥ तथाव्रतंतुमेब्रूहि या दवानांकृपाकर॥ श्रीभगवानुवाच॥
वदामिशुभदंपार्थलक्ष्मीवृधिप्रदायकं॥ धर्मार्थकाममोक्षाणांनिदानंपरमंव्रतं॥ युधिष्ठिरउवाच॥ के
नचादौपुराचीर्णंमर्त्येकेनप्रकाशितं॥ विधिनाकेनकर्तव्यंतत्सर्वंब्रूहिकेशव॥ श्रीभगवानुवाच॥ आ
सीत्सौम्यपरोराजासोमोनामेतिविश्रुतः॥ अत्रधर्मेतिकुशलप्रजापालनतत्परः॥ तस्यराज्येप्रजाः
सौम्याःसर्वधर्मपरायणाः॥ तस्यराज्यस्यचागत्यःसोपिसौम्यःशुभावहः॥ तस्मिंस्सरस्कसौम्येचसदा
सौम्यंबुनाम्नृतं॥ आसन्सोमेश्वरोदेवोलोकानांपालनायच॥ तत्राभवत्सोमशर्माब्राह्मणोवेदपारगः॥
वेदार्थवित्छास्त्रविद्याशुद्धाचारेतिदुर्लभः॥ तस्यभार्याशुभाचारपुराश्रीचारुभाषिणी॥ भर्तृशुश्रूष
णरताकल्याणीप्रियवादिनी॥ साकरोत्चकुटुंबार्थंकृपायज्ञंदिनेदिने॥ नलभ्यतेधिकंतेनधनंधान्यं
तथैवस॥ अतीवखेदखिन्नस्कविचार्यचपुनःपुनः॥ किंकरोमिक्वगछामिसभार्योहंमहीतले॥ केन
कर्मविपाकेनईदृशंलभतेफलं॥ अथवार्थकरंधर्मदेवपूजाधिकंशुभं॥ ससोमेशंकरोद्भक्तिंदे
न्यनाशायपार्थिव॥ कदाचित्खेदखिन्नोसौप्रजगामसरोवरं॥ आसन्सोमेशःप्रत्यक्षःस्तस्मि
न्सौम्यसरोवरे॥ दृष्टब्राह्मणरूपेणकृपयापरयायुतः॥ तेनसदुःखितोदृष्टःसोमशर्माद्विजोत्तमः॥

किमर्थंक्रियतेदुखंत्वयायाथाचरणेनच॥किंचिदन्ननास्तिपूर्वंतदर्थंमीदरिद्रीफलं॥तस्यतद्वचनंश्रुत्वा
ब्राह्मणास्त्विदमब्रवीत्॥भोभोविप्रवरश्रेष्ठव्रतमेकंवदामिते॥तेनादिष्टंव्रतंत्वेदंपूर्णसंपत्तिदा
यकं॥सोमशर्मउवाच॥भोभोब्राह्मणशार्दूलव्रतंतद्वदमेप्रभो॥यस्यानुष्ठानमात्रेणलक्ष्मीवृद्धि
प्रजायते॥कस्मिन्मासेचकर्त्तव्यंचतुर्दश्यांतुकार्तिके॥व्रतारंभेतुकर्त्तव्योनियमस्तुविचक्षणैः॥
अद्यारभ्यव्रतंकेनकस्यदेवस्यपूजनं॥कैस्तुपुष्पैःप्रकर्त्तव्यापूजावारंतयाशुभा॥नैवेद्यंकीदृशं
देयंअर्घ्यंकैस्तुफलंलभेत्॥यदितुष्टोसिविप्रेंद्रतत्सर्वंब्रूहिमेप्रभो॥ब्राह्मणउवाच॥साधुत्व
याविप्रपृष्टंव्रतंवृद्धिप्रदायकं॥विधानंतस्यवक्ष्यामिसर्वसिद्धिप्रदायकं॥श्रावणेचसितेपक्षेप्रथ
मेसोमवासरे॥प्रकर्त्तव्यंव्रतंविप्रशुभंनियमपूर्वकं॥बिल्वदलैस्तुकर्त्तव्यंचतुर्दश्यांतुकार्तिके॥व्र
तारंभेतुकर्त्तव्योनियमस्तुविचक्षणैः॥अद्यारभ्यंव्रतंदेवरोटकाख्यंमनोहरं॥करोमिपरयाभक्त्या
पाहिमांजगतांगुरो॥दिनेदिनेप्रकर्त्तव्यापूजादेवस्यशूलिनः॥कथंविनानभोराज्यप्रत्यहंच
पुनःपुनः॥उपोषणंचतुर्दश्यांकर्त्तव्यंविधिपूर्वकं॥शुचिर्भूत्वादिनेतस्मिंकर्त्तव्यंरोटकव्रतं॥

दत्वायफलमाप्नोतितेनतत्फलमाप्नुयात्॥अनेनैवविधानेनतत्कार्यंव्रतसिद्धये॥पंचवर्षंतुकर्त्तव्यंमतु
लधनमीप्सुभिः॥पश्चादुद्यापनंकुर्याद्रोटकाख्यंव्रतस्यच॥उद्यापनेतुकर्त्तव्योहेमरौप्योत्तुरोटकौ॥ ॥
इतिशिवपुराणेबिल्वारोटकव्रतं॥अथकार्त्तिकद्वितीयायमद्वितीयासाचापराह्णव्यापिनी॥ऊर्जे
शुक्लद्वितीयायामपराह्णेर्चयेद्यमं॥स्नानंकृत्वाभानुजायांयमलोकंनपश्यति॥ऊर्जशुक्लद्वितीयायां
पूजितस्तर्पितोयमः॥वेष्टितःकिंनरैर्हृष्टैस्तस्मैयच्छतिवांछितं॥मितिस्कांदात्॥दिनद्वये अपराह्णव्याप्ता
वव्याप्तौवापूर्वैवयुग्मानीतियुग्मवाक्यात्॥श्रावणेकलुषानाम्नीतथाभाद्रेचनिर्मला॥आश्विनेप्रेत
हेमाद्रौभविष्ये॥प्रथमाश्रावणेमासितथाभाद्रपदेपरा॥तृतीयाश्वयुजेमासिचतुर्थीकार्त्तिकेभवेत्॥श्रा
वणेकलुषानामतथाभाद्रेचनिर्मला॥आश्विनेप्रेतसंचाराकार्त्तिकेयुग्मतामतेति॥चतस्रोद्वितीयास्तत्र
म्यप्रथमायांश्राद्धंश्चित्तंद्वितीयायांसरस्वतीपूजातृतीयायांश्राद्धंकर्त्तव्यंतत्रतुलवयित्वाचचतुर्थ्यामस्यांकर्त्त
व्यमुक्तं॥कार्त्तिकेशुक्लपक्षेतुद्वितीयायांयुधिष्ठिर॥यमोयमुनयापूर्वंभोजितःस्वगृहेर्चितः॥अतोय
मद्वितीयेयंत्रिषुलोकेषुविश्रुता॥तस्यांनिजगृहेपार्थनभोक्तव्यमितोनरैः॥यत्नेनभगिनीहस्तान्
भोक्तव्यंपुष्टिवर्धनं॥दानानिचप्रदेयानिभगिनीभ्योविशेषतः॥सुवर्णालंकारवस्त्रान्नपूजास

त्कारभोजनैः॥सर्वाभगिन्यासंपूज्यअभावेप्रतिपन्नकाः॥तत्रस्थानेमता॥पितृव्यभगिनीहस्तात्प्रथमायां
युधिष्ठिर॥पितृव्यभगिनीपितृव्यसंबंधेनभगिनीपितृव्यकन्येत्यर्थः॥मातुलस्यसुताहस्तात्द्वितीयायां
यथानृप॥पितुर्मातुस्वसुश्चैवतृतीयायांतयोःकरात्॥भक्तव्यंसहतायाश्चभगिन्याहस्ततःपरा॥सर्वा
सुभगिनीहस्तात्भोक्तव्यंबलवर्धनं॥धन्यंयशस्यमायुष्यंसर्वकामार्थसाधकं॥तस्यांतिथौयमुनयायमरा
जदेवःसंभोजितोनिजकरात्स्वस्रतोद्देन॥तस्याःस्वसाकरतलाद्दिहयोभुक्तिमाप्नोतिरत्नधनधान्यमनुत्त
मंसः॥ इतिहेमाद्रौभविष्येयमद्वितीयाविधिः॥अत्रैवभ्रातृद्वितीयाविधिःतिथितत्त्वेस्कांदे॥यस्तुभोजयतेना
रीभ्रातरंयुग्मकेतिथौ॥अर्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात्॥भ्रातुरायुःक्षयोनूनंनभवेत्तत्रकर्हिचि
त्॥यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत्॥अर्घ्यश्चात्रप्रदातव्योयमायसहजद्वयैः॥भ्रातव्यस्तभगिनीभिः
अर्घ्यमंत्रस्तु॥एह्येहिमार्तंडजपाशहस्तयमांतकालोकधरामरेश॥भ्रातृद्वितीयाकृतदेवपूजांगृहाण
चार्घ्यंभगवन्नमस्ते॥धर्मराजनमस्तुभ्यंनमस्तेयमुनाग्रज॥त्राहिमांकिंकरैःसार्धंसूर्यपुत्रनमोस्तुते॥
लिंगे॥कार्त्तिकेतुद्वितीयायांशुक्लायांभ्रातृपूजनं॥यानकुर्याद्विनश्यंतिभ्रातरःसप्तजन्मसु॥पाद्मेउ
त्तरखंडे॥भद्रेभगिनिश्रीमातस्त्वदंघ्रिसरसीरुहे॥श्रेयसेद्यनमस्तुभ्यंआगतोस्मिशुभावह॥शिवालय॥

मृदुवाक्यं ततः कृत्वा सत्वरं क्रियते तदा ॥ अद्य भ्रातर्मनीभ्रातस्त्वया धन्यास्मि मानद ॥ भोक्तव्यं तु मद्गेहे
स्वायुषे मम मानद ॥ कार्तिके शुक्लपक्षे तु द्वितीयायां महोदरः ॥ यमो यमुनया पूर्वं भोजितः स्वगृहेर्चितः ॥ अस्मि
न्दिने यमेनात्र नारीव पुरुषो पि वा ॥ अपविधाकर्मपाशेभ्यश्छेदयाय पत्नी तिहि ॥ पापेभ्यो विप्रमुख्यास्ते मुक्ता क
र्मनिबंधनात् ॥ तेषां महोत्सवो हृतो यमराष्ट्रसुखवहः ॥ तस्माद्वधात्र मद्गेहे भोजनं कुरु कार्तिके ॥ आशिषः प्र
तिगृह्यास्या नमस्कृत्य ततोर्चयेत् ॥ सर्वा भगिन्यः संपूज्या ज्येष्ठा तु भयतः स्मृत ॥ वस्त्रादिना नमस्कृत्य निजवित्ता
नुसारतः ॥ भ्रातुरायुष्य वृध्यर्थं भगिनी भिर्यमस्य वै ॥ पूजनीयाः प्रयत्नेन प्रतिमाश्च विधानतः ॥ मार्कंडेयो बलि
त्रो व्यासो हनुमांश्च विभीषणः ॥ कृपो द्रोणिः परशुरामश्च अष्टौते चिरजीविनः ॥ मार्कंडेय महाभाग सप्तकल्पा
न्तजीविता ॥ चिरंजीवी न्यथात्वं हि तथा मे भ्रातरं कुरु ॥ इति भ्रातृद्वितीयाविधिः ॥ इति श्रीमद्भनीलकंठा
त्मजभट्टशंकरकृतौ व्रतार्के द्वितीयव्रतानि ॥ अथ तृतीयाव्रतानि ॥ चैत्रशुक्लतृतीयायां सौभाग्यश
नव्रतं ॥ मात्स्ये ॥ मत्स्य उवाच ॥ वसंतमासे तृतीयायां जनप्रियं सौभाग्याय सदा स्त्रीभिः पुत्रेशुभिः शुक्लप
क्षस्य पूर्वाह्णे तिलैः स्नानं समर्चयेत् ॥ तस्मिन्नहनि सा देवी किल विश्वात्मना सती ॥ पाणिग्रहणिके मंत्रै
रारूढा वरवर्णिनी ॥ तया सहैव देवेत्रां तृतीयायां समर्चयेत् ॥ फलैर्नानाविधैर्धूपदीपनैवेद्यसंयुतैः ॥ २३

चतुर्दश्यां निराहारः स्थित्वा चैव परेहनि ॥ भोक्ष्यामि पार्वतीनाथ सर्वसिद्धिप्रदायक ॥ उपोषणमंत्रः ॥ कृत्वा माध्याह्नि
ककर्म नित्यपूजादिकं तथा ॥ तस्यां रात्रौ तु कर्तव्या पूजा देवस्य शूलिनः ॥ शुभे चैत्र प्रदेशे तु कर्तव्यं पुष्पमंडपं ॥ पू
ज्यस्तत्र शिवो देवो धर्मकामार्थसिद्धये ॥ क्षीरादिस्नपनं कुर्याच्चंदनादि विलेपनं ॥ कृष्णागरुरसकर्पूरमृगनाभिवि
मिश्रितं ॥ पुष्पैर्नानाविधैरम्यैः पूज्यो देवो महेश्वरः ॥ धर्ममेन कर्तव्या पूजा देवस्य शूलिनः ॥ बिल्वपत्रैरखंडैश्च का
तुलसीपत्रकैस्तथा ॥ नीलोत्पलैश्चारुतरैः कर्तव्या पुण्यवर्धनी ॥ कल्हारकमलैश्चैव कुमुदैश्चातिशोभनैः ॥
चंपकैर्मालतीपुष्पैः कुंदैश्च शुभावहैः ॥ मंदारैरर्कपुष्पैश्च पूजा वाच्यः शिवप्रियैः ॥ अन्यैर्नानाविधैः पुष्पैः
ऋतुकालोद्भवैः शुभैः ॥ धूपैर्नानाविधैः पार्थ पुण्यवर्धनसायकैः ॥ दीपस्तत्र प्रकर्तव्या घृतपूर्णा मनोरमाः ॥
लेह्यपेयैस्तथा भोज्यैः स्वादुभिश्च शिवप्रियैः ॥ अन्यैर्नानाविधैरम्यैः तथा विप्रवरैः कृतं ॥ नैवेद्यं तत्प्रक
र्तव्यं राटकानां विशेषतः ॥ कर्तव्या राटकाः पंचपुरुषाहारमानतः ॥ द्वौ तु विप्राय दातव्यौ ह्येकं भोजने शुभ ॥
एको देवाय दातव्यो नैवेद्यार्थं सदा बुधैः ॥ महेशाय च दातव्यं तांबूलं सुमनोहरं ॥ अर्घ्यदानं प्रकर्तव्यं धनसं
पत्तिदायकं ॥ पूगफलं नारिकेलं जंबीरं बीजपूरकं ॥ खर्जूरी च शुभा द्राक्षा मातुलिंगं मनोहरं ॥ आरबोट
नि च दाडिबं नागरानि शुभावहं ॥ कर्कटी च शुभा प्रोक्ता अर्घ्यदाने मनोहरी ॥ अन्यैर्नानाविधैः पार्थ ऋतु
कालोद्भवैः शुभैः ॥ यः करोत्यर्घ्यदानं च तस्य पुण्यं वदाम्यहं ॥ इलावसारैर्युक्तां रत्नैश्चान्यैर्मनोरमैः

एवं संवत्सरं यावत्तृतीयायां सदा मुने॥ प्राशने दानमंत्रे च विशेषोयं निबोध मे॥ गोशृंगोदकमथो स्यात्चैत्रे शुभे
गोमये पुनः॥ ज्येष्ठे मंदारकुसुमं बिल्वपत्रं शुचौ स्मृतं॥ श्रावणे दधि संप्राश्य नभस्ये च कुशोदकं॥ क्षीर
माश्वयुजे मासि कार्त्तिके पृषदाज्यकं॥ मार्गशीर्षे तु गोमूत्रं पौषे संप्राशयेद्घृतं॥ माघे कृष्णतिलांस्तद्
द्वत्पंचगव्यं च फाल्गुने॥ ललिता विजया भद्रा भवानी कुमुदा शिवा॥ वासुदेवी तथा गौरी मंगला कमलास
ती॥ उमाय दानकाले तु प्रीता यामिति कीर्त्तयेत्॥ मल्लिकाशोककमलकुंदकं बोत्पलमालती॥ कुब्जकं
करवीरं च बाणाम्लानकुंकुमे॥ इंदुवारं वसंतेषु मासेषु क्रमशः स्मृते॥ बाणनीलकुरंटकः॥ जपाकु
सुमकुसुंभमालती शतपत्रिका॥ यथालाभं प्रशस्तानि करवीरं च सर्वदा॥ एवं संवत्सरं यावदुपोष्य विधिव
न्नरः॥ स्त्री वा भक्त्या कुमारी चा शिवमभ्यर्च्य शक्तितः॥ व्रतांते शयनं दद्यात्सर्वोपस्करसंयुतं॥ उमामहेश्वरं हे
मं वृषभं च गवा सह॥ स्थापयित्वा च शयने ब्राह्मणाय निवेदयेत्॥ गोयुगं हेम॥ अन्यान्यपि यथा श
क्त्या मिथुनान्यंबरादिभिः॥ धान्यालंकारगोदानैरभ्यर्च्य गंधसंचयैः॥ वित्तशा[illegible]ठ्येन रहितः पूज
येद्गतविस्मयः॥ एवं करोति यः सम्यक्सौभाग्यशयनं व्रतं॥ सर्वान्कामानवाप्नोति पदमानंत्यम
श्नुते॥ फलस्यैकस्य च त्यागमेतत्कुर्वन्समाचरेत्॥ यत्र कीर्तिं समाप्नोति प्रतिमासं नराधिप॥ सौभा

ग्यारोग्यरूपायुर्वस्त्रालंकारभूषणैः॥ न वियुक्तो भवेद्राजन्नवर्षशतत्रयं॥ यस्तु द्वादशवर्षाणि सौभाग्यश
यनव्रतं॥ करोति सप्त चाष्टौ वा श्रीकंठभवने मुरैः॥ पूज्यमानो वसेत्सम्यक्यावत्कल्पायुतत्रयं॥ नारी वा कुरु
ते वापि कुमारी वा नरेश्वर॥ सापि तत्फलमाप्नोति देव्यानुग्रहलालिता॥ ॥ इति मात्स्ये सौभाग्यशयनव्रतं
अत्रैव गौर्यंदोलोत्सवः॥ तदुक्तं हेमाद्रौ देवीपुराणे॥ तृतीयायां जये देवी शंकरेण समन्विता॥ कुंकुमागरु
कर्पूरमणिवस्त्रगंधार्चिता॥ सुगंधपुष्पधूपैश्च मदनेन च मालिना॥ आंदोलयेद्दत्तशिवामातुष्टये सदा॥
रात्रौ जागरणं कार्यं प्रातर्दद्यात्तु दक्षिणा॥ सौभाग्याय सदा स्त्रीभिः कार्या पुत्रवरादिभिः॥ अथ चैत्रशुक्लतृ
तीयायामरुंधतीव्रतं॥ तत्र स्त्रीणामेवाधिकारः॥ अवैधव्यादिफलश्रवणात्॥ अथ पूजा॥ अष्टकर्णिकयायु
के मंडले पूजयेत्तु तां॥ अरुंधती महादेवी वसिष्ठसहिता सती॥ आ०॥ अरुंधति महादेवि सर्वसौभाग्यदायिके॥
दिव्यं सुचारुमेषं च आसनं प्रतिगृह्यतां॥ आस०॥ सुचारु शीतलं दिव्यं नानागंधसुवासितं॥ पाद्यं गृहाण दे
वेशि अरुंधति नमोस्तु ते॥ पा०॥ अरुंधति महाभागे वसिष्ठप्रियवादिनी॥ अर्घ्यं गृहाण कल्याणि भर्त्रा सह पतिव्रते॥
अ०॥ गंगातोयसमानीतं सुवर्णकलशे स्थितं आचम्यतां महाभागे वसिष्ठसहितेनघे॥ आच०॥ गंगासरस्वती
रेवा पयोष्णी नर्मदाजलैः॥ स्नापितासि मया देवी तथा शांतिं कुरुष्व मे॥ स्नानं०॥ नानारागसमुद्भूतं दिव्यं चा
रु मनोहरं॥ वस्त्रं गृहाण देवेशि अरुंधति नमोस्तु ते॥ वस्त्रं०॥ कर्पूरकुंकुमैर्युक्तं हरिद्रादिसमन्वितं॥ कस्तूरि

कासमायुक्तं चंदनं प्रतिगृह्यतां॥ चंदनं॥ अक्षताश्च सुरश्रेष्ठाः कुंकुमाक्ताः सुशोभनाः॥ मालालंकारसिध्यर्थं प्रीत्यर्थं प्र
२५ तिगृह्यतां॥ अक्ष०॥ माल्यादीनि सुगंधीनि मालत्यादीनि वै प्रभुः॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥ पु०
वनस्पतिरसो दिव्यो गंधाढ्यो गंधउत्तमः॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां॥ धूपं॥ आज्यं त्रिवर्तिसंयुक्तं०
दीपं॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं॥ नैवेद्यं गृह्यतां देवि प्रसादं कुरु सर्वदा॥ पूगीफलं महद्दिव्यं ना नैवे॰
गवल्लीदलैर्युतं॥ कर्पूरादिसमायुक्तं तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ इदं फलं मिति फलं॥ हिरण्यगर्भमिति द
क्षिणां॥ पुत्रान्देहि धनं देहि सौभाग्यं देहि सुव्रते॥ अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तुते॥ मूलमंत्रार्थं०
अरुंधति महाभागे वसिष्ठप्रियवादिनी॥ सौभाग्यं देहि मे देवि धनं पुत्रांश्च सर्वदा॥ उत्तरार्घ्यं॥ विभुजं चारुसर्वां
गीं साक्षसूत्रकमंडलुं॥ प्रतिमां कांचनीं कल्प्य नामभिः परिपूजयेत्॥ ॐ देववंद्यै नमः॥ पादौ पूजयामि॥ लो
कवंद्यै नमः॥ जानुनी०॥ संपत्तिदायै नमः॥ कटिं०॥ गंभीरनाभ्यै नमः॥ नाभिं०॥ लोकधात्र्यै नमः॥ स्तनौ०॥ जग
धात्र्यै नमः॥ कंठं०॥ शांत्यै नमः॥ बाहू०॥ वरदाय नमः॥ हस्तौ०॥ धृत्यै नमः॥ मुखं॥ अरुंधत्यै नमः॥ शिरः०॥
सकलप्रियै नमः॥ शिखां०॥ वसिष्ठप्रियायै नमः॥ सर्वांगं पूजयामि॥ ततो नीराजनं॥ पुष्पांजलिं॥ वंशपात्र
स्थितं पूर्णं वायनं वस्त्रसंयुतं॥ अरुंधतीप्रीणनार्थं ब्राह्मणाय ददाम्यहं॥ मूर्तिदानमंत्रः॥ गच्छ देवि यथास्था
नं सर्वालंकारभूषिते॥ अरुंधति नमस्तुभ्यं देहि सौभाग्यमुत्तमं॥ विसर्जनं॥ इति अरुंधतीपूजनं॥ अ
थ कथा स्कांदे॥ स्कंद उवाच॥ अरुंधतीव्रतं वक्ष्ये नारीसौभाग्यमुत्तमं॥ येन चीर्णेन वै सम्यक् नारी सौभाग्य २६

प्रतिमां पंचगव्येन तथा गंधोदकेन च॥ स्नापयित्वा वयि गौरीं भिंदुशेखरसंयुतां॥ नमोस्तु पाटलायै तु पादौ देव्याः
शिवस्य तु॥ शिवायेति च संकीर्त्य जयायै गुल्फयोस्तथा॥ त्रिगुणायेति रुद्रस्य भवान्यो जंघयोर्युगं॥ शिव
रुद्रेश्वरायेति जयायै इति जानुनी॥ संकीर्त्य हरिकेशाय तथोरू वरदे नमः॥ ईशायै शंकटिं पातु शंकरायेति शं
करं॥ कुक्षिद्वयं च कोटव्यै शूलिनः शूलपाणिनः॥ मंगलायै नमस्तुभ्यं मुदकं वापि पूजयेत्॥ सर्वात्मने नमो
रुद्रं ईशान्यै च कुचद्वयं॥ शिवं वेदात्मने तद्वत् रुद्राण्यै कंठमर्चयेत्॥ त्रिपुराघ्नाय विश्वेशाभनंताय करद्वयं॥
त्रिलोचनायेति हरं बाहू कालानलप्रिये॥ सौभाग्यभवनायेति भूषणादि समर्चयेत्॥ नमोर्धनारीशहर
प्रसितांगीति नासिकां॥ नमउग्राय लोकेशं ललितेति युतं भ्रुवो॥ शर्वाय पुरहंतारं वसुदे चैव तथालकं॥ न
मः श्रीकंठनाथाय शिवं केशांस्तथार्चयेत्॥ भीमोग्रसौम्यरूपिण्यै शिरः सर्वात्मने नमः॥ शिवमभ्यर्च्य वि
धिवत् सौभाग्याष्टकमित्यतः॥ स्थापयेत् घृतनिष्पावकुसुंभक्षीरजीरकं॥ तृणराजेक्षुलवणं कुस्तुंबुरु
मथाष्टमं॥ दत्तं सौभाग्यकं यस्मात् सौभाग्याष्टकमित्यतः॥ एवं निवेद्य तत्सर्वं मग्रतः शिवयोः पुरः॥ चैत्रे
शृंगोदकं प्राश्य स्वपेद्भूमावरिंदम॥ पुनः प्रभाते तु कयाकृतस्नानजपः शुचिः॥ संपूज्य द्विजदंपत्यं माल्य
वस्त्रविभूषणैः॥ सौभाग्याष्टकसंयुक्तं सुवर्णप्रतिमाद्वयं॥ प्रीयतामत्र ललिता ब्राह्मणाय निवेदयेत्॥

सदीपकं॥आदर्शंचामरंचैवधेनुंदद्याद्यात्क्रमेणभक्ते॥पश्चात्तुभोजयित्वाथस्त्रियःशूर्पान्ससमोदकान्॥मोदकां
न्कांचनंचैवतथावस्त्रंयथाविधिः॥पालिकाघृतपूर्याश्चपूरिकाश्चविशेषतः॥सुहालिकाश्चदातव्याएकैकं
द्विगुणंतथा॥भोजनद्वयपर्याप्तंदीनानाथांश्चपूजयेत्॥एवंव्रतंसमाप्याथपश्चात्सर्वंसमाचरेत्॥अनेन
वविधानेनसमस्तुनीःकुरुतेव्रतं॥अवैधव्यत्वमाप्नोतितथाजन्मसहस्रकं॥पुत्रपौत्रसमायुक्ताधनधान्यस
मावृता॥जीवेद्वर्षशतंसाग्रंसहभर्त्रानहव्रतं॥एवमभ्यर्च्यमितांतुपदंगच्छेत्यनामयं॥एवभार्यायथास
र्वंऋषिभार्यातथैवच॥राज्यभार्यामहाभागासर्वकामफलप्रदं॥पुरावृत्तमिदंविप्राःशृणुध्वंव्रतमुत्तमं॥आसी
द्विप्रःपुराविप्राःसर्वशास्त्रविशारदः॥तस्यैकाकन्यकाजातारूपेणाप्रतिमाभुवि॥ततोविवाहंसम्यक्चैवपित्ता
तस्यकृद्विजः॥बालरंडाभवत्साजातानिर्वेदंपरमंगता॥यमुनातीरमासाद्यचकारविपुलंतपः॥एकस
कादिकेभ्यश्चकृच्छ्रचांद्रायणैस्तथा॥मासोपवासनियमैरात्मानंमाचयन्सती॥कदाचिद्गतस्तत्र
मन्गौर्यासहशिवः॥यमुनातीरमासाद्यचिनीतांतांददर्शसा॥कृपयाचाब्रवीद्गौर्यामहादेवमुवाचसा॥
देवकेनेदृशीप्राप्ताबालवैधव्यतांस्त्री॥वदेश्वरमहादेवकृपांकुरुदयानिधे॥महादेवउवाच॥अयं
विप्रःपुरागौरीकुलशीलयुताभुवि॥तेनकन्यापरिवृतासरूपायुवतीसती॥सतांविवाह्यतरुणींविदे
शंव्यगमद्विजः॥तस्याबहुतिथंकालंसपत्न्यास्पितुरागमं॥नागतस्तत्रविप्रोयावज्जीवंगतोद्विजः॥
तस्यजन्मगतंसर्वंनिःफलंपतिनाविना॥तेनपापेनविप्रोसौनारीत्वंप्राप्तवान्शिवे॥स्वनारींयःपरि

त्यज्यनिर्दोषांकुलसंभवान्॥पतिदेशांतरंयाथअंधाइवमहार्णवे॥परदाररतोरम्यास्वादन्यांवाकुरुतेस्त्रियं॥सो
न्यजन्मनिदेवेशिस्त्रीभूत्वाविधवाभवेत्॥यानारीतुपतीत्यक्तामनोवाक्कायकर्मभिः॥रहःकरोतिवैजारंग
त्वावापुरुषांतरं॥भोगान्भुक्त्वावयायोषिन्मदेनप्रमदासती॥तेनकर्मविपाकेनसानारीविधवाभवेत्॥सप
त्नीकुलसंभूतांपतिव्रततरांसतीं॥अनुकूलांपरित्यज्यपरायोयातिचेच्छया॥सपापंजायतेन्यस्मिन्
स्त्रीहीनोविप्रजन्मनि॥अनेनसदृशंदेविलोकेस्मिन्नास्तिपातकं॥नवैधव्यात्परोव्याधिर्नवैधव्यात्परोज्व
रः॥नवैधव्यात्परःशोकोनवैधव्यात्परांकुशः॥निरयोनचवैधव्यात्कष्टंवैधव्यतान्नृषु॥तेनपापेनबहुना
जायतेबालरंडका॥इतितस्यवचःश्रुत्वासागौरीविस्मिताभवत्॥पप्रच्छतंमहादेवंगौरीसाकरुणान्विता॥
केनेदृशंमहत्पापंबालवैधव्यदायकं॥नश्यतेकर्मणाकेनतन्मांचवदकृपांकुरु॥ महादेवउवाच शृणु
देविप्रवक्ष्यामिबालवैधव्यनाशनं॥अरुंधतीव्रतंपुण्यंनारीसौभाग्यदायकं॥यत्कृत्वाबालवैधव्यान्मु
च्यतेनात्रसंशयः॥कृतमेतत्तदाविप्रागौर्यात्रांकरताव्रतं॥यमुनातीरमासाद्यउपदिष्टंतदाद्विजाः॥तस्यो
नार्यैमहादेव्याकृतमेतद्व्रतंतथा॥तेनपुण्येनमहताव्रतजेनमुनीश्वराः॥सानारीचागमत्स्वर्गंमुक्ता
वैधव्यतःसदा॥इत्थंव्रतफलंसम्यक्उपविष्टंमुनीश्वराः॥नारीवैधव्यतोमुच्येत्सौभाग्यंप्रभुमात्स
रः॥ इतिहेमाद्रौस्कांदेअरुंधतीव्रतं॥ अथवैशाखशुक्लतृतीयायांभविष्योत्तरमक्षततृतीयाव्रतं॥इयं

३२ वश्याह्ना दोषपूर्वाह्णव्यापिनी ग्राह्या ॥ देवशुक्ले द्वितथा कल्पयुगादिक बुधा विदुः ॥ शुक्लपूर्वाह्निके ग्राह्ये कृष्णे चैवापराह्णि
के ॥ इति गारुडात् ॥ अत्र पूर्वाह्णापराह्णशब्दौ द्वेधा विभाग विपराति ॥ तथा ॥ योस्यां दद्याति करकान्वारिबीज
समन्वितान् ॥ समयाति पुरुषो वीर लोकान्वै हेममालिनः ॥ बीजमंत्र ॥ हेममाली सूर्यः ॥ तथा ॥ वैशाखशुक्लप
क्षे तु तृतीयायां तथैव च ॥ गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः ॥ तथा तत्रैव ॥ कृष्ण उवाच ॥ बहुनात्र कि
मुक्तेन किं बहुक्षीरमालया ॥ वैशाखस्य सितामेकां तृतीयामक्षयां शृणु ॥ तस्यां स्नानं जपो होमः स्वाध्यायः
पितृतर्पणं ॥ दानं च क्रियते तस्यां तत्सर्वं स्यादिहाक्षयं ॥ आदिः कृतयुगस्येयं युगादिस्तेन कथ्यते ॥ सर्वपापप्र
शमनी सर्वसौख्यप्रदायिनी ॥ पुरा महोदये पार्थ वणिगासीत्सुनिर्धनः ॥ प्रियंवदः सत्यवृत्तिर्देवब्राह्म
णपूजकः ॥ पुण्याख्यानेकवित्तोभूत्कुटुंबव्याकुलोपि सन् ॥ तेन श्रुता वाच्यमाना तृतीया रोहिणीयुता ॥ यदा
स्याद्बुधसंयुक्ता तदा सातु महत्फलं ॥ तस्यां यद्दीयते किंचित्तदक्षयं तु स्यादिहि ॥ इति श्रुत्वा च गंगायां संतर्प्य
पितृदेवताः ॥ गृहमागत्य करकान् सान्नानुदकसंयुतान् ॥ अत्र पूर्णान्ब्रह्मकुंभान्जले निर्मले न च ॥ यव
गोधूमचणकान् सक्तुदध्योदनं तथा ॥ इक्षुक्षीरविकारांश्च सहिरण्यान्स्वशक्तितः ॥ शुचिः शुद्धेन मनसा ब्राह्म
णेभ्यो ददौ वणिक् ॥ भार्यया वार्यमाणोपि कुटुंबासक्तचित्तया ॥ तावत्स्थैर्ये स्थिरे सत्त्वे मत्वा सर्वं विनश्वरं ॥
धर्मासक्तमतिः पार्थ कालेन बहुना ततः ॥ जगाम पंचत्वमसौ वासुदेवमनुस्मरन् ॥ ततः क्षत्रियो जातः कु २५

मानुयात् ॥ जायते रूपसंपन्ना पुत्रपौत्रसमन्विता ॥ वसंते तु समासाद्य तृतीयां पुरुषर्षभ ॥ स्नानं कृत्वा तु वै सम्यक् त्रिरात्रो
पोषिता सती ॥ मिथुनानि च चत्वारि समाहूय पतिव्रता ॥ पूजयेत्पुष्पतांबूलैर्गंधैर्वस्त्रैस्तथाक्षतैः ॥ कुंकुमागरुक
र्पूरैः सिंदूरमृगनाभिभिः ॥ शिलापटे न संस्थाप्य जीरकं लवणान्वितं ॥ लोष्टकेन समायुक्तं वस्त्रयुग्मेन वेष्टयेत् ॥ आ
वाहयेन्महादेवीं वसिष्ठप्राणसंमितां ॥ पतिव्रतानां सर्वासां मुख्यां वै दिव्यगामिनीं ॥ द्विभुजां चारुसर्वांगीं म
स्तकं कमंडलुं ॥ प्रतिमां कांचनीं कृत्वा नामभिः परिपूजयेत् ॥ देववंद्ये नमः पादौ जानुभ्यां लोकवंदिते ॥ कु
टिं संपूजयेत्तस्याः सर्वसंपत्तिदायिनी ॥ नाभिं गंभीरनाभ्यै तु लोकधात्र्यै तथा स्तनौ ॥ जगद्धात्र्यै तथा स्कंधौ
बाहू रात्र्यै नमस्तथा ॥ हस्तौ तु वरदायै नि मुखं धन्यै नमः पुरा ॥ अरुंधत्यै तथा पूज्या शिरः सकलप्रिया ॥ ए
वं संपूज्य तां देवीं गंधपुष्पोपचारकैः ॥ पूजयित्वा सतीं देवीं ततश्चार्घ्यं प्रदापयेत् ॥ अरुंधति महाभागे व
सिष्ठप्रियवादिनी ॥ सौभाग्यं देहि मे देवि धनं पुत्रांश्च सर्वदा ॥ उत्तरार्घ्ये ॥ पुत्रान्देहि धनं देहि सौभा
ग्यं देहि सुव्रते ॥ अन्यांश्च सर्वकामांश्च देहि देवि नमोस्तु ते ॥ प्रार्थनमंत्रः ॥ सुवासिन्यो यथा संपूज्या समाप्तिरि
से सदा ॥ भूषणं गंधास्तैः पुष्पैर्दद्यात्सर्वेषु तान्नतान् ॥ होमं चैव ततः कुर्यात्समिद्भिश्च तिलैः पृथक् ॥ अष्टोत्त
रशतसंख्या प्रार्थनामंत्रतः सुधीः ॥ मिथुनानि च संपूज्य भूषणाच्छादनादिभिः ॥ नानाविधोपचारैश्च चतु
चतुर्विंशतिसंख्यया ॥ आचार्याय सभार्याय वस्त्राण्याभरणानि च ॥ शय्यां सोपस्करां दद्यात्तत्कांस्यपा

ह्यतां॥अक्षता॥सुचारुशीतलंदिव्यंनानागंधसुवासितं॥पाद्यंगृहाणदेवेशिमहादेविनमोस्तुते॥पाद्यं॥श्रीपार्वतिमहाभागे
शंकरप्रियवादिनि॥अर्घ्यंगृहाणकल्याणिभर्त्रासहपतिव्रते॥अर्घ्यं॥गंगातोयसमानीयंसुवर्णकलशेस्थितं॥आचम्यतां
महाभागेरुद्रेणसहितेनघे॥आचमनं॥गंगासरस्वतीरेवाकावेरीनर्मदाजलैः॥स्नापितासिमहादेवितथाशांतिकुरुष्वमे
स्नानं॥सर्वसत्वाधिकेसौम्येलोकलज्जानिवारणे॥मयोपपादितंतुभ्यंवाससीप्रतिगृह्यतां॥वस्त्रं॥श्रीखंडंचंदनंदिव्यं॥
चंदनं॥मल्यादीनि॥पुष्पं॥देवद्रुमरसोद्भूतःकालागरुसमन्वितः॥आदीयतेमहादेवि(?)भवानीप्राणतर्पणी॥साज्यंत्रि यां
वर्तिसंयुक्तं॥दीपं॥अन्नंचतुर्विधंस्वादुरसैःषड्भिसमन्वितं॥नैवेद्यंगृह्यतांदेविप्रसादंकुरुसर्वदा॥नैवेद्यं॥कर्पूरैला
लवंगादितांबूलंदलसंयुतं॥क्रमुकस्यफलंचैतत्तांबूलंप्रतिगृह्यतां॥तांबूलं॥इदंफलंमयादेविस्थापितंपुरत
स्तव॥तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि॥फलं॥हिरण्यगर्भगर्भस्थं॥दक्षिणा॥पुत्रंदेहिधनंदेहिसौ
भाग्यंदेहिसुव्रते॥अन्यांश्चसर्वकामांश्चदेहिदेविनमोस्तुते॥प्रार्थना॥भवान्याश्चमहादेव्याव्रतसंपूर्णहे
तवे॥प्रीतयेद्विजवर्यायवायनंप्रददाम्यहं॥वायनमंत्रः॥नानाषोडशपक्वान्नैर्वेणुमात्रादिषोडश॥कुर्याद्व
स्त्रादिभिर्युक्तान्याहूयद्विजदंपती॥अनेनवायनप्रीत्यर्थंप्रतिगृह्णंतुभूषितं॥ इतिगौरीपूजा॥ युधि
ष्ठिरउवाच॥उद्यापनविधिंब्रूहितृतीयायासुरेश्वरी॥भक्तितःश्रोतुमिच्छामिव्रतंहेसंपूर्णहेतवे॥श्रीकृष्ण
उवाच॥उद्यापनविधिंवक्ष्येसावधानेनवैशृणु॥त्रिंशद्दंडप्रमाणेनपतीतंदक्षिणोत्तरे॥प्रत्यक्प्राग

पिराजेंद्रनवगोचर्मभिष्यते॥गोचर्ममात्रंसंलिप्यगोमयेनविचक्षणः॥मंडलंकारयेत्तत्रनानावर्णसुशोभनैः॥गृहम
डलपार्श्वेतुपद्ममष्टदलंलिखेत्॥तन्मध्येस्थापयेत्कुंभमव्रणंमृन्मयंशुभं॥ताम्रपात्रंप्रकुर्वीतपलैःषोडशभिस्त
दा॥तदर्धार्धेनवाकुर्याद्वित्तशाठ्यंनकारयेत्॥कलशमात्रसुवर्णेनप्रतिमांकारयेद्बुधः॥तदर्धमध्यभागस्तंतदर्धेतु
कनिष्ठकं॥कृत्वारूपप्रयत्नेनपार्वत्याश्चहरस्यच॥अथताम्रमयपात्रेप्रतिमांतत्रविन्यसेत्॥श्वेतवस्त्रयुगछन्नंश्वेतय
ज्ञोपवीतिनं॥भाजनंचतिलैःपूर्णंकलशस्योपरिन्यसेत्॥पार्वत्यास्तुयुगंदद्यास्थापयित्वाविधानतः॥वेदोक्तेनप्र
तिष्ठांचकर्तव्यातुयथाविधि॥पंचामृतेनस्नपनंकृत्वादेवस्याचोत्तमं॥स्नानंचकारयेत्पश्चात्ततःपूजांसमारभेत्॥चंद
नेनसुगंधेनसुपुष्पैश्चप्रपूजयेत्॥धूपंचकल्पयेद्धूपंचंदनागरुसंयुक्तं॥नानाप्रकारनैवेद्यंतथादीपंचका
रयेत्॥अर्चयेत्पूजयेद्भक्त्यागंधपुष्पैःप्रपूजयेत्॥आवाहनादिकर्तव्यंपुराणागमसंभवैः॥कार्याविधानतःपूजाफ
लैश्चाक्षतसमन्वितः॥देवदेवसमागच्छप्रार्थयेहंजगत्पते॥इमामयाकृतांपूजांगृहाणसुरसत्तम॥एवंपूजांप्रकर्तव्यारा
त्रौजागरणंततः॥गीतनृत्यादिसंयुक्तंकथापुस्तकवाचनं॥अर्चयेत्पूर्ववद्देवंपश्चाद्धोमंचकारयेत्॥स्वगृह्योक्तवि
धानेनकृत्वाग्निस्थापनंततः॥संकर्षेतिपर्यंतान्कृत्वाविधिवदाचरेत्॥एवंसमाप्यहोमंतुतत्राचार्यंप्रपूजयेत्॥अ
र्घ्यपुष्पप्रदानैश्चवस्त्रालंकारभूषणैः॥शक्त्यासदक्षिणांकुर्यात्प्रकारेगोधिकान्वितान्॥धेनुंसदक्षिणांदद्यात्सु
शीलांचपयस्विनीं॥सुवर्णशृंगीरौप्यखुरीकांस्यदोहनसंयुतान्॥रत्नपुच्छांवस्त्रयुक्तांताम्रपृष्ठीमलंकृतां॥सवत्सा
मव्रणांभद्रांधेनुंदद्यात्प्रयत्नतः॥सुवर्णेनसमोपेतांआचार्यायचसाध्वे॥षोडशाभिःप्रकारैश्चपक्वान्नैःप्रीणयेत्स

दा॥ षोडशासमितैर्द्याद्ब्राह्मणेभ्यः प्रयत्नतः॥ वंशपात्रस्थितैः पश्चात्पक्वान्नं वायनैः शुभैः॥ अन्योन्यो ब्राह्मणेभ्यश्च ब्राह्मणं
च प्रयत्नतः प्रयत्नपरया भक्त्या प्रदद्याद्वित्तसारतः॥ बंधुभिः सह भुंजीत नियतश्च परेहनि॥ एवं कृत्वा भवेत्पार्थ परिपूर्णं व्रतं
यतः॥ ॥ इति भविष्योत्तरपुराणे स्वर्णगौरीव्रतउद्यापनं समाप्तं॥ अथ कथा॥ सूतउवाच॥ पुरा कैलासशिख
रे सिद्धगंधर्वसेविते॥ उमया सहितः स्कंदः पप्रच्छ शिवमव्ययं॥ स्कंदउवाच॥ व्रतं कथय देवेश पुत्रपौत्रप्रवर्धनं॥ सर्वसौ
भाग्यदं स्त्रीणां सर्वैश्वर्यप्रदं नृणां॥ ईश्वरउवाच॥ साधु पृष्टं महाभाग कथयामि षडानन॥ स्वर्णगौरीव्रतं नाम सर्व
संपत्करं नृणां॥ पुरा सरस्वतीतीरे विमलाख्या महापुरी॥ तत्र चंद्रप्रभो नाम राजाभूद्धनदोपमः॥ तस्य स्त्री रूपलावण्य
सौंदर्यस्मरविभ्रमा॥ महादेवी विशालाक्षी हेमार्यवामलोचना॥ तयोः प्रियतरा ज्येष्ठा तस्यासीत् पतिर्मता॥ स का
दाचिद्वनं भेजे मृगयासक्तमानसः॥ तत्र शार्दूलवाराहवनमाहिषकुंजरान्॥ हत्वा बभ्राम तृष्णार्तः सरसीं विपि
ने महत्॥ चकोरचक्रवाकैश्च पुंडरीकैश्च तालाकुलं॥ उत्फुल्लहल्लकल्होलकुमुदोत्पलमंडितं॥ अपूर्वमवनीशः सोऽदृष्ट्वा
स्परसां रसः॥ समासाद्य सरस्तीरे पीत्वा जलमनुत्तमं॥ भक्त्या गौरीमर्चयंतं ददर्शाप्सरसां गणं॥ किमेतदिति पप्र
च्छ राजा राजीवलोचनः॥ स्त्रिय ऊचुः॥ स्वर्णगौरीव्रतमिदं क्रियतेस्माभिरुत्तमं॥ सर्वसंपत्करं नृणां तत्कुरुष्व
नृपोत्तम॥ राजोवाच॥ विधानं कीदृशं ब्रूहि किंफलं विस्तरान्मम॥ ताऊचुर्योषितः सर्वा नभोमासितृतीयके॥ प्रार
ब्धं व्रतमिदं गौर्यं षोडशवत्सरान्॥ तच्छ्रुत्वा सोपि जग्राह व्रतं नियतमानसः॥ गुणैः षोडशसंयुक्तं डोरकं दक्षिणे करे
बबंधानेन मंत्रेण करिष्येहं व्रतं तव॥ ततः कृत्वा व्रतं देव्याः पूज्य स्वभवनं ययौ॥ रम माणो महादेव्या मदिरामदमत्तमः॥

शाबल्यां युधिष्ठिर॥ बभूव वा सा तृतीया तस्यां समृद्धिधर्मसंयुता॥ इयाय सुमहायज्ञैः सभासवररश्मिभिः॥ सदश्वैर्गोहि
रण्यानि दानान्यन्यान्यहर्निशं॥ बुभुजे कामतो भोगान् दीनांधांस्तर्पयन् मुदा॥ श्रद्धापूर्वं तृतीयायां यतोभिमतं विना॥
इत्येतत्ते समाख्यातं श्रूयतामत्र यो विधिः॥ तृतीयां तु समासाद्य स्नात्वा संतर्प्य देवताः॥ एकभक्तं तथा कुर्याद्वासुदेवं प्र
पूजयेत्॥ उदकुंभान् सकरकान् सन्नान् सर्वरसैः सह॥ ग्रैष्मिकं सर्वमेवान्नं सस्यं दाने प्रवर्तते॥ छत्रोपानत्प्रदानं
च गोभूकांचनवाससां॥ यद्यदिष्टतमं चान्यत्तद्देयमविशंकया॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छसि॥ अ
नाख्येयं न मे किंचिदस्ति स्वस्त्यस्तु तेऽनघ॥ अस्यां तिथौ क्षयमुपैति हुतं न दत्तं तेनाक्षयेति कथिता मुनिभिस्तृतीया
उद्दिश्य दैवतपितॄन् क्रियते मनुष्यैस्तच्चाक्षयं भवति भारत सर्वमेव॥ इति भविष्योत्तरोक्तमक्षय्यतृतीयाव्रतं॥
अस्यामेव विष्णुधर्मोक्तमक्षय्यतृतीयाव्रतं॥ वैशाखशुक्लपक्षे तु तृतीयायामुपोषितः॥ अक्षयं फलमाप्नोति सर्वस्य
सुकृतस्य तु॥ तथा सा कृत्तिकोपेता विशेषेण सुपूजिता॥ तत्र जप्तं हुतं दत्तं जप्तं सर्वमक्षय्यमुच्यते॥ अक्षया सा तिथि
स्तस्मात्तस्यां सुकृतमक्षयं॥ अक्षतैः पूज्यते विष्णुस्तेन साप्यक्षया स्मृता॥ अक्षतैस्तु नरः स्नातो विष्णोर्दत्वा तथाक्षतान्॥
सक्तूंश्च संस्कृतांश्चैव दत्वा वक्त्रगुणं ददन्॥ एतामक्षय्यतृतीयां नासा तु फलं भवेत्॥ इति विष्णुधर्मोक्तमक्षय्यतृतीयाव्रतं॥
आचारादर्शे श्रावणशुक्लतृतीयायां स्वर्णगौरीव्रतं॥ तत्र पूजा॥ देवि देवि समागच्छ प्रार्थयेहं जगन्मते॥ इमां मया कृ
तां पूजां गृहाण सुरसत्तमे॥ आवाहनं॥ भवानी त्वं महादेवि सर्वसौभाग्यदायके॥ अनेकरत्नसंयुक्तमासनं प्रतिगृ

यायुतनिषेधाप्रहृतेश्चपूर्वैव॥अतएवं॥कलाकाष्ठापिवाचैवद्वितीयासंप्रदृश्यते॥सत्तृतीयानकर्त्तव्याकर्त्तव्यागण
संयुतेतिस्कांदेतितच्छेदेनपूर्वेद्युर्द्वितीयोगनिवृत्तिपूर्वकएवचतुर्थीयुताग्राह्याविधिःसंगच्छते॥एवंच्चतुर्थीसहितायां
तुसात्तृतीयाफलप्रदेत्यापस्तंबीयमप्येतत्परमेव॥एकश्रुतिमूलकल्पनालाघवात्॥द्वितीयायुतानधिकानुसत्या
पिनिषेधेद्वितीयायुतैवकार्या॥गुणानुरोधेनप्रधानानुलोपस्यन्याय्यत्वात्॥अग्निहोत्रहवण्यालाभेनिर्वापस्ये
व॥एकादशीत्तृतीयाचषष्ठीचैवत्रयोदशी॥पूर्वविद्धाप्रकर्त्तव्यायदिनस्यात्परेहनीतिवृद्धवसिष्ठवचनात्॥तत्रव्र
तविधिः॥ ॥मासपक्षाद्युल्लिख्यममसमस्तपापक्षयपूर्वकसप्तजन्मराज्यसौभाग्यवृद्धिविघ्नक्षयेउमामहेश्वरसा
युज्यतासिध्यर्थंहरितालिकाव्रतंकरिष्ये॥तत्रादौगौरीयुक्तंमहेश्वरंपूजयिष्ये॥पीतकौशेयवसनांहेमाभांकम
लासनां॥भक्तानांवरदांनित्यंपार्वतींचिंतयाम्यहं॥मंदारमालाकुलितालकायैकपालमालांकितशेखराय॥
दिव्यांबरायैचदिगंबरायनमःशिवायैचनमःशिवाय॥ इतिध्यानं॥ देवदेविसमागच्छप्रार्थयेहंजगन्मये॥इ
मांमयाकृतांपूजांगृहाणसुरसत्तमे॥शिवगौरीभ्यांनमः॥आवाहनं॥भवानित्वंमहादेविसर्वसौभाग्यदाय
के॥अनेकरत्नसंयुक्तमासनंप्रतिगृह्यतां॥आसनं॥सुचारुशीतलंदिव्यंनानागंधसमन्वितं॥गृहाणपाद्यंदेवदेवे
शिमहादेविनमोस्तुते॥पाद्यं॥श्रीपार्वतिमहाभागेशंकरप्रियवादिनि॥अर्घ्यंगृहाणकल्याणिभर्त्रासह
पतिव्रते॥अर्घ्यं॥गंगाजलंसमानीतंसुवर्णकलशेस्थितं॥आचम्यतांमहाभागेरुद्रेणसहितेनघे॥आचमनीयं॥

गंगासरस्वतीरेवाकावेरीनर्मदाजलैः॥स्नापितासिमयादेवितथाशांतिंप्रयच्छमे॥स्नानं॥पंचामृतेस्नपनं॥आप्यायस्वे
तिपयसा॥दधिक्राव्णइतिदध्ना॥घृतंमिमिक्षइतिघृतं॥मधुवातेतिमधुना॥स्वादुःपवस्वेतिशर्करया॥इतिपंचामृतं॥ ३८
शुद्धोदकेनवारुणस्नानं॥हरिद्रासुगंधद्रव्यैरुद्वर्त्तनं॥पुनराचमनं॥रससत्त्वाधिकेरम्येलोकलज्जानिवारणे॥मया
पपादितेतुभ्यंवाससीप्रतिगृह्यतां॥वस्त्रं॥कर्पूरागरुसंघुष्टंकुंकुमादिसमन्वितं॥कस्तूरिकासमायुक्तंचंद
नंप्रतिगृह्यतां॥चंदनं॥रंजिताःकुंकुमौघेनअक्षताश्चातिशोभनाः॥ममैषांदेविदानेनप्रसन्नाभवपार्वति॥अक्ष
ताः॥मल्लिकाबकुलचंपकपाटलाब्जपुन्नागजातिकरवीरसालपुष्पैः॥बिल्वप्रवालतुलसीदलमालतीभि २
स्त्वांपूजयामिजगदीश्वरिमेप्रसीद॥पुष्पाणि॥वनस्पतिरसोद्भूतःगुग्गुलागरुसमन्वितः॥आनीतोयंमयाधूपो
भवानिप्रतिगृह्यतां॥धूपं॥त्वंज्योतिःसर्वदेवानांतेजसांतेजउत्तमं॥आत्मज्योतिःपरंधामदीपोयंप्रतिगृह्यतां॥
नैवेद्यं॥पुनराचमनीयं॥मलयाचलसंभूतंकर्पूरेणसमन्वितं॥करोद्वर्त्तनकंचारुगृह्यतांजगतःपते॥करोद्वर्त्त
नं॥इदंफलमितिफलं॥कर्पूरेलालवंगादितांबूलीदलसंयुतं॥क्रमुकस्यफलंचैवतांबूलंप्रतिगृह्यतां॥तां
बूलं॥हिरण्यगर्भेतिदक्षिणा॥वज्रमाणिक्यवैडूर्यमुक्ताविद्रुममंडितं॥पुष्परागसमायुक्तंकांचनंप्रतिगृह्यतां॥
नीराजनं॥अथनामपूजा॥उमायैनमः॥गौर्यैनमः॥धात्र्यैनमः॥पार्वत्यैनमः॥जगत्प्रतिष्ठायैनमः॥शांतिरू
पिण्यैनमः॥हरायनमः॥महेश्वरायनमः॥शंभवेनमः॥शूलपाणयेनमः॥पिनाकधृषेनमः॥शिवायनमः॥पशु

३१ पतयेनमः॥ महादेवायनमः॥ पुष्पांजलिं॥ यानिकानिचपापानि॥ प्रदक्षिणा॥ अन्यथाचारणंनास्ति॥ ततोवैणवपात्रं
स्थंवायनंदद्यात्॥ अन्नंसुवर्णपात्रस्थंसवस्त्रंसफलंदक्षिणं॥ वायनंगौरिविप्राय ददामिप्रीतयेतव॥ सौभाग्यारोग्यका
मानांसर्वसंपत्समृद्धये॥ गौरीगिरीशतुष्ट्यर्थं वायनंतेददाम्यहं॥ इतिमंत्राभ्यांवायनंदद्यात्॥ ॥अथकथा॥
मंदारमालाकुलितालकायैकपालमालांकितशेखराय॥ दिव्यांबरायैचदिगंबरायनमःशिवायैचनमःशिवाय॥
कैलासशिखरेरम्येगौरीपृच्छतिशंकरं॥ गुह्याद्गुह्यतरंगुह्यंकथयस्वमहेश्वर॥ सर्वेषांधर्मसर्वस्वमल्पायासंम
य हत्फलं॥ प्रसन्नोसि[illegible]दीनाथतथाब्रूहिममाग्रतः॥ केनत्वंहिमयाप्राप्तस्तपोदानव्रतादिना॥ अनादिमध्यनिध
नोभर्त्ताचैवजगत्प्रभुः॥ ईश्वरउवाच॥ शृणुदेविप्रवक्ष्यामितवाग्रेव्रतमुत्तमं॥ यद्गोप्यंव्रतसर्वस्वंकथयामि
तवप्रिये॥ यथाचोडुगणेचंद्रोग्रहाणांभानुरेवच॥ वर्णानांचयथाविप्रोदेवानांविष्णुरुत्तमः॥ नदीषुचयथागंगा
पुराणानांचभारतं॥ वेदानांचयथासामइंद्रियाणांमनोयथा॥ पुराणवेदसर्वस्वंआगमेनयथोदितं॥ एकाग्रे
इतिहासं णशृणुष्वेतत्ययेथाईष्टंपुरातनं॥ येनपुण्यप्रभावेनप्राप्तमर्धासनंमम॥ तत्सर्वंकथयिष्येहंत्वंममप्रेयसीयतः॥
भाद्रमासिसितपक्षेतृतीयाहस्तसंयुता॥ तदनुष्ठानमात्रेणसर्वपापैःप्रमुच्यते॥ शृणुदेवित्वयापूर्वंयद्वृत्तंचरितं
महत्॥ तत्सर्वंकथयिष्यामियथावृत्तंहिमालये॥ पार्वत्युवाच॥ आसीत्तत्रमहान्दिव्योहिमवान्नगउत्तमः॥ नाना
द्रुमसमाकीर्णोनानाद्रुमसमाकुलः॥ पार्वत्युवाच॥ आसीत्तत्रमहान्दिव्योहिमवान्नगउत्तमः॥ नानापक्षि ३२

प्रथमंदोरकंहस्तेदृष्ट्वाचपतिकोपना॥ त्रोटयित्वासात्तुविक्षेपबाह्यशुष्कतरूपरि॥ नकर्त्तव्यंनकर्त्तव्यंमितिराज्ञोवदत्यपि॥
तेनसंस्पृष्टमात्रेणतरुःपल्लवतांगतः॥ तद्द्वितीयातत्तोदृष्ट्वाविस्मयाकुलिताभवत्॥ तन्मूलेदोरकंछिन्नंगृहीत्वासाबबंध
ह॥ ततस्तद्व्रतमाहात्म्यात्पतिप्रियतराभवत्॥ देवीव्रतोपचारेणसात्यक्ताद्दुःखितावने॥ भ्रमयोसाम्हादेवीधावंतीति
समन्विता॥ मुनीनामाश्रमेपुण्येनिवासंतीसतीकृचित्॥ निवारितामुनिवरैर्गच्छपापयथाक्रमं॥ धावंतीविपिनंघोरं
गणाध्यक्षंददर्शह॥ तेनदृष्ट्वापिसागौरीद्रक्ष्याम्यहमुपोषिता॥ तेस्तैर्निराकृतादृष्ट्वानिर्विण्णानृपसादह॥ ततस्तत्कृप
यागौरीप्रादुरासीन्महासती॥ ततोददर्शाग्रतःगच्छंतीवसरोद्वयं॥ ततोवनश्रियंवाग्रेसर्वाभरणभूषितां॥ पश्यंती
शानकेस्तदद्भजंतीवैवमानुषी॥ तांदृष्ट्वादंडवद्भूमौनत्वास्तुत्वानृपप्रिया॥ जयदेविनमस्तेस्तुजयभक्तवरप्रदे॥ जय
शंकरवामांगेमंगलेसर्वमंगले॥ तत्तावध्यावदंलब्ध्वागौरीमभ्यर्च्यचैतद्व्रतं॥ वकेदेवि[illegible]तस्यददौसौभाग्यसंपदः॥ इति
तस्याःप्रसादेनसर्वान्भोगानवाप्यच॥ अंतेशिवपुरंप्राप्तःकांताभिःसहितोनृप॥ यःशोभनंव्रतमिदंकथितंशिवायाः
कुर्यान्ममप्रियकरोसिवताचगौर्याः॥ प्राप्यश्रियंसमविकंशत्रु राजसंघानिजित्यनिर्मलपदंसहसाप्रयाति॥ इ
तिस्कंदपुराणेगौरीखंडेस्वर्णगौरीव्रतसंपूर्णं॥ ॥अथभाद्रशुक्लतृतीयायांशिष्टपरिगृहीतैलिकाव्रतं॥ तत्रतृती हरिता
यामुहूर्त्तसत्वेपिपरैवग्राह्याशिष्टाचारात्॥ मुहूर्त्तमभ्रसत्वेपिदिनेगौरीव्रतंपरे॥ शुद्धाधिकायामप्येवंगणयोग
प्रशंसनं॥ दितिमाधवः॥ युक्तंतुविद्धाधिकायामिवशुद्धाधिकायामपिपराप्रायकप्रमाणाभावात्संपूर्णत्वेनद्विती

समायुक्तोनानामृगविचित्रितः॥यत्रदेवाःसगंधर्वाःसिद्धचारणगुह्यकाः॥विचरंतियथादेविगंधर्वध्वनिसंकुलं॥स्फा
टिकैःकांचनैःशृंगैर्मणिवैडूर्यशोभितैः॥भुजेलिरवन्निवाकाशंसुहृदोमंदिरंयथा॥हिमेनसहितोनित्यंगंगाध्वनिविनो
१७ दितः॥पार्वतीत्वंतथाबाल्येपरमाचरतीतपः॥अष्टद्वादशकंदेविधूम्रपानमधोमुखी॥संवत्सरंचतुःषष्टिःपक्वपर्णा
शनंकृतं॥दृष्ट्वाताततेनतेकष्टंचिंतयादुःखितोभवत्॥तदेवांबरतःप्राप्तोब्रह्मपुत्रस्तुधर्मवित्॥नारदोमुनिशार्दूलः
शैलपुत्रीदिदृक्षया॥दत्वार्घ्यंविष्टरंपाद्यंनारदायोक्तवान्गिरिः॥शैलउवाच॥किमर्थमागतस्त्वामिन्वदस्वमुनिस
त्तम॥महद्भाग्येनसंप्राप्तंत्वदागमनमुत्तमं॥नारदउवाच॥शृणुशैलेंद्रमेवाक्यंविष्णुनाप्रेषितोस्म्यहं॥योग्यंयो
ग्यायदातव्यंकन्यारत्नमिदंत्वया॥वासुदेवसमोनास्तिब्रह्मविष्णुशिवादिषु॥तस्माद्देयात्वयाकन्याअत्रार्थेसंमतं
मम॥गिरिरुवाच॥वासुदेवःस्वयंदेवःकन्यांप्रार्थयतेयदि॥तदामयाप्रदातव्यात्वदागमनगौरवात्॥इत्येवंकथितं
श्रुत्वातस्यत्वंतर्दधेमुनिः॥ययौपीतांबरधरंशंखचक्रगदाधरं॥कृतांजलिपुटोभूत्वामुनींद्रस्तमभाषत॥नार
दउवाच॥शृणुदेवभवत्कार्यंविवाहोनिश्चितस्तव॥हिमवांस्तुतदागौरीमुवाचवचनंमुदा॥दत्तासित्वंमयापुत्रीदेवा
यगरुडध्वजे॥श्रुत्वावाक्यंपितुर्देवीसखीभिःसहितावने॥सिंहव्याघ्रमृगैर्व्याप्तेतत्रसुप्तासिनिर्जने॥सख्युवाच॥
किमर्थंदुःखितादेविकथयस्वममाग्रतः॥यतोभवस्यभिहितंकरिष्येहंनसंशयः॥पार्वत्युवाच॥सखिशृणुममप्रीति
मनोभिलषितंमम॥कपर्दिनंवभर्तारंकरिष्येहंनसंशयः॥एतन्मेचिंतितंकार्यंतातेनकृतमन्यथा॥तस्माद्देहंपरित्य

गंकरिष्येहंसखिप्रिये॥पार्वत्यावचनंश्रुत्वासखीवचनमब्रवीत्॥पितायत्रनजानातिगमिष्यावोहितद्वनं॥एत्येवंसंमतं
३२ कृत्वानीतासित्वंमहद्वनं॥पितानिरीक्षयामासहिमवान्स्वगृहेगृहे॥केननीतासिमेपुत्रीदेवदानवकिंनरैः॥नारदायस्र
उ तंसत्यंकिंदास्येगरुडध्वजे॥एत्येवंचिंतयाविष्टोमूर्छितोनिपपातह॥हाहाकृत्वाप्रधावंतिलोकास्तुगिरिपुंगवं॥दुःखु
गिरिवरंसर्वेमूर्छाहेतुंगिरेवद॥ ॥गिरिरुवाच॥ दुःखस्यहेतुंश्रृणुतकन्यारत्नंहृतंमम॥दष्टावाकालसर्पेणसिंह
व्याघ्रेणवाहता॥नजानेक्वगतापुत्रीकेनदुष्टेनवाहृता॥चकंपेशोकसंतप्तोवातेनेवमहातरुः॥गिरिर्वनाद्वनंयातस्त
दालोकनकारणात्॥सिंहव्याघ्रैश्चभल्लूकैरुरहिभिःसहितंवनं॥त्वंचापिपिपिनंघोरंव्रजंतीसखिभिःसह॥तत्रदृष्टा
नदीरम्यातत्तीरेचमहागुहा॥तांप्रविश्यसखीसार्धंमन्नभोगविवर्जिता॥संस्थाप्यवालुकापिंडंपार्वत्यासहितंमम॥
यात्तृतीयाभाद्रपदेहस्तनक्षत्रसंयुता॥तत्रवाद्येनगीतेनरात्रौजागरणंकृतं॥तेनव्रतप्रभावेनआसनंचलितंमम॥
संप्राप्तोहंतदातत्रयत्रत्वंसखिभिःसह॥प्रसन्नोस्मिमयाप्रोक्तंवरंब्रूहिवरानने॥ ॥पार्वत्युवाच॥ यदिदेवप्रसन्नो
सिभर्ताभवतुमेहरः॥तथेत्युक्त्वातुतांदेवींकैलासंपुनरागतः॥ततःप्रभातेसंप्राप्तेनद्यांसर्वंविसर्जितं॥पारणंतुकृ
तंतत्रसख्याधसार्धंत्वयाशुभे॥हिमवानपितंदेशमाजगामवनंघनं॥चतुराशानिरीक्षंस्त्वांविह्वलंपतितः
पुनः॥दृष्ट्वातत्रनदीतीरेप्रसुप्तंकन्ययोर्द्वयं॥उत्थाप्योत्संगमारोप्यरोदनंकृतवान्गिरिः॥सिंहव्याघ्राहिभल्लू ३२
कवनेदुष्टकुलेस्थिता॥ ॥पार्वत्युवाच॥ श्रृणुतातमयाज्ञातंत्वंदास्यसीश्वरायमां॥तदन्यथाकृतंतातेतेना
का

हं वनमागता॥ दृष्ट्वासितातयदिमामीश्वरायतदाग्रहं॥आगमिष्याम्यहंनैवं चेद्देहंत्यक्ष्यामि निश्चितं॥ तथेत्युक्त्वा हिमव
तानीतासिलंगृहंप्रति॥ पश्चात्त्वत्तातमस्माकंकृत्वावैवाहिकींक्रियां॥तेनव्रतप्रभावेनसौभाग्यंसाधितंत्वया॥अद्या
पिव्रतराजस्तुनकस्यापिनिवेदितः॥नामास्यव्रतराजस्यशृणुदेवियथाभवत्॥आलिभिर्हरितायस्मात्ततःसा
ता हरितालिका॥ पार्वत्युवाच॥ नामेदंकथितंतस्यविधिंवदममप्रभो॥किंपुण्यंकिंफलंचास्यकेनचक्रियतेकथं॥ ईश्व
रउवाच ॥शृणुदेविविधिंवक्ष्येनारीणांव्रतमीदृशं॥करिष्यंतिप्रयत्नेनयदिसौभाग्यमिच्छति॥तोरणादि
प्रकर्त्तव्यंकदलीस्तंभमंडितं॥आच्छाद्यपट्टवस्त्रैस्तुनानावर्णविचित्रितैः॥चंदनेनसुगंधेनलेपयेद्गृहमंडपं॥
शंखभेरीमृदंगैस्तुकारयेद्बहुनिस्वनं॥नानामंगलगीतंचकर्त्तव्यंममसंनिधौ॥स्थापयेद्वालुकालिंगंपार्व
त्यासहितंमम॥पूजयेद्बहुपुष्पैस्तुगंधधूपादिभिर्नरैः॥ नानाप्रकारैर्नैवेद्यैःपूजयेज्जागरंचरेत्॥ नारिकेलैःखर्जूरै
पूगफलैःजंबीरैर्बकुलैस्तथा॥ बीजपूरैःसनारिंगैःफलैश्चान्यैश्चभूरिशः॥ऋतुकालोद्भवैर्भूरिप्रकारैःकं
दमूलकैः॥धूपादिगंधैश्चतथामंत्रेणानेनपूजयेत्॥ नमःशिवायशांतायपंचवक्त्रायशूलिने॥ नंदिभृंगिमहा
कालगणयुक्तायशंभवे॥शिवायैहरकांतायैप्रकृत्यैसृष्टिहेतवे॥शिवायैःसर्वमांगल्यैशिवरूपेजगन्मये॥शि
येकल्याणदेनित्यंशिवरूपेनमोस्तुते॥शिवरूपेनमस्तुभ्यंशिवायैसततंनमः॥ नमस्तेब्रह्मरूपिण्यैजगद्धात्र्यै
नमोनमः॥संसारभयसंतापात्त्राहिमांसिंहवाहिनि॥येनकामेनदेवित्वंपूजितासिमहेश्वरि॥राज्यंसौभाग्य

२२

संपत्तिं देहि मामंब पार्वति ॥ मंत्रेणानेन देवि त्वां पूजयित्वा मया सह ॥ कथां श्रुत्वा विधानेन दद्याद्दानानि भूरिशः ॥ ब्राह्म
णेभ्यो यथाशक्त्या देयं वस्त्रहिरण्यगाः ॥ अन्येभ्यो दीयते भक्त्या स्त्रीणां वा भूषणादिकं ॥ भर्त्रा सह कथां श्रुत्वा भक्ति
युक्तेन चेतसा ॥ कृत्वा व्रतेश्वरं देवि सर्वपापैः प्रमुच्यते ॥ सप्तजन्म भवेद्राज्यं सौभाग्यं चैव वर्धते ॥ तृतीयायां तु ना
री आहारं कुरुते यदि ॥ सप्तजन्म भवेद्वंध्या वैधव्यं जन्मजन्मनि ॥ दारिद्र्यं पुत्रशोकं च कर्कशा दुःखभागिनी ॥
पच्यते नरके घोरे नोपवासं करोति या ॥ राजते कांचने ताम्रे वैणवे वाथ मृन्मये ॥ भाजने विन्यसेदन्नं सवस्त्रं
फलदक्षिणं ॥ वायनं द्विजवर्याय दद्याद्दंते च पारणं ॥ एवं विधिं या कुरुते च नारी त्वया समाना रमते च भर्त्रा ॥ भोगा
ननेकान्भुवि भुज्यमाना सायुज्यमंते लभते हरेण ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ कथाश्र
वणमात्रेण तत्फलं प्राप्यते नरैः ॥ एतत्ते कथितं देवि तवाग्रे व्रतमुत्तमं ॥ कोटियज्ञफलं पुण्यमस्यानुष्ठानमात्रतः
इति भविष्योत्तरपुराणे हरितालिकाव्रतं ॥ ॥अथोद्यापनं॥ पार्वत्युवाच॥ उद्यापनविधिं ब्रूहि तृतीयायाः
सुरेश्वर ॥ भक्तितः श्रोतुमिच्छामि व्रतसंपूर्णहेतवे ॥ महादेव उवाच ॥ उद्यापनविधिं वक्ष्ये व्रतराजस्य शोभ
ने ॥ तस्यानुष्ठानमात्रेण संपूर्णं हि व्रतं भवेत् ॥ चतुस्तंभं चतुर्द्वारं कदलीस्तंभमंडितं ॥ घंटिकाचामरयुतं क
मलैरुपशोभितं ॥ चंदनागरुकर्पूरैर्लेपितं मंडपं शुभं ॥ मध्ये वितानं बध्नीयात्पंचवर्णैरलंकृतं ॥ तन्मध्ये कार
येत्पद्मं पंचवर्णैः सुशोभनैः ॥ तस्योपरि न्यसेद्व्रीहीन्द्रोणेन परिसंमितान् ॥ सौवर्णं राजतं ताम्रं कलशं विन्य

२२

आभिनंघसुरवासीनं देवदेवं जनार्दनं ॥ उवाचवसौ कुंती सानंदात्प्रगल्भचमिदं वचः ॥ कुंत्युवाच ॥ धन्यास्मि कृ
तकृत्यास्मि सनाथास्मि परंतप ॥ साहं संभाविता द्यास्मि त्वया सर्वजगद्गुरो ॥ यदि सुप्रसन्नोसि तदा च सुव्रतं वि
भो ॥ यद्विधाय सुखं राज्यं प्राप्नुयां तनयैः सह ॥ कृष्ण उवाच ॥ कुंति ते कथयिष्यामि व्रतानामुत्तमं व्रतं ॥ यत्कृत्वा सु
ख संतान धन धान्य समन्विते ॥ विधूत दुष्कृता पुण्या सत्पुत्र राज्यमाप्स्यसि ॥ हस्तिगौरीव्रतं भद्रे कुरुष्व शुचिमा
नसि ॥ यत्कृत्वा सर्वसंपत्तिं लभते वांछितं फलं ॥ कुंत्युवाच ॥ यथोक्तं ते व्रतं नाथ विधानं तस्य कीदृशं ॥ तेन प्र
र्वकृतं देवं तन्मे ब्रूहि जनार्दनः ॥ कृष्ण उवाच ॥ कैलासशिखरे देवि हस्तस्थे च दिवाकरे ॥ दिवाप्रसुप्ता
गौरी तु हरसंनिधिमागता ॥ सा सुप्ता देवदेवेशो स्वप्नेत्रापुदद्दशे ह ॥ अर्धदेहं वृषार्धस्थं मर्धचंद्रकलाधरं ॥
किमिदं तन्ममाचक्ष्व तत्पते मानसं मम ॥ ईश्वर उवाच ॥ देवि पूर्वं निषिध्यासि हस्तऋक्षागते रवौ ॥ न स्वप्तव्यं
दिवा तत्र तस्येदं विहितं फलं ॥ शृणु देवि तयानेन रखंडितोहं विलोकितः ॥ त्वयारब्धव्रतं देवि मदाराधन काम्यया ॥
अपूर्णोस्मि प्रसन्नोस्मि तत्त्वतत्त्वया च समुद्भितं ॥ अपूर्णव्रतमानेन दृष्टोहं तादृशस्त्वया ॥ तत्कुरुष्वाधुना देवि हस्ति
गौरिव्रतं शुभे ॥ पार्वत्युवाच ॥ आदिश्यतां व्रतं नाथ विधानेन महेश्वर ॥ आरंभोस्य कदा कार्यो को विधिः कस्य पूज
नं ॥ ईश्वर उवाच ॥ मंडपं स्थापनं कुर्यात्सर्वालंकारभूषितं ॥ अन्नं हं कांचनैः पुष्पैः फलमुक्तान्वितैः शुभैः ॥ नै

वेद्यैः पंचखाद्यैश्च शृणुयात्सत्यहे कथा ॥ दिनप्राते हस्तिगौरी स्थापयेत्प्रतिमां शुभं ॥ पक्कान्नैः पूरितैः शुभ्रैः सार्धत्रयो
दशा ॥ सार्धत्रयोदशदिने नैवेद्यमुपकल्पयेत् ॥ फलमूलानि चान्यानि तावंति समुपाहयेत् ॥ पूजयेच्च सुवर्णस्य
पुष्पैश्चान्यैः सुगंधिभिः ॥ चंदनैर्धूपदीपैश्च तांबूलैश्च फलादिभिः ॥ ध्यायेच्च हृदये गौरीहरं हेरंबसंयुतं ॥ दक्षि
णां च ततो दत्वा नत्वा देवीं विसर्जयेत् ॥ सार्धत्रयोदश तथा दीपकाश्चोलिकान्वितं ॥ सुवासिन्यै स्त्रियै दत्वा ता
वतः स्वयमाहरेत् ॥ व्रतं समाचरेद्देवि त्रावद्वर्षत्रयोदश ॥ स्वर्णभाजनगो यादि प्रतिवर्षं विसर्जयेत् ॥ ततश्चतुर्द
शे वर्षे तदुद्यापनमाचरेत् ॥ संस्थाप्य मंडपे गौरीं कांचनं कांचनं गजे ॥ पूर्वोक्तविधिना पूज्य वासराणि त्रयोद
श ॥ चतुर्दशे थ दिवसे संजाते प्रातरुत्थिता ॥ कृतोपवास नियमे गते गौरीं प्रपूजयेत् ॥ पक्कान्नं स्वर्णपात्रेषु
त्रयोदशसु विक्षिपेत् ॥ स्त्रीभ्यश्च कंचुकीं दत्त्वा भोजयित्वा विसर्जयेत् ॥ एवं देवि व्रतं कृत्वा सर्वान्कामानवाप्नुया
त् ॥ अशक्तो नु सदा कार्या प्रतिमा स्वशक्तिकामयी ॥ पात्राणि वै पावान्ये वपीतपुष्पाणि नैव हि ॥ कृष्ण उवाच ॥
ततश्चैव कृतं गौरी प्राप्तासा वांछितं फलं ॥ त्वमप्येतद्व्रतं कुंति कुरुष्व श्रद्धासमन्विता ॥ अथ भक्त्या व्रतं कुंती सद्वि
धानेन तदाकरोत् ॥ गंधारी वापितच्छ्रुत्वा व्रतं चक्रे यथाविधि ॥ तुष्टा च भक्तिभावेन पुष्टा गौरी व्रतोभवेत् ॥ पार्व
त्युवाच ॥ कुंति ते परितुष्टास्मि वरं वरय सुव्रते ॥ कुंत्युवाच ॥ देहि मे सर्वसंपत्तिं सर्वसौख्यं सदास्तु ये ॥ पप्रच्छ

३५ ममपुत्राणांमहद्राज्यमनामयं॥व्रतमेतत्तुयःकुर्यात्तवलोकमवाप्स्यति॥नदारिद्र्यंनवैधव्यंनशोकानपिदुष्कृतं॥कुष्ठं
नापहतेदेविकदाचित्संभविष्यति॥तथेत्युक्त्वाततोगौरीतत्रैवांतरधीयत॥एतद्व्रतंसकलदुःखविनाशहेतुसौभाग्य
६ राज्यफलभाग्यधनधान्यकर्त्री॥यायोषितःसुखमनंतमह्यपिपूज्यगौरीपतिंपतिरताःसुकृततोलभंते॥ ॥इति
भविष्योत्तरपुराणेहस्तिगौरीव्रतं॥ ॥अथभाद्रशुक्लतृतीयायांकोटेश्वरीव्रतं॥ ।मदनरत्नेस्कांदे॥
रंभोवाच॥ देवलोकेमहादेविगणिकासौख्यसंयुताः॥मर्त्यलोकेतथासर्वाःसौभाग्यगर्विताः॥कथंभाग्यं
त्वयोगांश्चलब्धंतेपरमेश्वरी॥पार्वत्युवाच॥ शृणुभद्रेपरंगुह्यंसर्वकामफलप्रदं॥दुर्भगानांचनारीणांसौभाग्य
करणंपरं॥लक्षेश्वरीतिविख्यातंततःकोटीश्वरीव्रतं॥तृतीयाशुक्लपक्षेतुमासिभाद्रपदेभवेत्॥तस्यांव्रतंतुसं
ग्राह्यंयावद्वर्षचतुष्टयं॥उपवासेनकर्तव्यंवर्षेवर्षेतुसुंदरी॥अखंडानांतंडुलानांतिलानांवासुलोचने॥ल
क्षमेकंचविधायाथक्षिपेत्पयसिशोभने॥क्षीरसंमिश्रितैःकार्यादेव्यामूर्तिःसुलोचना॥कृत्वातुपुष्पप्राकारं
पुष्पमालाभिमंडितं॥संस्थाप्यपार्वतींदेवींपूजयेद्भक्तिभावितः॥पूजयेद्विविधैःपुष्पैःकुंकुमागरुचंदनैः॥
गंधधूपैश्चनैवेद्यैःफलैश्चविविधैस्तथा॥वस्त्रेणचैवरक्तेनपूजयेत्परमेश्वरीं॥नमोनमस्तेदेवेशिलक्ष्मेश्व
रिनमोस्तुते॥कोटीश्वरिनमस्तुभ्यंनमस्तेहरिवल्लभे॥उमादेव्यैनमस्तुभ्यंकात्यायनिनमोस्तुते॥नमःकालि ३५

सेद्युधः॥पंचरत्नानिनिक्षिप्यसर्वौषधिसमन्वितं॥तस्योपरिन्यसेत्पात्रंसौवर्णंराजतं ॥वृषारूढंमहादेवंरजतेन
विनिर्मितं॥सर्वावयवसंयुक्तांगौरींहेम्नाविनिर्मितां॥पूजयेत्तत्रगंधाद्यैःपुष्पैर्नानाविधैःशुभैः॥रात्रौजागरणंकु
वा र्यात्कथाश्रवणपूर्वकं॥ततःप्रभातेविमलेकृत्वास्नानादिकर्मच॥पूर्ववच्चार्चयेद्देवंपश्चाद्धोमंचकारयेत्॥स्वगृ
ह्योक्तेनविधिनाकृत्वाग्निस्थापनंततः॥प्रारभेच्चततोहोमंनवग्रहपुरःसरं॥तिलांश्चयवसंमिश्रानाज्येनच
परिप्लुतान्॥जुहुयादष्टमंत्रेणगौरीमंत्रेणमंत्रवित्॥अष्टोत्तरशतंवापिअष्टाविंशतिमेववा॥एवंसमाप्यहोमं
तुतत्राचार्यंप्रपूजयेत्॥सुवर्णरत्नवासोभिर्गोदद्यात्तुयथाविधि॥शय्यांसोपस्करांदद्यादाचार्यायप्र
यत्नतः॥षोडशद्विजयुग्मांश्चपक्वान्नाद्यैश्चभोजयेत्॥सौभाग्यद्रव्यवस्त्राणिवंशपात्राणिषोडश॥दा
तव्यानिप्रयत्नेनब्राह्मणेभ्योयथाविधि॥अन्येभ्योविप्रवर्येभ्योदक्षिणांचप्रयत्नतः॥श्रेयसीपरयाभक्त्या
प्रदद्याच्छिवतुष्टये॥उद्दिश्यपार्वतीशंचसर्वंकुर्यादतंद्रितः॥बंधुभिःसहभुंजीतनियतःपरेहनि॥एवंया
कुरुतेनारीव्रतराजंसुमध्यमे॥सौभाग्यमखिलंतस्यसप्तजन्मनसंशयः॥ इतिभविष्योत्तरेतृतीयोद्या
पनं॥ अथहस्तर्क्षगतरवावारभ्याप्तंहस्तिगौरीव्रतं॥ ॥सूतउवाच॥ कुंत्यांचतदुपेतायां
हस्तिनापुरमुत्तमे॥मानितायांनरेंद्रैश्चतनयैःपंचभिःसह॥तस्याःकुशलमन्विच्छन्नाजगामाथमाधवः॥

मयातोयंपाद्यार्थंप्रतिगृह्यतां॥ ह्रीं पाद्यं॥ अर्घ्यंददामितेमातर्भक्तानामभयंकरे॥ गृहाणत्वंबृहद्गौरिनमस्कारकृते ते
मम॥ अर्घ्यं॥ भक्तानामिष्टदेमातःसर्वालंकारसंयुते॥ आचम्यतांजगन्मातर्बृहद्गौरिनमोस्तुते॥ आचमनं
ततःपंचामृतस्नानं॥ ॥ ह्रीं स्नापयामिजगन्मातःस्त्वांसुतीर्थजलेनवै॥ प्रार्थयित्वामयादेविसद्यस्तापविना
शिनि॥ स्नानं॥ वस्त्रंधौतंमहादेविदुकूलंतवनिर्मितं॥ भक्त्यासमर्पितंमातर्गृह्यतांजगदंबिके॥ वस्त्रं॥ अथसिं
दूरहरिद्राकुंकुमादिसौभाग्यद्रव्याणिनिवेदयेत्॥ मलयाजलेप्सुधंघनसारमनोहरं॥ गंधंगृहाणदेवेशिबृहद्गौरि
नमोस्तुते॥ गंधं॥ चंपकादीनिपुष्पाणिभक्त्यानीतानिमेशुभे॥ पूजार्थंगृह्यतांदेविजातीपुन्नागमालती॥ पुष्पं
धूपोयंगृह्यतांदेविकालागरुघृतान्वितः॥ आघ्रेयःसर्वदेवानांदेवद्रुमरसोद्भवः॥ धूपं॥ दीपंगृहाणदेवेशित्रैलो
क्यतिमिरापहं॥ वह्निनायोजितंमातर्बृहद्गौरिनमोस्तुते॥ दीपं नैवेद्यंगृह्यतांदेविइतिनैवेद्यं॥ कर्पूरैलालवंगा
दिनागवल्लीदलैर्युतं॥ पूगीफलैर्युतंदेवितांबूलंप्रतिगृह्यतां॥ तांबूलं॥ हिरण्यगर्भमितिदक्षिणा॥ धारयिष्यामि
भद्रेत्वांत्वद्भक्तास्त्वत्परायणा॥ आयुर्देहियशोदेहिसौभाग्यंदेहिमेशिवे॥ दोरकबंधनं॥ क्षेमसंपत्करेदेविदे
विसौभाग्यदायिनि॥ सर्वकार्यप्रदेदेविगृहाणार्घ्यंनमोस्तुते॥ ततःचंद्रार्घ्यं॥ गगनांतरसंदीपक्षीराब्धिमथन
यो[illegible]भव॥ भाभासितदिगाभोगरमानुजनमोस्तुते॥ पक्वान्नंफलसंयुक्तमितिवायनं॥ आहूतासिमया

देविपूजितासिमयेशुभे॥ ममसौभाग्यदानाययथेच्छातत्रगच्छतां॥ ॥इतिविसर्जनं॥ अथकथा॥ विजयो
वाच॥ अथान्यद्बृहतीगौरीव्रतंवक्ष्यामिकन्यके॥ मासिभाद्रपदेपक्षेसितेततीयायांचयद्व्रतं॥ भाद्रोत्रदर्शांतः॥ चंद्रोद
यात्तरंपूजाविधानंकृष्णपक्षेपूजाव्रतानुष्ठानाचाराच्च॥ पक्षोत्रकृष्णपक्षः॥ आनयेद्बृहतीगौरींशाखामूलफलैःस
ह॥ निक्षिप्यदेवतांवेद्यांतदधःसिकतांशुभां॥ न्यसेच्चंद्रोदयेदृष्ट्वास्नात्वाधौतांबरान्विता॥ सखिभिःसहितासम्यग
लंकृत्यप्रपूजयेत्॥ एवंपूज्ययथासम्यक्कृत्वाचैवप्रदक्षिणं॥ दोरकंबंधयेत्तस्मात्तुपंच[illegible]कर्मितं॥ बध्नामिदोरकंभ
त्त्यालंकृतात्वत्परायणा॥ आयुर्देहियशोदेहिसौभाग्यंदेहिमेशुभे॥ अनेनदोरकंबध्वाचंद्रायार्घ्यंनिवेदयेत्॥ क्षेमसं
पत्करेदेविसर्वसौभाग्यदायिनि॥ सर्वकामप्रदेदेविगृहाणार्घ्यंनमोस्तुते॥ गंगानांगयासंदीप्तेतिचंद्रार्घ्यं॥ कथामेतां
चशृणुयाद्भक्त्यायोग्यैतन्मनाःसदा॥ ततोगोधूमचूर्णेनपंचभिःकुडवैर्मितं॥ पक्वान्नमर्धंविप्रायदत्वाभुंजीतकस्वयं॥
एवंवैपंचवर्षाणिकृत्वाव्रतमनुत्तमं॥ सर्वान्कामानवाप्नोतिनात्रकार्याविचारणा॥ कन्योवा[illegible]॥ शृणुकन्ये
यथापूर्वंपार्वत्याकथितंयथा॥ विजयोवाच॥ ॥केनचादौपुराचीर्णंव्रतंयत्तुत्वयोदितं॥ ईप्सितंकोपपलेभेवाव्रत
स्यास्यप्रभावतः॥ ॥सूतउवाच॥ शृणुध्वमृषयःसर्वेनैमिषारण्यवासिनः॥ पुराकृतयुगस्यादौसर्वभूत
हितैषिणी॥ शंभुनाकथितंगौर्यैतद्व्रतंकथयाम्यहं॥ कदाचिदुपविष्टंतंपार्वतीपरिपृच्छत॥ शंभोत्वांपरिपृच्छामिक

३२ रुणाकरशंकर ॥ सर्वबाधोपशमनं सर्वकामफलप्रदं ॥ व्रतानां सर्वदेवानां नाम उत्तमं ब्रूहि तत्वतः ॥ आयुरारोग्यदं देव पुत्र पौ
त्रप्रदायकं ॥ नद्व्रतं ब्रूहि देवेश यद्यहं तव वल्लभा ॥ ईश्वर उवाच श्रृणु देवि परं गुह्यं व्रतं परमदुर्लभं ॥ पुराभूद्द्वापरस्यां
ते पंडोः प्रियवरांगना ॥ वर्षे षोडशसंपूर्णा संपन्ना नवयौवना ॥ अनपत्या तु सा कुंती भर्तारमिदमब्रवीत् ॥ केन कर्मवि
पाकेन पुत्रहीनास्मि दुःखिता ॥ अनपत्या प्रतीकारमिदानीं ब्रूहि तत्वतः ॥ ॥ पंडुरुवाच ॥ ऋषिशापोस्ति मे
भद्रे अनपत्ये भविष्यति ॥ भर्तुस्तद्वचनं श्रुत्वा पितृगेहे भ्य गात्स्वयं ॥ पितुर्गेहे वर्त्तमाना कुंती व्यासं ददर्श सा ॥ नमस्कृ
त्य च तं प्राह कुंती मुकुलितांजलिः ॥ कुंत्युवाच ॥ तातेमे कथयिष्यामि पुत्रसंतानदायकं ॥ सर्वसंपत्करं नृणां व्रत
मेकं महामुने ॥ व्यास उवाच ॥ श्रृणु त्वं स्तहती गौरीव्रतं संतानदायकं ॥ भाद्रशुक्लतृतीयायां निशि वेदोदये शुभे ॥
स्नानं कृत्वा तु विधिवन्मौनी भूत्वा व्रतं चरेत् ॥ सर्वसंपत्करं स्त्रीणां धनपुत्रान्नसौख्यकृत् ॥ सुहिरण्यादिदानं च सर्वेषा र
मधिकं व्रतं ॥ पंचवर्षं विधातव्यं ततउद्यापनं चरेत् ॥ उद्यापनविधानेन संपूर्णफलमश्नुते ॥ अंते तु कारयेद्भद्रे सौवर्णां बृहती
फलं ॥ षष्ठ्युत्तरं तु ---- बीजैर्युतं तु कृतं ॥ देव्याः पुरं तु संस्थाप्य पूर्ववत्प्रतिपूजयेत् ॥ आचार्यं पूजयेद्भक्त्या वि
प्रान्यांश्च तथैव च ॥ सुवासिन्यः पंच पूज्या वस्त्रालंकारभूषणैः ॥ कंचुकैश्चैव ताटंकैः कंठसूत्रं हरिप्रिया ॥ वंशपात्रा
णि युग्मानि सूत्रैः संवेष्टितानि च ॥ सिंदूरं जीरकं चैव सौभाग्यद्रव्यसंयुतं ॥ गोधूमपिष्टजातं च बृहतीफलपंच ३५

महाकालि शिवदुर्गे नमोस्तुते ॥ नमः सर्वाणि रुद्राणि अपर्णे शंकरप्रिये ॥ सर्वभूतहिते देवि त्राहि संसारसागरात् ॥ पू
जामंत्रः ॥ पुरा व्रतमिदं भद्रे इंद्राण्या मत्कृतं शुभं ॥ संध्यवल्या च सावित्र्या अरुंधत्या कृतं पुरा ॥ दमयंत्या कुंत्या च रो
हिण्या च कृतं व्रतं ॥ गौरीणि भोजयेद्भक्त्या इत्या को स्वसुदीक्षितः ॥ गौरीणि सुवासिनी ॥ एवं विधि विधानेन करोति
नियतव्रतं ॥ नभैं कृतं तस्याश्च दारिद्र्यं न च दुष्टवियोजनं ॥ अष्टपुत्रा भवेन्नारी भर्तारं च गुणाधिकं ॥ सुरूपं गुणिनं को
तं पंडितं प्रियदर्शनं ॥ सुरूपा सुभगा चैव सदा पत्युः प्रिया भवेत् ॥ सह पत्या वराहेरौ कुरुते राज्यमुत्तमं ॥ अंतकाले
संततेन मोदिते त्रिदिवे तथा ॥ षष्ठिर्वर्षसहस्राणि षष्ठिर्वर्षशतानि च ॥ इदं कृत्वा पुरेंद्राणि लेभे पतिमुत्तमं ॥ रो
हिणी पतिमालेभे चंद्रं व्रतनिषेवणात् ॥ राधा देवी सुभर्तारमादित्यं प्राप्य सत्पतिं ॥ इदं ते कथितं भद्रे व्रतं कोटीश्व
रीपरं ॥ लक्ष्मीश्वरीति विख्यातं कुरु त्वं भेमनोहरं ॥ ॥ इति कोटीश्वरीव्रतं ॥ अथाश्विन कृष्णतृतीयायां हरगौरीव्र
तं ॥ तत्रपूजा ॥ चतुर्भुजां सुवर्णाभां नानालंकारभूषितां ॥ हिमेंदुतुहिनाभासां मुक्तामणिविभूषितां ॥ पाशां
कुशधरां देवीं ध्यायेत्सर्वार्थसिद्धये ॥ कमंडलुधरां भूषां सोपानपात्रं च बिभ्रती ॥ ध्यानं ॥ एहि मातर्विश्वेशे त्वं त्रि
गुणे परमेश्वरि ॥ आवाहयामि भक्त्या त्वां प्रसन्ना भव सर्वदा ॥ आवाहनं ॥ हेमरत्नकृतं देवि आसनं ते विनिर्मि
तं ॥ पाशांकुशधरे देवी मासने स्थापयाम्यहं ॥ आसनं ॥ अक्षमालांकुशधरे वीणापुस्तकधारिणि ॥ भक्त्या दत्तं

३२ कृपाकर शंकर ॥ सर्वबाधोपशमनं सर्वकामफलप्रदं ॥ व्रतानां सर्वदेवानां नाम उत्तमं ब्रूहि तत्त्वतः ॥ आयुरारोग्यदं देव पुत्रपौ
त्रप्रदायकं ॥ तद्व्रतं ब्रूहि देवेश यद्यहं तव वल्लभा ॥ ईश्वर उवाच शृणु देवि परं गुह्यं व्रतं परमदुर्लभं ॥ पुराभूद्द्वापरस्यां
ते पंडोः प्रियवरांगना ॥ वर्षषोडशसंपूर्णा संपन्ना नवयौवना ॥ अनपत्या तु सा कुंती भर्तारमिदमब्रवीत् ॥ केन कर्मवि
पाकेन पुत्रहीनास्मि दुःखिता ॥ अनपत्याप्रतीकारमिदानीं ब्रूहि तत्त्वतः ॥ ॥ पंडुरुवाच ॥ ऋषिशापोस्ति मे
भद्रे अनपत्ये भविष्यति ॥ भर्तुस्तद्वचनं श्रुत्वा पितृगेहे भ्यगात्स्वयं ॥ पितुर्गेहे वर्तमाना कुंती व्यासं ददर्श सा ॥ नमस्कृ
त्यं वचः प्राह कुंती मुकुलितांजलिः ॥ कुंत्युवाच ॥ तातेमेकथयिष्यामि पुत्रसंतानदायकं ॥ सर्वसंपत्करं नॄणां व्रत
मेकं महामुने ॥ व्यास उवाच ॥ शृणु त्वं स्त्वहती गौरी व्रतं संतानदायकं ॥ भाद्रकृष्णतृतीयायां निशि चंद्रोदये शुभे ॥
स्नानं कृत्वा तु विधिवन्मौनी भूत्वा व्रतं चरेत् ॥ सर्वसंपत्करं स्त्रीणां धनपुत्रान्नसौख्यकृत् ॥ भूहिरण्यादिदानं च सर्वेषा र
मधिकं व्रतं ॥ पंचवर्षं विधातव्यं ततउद्यापनं चरेत् ॥ उद्यापनविधानेन संपूर्णफलमश्नुते ॥ अंते तु कारयेद्रूद्रसौवर्णा बृहती
फलं ॥ षष्ठ्युत्तरं तु ---- बीजैर्युतं तु कृतं ॥ देव्याः पुरं तु संस्थाप्य पूर्ववत्प्रतिपूजयेत् ॥ आचार्यं पूजयेद्भक्त्या वि
प्रान्यंच तथैव च ॥ सुवासिन्यः पंच पूज्या वस्त्रालंकारभूषणैः ॥ कंचुकैश्चैव ताटंकैः कंठसूत्रं हरिप्रिया ॥ वंशपात्रा ३५
णि युग्मानि सूत्रैः संवेष्टितानि च ॥ सिंदूरं जीरकं चैव सौभाग्यद्रव्यसंयुतं ॥ गोधूमपिष्टजातं च बृहतीफलपंच

महाकालि शिवदुर्गे नमोस्तुते ॥ नमः सर्वाणि रुद्राणि अपर्णाशंकरप्रिये ॥ सर्वभूतहिते देवि त्राहि संसारसागरात् ॥ पू
जामंत्रः ॥ पुरा व्रतमिदं भद्रे इंद्राण्या यत्कृतं शुभं ॥ संध्यावल्या च सावित्र्या अरुंधत्या कृतं पुरा ॥ दमयंत्या कुंत्या च रो
हिण्या च कृतं व्रतं ॥ गौरीणि भर्जयेच्छक्त्या इत्या को क्षेत्रसुदीक्षितः ॥ गौरीणि सुवासिनी ॥ एवं विधिविधानेन करोति
नियतव्रतं ॥ न भैं कृतेस्याज्जदारिद्र्यं न च दुष्टवियोजनं ॥ अष्टपुत्रा भवेन्नारी भर्तारं च गुणाधीकं ॥ सुरूपं गुणिनं को
तं पंडितं प्रियदर्शनं ॥ सुरूपा सुभगा चैव सदा पत्युः प्रिया भवेत् ॥ सह पत्या वराहे रौकुरूते राज्यमुत्तमं ॥ अंतकाले
सततेन मोदिते त्रिदिवे तथा ॥ षष्टिवर्षसहस्राणि षष्टिर्वर्षशतानि च ॥ इदं कृत्वा पुरेंद्राणि लेभे पतिमुत्तमं ॥ रो
हिणी पतिमाले भे चंद्रव्रतनिषेवणात् ॥ राणादेवी सुभर्तारमादित्यं प्राप्य सत्पतिं ॥ इदं ते कथितं भद्रे व्रतं कोटीश्व
रीपरं ॥ लक्ष्मीश्वरीति विख्यातं कुरु रंभे मनोहरं ॥ ॥ इति कोटीश्वरी व्रतं ॥ अथाश्विन कृष्णतृतीयायां हरगौरी व्र
तं ॥ तत्रध्यानं ॥ चतुर्भुजां सुवर्णाभां नानालंकारभूषितां ॥ हिमेंदुतुहिनाभासां मुक्तामणिविभूषितां ॥ पाशां
कुशधरां देवीं ध्यायेत्सर्वार्थसिद्धये ॥ कमंडलुधरां शुभ्रां सोपानपात्रं च बिभ्रती ॥ ध्यानं ॥ एहि मातर्विश्वेशे त्वं त्रि
गुणे परमेश्वरि ॥ आवाहयामि भक्त्या त्वां प्रसन्ना भव सर्वदा ॥ आवाहनं ॥ हेमरत्नकृतं देवि आसनं ते विनिर्मि
तं ॥ पाशांकुशधरे देवी मासने स्थापयाम्यहं ॥ आसनं ॥ अक्षमालांकुशधरे वीणापुस्तकधारिणि ॥ भक्त्या दत्तं

हंतारः प्राणिनां चैव अभक्ष्याणां च भक्षकाः॥ कृमिरोगेन रकान्भुक्त्वा जायंते कुत्सिता नराः॥ दरिद्राः पंगवो मूकाः कार
घाः दुर्भगास्तथा॥ नारदैवं स्वकामोत्थैर्नरा नार्यश्च दुःखिताः॥ नारद उवाच॥ उपायं ब्रूहि भगवन्येन कर्मक्षयो भवेत्॥ त
पोदानं व्रतं तीर्थं शरीरस्य च शोषणं॥ दुःखसंतापतप्तानां जीवितान्मरणं वरं॥ ॥ब्रह्मोवाच॥ शृणु नारद यद्गुह्यं व्र
तानामुत्तमं व्रतं॥ सर्वदुःखशमनं व्याधिदारिद्र्यशोकनाशनं॥ सुखसौभाग्यजननं पुत्रपौत्रप्रदायकं॥ सुरूपं च सौ
भाग्यकरणं कामदं तथा॥ नारीणां च विशेषेण सुखसौभाग्यदायकं॥ वसिष्ठाय पुरा प्रोक्तं ऋषीणां च समागमे॥
कैलासशिखरे रम्ये शंकरेण महात्मना॥ नारद उवाच कस्मात्प्रोवाच भगवान्कृपया कस्मादजायत॥ ब्र
ह्मोवाच॥ दृष्ट्वाद्भुतं च सौभाग्यं अरुंधत्या जगत्प्रभुः॥ तथा रूपं च शीलं च सौभाग्यमतुलं तथा॥ दृष्ट्वा शिरः
प्रकंपेन जहास भृशं शंकरः॥ पृष्टवान्कारणं देवं वसिष्ठः स्मितकारणं॥ ईश्वर उवाच अहो व्रतस्य माहात्म्यं श्रू
यतां ऋषिसत्तमाः॥ पुरा जन्मनि शूद्रस्य दास्यकर्मरता सदा॥ उच्छिष्टभोजना नित्यं उच्छिष्टशयना सदा॥ कुरूपा
दुर्भगा दीना रूक्षा गद्गदभाषिणी॥ नाम्ना मेघवती ख्याता दुर्दर्शवदना शुभा॥ एकदा प्रेषणार्थं सा गता ब्राह्म
णसंनिधौ॥ श्रुतं व्रतं च नारीणां वाच्यमानं द्विजन्मना॥ सौभाग्यसुंदरी नाम तृतीया सर्वकामदा॥ ज्ञानचौरा
गमे शास्त्रे सर्वकर्मफलप्रदा॥ मया प्रकाशिता पूर्वं प्रार्थितेन मया तथा॥ चीर्णं तया प्रसंगाच्च मेघवत्या प्रसंग

तः॥ कुत्सितं चैव नैवेद्यं दत्तं दानं च किंचन॥ हविष्यं च तथोच्छिष्टं पारणं तथा कृतं॥ केवलं च व्रतं चीर्णं श्रद्धया पूतेन चे
तसा॥ श्रद्धया धार्यते धर्मो बहुभिर्नार्थराशिभिः॥ ऋषयश्चक्रिरे धर्मं श्रद्धया भावितात्मनः॥ तेन धर्मविपाकेन नि
षादाधिपतेः सुता॥ सुरूपा च सुशीला च सर्वलक्षणसंयुता॥ संपूर्णावयवा शांता तस्या देव्याः प्रसादतः॥ उच्छिष्ट
भोजनाज्जाता निषादानां च योनिषु॥ अदत्तदानात्संजाता तपसा भोगवर्जिता॥ व्रतप्रभावाज्जायंते सुरूपा च
पतिव्रता॥ महासौभाग्यसंयुक्ता साक्षाल्लक्ष्मीरिवापरा॥ सर्वकामप्रदा देवि नंदिनी वसते गृहे॥ तद्व्रतं वासिदेवर्षे
सर्वकामफलप्रदं॥ नारद उवाच व्रतस्य विधिं ब्रूहि को विधिः किं च पूजनं॥ कस्मिन्मासे प्रकर्तव्यं देवता का
प्रकीर्तिता॥ किं पुष्पं किं च नैवेद्यं ध्यानं कस्य च पूजनं॥ ब्रह्मोवाच॥ व्रतस्यारंभणं चादौ मार्गशीर्षेथ माघ
के॥ द्वितीयावेधरहिता तृतीया या सिता भवेत्॥ चतुर्थी योगिनी किंचिच्छुद्धा वापि यदा भवेत्॥ उपवासं प्रकुर्वी
त दंतशुद्धिं तदा व्रती॥ उमे देवि नमस्तुभ्यं शंकरस्यार्धहारिणी॥ प्रसीद श्रीमहेशानि करिष्ये व्रतमुत्तमं॥
सांनिध्यं कुरु मे तत्र व्रतेस्मिन्हरिवल्लभे॥ नियममंत्रः॥ सौभाग्यसुंदरी नाम वरिष्ठा सा प्रकीर्तिता॥ सर्वकाम
प्रदे देवि सर्वसत्ववशंकरी॥ तस्या दर्शनमात्रेण सदा संजायते जगत्॥ द्रोणपुष्पैश्च संपूज्य दाडिमं वा घृतेन तु
वे॥ नैवेद्यं मोदकान्दद्यात्कर्पूरं प्राशयेत्ततः॥ धात्रीफलं ददेदर्घ्यं कंकोलं प्राशयेन्निशि॥ नैवेद्यं वल्लकाः काया

३९ घृतशर्करयान्विता ॥ कंकोलं बुतदा प्राश्य राज्यसौभाग्यहेतवे ॥ घृतेन बोधयेद्दीपं रात्रौ जागरणं सदा ॥ सर्वकाम
प्रदा देव सर्वदुःखहरा परा ॥ सर्वैश्वर्यप्रदा देवि सर्वपापहरा सदा ॥ एकापि बहुधात्मानं नामरूपप्रभेदतः ॥ माघमा
से च संप्राप्ते बदर्या दंतधावनं ॥ प्रातः कुर्वीत नियमं रूपसौभाग्यहेतवे ॥ अपराह्णे ततः स्नात्वा सर्वाभरणभूषि
ता ॥ चूतपुष्पैश्च संपूज्य रूपसौभाग्यसुंदरी ॥ नारिकेलार्घदानं च नैवेद्यं शष्कुली स्मृता ॥ प्राशनं चैव कस्तूरी
रूपसौभाग्यसंयुता ॥ पूजयेत्तत्र सा देवी कामसौभाग्यसुंदरी ॥ फाल्गुनस्यासिते पक्षे प्रातर्नियमसंयुता ॥ सौभा
ग्यसुंदरी बिल्वं दंतकाष्ठं तु कारयेत् ॥ स्नानं कृत्वा तथा नारी कांचनारैश्च पूजयेत् ॥ नैवेद्यं सक्तवस्तत्र घृतश
र्करयान्विताः ॥ यक्षकर्दमजोले पोधूपश्चागरुसंभव ॥ सर्वासु च तृतीयासु विधिरेष उदाहृतः ॥ बीजपूरार्घ
दानं च प्राशनं चंदनोदकं ॥ प्राशनस्य प्रभावेन सर्वान्कामानवाप्नुयात् ॥ पारणं च प्रकर्तव्यं सह सर्वैश्च बांधवैः ॥
चैत्रमासि प्रकर्तव्या तृतीया पापनाशनी ॥ प्रयत्नेन प्रकर्तव्या सुखसौभाग्यसुंदरी ॥ दंतकाष्ठं प्रकुर्वीत जंबु
वृक्षसमुद्भवं ॥ पूजा मदनकेनैव ह्यर्घे बिल्वफलं स्मृतं ॥ नैवेद्यं मंडकाः कार्याः शर्कराघृतसंयुताः ॥ सुख
सौभाग्यसिद्ध्यर्थं प्राशनं वज्रधारिणः ॥ वैशाखस्य सिते पक्षे तृतीयायामुपोषयेत् ॥ मालती दंतकाष्ठं च नियम
ग्रहणं ततः ॥ पतिसौभाग्यदां देवीं सुंदरीं पूजयेत्ततः ॥ पद्मैः सितैः सुरक्तैश्च मल्लिकाभिश्च पूजनं ॥ द ३९

६

कं ॥ वायनानि च पंचैव ताभ्यो दत्वा तु भोजयेत् ॥ अर्घ्यं दत्वा वायनानि दत्वा भुंजीत वाग्यतः ॥ तत्फलं धारयेत्कंठे स
र्वकामसमृद्धये ॥ ततः प्रातः समुत्थाय सालंकारसखीजने ॥ गीतवाद्ययुतान घां गौरीं तां तु विसर्जयेत् ॥ आहूता
सि मया देवि पूजितासि मया शुभे ॥ मम सौभाग्यदानाय गम्यतां - - त्वया ॥ एतद्व्रतप्रभावेन काचिद्ब्राह्मणकन्यका ॥
पतिं संजीवयामास निर्भर्त्स्य यमकिंकरान् ॥ तस्माच्चर त्वं व्रतमेतदाद्यं मा खेदमाप्नुहि पुत्रसमृद्धिदं च ॥ पुत्रैश्च पौत्रैश्च युता
च पत्या गौरीप्रसादाद्ध्रुवजीवपत्या ॥ य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः ॥ संभुक्त्वा विपुलान्भोगानंते शि
वपदं व्रजेत् ॥ ॥ इति विष्णुधर्मोत्तरे बृहद्गौरीव्रतं ॥ ॥ इदं कर्णाटकेषु प्रसिद्धं ॥ अथ मार्गशीर्षमाघवैशाख
तृतीयायां सौभाग्यसुंदरीव्रतं तच्च चतुर्थीयुतायां कार्यं न द्वितीयाविद्धायां ॥ द्वितीयावेधरहितात्तृतीयायां सितात्मभव
त् ॥ चतुर्थ्यां योगिनी किंचित्सुद्धा वापि यदा भवेदिति कथायामुक्तेः ॥ नारद उवाच भगवन्ते प्रजाः सृष्टा नानाव
र्णास्तथा गुणाः ॥ स्वेदजा अंडजाश्चैव उद्भिज्जाश्च जरायुजाः ॥ देवासुराः सगंधर्वाः सयक्षोरगराक्षसाः ॥ एके सुरू
पाः सुभगा वलिताश्चापरे तथा ॥ तथान्ये दुःखसंयुक्ताः काणा मूकाश्च पंगवः ॥ दुःशीला दुर्भगा दीना परकर्मकरा
सदा ॥ एतन्मे हृदि संतापसंशयं छेत्तुमर्हसि ॥ श्रीलोवाच शृणु वत्स प्रवक्ष्यामि त्वं प्रोक्तासि प्रियासि मे ॥ क
र्मबीजप्ररूढं हि शरीरं पांचभौतिकं ॥ ये दत्तदानजायं ते परकर्मरताः सदा ॥ परापवादवक्तारः परद्रव्यापहारिण

सुंदरी॥ उत्पलैः शतपत्रैश्च पूजा कार्या प्रयत्नतः॥ नारंगमर्घदानं च कूष्मांडं वापि कल्पयेत्॥ नैवेद्ये गणकाश्शुक्त्रो
न्घृतशर्करया विनान्॥ औदुंबरं पयः प्राश्य सुंदरी प्रीयतां मम॥ पुत्रपौत्रसमायुक्ता सुखसौभाग्यसुंदरी॥ कार्त्ति
कमासि संप्राप्ते तृतीयामुपवासतः॥ औदुंबरं दंतकाष्ठं कृत्वा व्रतमुपाचरेत्॥ केतकीभिश्च सौभाग्यं नाम्ना सौ
भाग्यसुंदरी॥ निवेदयेद्धूपांश्च सुगंधाढ्यान् लिसे भवान्॥ आक्रोडं चार्घदानं च लवंगं प्राशयेत्ततः॥ सावित्रे
गंन चाप्नोति पितृभ्रातृसुतादिभिः॥ एवं चीर्णे व्रते कुर्यादुद्यापनविधिं ततः॥ सर्वशास्त्रमधीयानो आगमेषु
विशारदं॥ आचार्यं प्रार्थयेत्प्रातर्मार्गशीर्षे यथाविधि॥ चीर्णव्रत माहाचार्य उद्यापनविधिं मम॥ व्रतं वैक
ल्यनाशाय यथाशास्त्रं समाहितः॥ सुंदरीमंडलं कार्यं गौरीतिलकमेव च॥ उमामहेश्वरं देवं सौवर्णं तु का
रयेत्॥ अत्तारं भेय यथाशक्त्या राजतं वापि कारयेत्॥ वित्तशाठ्यं न कुर्वीत सति द्रव्ये फलार्थिना॥ पूर्वं प्रकल्पितां
मूर्तिं तामेवं मंडले र्चयेत्॥ सर्वोपहारैर्गंधाद्यैः पुष्पैर्नानाविधैरपि॥ एकैव सा जगन्माता बहुरूपैर्व्यवस्थिता॥
रूपैर्द्वादशभिश्चैव पूज्या सौभाग्यसुंदरी॥ ततः पद्मनिभां देवीं रक्तवस्त्रोपशोभितां॥ रक्ताभरणशोभाढ्यां र
क्तकुंकुमचर्चितां॥ ध्यात्वा ह्येवंविधां देवीं पूजयेदेकमानसः॥ रात्रौ जागरणं कार्यं गीतवादित्रनिस्वनैः॥ ततः
सर्वाणि पुष्पाणि नैवेद्यानि फलानि च॥ अर्घ्यार्थं परिकल्प्यानि सर्वकामार्थसिद्धये॥ ततः प्रभाते विमले स्नानं

कृत्वा विधानतः॥ कुसुंभकुसुमैर्होमं किंशुकैर्वापि कारयेत्॥ अष्टोत्तरशतं पूर्णं मधुसर्पिःसमन्वितं॥ तदर्धं वै तु कर्तव्यं
शतपत्रैर्विधानतः॥ आसुरेणाच मंत्रेण गोपमुख्य समाचरेत्॥ भोजयेच्च प्रयत्नेन वत्सलार्यं ष्टौ प्रयत्नतः॥ मिष्टान्नेन
सपत्नीकान् सुतकांश्चे परिधापयेत्॥ वस्त्रालंकरणैश्चैव यथाशक्त्या प्रपूजयेत्॥ सौभाग्यवस्त्रं वैकैकं नारीपात्रं वै व
दापयेत्॥ ततो हस्ते प्रदातव्यं कुंकुमं लवणं गुडं॥ नारिकेलं तथा वल्ली दूर्वा सिंदूरकज्जलं॥ मंगलाष्टकमेतद्धि दत्वा
सौभाग्यमाप्नुयात्॥ आचार्यं च सपत्नीकं वस्त्रालंकारभूषणैः॥ परिधाप्य यथाशक्त्या मंडलं तत्समर्पयेत्॥ प्रार्थ
येच्च ततो देवीं सर्वसौभाग्यसुंदरी॥ दत्वा मत्प्रार्थितान् कामान् गच्छ देवि यथासुखं॥ मूर्तिं च मंडलं देव्यं तु पा
हारश्च सर्वशः॥ गुरो गृहाण सर्वत्वं सुंदरी प्रीयतामिति॥ त्वत्प्रसादान्मया चीर्णं व्रतमेतत्सुदुर्लभं॥ क्षमस्व
विप्रशार्दूल प्रसादसुमुखो भव॥ एवं चीर्णव्रता नारी कन्या वापि भवेत्सदा॥ येनेदं च कृतं वत्स से प्राप्तं जन्मतः फ
लं॥ नातः परतरं किंचिद्व्रतं सौभाग्यकारकं॥ देहांतेन्द्रियलोके तु भोगान्भुक्त्वा यथेप्सितान्॥ इति सौभा
ग्यसुंदरीव्रतं॥ ॥ इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के तृतीयाव्रतानि॥ अथ
चतुर्थीव्रतानि॥ ॥ तत्र श्रावणकृष्णचतुर्थ्यां संकष्टचतुर्थीव्रतं॥ तच्चंद्रोदयव्यापिन्यां कार्यं॥ श्रावणे बहु
लेपक्षे चतुर्थ्यां तु विधूदये॥ गणेशं पूजयित्वा तु चंद्रायार्घ्यं प्रदीयते॥ इति कथायां तत्र पूजाविधानात्॥ द्वि

नद्वयेव्याप्तावव्याप्तौ वा पूर्वामात्वविधोगणेश्वर इति वचनात् ॥ गणेशयोगो शिवकुलाप्यतिरिक्ताः प्रकीर्त्तिताः ॥ च
तुर्थ्यः पंचमी विधा देवतांतरयोगतः ॥ इति ॥ ब्रह्मवैवर्त्तवचनात् ॥ नन्द तृतीया विधा विधारकवचनानो दिवा
त्रिमुहूर्त्तवेधेसत्त्व प्रवृत्तिर्न रात्रौ विति त्रमितव्यं ॥ अहः स्तुतिथयः पुण्यकर्मानुष्ठानतो दिवा ॥ नक्तादिव्रतयो
गेषु रात्रियोगो विशिष्यत इति वचनेन रात्रिवेधस्यापि रात्रिसाध्यकर्मसु हेमाद्रिमाधवादिभिरुक्तत्वात् ॥ अ
थव्रतविधिः ॥ ॥ मासपक्षाद्युल्लिख्य विद्याधनपुत्ररोगमुक्तिसंकष्टनाशकामः स्त्री तु भर्त्रादिका मासंकष्ट
चतुर्थीव्रतं करिष्ये इति संकल्प ॥ सौवर्णरूप्यताम्रमृन्मयाद्यन्यतमां गणपतिमूर्त्तिं कृत्वा जलपूर्णावस्त्रयु
तं कुंभे तस्याग्रे स्थापयित्वा षोडशोपचारैः पूजयेत् ॥ लंबोदरं चतुर्बाहुं त्रिनेत्रं रक्तवर्णकं ॥ नानारत्नैः सुवेषा
ढ्यं प्रसन्नास्यं विचिंतयेत् ॥ ध्याये गजाननं देवं तप्तकांचनसुप्रभं ॥ चतुर्भुजं महाकायं सूर्यकोटिसमप्रभं ॥ आ
वाहन ॥ ॥ आगच्छ त्वं जगन्नाथ सुरासुरनमस्कृत ॥ अनाथनाथ सर्वज्ञ विघ्नराज कृपां कुरु ॥ गजास्याय न
मः ॥ ॥ आसनं ॥ गोप्तात्वं सर्वलोकानामिंद्रादीनां विशेषतः ॥ अमत्या दारिद्र्य विच्छेत्ताए कदंत नमोस्तुते ॥
विघ्नराजाय नमः ॥ पाद्यं ॥ मोदकान्नमवर्णेन भक्तानां वरदायक ॥ देवदेव नमस्तेस्तु भक्तानां फलदो भव ॥ लं
बोदराय नमः ॥ ॥ अथार्घ्यमंत्रः ॥ महाकाय महारूप अनंतफलदायक ॥ देवदेव नमस्तेस्तु सर्वेषां पापना ४१

८

धिपस्तु सकर्पूरं शर्कराघृतसंयुतं ॥ नैवेद्यं कल्पयेद्देव्या अर्धं चात्र फलं लभेत् ॥ हस्तोदकं च संप्राश्य पुष्टिसौभाग्यमा
प्नुयात् ॥ ज्येष्ठे मासि तृतीयायां उपवासपराभवेत् ॥ यूथिकादंतकाष्ठं च लावण्यं सुभगार्थिनी ॥ मल्लिकाकुसुमैः पू
ज्याय सकर्दमचर्चितां ॥ लावण्यसुभगां देवीं सुंदरीं पूजयेत्ततः ॥ कदली फलार्घ्यदानं च नैवेद्यं घृतपूरिका ॥ मौक्ति
कं बुततः पीला लावण्यसुभगा भवेत् ॥ आषाढे च ततो मासि पति सौभाग्यसुंदरी ॥ प्रातरुत्थाय कर्तव्यं दंतकाष्ठ
मशोकजं ॥ नियमं तत्र कुर्वस्तत्तृतीयायां प्रयत्नतः ॥ निल्वपत्रैः कोमलैश्च पति सौभाग्यसुंदरी ॥ जंबूफलार्घ
दानं च नैवेद्यं पायसं स्मृतं ॥ शर्कराघृतसंयुक्तं सुंदरी प्रीयतां मम ॥ विद्रुमं बुनिशिं प्राश्यं हविष्यं पारणं स्मृतं ॥
सपत्नीनां पुरं नैव सदय श्यति कदाचन ॥ श्रावणे मासि संप्राप्ते तृतीयायामुपोषिता ॥ बिल्वी वा दंतकाष्ठं च ॥
लीपुष्पैश्च पूजनं ॥ सर्वैश्वर्य च सौभाग्यं सुंदरीं पूजयेत्ततः ॥ नैवेद्यं शुभ्रकंसारं धूपदीपादिकं ततः ॥ कदलीफला
र्घ्यदानं च प्राशनं रजतं पयः ॥ गजाश्वपशुदासीनां हेमरत्नादि वाससां ॥ ईश्वरी सर्वलोकानां भगवत्याः प्रसादतः ॥
मासि भाद्रपदे प्राप्ते पूज्य सौभाग्यसुंदरी ॥ दंतकाष्ठं तु कर्त्तव्यं मातुलिंगीसमुद्भवं ॥ उत्पलैः पूजयेद्देवीं अर्घं क
र्कोटकीफलैः ॥ नैवेद्यं शोकवर्त्तिन्यं पिबेन्मालि क्यजं पयः ॥ कर्पूरागरुकस्तूरी मुखे स्वादे सुगंधितां ॥ आश्व
युज्यसितेपक्षे तृतीयायां व्रतं चरेत् ॥ दंतकाष्ठं प्रकर्त्तव्यं प्लक्षवृक्षसमुद्भवे ॥ पूजयेत्परया भक्त्या पुत्रसौभाग्य

वरदायनमः॥ एवंपूजाप्रकर्त्तव्या षोडशैरुपचारकैः॥ मोदकान्कारयेन्मात्तस्तिलजान्दशपार्वती॥ देवाग्रेस्थापयेत्पंचवि
प्रायकल्पयेत्॥ पूजयित्वातुतद्विप्रं भक्तिभावेनदेवयेत्॥ दक्षिणांचयथाशक्त्यादत्वापंचैवमोदकान्॥ भक्षयेन्नि
शिचंद्रस्यअर्घ्यंदत्वायथाविधि॥ चंद्रार्घ्यमंत्रः॥ क्षीरसागरसंभूतसुधारूपनिशाकर॥ गृहाणार्घ्यमयादत्तंग
णेशप्रीतिवर्धन॥ मोदकदानमंत्रः चित्रवर्यनमस्तुभ्यंमोदकान्वैददाम्यहं॥ मोदकान्सफलान्मंत्रंदद्याद
क्षिणयान्वितान्॥ आपदुद्धरणार्थायगृहाणद्विजसत्तम॥ गणेशप्रार्थना अबुधमतिरिक्तंचाद्रव्यहीनंमया
कृतं॥ तत्सर्वंपूर्णतांयातुविघ्नरूपगणेश्वर॥ ब्राह्मणान्भोजयेद्देवयथान्नेनयथासुखं॥ स्वयंभुंजीतपश्चैवमो
दकान्फलसंयुतान्॥ अशक्तश्चैकमन्नंवाभुंजीतदधिसंयुतं॥ अथवाभोजनंकार्यमेकवारंहिमाद्रिजे॥ प्र
तिमांगुरवेदद्यादाचार्यायसदक्षिणां॥ वस्त्रकुंभसमायुक्तेआदौमंत्रमिमंजपेत्॥ विसर्जनमंत्रः॥ गच्छगच्छसुर
श्रेष्ठस्वस्थानंतंगणेश्वर॥ व्रतेनानेनमेनित्यंयथोक्तफलदोभव॥ ॥अथकथा॥ ॥हेमाद्रौस्कांदे॥ ॥
ऋषयऊचुः॥ दारिद्र्यशोककष्टाद्यैपीडितानांचवैरिभिः॥ राज्यभ्रष्टैर्नृपैःसर्वैःक्रियतेकिंशुभार्थिभिः॥ ध
नहीनैर्नरस्कंदसर्वोपद्रवपीडितैः॥ विद्यापुत्रगृहभ्रष्टैःरोगयुक्तैःशिवार्त्तिभिः॥ कर्त्तव्यंकिंवदोपायंपुनःक्षेमा
र्थसिद्धये॥ स्कंदउवाच॥ शृणुध्वंमुनयःसर्वेव्रतानामुत्तमंव्रतं॥ संकष्टतरणंनामामुत्रेहसुखदायकं॥ ये

नोपायेनसंकष्टंतरंतिभुविदेहिनः॥ यदुक्तंदेवकीपुत्रःकृष्णोधर्मापदत्तवान्॥ अरण्येक्रियमानाभ्युनःक्षेमार्थसिद्धये
यथाकथितवान्पूर्वंगणेशोमानरंप्रति॥ तथाकथितवान्श्रीशोद्वापरेपांडवान्प्रति॥ ऋषयऊचुः॥ कथंकथि
तवानंबापार्वतीश्रीगणेश्वरः॥ तथापृच्छंतिमुनयोलोकानुग्रहकांक्षिणः॥ स्कंदउवाच पुराकृतयुगेपुण्येहिमा
चलसुतासती॥ तपस्तप्तवतीभूरिनदृष्टःशंकरःपतिः॥ तदासंस्मारहेरंबंगणेशंपूर्वजंसुतं॥ तत्क्षणादागतंदृ
ष्ट्वागणेशंपरिपृच्छती॥ पार्वत्युवाच॥ तपस्तप्तंमयाघोरंदुस्तरंलोमहर्षणं॥ नप्राप्तःपार्वतीकांतोगिरीशो
ममवल्लभः॥ संकष्टतरणंदिव्यंव्रतंनारदमुक्तवान्॥ त्वदीयंयद्व्रतंतातवत्सकथयस्वपुरातनं॥ तच्छ्रुत्वापार्वती
वाक्यंसंकष्टतरणव्रतं॥ प्रीत्याकथितवान्देवोगणेशोज्ञानसिद्धिदः॥ गणेशउवाच॥ श्रावणेबहुलेपक्षे
चतुर्थ्यांतुविधूदये॥ गणेशंपूजयित्वातुचंद्रायार्घ्यंप्रदीयते॥ पार्वत्युवाच क्रियतेकेनविधिनाकिंका
र्यंकिंचपूजनं॥ उद्यापनंकदाकार्यंमंत्राःकेस्युस्तत्पूजने॥ किंध्यानंश्रीगणेशस्यगणेशवदविस्तरात्॥ श्री
गणेशउवाच॥ चतुर्थ्यांप्रातरारभ्यदंतधावनपूर्वकं॥ ग्राह्यंव्रतमिदंपुण्यंसंकष्टतरणंशुभं॥ कर्त्तव्यमितिसंकल्प्यव्रतेस्मि
न्गणपंस्मरेत्॥ स्वीकारमंत्रः॥ निराहारोस्मिदेवेशयावच्चंद्रोदयोभवेत्॥ भोक्ष्यामिपूजयित्वाहंसंकष्टात्तारयस्वमां॥ ए
वंसंकल्प्यराजेंद्रस्नात्वाकृष्णतिलैःशुभैः॥ आन्हिकंतुविधायैवपश्चात्संध्यागणाधिपः॥ त्रिभिर्माषैस्तदर्धेनतत्तृतीयां

४२ शेन वा पुनः ॥ यथाशक्त्या तु वा हेमी प्रतिमा क्रियते मला ॥ माषमात्रात्तदूर्ध्वं स्यात्तृतीयांशेन वा पुनः ॥ हैमाभावे तु रौप्यस्य
ताम्रस्यापि यथासुखं ॥ सर्वथैव दरिद्रेण क्रियते मृन्मयी शुभा ॥ चिराशादेन कर्तव्यं संकृते कार्यं विनश्यति ॥ जलपू
र्णं वस्त्रयुते कुंभे तस्यायतोन्यसेत् ॥ पञ्चामृत्त दर्वं पुण्यं गंधपुष्पैः प्रपूजयेत् ॥ श्रीगणेश उवाच एवं व्रतं तु कर्तव्यं
प्रतिमासं त्वया द्विजे ॥ यावज्जीवं तु वा वर्षाण्येकविंशति पार्वती ॥ अशक्त्य स्त्वेकवर्षं वा प्रतिवर्षमथापि वा ॥ उद्याप
नं तु कर्तव्यं चतुर्थ्यां श्रावणे सिते ॥ स्वीकारश्चात्तथाकार्यं संकष्टहरणे तिथौ ॥ गाणपत्यं तथाचार्यं सर्वशास्त्रवि
शारदं ॥ श्रद्धया प्रार्थयेदादौ तेनोक्तं विधिमाचरेत् ॥ एकविंशति विप्रांश्च वस्त्रालंकारभूषणैः ॥ पूजये कोहिरण्याद्यैर्मंडलादौ वि
धिनानलं ॥ होमयेन्मोदकान्पश्चात्तिलजान्दघृतसंयुतान् ॥ अष्टोत्तरसहस्रं वा नात्विदृष्टोत्तरं शतं ॥ अष्टाविंशति संख्या
ते मोदकैर्वा सिताकरैः ॥ अशक्तो शेषु मानस्त्र लान्लुक याज्ञातनदास ॥ पुष्पमंडपिकाकार्या गणेशाल्हादकारिणी ॥
पूजयेत्तत्र गणपं भक्तसंकष्टनाशनं ॥ गीतैर्वादित्रनिनदैर्भक्तिभावपुरस्कृतैः ॥ पुराणवेदाध्ययनैस्तोषयेत्तत्र श्री
गणेश्वरं ॥ एवं जागरणं कार्यं शक्त्या दानादिकं तथा ॥ सपत्नीकं तथाचार्यं भूषयेद्वस्त्रभूषणैः ॥ उपानच्छत्रगोदानकमं
डलुफलादिभिः ॥ शय्यावाहनभूदानधनधान्यगृहादिभिः ॥ यथाशक्त्या प्रकर्तव्यं दारिद्र्याभावमिच्छता ॥ एकविंशति विप्रा
श्च भोजयेन्नाममित्रिमेम ॥ गजास्यो विघ्नराजश्च लंबोदरः शिवात्मजो ॥ वक्रतुंडः शूर्पकर्णः कुब्जश्चैव गणेश्वरः ॥ विघ्न
नाशी हि विकटो वामनः सर्वदेवताः ॥ सर्वार्तिनाशी भगवान्विघ्नहर्ता च धूम्रकः ॥ सर्वदेवाधिदेवश्च सर्वे षोडशोक्त ४२

शनैः शंकरसूनवे नमः ॥ अर्घ्यं ॥ स्नानेयं चाम्बुते नैव गृहाण गणनायक ॥ अनाथनाथ सर्वज्ञ नमो मूषकवाहन ॥ उमासु
ताय नमः ॥ स्नानं ॥ कुरुष्वाचमनं देव सुरवंद्य सुवाहन ॥ सर्वाघदलन स्वामिन्नीलकंठ नमोस्तु ते ॥ वक्रतुंडाय नमः ॥
आचमनं ॥ रक्तवस्त्रकयुग्मं च देवानामपि दुर्लभं ॥ गृहाण मंडलं देव लंबोदर हरात्मज ॥ शूर्पकर्णाय नमः वस्त्रं
ब्रह्मसूत्रं सोत्तरीयं गृहाण गणनायक ॥ आरक्त ब्रह्मसूत्रं च कनकस्योत्तरीयकं ॥ कुब्जाय नमः यज्ञोप
वीतं ॥ गृहाण परमेश्वर सर्वज्ञ दिव्यचंदनमुत्तमं ॥ करुणाकर गुंजाक्ष गौरीसुत नमोस्तु ते ॥ गणेश्वराय नमः चंदनं
सुगंधि दिव्यमाल्यं च गृहाण गणनायक ॥ विनायक नमस्तुभ्यं शिवसूनो नमोस्तु ते विघ्ननाशिने नमः पुष्पं
अनेनैव नाम्ना दूर्वाकुंकुमाक्षताश्च देयाः ॥ दशांगुलं गुग्गुलं धूपं मुत्तमं गणनायक ॥ गृहाण देवदेवेश उमासु
त नमोस्तु ते ॥ ॥ विकटाय नमः ॥ धूपं ॥ सर्वज्ञ सर्वरत्नाढ्य सर्वेश विबुधप्रिय ॥ गृहाण मंगलं दीपं घृतकर्पूरसं
युतं ॥ वामनाय नमः ॥ दीपं ॥ नैवेद्यं गृह्यतां देव नानामोदकसंयुतं ॥ सर्वान्नफलसंयुक्तं सर्वभक्तिसमन्वितं ॥
सर्वदेवाय नमः ॥ नैवेद्यं ॥ फलान्यमृततुल्यानि सुगंधीनि मयानाथ ॥ आनीतानि यथाशक्त्या गृहाणेमानि सर्वदा ॥
सर्वार्तिनाशिने नमः ॥ फलं ॥ तांबूलं गृह्यतां देव नागवल्लीदलैर्युतं ॥ कर्पूरपूगसंयुक्तं सुगंधं मुखभूषणं ॥ विघ्न
हर्त्रे नमः ॥ तांबूलं ॥ सर्वदेवाधिदेवाय सर्वसिद्धिप्रदायक ॥ भक्त्याहृतामिमां पूजां गृहाण मां सुरप्रभो ॥ स

ता:॥ एकदंतः कृष्णपिंगो बालचंद्रो गणेश्वरः॥ गणपतिश्चैकविंशश्च सर्व एते गणेश्वराः॥ दुर्गे कैलासशिखरे सर्वदेवनिषेविते॥
सिद्धसंघसमाकीर्णे गंधर्वगणसेविते॥ देव्याः सह महादेवे दिव्यन्नक्षैर्विनोदितः॥ जितासि त्वं जितेत्याह पार्वती परमेश्वरः
सापि त्वं जित इत्याह स विवादस्तयोरभूत्॥ चित्रनेमिस्तदा दृष्टो मृषावादमभाषत॥ तदा क्रोधसमाविष्टा गौरी शापं ददौ ततः॥
प्रसादिता ततस्तेन विशापं च जगाद सा॥ यदा सरोवरे रम्ये चरिष्यति भवान्भुवि॥ तदा स्वर्गणिकास्सर्वा ईश्यंनेत्वा समागताः॥
तदा भावविशाय तत्त्वमित्युक्तः सर्वपातहा॥ ततः कतिपयाहोभिः कृष्णानंते सरोवरे॥ कृष्णो भूत्वाव संस्कृत्त ददर्श स्वर्विला
सिनीः॥ ततस्ताः सादरं गत्वा पप्रच्छ प्रणिपत्य ताः॥ किमेतदा महाभागाः पूजायामभिवांछिते॥ ततस्ता अब्रुवंस्तस्मै दूर्वावि
घ्नेश्वरव्रतं॥ क्रियते स्माभिरिह च परत्राभीष्टसिद्धये॥ प्रीतोऽब्रवीन्महाराज व्रतं मे दातुमर्हथ॥ येनाहं गौरिजाच्छापान्मु
च्येयं चिरदुःखितः॥ ततस्ता अब्रुवंस्सर्वा व्रतमेतदनुत्तमं॥ दूर्वाविघ्नेश्वरोयन्न पूज्यते सर्वसिद्धितः॥ शुक्लपक्षे चतुर्थ्यां
या भाद्रवारेण संयुता॥ तस्यां तिथौ समारभ्य षण्मासान्व्रतमाचरेत्॥ प्रत्यहं षण्नमस्काराः षट् दूर्वाः षट् प्रदक्षिणाः॥
शुक्लपक्षे चतुर्थ्यां च प्रत्येकं चैकविंशतिः॥ एकभक्तं च कर्तव्यं कथां च शृणुयादिमां॥ ध्यायेद्विघ्ननायकं देवं दंतमोदक
धारिणं॥ महोदरं महानागबद्धकुक्षिमुदान्वितं॥ सुंदरांगुतसंवीतमिभास्यमपराजितं॥ प्रणतामरसंदोहमौलि
माणिक्यरश्मिभिः॥ विराजितांघ्रिकमलं सर्वदेवनमस्कृतं॥ अभीष्टफलदं देवं सर्वभूतोपकारकं॥ एवं ध्यात्वा जपेन्नि

।त्य विनायक भक्तं द्विजः॥ एवं वरित्वा षण्मासान् शुचिः सत्यपरायणः पश्चाद्गंधादि दूर्वाभिरर्चयेत्तं सदा पुनः॥ उद्यापनं च कु
र्यात्तु देशकालानुसारतः॥ ततो मगधदेशस्य मानेन यवपिष्टकं॥ दशमानकमादाय दत्त्वाष्टावपि मोदकान्॥ कृत्वा घृतेन
तत्सम्यक् षड्देवाय षडात्मने॥ षड्विप्राय प्रदातव्यं श्रोत्रियाय कुटुंबिने॥ विनायको गणाध्यक्षो विघ्नेशः श्रीगणा
धिपः॥ वरदः सुमुखश्चैव दूर्वा षड्भिः प्रपूजयेत्॥ षड्दूर्वाश्च तथा दद्यात् महापूजां प्रकल्पयेत्॥ एवं कुरु महेशानं श्री
त्यर्थमभिवांछितं॥ तथेत्युक्त्वा चित्रनेमिः प्रीणयित्वा विनायकं॥ शापान्मुक्तस्ततः शंभुमभ्यगात्सहसैनिकः॥ शं
करेण ततः पृष्टश्चित्रनेमिस्तथा जगौ॥ व्रतं श्रुत्वा ततः शंभुर्गणेशस्य कुतूहलात्॥ गौरीकोपप्रसादाय शिवोपि कृतवा
न्तथा॥ सापि देवी शिवेनोक्तं चक्रे व्रतमनुत्तमं॥ कार्तिकेयापि माता च कस्च सरवुर्दर्शनेच्छया॥ व्रतं चकार नंदा च कार्ति
केयोप्यमादरात्॥ सोपि राजा प्रसादाय पुत्रार्थं च चकार ह॥ ततः क्रमेण लोकेस्मिन् प्रचुरीभूतमुत्तमं॥ व्रतं दूर्वागणेशस्य
सर्वसिद्धिकरं परं॥ शोकव्याधिभयोद्वेगबंधव्यसनवर्जितः॥ विमुक्तः पुत्रपौत्रादि धनधान्यसमावृतः॥ इह लोके सुखं भुक्
त्वा पश्चाच्छिवपुरं व्रजेत्॥ व्रतेनानेन दूर्वाख्य विघ्नेशस्य प्रसादतः॥ यः पठेत्सरहस्यां तु कथामेतां दिने दिने॥ शृणुयाद्वापि
सततं स मनःसिद्धिमवाप्नुयात्॥ ॥इति स्कंदपुराणे दूर्वागणपतिव्रतं समाप्तं॥ ॥अथ भाद्रशुक्लचतुर्थ्यां सि
द्धिविनायकव्रतं॥ हेमाद्रौ स्कांदे॥ तच्च मध्याह्नव्यापिन्यां कार्यं॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप निग

णपति कल्पे तत्रे पूजाविधानात्॥ दिनद्वये तद्व्याप्ताव व्याप्तौ देशव्याप्तौ वा पूर्वान्यथा परा॥ चतुर्थी गणनाथस्य मातृविद्धा प्र
शस्यते॥ मध्याह्नव्यापिनी सा तु परतश्चेत्परेहनि॥ इति बृहस्पत्यकेः॥ अथ व्रतविधिः॥ मासपक्षाद्युल्लिख्य जयपुत्रादि
कामस्त्री तु सौभाग्यकामः श्रीसिद्धिविनायकप्रीत्यर्थं सिद्धिविनायकपूजनमहं करिष्ये इति संकल्प्य षोडशोपचारैः पू
जां कुर्यात्॥ एकदंतं शूर्पकर्णं गजवक्त्रं चतुर्भुजं॥ पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकं॥ ध्यायेद्गजाननं देवं पद्म
कांचनसन्निभं॥ चतुर्भुजं महाकायं सर्वाभरणभूषितं॥ दंताक्षमालां परशुं पूर्णमोदकधारिणं॥ मोदकासक्तशुंडाग्र
मेकदंतं विनायकं॥ ध्यानं॥ आवाहयामि विघ्नेश सुरराजार्चितेश्वर॥ अनाथनाथ सर्वज्ञ पूजार्थं गणनायक॥ आ
वाहनं॥ विचित्ररत्नखचितं दिव्यास्तरणसंयुतं॥ स्वर्णसिंहासनं चारु गृहाण सुरपूजित॥ आसनं॥ अर्घ्यं च फल
संयुक्तं गंधपुष्पाक्षतैर्युतं॥ गणाध्यक्ष नमस्तेस्तु गृहाण करुणानिधे॥ अर्घ्यं॥ सर्वतीर्थसमुद्भूतं पाद्यं गंधादिभिर्यु
तं॥ विघ्नराज गृहाणेदं भगवान् भक्तिवत्सल॥ पाद्यं॥ दध्याज्यमधुसंयुक्तं मधुपर्कं मयाहृतं॥ गृहाण सर्वलोकेश गणना
थ नमोस्तु ते॥ मधुपर्कं॥ विनायक नमस्तुभ्यं त्रिदशैरभिवंदित॥ गंगोदकेन देवेश सद्य आचमनं कुरु॥ आचमनं॥
स्नानं पंचामृतैर्देव सर्वतीर्थाहृतैर्मया॥ गंधतोयै रमापुत्र गृहाणाभीष्टदायक॥ स्नानं॥ रक्तवस्त्रद्वयं देव देवां
बो गसदृशप्रभं॥ सर्वप्रद गृहाणेदं लंबोदर हरात्मज॥ वस्त्रं॥ राजतं ब्रह्मसूत्रं च कांचनं चोत्तरीयकं॥ गृहाण चारु

८५

सर्वज्ञ भक्तानां भक्तवत्सल ॥ यज्ञोपवीतं समर्पयामि ॥ नानाविधानि दिव्यानि नानारत्नोज्वलानि च ॥ भूषणानि गृहाणार्घ्ये पा
र्वतीप्रियनंदन ॥ आभरणं ॥ गंधं गृहाण भगवान् सर्वगंधसमन्वितं ॥ गणाध्यक्ष नमस्तेस्तु भक्ताभीष्टफलप्रद ॥ गंध ॥
अक्षतान् धवलान् देवान् गृहाण द्विरदानन ॥ अनाथनाथ सर्वज्ञ गीर्वाणासुरपूजितः ॥ अक्षताः ॥ सुगंधीनी च पुष्पाणि जा
कुंदमुखान्यपि ॥ विविधानि च पुष्पाणि गृहाण गणनायक ॥ पुष्पं ॥ अथांगपूजा ॥ गणेशायनमः ॥ पादौ पूजयामि ॥ विघ्न
राजायनमः ॥ जानुनी ॥ आखुवाहनायनमः ॥ ऊरू ॥ हेरंबायनमः ॥ कटिं ॥ कामारिसूनवेनमः ॥ नाभिं ॥ लंबोदरायन
मः ॥ उदरं पूजयामि ॥ गौरीसुतायनमः ॥ स्तनौ ॥ गणनायकायनमः ॥ हृदयं ॥ स्थूलकंठायनमः ॥ कंठं ॥ स्कंदाग्रजायन
मः ॥ स्कंधौ ॥ पाशहस्तायनमः ॥ हस्तौ ॥ गजवक्त्रायनमः ॥ मुखं ॥ सर्वेश्वरायनमः ॥ शिरः पूजयामि ॥ श्रीगणाधिपायनमः ॥
सर्वांगं पूजयामि ॥ अथ पत्रिकापूजा ॥ सुमुखायनमः ॥ मांचीपत्रं ॥ गणाधिपायनमः ॥ भृंगिराजं ॥ उमापुत्रायनमः ॥ बिल्व
पत्रं ॥ गजाननायनमः ॥ दूर्वापत्रं ॥ लंबोदरायनमः ॥ बदरीपत्रं ॥ हरसूनवे ॥ धूर्प धत्तूरपत्रं ॥ गजवर्णायनमः ॥ तुलसीपत्रं ॥
वक्रतुंडायनमः ॥ शमीपत्रं ॥ गुहाग्रजायनमः ॥ अपामार्गपत्रं ॥ एकदंतायनमः ॥ बृहतीपत्रं ॥ विकटायनमः ॥ करवीरपत्रं ॥
विनायकाय० अश्मंतकपत्रं ॥ कपिलायनमः ॥ अर्कपत्रं ॥ गजदंतायनमः ॥ अर्जुनपत्रं समर्पयामि ॥ विघ्नराजाय० ॥ विष्णु
क्रांतपत्रं ॥ वटवेनमः ॥ दाडिमपत्रं ॥ सुराग्रगण्यायनमः ॥ देवदारुपत्रं समर्पयामि ॥ भालचंद्रायनमः ॥ मरुगपत्रं समर्पयामि ॥
हेरंबायनमः ॥ सिंदूरपत्रं समर्पयामि ॥ चतुर्भुजाय० ॥ धात्रीपत्रं ॥ सर्वेश्वरायनमः ॥ अगस्तिपत्रं ॥ एकविंशतिपत्राणि

८५

समर्प्य॥ततः॥दूर्वायुग्मंगृहीत्वातुगंधपुष्पाक्षतैर्युतं॥पूजयेत्सिद्धिविघ्नेशंप्रत्येकंसर्वनामभिः॥गणाधिपनमस्तेस्तुउमापुत्र
घनाशनः॥विनायकेशपुत्रेतिसर्वसिद्धिप्रदायक॥एकदंतेभवक्रेतितथामूषकवाहनः॥कुमारगुरवेनित्यंपूजनीयः
प्रयत्नतः॥दशांगंगुग्गुलंधूपंसुगंधंचमनोहरं॥गृहाणसर्वदेवेशउमापुत्रनमोस्तुते॥धूपं॥सर्वज्ञसर्वलोकेशत्रैलोक्यति
मिरापह॥गृहाणमंगलंदीपंरुद्रप्रियनमोस्तुते॥दीपं॥सुफलान्लड्डुकांश्चैवमोदकान्घृतपाचितान्॥नैवेद्यंसफलं
दद्यान्नमस्तेविघ्ननाशिने॥नैवेद्यं॥ततः आचमनं॥करोद्वर्तनं॥इदंफलमितिफलं॥तांबूलंगृह्यतांदेवगृहाणसुरपू
जित॥अनाद्यनाथसर्वज्ञमामुद्धरमहेश्वर॥तांबूलं॥हिरण्यगर्भमितिदक्षिणा॥विघ्नेश्वरविशालाक्षसर्वाभीष्ट
फलप्रद॥प्रदक्षिणांकरोमित्वांसर्वान्कामान्प्रयच्छमे॥प्रदक्षिणा॥नमस्तेविघ्नहंत्रेचनमस्तेईप्सितप्रद॥नम
स्तेदेवदेवेशनमस्तेगणनायक॥यन्मयाचरितंदेवव्रतमेतत्सुदुर्लभं॥त्वत्प्रसादात्कृपेशानसफलंकुरुसर्वदा॥ वायनम
त्रः॥विनायकस्यप्रतिमांवस्त्रयुग्मसमर्पितां॥तुभ्यंसंप्रददेदेवः प्रीयतांमेगजाननः॥विनायकगणेशानसर्वदेवनमस्कृ
तः॥पार्वतीप्रियविघ्नेशममविघ्नंविनाशय॥प्रतिमादानं॥गणेशःप्रतिगृह्णातुगणेशोवैददातिच॥गणेशस्तारकोभा
भ्यांगणेशायनमोनमः॥ ॥इतिपूजा॥ अथकथा॥ ऋषयऊचुः॥ निर्विघ्नेनतुकार्याणिकथंसिध्यंतिसूतज॥
अर्थसिद्धिःकथंनृणांपुत्रसौभाग्यसंपदः॥दंपत्योःकलहेचैवबंधुभेदेतथानृप॥उदासीनेषुलोकेषुकथंसमुखता

भवेत्॥ विद्यारंभे तथा नृणां वाणिज्यायां कृषौ तथा॥ नृपतेः परचक्रे च जयसिद्धिः कथं भवेत्॥ कां देवतां नमस्कृत्य सर्वकार्-
यं लभेमहि॥ एतं समस्तं विस्तार्य ब्रूहि मे सत्यपृच्छतः॥ सूत उवाच॥ संनद्धयोः सुराविप्राः कुरुपांडवसेनयोः॥ पृष्टवान्दे-
वकीपुत्रं कुंतीपुत्रो युधिष्ठिरः॥ युधिष्ठिर उवाच॥ निर्विघ्नेन जयो मह्यं वद देवकिनंदन॥ कां देवतां नमस्कृत्य सम्यग्राज्यं
लभेमहि॥ कृष्ण उवाच॥ पूजयस्व गणाध्यक्षमुमामलसमुद्भवं॥ तस्मिन्संपूजिते वीर ध्रुवं राज्यमवाप्स्यसि॥ युधि-
ष्ठिर उवाच॥ देव केन विधानेन पूजनीयो गणाधिपः॥ पूजितस्तु तिथौ कस्यां सिद्धिदो गणपो भवेत्॥ कृष्ण उवाच॥ मा-
सि भाद्रपदे शुक्ले चतुर्थ्यां पूजयेन्नृप॥ मासि माघे श्रावणे तु मार्गशीर्षे तु थवा भवेत्॥ गजवक्त्रं तु शुक्लायां च-
तुर्थ्यां पूजयेन्नृप॥ यदा चोद्वहते भक्तिं स्तदा पूज्यो गणाधिपः॥ प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप॥ निष्कमात्र-
सुवर्णेन तदर्धार्द्धेन वा पुनः॥ स्वशक्त्या गणनाथस्य स्वर्णरौप्यमथाकृतिं॥ अथवा मृन्मयीं कुर्याद्वित्तशाठ्यं न कारयेत्॥
गणनाथस्य सिद्धिर्विनायकः तद्रूपं स्कांदे॥ एकदंतं शूर्पकर्णं गजवक्त्रं चतुर्भुजं॥ पाशांकुशधरं देवं ध्यायेत्सिद्धिविना-
यकं॥ कृत्वा पूजां प्रयत्नेन स्नाप्य पंचामृतैः पृथक्॥ गणाध्यक्षेति नाम्ना वै गंधं दद्याच्च भक्तितः॥ आवाहनासनार्घ्यं
च दत्वा पश्चात्प्रयत्नतः॥ रक्तं सर्वमिदं वस्त्रयुग्मं दद्याच्च भक्तितः॥ विनायकेति पुष्पाणि धूपं चोमासुताय च॥ दीपं रुद्र-
प्रियायेति नैवेद्यं विघ्ननाशिने॥ किंचित्स्वर्णं पूजां च तांबूलं च समर्पयेत्॥ ततो दूर्वांकुरान्गृह्य विंशतिश्चैकमे-

वहि॥ पूजनीयः प्रयत्नेन एभिर्नामपदैः सदा॥ गणाधिप नमस्तेस्तु उमापुत्राघनाशन॥ विनायकेशपुत्रेति सर्वसिद्धिप्रदाय-
क॥ एकदंतेभवक्रेति तथा मूषकवाहनः॥ कुमारगुरवे तुभ्यं पूजनीयः प्रयत्नतः॥ दूर्वायुग्मं गृहीत्वा तु गंधपुष्पाक्षतैर्यु-
तं॥ एकैकेन तु नाम्ना तु दत्वैकं सर्वनामभिः॥ अथैकविंशतिं कुर्यान्मोदकान्घृतपाचितान्॥ स्थापयित्वा गणाध्यक्षस-
मीपे कुरुनंदन॥ दश विप्राय दातव्यास्स्वयं चाद्यात्तथा दश॥ एकं गणाधिपे दद्यात्सनैवेद्यं नृपोत्तम॥ जातरूपमयं देवं ब्रा-
ह्मणाय निवेदयेत्॥ कृत्वा नैमित्तिकं कर्म पूजयेदिष्टदेवतां॥ ब्राह्मणान्भोजयेत्पश्चात्स्वभुंजीयात्तैलवर्जितं॥ द्विज-
यस्ते भवेन्नूनं सत्यं सत्यं मयोदितं॥ वैष्णवाद्यासु दीक्षासु॥ आदौ पूज्यो गणाधिपः॥ तस्मिन्संपूजिते विष्णुरीशो-
मा च तथा क्रमा॥ हव्यवाहमुखा देवा पूजितास्तु न संशयः॥ चंडिकाद्या मातृगणाः परितुष्टा भवंति च॥ तस्मिन्संपू-
जिते विप्रा भक्त्या सिद्धिविनायके॥ य इदं शृणुयान्नित्यं श्रावयेद्वा समाहितः॥ सिध्यंति सर्वकार्याणि सिद्धिदस्य प्रसा-
दतः॥ ॥ इति सिद्धिविनायकव्रतं॥ हेमाद्रौ भविष्योत्तरे॥ मासि भाद्रपदे शुक्ला शि॰ लोके प्रपूजिता॥ तस्यां स्ना-
नं तथा दानं उपवासोर्चनं तथा॥ क्रियमाणं शतगुणं प्रसादाद्दंतिनो नृप॥ चतुर्थीत्यनुषंगः॥ अस्यामेव चंद्रदर्शने दोष-
माह॥ पाराशरः॥ कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा॥ तद्दोष-
हतः शांतये॥ विष्णुपुराणे॥ सिंहः प्रसेनमवधीत्सिंहो जांबवता [illegible]॥ सुकुमारक मारोदीस्तव ह्येष स्यमंतकः॥ अथ-

स्यमंतकोपाख्यानं॥ नंदिकेश्वर उवाच॥ श्रृणुष्वैकाग्रचित्तः सन् गणेशस्य व्रतं शुभं॥ चतुर्थ्यां शुक्लपक्षे तु सदा कार्यं प्र- न
३ यत्नतः॥ सनत्कुमार योगी यदिच्छेच्छुभमात्मनः॥ नारी वा पुरुषो वापि यः कुर्याद्व्रतमुत्तमं॥ भाव यत्नात्तु विप्रेंद्र
संकष्टद्रुतिनं नरं॥ अपवादहरं चैव सर्वविघ्नप्रनाशनं॥ कांतारे विषमे वापि ग्रहे राजकुले तथा॥ सर्वसिद्धिकरं चैव
व्रतानामुत्तमोत्तमं॥ गजाननप्रियं विप्र त्रिषु लोकेषु विश्रुतं॥ अनेन विधिना ब्रह्मन्सर्वसंकष्टनाशनं॥ सनत्कु-
मार उवाच॥ केनचादौ पुराचीर्णं मर्त्यलोके कथं गतं॥ एतत्सर्वं समस्तं विस्तार्य ब्रूहि मे गणेश्वरव्रतं॥ नंदिकेश्वर उवाच
चक्रे व्रतं जगन्नाथो वासुदेवः प्रतापवान्॥ आदिष्टं नारदेनैव पृथ्वीलांछनशांतये॥ सनत्कुमार उवाच॥ षड्गुणैश्व-
र्यसंपन्नः सृष्टिसंहारकारकः॥ वासुदेवो जगद्व्यापी प्राप्तवांल्लांछनं कथं॥ एतदाश्चर्यमाख्यानं ब्रूहि त्वं नंदिकेश्वर॥ वाच
नंदिकेश्वर उवाच॥ पुरा भारावतारार्थं वसुदेवसुतावुभौ॥ रामकृष्णौ समुत्पन्नौ पद्मनाभहलायुधौ॥ जरासंध-
भयात्कृष्णो द्वारकां समकल्पयत्॥ विश्वकर्माणमाहूय पुरीं हाटकनिर्मितां॥ तत्र षोडशसहस्रस्त्रीणां चैव ह्यधिकं का
भवनानि मनोज्ञानि तासां मध्ये व्यकल्पयत्॥ पारिजाततरुं चैव तासां भोगाय कल्पयत्॥ यादवानां गृहास्तत्र षट्प-
चाशत्कोटयः॥ अन्येपि बहवो लोका वसंति विगतज्वराः॥ यत्किंचित्त्रिषु लोकेषु सुंदरं तत्र दृश्यते॥ सत्राजितप्र-
सेनाख्यौ पुत्रावुग्रस्य विश्रुतौ॥ अंभोधितीरमासाद्य तन्मनस्कतया च सः॥ सत्राजितस्तपस्तेपे सूर्यमुद्दिश्य बुद्धि-

पंचगुंजो माषः १ षोडशमाषाः कर्षः २ कर्षचतुष्टयं पलं ३ पलशतं तुला ४ विंशतिस्तुला भारः ५। एवं च व्यावहारिकाष्टगुंजात्मकमाष
मानेन एकस्मिन्भारे सुवर्णमिणा ५ ॥१॥ २ द्विदं काधिक पादोन शेरद्वितयाधिक पादोनाः षण्मणाः। भाराष्टके मणास्तु ४५२८८९६

११ माव॥ अतं निरी[illegible]गरह्यस्सूर्यसंबद्धलोचनः॥ ततः प्रसन्नो भगवान्सत्राजित्पुरःस्थितः॥ सत्राजितोपि तुष्टाव दृष्ट्वा देवं दिवाक
रं॥ तेजोराशि नमस्तेस्तु नमस्ते सर्वतोमुख॥ विश्वव्यापिन्नमस्तेस्तु नमस्ते विश्वरूपिणे॥ काश्यपेय नमस्तेस्तु सर्वदेव नमो न
स्तु ते॥ ग्रहराज नमस्तेस्तु नमस्ते चंद्रज्योतिषे॥ वेदत्रय नमस्तेस्तु हरिदश्व नमोस्तु ते॥ प्रसीद पाहि देवेश शुद्धया मां दिवाकर॥
इत्थं संस्तूयमानोसौ देवदेवो दिवाकरः॥ स्निग्धगंभीरमधुरं सत्राजितमुवाच ह॥ वरं ब्रूहि प्रसन्नोस्मि यत्ते मनसि वर्तते॥ सत्रा
जित महाभाग तुष्टोहं तव निश्चयात्॥ सत्राजित उवाच॥ स्यमंतकमणिं देहि परितुष्टोसि भास्कर॥ ददौ तस्मै च तद्रत्नं स्वकंठा
कं द्देवतर्पसः॥ सूर्य उवाच॥ भाराष्टं शा[illegible] कुंभंसू[illegible] तेसो[illegible] मणिः॥ शुचिष्मता सदा धार्यं रत्नमेतन्महोत्तमम्॥ सत्राजितस्त्व प्रसह
पि नेतद्दृष्ट्वा विहंति मानवं॥ इत्युक्त्वा तद्दधे देवस्तेजोराशिर्दिवाकरः॥ ततः कंठे रत्नं ज्वलमानरूपः पुरस्सत्क[illegible]स्य विवेश ण
सत्वरं॥ दृष्ट्वा तु लोकाः मनसा दिवाकरमचिंतयंस्तत्र मिता[illegible] दृष्ट्वा॥ समागतो यं हरिदश्वदीधितिर्जनार्दनं द्रष्टुमसंश
येन॥ नायं सहस्रांशुरिती ह[illegible] वै सत्राजितोयं मणिकंठभास्वतः॥ स्यमंतकं महारत्नं दृष्ट्वा तत्कंठमंडले॥ स्पृहां चक्रे जग
न्नाथो न जहार मणिं ततः॥ सत्राजितो जातभयो याचयिष्यति मां हरिः॥ प्रसेनाय ददौ भ्रात्रे धार्यं शुचिनात्वया॥ एक
दा कंठदेशे सौ क्षिप्त्वा तं मणिमुत्तमं॥ मृगयाक्रीडनार्थाय ययौ कृष्णेन संयुतः॥ अश्वारूढोशुचिः सोपि हतः सिंहेन तत्क्षण
त्॥ रत्नमादाय सिंहोपि गच्छं जांबवता हतः॥ गतः स बिले रत्नं तद्दाय जांबवान्॥ पुरीं विवेश कृष्णोपि स्वकैः सर्वैः स स्मा
मावृतः॥ प्रसेनो घातिनायाति हतः कृष्णेन निश्चितं॥ मणिलोभेन लोके शं बांधवः पापिनाहतः॥ द्वारकावासिनः सर्वे[illegible]

२ संस्थाप्य तु बिलद्वारे २
रा:२ २ यादवान्सैनिकान्सदा।२ ५ इति श्लोकं सुस्वरेण गायंती साम मनोहरा।

४८ स्तेनं मन्मंदिरे॥ जना ऊचुः परस्परं॥ इत्थापवादसंतप्तः कृष्णोपि नगराद्बहिः॥ सहैव तैर्गतो रण्ये दृष्ट्वा सिंहेन पातितं॥ प्रसेनं
वाहनयुतं तत्र दादुः संस्कार॥ ऋक्षेण निहतं दृष्ट्वा तद्बिलं गतः॥ बिले द्वायोजने ज्ञाते मंधकारं स्वतेजसा॥ निवारयन्ददर्शा रामदा
ग्रे प्रासादं बहुभूमिकं कुमारं जांबुवतस्य दोलायामभितिष्ठति॥ माणिक्यं लंबमानं च ददर्श भगवान्हरिः॥ रूपयौवनसंपन्नां
कन्यां जांबुवतीं पुनः॥ दोलां दोलयमानां च ददर्श कमलेक्षणः॥ विस्मयं च महच्चक्रे दृष्ट्वा तां चारुहासिनीं॥ सिंहः प्रसेनम
वधीत्सिंहो जांबवता हतः॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः॥ मदनज्वरदाहार्ता दृष्ट्वा तं कमलेक्षणं॥ उवाच ल
लितं वाक्यं गम्यतां गम्यतामिति॥ रत्नं गृहीत्वा वेगेन यावत्क्षेते तु जांबवान्॥ इत्याकर्ण्य हसन्कृष्णो शंखनादं दध्मौ प्र
नैनि ताप्यवान्॥ आकर्ण्य सहसोत्थाय ऋक्षः स युयुधे ततः॥ तयोर्युद्धमभू[illegible]रं हरिजांबवतोस्तदा॥ द्वारकावासिनः स दो
नो र्वे गतास्ते सप्तमे दिने॥ मृतः कृष्णो रक्षितो नः संदिग्धं विचार्य ते॥ परलोकक्रियां चक्रुः [illegible]स्य तु ते तदा॥ एकविंशद्दिनं याव प्रसेनस्य
द्वाऊ अहरणौ विष्णुः॥ युयुधे तेन ऋक्षेण युद्धे कर्मपितोषितः॥ जांबवान्प्राक्तनं संस्मृत्वा दृष्ट्वा देवबलं महत्॥ जांबवा
रामू नुवाच॥ अजेयोहं सुरैः सर्वैर्यक्षैः सदानवैः॥ त्वया जितोहं देवेश देवस्त्वमिति निश्चितं॥ जाने त्वां वै स्वभावं तेजो नान्य
था बलमीदृशं॥ इति प्रसाद्य देवेशं ददौ माणिक्यमुत्तमं॥ सुतां जांबुवतीं चाथ भार्यार्थे वरवर्णिनीं॥ पाणिं च ग्राह
यामास देवदेवेन जांबवान्॥ मणिमादाय देवोसौ जांबवत्या पि संयुतः॥ लद्वृत्तांतं समाचष्टे द्वारकावासिनं जनं॥ सत्राजि

गा

६ दिनषट्कं बिलद्वारे संप्रतीक्ष्य
६ तु सैनिकाः ४८

तस्यमाणिक्यंदत्तवान्संसदिस्थितः॥मित्याभिशापसंशुद्धिंप्राप्तवान्मधुसूदनः॥सत्राजितोपिसंत्रस्तःकृष्णायप्रद
दौसुतां॥सत्यभामांमहाबुद्धिंददौसर्वगुणान्वितां॥शतधन्वाक्रूरमुख्यायादवादुष्टमानसाः॥सत्राजितेनतेवैरंच
क्रुरत्वाभि[illegible]षिणः॥दुरात्माशतधन्वापिगतेकृष्णेपिकुत्रचित्॥सत्राजितंनिहत्याशुमणिंजग्राहपापधीः॥कृष्णस्य
पुरतःसत्यासमाचष्टेविचेष्टितं॥श्रुत्वात[illegible]ष्टोबहिःकोपीकृष्णःकपटनायकः॥बलदेवपुरोवाक्यमुवाचधरणीधरः॥हत्वास
त्राजितंहत्वामणिमादायगच्छति॥गृहीत्वाशतधन्वायंगृहीत्वारत्नमव्ययं॥ममभोग्यंतदुद्रत्नं[illegible]भविष्यतिनसंश
यः॥एतच्छ्रुत्वाभयत्रस्तोशतधन्वापियादवः॥आहूयाक्रूरनामानंमाणिक्यंप्रददौ[illegible]सः॥आरुह्यवडवांवेगाद्विगतो
दक्षिणांदिशं॥रथस्थावनुगच्छतांतदारामजनार्दनौ॥शतयोजनमात्रेणप्रमारवडवातदा॥पलायमानोनिहतःकृष्ण
तिस्तुपदातिना॥रथस्थेबलदेवेतुहरिणारत्नलोभिना॥अदृष्ट[illegible]तद्रत्नंबलदेवपुरोवदत्॥तदाकुपर्यमहारो
षात्[illegible]वाचवचनंबलः॥कपटीत्वंसदाकृष्णलोभीपापीसुनिश्चितं॥अर्थायस्वजनंहंसिकस्त्वांबंधुःसमाश्रयेत्॥
अनेकशपथैःकृष्णोबलदेवप्रतो[illegible]यत्॥सोपिधि[illegible]कष्टमित्युक्त्वाययौवैदर्भमंडलं॥कृष्णोपिरथमारुह्यद्वारकांप्रय
यौपुनः॥तथैवोर्जुनेनासर्वेनसाधीयानयंहरिः॥निष्काशितोरत्नलोभाज्ज्येष्ठेभ्रात्राबलोबली॥तच्छ्रुत्वादीनव
दनः[illegible]नैवहिभातिच॥इत्याभिशापसंलग्नोबभूवसजगत्पतिः॥अक्रूरोपिविनिष्क्रम्यतीर्थयात्राभिषात्ततः॥
काशीगत्वासुरेवनासौयज्ञैर्यज्ञपतिंप्रभुं॥तोषमुत्पादयामासतत्तेनद्रव्येणबुद्धिमान्॥सुरालयगृहैश्चित्रैर्नगरं

समकल्पयत्॥ नदोर्भिक्षंनवैरोगाईतयोनवविदूरं॥ श्रुचिनाथार्यतेतत्रमपिास्त्यर्थस्यनिश्चितं॥ जानंनापिहिसर्वज्ञो
मानुषंभावमाश्रितः॥ लोकाचारस्तथामायांअज्ञानंचसमाश्रितः॥ बंधुवैरंसमुत्पन्नंलांछनंसमुपस्थितं॥ वृथापवा
दवडुलंजायमानंकथंहसेत्॥ इतिचिंतातुरंकृष्णंनारदःसमुपस्थितः॥ गृहीत्वातत्कृतांपूजांसुखासीनस्ततोब्रवीत्
श्रीकृष्णउवाच॥ किमर्थंखिद्यसेदेवकिंवातेशोककारणं॥ यथावृत्तंसमाचष्टेनारदायचकेशवः॥ नारदउवाच॥ जानामिका
रणंदेवयदर्थंलांछनंतव॥ त्वयाभाद्रपदेशुक्लचतुर्थ्यांचंद्रदर्शनं॥ कृतंतेनसमुत्पन्नंलांछनंतुवृथैववहि॥ श्रीकृष्णउवा
च॥ वदनारदमेशीघ्रंकोदोषश्चंद्रदर्शने॥ किमर्थंतुचतुर्थ्यांचतस्यकुर्वंतिदर्शनं॥ नारदउवाच॥ गणनाथेनसंशप्तः
चंद्रमारूपदर्पितः॥ तद्दर्शनेनराणांहिवृथानिंदाभविष्यति॥ श्रीकृष्ण०॥ किमर्थंगणनाथेनशप्तश्चंद्रस्तुधामयः॥
इदमाख्यानकंश्रेष्ठंयथावद्वक्तुमर्हसि॥ नारदउवाच॥ गणानामधिपःपूर्वंरुद्रेणब्रह्मणास्तुतः॥ अणिमामहिमा र्द
प्राप्तिः चैवलघिमागरिमातथा॥ प्राकाम्यं[illegible]मीशित्वंच[illegible]र्थकामोत्रस[illegible]ताः॥ भावे[illegible]पूर्व[illegible]सगणेशस्यप्रजापतिः प्ति
पूजयितागणाध्यक्षंस्तुतिंकर्तुंप्रचक्रमे॥ ब्रह्मोवाच॥ गजवक्त्रगणाध्यक्षलंबोदरवरप्रद॥ विद्याधीशोशये
षेशासृष्टिसंहारकारक॥ संपूजयेद्गणाध्यक्षंमोदकाद्यैःप्रयत्नतः॥ तेषांप्रजायतेसिद्धिर्निर्विघ्नेननसंशयः॥ अ
संपूज्यगणाध्यक्षंयेवांछंतिसुरासुराः॥ नतेषांजायतेसिद्धिःकल्पकोटिशतैरपि॥ त्वद्भक्त्यात्तुगणाध्यक्षवि
ष्णुःपालयतेसदा॥ रुद्रोपिसंहरत्याशुलच्छक्त्यैवकरोम्यहं॥ इत्थंसंस्तूयमानोसौदेवदेवोगजाननः॥ उवा

स मा

त्वपरमप्रीतो ब्रह्माणं जगतां पतिं॥ गणेश उवाच॥ वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्त्तते॥ ब्रह्मोवाच॥ क्रियमाणस्य
मे स्रष्टिं निर्विघ्नं जायतां प्रभो॥ एवमस्त्विति देवोसौ गृहीत्वा मोदकान् करे॥ सत्यलोकात्समागच्छन् स्वेच्छया गगने [illegible]॥ चंद्रलो
कं समासाद्य स्खलितो गणनायकः॥ अथ हासं [illegible] चक्रे सोमो रूपमदान्वितः॥ तं दृष्ट्वा कोपताम्राक्षो गणनाथः शशाप ह॥ दर्शनी
यः सुरूपोहं सुंदरश्चाहमित्यथ॥ गर्वितोसि शशांक त्वं फलं प्राप्स्यसि सत्वरं॥ अद्य प्रभृति देवास्त्वां नहि पश्यंति पापिनं॥ ये प
श्यंति प्रमादेन त्वां नरा मृगलांछनं॥ मिथ्याभिशापसंयुक्ता भविष्यंति हि ते ध्रुवं॥ हाहाकारो महाञ्जातः श्रुत्वा शापं च भीषणं॥
अत्यंतं म्लानवदनश्चंद्रो जल[illegible]विशत्॥ कुमुदं कुमुदानाथः स्थितस्तत्र कृतालयः॥ ततो देवर्षिगंधर्वा निराशा दी
नमानसाः॥ सुरा[illegible]ह पुरोधाय जग्मुस्ते तु पितामहं॥ दृष्ट्वा पितामहं देवं शशांकस्य विचेष्टितं॥ दत्तः शापो गणेशेन कथ
यामासुरादरात्॥ विचार्य भगवान् ब्रह्मा तान्सुरानिदमब्रवीत्॥ गणेशशापो देवेंद्राः शक्यते केन [illegible]न्यथा॥ कर्त्तुमिंद्रे
ण न मे[illegible]या विष्णुना वापि निश्चितं॥ तमेव देवदेवेशं व्रज[illegible] शरणं सुराः॥ स एव शापमोक्षं च करिष्यति न संशयः॥ देवा ऊ
चुः॥ केनोपायेन वरदो गजवक्त्रो गणेश्वरः॥ पितामह महाप्राज्ञ तदस्माकं वद प्रभो॥ पितामह उवाच॥ चतुर्थ्यां देवदेवेशः
पूजनीयः प्रयत्नतः॥ कृष्णपक्षे विशेषेण नक्तं कुर्याज्जितेंद्रियः॥ अपूपैर्घृतसंयुक्तैर्मोदकैः परितोषयेत्॥ मधुरान्नं
हविष्यं च स्वयं भुंजीत कामतः॥ स्वर्णरूपं गणेशस्य दातव्यं द्विजसत्तमे॥ शक्त्या च दक्षिणां दद्याद्वित्तशाठ्यं न का

राइंद्र

राद स्येत्॥ एवमुक्त्वा [illegible] प्रेषयामासु [illegible] प्रातः॥ स गत्वा कथयामास सर्वं वचो ब्रह्मोदितं तु तत्॥ व्रतं च केन तस्थं द्रोयये क्तं ब्रह्म
णा पुनः॥ आविर्बभूव भगवान् गणेशो व्रततोषितः॥ तं क्रीडमानं गणनायकं च तुष्टाव दृष्ट्वा तु कलानिधानः॥ त्वं कारणं कारणका
रणानां वेत्तासि वेद्यं च विभोप्रसीद॥ प्रसीद देवेश जगन्निवास गणेश लंबोदर वक्रतुंड॥ विरिंचि नारायण पूज्यमान क्षमस्व ग
र्वस्खलनं च हास्यं॥ त्वामसंपूज्य गणेश नूनं वांछंति मूढा विहितार्थ सिद्धिं॥ हे देव [illegible] बलि लोके ज्ञातो मयाते स कलं प्रभ न
वः॥ ये चाप्युदासीनतरास्त पापा ते यांति पापं नरके सदैव॥ एवं संस्तूयमानोसौ चंद्रेणाथ गजाननः॥ गणेश उवाच॥ तुष्टो
हं तव दास्यामि वरं ब्रूहि निशाकर॥ चंद्र उवाच॥ लोकानां दर्शनीयोहं भवामि पुनरेव हि॥ विपापोहं विशापो हं त्वत्प्रसादाद्ग
णेश्वर॥ गणेश उवाच॥ वरमन्यं प्रदास्यामि नैतद्देयं मयातव॥ विशापं कुरु देवेश प्रार्थयामि वदत्तवा॥ विशाप सकरोच्चंद्रं कम चंद्रउवाच
लासनगौरवात्॥ शुक्लपक्षे चतुर्थ्यां तु ये पश्यंति सदैव हि॥ मिथ्यापवादं मा [illegible] संति प्राप्स्यं ति न संशयः॥ मासादौ पूर्वमेव च
त्वां ये पश्यंति सद्द्विजनाः॥ भाद्रायां शुक्लपक्षस्य तेषां दोषो न जायते॥ तदा प्रभृति लोकोयं द्वितीयायां कृतादरः॥ चंद्रस्यैशि द
तू नार्थाय गणनाथस्य भाषितौ॥ भाद्रे शुक्लचतुर्थ्यां तु यस्त्वां पश्यति पापधीः॥ मिथ्यापवादमलिन आवर्षं स तु जायते॥ पु
नरेक्व प्रच्छ कलावान् गणनायकं॥ केनोपायेन देवेश तुष्टो भवसि तद्वद॥ गणेश उवाच॥ सदा कृष्णचतुर्थ्यां तु मो
दकाद्यैः प्रपूजयेत्॥ रोहिणीसहितं त्वां च समभ्यर्च्य विधानतः॥ यथा शक्त्या च मद्रूपं स्वर्णेन परिकल्पयेत्॥ दत्वा विप्राय प्र

क्तो थं कथां श्रुत्वा विधानतः॥ सदा तस्य करिष्यामि संकष्टस्य निवारणं॥ भाद्रशुक्लचतुर्थ्यां तु मृन्मयीं प्रतिमां शुभां॥ हेमाभावे
तु कर्तव्या नानापुष्पैः प्रपूजयेत्॥ ब्राह्मणान् भोजयेत्तस्माज्जागरं च विशेषतः॥ स्थापयेदव्रणं कुंभं धान्यस्योपरि शोभितं॥
यथाशक्त्या तु भद्ररूपं शांतकुंभेन निर्मितं॥ वस्त्रं शिवप्रियायेति गणाधिप नमोस्तु ते॥ गंधं लंबोदरायेति पुष्पं सिद्धिप्रदा
यच॥ धूपं गजमुखायेति दीपं मूषकवाहन॥ विघ्ननाशाय नैवेद्यं फलं सर्वार्थसिद्धिदं॥ तांबूलं कामरूपाय दक्षिणां धनदा
यच॥ इक्षुदंडैस्तदा पूज्यो नाम्ना शोभाकरस्तु यः॥ विसर्जनं समारंभेः सर्वसिद्धिप्रदायक॥ एवं संपूज्य विघ्नेशं कथां श्रुत्वा वि
धानतः॥ मंत्रेणानेन तत्सर्वं ब्राह्मणाय निवेदयेत्॥ दानेनानेन देवेश प्रीतो भव गणेश्वर॥ सर्वत्र सर्वदा देव निर्वि
घ्नं कुरु सर्वदा॥ मानोन्नतिं च राज्यं च पुत्रं पौत्रं प्रदेहि मे॥ गावो धान्यं च वासांसि दद्यात्सर्वं स्वशक्तितः॥ दत्वा तु ब्राह्म
णे सर्वं स्वयं भुंजीत वाग्यतः॥ मोदकापूपमधुरं लवणक्षारवर्जितं॥ एवं करोति श्वश्रूर्वा त्वस्याहं सर्वदा जयं॥ सिद्धिं च धन म:
धान्यानि ददामि विपुलं प्रजां॥ इत्युक्त्वांतर्दधे देवो गणनाथो विनायकः॥ तद्व्रतं कुरु कृष्ण त्वं ततः शुद्धिमवाप्स्यसि
नारदेनैवमुक्तस्तु व्रतं चक्रे हरिः स्वयं॥ मिथ्यापवादसंशुद्धिर्द्वितीये कृष्णयाचितं॥ येऽश्रृण्वंति तदाख्यानं स्यमंतक
मणीयकं॥ चंद्रस्य चरितं सर्वं तेषां दोषो न जायते॥ भाद्रे शुक्लचतुर्थ्यां तु चंद्रस्य दर्शनं क्वचित्॥ जातं तत्परिहारा
र्थं श्रोतव्यं सर्वमेव तु॥ यदा यदा मनः कष्टं संदेह उपजायते॥ तदा तदा च श्रोतव्यमाख्यानं कष्टनाशनं॥ तदेहुल
पूजितो गणनाथस्तु प्रसन्नो भूत्सुरेश्वरः व्रतस्यास्य प्रभावेनाना कृष्णस्य तत्क्षणात्।

गतो देवो गणेशः कृष्ण तोषितः ॥ यदा यदा पश्यसि कार्यमुर्थितं नारी नरो वा कुरुते तिसङ्कलं ॥ सिध्यते [illegible] कार्यं [illegible]मनैप्सितं हि
किं दुर्लभं विघ्नहरे प्रसन्ने ॥ श्रावणस्य सिते पक्षे चतुर्थ्यां भक्तभुग्व्रती ॥ व्रतं कुर्यान्नृपोत्तमास्य यावन्मासचतुष्टयं ॥ ॥ इति स्कंदपुरा
णोक्त मंत कारव्यानं ॥ ॥ अथ शुक्लचतुर्थ्यां कपर्दीश्वरविनायकव्रतं ॥ तद्विधिः ॥ तिथ्यादि स्मृत्वा [illegible]म चतुर्विधपुरुषार्थसि
ध्यर्थं कपर्दीशगणेश व्रतमहं क अथ शुक्लचतुर्थ्यां कपर्दीश्वरविनायकव्रतं ॥ तद्विधिः ॥ तिथ्यादि स्मृत्वा मम चतुर्विधपुरु
षार्थसिध्यर्थं कपर्दीशगणेशव्रतमहं करिष्ये ॥ [illegible]त्रे षोडशन्यासं कृत्वा पूजां समारभेत् ॥ तत्रादौ पीठपूजा ॥ ॐ न
मो भगवते सकलगुणात्मकशक्तियुक्तायानंताय योगपीठाय नमः ॥ अष्टदलकेसरेषु ॥ ॐ तीव्रायै नमः ॥ ॐ चालि
न्यै नमः ॥ ॐ नंदायै नमः ॥ ॐ भोग[illegible]दायै नमः ॥ ॐ कामरूपिण्यै नमः ॥ ॐ उग्रायै नमः ॥ ॐ तेजो[illegible]वत्यै नमः ॥ ॐ स
त्यायै ० मध्ये ॥ विघ्ननाशिन्यै नमः ॥ अथ ध्यानं ॥ एकदंतं महाकायं लंबोदरगजाननं ॥ विघ्ननाशकरं देवं हेरंबं प्रणमा
म्यहं ॥ इमां पूजां गृहाणेश कपर्दीशगणनायक ॥ आगच्छ तु इति त्रिवारं पठेत् ॥ विनायक नमस्तुभ्यमुमामलसमुद्भव ॥ इ
मां मया कृतां पूजां गृहाण सुरसत्तम ॥ सहस्रशीर्षेत्यावाहनं ॥ अलंकारसमायुक्तं मुक्तामणिविभूषितं ॥ स्वर्णसिं
हासनं चारु प्रीत्यर्थं प्रतिगृह्यतां ॥ पुरुष एवेदमित्यासनं ॥ गौरीसूनो नमस्तेस्तु शंकरप्रियकारक ॥ भक्त्या पाद्यं म
या दत्तं गृहाण प्रणतप्रिय ॥ एतावानस्येति पाद्यं ॥ व्रतमुद्दिश्य विघ्नेश गंधपुष्पादिसंयुतं ॥ गृहाणार्घ्यं मया दत्तं स
र्वसिद्धिप्रदायक ॥ त्रिपादूर्ध्व इत्यर्घ्यं ॥ गणाधिप नमस्तेस्तु गौरीसुत गजानन ॥ गृहाणाचमनीयं त्वं सर्वसि

अष्टदलेषु तृतीयावरणं॥ इंद्राय॰ अग्नये। यमाय॰ निरृतये॰ वरुणाय॰ वायवे॰ कुबेराय॰ ईशानाय॰ निरृतिवरुणयोर्म
ध्ये अनंताय॰ इंद्रेशानयोर्मध्ये ब्रह्मणे नमः॥ इति चतुर्थावरणं॥ वज्राय॰ शक्तये॰ दंडाय॰ खड्गाय॰ पाशाय॰ अंकुशाय॰ गदा
यै॰ त्रिशूलाय॰ चक्राय॰॥ इति पंचमावरणं॥ दशांगं गुग्गुलं धूपं चंदनागरुसंयुतं॥ उमासुत नमस्तुभ्यं गृहाण वरदोत्तम॥ य
त्पुरुषं व्यदधुरिति धूपं॥ गृहाण मंगलं देव घृतवर्तिसमन्वितं॥ दीपं रुद्रेशान प्रदं चारु रुद्रप्रिय नमोस्तु ते॥ ब्राह्मणोस्येति
दीपं॥ अन्नं चतुर्विधं स्वादु॰ चंद्रमा सितिनैवेद्यं॥ इदं फलं मया देव स्थापितं पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि
जन्मनि॥ इति फलं॥ पूगीफलसमायुक्तं नागवल्लीदलैर्युतं॥ चूर्णकर्पूरसंयुक्तं गृहाण गणनायक॥ नाभ्या आसीदिति तां
बूलं॥ हिरण्यगर्भगर्भस्थं॰ सप्तास्यासन्निति दक्षिणा॥ गणाधिप नमस्तेस्तु गजानन॥ लंबोदर नमस्तेस्तु नमस्ते
त्वांबिकासुत॥ एकदंत नमस्तेस्तु नमस्तेस्तु भवप्रिय॥ स्कंदाग्रज नमस्तेस्तु नमस्तेस्तु फलप्रद॥ कपर्दिगणनाथस्य
सर्वसंपत्प्रार्थिनः॥ यज्ञेनेति पुष्पांजलिः॥ प्रदक्षिणं तु देवेश सर्वकार्येषु सर्वदा॥ कपर्दिगणनाथस्त्वमीप्सितार्थप्र
दायक॥ इति प्रदक्षिणा॥ नमस्करोमि देवेशं सर्वविघ्नहरो भव॥ शीघ्रं मम वरं देहि परत्र च परां गतिं॥ इति नमस्कारः
अथ ब्रह्मचारिपूजा॥ अरुणान्मुष्टिगणितान् तंडुलान् सवराटकान्॥ विप्राय बटवे दद्याद्गंधपुष्पान्वितान् यतः॥ तंडुला
वैश्वदेवस्य पाकेनान्नेन शोभना॥ कपर्दिगणनाथोसौ प्रीयतां तंडुलैः सदा॥ कथां श्रुत्वा देवमुद्वासयेत्॥ अथ
कथा॥ कदाचिदुपविष्टश्च पार्वत्या सह शंकरः॥ इति प्राह प्रियां तां किं द्यूते छारतिरस्ति ते॥ हे लंबोदर मयाज्ञेतुं वांछितं प्र

द्धिप्रदायक॥ तस्माद्विराडित्याचमनं॥ अनाथनाथ सर्वज्ञ गीर्वाणपतिपूजित॥ स्नानं पंचामृतं देव गृहाण गणनायक॥
आप्यायस्व दधिक्राव्णो घृतं मिमिक्षे मधुवाता स्वादुः पवस्व॥ इति पंचामृतस्नानं॥ गंगाजलसमानीतं कल्पयाम्यहम्॥ स्नानं स्वीकु
रु विघ्नेश कपर्दीश गणनायक॥ यत्पुरुषेण स्नानं॥ हरिद्रस्वर्णद्वयं देव देवांग वसनोपमं॥ भक्त्या दत्तं गृहाणेश लंबोदर हरात्म
ज॥ तं यज्ञमिति वस्त्रं॥ नानालंकारसंयुक्तं नानारत्नविभूषितं॥ अनेक दिव्याभरणं प्रीत्यर्थं प्रतिगृह्यतां॥ इत्याभरणं॥ रज
तं ब्रह्मसूत्रं च कांचनं चोत्तरीयकं॥ भालचंद्र नमस्तुभ्यं गृहाण वरदो भव॥ तस्माद्यज्ञादिति यज्ञोपवीतं॥ गंधकर्पूरसंयुक्तं
दिव्यं चंदनमुत्तमं॥ विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यतां॥ तस्माद्यज्ञात्सर्वहुत ऋच इति गंधं॥ अक्षतान्धवलान्देव
सिद्ध गंधर्वसेवित॥ भक्त्या दत्तान् गृहाणेश सर्वसिद्धिप्रदायक॥ इत्यक्षताः॥ सुगंधीनि च पुष्पाणि वरसिद्धिप्रदाय
क॥ कपर्दीश गणनाथ स्वयं श्वेतपुष्पं ददाम्यहं॥ तस्मादश्वा अजायंतेति पुष्पं॥ अथांगपूजा॥ कपर्दीके गणनाथाय नमः
पादौ पूजयामि॥ गणेशाय। जानुनी॥ गणनाथाय। उरू। मणक्रीडाय॥ कटिं पूजयामि। वक्रतुंडाय॥ हृदयं। लंबोद
राय। कंठं। गजाननाय। स्कंधौ। हेरंबाय॰ हस्तौ॰ विकटाय मुखं॰ विघ्नराजाय॰ नेत्रे॰ धूम्रवर्णाय॰ शिरः॰ कपर्दिने॰
सर्वांगं पूजयामि॥ षडंगोः प्रथमावरणं॥ वक्रतुंडाय॰ एकदंष्ट्राय॰ महोदराय। गजाननाय॰ विकटाय॰ विघ्नराजा
य॰ धूम्रवर्णाय॰ इति द्वितीयावरणं॥ ब्राह्म्यै॰ माहेश्वर्यै॰ कौमार्यै॰ वैष्णव्यै॰ वाराह्यै॰ चामुंडायै॰ महालक्ष्म्यै॰ इत्य

प्रभुवाचसं॥ ममापितस्मिन्नास्त्येवत्वयास्ते दीयतेपणः॥ तवकिंकिमभिष्टंतु दास्यामिपरमेश्वर॥ लोकत्रयंवापृछस्वकिमन्यै
र्वचनंवृथा॥ इछामियश्चेदेतन्मेदातव्यमितिनोच्यते॥ यदित्वयातदामीतुविश्वासोनास्तिमेत्वयि॥ वाक्यमेवंविधंश्रुत्वाशर्व
सर्वात्मनांबिके॥ नविश्वासयुतंकेनशक्यतेकिंपुनर्मम॥ सोल्लुंठनेनकादेविघ्रतेछ्रास्मितवैचचेतः॥ पणःकल्प्यःक्रियतां
पणोतिष्ठाम्यहंसदा॥ सावंसंचिंत्यपार्वत्यापणमाकल्प्ययत्नतः॥ त्रिशूलंत्रिदशान्सर्वान्साक्ष्यर्थेचदुरोदरे॥ तस्मिनकर्म
णितज्जितापणमप्यग्रहीच्छिवा॥ एवंदंडमरुकादीनितान्यन्याजयत्पृथक्॥ दीनोभूत्वामहादेवोभवानीमब्रवीदिति॥ शा
र्दूलचर्मतन्मध्येप्रयछगिरिजेमम॥ नचेवंवक्तुमुचितंकिंदेवप्रीतिमन्निह॥ दास्यामिसर्वंकिंपृष्टेपूर्वंस्मरास्मिकिंन्वहि॥
श्रविचिंत्यब्रवीषित्वांजगदीशकृपानिधे॥ इतिकृत्वाकृतापन्नोदेवकोन्योययामया॥ आद्यादरादिनंद्वेचिनकरिष्यामि
त्वापणं॥ तथेत्युक्त्वामहादेवःकरुणांचात्रिसेदधे॥ रक्षरक्षक्कगछामिकिंजीवनमतःपरं॥ इतिसंचिंत्यसान्वेष्टुमुद्यान
प्रत्यपद्यत॥ गिरिजातत्रवनितावृंदेदृष्ट्वाब्रवीदिति॥ किमर्थमागतःसर्वाकिमेतत्क्रियतेधुना॥ कपर्दिगणनाथस्यव्रतंकर्तु
मिहागताः॥ पृष्टेनैषातस्यचेदानीमस्माभिःश्रूयतेकथा॥ किमर्थंतद्व्रतंनार्योयुष्माभिःक्रियतेवने॥ फलमप्यथचाना
स्त्रिपार्वतीसहतांप्रति॥ प्रष्टव्येकिंत्वयादेविनैरनारीभिरंबिके॥ अभीष्टसिद्धिरस्मात्तुलभ्यतेभुवनत्रये॥ मातःकुपिता
गतवान्निरूपस्तुमहेश्वरः॥ तवसंदर्शनायैवतत्करिष्येव्रतोत्तमं॥ व्रतस्यैतस्यकिंदानंविधानंकीदृशंमम॥ सर्वं

विविच्यमानासाकथयंतुसुरांगना॥कालोविधानदानंच व्रतस्याचफलानिच॥तत्सर्वंसावधानेन वक्ष्यामश्रृणुपार्वती
स्त्रियाद्युष॥मूढादिदोषरहितेसच्चतुर्भानुवासरे॥मासकार्यंव्रतंसम्यक्गणेशार्पितमानसैः॥तैलतांबूलभोगादीन्
वर्जयित्वासक्तनाप्रिये॥मंदवारेतुभुंजीयादेकवारमिमंतथा॥प्रातःकालेशुचिर्भूत्वास्नानंकुर्याद्विधानतः॥नद्यांतडागेकू
पेवाप्यद्भिःशुक्लतिलैःसह॥संध्याह्निकंयथान्यायंसर्वंनिर्वृत्ययत्नतः॥अर्चनागारमासाद्यगोमयेनोपलिप्यच॥गोचर्ममा
त्रंतन्मध्येकुर्याद्गंधेनमंडलं॥तन्मध्येष्टदलंपद्मंतन्मध्येगणनायकं॥पूज्ययेत्स्वच्छकुसुमैर्हरिद्राभिश्रिताक्षतैः॥गांगीं
गूंगैंगौंगश्चन्यासंकृत्वाततःपरं॥मंत्रेणानेनकुसुमैर्देवमाह्युनिक्षिपेत्॥अथवागणनाथस्यप्रतिमामथपूजयेत्॥तत
स्तज्ञतचितःसन्ध्यानंकुर्याद्यथाविधिः॥एकदंतंमहाकायंलंबोदरगजाननं॥विघ्ननाशकरंदेवंहेरंबंप्रणमाम्यहं॥इमां
पूजांगृहाणेशकपर्दिगणनायक॥आगच्छेतित्रिरुच्चार्यकुर्याद्वाहनादिकं॥पुराणमंत्रैरथवावेदमंत्रैश्चषोडश॥पू
जयेदुपचारैश्चमूलमंत्रेणवातथा॥ततःप्रकाशकैर्मंत्रैर्गंधपुष्पाक्षतादिभिः॥इंद्रादिलोकपालांश्चपूजयेद्देवसन्निधौ॥
लंबोदरनमस्तेस्तुनमस्तेत्वविकासुत॥एकदंतनमस्तेस्तुनमस्तेस्त्वीक्षितप्रदा कपर्दिगणनाथस्यसर्वसंपत्प्रदायिन॥
पूजाप्रकारंकथितंस्तवंतानिःशुचिस्मिते॥अर्कपात्रेंजलिमितान्हविष्यव्रीहितंडुलान्॥स्वच्छेनयत्नेनसंशोध्य
तूर्णीकुर्यान्महेश्वरि॥शिवेतिपूर्णाप्रथमेभानुवारेर्द्धचंद्रवत्॥कुर्याद्द्वितीयेसंपूर्णंचंद्रवत्पिष्टकाष्टकं॥तृतीयेपाय

माहात्म्यंज्ञापनीयंतयेतिमे॥ पप्रच्छसविक्रमादित्यउत्सुकःसन्पुरंदरं॥ पुरंदरमुखात्ज्ञात्वातत्सर्वंस्वपुरींप्रति॥ आद्यु
घप्रययोराजापराक्रमपरायणः॥ कपर्दीशव्रतंकृत्वामहिष्यातुरतोवदत्॥ जेष्ठामिसकलान्नाज्ञ्यामिचमहोन्नतिं॥ तस्य
व्रतस्यकिंदानमितिसाप्राहविक्रमं॥ सक्तुवारप्रियामर्कोदद्यादेकंवराटकं॥ एवंचेत्तन्नकर्त्तव्यंमज्ञेहेयत्रकुत्रचित्॥ इत्यादि
दूषणंदात्सुकुष्टव्याधिमवापसा॥ नस्छातव्यंत्वयात्रेतिसर्वराज्यंविनश्यति॥ अर्कस्यवचनंश्रुत्वाकृष्याश्रममवापसा॥ प
रिचर्यावत्नुष्टास्तस्यासर्वेमुनीश्वराः॥ निश्चित्ययोगमार्गेणसर्वेतान्ब्रुवंसती॥ कपर्दीशव्रतस्येयादेवंप्राप्ततत्यतः॥ कु
रुषतद्व्रतंसम्यक्सर्वंसिद्धंभविष्यति॥ ऋषिणामाज्ञाकृत्वाकपर्दीशव्रतंमहत्॥ तदानीराजमहिषीदिव्यदेहमवापसा॥ ॥५४॥
अस्मिन्नंतरितेकालेभवान्यासहशंकरं॥ दृष्टंययौवृषारूढोभुवनानिचतुर्दश॥ मध्येमार्गेहिजेंद्रस्यरोदनंभववल्लभा
श्रुत्वाब्राह्मणसमारोदीःकिमर्थंतवरोदनं॥ किमप्यस्तिमेहेविदारिद्र्योदेवकेवलात्॥ एवंयादिसेवद्विप्रकपर्दीशव्रतंकु
रु॥ एतत्कर्तुंव्रतंदेवि सामर्थ्यंनास्तिमेधुना॥ विक्रमार्कपुरेसर्ववैश्योदास्यतितत्कुरु॥ कपर्दीशव्रतेनैवमंत्रितप्रा
प्स्यसिक्षेवदारिद्र्यंसोवनंसम्यक्भविष्यतिनसंशयः॥ गृहंप्रतिसमागम्यगृहीत्वातंडुलान्द्विजः॥ वैश्यान्गृहीत्वा
तत्सर्वंतदानीमकरोद्व्रतं॥ तस्मिन्नर्कपुरेविप्रैस्तन्मंत्रितमवापसः॥ आज्ञापयकपर्दीशव्रतंवैश्यतत्क्षणात्॥ अ
करोत्तत्सुतायाश्चविक्रमःपतिरस्त्विति॥ व्रतप्रभावादादित्यमुपयेमोविप्रःसुतां॥ अनेनैवविवाहेनपरांप्रीतिमवा

पसा॥ एवमंतरितेकालेमृगयार्थंप्रविष्टःस॥ गहनंक्षुत्पिपासार्त्तःसन्ययौमुनिवराश्रमं॥ उपचारैश्चमंनीत्वातेषांमर्कोमनो
रमां॥ रमणीयाश्रयेतस्मिन्ददर्शयामासविक्रमः॥ इत्यपृच्छद्दर्शनात्सर्वान्दातव्येषाममांगना॥ तेनेवंमहिषीत्युक्त्वानयेत्स
स्मैसमर्पयत्॥ सममहिष्यास्वपुरींदिव्यनारीनरैर्युतां॥ हृष्टःसन्विक्रमादित्यपुंस्त्रमात्स्वाहभूपतिः॥ कपर्दिगणनाथस्यव्र
लंकृत्वास्त्रियासह॥ अजयद्विक्रमादित्यःसकलान्शत्रुमंडलान्॥ गणनाथव्रतेनैवपुत्रपौत्रव्रतश्रुतः॥ धनधान्यादि
संपद्भिःसुखेनन्यसमुवि॥ एतद्व्रतंयेकुर्वंतियाश्चकस्यविधानतः॥ चत्वारपुरुषार्थाश्चतेतस्मप्राप्नुवंतिहि॥ हयमेधस्यावि
घ्नंतुसंजातेसगरःपुरा॥ एतदेवव्रतंकृत्वापुनरश्वंसलब्धवान्॥ इमांकथांपंचवारंप्रथमेभानुवासरे॥ द्वितीयेचतृती
येचवेद्वारपुत्र्याञ्जती॥ एकाल्पमेतदेकोनाशीतिस्त्रोकंप्रकाशितं॥ न्यक्षिप्तैरन्यथाकृत्वाक्षिप्रंयातियथेक्षितं॥ इ
तिस्कांदेकपर्दीशविनायकव्रतं॥ अथकार्त्तिककृष्णचतुर्थ्यांकरकचतुर्थीव्रतं॥ अत्रस्त्रीणामेवाधिकारः॥ तासा
मेवफलश्रुतेः॥ अथव्रतविधिः॥ आचम्यमासपक्षाद्युल्लिख्यसौभाग्यपुत्रपौत्रादिसुस्थिरश्रीप्राप्तयेकरकचतुर्थी
व्रतंसंकल्प्यवटंविलिख्यतदधस्तात्शिवंशामुखयुक्तांगौरींलिखित्वाषोडशोपचारैःपूजयेत्॥ पूजामंत्रः॥ नमःशि
वायैशर्वाण्यैसौभाग्यंसंततिंशुभां॥ प्रयच्छभक्तियुक्तानांनारीणांहरिवल्लभेइति॥ नमोनमोंतनमोंतमंत्रेणशिव
षण्मुखयोःपूजाकार्या॥ ततःपक्वान्नान्दशकरान्ब्राह्मणेभ्योदद्यात्॥ ततःपिष्टकनैवेद्यंभोज्यसर्वंनिवेदये॥ त

तस्मिंश्चंद्रोदये तत्र चंद्रायार्घ्यं दद्यात्॥ अथ कथा॥ मांधातोवाच॥ अर्जुने नुगते तस्मिन्निंद्रलोकगिरिं प्रति॥ विषमनसा सुकृ
द्रुपदी समचिंतयत्॥ अहो किरीटिनी कर्मसमारब्धं महेश्वरं॥ विघ्नप्रणवमे तद्धि बहवः परिपंथिनः॥ चिंतयित्वेति सा देवी कृष्णं
कृष्णं जगद्गुरुं॥ भर्तुः प्रियं चिकीर्षंती साप्रच्छद्विघ्नवारणं॥ द्रौपद्युवाच॥ कथयस्व जगन्नाथ व्रतमेकं सुदुर्लभं॥ यत्कृत्वा या-
ति विघ्नानि विजयस्ते सदा प्रियः॥ कृष्ण उवाच॥ एतदेव महाभागे शंभुः पृष्टविलोमया॥ यतत्पृष्टं कृष्ण पूर्वं पार्वत्या शंकरं प्रति॥
तस्यास्तद्वचनं श्रुत्वा प्राह देवो महेश्वरः॥ शृणु देवि वरारोहे वक्ष्यामि त्वां महेश्वरि॥ पत्तिविघ्नवरीत्याह करकाख्यं चतु-
र्थिकां॥ पार्वत्युवाच॥ भगवान् कीदृशी प्रोक्ता चतुर्थी करकान्विता॥ विधानं कीदृशं प्रोक्तं केनेयं च पुरा कृता॥ ईश्वरः॥
शक्रप्रस्थपुरे रम्ये विद्वज्जनसमाकुले॥ स्वर्णरूप्यसमाकीर्णे रत्नप्राकारशोभिते॥ दिव्यनारीजनालोकवशीकृतजं-
गत्त्रये॥ वेदध्वनिसमायुक्ते स्वर्गादपि मनोहरे॥ वेदधर्मा द्विजस्तत्र वसन्देशो विदांवरः॥ पत्नी तस्यैव विप्रस्य नाम्ना नी-
लावती शुभा॥ स संजनयामास पुत्रान्सप्तामितौजसः॥ कन्या वीरवती नाम्नी सर्वलक्षणसंयुता॥ नीलोत्पलाभनय-
ना पूर्णेंदुसदृशानना॥ ततः काले शुभदिने विधिवच्च द्विजोत्तमः॥ ददौ वेदाय विदुषे विप्राय विधिपूर्वकं॥ अत्रांतरेषु यातस्य
चक्रे गौर्याः शुभं व्रतं॥ चतुर्थ्यां कार्तिकस्याथ कृष्णायां तु विशेषतः॥ स्नात्वा सायंतने काले सर्वास्त्वान् भक्तिभावतः॥
विलिख्य वटवृक्षं च गौरीं तस्य तले लिखेत्॥ शिवेन विघ्ननाथेन षण्मुखेन समन्वितां॥ गंधपुष्पाक्षतैर्गौरीं मंत्रेणानेन

५२

सान्नं च दद्यात्स्वं चतुर्थकं॥ आनीयाथ शशांकं सम्यक् देवं संपूज्य भक्तितः॥ कल्पितान्नानि विधिवद्दीयंते यानि यानि च॥ तेषां ते-
षामष्टमांशं तस्मै सम्यक् समर्पयेत्॥ ततः शुद्धाय बहवे दद्यादेकं वराटकं॥ पुष्पान्वितांस्तंडुलांश्च भुंजीयाद्रागसंसरं॥ याक-
मयनये भक्त्या पूजास्ते प्राप्नुवंति हि॥ इत्युक्त्वा तां भवानी तु स्त्रियो विगतकल्मषाः॥ तासां तद्वचनं श्रुत्वा तदानीमकरोद्व्रतं॥
तत्क्षणाद्विश्वेशः प्रत्यक्षः समजायत॥ त्रिलोकनाथ देवेश करुणाकर शंकर॥ दीनामनन्यगतिकां भक्तवत्सल पाहि मां॥
तुष्टश्च शंकरः प्राह कथमेतत्त्वया कृतं॥ कपर्दिगणनाथस्य माहात्म्यात्किं न सिध्यति॥ व्रतस्यैतस्य माहात्म्यं ज्ञातुं चत्व
भवांस्त्वयं॥ उद्दिश्यागमनं वि- रकृशे तद्रुतं शिवः॥ तदा च गरुडारूढः समागत्येदमब्रवीत्॥ मदागमनिमित्तं किं
किं कृतं विघ्नकरत्वया॥ मयापि ज्ञापनीयं तत्स्यात्तेज्ञापयच्छिवः॥ अथैतदकृत विष्णुरुद्दिश्यागमनं विधेः॥ आगतः सन्
विधिः शीघ्रं ममाज्ञापय माधव॥ प्रयोजनं नास्ति विधे त्वदागमनकारणे॥ एकदंतव्रतं किं तत् भवत्येवं न संशयः॥ इं-
द्रागमनमुद्दिश्य तदानीते न तत्कृतं॥ आगत्य सहसा सोपि ममाज्ञापय विश्वसृट्॥ हेरंबव्रतमाहात्म्यं द्रष्टुमेव कृतं म-
या॥ ममापि ज्ञापनीयं तदित्युक्तो विधिनोदितं॥ विक्रमादित्यमुद्दिश्य वज्री तदकरोच्च सः॥ आगत्याहं मनुष्यत्वं इं-
द्रोमतः किमीप्सितं॥ कपर्दिहस्तिवदन व्रतमाहात्म्यमीदृशं॥ इति ज्ञातुं मम प्रीत्यै मेतल्लब्धं तदाब्रवीत्॥ विधानं तस्य मा-

सृजेपेत्॥ नमः शिवायै शर्वाण्यै सौभाग्यं संततिं शुभां॥ प्रयच्छ भक्तियुक्तानां नारीणां हरवल्लभे॥ तस्याः पार्श्वे महादेवं विघ्न
नाथं षडाननं॥ पुनः पुष्पाक्षतैर्धूपैरर्चयेच्च पृथक् पृथक्॥ पक्वान्नाक्षतसंपन्नाः सदीपाः करकाः स्मृताः॥ तथापि पिष्टक
नैवेद्यं भोज्यं सर्वं न्यवेदयेत्॥ प्रतीक्षंती स्त्रियः सर्वाश्चंद्रमर्घपराः स्थिताः॥ साबाला विकला दीना क्षुत्तृष्णापरिपीडिता॥
निपपात महीपृष्ठे रुरुदुर्बांधवास्तदा॥ समाश्वास्य व तां तेस्तु मुखमभ्युक्ष्य वारिणा॥ तद्भ्राता तीचिं त्वयत्येव मारुरोहमहा
वटं॥ हस्ते तोल्कां समादाय ज्वलंतीं स्नेहपंडितां॥ भगिन्ये दर्शयामास चंद्रव्याजोदितं तदा॥ तं दृष्ट्वा वर्तिनी तु त्यक्त्वा दुःखं
बुभुजे सुमनोहरा॥ चंद्रोदयं समाज्ञाय अर्घ्यं दत्वा विधानतः॥ तद्दोषेण मृतस्तस्याः पतिर्धर्मश्च दूषिता॥ पतिं तथावि
धं दृष्ट्वा शिवमभ्यर्च्य तत्पुनः॥ व्रतं निराजनं चक्रे यावत्संवत्सरो गतः॥ ततः संवत्सरे जाते व्रतं तद्वात्तयोषित॥ पूर्वोक्तेन
विधानेन सापि चक्रे शुभानना॥ तदा याता शचीदेवी कन्याभिः परिवारिता॥ एतद्देवव्रतं कर्तुमागताः स्वर्गलोक
तः॥ वीरावती तदा आशामग मद्भाग्यतः स्वयं॥ दृष्ट्वा तां मानुषीं देवी पप्रच्छ सकलं शची॥ वीरावती तदा एष्या प्रोवा
च विनयान्विता॥ अहं पितृगृहं प्राप्ता स्नेतो यं मे पतिः प्रभुः॥ न जाने कर्मणा कस्य फलं प्राप्तं मयाधुना॥ मम भा
ग्यवशाद्देवि आगतासि महेश्वरि॥ अनुग्रहीष्व मां मातर्जीवयाशु पतिं मम॥ इंद्राण्युवाच॥ त्वया पितृगृहे पू

र्व कुर्वत्या करकाव्रतं॥ तथैवार्घस्त्वया दत्तो विना चंद्रोदयं शुभे॥ तेन ते व्रतदोषेण स्वामी लोकांतरं गतः॥ इदानीं कुरु य
त्नेन करकाव्रतमुत्तमं॥ पतिं ते जीवयिष्यामि व्रतस्यास्य प्रभावतः॥ व्यास उवाच॥ तस्यास्तद्वचनं श्रुत्वा व्रतं चक्रे वि
धानतः॥ प्रसन्ना सा भवेद्देवी शक्रस्य प्राणवल्लभा॥ तया व्रते कृते देवि जलेनाभ्युक्ष्य तत्पतिं॥ जीवयामास चेंद्राणी
देववच्च वपुष्मवसः॥ ततश्चागाद्गृहं स्वीयं रेमे सा पतिना सह॥ धनं सान्यं सपुत्रांश्च दीर्घमायुश्च लब्धवान्॥ त
स्मात्त्वयापि यत्नेन व्रतमेतद्द्विते धीयतां॥ सूत उवाच॥ द्वैपायनवचः श्रुत्वा चकार द्रौपदी व्रतं॥ तद्व्रतस्य प्रभावेन जित्वा
तान्कौरवान्रणे॥ लेभिरे राज्यमतुलं पुत्रं संपत्करं यशः॥ करकव्रतसंपूर्णं परिपूर्णमथापि वा॥ ददामि रत्न
संयुक्तं चिरंजीवतु मे पतिः॥ इति मंत्रेण करकान्प्रदद्याद्द्विजसत्तमे॥ सुवासिनीभ्यो दत्वाच्च आदद्यात्ताभ्य एव
वा॥ एवं व्रतं या कुरुते नारी सौभाग्यकाम्यया॥ सौभाग्यं पुत्रपौत्रादि लभते सुस्थिरां श्रियं॥ ॥इति वामनपु
उ राणे करकमहाचतुर्थीव्रतं॥ अथ माघशुक्लचतुर्थ्यां गौरीचतुर्थीव्रतं हेमाद्रौ पाद्मे॥ उमा चतुर्थ्यां माघे तु शुक्ला
यां योगिनीगणैः॥ प्रागभक्षयित्वा तु ष्टव भक्ष्यस्तां सा स्वके गृहे॥ तस्मात्सा तत्र संपूज्या नरैः स्त्रीभिर्विशेषतः॥
कंदपुष्पैः प्रयत्नेन सम्यग्भक्त्या समाहितैः॥ कुंकुमालक्तकाभ्यां च रक्तसूत्रैः सकंकणैः॥ रक्तैः पुष्पैस्तथा धूपै

दद्यैर्बलिभिरेवच॥ गुडाढ्यकाप्यांपयसालवणेनाथपाल्लकैः॥ पालकंमद्‌डांड मिति हेमाद्रिः॥ पूज्यास्त्रियश्चविधवास्तथा
विप्राश्चशोभनाः॥ सौभाग्यवृद्धयेदेयंभोक्तव्यंबंधुभिःसह॥ ॥इतिगौरीव्रतं॥ ॥इतिव्रतार्कचतुर्थीव्र॥तानि॥
अथपंचमीव्रतानि॥ ॥तत्रभाद्रशुक्लपंचम्यांऋषिपंचमीव्रतं॥ तच्चमध्याह्नव्यापिन्यांकार्यं॥ तथाचमाधवीयेहा
रीतः॥ पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिः॥ तिथिरिति दिनद्वये तद्व्याप्तौ वाव्याप्तौ वा पूर्वविद्धायां कार्यंयुग्मवाक्यात्॥
अथव्रतविधिः॥ हेमाद्रौमदनरत्नेच ब्राह्मे॥ नभस्यस्यशुक्लपक्षेतुयावैभवतिपंचमी॥ नद्यादिकेतडागेवा स्नात्वाकृत्वानियम
मेवच॥ ब्राह्मणीक्षत्रियावैश्याशूद्रावाप्यविराननं॥ कृत्वानैमित्तिकंकर्मगत्वानिजगृहंपुनः॥ वेदींसम्यक्
प्रकुर्वीतगोमयेनोपलिप्यतां॥ रंगवल्लीसमायुक्तांश्वेतपुष्पोपशोभितां॥ तत्रसप्तऋषीन्दिव्यान्भक्तियुक्तान्प्र
पूजयेत्॥ गंधैश्चविविधैःपुष्पैर्धूपदीपैश्चशोभनैः॥ ततोनैवेद्यसंपन्नमर्घ्यंदद्याच्छुभैःफलैः॥ अर्घ्यमंत्रः॥ क
श्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः॥ जमदग्निर्वसिष्ठश्चसप्तैतेऋषयःस्मृताः॥ गृह्णंत्वर्घ्यंमयादत्तंतु ९९
ष्टाभवतिमेसदा॥ एवंपूजांविनिर्वर्त्यऋषीन्ध्यात्वासमाहितः॥ अनेनविधिनासप्तवर्षाणिव्रतमाचरेत्॥
आदौमध्येतथान्तेनेकुर्यादुद्यापनंबुधः॥ आचार्यान्वरयेत्सप्तवेदवेदांगपारगान्॥ प्रतिमाःसप्तकुर्वी

तत्सुवर्णेन स्वशक्तितः॥ जटिलाः साक्षसूत्राश्च कमंडलुसमन्विताः॥ संस्थाप्य कलशे श्वेतानुम्रन्मयेषु कृपोपुच॥ स्ना
पयेद्विधिवद्भक्त्या पंचामृतैर्यथाविधि॥ एवं पूजां विनिर्वर्त्य अर्घ्यं दद्याद्यथापुरा॥ आचार्यान्पूजयेद्भक्त्या वस्त्राल
कारभूषणैः॥ अनुज्ञया गुरोः पश्चाद्ब्राह्मणेभ्यो निवेदयेत्॥ प्रीतिभावसमायुक्तः भोजयित्वा यथाविधि॥ अनेन
विधिना सम्यक् व्रतमेतत्समाचरेत्॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं॥ सर्वदानेषु दत्तेषु तद्भवेद्व्रतचारिणां॥
अथ कथा हेमाद्रौ मदनरत्ने च ब्रह्माण्डे॥ सिताश्व उवाच॥ श्रुतानि देवदेवेश व्रतानि सुबहूनि च॥ सांप्रतं मे समाच
क्ष्व व्रतं पापप्रणाशनं॥ ब्रह्मोवाच॥ शृणु राजन् प्रवक्ष्यामि व्रतानामुत्तमं व्रतं॥ ऋषिपंचमीति विख्यातं स
र्वपापहरं परं॥ येन चीर्णेन राजेंद्र नरकं नैव पश्यति॥ अत्रैवोदाहरंतीमम् इतिहासं पुरातनं॥ वैदर्भो ब्राह्मणो द्विजवर उत्तंको ना ॥५८॥
मनामतः॥ तस्य भार्या सुशीला तु पतिव्रतपरायणा॥ तस्या अपत्ययुगलं पुत्रो हि सुविभीषणः॥ अधीतवान्स
तस्त्वेवदान् सांगपदक्रमान्॥ समानेन कुलेनेन सुता चापि विवाहिता॥ विवाहिते च सा दैवाद्वैधव्यं प्राप्य
सत्तम॥ सतीत्वं पालयंती सा आस्ते निजपितुर्गृहे॥ तस्या दुःखेन संतप्तः तं संस्थाप्य वेश्मनि॥ गंगातीरवनं
प्राप्य सकलत्रस्तया सह॥ स तत्राध्यापयामास शिष्यान्वेदं द्विजोत्तमः॥ सुता च कुरुते तस्यापि शुश्रूषणपरं॥ पि

तुःशुश्रूषणं कृत्वा परिश्रान्ता कदाचन ॥ निशीथे किल संसुप्ता कृमिराशिरजायत ॥ तां तु तथाविधां दृष्ट्वा विवस्त्रां प्रस्र
रस्थितां ॥ शिष्या निवेदयामास सुत्ता भ्रातुः करणास्थिता ॥ न जानीमो वयं किंचिद् देवी साध्वी तथाविधा ॥ कृमिराशिमयी
जाता मातः संप्रति दृश्यते ॥ वज्रपातसदृक्षां तत् श्रुत्वा शिष्योरुदीरितं ॥ संभ्रान्ते मनसा शीघ्रं तत्समीपमुपागता ॥ सा
तां तथाविधां दृष्ट्वा विलपाकाय सदुःखिता ॥ उरश्च ताडयामास सुतरां मोहमाय च ॥ क्षणेन प्राप्तचैतन्या मुखं प्र
प्रतिमृज्य च ॥ समालभ्य च बाहुभ्यां निन्ये तत्पितुरन्तिके ॥ स्वामिन् कथय मे साध्वी केन दुष्कृतकर्मणा ॥ निशीथे
संप्रसुप्तेयं जायते कृमिसंकुला ॥ एतच्छ्रुत्वा ततो वाक्यमृषिर्ध्यानपरायणः ॥ ज्ञात्वा निवेदयामास तस्याः प्राग्जन्म
चेष्टितं ॥ ऋषिरुवाच ॥ प्रागियं सप्तमे तीते जन्मनि ब्रह्मणी ह्यभूत् ॥ नोत्ससार स्वभाण्डेभ्यः संजाता च रजस्वला ॥
अस्याः स्पृष्ट्वा पात्राणि तेन जायते कृमिवद्वपुः ॥ रजस्वला या पापं न मुक्ता भवति सा नघे ॥ प्रथमेहनि चांडाली द्वितीये
या मस्तकरी ॥ तृतीये रजकी प्रोक्ता चतुर्थेहनि शुध्यति ॥ तथानया सखीसंगाद् व्रतं दृष्ट्वावमानितं ॥ दृष्टं प्रभावे नं
न जाता द्विजकुलेपरे ॥ अवमानात्कृतस्यास्य कृमिराशिमयी धुना ॥ एतत्ते कारणं सर्वं कारणं दुष्कृतस्य च ॥ सु
शीलोवाच ॥ दर्शनादपि यस्यास्याद् द्विप्राणं निर्मलकुले ॥ जन्म पुष्य द्विधानं हि जायते ब्रह्मतेजसा ॥ अ
वस्थया प्रजायन्ते विग्रहे कृमिराशयः ॥ महाश्चर्यकरं नाथ तद्व्रतं कथयस्व मे ॥ ऋषिरुवाच ॥ सुशीले शृणु

तत्सम्यग्व्रतानामुत्तमंव्रतं॥येनचीर्णेनसहसापापादस्मात्प्रमुच्यते॥दुःखत्रयाभिघातश्चजातुनैवयतेनात्रसं
शयः॥कल्याणानिविवर्धन्तेसंपदश्चनिरापदः॥नभस्येशुक्लपक्षेतुयदाभवतिपंचमी॥नद्यादिषुतदास्ना
नंकृत्वानियममेवच॥विधायनित्यकर्माणिगत्वाद्वारावतींस्थलं॥स्नापयेद्विधिवद्भक्त्यापञ्चामृतरसैःशु
भैः॥द्वारावत्यग्निहोत्रशालां॥चंदनागरुकर्पूरैर्विलिप्यचसुगंधिभिः॥पूजयेद्विविधैःपुष्पैर्गंधधूपादिदी
पकैः॥समाच्छाद्यशुभैर्वस्त्रैःसोपवीतैर्यथाविधि॥ततोनैवेद्यसंपन्नमर्घ्यंदद्याच्छुभैःफलैः॥अर्घ्यमंत्रप्रा
गुक्तवे॥श्रोतव्यमिदमाख्यानंशाकाहारंप्रकल्पयेत्॥स्थातव्यंब्रह्मचर्येणऋषिध्यानपरायणः॥अनेन
विधिनासम्यक्व्रतमेतत्समाचरेत्॥तस्ययज्जायतेपुण्यंतच्छृणुध्वंसमाहिताः॥सर्वव्रतेषुयत्पुण्यंसर्वती
र्थेषुयत्फलं॥सर्वदानेषुदत्तेषुतत्सर्वंव्रतपारणात्॥कुरुतेयाव्रतंचैतत्सानारीसुखभागिनी॥रूपलाव
ण्यसंयुक्तापुत्रपौत्रादिसंयुता॥इहलोकेसदैवास्यात्परत्राप्यक्षयागतिः॥व्रतस्यास्यप्रभावेनजाति
स्मरतिपौर्विकीं॥ ॥इतिब्रह्माण्डपुराणेऋषिपंचमीव्रतं॥ ॥अथशिष्टाचारप्राप्तंव्रतं॥ मासप
क्षाद्युल्लिख्यममयाज्ञानसहितान्सप्तऋषीन्पूजयेत्॥ तत्रपूजाविधिः॥ आगच्छंतुमहाभागाः

ममात्तानाज्ञातकृतपरदोषनिवृत्यर्थं
ममब्रह्मलोकेनिवाससिध्यर्थं अरुंधतीसहितसप्तऋषिप्रीत्यर्थं ऋषिपंचमीव्रतं करि॰ तदंग
~~स्वस्तिवाचनंपुण्याहवाचनं~~ गणपतिपूजनं। यमुनापूजनं। ऋषिपूजनं करि॰

२८

तुर्वेदस्वरूपिणः ॥ यावद्व्रतं महं कुर्वे त्वत्पायां भव तां प्रभो ॥ आवाहनं ॥ ह्स्तेन ब्रह्मण्यदेवस्य ब्रह्मणांस्त्वेत्तउत्तमं ॥ सूर्य
कोटिप्रतीकाशं ऋषिवृंदं विचिंतयेत् ॥ ध्यानं ॥ ऋग्यजुःसामवेदानां स्वरूपेभ्यो नमो नमः ॥ पुराणपुरुषेभ्यो हि देवर्षिभ्यो नमो
नमः ॥ आसनं ॥ गंधपुष्पाक्षतैर्युक्तं पाद्यं गृह्णंतु भो द्विजाः ॥ प्रसादं कुरुतः प्रीता तुष्टाः संतु सदा मम ॥ पाद्यं ॥ नमस्त्येश्रुरूपं
त्वम्याभर्चिताऋषिसत्तमः ॥ इदं तु पापं मे सर्वे अर्घ्यं गृह्णंतु वै नमः ॥ अर्घ्यं ॥ लोकानां तुष्टिकर्त्तारो यूयं सर्वे तपोधनाः ॥
नमो वो धर्मविज्ञेभ्यो महर्षिभ्यो नमो नमः ॥ आचमनं ॥ मंदाकिनी गोतमीव यमुना च सरस्वती ॥ गौतमी नर्मदा तापी ताभ्यः
स्नानाय् माहृतं ॥ स्नानं ॥ सर्वे नित्यं तपोनिष्ठा ब्रह्मज्ञा सत्यवादिनः ॥ वस्त्राणि प्रतिगृह्णंतु भक्तिदाः संतु मे सदा ॥ वस्त्रं ॥ यज्ञो
पवीतमंत्रेण यज्ञोपवीतानि ॥ कुंकुमागरुकर्पूरसुगंधैर्मिश्रितं शुभं ॥ गंधाढ्यं चंदनं दिव्यं गृह्णंतु ऋषिसत्तमाः ॥ चंदनं ॥
रंजिताः कुंकुमाद्यैश्च अक्षताः स्कंस्कशोभनाः ॥ गृह्णंतु मम संतुष्टा प्रसंन्ना ऋषिसत्तमाः ॥ अक्षताः ॥ मालतीचंपकादीनि मा
ल्यादीनि वै प्रभो ॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां ॥ पुष्पं ॥ वनस्पतिरसो गंधाढ्यः सुमनोहरः ॥ आघ्रेयः
सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ धूपं ॥ आज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवेश त्रैलोक्यतिमिराप
हं ॥ दीपं ॥ नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितं ॥ नैवेद्यमृषयः सर्वे गृह्णंतु वसुदायकाः ॥ नैवेद्यं ॥ लोकानामित्या
चमनं ॥ चंदनेन करोद्वर्तनं ॥ पूगीफलमिति तांबूलं ॥ इदं फलमिति फलं ॥ हिरण्यगर्भगर्भस्थमिति दक्षिणा ॥ यानि

कानि च पापानि नीति प्रदक्षिणा॥ एते सप्तर्षयः सर्वे भक्त्या संपूजिता मया॥ सर्वपापक्षयोहं तु ज्ञानतो ज्ञानतः कृतं॥ नमस्कारः॥ वा
यणं फलसंयुक्तं सघृतं दक्षिणान्वितं॥ द्विजवर्याय दास्यामि व्रतसंपूर्तिहेतवे॥ भवतः प्रतिगृह्णंतु ज्योतिरूपास्तपोधनाः॥
वायणं॥ न्यूनातिरिक्तकर्माणि मया यानि कृतानि च॥ क्षमध्वं तानि कर्माणि ऋषयः सर्वे तपोधनाः॥ विसर्जनं॥ युधिष्ठिर उवा
च॥ श्रुतानि देवदेवेश व्रतानि सुबहूनि च॥ सांप्रतमितदाचक्ष्व व्रतं पापप्रणाशनं॥ कृष्ण उवाच॥ अथान्यदपि राजेंद्र पं
चमीं ऋषिसंज्ञितां॥ कथयिष्यामि मं कृत्वा नारी पापात्प्रमुच्यते॥ युधिष्ठिर उवाच॥ कीदृशी पंचमी कृष्ण कथं च ऋषिसं
ज्ञिता॥ पातकान्मुच्यते यस्मान्नारी यदुकुलोद्भव॥ पापानि च बहून्यत्र विद्यंते किल केशव॥ कृतायामृषिपंचम्यां नारी क
स्मात्प्रमुच्यते॥ कृष्ण उवाच॥ अज्ञानाज्ज्ञानतो वापि या स्त्री जाता रजस्वला॥ दुष्टा स्पृशति भांडानि गृहकर्माणि संस्थिता॥
प्राप्नोति सा महापापं सर्वा नारी रजस्वला॥ शृणुष्व कारणं यस्माद्दर्जनीया रजस्वला॥ प्रोक्ता या गृह्यतेश्चापि चातुर्वर्ण्ये
न भारत॥ ब्रह्महत्यां पुरा शक्रो वृत्रं हत्वा समाप्तवान्॥ तया वै राजशार्दूल व्रीडितो वृत्रसूदनः॥ ब्रह्माणं समुपागच्छद
त्मनः शुद्धिकारणात्॥ शुद्धिं शक्रस्य राजेंद्र प्रहृष्टेनांतरात्मना॥ विभज्य ब्रह्महत्यां तु चतुर्धा च चतुर्मुखः॥ प्राक्षिपद्रा
जशार्दूल चतुस्थानेषु वै तदा॥ वह्नेः प्रथमजा तासु ज्वालासु वनदीषु च॥ पर्वतेषु च राजेंद्र नारीरजसि पार्थिव॥
अतो रजस्वला नारी प्रोत्सार्या च प्रयत्नतः॥ ब्राह्मणः शासनात्सार्यं चातुर्वर्ण्ये न संदेह॥ प्रथमेहनि चांडाली द्वितीये

ब्रह्मघातकी॥ तृतीये रजकी प्रोक्ता चतुर्थेहनि शुध्यति॥ अज्ञानात् ज्ञानतो वापि ज्ञानसंसर्गपातकं॥ तत्पापसंक्षयार्थं हि का
र्येयम् ऋषिपंचमी॥ सर्वपापप्रशमनी सर्वोपद्रवनाशिनी॥ ब्रह्मक्षत्रियविट्शूद्रैः स्त्रीभिः कार्या विशेषतः॥ कृष्ण उवाच॥ अ
थान्यदपि राजेंद्र प्रवक्ष्यामि कथांतरं॥ पुरा कृतयुगे राजन् विदर्भायां बभूव ह॥ श्येनजिन्नाम राजर्षिश्चतुर्वर्गानुपालकः॥
म तस्य देशे वसेद्विप्रो वेदवेदांगपारगः॥ सुमित्रो नाम राजेंद्र सर्वभूतहिते रतः॥ कृषिं कृत्वा समासीनेकुटुंबपरिपालकः॥ त
स्य भार्या सुसाध्वी च पतिशुश्रूषणे रता॥ जयश्री नाम विख्याता बहुभृत्यसुहृज्जना॥ क्षेत्रादिषु रता साध्वी व्याकुलीकृतमा
नसा॥ एकदा सा त्वनःप्राप्तमृतुकालं व्यलोकयत्॥ रजस्वलापि सा राजन् गृहकर्म च कार ह॥ भांडानि सास्पृशद्राजन्
ऋतौ प्राप्तेपि भामिनी॥ कालेन बहुना साध्वी पंचत्वमगं तदा॥ तस्या भर्तापि विप्रोसौ कालधर्ममुपेयिवान्॥ एवं तौ दंप
ती राजन् स्वकर्मवशगौ तदा॥ भार्या तस्य जयश्री सा साक्षात्संपर्कदोषतः॥ शुनियोनिमनुप्राप्ता सुमित्रोपि नरेश्वर॥
तस्याः संपर्कदोषेण बलिवर्दो बभूव ह॥ तद्दोषेण महाराज दुर्गतिं तौ गतौ तदा॥ सुमित्रस्य सुतो भूत् पितृशुश्रूष
णरतः॥ भार्या चंद्रवतीं प्राह सुमतिः श्रद्धयान्वितः॥ आद्य सांवत्सरं दिनं पितुर्मे चारुहासिनी॥ भोजनीया मया विप्राः पाक २
शुद्धिर्विधीयतां॥ तया कृता पाकशुद्धिः सुमतेर्भर्तुराज्ञया॥ मुक्तं पायसभांडे स्यात्सर्पेन गरलं ततः॥ दृष्ट्वा ब्रह्मनधाङ्गी

रिम

त्सु त्वाशुनी भांडानि सा स्पृशात्॥ द्विजभार्याच तां दृष्ट्वा उल्मुकेन जघान तां॥ भोजिता ब्राह्मणास्तत्र श्राद्धं कृत्वा प्रयत्नतः॥ ततो भुक्ते
षु विप्रेषु नोच्छिष्टं तु ददौ बहिः॥ द्वाररक्षया तया शुन्या उपवासस्तदा भवत्॥ ततो रात्र्यां प्रवृत्तायां सा शुनी क्षुधिता नृप॥ बली
वर्दमुपागत्य भर्त्तारमिदमब्रवीत्॥ बुभुक्षिताद्य यथा नाथाहं न दत्तं भोजनं तु मे॥ ग्रासादिकं च नम्ल भेक्षुधामां बाधते बला
त्॥ अन्यस्मिन्नदिवसे पुत्रो मम स्नेहयंतदात्यसौ॥ अद्य मद्यं किमप्येष उच्छिष्टमपि नो ददौ॥ पायसान्ने पपाताद्य गरलं सर्प
संभवं॥ मया विचिंत्य मनसा मरिष्यंति द्विजोत्तमाः॥ संस्पृष्टं पायसं रोषाल्लयाहं ताडिता भृशं॥ दुःखितं तेन गात्रं मे कटिर्भ
ग्ना करोमि किं॥ ततः प्रहस्य वै दर्भोऽनडुत्तेन पापसंग्रहात्॥ किं करोमि त्वरा के स्कंध भारवाहत्वमागतः॥ आद्याहमात्मजक्षे
त्रे वाहितः सकलं दिनं॥ मारितश्चात्मजेनेहं मुखं बध्वा बुभुक्षितः॥ वृथा श्राद्धं कृतं तेन जाताद्य मम कष्टता॥ इत्युक्त्वा॰
तयोः संवादितोरेवं मातापित्रोश्च भारत॥ श्रुत्वा पुत्रस्तदा वाक्यं यदुक्तं च तयोर्भयात्॥ मातापित्रोस्तु राजेंद्र तदासौ प्रस्थि
तो वनं॥ ज्ञातुमिच्छामि कष्टं वै मातापित्रोश्च भारत॥ तत्र गत्वाश्रमान् दृष्ट्वा ऋषीन्सप्त वनाश्रितान्॥ प्रणिपत्याब्रवीद्वा
क्यं हितं चैव तदा तयोः॥ सुमतिरुवाच॥ कथयध्वं ब्रह्मर्षयः प्रश्नमेतं समाहिताः॥ केन कर्मविपाकेन पितरौ मे तपो
धनाः॥ इमामवस्थां संप्राप्तौ मोक्षे ते पातकात्कथं॥ ऋषय ऊचुः॥ तव माता पुरा विप्र स्वगृहे बालभावतः॥ आप्तं

ऋतुं विदित्वा तु संपर्कमकरोद्द्विज ।। तेन कर्मविपाकेन शुनीयोनिमुपागता ।। पिता च स्पर्शदोषेण बलिवर्दो बभूव ह ।। एतयोर्मु
क्तिकामार्थं कुरु त्वमृषिपंचमीं ।। भार्यया सह विप्रेंद्र श्रद्धया नु संपूज्य यत्नतः ।। आचरस्व व्रतं तत्र सप्त वर्षं द्विजोत्तम ।। अंते चोद्या
पनं कुर्याद्वित्तशाठ्यविवर्जितः ।। शाकाहारस्तु कर्तव्यः श्यामाकाहार एव वा ।। नीवारैर्वापि कर्त्तव्यं कृष्टपच्यं न भक्षयेत् ।। प्राप्ते
भाद्रपदे मासि शुक्लपक्षस्य पंचमी ।। तस्यां मध्याह्नसमये नद्यादौ विमले जले ।। कृत्वापामार्गवृक्षेण दंतधावनमादितः
आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च ।। ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते ।। संप्रार्थ्य तेन मंत्रेण कुर्याद्वै दंतधावनं ।।
मुखदुर्गंधिनाशाय दंतानां च विशुद्धये ।। ष्ठीवनाय च गात्राणां कुर्वीत दंतधावनं ।। अनेन दंतान्संशोध्य स्नायान्मृत्
स्नानपूर्वकं ।। तिलामलककल्केन केशान्संशोध्य यत्नतः ।। परिधाय नवे शुद्धे वाससी सुसमाहितः ।। व्रतेन ऋषिपंचम्यां
कृतेनैवं द्विजोत्तम ।। ऋतुसंपर्कजो दोषः क्षयं याति न संशयः ।। श्रीकृष्ण उवाच ।। तच्छ्रुत्वा सुमतिर्वाक्यं परमं ऋषिभाषि
तं ।। गृहमेत्य व्रतं चक्रे सभार्यः श्रद्धयान्वितः ।। व्रतं तु ऋषिपंचम्यां सर्वपापप्रणाशनं ।। कृत्वा सर्वं यथोक्तं च मातापि
त्रोः फलं ददौ ।। व्रतपुण्यप्रभावेन माता तस्य च योनितः ।। मुक्ता नृपतिशार्दूल विमानवरसंस्थिता ।। दिव्यांबरध
रा स्थित्वा गता स्वर्गे च भारत ।। पितापि सोमतो गच्छत्सुमतेः पशुयोनितः ।। स्वर्गं प्राप्तौ महाराज व्रतस्यास्य प्रभा

वतः॥ कायिकं वाचकं वापि मानसं यच्च दुष्कृतं॥ तत्सर्वं विलयं यांति व्रतस्यास्य प्रभावतः॥ यस्य यज्जायते पुण्यं त
च्छृणुष्वपि द्विजोत्तम॥ सर्वव्रतेषु यत्पुण्यं तच्छृणुष्व द्विजोत्तम॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं॥ सर्वदानेषु दत्तेषु
तदेतद्व्रतचारणात्॥ कुरुते या व्रतं नारी सा भवेत्सुखभोगिनी॥ रूपलावण्ययुक्ता च पुत्रपौत्रादिसंयुता॥ इहलोके सदैवास्य
परत्रे च परां गतिं॥ एतत्ते कथितं राजन् व्रतानामुत्तमं व्रतं॥ सर्वसंपत्प्रदं चैव नारीणां पापनाशनं॥ धनं यशश्च स्वर्गं च
पुत्रानपि युधिष्ठिर॥ पठतां शृण्वतां चापि सर्वपापप्रणाशनं॥ ॥इति श्रीभविष्योत्तरपुराणे ऋषिपंचमीव्रतक
था॥ अथोद्यापनं॥ युधिष्ठिर उवाच॥ पूर्वस्मिन्दिवसे कुर्यादेकभक्तं समाहितः॥ शुचौ देशे समालिप्य
सर्वतोभद्रमंडले॥ अव्रणं सजलं कुंभं ताम्रं मृन्मयमेव च॥ संस्थाप्य वस्त्रसंवीतं कंठदेशे सुशोभनं॥ पंचरत्नस ॥८१॥
मायुक्तं फलगंधाक्षतैर्युतं॥ सहिरण्यं समाछाद्य ताम्रेण पट्टलेन वै॥ वंशमृन्मयपात्रेण यवपूर्णेन वै बहि॥ आछा
द्ये तद्विलेत्तत्र लिखदष्टदलं तथा॥ सौवर्णप्रतिमाः कार्या ऋषीणां भावितात्मनां॥ पलेन वा तदर्धेन तदर्धार्धेन वा
पुनः॥ शक्त्या वा कारयेत्तत्र वित्तशाठ्यविवर्जितः॥ वितानं पंचवर्णं च फलपुष्पसमन्वितं॥ बध्नीयादुपरि श्रीमत्सं
भारान्संविधाय च॥ मध्याह्ने पूजयेद्भक्त्या ऋषीन् श्रद्धासमन्वितः॥ कश्यपोत्रिर्भरद्वाजो विश्वामित्रो थगो

तमः॥ जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुंधती॥ मंत्रेणानेन राजेंद्र कृत्वा पूजां समाहितः॥ राज्ञौ जागरणं कुर्यात्पुराणश्र
वणादिभिः॥ कृतनित्यक्रियः प्रातर्जुहुयात्तिलसर्पिषा॥ वैदिकैश्चापि पौराणैः अधिकारान्मनुसारतः॥ अष्टोत्तरसहस्रं वा शत
मष्टोत्तरं तु वा॥ पुनः पूजां ततः कृत्वा गुरुं संपूजयेद्व्रती॥ स्वर्णांगुलीयवासोभिः कुंडलासनभा जनैः॥ दद्यादेकां सवत्सां
च गुरवे गां पयस्विनीं॥ पूजयेदृत्विजः सप्त वासोभिर्दक्षिणादिभिः॥ कलशांश्च पवित्रादीन् दद्यात्तेभ्यः सुभक्तितः॥ आ
चार्यं च सपत्नीकं प्रणिपत्य क्षमापयेत्॥ भोजयेद्ब्राह्मणान्भक्त्या दीनानाथांश्च तर्पयेत्॥ सोपस्करां तां प्रतिमामाचार्या
य निवेदयेत्॥ लब्धानुज्ञस्तु भुंजीत इष्टैर्बंधुजनैः सह॥ उद्यापनविधिः प्रोक्तः सर्वव्रतार्थफलार्थिनां॥ एवं यः कुरुते भूप
उद्यापनविधिं परं॥ सर्वपापविनिर्मुक्तो स्वर्गलोके महीयते॥ इह लोके चिरं कालं भर्त्रा सह तु चिरस्मृता॥ पुत्रपौत्रैः प
रिवृता भुक्त्वा भोगान्मनोहरान्॥ निःपाप सुभगा नित्यं लभते चाक्षयां गतिं॥ ॥इति सोद्यापनऋषिपंचमीव्रतं॥
अस्यामेव नागपंचमीव्रतं हेमाद्रौ प्रभासखंडे॥ ईश्वर उवाच॥ मासि भाद्रपदे चापि शुक्लपक्षे तु पंचमी॥ सा तु पुण्य
तमा प्रोक्ता देवानामपि दुर्लभा॥ कुर्याद्द्वादश वर्षैस्तु पंचम्यां च वरानने॥ चतुर्थ्यामेकभक्तं तु तस्या नक्तं प्रकीर्तितं॥
भूरिचंद्रमयं नाथवा कालधौतजं॥ कलधौतजं सुवर्णं॥ कृत्वा दारुमयं वापि अथवा मृन्मयं प्रिये॥ पंचम्यामर्चये

कृत्या नागपंचफणांस्मृतं॥ करवीरैः शतपत्रैश्च जातीपुष्पैश्च पद्मकैः॥ अनंतं वासुकिं शेषं पद्मं कंबलमेव च॥ तथाक
र्कोटकं नागं नागमश्वतरं तथा॥ धृतराष्ट्रं शंखपालं कालीयं तक्षकं तथा॥ पिंगलं च महानागं मासि मासि प्रकीर्तिताः॥
व्रतस्यांते पारणं स्यात् क्षीरैर्ब्राह्मणभोजने॥ सुवर्णभारनिष्पन्नं नागं दद्याच्च गां तथा॥ तथा वस्त्राणि दिव्यानि व्यास
यामितेतेजसे॥ एवं संपूजयेन्नागान् सद्भावभक्त्या समन्वितः॥ विशेषतस्तु पंचम्यां पयसा पायसेन वेति॥ ॥इति
प्रभासखंडे नागपंचमीव्रतं॥ ॥हेमाद्रौ भविष्योत्तरे॥ नागदष्टो नरो राजन् प्राप्य मृत्युं व्रजत्यधः॥ अधोगत्वा भवेत्स
निर्विषा नात्र संशयः॥ शतानीक उवाच॥ ॥नागदष्टः पिता यस्य भ्राता वा दुहिता पिता॥ माता पित्रोऽथ वा भार्या
कर्तव्यं तद्वदस्व मे॥ मोक्षाय तस्य विप्रेंद्र दानं व्रतमुपोषितं॥ ब्रूहि मे द्विजशार्दूल येन तद्वै करोम्यहं॥ सुमंतुउ
वाच॥ उपोष्या पंचमी सम्यक् नागानां बलिवर्धनी॥ उमेकमेकं यावच्च विधानं शृणु भारत॥ उपोष्येति
दिवाभोजनाभावस्तस्यामुक्तमित्यग्रे नक्तोक्तेः शुभेकाः संवत्सरः॥ मासि भाद्रपदे राजन्॥ शुक्लपक्षे तु पं
चमी॥ सापि पुण्येन मा प्रोक्ता याह्यास्त्वो गतिकाम्यया॥ चतुर्थ्यामेकभक्तं च तस्यां नक्तं प्रकीर्तितं॥ तस्यां
पंचम्यां॥ कुर्याच्चाद्रमसं नागं मथवालधौतजं॥ हेमं रौप्यं चेत्यर्थः॥ अथ दारुमयं भव्यं मृन्मयं वा शक्तितः॥

पंचम्यामर्चयेद्भक्त्या नागं पंचफणं तथा ॥ करवीरैस्तथा पद्मैर्जातीपुष्पैः सुगंधिभिः ॥ गंधपुष्पैः सनैवेद्यैः स्नाप्य सी
रादिभिर्नृप ॥ ब्राह्मणान्भोजयेत्पश्चात् घृतपायसमोदकैः ॥ अनंतं वासुकिं शंखं पद्मं कंबलमेव च ॥ तथा कर्कोटकं ना
गं नागमश्वतरं नृप ॥ धृतराष्ट्रं शंखपालं कालीयं तक्षकं तथा ॥ पिंगलं च तथा नागं मासि मासि क्रमाद्यजेत् ॥ पूजयि
ष्यत्नेन पंचम्यां नक्तभुग्भवेत् ॥ एवं द्वादश कृत्वैवं मासि भाद्रपदे नृप ॥ वत्सरांते यथाशक्त्या महाभोज्यं तु कारयेत् ॥ ब्रा
ह्मणानां यतीनां च नागानुद्दिश्य भक्तितः ॥ इतिहासविदे नागं कांचनं रत्नचित्रितं ॥ गां च दद्यात्सवत्सां वै सर्वोपस्कर
संयुतां ॥ दानकाले पठेदेतत्स्मरन्नारायणं विभुं ॥ सर्वगं सर्वधातारमनंतमपराजितं ॥ ये केचिन्मे कुले सर्पैर्दष्टाः प्रा
प्तास्त्वधोगतिं ॥ व्रतदानेन गोविंद मुक्तिभाजो भवंतु ते ॥ इत्युच्चार्याक्षतैर्युक्तं सितचंदनमिश्रितं ॥ वासुदेवाग्रतोभ्य
तोयं तोयेष्वनुक्षिपेत् ॥ अनेन विधिना सर्वे ये मरिष्यंति वा मृताः ॥ तर्पतस्ते भियास्यंति स्वर्गतिं नृपसत्तमं ॥ कृ
त्वा सर्वान्समुद्धृत्य कुलजान्कुलनंदन ॥ प्रयाति विष्णुसान्निध्यं सव्यमानोप्सरोगणैः ॥ वित्तशाठ्यविहीनाय स
र्वमेतत्फलं लभेत् ॥ नक्तोनभक्तिसाहिताः सितपंचमीषु ये पूजयंति सुभगाः कुसुमोपहारैः ॥ तेषां गृहेषु भयस

हिमवंति सर्पान्विता मणिमयूखविभासितांगाः॥ ॥इति नागदष्टमीपंचमीव्रतं॥ ॥अथाश्विनशुक्लपंचम्या
मुपांगललिताव्रतं॥ तत्र दाक्षिणात्यशिष्टाचार एव मानं॥ अत्र पूजैव प्रधानं॥ तत्तु जपान्निजगृहे परामृष्टिमवाप्स्यसी
ति कथायां पूजायाः फलसंधानात्॥ फलवत्संनिधावफलं तदंगमिति न्यायेन जागरणवायनपारणादानवकादिभक्षणं देश
दंगं तत्र तत्पूजनं मध्याह्नव्यापिन्यां कार्यं॥ पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति माधवीये हारीतोक्तेः॥ दि
नद्वये तद्व्याप्तावव्याप्तौ वा पूर्वा युगभूतानामिति वाक्यात्॥ एतेन जागरणमंगं॥ भुक्त्वा जागरणेन कृ चंद्रा[illegible]
व्रते तथा॥ तारा व्रतेषु सर्वेषु रात्रियोगो विशिष्यत इति हेमाद्रिलिखितवचनात्तु रात्रिव्यापिनी ग्राह्येति कस्यचिदु
क्तिरुपेक्षणीया॥ अंगानुरोधेन निर्णयस्य क्वास्य दृष्टत्वात्॥ वचनं तु जागरणप्रधानके सावकाशमिति॥ अ
थ व्रतविधिः॥ आचम्य प्राणानायम्य मासपक्षाद्युल्लिख्य पुत्रधनविद्यारोगनिर्मुक्तिसुखगोजयपुष्ट्यादिकामः
स्त्री तु वैधव्यकामः उपांगललिताप्रीत्यर्थं यथामीलितोपचारैः उपांगललितापूजनमहं करिष्ये॥ इति संक
ल्प्य पूजां कुर्यात्॥ अथ पूजाविधानं च कुर्मादेकाग्रमानसः॥ सौवर्णप्रतिमां कृत्वा शक्त्या मंत्रैः प्रपूज्य

येत्॥नीलकौशेयवसनां हेमाभां कमलासनां॥भक्तानां वरदां नित्यं ललितां चिंतयाम्यहं॥ध्यानं॥ निजासने
सपुत्रैश्वसहिते भक्तवत्सले॥उपांगललिते मातर्देहि मे व्रतकर्मणि॥आगच्छ ललिते देवी सर्वसंपत्तिदायिनी॥या
वद्व्रतं समाप्येत तावत्त्वं सन्निधौ भवेत्यावाहनं॥हिरण्यवर्णां।कर्त्तस्वरमयं देवी नानामणिगणार्च्चितं॥अनेकरत्नसं
युक्तं आसनं प्रतिगृह्यतां॥तां म आवह इत्यासनं॥गंगादिसर्वतीर्थेभ्यो मयाप्रार्थनयाहृतं॥तोयमेतत्सुखस्पर्शं पाद्या
र्थं प्रतिगृह्यतां॥अश्वपूर्वामिति पाद्यं॥निधानं सर्वरत्नानां त्वमनर्घ्यगुणाह्यसि॥त्वयापि भक्त्या ललिते गृहाणा
र्घ्यं नमोस्तु ते॥कांसोस्मितामित्यर्घ्यं॥पाटलोशीरकर्पूरसुरभिः स्वादु शीतलं॥तोयमाचमनीयार्थं ललिते प्र
तिगृह्यतां॥चंद्रांप्रभासामित्याचमनं॥पंचामृतं मयानीतं पयो दधि घृतं चैव॥शर्करामधुसंयुक्तं स्नानार्थं प्रति
गृह्यतां॥पंचामृतं॥मंदाकिन्याः समानीतं हेमांभोरुहवासितं॥स्नानाय ते मया भक्त्या गांगं स्वीक्रियतां जलं॥
आदित्यवर्णामिति स्नानं॥सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे॥मयोपपादिते तुभ्यं वाससी प्रतिगृ
ह्यतां॥उपैतु मामिति वस्त्रं॥मलयाचलसंभूतं घनसारं मनोहरं॥हृदयानंदं चारुश्चंदनं प्रतिगृह्यतां॥क्षि ६२
क्षिपिपासेति चंदनं॥अक्षता विमलाः शुद्धा मुक्तामणिसमप्रभाः॥भूषणार्थं मया दत्ता देहि मे निर्मलां धियं॥

गंधद्वारामित्यक्षताः॥मालतीकेतकीजातीतुलसीचंपकानि च॥मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां॥मनसः
काममिति पुष्पं॥अथ पुष्पैः प्रत्यंगपूजा॥उपांगललितायै नमः॥पादौ पूजयामि॥भवान्यै॰ गुल्फौ॰ सिद्धेश्वर्यै॰
कुक्षिं॰ शिवायै॰ हृदयं॰ वागीश्वर्यै नमः॥स्कंधौ॰ महादेव्यै॰ बाहू॰ प्रकृतिभद्रा॰ करौ पूजयामि॰ पद्मिन्यै॰ कं
ठं॰ सरस्वत्यै नमः॥मुखं॰ पद्मकेसरवासिन्यै नमः॰ नासिकायां॰ महिषमर्दिन्यै॰ नेत्रे॰ लक्ष्म्यै॰ कर्णौ॰ भवान्यै॰
ललाटं॰ विंध्यवासिन्यै॰ शिरः॰ सिंहवाहिन्यै॰ सर्वांगं पूज॰ देवद्रुमरसोद्भूतः कालागरुसमन्वितः॥आघ्रेय
नां मया धूपो भवानीप्रीतिणतर्पणः॥कर्दमेनेति धूपं॥चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणं॥आर्तिक्यं क ॥६४॥
ल्पितं भक्त्या गृहाण परमेश्वरी॥आपः स्रजंत्विति दीपं॥मोदकापूपलड्डुकवटकोदुंबरादिभिः॥सघृतं पा
यसेनान्नं नैवेद्यं प्रतिगृह्यतां॥आर्द्रां पुष्करिणीमिति नैवेद्यं॥आचमनं॥मलयाचलसंभूतं कर्पूरेण स
मन्वितं॥करोद्वर्तनकं चारु गृहाण परमेश्वरि॥कर्पूरैलालवंगादि तांबूलदलसंयुतं॥क्रमुकस्य फलं
तुभ्यं तांबूलं प्रतिगृह्यतां॥आर्द्रां यः करिणीं यष्टीमिति तांबूलं॥इदं फलमिति फलं॥हिरण्यगर्भमिति दक्षिणां॥
चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च॥त्वमेव सर्वज्योतींषि आर्तिक्यं प्रतिगृह्यतां॥नीराजनं॥उ

उपांगललिते मातर्नमस्ते विंध्यवासिनि॥ दुर्गे देवि नमस्तुभ्यं नमस्ते विश्वरूपिणी॥ पुष्पांजलिः॥ अथ दूर्वांकुरा
न्साग्रान्चत्वारिंशत तथाष्टभिः॥ अधिकान्हस्त आदाय मंत्रमेतं जपेद्बुधः॥ बकुभरो हासततंमम्नता हरितालिके॥
यथेयं ललिते मातस्तथा मे स्युर्मनोरथाः॥ इति दूर्वामंत्रः॥ इत्थं कृत्वा पूजयेद्देवीमेवं विधानतः॥ मंत्रेणानेन ना
ष्टचत्वारिंशद्भक्तितस्तु समाचरेत्॥ प्रदक्षिणानमस्कारः॥ अथ वाणकमादाय वटकोदुंबरादिभिः॥ कइत्यादि
क मंत्रेण आचार्याय निवेदयेत्॥ पक्वान्नं फलसंयुक्तं सघृतं दक्षिणान्वितं॥ द्विजवर्याय दास्यामि व्रतसंपूर्ण
हेतवे॥ उपांगललिता देव्या व्रतसंपूर्णहेतवे॥ वाणकं द्विजवर्याय सहिरण्यं ददाम्यहं॥ इति वायनमंत्रः
ततः कथां समाकर्ण्य वाणकान्नस्य संख्यया॥ स्वयमेव तदेवान्नं वाग्यतः सह बांधवैः॥ रात्रौ जागरणं कुर्या
न्नृत्यगीतादिमंगलैः॥ प्रभाते पूजयेद्देवीं ततः कुर्याद्विसर्जनं॥ सर्वाहनाशक्तियुक्ता वरदा पूजिता मया॥ मा
तर्मामनुगृह्याथ गम्यतां निजमंदिरं॥ ॥इति पूजा॥ ॥अथ कथा॥ ॥पुरा कैलासशिखरे सुखा
सीनं हरिविक्रमा॥ आख्यातानि सुपुण्यानि श्रुतानि त्वत्प्रसादतः॥ कथारत्नं इदं नाद्य प्रस्तुता भूरिभूतय॥
नलक्षिमधिगच्छामः पायं पायं सुधामिव॥ शुश्रूषको वयं देव्याः व्रतं तत्कथयस्व नः॥ मनोभिलषितार्थाय नासि
कुमारक।पप्रछुः परमप्रीत्या मुनयो दयया नृणां॥

धिर्यस्मिन्कृतेभवेत्॥ ॥स्कंदउवाच॥ साधुपृष्टंमहादेव्यामहात्म्यंमुनिपुंगवाः॥ तस्मिन्सर्वविधानेनतच्छृणु
ध्वंजगद्धितं॥ मथुराक्षेत्रेकिलपुराविप्रोभद्रशीलमाभिधः॥ श्रुतिस्मृतिपुराणज्ञोधनीचबहुबांधवः॥ अनपत्यस्य ति
तस्याथजज्ञातेजरतःसुतौ॥ श्रीपतिर्गोपतिश्चैवनामनीविश्रुतेतयोः॥ अचिरेणैवकालेनपंचत्वमगमद्द्विजः॥ तौ ल
तुबालौधनबंधून्हित्वासाधर्मचारिणी॥ सतीविवेशदहनंस्वर्यातुपतिनासह॥ अथतद्बांधवाःसर्वेहाकष्ट
मितिचक्रुशुः॥ निंदंतोदुःखितास्तेचक्रुस्तत्क्रियांपारलौकिकीं॥ अथतस्यसपत्नोभद्रशीलस्तासजगृहेधनं॥ आक्र
शंतौचतौगेहंनिजमानीयदुर्मनाः॥ नास्तिचपैत्रंधनंसर्वंताभ्यांकिंचिन्नवेददौ॥ ततोमौंजीधरौबालौ
बंधुभिःकथितंवसु॥ ययाचतुःपितृव्यंतेदेहिनौद्रविणंहितं॥ सत्ताडचेगतंद्रव्यंयुवांकेनहतारितौ॥ नि
र्गच्छतांममगृहादित्यादिपुरुषंवचः॥ तौलब्ध्वाभिनिर्विण्णौबालौश्रीपतिगोपती॥ बभाषतुर्मिथःकष्टंधि
ग्गृहंपितृहीनतां॥ यावोदेशांतरंयत्रस्वजनोनास्तिकश्चन॥ अनाभाष्येवसुहृदोजग्मतुर्दिशमुत्तरां॥
भिक्षाचारौबहून्देशान्वनानिसरितोगिरीन्॥ समतिक्रम्ययतुर्विशालांनामतःपुरीं॥ कासार
मीशांचक्राते तत्रास्यसन्निधौशुभं॥ पुंडरीकवनाकीर्णंपरितःसंध्याविभूषितं॥ संध्याभ्रकपिशंचास्
यथातारकितंनभः॥ श्रांतौपथिगतौबालौछायांविश्रांतौतत्तटे॥ आरम्याशिशिरंतोयंसस्नतुश्चयथा
म्य

विधि॥ गताध्वखेदौ विप्राग्र्यौ पुरीं प्राविशतां ततः॥ वीथीचतुष्पथयुतां चारुगोपुरमंडितां॥ देवतागाररुचिरां सौध

जि रावीराजितां॥ नानावीथीरतिक्रम्य विप्रावासमवापतुः॥ कस्येति चिंतयंतौ विप्रस्य क्षुत्पिपासार्दितौ गृहं॥ ईयतुर्वे

दिकायां तावुपविष्टौ श्रमातुरौ॥ स्वामी ततोस्य गेहस्य विवेक इति विश्रुतः॥ आयांतौ वैश्वदेवांते स ददर्शातिथी

द्विजौ॥ अनापृच्छत्तथा शीलं तथा च कुलनामनी॥ ऋषिवत्पूजयामास स्मरन्धर्मं सनातनं॥ अतिथी भोजया

मास सदन्नं संहतात्मना॥ तौ ब्रह्मचारिणौ विप्रौ सपर्यंतिं विलोक्य च॥ देशबंधुपरित्यागखेदमुक्तौ बभूवतुः॥

अथापृच्छत्कृपालुस्तौ कौ युवां कुत आगतौ॥ किमर्थमल्पवयसौ निर्गतौ स्वगृहादिति॥ तद्विवेकस्य वचनमाक को

र्ण्य श्रीपतिस्तदा॥ अनुपूर्व्येण सकलं वृत्तांतं समभाषत॥ पितृहीनौ च तौ ज्ञात्वा त्यक्तौ बंधुजनैर्बिंच॥ आश्वा न

स्य स्थापयामास स्वगृहे बटुकौ वासरे॥ प्रचक्रमेथ शिष्येभ्यः सहाध्यापयितुं श्रुतं॥ बभूवतुश्च तौ बालौ गुरुशु

नि श्रूषणे रतौ॥ गुरोर्गेहे हि तौ वसितौ रागतानि निर्मला शरत्॥ फुल्लपद्मविशालाक्षी प्रसन्नेंदुशुभानना॥ तस्यां समी

प्यमाचार्यं चरंतं व्रतमुत्तमे॥ पप्रच्छतुर्भो किमिदं आवाभ्यामिति कथ्यतां॥ ताभ्यामेवं कृते प्रश्ने विवेक इदम

ब्रवीत्॥ विवेक उवाच॥ उपांगललितादेव्याव्रतं देवर्षिपूजितं॥ सर्वकामप्रदं नृणां अस्माभिः समुपास्यते॥ विद्याका
मेन कर्त्तव्यं तथैव धनकाम्यया॥ सुतार्थिना च कर्त्तव्यं व्रतमेतदनुत्तमं॥ विद्याकामौ च तौ बालौ व्रतमाचरतुर्मुदा॥
भक्तितो गुर्वनुज्ञातौ यथाशक्ति यथाविधि॥ तौ तत्प्रसादात्सकलं शास्त्रमेवान्ववापतुः॥ अन्यस्मिन् हायने भक्त्या
विवाहार्थं प्रचक्रतुः॥ श्रीपतिर्गोपतिश्चैव व्रतमेतत्तपोधनाः॥ अचिरेणैव कालेन मासि माघे तयोर्गुरुः॥ स्वां वि
वाहचितां कन्यां नाम्ना गुणवतीमिती॥ विनीताय श्रुतवते सूनवे श्रीपतये ददौ॥ विचार्य बांधवैः साकं ददौ पुण्यस्य
वासरे॥ पारिबर्हं बहु मुदा प्रादाद्दुहितृवत्सलः॥ विवेकोपि मुदं लेभे सानुरागो विलोक्य तौ॥ अन्याब्दे पुनरेतत्तु
व्रतं देव्याश्च चक्रतुः॥ भ्रातरौ तौ निजं देशमिच्छंतौ च धनादिकं॥ अथान्येह्नि कस्मिंश्चित्ता उपाध्यायमूचतुः॥
स्वामिन् युष्मत्प्रसादेन लब्धा विद्या तथा वसु॥ अनुजानीहि गच्छावो निजं देशमितः पुनः॥ इत्याकर्ण्य समालो
क्य शुभवासरमादृतः॥ स्वयं प्रापयितुं तातो विप्रो कन्या च निर्ययौ॥ अथ देव्याः प्रसादेन पित्रव्यस्य तयोः कि
ल॥ अद्वेषणे मतिर्जाता कुलतः श्रीपतिगोपती॥ निर्गतौ क्वागतौ देशं वसतः क्वेत्यचिंतयत्॥ किंचित्स नागर

एवं भोजनवेलायामागत्यागत्य तद्गृहं ॥ भुंजं भुंजं निजगृहं गतोसौ बहुवारं ॥ कदाचिदागतोयं वै गोपतिर्भार्यया स
ह ॥ उपविष्टेषु विप्रेषु भोक्तुं नो विदधासनं ॥ अथान्तराशेरभोज्जनाय क्षुधातुरः ॥ उपविष्टश्रीपतिस्तु भार्यया संनि
वारितः ॥ अस्मादुत्तिष्ठ वै सर्पात्वमुच्छिष्टं करिष्यसि ॥ तिष्ठति क्षणं चैव पश्चाद्दुःखेति सा अब्रवीत् ॥ गोपतेः कांतया दृष्ट
ततो विमनसावुभौ ॥ अभुक्तावेव निःक्रांतौ जग्मतुर्निर्मंदिरं ॥ ततस्तज्जायां प्रोवाच निजमार्गे विचिंतयन् ॥ भ्रात्रा
मयासमं वित्तसंविभक्तमपि प्रिये ॥ दुर्गतोहं धनोन्मत्तश्रूयतामत्र कारणं ॥ पुरावाभ्यां गुरुकुले व्रतमाचरितं
शुभं ॥ उपांगललितादेव्या विद्यास्ति सकलं ततः ॥ प्राप्तं मया तत्तस्य फलं परित्यक्तं प्रमादतः ॥ ज्येष्ठश्चाचरतो नित्यं त
तस्माच्छ्रीस्तं तु वर्त्तते ॥ तस्मादहं तदा भोक्ष्ये यदा द्रक्ष्यामि तां शिवां ॥ इत्युक्त्वा निर्गतो गेहस्तस्माद्व्रतभोजनः ॥ त ॥६१॥
ज्जायां चिंतया क्लिष्टा सापि तस्थावनश्नती ॥ भुक्तवत्सु ब्राह्मणेषु श्रीपतिः पर्यपृच्छत ॥ क्व गतो गोपतिरिति तच्छ्रु
त्वा सोपि दुःखितः ॥ गोपतिस्तु सरिद्दुर्गवनानि बहुशोभ्रमत् ॥ पृष्टश्च पथिकान्मार्गं स देव्या पदमभ्य
गात् ॥ पंचमे वासरे प्राप्ते क्षुत्पिपासार्दितो वने ॥ अलब्धदर्शनो देव्या दुःखितो निपपात ह ॥ तत्कृच्छ्रगतमालोक्य

भवानी भक्तवत्सला ॥ कृतापराधमपि तमनुजग्राह वै तदा ॥ गतमूर्छः समुत्थाय दिगंतं प्रविलोकयन् ॥ ददर्श ह
रतो गोपं चारयंतं गवां गणं ॥ तं दृष्ट्वा किंविद्दिशाध्वस्तो ययौ तस्यांतिकं शनैः ॥ अपृच्छत्त्वं भवान्यातः कुत्र त्वं कुत आगतः ॥
कोयं देशः कश्च भूपालः किंपुरं नाम तद्वद ॥ निशम्य वचनं तस्य वक्तुं गोपः प्रचक्रमे ॥ गोप उवाच ॥ उपांगो नाम नगरं उ
पांगो नाम भूपतिः ॥ तत्र त्वोयं समायातः पुनस्तत्र व्रजाम्यहं ॥ उपांगललितादेव्याः विख्यातं तत्र मंदिरं ॥ इत्याकर्ण्य
वचस्तस्य विप्रः समुदितोभवत् ॥ सक्षोपसहितः सायं विवरं प्रविवेश ह ॥ दूराद्ददर्श भुवनं पुरमध्ये तपोधनाः ॥ उ
पांगललितादेव्याः स्फाटिकं गगनंलिहं ॥ सौवर्णेन विचित्रेण कलशेनोपशोभितं ॥ यया दयाचलः शैलोद
धानो भानुमंडलं ॥ त्वरितो गोपमामंत्र्य प्रासादं स ययौ मुदा ॥ प्रणम्य दंडवद्भूमौ बद्धांजलिपुटस्तदा ॥ उपांगल
लितादेवीमथ स्तोतुं प्रचक्रमे ॥ गोपतिरुवाच ॥ नमस्तुभ्यं जगद्धात्री भक्तानां हितकारिणि ॥ जगद्भीतिवि
नाशिन्यै सर्वमंगलमूर्त्तये ॥ हत्वा निशुंभमहिषप्रभृतीन्सुरारीनिंद्रादयो निजपदेषु मयाभिषिक्ताः ॥ लो
कत्रयावनगृहीतमहावतारे मातः प्रसीद सततं कुरु मेनुकंपं ॥ यां स्तुवंति मुनिजनाः कुटिलीकृतांगी गौरी

निजेवपुषि कुंडलिनी भजंति॥ मुक्त्यैव देव मनुजाः कनकारविंदव्यासनाम विरतं कमलांस्तुवंति॥ सापराधो
स्मि शरणं प्राप्तस्त्वां जगदंबिके। इदानीमनुकंप्योहं यद्वा छेत्सि कुरुष्व तत्॥ इति स्तुत्वाथ शर्वाणीं प्रणिपत्य पुनः पुनः॥
कृतसंध्याविधिस्तत्र शेते स्मा कृतभोजनः॥ स्वप्नेमूर्तिमयी देवी विप्रमेवं समादिशत्॥ गोपतेर्वत्स तुष्टास्मि गच्छो
पागमहीपतिं॥ मत्पूजनकरंडस्य प्रार्थयस्व पिधानकं॥ तत्सज्जमन्निजगृहे परामृद्धिमवाप्स्यसि॥ स्वप्नइत्यासर्व
देशो प्रभाते गोपतिं स्तदा॥ राजदर्शनवेलायां नृपद्वारं समभ्यगात्॥ प्रविष्टो सोन्नृपसभां प्रतिहारनिवेदितः॥
स्वा राज्ञा संमानितस्तत्र निषीदासने शुभे॥ पृष्टो गमनहेतुश्च्य याचे नृपपुंगवं॥ देव्यर्चनकरंडस्य पिधानं देहि
मे नृप॥ इत्यर्थितो स विप्रेण जातोदेशो नृपोर्हदो॥ पिधानकं नमस्कृत्य तस्मै चार्पयधनादिकं॥ आशीर्भि
रभिनंद्याथ तमामंत्र्य च भूपतिं॥ उपांगललिता देव्याः प्रसादं पुनरागतः॥ प्रणिपत्यांबिकां विप्रस्तरितो नि
र्ययो पुरात्॥ पूजयित्वा पिधानं तद्विदधे पारणं ततः॥ एवमाराध्यमानस्तु ससम्बद्धो भवत्पुनः॥ सोपि तत्र स
मारभे द्विजाग्र्यो बहुवासरं॥ अथ तस्याभवत्कन्या ललितानाम सुंदरी॥ सा पिधानकमादाय विहर्तुं याति
सर्वदा॥ ससर्प हस्ते तत्र स्थितो देव्याः प्रसादतः॥ सापि कांतं द्विजं दृष्ट्वा मनसा चिंतयत्यपि तां॥ कुहावाप्य ८८

प्राप द्विजो बालो गवेषयन्॥ तदेव नगरं प्राप्तो विवेकाख्यो द्विजोत्तमः॥ सशिष्यः कन्यया सार्धं क्रमन्मार्गं शनैः शनैः॥ तत्र ते
षां समजनि संगमो मुनिपुंगवाः॥ विदांचकार तो कृत्स्नान् मध्यमेवयसि स्थितो॥ तोम्र्द्धाय परमां मुदं लेभे परां ततः॥
नत्वा कुमारान्मुदं च कृत्प्रेम गद्गदया गिरा॥ पद्मा न तां गुणवतीं विवेकेन प्रणोदितां॥ आशीर्वादै बहुविधैस्तांस्तु बांसमये
ज्यत्॥ विवेकस्तु तदा तत्र संविभाष्य परस्परं॥ सुतावेनो मयाविप्र पालितो पवितो तव॥ प्रापयितुं प्रयातोस्मि भव
तां याममुत्तमं॥ इति संभाष्यमाणास्ते कुरुक्षेत्रं ययुस्तदा॥ ज्ञातिभिः सह संगम्य श्रण्वद्भिस्तद्वचेष्टितं॥ सोपि
तद्व्यगृहे कांश्चिदुषित्वा दिवसांस्तथा॥ लब्ध्वापि तद्धनं गेहं सर्वं श्रीपतिगोपती॥ ईयतुस्तद्द्ग्नुज्ञातो विवेकः
स्वपुरीं ययौ॥ श्रीपतिर्गोपतेरत्र विवाहमकरोत्तदा॥ तावेकत्वेन सोत्कंठौ चक्रतुर्द्विजतर्पणं॥ श्रीपतिः श्रथायायु
केः कनीयान्व्यपद्मांकितः॥ विचार्य भार्यया साकं विभक्तः श्रीपतेस्तदा॥ सभोगान्विविधान् भुंजन्नमतो बहुस
पदा॥ न देव्याराधनं चक्रे गोपतिः सुखलंपटः॥ अथ स्वल्पेन कालेन नष्टं तस्य शनैर्धनं॥ अकिंचनो गतोभ्म
श्रितां भार्यायावासितस्तदा॥ तव भ्रातृगृहे विप्रा भुंजते बहवस्सदा॥ गच्छ वोनुदिनं कांत तत्र भोक्तुमभावपि॥

एवंभोजनवेलायामागत्वागत्य तद्गृहं॥ भुंजं भुंजं निजगृहं गतोतौ बहुवारं॥ कदाचिदागतोयं वञ्चापतिर्भार्ययास
ह॥ उपविष्टेषु विप्रेषु भोक्तुं नो विंददासनं॥ अथान्तराशेरभोजनाय क्षुधातुरः॥ उपविष्टः श्रीपतिस्तु भार्यया संनि
वारितः॥ अस्मादुत्तिष्ठ दैवर्षे त्वमुच्छिष्टं करिष्यसि॥ तिष्ठ तिक्षणं चैव पश्चाद्भुंक्ष्वेति सा ब्रवीत्॥ गोपतेः कोलयाहृष्टं
ततो विमनसावुभौ॥ अभुक्त्वैव विनिःक्रांतौ तौ जग्मतुर्निर्मंदिरं॥ ततस्तज्जाया प्रोवाच निज मार्गं विचिंतयन्॥ भ्रात्रा
मयासमं वित्तस्य विभक्तमपि प्रिये॥ दुर्गतोहं धनोन्मत्तः श्रूयतामत्र कारणं॥ पुरावाभ्यां गुरुकुले व्रतमाचरितं
शुभं॥ उपांगललितादेव्या विद्या दृष्टिसकलं ततः॥ प्राप्तं मयात्तत्फलं परित्यक्तं प्रमादतः॥ ज्येष्ठ आचरतो नित्यं त
तस्माद्भीस्तं तु वर्तते॥ तस्मादहं तदा भोक्ष्ये यदा द्रक्ष्यामि तां शिवां॥ इत्युक्त्वा निर्गतो गेहस्तस्माद्दुःखभोजनः॥ त ॥६९॥
ज्जायां चिंतयाविष्टा सापि तस्थावनश्नती॥ भुक्तवत्सु ब्राह्मणेषु श्रीपतिः पर्यपृच्छत॥ क्वगतो गोपतिरिति तच्छ्रु
त्वा सोपि दुःखितः॥ गोपतिस्तु सरिद्दुर्गवनानि बहुशो भ्रमन्॥ षष्ठे स्व पथि क्लांतः मार्गसदेव्यापदमभ्य
गात्॥ पंचमे वासरे प्राप्ते क्षुत्पिपासार्दितो वने॥ अलब्धदर्शनो देव्या दुःखितो निपपात ह॥ तत्क्षणं गतमालोक्य

भवानी भक्तवत्सला॥ कृतापराधमपि तं मनुजग्राहवेतदा॥ गतमूर्छः समुत्थाय दिगंतं प्रविलोकयन्॥ ददर्शाह
रतो गोपं चारयंतं गवांगणं॥ तं दृष्ट्वा किं विद्याघ्रस्तो ययौ तस्यांतिकं शनैः॥ अपृच्छत्स भवान्यातः कुतस्त्यः कुत आगतः॥
कोयं देशः कश्च भूपालः किं पुरं नाम तद्वद॥ निशम्येव वचनं तस्य वक्तुं गोपः प्रचक्रमे॥ गोपउवाच॥ उपांगो नाम नगरं उ
पांगो नाम भूपतिः॥ तत्र त्वोयं समायातः पुनस्तत्र व्रजाम्यहं॥ उपांगललितादेव्याः विश्रुतं तत्र मंदिरं॥ इत्याकर्ण्य
वचस्तस्य विप्रः समुदितो भवत्॥ सखोपसहितः सायं विवरं प्रविवेश ह॥ दूराद्ददर्श भुवनं पुरमध्ये तपोधनाः॥ उ
पांगललितादेव्याः स्फाटिकं गगनंलिहं॥ सौवर्णेन विचित्रेण कलशेनोपशोभितं॥ ययोदयाचलः शैलोदं
धानो भानुमंडलं॥ त्वरितो गोपमामंत्र्य प्रासादं स ययौ मुदा॥ प्रणम्य दंडवद्भूमौ बद्धांजलिपुटस्तदा॥ उपांगल
लितादेवीमथ स्तोतुं प्रचक्रमे॥ गोपतिरुवाच॥ नमस्तुभ्यं जगद्धात्री भक्तानां हितकारिणि॥ जगद्भीतिवि
नाशिन्यै सर्वमंगलमूर्तये॥ हत्वा निशुंभ महिषप्रभृतीन्सुरारी निद्रास्य निजपदेषु मयाभिषिक्ताः॥ लो
कत्रयावनगृहीतमहावतारे मातः प्रसीद सततं कुरु मेनुकंपां॥ यां स्तुवंति मुनिजनाः कुटिलीकृतांगी गौरी

वहारायजनकस्यनिवेशने॥मार्गेचपरिपप्रच्छकुलंशीलंचतस्यसा॥सोपिसर्वंसमाचख्यौगुणराशीतिनामच॥
ललितामंत्रयामासगुणराशिमितिद्विजं॥परिविष्टेषुचान्नेषुपित्र्येश्मनिमेद्विज॥गृहीत्वापोशनेभूत्वाभार्यार्थं
व३ मांत्वमर्थय॥मयानुमोदितस्त्वातःमांतुभ्यंददास्यति॥तयोक्तोगुणराशिस्तुतथासर्वंचकारह॥गोपतिर्भार्यया
भ्रातासमालोक्यस्वबांधवैः॥परिक्षितायविप्रायविद्यायांकुलशीलयोः॥प्रतिजज्ञेततःकन्यांललितांगुणशा
लिने॥शुभेमुहूर्तेचतिथौविवाहंकृतवान्स्वसुः॥वरायब्राह्मणेभ्यश्चददौबहुधनंतदा॥विदधेचतयोर्गेहं
नातिदूरंस्ववेश्मनः॥तत्रोषतुःसानुरागौमिथस्तौदंपतीचिरं॥पिधानकंतयानीतंनिजंललितयागृहं॥शनै
रथधनंसर्वंगोपतेरगमद्गृहं॥गुणराशिर्धनीजातोमहादेव्याःप्रसादतः॥करंडस्यपिधानंतज्जनन्याबहुवा
सरं॥याचितापिनवैप्रादाल्ललितापूजनंगृहे॥अथसागोपतेर्जायातस्यैवानर्चनाकृतं॥इत्थंविचिंत्यचाय
तुजामारतमघातयत्॥समिद्दर्थंवनंयांतंस्वयंतद्गृहमायये॥शोचंतीकलितांकन्यांस्तुदेव्याःप्रसादतः
उत्थायविपिनादेत्यभुक्त्वाशेतेसुखंगृहे॥पादसंवाहनंतस्यकुरुतेललितानघ॥तंदृष्ट्वालिदुःखिताभू
मौप्रणिपत्यपुनःपुनः॥लज्जिताक्लिष्टतःपृष्टोनिजमाहस्वपातकं॥गुणराशिरदात्तस्याप्रायश्चित्तंतदाब

ऊ॥ सात्मानं बहुकालेन धृतंकष्टैश्च कारच॥ श्रीपते स्त्वबलांलक्ष्मीं समालोक्य तपोधनाः॥ गोपतिस्तमथापृच्छन्
तस्त्वं वर्तसे कथं॥ किमाचरसि कल्याणं येन श्रीरनपायिनी॥ इति तस्य वचः श्रुत्वा श्रीपतिर्विस्मितस्तु पुनः॥ अस्मा
भिस्तु व्रतं देव्यायत्कृतं तगुरुमंदिरे॥ सोपि मत्स्यापुनश्चक्रे व्रतं यात्रोपदेशितं॥ लभेसपरमामृद्धिं पुत्रांश्च सु
दितोभवेत्॥ उपांगललितादेव्या प्रसादेना भवत्सुखी॥ एवमेतत्पुरावृत्तं माहात्म्यं कथितं मया॥ कृतमन्यैश्च बहु
भिस्तोपलब्धमनोरथाः॥ विधानं तस्य वक्ष्यामितच्छृणुध्वं तपोधनाः॥ शुक्लपक्षे तु पंचम्यां मीषे मासि चरेद्व्रतं॥
गर्जितं संध्ययोस्त्याज्यं दिनवृधिक्षयेतथा॥ निर्वर्त्यावस्यकं कर्म सुचीरागविवर्जितः॥ चत्वारिंशत्तथाष्टौ च क
ल्पिता निविधानतः॥ दंतकाष्टान्युपादाय तउगंवा नदीं व्रजेत्॥ आयुर्बलं यशो वर्चः प्रजापशुधनानि च॥
सयंच ब्रह्मप्रज्ञां च त्वन्नो देहि वनस्पते॥ दंतधावनिपूर्वाणि मज्जनानि समाचरेत्॥ ततो यथाविधिस्नात्वा शुक्ल
वासा गृहं व्रजेत्॥ उपचारैः षोडशभिः रभिर्मंत्रैः समाहितः॥ कुर्यात्पूजां प्रयत्नेन दुर्वाभिश्च विशेषतः॥ उ
चोद्देशे मंडपं चकृत्वा नीचमनोहरं॥ सौवर्णी प्रतिमां ज्ञात्वा कल्पयेन्मंत्रपूर्वकं॥ द्विजायवाणकं दद्याद्विं
शत्योवटकादिभिः॥ ततः कथां समाकर्ण्य वाणकान्नस्य संरभया॥ मातर्मामनुगृह्याथ गम्यतां निजमंदिरं॥

तामर्चगुरवेदद्यानिशिवास्याद्विसर्जनं॥ व्रतमेवंचयःकुर्यात्पुत्रवान्धनवान्भवेत्॥ विद्यावान्रोगनिर्मुक्तःसुखीगोमा व्रतो
श्वजायते॥ अवैधव्यंचलभतेस्त्रीकन्यावरमुत्तमं॥ विजयंपुष्टिमायुष्यंयच्चान्यदपिवांछितं॥ इत्येतद्व्रतमाख्या
तंसेतिहासंमहर्षयः॥ शृण्वन्नथिनरोभक्त्यासुखमाप्नोतिनिश्चितं॥ ॥इतिश्रीस्कांदेउपांगललिताव्रतंसंपूर्णं॥
इतिश्रीनीलकंठात्मजभट्टशंकरकृतौव्रतार्के पंचमीव्रतानि॥ ॥अथषष्ठीव्रतानि॥ तत्रभाद्रशुक्लषष्ठी
व्रतोहेमाद्रौभविष्ये॥ कृष्णउवाच॥ भाद्रेभाद्रपदेमासिशुक्लेषष्ठ्यांसुसंयुता॥ नारीस्नात्वाप्रभातेतुशुक्लमा
ल्यांबरप्रिया॥ सुवस्त्राभरणोपेताभूत्वासंगृह्यवालुकां॥ आनीयवंशपात्रेतुपंचपिंडाकृतिंशुभां॥ ध्यात्वातुल
लितांदेवींतपोवननिवासिनीं॥ पंकजंकरवीरंचनेपालीमालतीतथा॥ गृहीत्वापूजयेदितिशेषः॥ नीलोत्पलंके
तकींचसंगृह्यतगरंतथा॥ एकैकाष्टशतंग्राह्यमष्टविंशतिरेवच॥ अक्षताकलिकाग्राह्यताभिर्देवीसमर्चयेत्॥
प्रार्थयेद्यतोभूत्वादेवींतांगिरिशप्रियं॥ गंगाद्वारेकुशावर्तेबिल्वकेनीलपर्वते॥ स्नात्वाकनखलेतीर्थे
हरिंलब्धवतीपतिं॥ ललितेललितेदेवीसौख्यसौभाग्यदायिनी॥ अनंतंदेहिसौभाग्यंभगवत्यवरंपरं॥मं

७० त्रेणानेनकुसुमैश्चंपकस्यसुशोभनैः॥एवमभ्यर्च्यविधिनानैवेद्यंपुरतोन्यसेत्॥त्रपुसैरपिकूष्मांडनारिकेरैःसु
दाडिमैः॥बीजपूरैःस्तुंडीरैःकरवेल्लैःसचिर्भटैः॥फलैस्तत्कालसंभूतैःकृत्वाशोभांतदग्रतः॥विरूढैर्धान्यसंभूतैर्दी
पालिभिःसमंततः॥सार्धसगकैर्धूपैःसोहालककरंजकैः॥गुडपुष्पैःकर्णवेष्टैःमोदकैरूपमोदकैः॥बहुप्रकारैर्नै
वेद्यैर्यथाविभवसारतः॥एवमभ्यर्च्यविधिवद्रात्रौजागरणोत्सवैः॥गीतवाद्यैर्नटैर्नृत्यैःप्रेक्षणीयैरनेकधा॥स
खिभिःसहितासाध्वीतांरात्रिंप्रशमंनयेत्॥नचसंमीलयन्त्येवंनारीयामचतुष्टयं॥दुर्भगादुर्गतावंध्यानेत्रसंमी
लनाद्भवेत्॥एवंजागरणंकृत्वासप्तम्यांसरितंनयेत्॥गंधपुष्पैस्तथाभ्यर्च्यगीतवाद्यपुरःसरं॥तद्वत्तद्याद्वि
जेंद्रायनैवेद्यादिनरोत्तम॥स्नात्वागृहंसमागत्यहित्वावैश्वानरंक्रमात्॥देवान्पितॄंश्चतुष्यांश्चपूजयित्वा
सुवासिनीः॥कन्यकाश्चैवसंभोज्याब्राह्मण्योदशपंचच॥भक्ष्यभोज्यैर्बहुविधैर्दत्वादानानिभूरिशः॥ल
लितेमेस्तुसुप्रीताइत्युक्त्वातुविसर्जयेत्॥यःकश्चिदाचरेदेतद्व्रतंसौभाग्यवेपरं॥ललिताषष्ठिसंज्ञं
चसर्वपापनिबर्हणं॥नरोवायदिवानारीतस्यपुण्यफलंशृणु॥यत्तल्लभ्यंव्रतैश्चान्यैर्दानैर्वानृपसत्तम॥

तयोभिनियमैर्वापितद्व्रतेनहिलभ्यते॥ इहचैवातुलासंपत्सौभाग्यमनुभूयते॥ कृत्वाभूर्द्धिपदं पार्थसपत्नीनां
यशस्विनी॥ मृताशिवपुरंप्राप्यदेवैरसुरपन्नगैः॥ प्राप्नोतिदर्शनंदेव्यातयातुसहमोदते॥ पुण्यक्षेत्राद्दिहागत्य
पुण्यसौख्यैकभाजनं॥ शास्त्रात्रेतायुगेनारीसीतेवप्रियवल्लभा॥ यइदंशृणुयात्पार्थपठेद्वासाधुसंदि॥ सोपिपा
विनिर्मुक्तश्शक्रलोकेमहीयते॥ षष्ठ्यांजलांतरमतांवरवंशपात्रेसंगृह्यपूजयितयास्तिकत्ताक्रमेण॥ नक्तंच
जागरमनुष्यनेवशीलाकुर्यादसौत्रिभुवनेललितेवभाति॥ ॥इतिहेमाद्रौललिताषष्ठीइदंचगुर्जरेह
लादिर्भाद्रपदासितषष्ठ्यामनुष्ठीयते॥ अथशुक्लादिभाद्रपदकृष्णषष्ठ्यांकपिलाषष्ठीव्रतं॥ तच्चयोग
विशेषणपूर्वयुतायांपरयुतावाकार्यं॥ तेचयोगाःपुराणसमुच्चयेदर्शिताः॥ भाद्रमास्यसितेपक्षेभानौचैवकरेस्थि
ते॥ पातेकुजेचरोहिण्यांसाषष्ठीकपिलास्मृता॥ संयोगेतुचतुर्णांचनिर्दिष्टापरमेष्ठिनेति॥ वराहपुराणेपि
नभस्येकृष्णपक्षेतुरोहिणीपातभूसुतैः॥ युक्ताषष्ठीपुराणज्ञैःकपिलापरिकीर्तिता॥ व्रतोपवासनियमैर्भा
स्करंतत्रपूजयेत्॥ कपिलांचद्विजाग्र्यायदत्वाक्रतुफलंलभेत्॥ यत्तुकालादर्शेतत्रैवशुक्लायाषष्ठ्यी
रोहिणीपातभूसुतैःसाकपिलाषष्ठीव्रतेस्तत्रार्चयेद्रविमितिरवकारिकालिरिवत्वात्तत्रैवभाद्रपदेमासेरो

हिणीव्यातभौमवारयुताभाद्रपदषष्ठीकपिलाषष्ठीसंज्ञा इतिव्याख्यातं यत्तत्र प्रमाणां वाराहनभस्ये शु
क्लपक्षे तिलिखितं तत्सर्वं ग्रामादिक्रमेण भाद्र शुक्लषष्ठीरोहिणीव्यतिपातयोः सर्वथा बाधात्॥ अथ
कथा॥ हेमाद्रौ स्कांदे॥ विक्रांत उवाच॥ रूपसंपदमारोग्यं संततिं वापि पुष्कलां॥ प्राप्नुवंति नरा येन
नियतं तद्वदस्व मे॥ अगस्त्य उवाच॥ साधु साधु महाप्राज्ञ यत्पृष्टोहं त्वयानघ॥ [illegible] कथयिष्यामि तव
श्रेयो भविष्यति॥ शृणु पार्थिव वक्ष्यामि स्वर्गमोक्षप्रदं नृणां॥ यच्च गुह्यं पुरा राजन् ब्रह्मरुद्रेंद्रदेवतैः॥ अ
सुराणां च सर्वेषां राक्षसानां तथैव च॥ शंकरेण पुरा चैव षण्मुखाय निवेदितं॥ षण्मुखेन ममा
ख्यातं महापातकनाशनं॥ यच्छ्रुत्वा ब्रह्महा गोघ्नो हा सुरापो गुरुतल्पगः॥ अगारदाही गरदः सर्वपापरतोपि
वा॥ मुच्यते सर्वपापेभ्यः सर्वलोकं च गच्छति॥ पुण्यं पवित्रं च नृणां पापमद्भुतनाशनं॥ उपकाराय लोका
नां तथा तव नृपोत्तम॥ शृणु भूप महापुण्यं षष्ठीमाहात्म्यमुत्तमं॥ प्रोष्ठपद्यसिते पक्षे षष्ठी भौमेन संयुता॥
व्यतीपातेन रोहिण्या सा षष्ठी कपिला स्मृता॥ प्रोष्ठपदाः भाद्रपदाः स चात्र दर्शांतो ग्राह्यः रोहिणीयोग
स्य तत्रैव संभवात्॥ द्वितीया तु महापुण्या दुर्लभा व्रतिनां क्वचित्॥ षष्ठी संवत्सरे स्यात्ते सा युता तेन संयु
ता॥ चैत्रवैशाखयोर्मध्ये सिते पक्षे शुभोदये॥ वैशाखेपि च राजेंद्र द्वारवत्यां परा स्मृता॥ तस्यां चैव कु

वेश्वरोहरिः॥ गोमयेनोपलिप्तायां भूम्यां वै कुंकुमेन तु॥ मंडलं सर्वतोभद्रमालिखेद्बुद्धिमान्नरः॥ तत्र मध्ये लि
खेत्पद्ममष्टपत्रं सकर्णिकं॥ पूर्वपत्रे न्यसेत्सूर्यमाग्नेये भास्करं न्यसेत्॥ सुवर्णरेतसं याम्ये नैरृते तं न्य
सेद्रविं॥ आदित्यं वारुणे पत्रे वायव्ये च दिवाकरं॥ सौम्ये प्रभाकरं तत्र सूर्यमीशानपत्रके॥ तीव्ररश्मिधरं देवं ब्र
ह्माणं वै विन्यसेत्॥ आधाररूपिणं देवमध्ये वै वारुणं न्यसेत्॥ सहस्ररश्मिं सूर्यं च सूक्ष्मस्थूलगुणान्वि
तं॥ सर्वगं सर्वरूपं च मध्ये भास्करमेव च॥ सप्ताश्वरथमारूढं पद्महस्तं दिवाकरं॥ अक्षसूत्रधनुःपाणिं कुं
डलैर्मुकुटेन च॥ रत्नैर्नानाविधैर्युक्तं सुवर्णं तत्र कारयेत्॥ शक्तितस्तत्पलादूर्ध्वं तदर्धं कर्षतोपि वा॥ सौव
र्णमरुणं कुर्यात्तेनोक्तं वैव तथापरं॥ सप्ताश्वैर्भूषितं कृत्वा रथं तस्याग्रतः स्थितं॥ अरुणं विनितापुत्रं गृही ॥८२॥
ताश्वमसूरकं॥ एवंरूपं रथं कृत्वा पद्मस्योपरि विन्यसेत्॥ तस्योपरि न्यसेद्देवं रक्तवस्त्रविभूषणं॥ रक्तचंद
नमाल्यादि मंडितं चाति शोभितं अग्रतः सारथिं कृत्वा पूजयेदरुणं शुचिः॥ रक्तपुष्पैः सुगंधैश्च तथान्यै
रपि शक्तितः॥ विनितातनयो देव कर्मसाक्षी तमोनुद॥ सप्ताश्वः सप्तरज्जुश्च अरुणो मे प्रसीदतु॥ मंत्रेणा
नेन संपूज्य सारथिं तदनंतरं॥ देवस्य संज्ञानं कल्प्य प्रभूतादिकपंचकं॥ प्रभूनमविलं सारं आराध्यं पर

मं शुभं॥ दीप्तादिशक्तिभिश्चैव ततो भानुं प्रपूजयेत्॥ दीप्ता सूक्ष्मा तथा भद्रा जयंती विमला नघा॥ प्रमोघा वि
द्युता चेति नवया सर्वतोमुखी॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा॥ यः स्मरेद्भास्करं देवं स बाह्याभ्यंतरः
शुचिः॥ शिखायां भास्करं न्यस्य ललाटे सूर्यमेव च॥ चक्षुर्मध्ये न्यसेद्भानुं मुखे तत्र रविं न्यसेत्॥ कंठे न्य
सेद्भानुमंतं पद्मगर्भं द्विहस्तयोः॥ तिमिरक्षयकृद्देवं स्तनयो रविं विन्यसेत्॥ जातवेदाभिधं नाभ्यां कट्यां
भानुं तथा न्यसेत्॥ उग्ररूपं गुह्यदेशे तेजोरूपं द्विजंघयोः॥ पादयोः सर्वरूपं तु सूक्ष्मस्थूलगुणान्वितं॥
एवं यथोक्तं विन्यस्य पात्रं गृह्य ततोर्चयेत्॥ करवीरार्ककुसुमै रक्तचंदनचंपकैः॥ पुष्पैः सुगंधैर्धूपैश्च
कुंकुमैरुपशोभितं॥ मार्तंडभानुमादित्यं भास्करं तपनं रविं॥ जानुभ्यामवनीं गत्वा सूर्यायार्घ्यं निवेदये
त्॥ वेदगर्भ नमस्तुभ्यं वेदगर्भ नमोस्तु ते॥ अव्यक्तमूर्तये तुभ्यमर्घ्यं गृह्य नमोस्तु ते॥ ब्रह्ममूर्तिधरा
य च चतुर्वक्त्र सनातन॥ सृष्टिस्थितौ संस्थिताय गृहाणार्घ्यं नमोस्तु ते॥ विष्णुरूपधरो देव पीतवस्त्रश्चतु
र्भुजः॥ प्रभवः सर्वलोकानां मर्घ्यं गृह्य नमोस्तु ते॥ कालात्मा सर्वभूतात्मा देवात्मा सर्वतोमुखः॥ जन्मम

त्वज्जराशोकसंसारभयनाशनः॥ दारिद्र्यव्यसनध्वंसी श्रीमान्देवो दिवाकरः॥ सर्वणस्फाटिका भानुस्वर्णरेता
दिवाकरः॥ हरिदश्वांशुमालीच अर्घ्यं गृह्ण नमोस्तुते॥ चतुर्भिर्मूर्तिभिः संस्था मष्टाभिः परिगीयते॥ सामध्व
निस्तपोयज्ञे अर्घ्यं गृह्ण नमोस्तुते॥ अथ गंधंच पुष्पंच तथा धूपप्रदीपकं॥ नैवेद्यंच यथाशक्त्या प्रार्थयेत्स
र्यदेवतां॥ अग्निमीलेनमस्तुभ्यं नमस्ते जातवेदसे॥ इषेत्वेव नमस्तुभ्यं मग्नेवैव नमो नमः॥ आत्मरूप नमस्तु
भ्यं विश्वमूर्ते नमोनमः॥ त्वंब्रह्मा त्वं च वै विष्णुस्त्वं धाता त्वं हुताशनः॥ मुक्तिकामा अभीप्स्यामि प्रार्थया
मि सुरेश्वर॥ इति मंत्रं समुच्चार्य नमस्कुर्वीत भास्करं॥ संवर्चसेति पाणिभ्यां तोयेन विसृजेत्सुरं॥ हं
सः शुचिषदित्यृचा सूर्यस्यैवावलोकनं॥ उदुत्यं चित्रमित्येतत्सूक्तं देवाग्रतो जपेत्॥ प्रथमं स्वेच्छया
फलकं चैव कारयेत्॥ फलैः पुष्पैरक्षताभिर्भक्ष्यैर्नानाविधैरपि॥ शायांतत्र च देवस्य शुभं देशं प्रक
ल्पयेत्॥ षड्धान्यं षड्रसं देवरौप्यं चैव महाप्रभुं॥ पुरुषं खड्गहस्तं च कारयेद्वै बुद्धिमान्॥ वस्त्रयु
ग्मेन संछन्नं लवणोपरि विन्यसेत्॥ अनेनैव तु मंत्रेण स्नानमर्घ्यं विमंततः॥ नमस्तेक्रोधरूपाय खड्ग
हस्त जिघांसवे॥ जिघांसका मंता दृष्ट्वा दृष्टुवुः सर्वदेवताः॥ त्वया व्याप्तं मेरुपृष्ठं चंड भास्कर सुप्रभा॥ ७३

दत्तं यत्किंचित्प्रतिपादितं॥ तस्य सर्वस्य पुण्यस्य संख्या वक्तुं न शक्यते॥ यस्मिन्काले भवेद्देवो गुणैः षष्ठीयुता तदा॥
पंचम्यामेकभक्तं च कुर्यात्तत्र विचक्षणः॥ षष्ठ्यां प्रातः समुत्थाय कृत्वा वै दंतधावनं॥ जलपूर्णांजलिं कृत्वा
इमं मंत्रमुदीरयेत्॥ निराहारे ह्य देवेश त्वद्भक्तस्त्वत्परायणः॥ पूजयिष्याम्यहं भक्त्या शरणं त्वं च भास्कर॥ अ
र्घ्यं दत्वेति संकल्पं कृत्वा यत्नात् शुचिस्मितः॥ स्नानं कृत्वा प्रयत्नेन नद्यां तीर्थे हदे वेहदे॥ तडागे दीर्घिकां
यां वा गृहे वानियतात्मवान्॥ देवदारु तथोसीरकुंकुमं नामनः शिलं॥ पद्मकं पत्रकं यष्टिमधुगव्येन
पेषयेत्॥ क्षीरेणालोड्य कल्केन स्नानं कुर्यात्समंत्रकं॥ आपस्त्वमसि देवेश ज्योतिषां पतिरेव च॥ पापं
नाशाय मे देव मनोवाक्कायकर्मजं॥ पंचगव्यकृतस्नानं पंचभंगैस्तु मार्जयेत्॥ पंचभंगैः पंचपल्लवैः॥ आ
नयेन्मृत्तिकां शुद्धिं स्नानार्थं वै प्रयत्नतः॥ मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिमंत्रिता॥ पवित्रं कुरु मां नित्यं
सर्वपापत्समुद्धर॥ मंत्रेणानेन वरुणं पूजयेद्भक्तिमान्नरः॥ पाशाग्रहस्त वरुण सर्ववारीश्वरं रिजस्ता॥ अद्या
हं प्रथयामि त्वां व्रतं कुरु सुरेश्वर॥ आदित्यो भास्करो भानू रविः सूर्यो दिवाकरः॥ प्रभाकरो मितो वीरोदयस

अतस्त्वां पूजयिष्यामि अर्घ्यं गृह्ण नमोस्तु ते ॥ क्षपयित्वा तु तां रात्रिं गीतवादित्रनिस्वनैः ॥ ततस्त्वभ्युदिते सूर्ये
होमं कुर्यात्स्वशक्तितः ॥ पूजयेत्तत्र शक्त्या च देवांश्च विधिवत्कुरु ॥ होमार्कस्य समिद्भिश्च घृतमिश्रैस्तिलैस्तथा
संसिद्धिं च चरुद्रव्यं घृतं च जुहुयाद्द्विजः ॥ आकृष्णेनेति मंत्रेण शतमष्टोत्तरं क्रमात् ॥ होमो व्याहृतिभिर्वाथ
स्विष्टकृत्तदनंतरं ॥ कपिलां पूजयेद्देवीं सवत्सां पापनाशिनीं ॥ वस्त्रयुग्मां सघंटां च स्वर्णशृंगविभूषितां ॥ स्व
र्णशृंगी रोप्यखुरां कानितां ॥ मंत्रेणानेन तां दद्याद्ब्राह्मणायेति शक्तितः ॥ कपिले सर्वदेवानां पूजनी
यासि रोहिणी ॥ सर्वतीर्थमयी यस्माद्दत्तः शांतिं प्रयच्छ मे ॥ आचार्यस्य ततो भक्त्या सर्वपापौघविनिक्षिपे
त् ॥ गोभूहिरण्यवासांसि स्त्री हयो लवणं तिलाः ॥ एतत्सर्वं प्रदत्वा च कपिला प्रार्थयेत्ततः ॥ कपिले पुण्य
कर्मासि निष्पापे पुण्यकर्मणि ॥ मां समुद्धर दीनं च ददतो ह्यक्षयं कुरु ॥ दिव्यवादित्रशब्दैश्च सेव्यसे कपि
ला सदा ॥ तथा विद्याधरः सिद्धा भूतनागगणा ग्रहाः ॥ कपिलारोमसंख्याता स्तत्र देवा प्रतिष्ठिताः ॥ पु
ष्पवृष्टिं प्रमुंचंति नित्यमाकाशमास्थिताः ॥ ब्रह्मपोत्थादिता देवी अग्निकुंडात्सुसुप्रभा ॥ नमस्ते क

पिष्ठोपुण्येसर्वदेवनमस्कृते ॥ जयंनित्यंमहीसत्वेसर्ववत्तीर्थादिमंगले ॥ दातारंस्वजलोपेतंब्रह्मलोकंनयाम्युवै
ततःप्रदक्षिणांकृत्वानत्वाब्राह्मणपुंगवान् ॥ अशीर्वादान्वदेयुस्तेपुत्रपौत्रधनागमात् ॥ आरोग्यंरूपसौभा
ग्यंसर्वदुःखविवर्जितः ॥ अंतेगोलोकमासाद्यचिरायुःसुखभाग्भवेत् ॥ यदास्वर्गात्प्रपततिराजाभवतिराजा
भवतिधार्मिकाः ॥ सप्तद्वीपावतींभुंक्तेपुत्काराज्यमकंटकं ॥ अहोव्रतमिदंपुण्यंसर्वदुःखप्रणाशनं ॥ अतःपरं
प्रवक्ष्यामिदानस्यफलमुत्तमं ॥ तदादेयमयेप्राप्तेसद्वृत्तेवाक्षयंभवेत् ॥ व्रतंसर्वव्रतंश्रेष्ठमिदमन्यंमहाफलं ॥
उध्धरिष्पतिदातारंनरनमस्यमक्ष्ययं ॥ एवंदेवगणाःसर्वेभ्रतसंघातहर्षिताः ॥ आकाशस्थाःप्रब्रजंतिपुण्ये
स्मिन्दिवसागमे ॥ पात्रभूतायऋषयेश्रोत्रियायकुटुंबिने ॥ एवंयःकपिलादद्याद्विधिदृष्टेनकर्मणा ॥
सयातिपरंस्थानंयावन्नच्यवतेपुनः ॥ स्कांदेप्रभासखंडेविशेषतः ॥ उपलिप्तेशुभेदेशेपुण्याक्षतविभू
षिते ॥ स्थापयेद्व्रणंकुंभंचंदनोदकपूरितं ॥ पंचरत्नसमायुक्तंदूर्वापुष्पाक्षतान्वितं ॥ रक्तवस्त्रयुग
छन्नंतंताम्रपात्रेणसंयुतं ॥ स्थौरोकत्रफलस्यैवचतुष्कःसुविचित्रितः ॥ सौवर्णफलसंयुक्तांमुर्त्तिंसूर्य
स्यकारयेत् ॥ कुंभस्योपरिसंस्थाप्यगंधपुष्पैस्तथार्चयेत् ॥ आदित्यंपूजयेद्देवंनामभिःस्वैर्यथोदितैः ॥ आ

तां देवसेनानि संपरायत्तु हृतं ॥ दत्वा विप्राय चामान्नं यच्चान्यदपि वर्तते ॥ पश्चाद्भुंक्ते तु सौरात्र्यां भूमिष्ठ
त्वानुभोजनं ॥ एवं षष्ठीव्रतस्तस्य उक्तं स्कंदेन यत्फलं ॥ तन्निबोध महाराज प्रोच्यमानं मयाखिलं ॥ षष्ठ्यां
फलाशनो यस्तु ॥ नक्ताहारो भविष्यति ॥ शुक्लायमथ कृष्णाया ब्रह्मचारी समाहितः ॥ तस्य सिद्धिर्धृतिः
पुष्टि राज्यमायुरनामयं ॥ पारत्रिकं चैहिकं च दद्यात्तु स्कंदो न संशयः ॥ अशक्तो नोपवासस्य सनक्तो
न व्रती भवेत्तु ॥ तैलं षष्ठ्यां न भुंजीत नंदीकुरु त नंदन ॥ यस्तु षष्ठ्यां नरो नक्तं कुर्यान्नरत्नसत्तम ॥
इह चागत्य कालांते यथोक्तफलभाग्भवेत् ॥ देवानामपि वंद्योसौ राजराजो भविष्यति ॥ ॥ इति श्री
स्कंदषष्ठीव्रतं ॥ ॥ इति श्रीनीलकंठात्मज भट्टशंकरकृतो व्रतार्कषष्ठीव्रतानि ॥ अथ सप्तमीव्र
तानि ॥ तत्र वैशाखशुक्लसप्तम्यां गंगोत्पत्तिस्तत्पूजा चोक्ता पृथ्वीचंद्रोदये ब्राह्मे ॥ वैशाखशुक्लसप्त
म्यां जह्नुना जाह्नवी स्वयं ॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् ॥ तां तत्र पूजयेद्देवीं गं
गां गगनमेखलामिति हरिवंशे पुण्यकव्रतांते अच्छे प्रातः स्नात मभिधाय गंगायव्रतकं तथैवामय
शास्करि ॥ स्नानमभ्यधिकं कार्यं प्रत्यक्षषस्य मलेजले ॥ अन्यत्राजले स्नानं न शुक्लपक्षे हरिप्रिये ॥ एतद्गंगा
व्रतं नाम सर्वकामप्रदं शुभं ॥ सप्तसप्तच सप्ताथ कुलानि हरिवल्लभे ॥ स्त्रीतारयति धर्मज्ञे गंगाव्रत

कृचारिणी ॥ देयं कुंभसहस्रं तु गंगाया व्रतके शुभे ॥ तारणं पारणं चैव तद्व्रतं सर्वकामदमिति ॥ इति गंगाव्र
तं ॥ अथ शुक्लादिश्रावणकृष्णसप्तम्यां शीतलाव्रतं ॥ तच्च मध्याह्नव्यापिन्या कार्यं ॥ तथा च माधवीये हारी
तः ॥ पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति ॥ अथ विधिः ॥ मासपक्षाद्युल्लिख्य मम वैधव्यदारिद्र्य
भर्तृवियोगपुत्रसौख्यधनधान्यप्राप्तये शीतलाव्रतं करिष्य इति संकल्प्य यथा मीलितोपचारैः शी
तलां पूजयिष्य इति संकल्प्यैकं कलशं संस्थाप्य तदुपरि शीतलां पूजयेत् ॥ तत्र ध्यानं स्कांदे ॥ वंदेहं शीत
लां देवीं रासभस्थां दिगंबरां ॥ मार्जनीकलशोपेतां शूर्पालंकृतमस्तकमिति ॥ कुंभे संस्थापयेद्देवीं पू
जयेन्नाममंत्रतः ॥ शीतले दह मे पापं पुत्रसौख्यफलप्रदे ॥ धनधान्यप्रदे देवि पूजां गृह्ण नमोस्तु ते ॥ इ
त्यर्घ्यं दद्यात् ॥ शीतले मानि पक्वानि दध्ना समन्वितानि च ॥ नैवेद्यं च प्रकुर्वीत घृतमिश्रं च सुंदरि ॥
गौरीणां भोजयेत्सप्त पूजनीया प्रयत्नत इति ॥ पूजाविधिः ॥ हेमाद्रौ भविष्यपुराणे ॥ कृष्ण उवाच
प्रसिद्धं श्रूयतां रम्यं नगरं हस्तिनापुरं ॥ इंद्रद्युम्नश्च राजाभून्नृपतिर्लोकपालकः ॥ धर्मशर्माभिधा
नामतस्य भार्या यशस्विनी ॥ क्रिया नाम्नात्र साध्वी च दानशीला प्रियंवदा ॥ बभूव प्रथमं पुत्रो महा

धर्मेति नामतः॥ नंदनेपितवत्सल्याकुलेन्यस्मिंततोजनत॥ द्वितीयाचतथापुत्रीतस्यजाता गुणोत्तम॥
पुत्रीलक्षणसंपन्नाशुभकारीति नामतः॥ विदधेसापिदुर्गेहेसर्वांगंगुणसुंदरी॥ नाम्नारूपेणसाबाला
सर्वापिसगुणाधिपा॥सामुद्रिकगुणोपेता पद्महस्ताप्रियंवदा॥ परोहदहमानेनलक्ष्मीवान्रूपवान्गु
णेः॥समापर्य्येचजग्राहपाणिग्रहणपूर्वकं॥ कदाचित्सपितुर्गेहंजामात्रानयनापिच॥ आजगामोपरिज
नेनसुतागमनोत्सुकः॥ प्रणम्यचपितुःपादौत्वरितंचारुहासिनी॥ तत्पुत्रीमुक्तयामासजामाता कृतविग्र
हः॥ रथमारुह्य हेमास्मियास्यामिस्वपुरंगृहं॥ तस्यापितेत्कवाचेदंदंपत्योःशुभहेतवे॥ पुत्रित्वंसुस्थिरा
भूत्वा वासरेकं क्षमस्व मे॥ शीतलासप्तमीमव्रतंचरसुतेशुभे॥ सौभाग्यारोग्यजनकंअवैधव्यप्रदंतथा॥
कन्योवाच॥ तातत्वत्र परिज्ञातंयदुक्तंपद्मयोनिना॥ पतिव्रतासमोधर्मोनास्तीहभुवनत्रये॥ तातस्तांकार
यामासशीतलाव्रतमुत्तमं॥ तांपुत्रींप्रेषयामास ब्राह्मणोब्रह्मपारगः॥ व्रतोपकरणंपुत्री मार्गेपूज्या
सरोवरे॥ मार्गेपस्तानिसंस्थाप्य व्रतोपकरणंशुभा॥ शीतलापूजनहेतोर्गता साध्वीसरोवरं॥ तदहृष्टंतया
मोहा तडागविधिसाधनं॥ भ्रमामसावनेशून्ये स्मरंतीपूर्वशासनं॥ स्मरतीशीतलाव्रतं॥ अतिश्रांता
व्ययामोहात्भयेनकरणाबकुः॥ स्मरंतीशीतलोत्कृष्टांनारीरूपंददर्शसा॥ स्ववासरेविजानीहिसाध्वीसा

हित्यभास्कररवेभानोसूर्यदिवाकरे॥ प्रभाकर नमस्तुभ्यंसंसारान्मांसमुद्धर॥ भुक्तिमुक्तिप्रदोयस्मात्तस्माच्छां
तिंप्रयच्छमे॥ अर्घ्यनामंत्रः॥ नमोनमस्तेवरदऋक्सामयजुषांपते॥ नमोस्तुविश्वरूपायविश्वधात्रेनमोस्तुते॥
एवंसंपूज्यविधिवद्देवदेवंदिवाकरं॥ पूजयेत्कापिलांधेनुंवस्त्रमाल्यानुलेपनैः॥ दानमंत्रः॥ दिव्यमूर्ति
र्जगच्चक्षुर्द्वादशात्मादिवाकरः॥ कपिलासाततोदेवोममभुक्तिंप्रयच्छतु॥ तस्मात्त्वंकपिलेपुण्यैःसर्वलोकस्य
पावनी॥ प्रदत्तासहसूर्येणममभुक्तिप्रदाभव॥ इतिहेमाद्रौस्कांदेकपिलाषष्ठीव्रतं॥ अथसर्वसुष
ष्ठीस्कंदषष्ठीव्रतंहेमाद्रौस्कांदेचैवभविष्ये॥ कृष्णउवाच॥ षष्ठ्यांफलाशनोराजन्विशेषात्कार्ति
केनृप॥ राज्यच्युतोविशेषेणस्वराज्यंलभतेचिरात्॥ षष्ठीतिथिर्महाराजसर्वदासर्वकामदा॥ उपोष्या
साप्रयत्नेनसर्वकालंजयार्थिना॥ कार्तिकेयस्यदयिताएषाषष्ठीमहातिथिः॥ देवसेनाधिपत्यंहिप्राप्त
मस्यांमहात्मना॥ अस्यांहिश्रीसभायुक्तोयस्मात्स्कंदोभवत्सुरा॥ तस्मात्षष्ठ्यांनभुंजीतप्राप्नुयाद्भा
र्गवीसदा॥ भार्गवीलक्ष्मीं॥ दत्वार्घंकार्तिकेयायस्थित्वावैदक्षिणामुखः॥ दध्नाघृतोदकैःपुष्पैःमंत्रेणा
नेनसुव्रत॥ सप्तर्षिदारजस्कंदसेनाधिपमहाबल॥ रुद्रोमाग्निजषडूवक्त्रगंगागर्भनमोस्तुते॥ प्रीय

वरवर्णिनी॥ भविष्यति चिरंजीवी भर्त्ता ते भक्तवत्सले॥ आगच्छ पूजनार्थाय दर्शयामि सरोवरं॥ तयासह गत्वा
साध्वी तडागं विधिपूर्वकं॥ पूजयामास शर्वाणीं तोषयामास शीतलां॥ पूजयित्वा च तां देवीं स्वपृथं गेहमुधता॥
शीतलाया परंस्थस्य सहसंख्या च पृष्छिता यथा च द दृशोरण्ये स्वभर्त्ता किन्तु वक्ष्यति॥ सरोवरे मया तीन्येष
य नृशांतविग्रहः॥ ब्राह्मणो निद्रयासुप्त पूर्वकर्मप्रभावतः॥ दष्टो भुजंगरूपेण संयुक्तः पूर्वकर्मणा॥ विषहं
तं पतिं दृष्ट्वा शीतलायाः पतिव्रता॥ वरं संग्रह्य शालायां रुरोद करुणं बहु॥ तयोस्तरुणदंपत्योर्योग्यसौभाग्य
दर्शनात्॥ रुदंती करुणं बालस्त्री चयामास तद्भुतं॥ यावन्न परलोकस्थं जनं गत्य न लक्षते॥ कुशालेन सहैवात्र
अनुगच्छामि वह्निना॥ तस्मात्तु साधयिष्यामि पावके पतिना सह॥ अर्जयिष्ये दिवं दिव्ये॥ अक्षय्यं च भवांत
रं॥ शीतलोवाच॥ वत्से किमिदमित्युक्तं न श्रुतं वरवर्णिनी॥ शीतलाव्रतचारिण्या वैधव्यं नैव जायते॥ स्व
यमुत्थाय कल्याणी पतिं सुप्तं गृहे तदा॥ बोधयाशु त्वया चीर्णं व्रतं वैधव्यनाशनं॥ इत्युक्त्वा बोधया
मास भर्त्तारं सा पतिव्रता॥ भर्त्तापि मुदितो दृष्ट्वा स्वां प्रियां प्रीतिकर्मणा॥ दृष्ट्वा तु महदाश्चर्यं तद्ग्रामस्थापि
ना जनाः॥ सर्वे ते विस्मयं जग्मुर्ब्राह्मणा पतिरक्षणात्॥ ब्राह्मणी हर्षितो वृद्धो प्रणिपत्य पतिंव्रतं॥ याचे

मातर्नभूयो नो वैधव्यं च वियोगता॥ अद्यापि शीतलायाः व्रतं नारी करिष्यति॥ अवैधव्यमवाप्स्यन्भावि
योगस्सभर्तृता॥ इत्युक्त्वांतर्दधे देवी शीतला कामरूपिणी॥ शीतलोक्ता यावरं लब्ध्वा जगामात्मीय वेश्म
नि॥ पद्मानिवासप्रभुविश्ववंद्य समर्पयास्साधितसर्वमंगला॥ आद्ये साद्यमासाद्य च शीतलायाः नित्य
रसवार्वतीबद्दभूव॥ ॥इति हेमाद्रौ भविष्योत्तरे शीतलाव्रतं॥ अथ भाद्रशुक्लसप्तम्यां मुक्ताभ
रणव्रतपूजा॥ देवदेव महेशान परमात्मन्नजगङ्कुरे॥ प्रतिपादितया सोम पूजया पूजयाम्यहं॥ इत्या
वाहनं॥ अनेकरत्नखचितं सौवर्णमणिसंयुतं॥ मुक्ताचितं महादेव गृहाणासनमुत्तममित्यास
नं॥ पाद्यं गृहाण देवेश सर्वविद्यापरायण॥ ध्यानगम्यसनातंशंभो सर्वेश्वर नमोऽस्तु ते॥ पाद्यं॥ इदमर्घ्य म
मनर्घ्यत्वं मम राधीश शंकर॥ किंकरीभूतया सोम मया दत्तं गृहाण वै॥ अर्घ्यं॥ गंगादिसर्वतीर्थे
भ्यः समानीतं सुशीतलं॥ जलमाचमनीयार्थं गृहाणेशोमया सह॥ आचमनं॥ मध्वाज्यशर्करामिश्र
सुधयापरिकल्पितं॥ शंकरप्रीतये तेहं मधुपर्कं निवेदये॥ मधुपर्कः॥ आदौ पंचामृतस्नानं पश्चा
च्छुद्धेन वारिणा॥ स्नानं कुरु महादेव निजया कांतया सह॥ यत्पुरुषेणेति स्नानं॥ स्नानादूर्ध्वं मह

देवप्रीत्यापापप्रणाशनं॥ वस्त्रयुग्मंमयादत्तंमहतंप्रतिगृह्यतां॥ तंयज्ञंवस्त्रं॥ उपवीतंसोत्तरीयंनानाभूषण
भूषितं॥ गृहाणसोममम्मलंमयादत्तमिदंशुभं॥ तस्माद्यज्ञात्सर्वहुतःयज्ञोपवीतं॥ मलयाचलसंभूतंसुगं
धिघनसारयुक्॥ चंदनंपंचवदनगृहाणपावनितायुत इतिगंधं॥ जातीचंपकपुन्नागबकुलैः॥ शतपत्रैश्च
कह्लारैरर्चयेहमुमापतिं॥ तस्माद्श्वापुष्पाणि॥ त्रैलोक्यपावनानंतपरमात्मन्जगद्गुरो॥ चंदनागरुक
र्पूरंधूपंदास्यामिशंकर॥ धूपं॥ शुभ्रवर्त्तियुतंसर्पिर्लोलितंवह्निनायुतं॥ दीपमेकमनेकार्कप्रतिमं
कलयतिममितिदीपं॥ पायसापूपकसरंदुग्धान्नंसगुडोदनं॥ व्य दिव्यान्नषड्रसोपेतंसुधारसस
मन्वितं॥ समर्पयामिदेवेशकिंकरःशंकरायते॥ नैवेद्यं॥ पुनराचमनंशुद्धंकुरुसोमांबुनामुना॥ मुख
शुद्धिकरंस्वच्छपयात्वंगृहाणपावे॥ कस्तूरिकासमायुक्तंमलयाचलसंभवं॥ गृहाणचंदनंसोमकरोद्व
र्तनहेतवे॥ करोद्वर्त्तनं॥ नारिकेलफलंजंबुफलंनारंगमुत्तमं॥ कूष्मांडपरतेभल्याकल्पितंप्रतिगृह्य
तामितिफलं॥ पूगीफलंमहद्दिव्यमितितांबूलं॥ सप्तास्यासन्॥ हिरण्यगर्भेतिदक्षिणा॥ भक्त्यादीप

मिति नीराजनं॥ पुष्पांजलिः॥ यानिकानिचेति प्रदक्षिणा॥ महादेव महाराज प्रीत्या पापप्रणाशने॥ अस्माकं
कुर्वतां पूजां साधुवासाधुयोजितां॥ ज्ञानतो ज्ञानतो वापि भवतो विहितां मया॥ संपूर्णयाति विश्वेशो विमलः को
मलस्तुतो॥ मायो हि मिति प्रार्थना॥ देवदेव जगन्नाथ सर्वसौभाग्यदायक॥ गृह्णीयां दोररूपत्वं पुत्रपौत्र
प्रवर्धनं॥ दोरग्रहणं॥ सप्तसामोपगीतं त्वां धारयामि जगद्गुरो॥ सूत्रग्रंथिस्थितं नित्यं धारयामि स्थिरो भव॥
इति दोरबंधनं॥ हरे पापानि सर्वाणि तुष्टिं कुरु दयानिधे॥ प्रसन्नः सन्तु माकांतदीर्घायुःपुत्रदो भव॥ इ
ति जीर्णदोरकोत्तरणं॥ अथ वायनं॥ मंडकान्वेष्टकान्वाथ सघृतान्दक्षिणायुतान्॥ एकादश सत फलान्ब्रा
ह्मणाय कुटुंबिने॥ वेदशास्त्रप्रवीणाय तद्यात्सोमस्य तुष्टये॥ शंकरः प्रतिगृह्णाति शंकरो वै ददाति च॥ शंक ॥७जा।
रस्तारको भाभ्यां शंकराय नमो नमः॥ इति वायनं॥ एवं यः पूजनं कुर्यात्सोमस्य सुखहास्यतु॥ सर्वान्कामा
नवाप्नोति पुत्रपौत्रैश्च मोदते॥ ॥अथ कथा॥ हेमाद्रौ भविष्योत्तरे॥ कृष्ण उवाच॥ मुनींद्रो लोम
शो नाम मथुरायां गतः पुरा॥ सोर्चितो वसुदेवेन देवक्या च युधिष्ठिर॥ उपविष्टः कथाः पुण्याः कथयित्वा म
नोरमाः॥ ततः कथयितुं भूयः कथामेतां प्रचक्रमे॥ कंसेन ते हताः पुत्रा जाता जाताः पुनः पुनः॥ मृतवत्सा

द्वारि

देवकित्वंपुत्रदुःखेनदुःखिता॥यथा चंद्रमुखीदीनाबभूवनहुषप्रिया॥पश्चाच्चीर्णव्रतानैवबभूवाहनवत्सला॥
त्वमपिदेविकितथाभविष्यतिनसंशयः॥देवक्युवाच॥कासाचंद्रमुखीब्रह्मन्‌बभूवनहुषप्रिया॥किंची
चि र्णहिव्रतंदिव्यंतयासंततिवर्धनं॥क्षिप्रलोकदम्यदमनंसौभाग्यारोग्यदंविभो॥लोमशउवाच॥अयोध्यायां
पुराराजन्‌नहुषोलोकविश्रुतः॥तस्यासीद्रूपसंपन्नादेवीचंद्रमुखीप्रिया॥तथातत्रैवनगरेविष्णुगुप्तोभव
द्द्विजः॥आसीद्गुणवतीतस्यपत्नीभद्रमुखीतथा॥तयोरासीद्दतिप्रीतिस्पृहणीयापरस्परं॥अथतेद्वेपिसा
रव्यौवैस्नानार्थंसरयूजले॥प्राप्तेप्राप्तस्त्रियस्तत्रैवबाह्यावैनगरांगनाः॥तास्नात्वामंडलंचकुस्तन्मध्येव्यक्तरू
पिणं॥लेखयित्वाशिवंशांतमुमयासहशंकरं॥गंधपुष्पाक्षतैर्युक्तांप्रपूजयित्वायथाविधि॥प्रणम्यगंतुका
मास्ताःपप्रच्छतुर्वरस्त्रियौ॥ताऊचुःशंकरोस्माभिःपार्वत्यासहपूजितः॥बध्वासूत्रमयंतंतुंशिवस्यात्मानि
वेदितः॥धारणीयमिदंतावद्यावत्प्राणविधारणं॥तासांतद्वचनंश्रुत्वासख्यौचैतेपिदेवकि॥कृत्वा सु
सूत्रमयंतत्रबध्वादोर्भ्यांसुडोरकं॥ततस्ताश्चगृहंजग्मुःस्वसखीभिःसमावृताः॥कालेनमहतातस्य ख्या

४राज्ञः श्रिता सासीदीश्वरी नाम नामतः

भद्रमुख्या

स्तद्व्रतं विस्मितं शुभं ॥ चंद्रमुख्याः प्रमत्तायाः विस्मृतः संतुदोरकः ॥ भद्रमुख्यास्तथा भद्रे विस्मृतं सर्वमेवत
त् ॥ मृता कैश्चिदहोरात्रैः साबभूव प्लवंगमी ॥ भद्राख्या कुक्कुटी जाता व्रतभंगाच्छुभानने ॥ संभूय समये प्रा
प्ते गतां च कुलं सदा ॥ कालेन पंचतां प्राप्ते सखीभावात् स्नेहैवत्ते ॥ अदेवमातृके देशे जाते पि कुलसंयुते ॥ ब्राह्म
णी ब्राह्मणी जाता या सीच्चंद्रमुखी परा ॥ नाम्ना भद्रमुखी या सीत् भूषणा नाम सा भवत् ॥ अग्निमीलस्य
सा दत्ता पित्रा तस्य पुरोधसः ॥ अतीव वल्लभा चासीत् तस्य या भूषणप्रिया ॥ भूषिता भूषणा वरे रूपे पालंकृता
स्वयं ॥ तस्या बभूवुरष्टैव पुत्राः सर्वगुणान्विताः ॥ मातृवदुपसंपन्ना पितृवद्धर्मशीलिनः ॥ सख्यो तेते न
तद्दृश्च जाते जातिस्मरे किल ॥ पुनर्निरंतरा प्रीतिस्तयोरासीद्यथा पुरा ॥ काले चक्रति थे जाते त्यक्त्वा शाल्यक
यौवना ॥ मध्ये वयसि राज्ञी च पुत्रमेकमजीजनत् ॥ ईश्वरी रोगिणं मूकं प्रज्ञाहीनं च विस्वरं ॥ तादृशोऽपि म
हाभाग मृतासौ नववार्षिकः ॥ ततस्तां भूषणा दृष्टुमीश्वरी पुत्रदुःखितां ॥ सखीभावादतिस्नेहात् पुत्रैः
स्वैः परिवारिता ॥ अमुक्ताभरणा भद्रा स्वरूपेणैव भूषिता ॥ सा हि भद्रा द्विजस्य भूद्भार्या भूषणा नामिका ॥
पुरा हि तस्य कालेन कुक्कुटी बहुपुत्रिणी ॥ तां दृष्ट्वा तु तादृशीं भव्यां प्रजज्वालेश्वरी रुषा ॥ ततो गृहं प्रेषयित्वा

हता अपि यो ते पुत्राः पुनर्जीविति सद्गरं ॥१॥

अश्वपी तीव्रमत्सरा ॥ चिंतयामास साशीघ्रं तस्याः पुत्रवधं प्रति ॥ तदद्भुततरं दृष्ट्वा सखीमाहूय भूषणां ॥ उपवि
श्यासने श्रेष्ठे पृच्छमान पुनः स्मरं ॥ अपृच्छ हि स्मयाविष्टा साक्षी सा नृपवल्लभा ॥ ब्रूहि तथ्यं महाभागे किं त्वया सु
कृतं कृतं ॥ दानव्रततपोभिश्च शुश्रूषणमुपोषणं ॥ येन ते निहताः पुत्राः पुनर्जीवंत्यनामयाः ॥ तथा हि बहुपुत्रा त्वं
जीववत्सा शुभानना ॥ अमुक्ताभरणा नित्यं भर्तुश्चेतस्य च स्थिता ॥ अतीव शोभसे भद्रे विद्युत्स्फूर्ती माल्ययेय
था ॥ भूषणोवाच ॥ शृणु देवि प्रवक्ष्यामि जन्मांतरविचेष्टितं ॥ किं त्वयापि विस्मृतं सौम्ये यो ध्यायं कृतं हि
तत् ॥ अवाभ्यां व्रतवैकल्यं प्रमत्ताभ्यां वरानने ॥ येन त्वं प्लवगी जाता जाताहं कुक्कुटी तथा ॥ तथापि व्रत
वैकल्यं त्वया चापूर्त्यं तः कृतं ॥ मया तु सर्वभावेन चैतत्साध्याय शंकरं ॥ तिर्यग्योन्यनुसारेण मनोवृ
साध्यनुष्ठितं ॥ एतदेव कारणं भद्रे नान्यत्किंचित्करोम्यहं ॥ लोमश उवाच ॥ इत्याकर्ण्य च संस्मृत्य पूर्व
जन्मनि चेष्टितं ॥ ईश्वरी च तया सार्धं पुक्सम्यक्चकार ह ॥ अतस्यास्य प्रभावेन पुत्रपौत्रादि संभवं ॥ भु
क्त्वा च सौख्यमतुलं मृता शिवपुरं गता ॥ तस्मात्त्वमपि कल्याणि व्रतमेतत्समाचर ॥ आरब्धे स्मिन्व्र
ते ह्यद्य जीवपुत्रा भविष्यसि ॥ देवक्युवाच ॥ आख्याहि मे सम्यक् व्रतमेतत्सुखप्रदं ॥ संतानस्य हि

करणंशिवलोकस्थितिप्रदं॥लोमशउवाच॥भद्रेभाद्रपदेमासिसप्तम्यांसलिलाशये॥स्नात्वाशिवंमंडले
केलेखयित्वासहांबिकां॥तत्रसंपूज्यसमयंकुर्याद्वध्वाकरेगुणं॥यावज्जीवंमयात्मात्तुशिवस्यवि
निवेदितः॥इत्येवंसमयंकृत्वाततःप्रभृतिदोरकं॥सौवर्णंराजतंवापिसौत्रंवाधारयेत्करे॥मंडकान्वेष्टिक
न्दद्यात्मासिपक्षेथवाद्विजे॥स्वयंतेश्वैरभोक्तव्याव्रतभंगभयाच्छुभे॥प्रतिमासंतुसप्तम्यांशुक्लपक्षे
विशेषतः॥कुर्याद्देवव्रतंभद्रेवर्षांतेपितुदेवकि॥कारितामुद्रिकाश्रस्मोहेमीरूप्यास्वशक्तितः॥तांम्रपा
त्रेपरिस्थाप्यब्राह्मणेभ्योनिवेदयेत्॥आचार्यायविशेषेणसुवर्णस्यांगुलीयकं॥पुष्पकुंकुमसंयुक्तैस्तांबू
लांजनसूत्रकैः॥सहार्थत्तृतीय॥एवंतत्पारयित्वातुव्रतंसंततिवर्धनं॥सर्वपापविनिर्मुक्ताभुक्त्वासौ
ख्यमनामयं॥संतानंवर्धयित्वाचशिवलोकेमहीयते॥एतत्तेसर्वमाख्यातमाख्यानमुत्तमं॥कुरुदेवकि
व्रतेनजीवपुत्राभविष्यसि॥ कृष्णउवाच॥इत्युक्त्वाथमुनिश्रेष्ठस्तत्रैवांतरधीयत॥चकारसर्वंय
त्नेनयदुक्तंतेनधीमता॥व्रतस्यास्यप्रभावेनदेवकीमामजीजनत्॥तस्मात्पार्थनरैःकार्यंस्त्रीभिः
कार्याविशेषतः॥व्रतंपापप्रशमनंसुखसंततिवर्धनं॥एवंयःशृणुयाद्भक्त्यायश्चैतत्प्रतिपादयेत्

देवि

८०

सम्यक्कृ नमस्कृत्य पुष्पधूपाक्षतैः शुभैः॥ आगत्य भवनं पश्चात्पंचयज्ञांश्च निर्वपेत्॥ संभोज्यातिथिभृत्यांश्च बं
लम्भृत्याश्रितान्स्वयं॥ विद्यमाने श्रीमान्वाग्यतस्तैलवर्जितं॥ रात्रौ विप्रं समाहूय विधिज्ञं वेदपारगं॥ सं
पूज्य नियमं कुर्यात्सूर्यमाधाय चेतसि॥ सप्तम्यां तु निराहारो भुक्ता भोगविवर्जितः॥ भोक्ष्ये ष्टं श्वो जगन्ना
थ निर्विघ्नं तत्र मे कुरु॥ इत्युच्चार्य नृपश्रेष्ठ तोयं तोयेषु निक्षिपेत्॥ ततो विसृज्य तं विप्रं स्वपेद्भूमौ जितेंद्रियः॥
ततः प्रातः समुत्थाय कृत्वावश्यं शुचिर्नरः॥ कारयित्वा रथं दिव्यं किंकिणीजालमालिनं॥ सर्वोपस्करसंयुक्तं
रत्नैः सर्वांगचित्रितं॥ कांचनं राजतं चाथ हयसारथिसंयुतं॥ ततो मध्याह्नसमये कृतस्नानादिको व्रती॥ ॥८१॥
अतीर्थ्यग्वीक्ष्यमाणास्तु पाखंडालापवर्जितः॥ सौरसूक्तं जपन्स्यक्त आगच्छेत स्वयं॥ निर्वृत्तनित्यका
र्यस्तु कृत्वा ब्राह्मणवाचनं॥ वस्त्रमंडपिकामध्ये स्थापयेत्तं रथोत्तमं॥ कुंकुमेन सुगंधेन चर्चयित्वा समं
ततः॥ मालाभिः पुष्पदीपानां समंतात्परिवेष्टये॥ धूपेनागरुमिश्रेण धूपयित्वा रथोपरि॥ रथं संस्थापये
द्भानुं सर्वसंपूर्णलक्षणं॥ वित्तानुरूपं हैमं च वित्तशाठ्यविवर्जितः॥ शाठ्याद्व्रजति मे वैकल्यं वैकल्याद्वि
कलं फलं॥ ततो देवं समभ्यर्च्य सरथं सहसारथिं॥ पुष्पैर्धूपैस्तथा गंधैर्वस्त्रालंकारभूषणैः फलैर्ना

नाविधैर्भक्ष्यैर्नैवेद्यैर्घृतपाचितैः॥ पूजयेद्भास्करं भक्त्या मंत्रैरेभिस्त्रिभिः क्रमात्॥ भानो दिवाकरादित्य मा
र्तंड जगतां पते॥ अपांनिधे जगद्वक्ष भूतभावन भास्कर॥ प्रणतार्तिहराचिंत्य विश्वचिंतामणे विभो॥ वि
श्वेह संसाधिभूतेश आदिमध्यांतकारक॥ भक्तिहीनं क्रियाहीनं मंत्रहीनं जगत्पते॥ प्रसादात्तव संपूर्णमर्च
नं यदिहास्तु मे॥ एवं संपूज्य देवेशं प्रार्थयेत्सुमनोगतं॥ ददाति प्रार्थितो भानुर्भक्त्या संतोषितो नरैः॥ वित्त
हीनोपि विधिना सर्वमेतत्प्रकल्पयेत्॥ रथं ससारथिं साश्वं वर्णकैर्भिन्नवेरितं॥ सौवर्णं च तथा भानुं
यथाशक्त्या विनिर्मितं॥ प्रागुक्तेन विधानेन विधानेन पूजयित्वा सुविस्तरं॥ जागरं कारयेद्रात्रौ
गीतवादित्रनिस्वनैः॥ प्रोक्षणीयैर्विचित्रैश्च पुण्याख्यानकथादिभिः॥ रथपात्रां प्रपश्येत भानोरायत
नं श्रिया॥ अग्निमीलितनेत्रस्तु नयेत्तां रजनीं बुधः॥ प्रभाते विमले स्नात कृतकृत्यस्ततो द्विजान्॥ त
र्पयेद्विविधैः कामैर्दानैर्वासोविभूषणैः॥ अश्वमेधेन तुल्यं तदिदं ब्रह्मविदो विदुः॥ अतो देयानि देया
नि यथाशक्त्या विचक्षणैः॥ ~~अश्वमेधेन तुल्यं तदिदं ब्रह्मविदो विदुः॥~~ रथं तु गुरवे देयं सर्वोपस्करसं
युतं॥ रक्तवस्त्रं च युगलं रक्तधेनुसमन्वितं॥ एवं चीर्णव्रतो राजन्न्रकिं नाप्नोति जगत्त्रये॥ तस्मात्सर्वप्र

यत्नेन कुरु त्वं रथसप्तमीं॥ येनारोग्यो भवेत्पुत्रस्त्वदीयो नृपसत्तम॥ व्रतस्यास्य प्रभावेन प्रभावाद्भास्क
रस्य च॥ भविष्यति महातेजा महाबलपराक्रमैः॥ भोगान्सुविपुलान्कृत्वा भुक्त्वा राज्यमकंटकं॥ दत्वा सौर
थसप्तम्यां मृते त्वयि महाभुज॥ उत्पात पुत्रपौत्राभ्यौ श्वसर्वलोकं सयास्यति॥ तत्रस्थितः कल्पमेकं चक्र
वर्ती भविष्यति॥ कृष्ण उवाच॥ इति सर्वं समाख्याय विप्रतीतो द्विजोत्तमैः॥ तथागतं जगामासौ नृपस
विचकार ह॥ यथा द्विजेंद्रेण तत्तत्सर्वं बभूव ह॥ एवं स चक्रवर्तित्वं प्राप्तवान्नृपनंदन॥ श्रूयते यत्तु मांधा
ता पुराणेषु परंतप॥ यद्यदं शृणु याज्ञस्त्या यो वा पि परिकीर्तयेत्॥ तस्यैव तुष्यते भानुर्यच्छत्येवापसंपदः॥
एवंविधं रथवरं रथवाजियुक्तं हैमं च हैमशतदीधितिनास्तमेतं॥ दद्याच्च माघसितसप्तमिवासरे यः सोऽसं
गचक्रगतिरेव महीं भुनक्ति॥ ॥इति रथसप्तमीव्रतं॥ अथास्यामेव स्नानविधिः॥ तत्रारुणोदयव्या
प्यां स्नानं कार्यं तदुक्तं मदनरत्ने स्मृतिसंग्रहे॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी॥ अरुणोदय
वेलायां तस्यां स्नानं महत्फलं॥ माघे मासि सिते पक्षे सप्तमी कोटिभास्करा॥ कुर्यात्स्नानार्घ्यदा
नाभ्यामायुरारोग्यसंपदः इति॥ दिनद्वये रुणोदयसत्वे पूर्वैव॥ कृत्वा षष्ठ्यामेकभक्तमिति वक्ष्यमा

८२

स

व्रतमाख्यानसहितं सोपि पापैः प्रमुच्यते॥ साख्यानकं व्रतमिदं सुतसौख्यकामा स्त्री याकरिष्यति शिवं हृद
ये निधाय॥ कुक्षिं विहाय बकुशो कृतकल्पवीघान्सा स्त्रीव्रताद्भवति शोभनजीववत्सा॥ ॥इति हेमाद्रौ भवि
ष्योत्तरे अमुक्ताभरणसप्तमीव्रतं॥ अथ माघशुक्लसप्तम्यां रथसप्तमीव्रतं॥ हेमाद्रौ भविष्ये॥ युधिष्ठिर
उवाच॥ कथं सा क्रियते कृष्ण मनुष्यै रथसप्तमी॥ चक्रवर्तित्वफलदा याविख्याता त्वया मम॥ कृष्ण उवा॰
आसीत्कांभोजविषये यशोवर्मा नराधिपः॥ वृद्धे वयसि तस्यासीत्सर्वव्याधियुतः सुतः॥ तत्कर्मपाकं सोऽपृ
च्छत् विनीतं द्विजपुंगवं॥ सप्ताहं राजचैत्रयो हं कृपणः पूर्वजन्मनि॥ ददर्श रथसप्तम्याः क्रियमाणां व्रतं नृप॥ व्रत
दर्शनमाहात्म्यात्पुत्रत्वं भोजगृहे तव॥ आदाते विभवं तस्मात्तेन च व्याधितो भवेत्॥ ततः स राजा पप्रच्छ किमेतस्य
विधीयतां॥ यस्य संदर्शनात्पापो लोभी भवति केतनं॥ तदेव क्रियतां राजन् रथसप्तमिति संज्ञितं॥ व्रतं पाप
हरं येन चक्रवर्तित्वमाप्यते॥ राजोवाच॥ ब्रूहि विप्र व्रतं कृत्स्नं सविधानं समंत्रकं॥ ईश्वराणां दरिद्राणां सर्व
संपत्प्रदायकं॥ द्विज उवाच॥ शुक्लपक्षे तु माघस्य षष्ठीमामंत्रयेद्गृही॥ स्नानं शुक्लतिलैः कार्यं॥ नद्यभावे
तु कुत्रचित्॥ विमले सलिले राजन् विधिवद्धर्मतः॥ देवादीन्पूजयित्वा तु गत्वा सूर्यालयं ततः॥ सूर्यं

कभक्तेः षष्ठ्याधिकरणत्वसंभवात्॥ सप्तार्कपत्राणि सप्तबदरीपत्राणि च सिरसि निधाय कर्तव्यमिति मदनः॥ तत्रमंत्रः
यद्यज्जन्मकृतं पापं मया सप्तसु जन्मसु॥ तन्मे रोगं च शोकं च माकरी हंतु सप्तमी॥ स्नानानंतरं अर्घ्यदानं कर्तव्यं॥ तन्मं
त्रश्च॥ सप्तसप्तिवहप्रीत सप्तलोकप्रदीपक॥ सप्तम्यां सहितो देव गृहाणार्घ्यं दिवाकरेति॥ ततः प्रार्थना॥ जननी सर्व
भूतानां सप्तमी सप्तके तिथिः॥ सप्तम्या व्याहृतिके देवि नमस्ते सूर्यमंडले इति॥ इति भविष्योत्तरोक्तः स्नानादिवि
धिः॥ अथाचेवाचलासप्तमीव्रतं॥ युधिष्ठिर उवाच॥ कथं स्त्रियः सुरूपस्युः सुभगाः सुप्रजास्तथा॥ पुण्याश्च
महतस्थात्र सर्वमेतत्फलं यतः॥ अल्पायासेन सुमहद्येन पुण्यमवाप्यते॥ स्त्रिभिर्यत्तिमम ब्रूहि त्वानमे कंजा
गद्गुरोः॥ कृष्ण उवाच॥ श्रूयतां भरतश्रेष्ठ गृहस्थमुनिभाषितं॥ यन्मया कस्यचिन्नोक्तमचलासप्तमीव्रतं॥
वेश्याचेंदुमती नाम रूपौदार्यगुणान्विता॥ आसील्कुल कुलश्रेष्ठ सागरस्य विलासिनी॥ सावसिष्ठाश्रमं पुण्यं जगा
म जगगामिनी॥ वसिष्ठमृषिमासीनं प्रणम्यानतकंधरा॥ कृतांजलिपुटो भूत्वा प्राहेदं जगतो हितं॥ मयाद
त्तं न कृतं नोपवासः कृतं व्रतं॥ भक्त्या संपूजितः शंभुस्स्वामी नैव शार्ङ्गधरो न च॥ साप्रतं त्वप्यमानीया व्रतं किंचिद्व
दस्व मे॥ येन दुःखात्पंकौघादुत्तरामि भवार्णवे॥ एतत्तस्याः सुबद्धा शरत्वाति करुणा वचः॥ कारुण्यात्कथया

मास्तव वसिष्ठमुनिपुंगवः॥ माघस्य सितसप्तम्यां सर्वकाम फलप्रदं॥ न्यपसौभाग्यजननं स्नानं कुर्यो रुवरानने॥ कृत्वा
षष्ठ्यांमेकभक्तं सप्तम्यां निश्चलं ततः॥ रात्र्यंते चालये थास्त्वां दत्वा शिरसि दीपिकं॥ माघस्य सितसप्तम्यां अचलं च
लितं वयत्॥ जलं मत्वा नां सर्वेषां स्नानं प्रक्षालनं ततः॥ वसिष्ठ वचनं श्रुत्वा तस्मिन्नहति भारत॥ चकारेंदुम
तीस्नानं ज्ञात्वा सम्यग्यथा विधिः॥ स्नानस्यास्य प्रभावेन तु का भोगान्यथेप्सितान्॥ इंद्रलोकेश्वरो मर्थेनपि का
त्वमवापसा॥ अचलासप्तमीस्नानं कृथितं तेविशांतये॥ सर्वपापप्रशमनं सुखसौभाग्यवर्धनं॥ युधिष्ठि
र उवाच॥ सप्तमीस्नानमाहात्म्यं श्रुतं निरवशेषतः॥ सांप्रतं श्रोतुमिच्छामि विधिमंसमन्वितं॥ कृष्ण उ
वाच॥ एकभक्तेन संतिष्ठत् षष्ठ्यां संपूज्य भास्करं॥ सप्तम्यां तु व्रती प्रातः सुगंधी निजलाश्रयं॥ सरित्सरतडागं वा देव
खातमथापि वा॥ सुखाव गाहमत्वे ष्टं दुष्टसत्वैरहर्षितं॥ याचांबु पक्षिभिश्चैव जलगैर्मत्स्यकच्छपैः॥ न केनं चा
ल्यते यावत्तेन समाचरेत्॥ सौवर्णे राजते पात्रे भक्त्या लांबुमये थवा॥ तैलस्य वर्तिदीप्तेषा महाराजनरंजि
ता॥ महाराजन कुसुमं॥ समाहितमना भूत्वा दत्वा सिरसि दीपकं॥ भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्॥ न
मस्ते रुद्ररूपाय रसानांपतये नमः॥ वरुणाय नमस्तेस्तु हरिवास नमोस्तु ते॥ जले परिहरे द्द्यं स्नात्वा संतर्पये देव
ताः॥ चंदनेन लिखेत्पद्ममष्टपत्रं सकर्णिकं॥ मध्ये शिवं सपत्नीकं प्रणवेनैव च संयुतं॥ शाके दलेरविः॥

ज्योभानुश्चैवानलेतथा॥ याम्येविवस्वान्यत्रे नैर्ऋत्येभास्करंततः॥ पश्चिमेवितताप्रव्योर्कश्चानिदलेदमे॥सो
म्यसहस्त्रकिरणंशैवेसर्वात्मनेमहत्॥ पूजाप्रणवपूर्वंसुनमस्कारांतयोर्जितः॥ पुष्पैःसुगंधधूपैश्चश्रद्धयत्नेन
युधिष्ठिर॥ विसर्ज्यवस्त्रसंवीतस्तस्थानंगम्यतांमिति॥ विसर्जितेसहस्रांशौसमागम्यस्वमालयं॥ ताम्रपात्रे
यथाशक्त्यामृन्मयेवाथभक्तिमान्॥ स्थापयेत्तिलपिष्टंचसघृतंसगुडंतथा॥ कांचनंतालकंकृत्वाअशक्तास्ति
लपिष्टजं॥ संछाद्यरक्तवस्त्रेणपुष्पैर्धूपैरथार्चयेत्॥ ततस्तंब्राह्मणायेदद्यात्मंत्रेणतालकं॥ आदित्यस्य
प्रसादेनप्रातःस्नानफलेनवा॥ दुष्टदौर्भाग्यदुःस्वप्नंमयादत्तंतुतालकं॥ तालकतालपत्रं॥ पूज
यित्वापदेष्टारंविप्रानमांश्चपूजयेत्॥ ततोदिनंसमग्रंचभास्करध्यानतत्परः॥ नाएवचकथाश्शृण्वन्नन्यावा
धर्मसंहिताः॥ पाखंडादिभिरालापदर्शनस्पर्शनादिकं॥ वर्जयेत्क्षपयेत्प्राज्ञस्ततोबंधुजनैःसह॥ एतत्तेक
थितंपार्थरूपसौभाग्यकारकं॥ अचलासप्तमीस्नानंसर्वयामफलप्रदं॥ इतिपठतियइत्थंयःशृणोतिप्र
संगात्कलिकलुषविनाशंसप्तमीस्नानमेतत्॥ मतिमपिचजनानांयोददातिप्रयत्नात्सुरसदनगतो
सेव्यतेचाप्सरोभिः॥ इत्यचलासप्तमीव्रतं॥ अथास्यामेवपुत्रसप्तमीव्रतं॥ मदनरत्नेआदित्यपुराणे॥

आदित्यउवाच॥ माघमासेतुशुक्लायांसप्तम्यांसमुपोषितः॥ यःपूजयेत्तुमांभक्त्यातस्याहंपुत्रतांव्रजेत्॥ एवंवोभयस
प्तम्यांमासिमासिसुरोत्तम॥ यस्तुमांपूजयेत्कैंद्रभक्त्यासुमेरुमेकमादरात्॥ सुमेरुःसंवत्सरः॥ प्रयच्छामिसुमंतस्यह्या
त्मानोप्यंगसंभवं॥ वित्तंयशस्तथापुत्रममारोग्यंपरमंसदा॥ माघमासेतुयोब्रह्मन्शुक्लपक्षेजितेंद्रियः॥ अशोष्यवि
धिवत्षष्ठ्यांश्वेतमाल्यविलेपनैः॥ पूजयित्वातुमांभक्त्यानिशिभूमौस्वपेद्बुधः॥ पुनरुत्थायसप्तम्यांकृत्वास्नानादि
कांक्रियां॥ पूजयित्वातुमांब्रह्मन्वीरहोमंसमाचरेत्॥ प्रणइत्वाहरिंभक्त्याहविषापद्मलोचनं॥ वीरहोमंअमि
त्रहोमांहरिरादित्यः॥ दध्योदनेनपयसापायसेनद्विजस्तथा॥ तस्यैवकृष्णपक्षस्यषष्ठ्यांसम्यगुपोषि
तः॥ तस्यैवतिमास्यैसस्य॥ रक्तोत्पलैःसुगंधाढ्यैरक्तपुष्पैश्चपूजयेत्॥ एवंयःपूजयेद्भक्त्यानरोमांविधि
वत्सदा॥ उभयोरपिदेवेंद्रसुपुत्रंलभतेवरं॥ ॥इतिपुत्रसप्तमीव्रतं॥ ॥इतिश्रीभट्टनीलकंठात्म
जशंकरकृतौव्रतार्केसप्तमीव्रतानि॥ अथअष्टमीव्रतानि॥ तत्रबुधयुक्तायांशुक्लाष्टम्यांबुधाष्ट
मीव्रतं॥ अथव्रतविधिः॥ मासपक्षाद्युल्लिख्यममइहजन्मनिजन्मांतरेबाल्यादिआरभ्यकर्मणा
मनसावाचाजानताजानतावास्वर्णाद्यपहारदोषनिरासार्थंपुत्रपौत्रादिसकलमनोरथप्राप्त्यर्थंचश्रीपरमे
श्वरप्रीत्यर्थंबुधाष्टमीव्रतमहंकरिष्ये॥ इतिसंकल्प्यबुधषोडशोपचारैःकलशोपरिपूजयेत्॥ चतुर्भुजं

ग्रहपतिंसुप्रसन्नंमुखांबुजं॥ ध्यायेहंशंखचक्रासिपाशहस्तमिलाप्रियं॥ मात्स्योबुधरूपं॥ पीतमाल्यांबरधरः
कर्णिकारःसमापतिः॥ खड्गचर्मगदापाणिःसिंहस्थोवरदोबुधइति॥ ध्याने॥ तारासुतनमस्तेस्तुनक्षत्राधीश्व
रप्रिय॥ गृहाणपूजांभगवान्समागत्यग्रहेश्वर॥ आवाहनं॥ अधिदेवतापत्याधिदेवताच सहस्त्रशीर्षंदंविष्णु
भ्यांआवाह्य॥ इलापतेनमस्तेस्तुनिशेषप्रियस्त्वनेव॥ हेमसिंहासनंदेवग्रहाणप्रीतयेमम॥ आसनं॥ शीतलोदक
मानीतंसुपुण्यसरिदुद्भवं॥ पाद्यंगृहाणभगवन्मयाद्यपरिकल्पितं॥ पाद्यं॥ तारसुतनमस्तेस्तुसततंभगवत्प्रिय॥
गृहाणार्घ्यंग्रहपतेनानाफलसमन्वितं॥ अर्घ्यं॥ सुगंधद्रव्यसंयुक्तैःशुभैःस्वादुसरिज्जलैः॥ आचम्यतांनिशा
नाथनंदनप्रीतयेमम॥ आचमनं॥ पयोदधिघृतैश्चैवमधुकर्पुरसंयुतैः॥ पंचामृतैस्मादेवस्नानंतस्तीकुरुप
भो॥ पंचामृतं॥ वासितंगंधकर्पूरैर्निर्मलंजलमुत्तमं॥ स्नानायतेमयाभक्त्यादीयतेव्रतसिद्धये॥ अतोदेवादि
केःषड्भिःस्नापयीतततोबुधं॥ पौरुषायेणसूक्तेनोद्बुधास्वेत्यृचैकया॥ स्नानं॥ तदस्त्वितिप्रतिष्ठाप्य॥ पीतव
स्त्रद्वयंदेवराजवंशकरप्रभो॥ उर्वशीनाथजनकगृहाणप्रीतयेसदा॥ वस्त्रं॥ यज्ञोपवीतकंस्वर्णंत्रिगुणंत्रि
दशप्रिय॥ मत्सर्वपापमुक्त्यर्थंगृहाणप्रीतयेबुध॥ यज्ञोपवीतं॥ हरिचंदनकस्तूरीकर्पूरादिसमन्वितंगंध

भगवतेतुभ्यंइळानाथनमोस्तुते॥ अक्षताश्च॥ अथांगपूजा॥ बुधायनमः॥ पादौपूजयामि॥ सोमायनमः॥ जा
नुनीपूजयामि॥ तारकायनमः॥ कटिं॥ राजपुत्रायनमः॥ उदरं॥ इळाप्रियायनमः॥ हृदयं॥ कुमारायनमः॥
वक्षसि॥ पुरूरवःपित्रे॰॥ बाहू॥ सोमसुतायनमः॥ अंसौ॥ पीतवर्णायनमः॥ मुखं॥ ज्ञानायनमः॥ नेत्रे॥ बुधा
यनमः॥ मूर्द्धानं॥ याःफलिनीरितिपुष्पं॥ वनस्पतिरसोद्भूतइतिधूपं॥ साज्यंत्रिवर्त्तिइतिदीपं॥ अन्नंचतुर्वि
धमितिनैवेद्यं॥ पूगीफलंमहद्दिव्यमितिफलं॥ हिरण्यतिदक्षिणा॥ उद्बुध्यध्वमितिमंत्रेणपुष्पं॥ उर्वश्याश्च
गतिर्यस्तुयःपुरूरवसःपिता॥ योग्रहाणामधिपतिर्बुधोनःसंप्रसीदतु॥ यानिकानिचेतिप्रदक्षिणा॥ नम
स्कारप्रार्थयेन॥ ततोवायनदानं॥ संतुष्टोवायनायस्मादिळानाथोग्रहेश्वरः॥ वरांश्चविपुलान्दत्वान्संस
फलान्संप्रयच्छतु॥ अथकथा॥ कृष्णउवाच॥ बुधाष्टमीव्रतंभूयवक्ष्यामिशृणुपांडव॥ येनचीर्णेननरकं
नरःपश्यतिनक्वचित्॥ पुराकृतयुगस्यादौइलोराजाबभूवह॥ बहुभृत्यसुहृन्मित्रैर्मंत्रिभिःपरिवारितः॥
जगामहिमवत्पार्श्वंमहादेवपालितं॥ योस्याप्रविशतेभूमौसास्त्रीत्वंजगामह॥ सबभ्रामवनेरम्येपी
नोन्नतपयोधरा॥ काहंकस्यकुतःप्राप्तानपाबुध्यकिंचन॥ तांददर्शबुधस्तन्वींरूपौदार्यगुणान्वितं॥

अष्टम्यां बुधवारेण तस्यास्तुष्टे बुधग्रहः ॥ ददौ ग्रहाश्रमं रम्यं आत्मीयं रूपतोषितः ॥ पुत्रमुत्पादयामास ये
सौख्यातः पुरूरवः ॥ चंद्रवंशकरो राजा आद्यसर्वमहीभृतः ॥ ततः प्रभृति शुच्येयं साष्टमी बुधसंयुता ॥ सर्व
पापप्रशमनी सर्वोपद्रवनाशनी ॥ अथान्यमपि ते वच्मि धर्मराजकथानकं ॥ आसीद्राजा विदेहायां निमि
र्नाम स वैरिभिः ॥ संग्रामे निहतो राजा तस्य भार्याति निर्धना ॥ उर्मिला नाम बभ्राम मही बालकसंयुता ॥ अ
वंति विषयं प्राप्य ब्राह्मणस्य निकेतने ॥ चकारोदरभृत्यर्थं नित्यं कंडनपेषणं ॥ हृत्वा सा सक्तगोधूमान् द
दौ बालकयोस्तयोः ॥ कारुण्यात्पुत्रवात्सल्यात्क्षुधासंपीड्यमानयोः ॥ कालेन बहुना साध्वी पंचत्वमग
मत्तदा ॥ पुत्रस्तस्या विदेहायां गत्वा स्वपितुराश्रमे ॥ उपविष्टः सत्ययोगाद्बभुजे गामिनीभुवं ॥ अन्विष्य
धर्मराजेन सा कन्या निमिवंशजा ॥ शामला नाम चार्वंगी सर्वलक्षणसंयुता ॥ तामुवाच वरारोहां धर्म
राजः स्वकां प्रियां ॥ वह स्व सर्वव्यापारं श्यामले त्वं गृहे मम ॥ कुरुष्व सर्वभृत्यानां दानशिक्षां यथोचितं ॥ किं
त्विते पंचवराः सप्तकल्ले केरतियंत्रिता ॥ कदाचिदपि नो ध्यायास्त्वया वै देहिनं दिनि ॥ एवमस्त्विति वै प्रो

महाराष्ट्रभाषयारवोली छुच्यते

द्राद्या

कानिजकर्म च कर्मच कारह॥ ततो भुक्त्वा बुधस्याग्रे बांधवैः प्रीतिपूर्वकं॥ तावदेव हि भोक्तव्यं यावत्साकथ्य
ते कथा॥ कदाचिद्व्याकुलीभूत्वा धर्मराजविदेहजा॥ उत्साटयित्वा प्रवरं ददर्श जननीं स्वकां॥ पात्यमानां
चरुदत्तीं भीषणैर्यमकिंकरैः॥ लीलयाक्षिप्यते वच्चात्तप्ततैलेषु सा पुनः॥ तथैव तल्लकां वध्वा पीडितासा
मनस्विनी॥ द्वितीये प्रवरे तद्वत्तामेव च ददर्श ह॥ तत्र निष्पीड्यमाना सा शिलायां लोष्टकेन च॥ तृतीये
प्रहरे तद्वत्तां ददर्श स्वमातरां॥ करकैः पीड्यमानां तु यद्युकेन्वकल्पतो स्वभि॥ चतुर्थे प्रहरे भीषणैर्दारुणा
ननैः॥ अभक्ष्याभक्षणाद्यैश्च कं दत्तीं तां पुनः पुनः॥ पंचमे प्रहरे भूमौ कंवेप्रोदनताडिता॥ सदंशैर्घ
नपातैश्च छिद्यमानां सहस्रशः॥ षष्ठे ताम्रक्षिप्तं यंत्रस्था मस्तकोपरि मुद्गराहता॥ संपीड्यमाना मनिशं सुभ्रू
शं दारुखंडवत्॥ सप्तमे प्रवरे चैव कृमिरूपैः सुदारुणैः॥ दृष्ट्वा तथागतां तां तु मातरं दुःखकर्षितां॥ आम
ला म्लानवदना किंचिन्नोवाच भामिनी॥ आयागतेयमप्राहसरोषां श्यामलामिति॥ किमर्थं म्ल
नवदनातिष्ठसित्वमनंदिते॥ कारणं तत्र ब्रूहि किंचित्रोद्वातितीत्वया॥ एते प्रवरकाः सामनिषिद्धा
ये पुरा मया॥ इत्युक्त्वा श्यामला प्राह भर्तारं विनयान्विता॥ किंनु पाप्यं कृतं राजन्मम मात्रा सुदु

वंप्रवराकृष्णतिथिर्वैतुबुधाष्टमी॥तस्यामेवविधिंब्रूहियदितुष्टोसिमाधव॥ कृष्णउवाच॥ शृणुपां
डवयत्नेनबुधाष्टम्याविधिःशुभं॥ यदायदासिताष्टम्यांबुधवारोभवेद्यदि॥ तदातदाहिसाग्राह्याएकभक्ता
शनेनृभिः॥स्नात्वानद्यांतुपूर्वाह्णेगृहीत्वाकरकंनवं॥जलपूर्णंसदृत्वंकनवेसमन्वितं॥पूजयि
त्वागृहीनीत्वाबुधमेवक्रमेणतु॥माषकेणसुवर्णेनतदर्धार्धेनवापुनः॥कारयेद्बुधरूपंतुस्वशक्त्या
वाप्रयत्नतः॥ अंगुष्ठमात्रंपुरुषंचतुर्बाहुंसुलक्षणं॥ पद्ममध्येव्रणंकुंभंपूरयेत्सिततंडुलैः॥हेमपात्रे
पात्संस्थाप्यपीतवस्त्रयुगेनच॥ वस्त्रोपरिस्थितंदेवंपीतवस्त्राक्षतादिभिः॥पंचामृतेनसंस्नाप्यततन्मं
त्रैःक्रमेणतु॥ नैवेद्यंगुग्गुलंधूपंदशांगेनसुगंधकं॥ पायसैर्घृतपूरैश्चमोदकाशोकवर्त्तकैः॥फलैश्चवि
विधैश्चैवशर्कराभिर्गुडैःशुभैः॥ ततःपुष्पाक्षतैःपीतैःवक्ष्यमाणैश्चनामभिः॥नमोबुधायपादौतुसोम
पुत्रायजानुनी॥तारकायकटिंचैवराजपुत्रायचोदरं॥ इलाप्रियायहृदयंकुमारायेतिवक्षसि॥बकृ
पुरूरवःपित्रेअंसौसोमसुतायच॥मुखंतुपीवर्चायरत्नानायनयनद्वयं॥मूर्धानंबुधायेतिएवंपुरस्ता
नबुपूजयेत्॥सौवर्णंराजतेताम्रेपात्रमादायशोभने॥ गंधपुष्पाक्षतैःपीतैर्गुडमिश्रांबुपूरितैः

८७

जानुभ्यामवनींगत्वातेनचार्घ्यंनिवेदयेत्॥उर्वश्याश्चगुरुर्युस्तुयःपुरूरवसःपिता॥योग्रहाणामधिपति
र्बुधोनःसंप्रसीदतु॥वराश्चविष्णुनादत्तासकलान्प्रसीदतु॥मंत्रेणानेनदत्वार्घ्यंजप्त्वामंत्रमिमंपु
नः॥प्रथमेमोदकांदद्याद्द्वितीयेफेणिकास्तथा॥तृतीयेघृतपूराश्चचतुर्थेतुवटपत्रकान्॥पंचमेशुभ्रक
रांश्चषष्ठेसोहालिकास्तथा॥अशोकवर्त्तिकाश्चैवसप्तमेवच॥अष्टमेशर्कराभिश्रैःखंडवेश्चयुधिष्ठिर॥
विप्रायवायनंदद्यात्व्रतीभोजनमाचरेत्॥एवंक्रमेणकर्त्तव्यंबुधाष्टम्यायुधिष्ठिर॥बांधवैःसह
मित्रैश्चभोक्तव्यंप्रीतिपूर्वकं॥सोम्यमस्त्रायनंश्रण्वन्नरकेभ्योविमुंचति॥सोमात्मजात्मकन
शेषसुखप्रदत्तंसंपूज्यैजयत्सकलनीलयुतंचकुंभं॥पक्वान्नपात्रसहितंसहितंहिरण्यवस्त्रंप्रदायपत्यसोय
मपुरीनकदाचिदेव॥ ॥इतिश्रीभविष्योत्तरपुराणेकृष्णयुधिष्ठिरसंवादेबुधाष्टमीव्रतं॥ अथो
द्यापन॥ युधिष्ठिरउवाच॥ उद्यापनविधिंब्रूहिकृपयाभक्तवत्सल॥कस्मिंकालेचकिंद्रव्यंकथ
सकलभाग्भवेत्॥ ॥श्रीकृष्णउवाच॥ आदौमध्येतथाचांतेकुर्यादुद्यापनक्रिया॥सप्तम्यां
प्रियतांमर्त्यःकुर्याद्विदंतधावनं॥ आचम्यकुर्यात्संकल्पंदशविप्रानिमंत्रयेत्॥अष्टम्यांप्रातरुत्थ्या

यथाशक्तिर्भुत्वा व्रती ततः॥ गंगाद्यादिमहातीर्थे स्नात्वा नित्यकृतक्रियः॥ गृहमध्ये शुचौ देशे रंगवल्ली
विराजिते॥ पुण्याहवाचनं कृत्वा कुर्याद्द्रव्यविधानकं॥ प्राणानायम्य विधिवत्कृत्वा संकल्पनादिकं॥
तिथ्याद्युल्लेखनां तेन व्रतनाम प्रकीर्त्तयेत्॥ मया कृतं बुधाष्टम्या व्रतं सांगफलाप्तये॥ उद्यापनं करिष्ये
हमित्युक्त्वा कुशोदकं॥ कृत्वाचार्यादिवरणं कुर्याद्वस्त्रादिभिः फलैः॥ ब्राह्मणोपि प्रयातत्र वस्त्र
भूषणैः॥ ततः पूजादिकं कुर्यात् ग्रहयज्ञपुरस्सरं॥ ततस्त्वष्टदलं कुर्यान्मध्ये कर्णिकया सह॥
पंचवर्णैः समापूर्य दलाग्राणि च केसरान्॥ कर्णिकायां न्यसेच्छाल्यं पंचप्रस्थप्रमाणतः॥ द
लेषु च दलाग्रेषु यथाशक्त्या विनिक्षिपेत्॥ तत्र संस्थापयेत्कुंभान्मध्ये पूर्वादिदिक्षु च॥ गंगाजलेन संपू
र्य वस्त्रादिभिरलंकृतान्॥ पंचत्वक्पल्लवोपेतान् नवकुंभान्यथाविधि॥ तदुत्तरे ग्रहाः सर्वा मंडले स्था
पयेत्ततः॥ मध्ये संस्थापयेत्कुंभं ताम्रं च विशेषतः॥ वस्त्रत्वक्पल्लवफलैः पंचरत्नैः सकांचनैः॥ तत्तन्मं
त्रैः प्रतिष्ठाप्य पूजयेच्च यथाविधि॥ सप्तजन्मार्जितं चौर्यं पातकादि च यत्कृतं॥ तद्दोषपरिहा ८८

रणं॥ येनेह विविधैर्घोरैर्बाध्यते बहुशस्त्वया॥ इत्युक्तः प्रियया प्राह तां यमः प्रहसन्निव॥ तव मात्रा युतस्ते
ह ह्योष्टमौ विहतं किल॥ किं न जानेसि तद्भद्रे येन पृच्छसि मामिह॥ ब्राह्मणस्य प्रणयाद्भक्त्या गृहे न्यासप्रमं कु
लं॥ तद्वस्त्रकैर्भिरूपेणं कृतं त्वयन्यासंभ्रमकुलं॥ गोधूमास्तद्ग्रमे भूत्वा कृमिरूपाः सुदारुणाः॥ ये पुरा ब्रा
ह्मणगृहे न्यस्तास्त्वत्कृतं मया॥ खादनाय्येत देहं सर्वयते मात्राकृतं पुरा॥ श्यामलोवाच॥ तथापि तां सुमं
साध्य देवं जामातरं विभुं॥ मुच्यते तेन पापेन यथा त्वमधुना कुरु॥ तच्छ्रुत्वा चिंतयाविष्टः विरंध्यात्वा जगा
द तां॥ धर्मज्ञ॥ राजसुखासीनं प्रियां प्रणहरेश्वरी॥ इतस्त्वं सप्तमे तीते जन्मानि ब्राह्मणी शुभा॥ आ
सीत्तस्मिंस्तदा संगात्सखीनां पर्युपासिता॥ बुधाष्टमीं सुसंपूर्णा यथोक्तफलदायिनी॥ तस्याः पुण्यं प्रद
स्व तं यदि सत्यं ममायतः॥ तेन मुच्येत नरकात्ते माता पापसंघकृत्॥ तच्छ्रुत्वा त्वरितं स्नात्वा ददौ पुण्यं
त्रिवाचकं॥ स्वमातुः श्यामला तुष्टा तेन मोक्षं जगाम सा॥ ऊर्मिलारूपसंपन्ना दिव्यांबर शुभा का॥ विमा
नवरमारूढा दिव्यमाल्यांबरान्विता॥ भर्तुः समीपे स्वर्गस्था दृश्यते द्यापि सज्जनैः॥ बुधस्य पार्श्वे
नभसि निमिराजसमीपगा॥ विस्फुरंती महाराज बुधाष्टम्याः प्रभावतः॥ युधिष्ठिर उवाच॥ यद्ये

रायबुधाष्टमीव्रतं कृते॥ तस्यसांगफलप्राप्त्यैश्चाहोमंकरोम्यहं॥ बुधप्रीत्यर्थंतसर्वमितिसंकल्प्यपूजा
येत्॥ कर्षमात्रेणराजेंद्रतदर्धार्धेनवापुनः॥ बुधस्यप्रतिमांकुर्यात्सुवर्णेनविचक्षणः॥ कर्णिकायांमध्यकुं
भेताम्रपात्रेबुधंन्यसेत्॥ पंचामृतेनस्नपनंवस्त्रयुग्मेनवेष्टयेत्॥ ध्यायेन्नारायणंदेवंबुधवारसमाकृतिं॥
चतुर्भुजंशंखचक्रगदाशार्ङ्गधरंजयेत्॥ पात्रेयंपीतवस्त्रंचपीतपुष्पाक्षतादिभिः॥ उपचारैःशौषोडश
भिःपुरुषसूक्तविधानतः॥ तद्दक्षिणेविष्णुमिदंविष्णुरित्यधिदैवतं॥ सहस्रशीर्षापुरुषंवामप्रत्यधिदै
वतं॥ दलेषुविन्यसेद्देवान्प्रागारभ्यप्रदक्षिणं॥ रविभौमकुजगुरुःशुक्रार्कीराहुकेतवः॥ अनंतंवा
मनंविष्णुंशौरिंसत्यंजनार्दनं॥ हंसंनारायणंचाष्टौदलाग्रेषुचपूजयेत्॥ धूपदीपैस्तुनैवेद्यैःफलै
श्चविविधैर्यजेत्॥ बहिरिंद्रादयःपूज्यादशदिक्पालकास्तथा॥ यमंचचित्रगुप्तंचश्यामलंदक्षिणे
यजेत्॥ कुंभेषुवंशपात्रेषुभक्ष्याण्यष्टौचलड्डुकान्॥ यज्ञोपवीतान्सफलान्दक्षिणासहितान्न्यसेत्॥
पूजयित्वाततोहोमंशाखोक्तविधिनाबुधः॥ मंडलात्पश्चिमेभागेस्थंडिलंचतुरस्रकं॥ कृत्वातूल्लेख

नादीनिकृत्वाग्निंस्थाप्यसुधीः॥ इध्मादर्भपरिस्तीर्यपात्रासादनमाचरेत्॥ पूर्णपात्रनिधानांतेआज्यासन
मतःपरं॥ इध्माधानमुखप्रांतेप्रधानाहुतिर्विहितेन॥ अपामार्गसमिद्भिश्चयवव्रीहितिलैर्घृतैः॥ गोधूमै
सतिलैर्होमैःपृथकपृथमतोद्वितः॥ उद्बुध्यस्वेतिमंत्रेणहोममष्टोत्तरंशतं॥ मंत्रेणविष्णुर्जुहुयात्
तथानारायणंहुनेत्॥ आधिपत्याधिदेवौचमंत्राभ्यांजुहुयात्तयोः॥ ग्रहादिभ्यश्चजुहुयात्स्वाहायश्चितादि
कंतथा॥ पूर्णाहुतिंचजुहुयात्कुर्याद्ब्रह्मविसर्जनं॥ पूर्णपात्रोद्वासनंचबलिदानमतःपरं॥ वस्त्रादि
पूजनंकृत्वादेवतोद्वासनंततः॥ अभिषिच्याथतिलकंरक्षाबंधनमेवच॥ आचार्यंचसपत्नीकं
पूजयित्वायथाविधि॥ प्रतिमावस्त्रकलशान्गोदानंदक्षिणांतथा॥ दत्वाब्रह्मादिविप्रेभ्यःकल्प
शांश्चसदक्षिणान्॥ ब्राह्मणान्भोजयेत्पश्चादाशिषोवाचयेत्तथा॥ ॥इतिश्रीभविष्योत्तरपुरा
णेबुधाष्टमीव्रतोद्यापनं॥ ॥अथदुर्वादिश्रावणकृष्णाष्टम्यांदशाफलव्रतं॥ तत्रपूजाविधिः॥
नमद्भुतंबालकमंबुजेक्षणंचतुर्भुजंशंखगदाद्युदायुधं॥ श्रीवत्सलक्ष्म्यागलशोभिकौस्तुभंपी

त्विहसदाममा॥ वायनं॥ श्रीकृष्णप्रतिगृह्णातिश्रीकृष्णोवैददातिच॥ श्रीकृष्णस्तारकोभाभ्यांश्रीकृष्णा
यनमोनमः॥ ॥इतिपूजाविधिः॥ अथकथा॥ श्री॥ सूतउवाच॥ शृणुध्वमृषयःसर्वेनैमिषा
रण्यवासिनः॥ पुराकृतयुगस्यादौकृष्णादेवेनभाषितं॥ तंव्रतयःप्रवक्ष्यामिसांगोपांगंमुनीश्व
राः॥ पुरावैद्यूपरस्यांतेपांडवाःकौरवास्तथा॥ द्यूतप्रचक्रिरेसर्वेधनमानेनमोहिताः॥ निर्जिताःपां
डवादुःखाद्वनंप्रापुर्मुनीश्वराः॥ कुंतीविदुरगेहेतुसंस्थितातुमहायशा॥ तच्छ्रुत्वाकृष्णदेवोपिकृपया
परयायुतः॥ आययौगरुडस्थोवैविदुरस्यगृहंप्रति॥ तत्रापश्यन्महातेजाःकुंतींपरमहर्षितां॥ विदुरे
णार्चितःकृष्णःकुंतीचैवाह्लादितः॥ नत्वाहकुंतितांदेवीअश्रुश्यामेविदुंवयत्॥ त्वत्पुत्रास्तुमहादुः
खाद्यापन्नुर्गहनंवनं॥ तथापिसुमहद्दुःखंसर्वेदातन्ममाप्रियं॥ कुंत्युवाच॥ हृषीकेशमहादुः
खेनकर्षिता॥ कृपयापरयादेवरक्षितावयमीदृशाः॥ ममचैवमहद्दुःखंत्वयिजामातरिस्थिते॥
मत्पुत्रास्तेमहद्दुःखात्प्रविष्टागहनंवनं॥ कृपयाविदुरोमह्यंकौरव्यंप्रच्छसंमितं॥ ददातिप्रीतिदः

१०

कृष्णजीवन्मयमहागतिः॥ गृहस्यपश्चिमेभागेवसामंबजनार्दन॥ दर्शिताकौरवाणांहिसर्वेषांकुमतिस्त
था॥ इतितस्यवचःश्रुत्वाकृष्णःपरमधर्मवित्॥ आहचैनांवासुदेवोभक्तप्रियतमस्तदा॥ व्रतंतेकथयिष्या
मियेनदुःखात्प्रमुच्यते॥ पुत्रपौत्रैःपरिवृत्तास्त्वंराज्यंप्राप्स्यतेभवान्॥ दशाफलमितिख्यातंतद्व्रतंकुरुस्व
व्रते॥ कुंत्युवाच॥ कस्मिन्कालेतुकर्तव्यंतद्व्रतंकेशवप्रभो॥ वदमाप्रतितत्त्वज्ञोजगादयादवेश्व
रः॥ श्रावणस्यसितेपक्षेकृष्णाष्टम्यांनिशीथके॥ देवक्यांवासुदेवश्चप्रादुर्भवतिकेशवः॥ तस्य
दशागुणितंसूत्रंकृत्वाप्रपूजयेत्॥ हस्तेबध्वातुतत्सूत्रंदशाहंव्रतमाचरेत्॥ संसारार्णवमग्नानां
नराणांपापकर्मणां॥ इहामुत्रफलंवामिकुरुष्वपुरुषोत्तम॥ अनेनदोरकंबध्वादशवर्षंव्रतंचरेत्॥
देवस्यपुरतोनित्यंदशपद्मानिकारयेत्॥ ततश्चशृणुयात्पुण्यांकथामेतांशुभावहां॥ तुलस्या
कृष्णवर्णायादलैर्दशभिरर्पयेत्॥ कृष्णंविष्णुंतथानंतंगोविंदंगरुडध्वजं॥ दामोदरंहृषीकेशंपद्म
नाभंहरिंप्रभुं॥ एतैश्चनामभिर्नित्यंकृष्णदेवंसमर्चयेत्॥ नमस्कारंततःकुर्यात्प्रदक्षिणासमन्वि

तं॥ एवं दशदिनं कुर्याद्द्विजानामुत्तमं व्रतं॥ आदौ मध्ये तथा चांते होमं कुर्याद्विधानतः॥ कृष्णमंत्रेण जुहु
याच्चरुणाष्टोत्तरं शतं॥ ततो होमांते विधिना आचार्यं पूजयेत्सुधीः॥ सुवर्णताम्रपात्रे वा मृन्मये वेणु
पात्रके॥ तुलसीदलं सुवर्णे कारयित्वा सुलक्षणं॥ प्रतिमां च तथा कृत्वा अर्चयित्वा विधानतः॥ निधाय
प्रतिमां तत्र आचार्याय निवेदयेत्॥ दातव्य गोसवत्सा च वस्त्रालंकारभूषिता॥ दशाहोमे तु कृष्णाय पू
रिका दश चार्पयेत्॥ दापयेत्तु ब्राह्मणाय स्वयं भुक्त्वा तथैव च॥ उपायनं गृहीत्वा तं सर्वोपस्करसंयु
तं॥ संसारार्णवमग्नं मां पाहि मां देवकीसुत॥ अनेनोपायनं दत्वा नमस्कृत्वा क्षमापयेत्॥ दक्षिणां
भियुतां देवि दातव्या कृष्णसन्निधौ॥ व्रतांते दश विप्रेभ्यः प्रत्येकं दश पूरिका॥ एवं दश सुवर्षेषु व्रतं कु
र्यान्नरोत्तम॥ एवं व्रतं त्वया देवि कर्तव्यं कृष्णसन्निधौ॥ एवमुक्त्वा तु कृष्णेन कुंती श्रुत्वा मुदान्विता॥
उवाच कृष्ण देवं त्वं मम चित्तं न विद्यते॥ प्रत्यवाच हृषीकेशः शास्त्रवित्तं भविष्यते॥ एवमुक्त्वा ययौ कृष्णः
कर्णदृष्टं सुखान्वितः॥ कर्णोपि च महात्मानं कृष्णं दृष्ट्वा हृष्टप्रहर्षितः॥ सिंहासने ददौ तस्मै पाद्यता २१
तिदुःखिता॥ ब्रवि मयात्तथा कृष्ण मातरं याम्यहं --- ॥ कथं वदुःखिता मे सा मुच्येत दस्वके॥ श्री

तांबरसांद्रपयोदसौभं॥ महार्हवैडूर्यकिरीटकुंडलत्विषापरिष्वक्तसहस्रकुंतलं॥ उद्दामकांच्यंगदकंक
णादिभिर्विरोचमानं वासुदेव ईक्षितः॥ श्रीगोपालकृष्णाय नमः॥ ध्यायामि॥ वासुदेवाय० आवाहया
मि॥ शेषशायिने०॥ आसनं॥ तीर्थपादाय०॥ पाद्यं॥ गंगाजनकाय० अर्घ्यं॥ यमुनावेगसंहारिणे०।
आचमनं॥ विश्वमुक्ताय०॥ पंचामृतं॥ कृष्णायनमः॥ शुद्धोदकस्नानं॥ पीतवाससिने० वस्त्रं॥ यज्ञप्रियाय०
यज्ञोपवीतं सम०॥ सर्वेश्वरा०॥ गंधं॥ अधोक्षजाय०॥ अक्षतान्॥ कमप्रियाय०॥ पुष्पाणि तुलसी
दलं समर्पयामि॥ कृष्णाय०॥ विष्णवे० हरये० शेषशायिने० गोविंदाय०॥ गरुडध्वजाय० दामोद
राय० हृषीकेशाय० पद्मनाभाय० उपेंद्राय० संसारार्णवमग्नानां नराणां पापकर्मणां॥ इदं मोक्ष
फलासि कुरुष्व पुरुषोत्तम॥ दोरबंधनं॥ पारिजातापहारकाय०॥ वनस्पति धूपं॥ ज्ञानप्रदाय दीपं॥
चक्रिणे० नैवेद्यं॥ पद्मनाभाय० नीराजनं॥ देवदेव नमस्तेस्तु भक्तप्रिय कृपानिधे॥ गृहाणार्घ्यं मया
दत्तं देवक्या सहितो प्रभो॥ अर्घ्यं त्रिलोचनाथो देवेशः सर्वभूतदयानिधिः॥ दानेनानेन सुप्रीतो भव

श्रीकृष्ण उवाच॥ सुवर्णपात्रे संपूर्णे पायसं क्षीरसंयुतं॥ सहस्रं तु यदातव्यं विप्रवावायुहस्तके॥ तव माता न थाप्रीता भवि
ष्यति न संशयः॥ एवमुक्त्वा तथा कृष्णो द्वारकां संजगाम सो॥ पंचभक्ष्यसमायुक्तं पात्रं स्वर्णेन कारितं॥ शतनिष्कसमा
युक्तं पात्रं स्वर्णेन कारितं॥ शतनिष्कसमायुक्तं वायुर्हस्ते प्रदापसः॥ प्रसहैवैतथा कुंती पात्रं दृष्ट्वाथ हर्षिता॥ देवस्य
संनिधौ कुंतीव्रतं चक्रेथ भक्तितः॥ कृष्णेन कारितं सर्वं मम भाग्याय वै ध्रुवं॥ कृष्णपूजां ततः कृत्वा कथां श्रुत्वाथ
पूर्ववत्॥ उपायनं ददौ पात्रं ब्राह्मणेभ्यो यथाक्रमं॥ तुलसीदलं सुवर्णेन कारयित्वा सुलक्षणं॥ प्रतिमां विष्णुभक्त्या
य स्वर्णपात्रे निधाय च॥ गोदानेन समायुक्ता आचार्याय महामते॥ कुंती ददौ महादेवि विष्णुर्मे प्रियतामिति॥ व्र
तं दश सुवर्षेषु चकारोद्यापनं ततः॥ तद्व्रतस्य प्रभावेन तनूजाश्चागतास्ततः॥ हत्वा शत्रून्मृधे सर्वान् कृष्णस्यैव
प्रसादतः॥ युधिष्ठिरस्तु धर्मात्मा स्वराज्यं प्राप्तवान्सुधीः॥ प्रोवाचेदं व्रतं कुंती द्रौपदी च पतिव्रता॥ दशाफलमिति
ख्यातं कृष्णदेवेन भाषितं॥ एतत्सर्वं महादुःखान्वितस्त्रीयस्त्विपुरीगतिं॥ व्रतस्यास्य प्रभावेन कृष्णस्यैव प्रसा
दतः॥ त्वमप्येवं व्रतं भद्रे कुरु षस्तु समाहिता॥ पुत्रपौत्रैः परिवृता सर्वान्कामानवाप्स्यसि॥ आचष्टो व्रतं तस्मै कुंती
परमहर्षिता॥ सा च चक्रे महाभागा द्रौपदी व्रतमुत्तमं॥ तस्मात्सर्वप्रयत्नेन कर्त्तव्यं सुजनैः सदा॥ सद्भक्त्या कुरुते

नारीव्रतानामुत्तमं व्रतं ॥ सर्वान्कामानवाप्नोति विष्णुलोके महीयते ॥ इदं व्रतं महापुण्यं व्रतानामुत्तमं व्रतं ॥ वदतां शृण्व
तांचैव विष्णुलोके भवेत्स्फुटं ॥ ॥ इति श्रीभविष्योत्तरे दशाफलव्रतं ॥ ॥ अत्रमुल्लंचित्यं ॥ अथ कृष्णादिमासेन भाद्र
कृष्ण अष्टम्यां जन्माष्टमीव्रतं ॥ तच्चार्धरात्रिव्यापिन्यां कार्यं ॥ रोहिणीसहितकृष्णामासि भाद्रपदेऽष्टमी ॥ अर्धरा
त्रेतयोर्योगं तारापत्युदये तथा ॥ नियतात्मा शुचिः सम्यक्पूजां तत्र प्रवर्त्तयेदिति विष्णुधर्मोत्तरे ॥ तस्य काल
लोक्तं ॥ दिनद्वये अर्धरात्रव्याप्त्यभावे व्याप्तौ चापरेव प्रातःसंकल्पकालसत्वाद्दिवारात्रियोगाद्वर्जनीया प्रयत्नेन
सप्तमीसंयुताष्टमीति ब्रह्मवैवर्त्ते सप्तमीयुक्तानिषेधाच्च यदा पूर्वेद्युर्निशीथे केवलाष्टमी उत्तरेद्युर्निशीथ
स्पर्शिन्यष्टमी रोहिणीयुक्ता तदा पूर्वैव ग्राह्या कर्मकालसत्वात् ॥ रोहिणीयोगस्तु केवलं फलातिशयार्थो न
वमीबुधादियोगात् ॥ ननु निर्णयो योगे इतरथा प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः ॥ यैः कृता श्रावणे
मासि अष्टमी रोहिणीयुता ॥ किं पुनर्बुधवारेण सोमेनापि विशेषतः ॥ किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्ति
देति पाद्मवचसा सरोहिणीमष्टमीं विहाय बुधनवमीयुता कार्या यद्येता सोमः सोमवार इति केचित् ॥ ताराप
त्युदये तथेति विष्णुधर्मोत्तरे कमूलकल्पनालाघवाच्चंद्रोदयनितानतरपाः ॥ उदये चाष्टमी किंचिन्नवमी स ९२

स्यस्तावकत्वेन सार्थक्यात्॥ किं चैतद्वचनद्वयगतापि शब्दस्य स्वार्थे तात्पर्याभावेन अष्टमीयोगस्य स्तावकत्वेन
प्राशस्त्यबोधवत्स्यैवोचितत्वादिति॥ यत्पुनस्तत्रोक्तं कर्मकालव्याप्तिशास्त्रादेव प्रधानभूताया अष्ट
म्याएवार्धरात्रसत्वेन प्राप्तं ग्राह्यत्वं दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला॥ रात्रियुक्तां प्रकुर्वीत
विशेषेणेंदुसंयुतामिति वचनेन रोहिणीयोगाभावविषयं क्रियते॥ एवं तस्यार्थः। दिवावच्छेदेन रात्र्यव
च्छेदेन वा कलामात्रापि चेद्रोहिण्यष्टम्यां नास्त्येतदेव चंद्रोदयसंयुता अर्धरात्रिव्यापिनीमिति याव
त्॥ दिनद्वयेपि तादृश्य अभावे बहुरात्रिसंयुतामुत्तरां कुर्वीतेत्येवेति॥ तन्नेति तान वरणाः। नेदं कर्मका
लशास्त्रबाधकमन्यथाप्यर्थसंभवात्तथाहि॥ दिनद्वये वैषम्येणा निशीथस्पर्शे अहोरात्रावच्छेदेन रोहि
णीयोगाभावे च विशेषणाधिक्ये नइंदुसहिता अधिकनिशीथव्यापिनामपि विहाय परिस्वल्पनिशीथव्या
पिनी रोहिणीयुतैव ग्राह्येति अत्र क्षिपंति केचित्॥ वैषम्येणा निशीथस्पर्शस्याशब्दस्यार्थस्य न वाक्यार्थे
तिर्गतत्वकल्पनमुचितं॥ नापि रात्रियुक्तां प्रकुर्वीतेति तृतीयया दवैप्यर्थे च स्वीकर्तुमुचितं॥ रोहिणी
योगानुरोधेनाधिकनिशीथव्यापिनो विहाय स्वल्पनिशीथगायाग्रहेपो कर्मकशास्त्रस्य पक्षे बाधा

१३

वश्यंभावेन वचनस्वरसात्प्रतीयमानस्य सर्वदेव बाधः स्वीकर्तुमुचित इति सर्वथैव नेदं वाक्यं कर्मकालशास्त्र
बाधमंतरेणा मथासिद्धं॥ उदये चाष्टमी न्यत्रोदयपदस्य चंद्रोदयपरत्वे सकला नवमीत्यस्यान्वयापत्तेः नाहि
निशीथोत्तरप्रवृत्तां नवमीं केचिदपि सकालत्वेन व्यवहारेयुः बुधवारस्य तु नरोहिणीतुल्यत्वं रोहिणीप्रापक
दिवावेन्यादिवाक्यबुधप्रापकानमथासिद्धवचनाभावात्॥ विह्निपुराण विष्णुरहस्यवचनयोर्मुहूर्तपदस्य
तद्वर्तिकलापरत्वे च वचनयोरानर्थक्यं मुहूर्तमपीत्यपिशब्दनन्वश्च मुख्यकालस्य तत्र संबंधे हि सत्यकचि
त्काल्ययोगमात्रद्योतकोपिशब्दः संगतः दिनद्वये निशीथव्याप्तौ वाप्तौ वा एतद्वचनद्वयस्य साव
काशागते मुहूर्तपदस्य स्वोक्तनिशीथपरत्यागप्रसंग एकदिने एव रोहिणीपरदिने बुधस्तदा निर्णयाभावप्र
सपायेन॥ तत्स्मात्षष्टिदंडामपि केवलाष्टमीं विहाय घटिकादिमात्रापि रोहिणीसहितापरैवेत्याहुः॥ तन्न विशेष
पदस्याधिक्यार्थस्येंदुशब्दार्थार्धरात्रपदार्थेन्वयेन वैषम्यस्य शब्दार्थत्वात्॥ तृतीयपादस्यानुवादकत्व
मेव यत्तु विशेषपदस्य रात्रिपदेनान्वयं कृत्वा रोहिणीयोगाभावेधिकरात्रिव्यापिनी ग्राह्येति साधक्य
मुक्तं दिनद्वये निशीथाव्याप्तौ पूर्वेद्युरधिकरात्रिव्याप्तिसत्त्वे न पूर्वेद्युर्व्रतापत्ते माघवादिसर्व[illegible]बंधकारा नि

णामनिष्टत्वादयुक्तंतेनानुवादत्वसमाधानंविनानविस्तारः॥ यत्त्वन्यनिशीथागाग्रहणेकर्मकालशास्त्रबो
धोस्त्येवेतितत्रबाधोद्यनन्यथा तिकागतिर्यावताबाधंविनाशास्त्रंनन्यगतिकंभवतितावतैवबाधस्यांगी
कर्त्तुमुचितत्वात्॥ नहिव्रीहिशास्त्रेणयवशास्त्रस्यसार्वत्रिकोबाधोभ्युपगम्यतेतेनवाऽतस्येति॥ यत्तुउदयप
पदस्यचंद्रोदयापरत्वेसकलेत्यस्यानन्वयइति॥ तत्रभवन्मतेपिमुख्यसाकल्यस्यासंभवोनाष्टमीप्रति
पाधिकाधिक्यरूपस्यैववक्ष्यमाणस्यग्रहणोचितत्वात्॥ तथाच॥ उदयेचाष्टमीकिंचिदितिवचनंतातच
रणव्याख्यातदिवावेल्यादिवद्दिनद्वयेवैषम्येणनिशीथस्पर्शाभावएवयोज्यं उदयेचंद्रोदयेनिशीथाख्य
मुहूर्तेतियावत्॥ किंचित्॥ स्वल्पात्तदुत्तरंनवमीसकला॥ निशीथात्तदुत्तरकालव्याप्ता॥ किंचित्पदस
कलपदयोरस्थवलायएवंचदिनद्वयेवैषम्येणनिशीथस्पर्शोलभ्यते॥ तथाचस्वल्पनिशीथयुक्ताम्य
ष्टमीबुधरोहिणीयुक्ताग्राह्यानत्वधिकनिशीथव्यापिनीतद्रहितेति॥ उदयपदस्यसूर्योदयपरत्वे
तुउदयव्यापिनीग्राह्येत्येवावचस्यत्॥ ननुकिंचिन्नवमीसकलेति॥ नचनवमीदिनएवास्य
निशीथस्पर्शेकिंचित्पदसकलपदयोमथवत्तेनदिनद्वयेवैषम्येणास्पर्शएतद्वचनप्रवृत्तिः कथमिति १४

कलायदि॥ भवेत्तुबुधसंयुक्ताप्राजापत्यर्क्षसंयुता॥ अपिवर्षशतेनापिलभ्यतेयदिवानवेतितत्रोदयशब्दश्चंद्रोद
यपरः सूर्योदयपरत्वेतुयदापूर्वेद्युर्निशीथैकेवलाष्टमीउत्तरेद्युश्चनिशीथास्पर्शान्यष्टमीरोहिणीयुक्तासती
बुधायुक्तातदेवोत्तरास्यात्रतदभावोयावद्वचनवाचनीकमितिन्यात्॥ यदित्तुबुधभावेपिरोहिणीयोगमात्रा
देवोत्तरोच्यतेतदारोहिणीयोगाभावेपिबुधमात्रसद्भावादुत्तरस्यादन्यतरायायेप्येतद्वचनप्रवृत्तेरंगीकारा
त्॥ ऋक्षयोगवद्वारयोगस्यापिप्राशस्त्यहेतुत्वाच्च अनोधर्मजरतीयंस्यात्॥ किंचयथापूर्वेद्युर्निशीथेष्टमी॥
मात्रसत्वेउत्तरेद्युश्चस्वल्परुक्षयोगेबुधसत्वेचैतद्वचनादुत्तरेद्युर्व्रतंएवंपूर्वेद्युर्निशीथेसन्नरुक्षाष्टमीसत्वेबुधा
धिक्यादुत्तरेद्युर्व्रतापत्तिरितिव्यक्तंविष्णुरहस्येप्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी॥ मुहूर्तमपिलभ्येतसै
षोपासामहाफलेत्युत्रापिमुहूर्त्तपरंनिशीथाख्यमुहूर्त्तपरमितिपितामहचरणाबलिदमर्थंतासुधंतथात्वे
वाक्यस्यैवानर्थक्यप्रसंगात्॥ यदाहिशुद्धाप्यष्टम्यहोरात्रेवर्त्तमानाग्राह्यातदारोहिणीसहितासुतरामिति
किंवचनेनमुहूर्त्तमप्यहोरात्रेयस्मिन्युक्ताहिलभ्यते॥ अष्टमीरोहिणीयुक्तानक्षत्रसंयुता॥ सुपुण्यामुपावासेदिति
विष्णुरहस्यएवस्पष्टैवाहोरात्रसंबाधयत्किंचिन्मुहूर्त्तप्रातातिरिक्तिकालत्वविवेचनेनाद्विपरीतंऋक्षयोग

कालःसविज्ञेयस्तत्रजातोहरिःस्वयमितिवचनेनार्धरात्रेरोहिणीयोगस्यमुख्यकालत्वेननिर्णयत्वात्॥
नान्यः॥अहोरात्रसंबंधस्यन्नवमीयोगस्यचनिर्णायत्वात्॥ अत्रेदंवक्तव्यं॥ यदिदिवावायदिमुहूर्त्तमथ
होरात्रेप्राजापत्यऋक्षसंयुक्तेत्यादीनानिशातारव्यकर्मकालबाधकत्वेयथापूर्वेद्युरोहिणीरहितांषष्ठि
दंडामप्यष्टमींत्यक्त्वादंडादिमात्रावशिष्टायारोहिणीयुतायामुत्तरेद्युरेवव्रतमित्युच्यते॥एवंदिनद्वयेनि
शीथव्यापिनींपूर्वेद्युरेवनिशीथात्पूर्वंरोहिणीयुक्तांतथापूर्वेद्युरेवसूर्योदयमारभ्यप्रवृत्तरोहिणी
युतांनिशीथोत्तरप्रवृत्ताउत्तरेद्युरोहिणीरहितांनिशीथगामथाष्टमींत्यक्त्वाकथन्नपूर्वेद्युर्व्रतानुष्ठानमि
तिसुधियएवविवेचयंतु॥एतत्प्रोक्तं॥ सकल्यात्मकव्रतस्यप्रधानत्वेनप्रातःसंकल्पयेद्विद्वानुपवासव्र
तादिकमितिप्रातःकालस्यप्रधानकालत्वेनतद्व्यापिन्येवग्राह्येतितदयुक्तं॥रोहिणीसहितनिशीथ
गायाअपित्यागापत्तेः॥मुख्यःकालःसविज्ञेयइत्यादेस्तदपवादत्वेतुदिवावेत्यादिनाअर्द्धरात्रव्याप्ता
बाधइवप्रातःकालस्यसामान्यशास्त्रत्वेनबाधापत्तिर्दुर्वारेवेति॥एतेनमुहूर्त्तकलापदयोरर्धरा

त्रवर्तिकलापरत्वेवचनार्थस्यपादनमपिशास्त्रानन्वयात्तिश्चेत्यपास्तं॥ ननुनिशीथोत्तरप्रवृत्ताष्टमीदिनएव
नपूर्वरोहिणीयोगोनपरेद्युरित्युदाहरणस्यासंभवान्नपूर्वेद्युर्व्रतानुष्ठानाभावापत्तिरितिचेन्न॥सप्तमी
संयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम॥प्राजापत्यंद्वितीयेन्हिमुहूर्त्तार्धंभवेयदि॥इतिवचनेयद्विमुहूर्त्तार्धंभ
वेदितिमुहूर्त्तार्धसंभवनयाकदाचित्तदभावस्यापिसंभवेनोदाहरणसंभवात्॥ पारणातिथिभान्तेका
व र्या॥ तदाहभृगुः॥जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच॥पूर्वविद्धाचकर्त्तव्यातिथिभान्तेचपार
णानिषेधोपिब्रह्मवैवर्त्ते॥ अष्टम्यामथरोहिण्यांनकुर्यात्पर णंक्वचित्॥ हन्यात्पुराकृतंकर्मउप
वासार्जितफलं॥तिथिरष्टगुणंहन्तिनक्षत्रंचचतुर्गुणं॥तस्मात्प्रयत्नतःकुर्यात्तिथिभान्तेचपारणामि तः
तिमुख्यःपक्षः॥एकतरान्तस्त्वनुकल्पः॥यदातुतिथिनक्षत्रयोरन्यतरस्यैवदिनस्तदारात्रौपारणानि
षेधादन्यतरान्तेपारणाभ्यनुज्ञानाद्दिवैवान्यतरान्तेकार्यं॥अतएववह्निपुराणे॥ भान्तेकुर्यात्तिथे
र्वापिशास्त्रभारतपारणमिति॥ ॥अथजन्माष्टमीव्रतप्रयोगः॥ व्रतपूर्वदिनेदंतधावनंकृत्वोपवास

दिने प्रातः सूर्यः सोमो यमः कालो संध्ये भूतान्यहः । क्षपा पवनादिक्पतिर्भूखराकाशखचरा नराः ॥ ब्राह्मं
शासनमास्थाय कल्पध्वमिह संनिधिमिति उक्त्वा ससफलपुष्पाक्षतजलपूर्णताम्रपात्रमादाय मा
सायुल्लिख्यामुकफलकामः पापक्षयकामो वा कृष्णप्रीतये कृष्णजन्माष्टमीव्रतं करिष्ये । वासुदेवं समुद्दि
श्य सर्वपापप्रशांतये ॥ उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहं ॥ अद्य कृष्णाष्टमीं देवीं नभश्चंद्रसरो
हिणीं ॥ अर्चयित्वोपवासेन भोक्ष्येहं परमेहनि । एनसो मोक्षकामो ऽस्मि यद्गोविंद त्रियोनिजं ॥ तन्मे
मुंच मां त्राहि पतितं शोकसागरे ॥ आजन्ममरणं यावद्यन्मया दुष्कृतं कृतं ॥ तत्प्रणाशाय गोविंद प्र
सीद पुरुषोत्तम ॥ इत्युक्त्वा पात्रस्थं जलं क्षिपेत् ॥ ततः कदलीस्तंभवासोभिराम्रपल्लवयुतसजलपूर्णक
लशैर्दीपैः पुष्पमालादिभिर्युतमगरुधूपितं अग्निखड्गकृष्णछागरक्षामणिद्वारं न्यस्तमुसलादि
युतं मंगलोपेतं षष्ठीदेव्याधिष्ठितं देवक्याः सूतिकागृहं विधाय तस्य समंताद्भित्तिषु सकुसुमांजलीन्
देवगंधर्वादीन् खड्गचर्मधरवसुदेवदेवकीनंदयशोदागर्गगोपीगोपान् कंसनियुक्तान् गोधेनु

१६

वाच्यं ॥ तथात्वे कर्मकालशास्त्रादेव प्राप्तेरेतद्वचनवैयर्थ्यापत्तेः ॥ तस्मादिदं शास्त्रैतद्वचनस्य विषयो
वाच्य इति ॥ किं चैतद्वचनोपात्तसकलत्वं दुर्वचं तथाहि किं षष्टिघटिकाव्यापित्वं तत् ॥ उताष्टम्युत्तरमास्
योदयव्यापित्वं ॥ उतोक्तपक्षान्यतमत्वं ॥ नाद्यः सूर्योदये किंचिदष्टमीसत्वे तादृशनवम्यस्तदहोरात्र
संभवात् ॥ दिनांतरमादाय षष्टिदंडायासत्वेपि तत्र सकलव्यवहाराभावात् ॥ उदयमारभ्य द्वितीयोद
यव्यापित्वे तथा वसकलत्वव्यवहारात् ॥ तस्मात्सकलत्वमष्टमीप्रतियोगिकाधि ॥ स्वस्वरूपं स्वस्वरू
पं पारिभाषिकमेव वाच्यं ॥ तच्च सूर्योदये चंद्रोदये वा किंचिदष्टमीसत्वे वेति ॥ यत्तु बुधवारप्रापकवच
नांतरविरहान्न रोहिणीतुल्यत्वं त्यक्तं ॥ तन्न नहि सर्वत्र वचनांतरप्राप्तस्यैव रोहिणीतुल्यत्वमिति
नियमः भवद्भिरेव नवमीयोगस्यैतद्वचनमात्रोपात्तस्यापि निर्णायकत्वस्यासकृदुक्तत्वात् ॥ यच्चोक्तं
एकदिन रोहिणीपरदिने च बुधस्तदा निर्णयाभाव एवापद्येत तदपि न तत्र निर्णयाभावापादनं किं दि
नद्वये कर्मकालस्यैसत्वेऽसत्वे वा नाद्यः अष्टमीरोहिणीपरदिने तु बुधस्तदा निर्णयाभाते यदि । मुख्य

जरान् यमुनां तन्मध्ये कालीयं अन्यञ्च तत्कालीनं गोकुलचरितं यथासंभवं लिखित्वा सूतिकागृहमध्ये
प्रच्छदपटवृतामंबुकं स्तनपायितमध्याह्नेन द्याजलेतिलैः स्नात्वा अर्धरात्रे सपरिवार कृष्णपूजां करिष्य इति
संकल्प्य॥ कांचनी रजती ताम्री पैत्तली मृन्मयी तथा॥ वार्क्षश्मणीमयी चैव वर्णकैर्लिखिताथवे॥ त्वकत्वा
न्यमेन प्रतिमां विधाय अग्न्युत्तारणं कृत्वा प्रतिमाकपोले स्पृष्ट्वा॥ तद्देवतानाममूलमंत्रैः प्रणवादि चतुर्थ्यंतं ना
मवा अस्मै देवत्वं संख्यायै स्वाहेति च मंत्रं पठन् प्राणप्रतिष्ठां कुर्यात्॥ अस्मादित्यस्य स्थाने तत्तद्देवताना
मग्राह्यं॥ यागद्भिः किन्नराद्यैः सततपरिगता वेणुवीणानिनादैर्भृंगारादर्शकुंभप्रचुरतरकृतैः सेव्यमा
ना॥ पर्यंके स्वापि मूर्ते या मुदितत्तरमुखी पुत्रिणी सम्यगास्ते सा देवमाता जयति सुव[illegible]देवकी दिव्य
रूपा॥ इति देवकीमां चापि बालकं सुप्तं पर्यंके स्तनपायिनं॥ श्रीवत्सवक्षसं शांतं नीलोत्पलदलछ
विमिश्री कृष्णं ध्यात्वा॥ ओं नमो देव्यै श्रियै इति श्रियं॥ योगेश्वराय देवाय योगानां पतये विभो॥ योगो
द्भवाय नित्याय गोविंदाय नमो नमः॥ धूपादौ॥ विश्वेश्वराय देवाय तथा विश्वोद्भवाय च॥ विश्वस्य पत

येतुभ्यं गोविंदाय नमो नमः॥ नैवेद्यं॥ गारुडे॥ यज्ञार्येयज्ञेश्वराय यज्ञपतये यज्ञांगाय गोविंदाय नमो नमइत्य
हो सर्वेषां यज्ञपदानां स्थानयोगपदान्युक्त्वा यमेवमंत्रः स्नाने विश्वेश्वरायेत्युक्त्वा॥ नैवेद्यं॥ धर्माधर्मेश्व
रायेत्यादिःस्वाहांतस्तिलैःहोमो विश्वाय विश्वेश्वरायेत्यादिश्चंद्रपूजयामिति मंत्रा उक्ताः॥ ततो गव्य
घृतेनाग्नौ वसोर्धाराकुर्विद्गुडघृतेनेति ततो जातकर्मनालछेदषष्ठीपूजानामकर्माणि॥ ततश्चंद्रोदये रो
हिणीयुतं चंद्रं स्थंडिले प्रतिमायां वाममंत्रैः संपूज्य॥ शंखे तोयं समादाय रक्तपुष्पकुशचंदनं॥ जानु
भ्यां धरणीं गत्वा चंद्रार्घ्यं निवेदयेत्॥ क्षीरोदार्णवसंभूत आत्रिगोत्रसमुद्भव॥ गृहाणार्घ्यं शशांकेमं रोहि
ण्या सहितो ममेति॥ ततो ज्योत्स्नायाःपतये तुभ्यं ज्योतिषां पतये नमः॥ नमस्ते रोहिणीकांत सुधावास
नमोस्तुते॥ नमो मंडलदीपाय शिरोरत्नाय धूर्जटेः॥ कलाभिर्वर्धमानाय नमश्चंद्राय चारवे इति प्रण
मेत्॥ ततः अनघ वामनं शौरिं वैकुंठं पुरुषोत्तमं॥ वासुदेवं हृषीकेशं माधवं मधुसूदनं॥ दामोदरं प
द्मनाभं केशवं गरुडध्वजं॥ गोविंदमच्युतमनंतमपराजितं॥ अधोक्षजं जगद्बीजं सर्गस्थित्यंतका १७

रणे ॥ अनादिनिधनं विष्णुं लोकेशं च त्रिविक्रमं ॥ नारायणं चतुर्बाऊं शंखचक्रगदाधरं ॥ पीतांबरधरं नित्य
वनमालाविभूषितं ॥ श्रीवत्सांकं जगत्सेतुं श्रीकृष्णं श्रीधरं हरिं ॥ शरणं तु प्रपद्येहं सर्वकामार्थसिद्धये ॥ प्रणमामि
सदा देवं वासुदेवं जगत्पतिमिति मंत्रैः प्रणम्य ॥ त्राहि मां सर्वग श्रीश हरे संसारसागरात् ॥ त्राहि मां सर्वपा
पघ्नदुःखशोकार्णवात्प्रभो ॥ सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे ॥ देवकीनंदन श्रीश हरे संसारसागरात् ॥
त्राहि मां सर्वरोगघ्नरोगशोकार्णवाद्धरे ॥ दुर्गतोस्त्रायसे विष्णो ये स्मरंति सकृत्सकृत् ॥ सोहं देवातिदु
र्वृत्तस्त्राहि मां शोकसागरात् ॥ पुष्कराक्ष निमग्नोहं मायाविज्ञानमत्सरात् ॥ त्राहि मां देवदेवेश त्वत्तो ना
स्तीति रक्षिता ॥ यद्बाल्ये यच्च कौमारे यौवने यच्च वार्धके ॥ तत्पुण्यं वृद्धिमाप्नोति पापं हर हलायुधेति
मंत्रैः प्रार्थयेत् ॥ ततस्तोत्रं पठन्पुराणश्रवणादिना जागरणं कृत्वा द्वितीयेह्नि प्रातः ॥ कालीनं नित्यं कृ
त्वा पूर्ववद्देवं पूजयित्वा ब्राह्मणान् भोजयित्वा तेभ्यः सुवर्णधेनुवस्त्रादिकं कृष्णो मे प्रीयतामिति दत्वा यं
देवं देवकी देवं वसुदेवाद्जीजनत् ॥ भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥ सुजन्म वासुदेवाय

गोब्राह्मणहितायच॥शांतिरस्तुशिवाचास्त्वित्युक्त्वाप्रतिमामुद्वास्यतांब्राह्मणायदत्वापारणंकृत्वाव्रतंसमाप
येत्॥सर्वायसर्वपतयेसर्वसंभवायगोविंदायनमोनमइतिपरिणायां॥भूतादिभूतपतयइत्यादिसमापनेनचमंत्रैः
इतिजन्माष्टमीव्रतपद्धतिः॥ अथजन्माष्टमीव्रतं॥युधिष्ठिरउवाच॥ जन्माष्टमीव्रतंब्रूहिविस्तरेणममाच्युत॥
कस्मिन्कालेसमुत्पन्नंकिंपुण्यंकोविधिस्मृतः॥ श्रीकृष्णउवाच॥ मल्लयुद्धेपुराभूतेशमितेकुकुरांधके॥स्वज
नैर्बुभुक्षितैःस्त्रीभिःसमंस्निग्धैःसमावृते॥हतेकंसासुरेदुष्टेमथुरायांयुधिष्ठिर॥देवकीमांपरिष्वज्यकृत्वोत्संगे
रुरोदह॥वसुदेवोपितत्रैववात्सल्याच्चरुरोदह॥ समालिंग्यअश्रुवदनःपुत्रपुत्रेत्युवाचह॥सगद्गदस्वरोदीनो
वाक्यपर्याकुलेक्षणः॥बलभद्रंचमांचैवपरिष्वज्यमुदान्वितः॥अद्यमेसफलंजन्मजीवितंचसुजीवितं॥उभा
भ्यामद्यपुत्राभ्यांसमुद्भूतसमागमः॥एवंहर्षेणपादांपत्यंहृष्टपुष्टतनौह्यभूत्॥प्रणिपत्यजनाःसर्वेबभूवुस्तेप्रहर्षि
ताः॥एवंमहोत्सवंदृष्ट्वासमाजंमधुसूदनः॥प्रसादःक्रियतामस्यलोकस्यार्तस्यदुःखिनः॥यस्मिन्दिनेप्रसू
तोयंदेवकीत्वांजनार्दन॥तद्दिनंदेहिवैकुंठकुर्मस्तत्रमहोत्सवं॥एवंस्तुतेमनौघेनवसुदेवोमयेक्षितः॥वि

यत्नतः॥ द्वारे विन्यस्य मुसलं रक्षितं रक्षपालकैः॥ षष्ठ्या देव्याधिष्ठितं च तद्गृहं चोत्सवैस्तथा॥ एवंविभवसारे प्रसूता
तु सूतिकागृहे॥ तन्मध्ये प्रतिमा स्थाप्या सा चाप्यष्टविधा स्मृता॥ कांचनी राजती ताम्री पैत्तली मृन्मयी तथा॥ वार्क्षी
मणिमयी चैव वर्णकैर्लिखिता तथा॥ सर्वलक्षणसंपूर्णा पर्यंके चाष्टमी शिल्पके॥ प्रातप्त कांचनाभासां महासु
तपस्विनीं॥ प्रसूतां च प्रसुप्तां च स्थापयेन्मंचकोपरि॥ मां तत्र बालकं सुप्तं पर्यंके स्तनपायिनं॥ श्रीवत्सवक्षसं
शांतं नीलोत्पलदलच्छविं॥ यशोदां तत्र चैकस्मिन् प्रदेशे सूतिकागृहे॥ तद्वच्च कल्पयेत्पार्थ प्रसूतां वरकन्य
कां॥ तथैव मम पार्श्वस्थान् कृतांजलिपुटान्नृप॥ देवान् ग्रहांस्तथा नागान्यक्षान्विद्याधरान्नराः॥ प्रणतपुष्प ॥११५
मालग्नचारुहस्तासुरासुराः॥ संचरंतं इवाकाशे प्रहारोदितोन्वितैः॥ वसुदेवोपि तत्रैव खड्गचर्मधरः स्थितः॥ क
श्यपो वसुदेवोयमदितिश्चैव देवकी॥ शेषो वै बलदेवोयं यशोदादितिरत्नभृत्॥ नंदः प्रजापतिर्दक्षो गर्गश्चापि
चतुर्मुखः॥ गोप्यश्चाप्सरसः सर्वा गोपाश्चापि दिवौकसः॥ एषोवतारो राजेंद्र कंसोयं कालनेमिजः॥ तत्र कंसनियुक्ताश्च
मोहिता योगनिद्रया॥ गोधेनुकुंजराश्चैव दानवाः शस्त्रपाणयः॥ नृत्यंतश्चाप्सरोभिस्तु गंधर्वा गीततत्पराः॥
लेखनीयश्च तत्रैव कालियो यमुनाह्रदे॥ इत्येवमादि यत्किंचित्कृयते चरितं मम॥ भक्तैरचयित्वा प्रयत्ने

न पूजयेद्भक्तितत्परः॥ रम्यामैर्बीजपूरैश्च लकुचैः खर्जूरैस्तथा॥ कालदेशोद्भवैः पुष्पैः फलैश्चापि युधिष्ठिर॥ पाद्या
र्घ्यैः पूजयेद्भक्त्या गंधपुष्पाक्षतैः फलैः॥ मंत्रेणानेन कौंतेय देवकीं पूजयेन्नरः॥ गायद्भिः किंनराद्यैश्च सततपरिग
तां वेणुवीणानिनादैर्भृंगारादर्शकुंभप्रभककरकृतकरैः सेव्यमाना॥ पर्यंके स्वास्तृते या मुदिततमुदिता नरसु
खी पुत्रिणी सम्यगास्ते सा देवि माता जयतु सह सुता देवकी कांतरूपा॥ पादावभ्यंजयंती श्रीदेव्याश्चरणांतिके॥ ॥
निवस्त पंकजे पूज्या दिव्यगंधानुलेपनैः॥ पंकजैः पूजयेद्देवीं नमो देव्यै श्रियै इति॥ देववत्से नमस्तेस्तु
कल्होत्पादनतत्परा॥ पापक्षयकरी देवी तुष्टिं यातु ममार्चिता॥ प्रणवादि नमोंतं च पृथक् पृथक्॥ नामानुकीर्त्त
नं॥ कुर्यात्पूजां विधिज्ञश्च सर्वपापमनुत्तये॥ देवक्यै वसुदेवाय वासुदेवाय चैव हि॥ बलदेवाय नंदाय य
शोदायै पृथक् पृथक्॥ क्षीरादिस्नपनं कृत्वा चंदनानुविलेपयेत्॥ विध्यंतरमयीछंति केचिदत्वेवसूत्रयः॥
चंद्रोदये शशांकाय अर्घ्यं दद्यात्प्रस्मरन्॥ अनघं वामनं शौरिं वैकुंठं पुरुषोत्तमं॥ वासुदेवं हृषीकेशं माध
वं मधुसूदनं॥ वाराहं पुंडरीकाक्षं सर्गस्थितिकारणं॥ अनादिनिधनं विष्णुं त्रैलोक्येशं त्रिविक्रमं॥ ना

नारायणं चतुर्बाहुं शंखचक्रगदाधरं ॥ पीताम्बरं नित्यं वनमालाविभूषितं । श्रीवत्साङ्कं जगत्सेतुं श्रीपतिं श्रीध
रं हरिं ॥ स्मरन्नर्घ्यं दद्यादिति पूर्वेणान्वयः ॥ योगेश्वराय तथा जलशायाय च ॥ यज्ञानां पतये नाथ गोविंदाय नमो
नमः ॥ ॥ पूजामंत्रः ॥ जगन्नाथ नमस्तुभ्यं संसारभयनाशन ॥ जगदीशाय देवाय भूतानां पतये नमः ॥ इति नै
वेद्यं ॥ धर्मेश्वराय धर्माय संभवाय जगत्पते ॥ धर्मज्ञाय च यज्ञाय गोविंदाय नमो नमः इति ॥ शयनमंत्रेणाने
नेन नैवेद्यं दद्याच्चंद्रमसे नरः ॥ तथैवार्घ्यं च मंत्रेणानेनैव तु दापयेत् ॥ क्षीरोदार्णवसंभूत अत्रिगोत्रसमुद्भव ॥
गृहाणार्घ्यं शशांकेद रोहिण्या सहितो मम ॥ ज्योत्स्नापते नमस्तुभ्यं ज्योतिषां पतये नमः ॥ नमस्ते रोहिणी
कांत अर्घ्यं नः प्रतिगृह्यतां ॥ स्थापये देवदेवेशं शशांकं रोहिणीयुतं ॥ देवक्या वसुदेवं च नंदं चैव यशोदय ॥
बलदेवं यथा सार्धं भद्रया परया नृप ॥ संपूज्य विधिवद्देहि किन्नाश्नोत्यति दुर्लभं ॥ एकादशीनां विंशत्यको
ट्यो याः प्रकीर्त्तिताः ॥ ताभिः कृष्णाष्टमी तुल्या ततोनंतचतुर्दशी ॥ अर्धरात्रे वसोर्धारां पातयेद्द्रव्यसर्पिषा ॥ ततो
वर्धापयेन्नालं षष्ठीनामादिकं मम ॥ कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमी दिने ॥ यथा मम तथा कार्यं भग १००

लोक्य बलभद्रं च मां वदेष्टस्तनूरुहः ॥ उवाच समम्मादेशाल्लोकानु जन्माष्टमीव्रतं ॥ मथुरायां ततः पश्चात्तथा वान्यत्प्रका
शितं ॥ कुर्वंतु ब्राह्मणाः सर्वे व्रतं जन्माष्टमीदिने ॥ क्षत्रिया वैश्यजातीयाः शूद्रा येन्येपि धर्मिणः ॥ युधिष्ठिर उवाच ॥
यः । एतन्मे तत्त्वतो ब्रूहि सविधानं सविस्तरं ॥ ॥ कृष्ण उवाच ॥ मासि भाद्रपदेष्टम्यां निशीथे कृष्णपक्षके ॥ शशांके वृष
राशिस्थे ऋक्षे रोहिणीसंज्ञके ॥ योगेस्मिन्वसुदेवाद्धि देवकी मामजीजनत् ॥ भगवत्याश्च तत्रैव क्रियते सुमहोत्स
वः ॥ योगेस्मिन्कथिते ष्टम्यां सिंहराशिगते रवौ ॥ सप्तम्यां लघु भुक्कुर्याद्दंतधावनपूर्वकं ॥ उपवासस्य सेनियमं रा
त्रौ स्वप्याज्जितेंद्रियः ॥ केवलेनोपवासेन तस्मिन्जन्मदिने मम ॥ सप्तजन्मकृतात्पापान्मुच्यते ॥ नात्र संशयः ॥ उ
पावृत्तस्तु पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ ततोष्टम्यां तिलैः स्नातो नद्या
दौ विमले जले ॥ सुदेशे शोभनं कुर्याद्देवक्याः सूतिकागृहं ॥ सीतपीतैस्तथा रक्तैः कर्बुरैर्हरितैरपि ॥ वासोभिः
शोभनं कृत्वा समंतात्कालशैर्नवैः ॥ पुष्पैः फलैरनेकैश्च दीपाली भित्तिरिस्तता ॥ पुष्पमाला विचित्रं च चंदना
गरुभूषितं ॥ अतिरम्यं मनोपम्यं रक्षामणिविभूषितं ॥ हरिवंशस्य चरितं गोकुलं च विलेखयेत् ॥ ततो वा
दित्र निनदैर्वरणा वेणुरवाकुलं ॥ नृत्यगीतक्रियोपेतं मंगलैश्च समंततः ॥ वेष्टकारी लोहखंडं कृतानादं च

वत्यामहोत्सवं॥ ब्राह्मणान्भोजयेत्पश्चाद्भक्त्या तेभ्यो दद्याच्च दक्षिणां॥ हिरण्यं मेदिनी गावो वासांसि कुसुमा
नि च॥ यद्यदिष्टतमं तत्तत्कृत्वा मे प्रीयतामिति॥ यं देवं देवकी देवं वसुदेवादजीजनत्॥ भौमस्य ब्रह्मणो गुप्त्यै त
स्मै ब्रह्मात्मने नमः॥ नमस्ते वासुदेवाय गोब्राह्मणहिताय च॥ शीलं रक्षतु शिवं चास्तु इत्युक्त्वा मां विसर्जयेत्॥ ततो
बंधुजनौघं च दीनानां भोजनं बहु॥ भोजयित्वा सुप्रीतायाः स्वयं भुंजीत वाग्यतः॥ एवं यः कुरुते देव्या देवक्या
सु महोत्सवं॥ प्रतिवर्षे विधानेन भक्तो धर्मनंदन॥ नरो वा यदि वा नारी यथोक्तं लभते फलं॥ पुत्रसंतानमा
रोग्यं सौभाग्यमतुलं महत्॥ इह धर्मरतिर्भूत्वा मृतो वैकुंठमाप्नुयात्॥ तत्र देवविधानेन वर्षलक्षं युधिष्ठि
र॥ भोगान्नाविनाविधान भुक्त्वा पुण्यशेषादिहागतः॥ सर्वकामसमृद्धे तु सर्वाशुभविवर्जिते॥ कुले नृपति
शीलानां जायते हृच्छयोपमः॥ यस्मिन् सदैव देशा देशे तु लिखितं तु पटार्पितं॥ मातृजन्मदिनं यत्र सर्वालं
कारभूषितं॥ पूजयेत्पांडवश्रेष्ठ व्रतैरुत्सवसंयुतैः॥ परचक्रभयं तत्र न कदाचिद्भवेत्तु नः॥ पर्जन्यः काम
वर्षी स्यादीतिभ्यो न भयं भवेत्॥ गृहे वा पूज्यते यस्मिन्देवक्याश्चरितं मम॥ यत्र सर्वसमृद्धिः स्यान्नो

पसर्गादिकंभवेत्॥ पश्रुतोनकुला द्यालात्पापरोगाच पातकान्॥ राजतश्चोरतो वापिनकदाचिद्भयंभवेत्॥ संसर्गो
पाप्रियोभक्त्या व्रतंपश्येदनाकुलं॥ सोपिपापविनिर्मुक्तो प्रयाहितिहरिमंदिरं॥ जन्माष्टमीजनयतो नयनाभिरा
मापापापहास्फगतिनंविदधातिगोपं॥ यादेवकीसुतसुतांचभजेद्दितंस्यात्सत्रानवाप्पसमुपेतिषदंहिविष्णोः॥
इतिहेमाद्रौभविष्योत्तरेजन्माष्टमीव्रतं॥ ॥ अथशिष्टाचारप्राप्तकथा॥ व्यासउवाच॥ निवृत्तेभारतेयुद्धे
कृतशौचोयुधिष्ठिरः॥ उवाचवाक्यंधर्मात्मा कृष्णंदेवकिनंदनं॥ युधिष्ठिरउवाच॥ त्वत्प्रसादेनगोविंद निहि
ताःशत्रवोरणे॥ कर्णश्चनिहितःसोन्येत्वत्प्रसादात्किरीटिना॥ जेताकोयुधिभीष्मस्ययस्यमृत्युर्नविद्यते॥ अ
जेयोपिजितःसोपित्वत्प्रसादाज्जनार्दन॥ प्राप्तंनिष्कंटकंराज्यंकृत्वाकर्मसुदुष्करं॥ आचारोदंडनीतिश्चरा
ज्यधर्माःक्रियान्विताः॥ अधुनाश्रोतुमिच्छामि व्रतंजन्माष्टमीव्रतं॥ जन्माष्टमीव्रतंब्रूहिविस्तरेणममाच्युत॥
कुतःकालसमुत्पन्नंकिंपुण्यंकोविधिःस्मृतः॥ ॥ कृष्णउवाच॥ शृणुराजन्प्रवक्ष्यामि व्रतानामुत्तमंव्रतं॥
यतःप्राप्नोतिविख्यातंफलेनविधिनान्वितं॥ राजवंशसमुत्पन्नैर्दैत्यैःकैश्चित्प्रपीडिता॥ धराभारसमाक्रां

म्नीजगामह॥ ततोहंदेवकीगर्भमविशंस्वेनतेजसा॥ हतेषुषट्सुबालेषुदेवक्यात्औयसेनिना॥ कारागृह
स्थितायांचवसुदेवेनवैसह॥ गतेर्धरात्रसमयेसुप्तेसर्वजनेनिशि॥ भाद्रमास्यसितेपक्षेष्टम्यांब्रह्मर्क्षसंयु
जि॥ सर्वग्रहशुभेकालेप्रसन्नहृदयाशये॥ आविरासन्निजेनैवरूपेणैवाचनीपले॥ वसुदेवोपिमांदृष्ट्वाहर्ष
शोकपरिप्लुतः॥ अत्यद्भुतमिदंरूपंदुर्दर्शंयोगिनामपि॥ तत्तेजसारिष्टगृहमभवत्संप्रकाशितं॥ उद्विजेभी
वक्कंसाद्योमेबालानघातयत्॥ उपसंहरतस्मात्वमेतद्रूपमलौकिकं॥ शंखचक्रगदापद्मलसत्कौस्तुभ ॥१०२॥
भासितं॥ किरीटहारमुकुटकेयूरवलयांकितं॥ तडिद्वसनसंवीतंकणत्कांचनमेखलं॥ स्फुरद्राजीवचावी
क्षंस्निग्धांजनसमप्रभं॥ महामरकतस्वच्छकोटिसूर्यसमप्रभं॥ ॥श्रीकृष्णउवाच॥ एवंसंप्रार्थितोरा
जन्वसुदेवेनवैतदा॥ तेनैवनिजरूपेणाभूत्वाहंप्राकृतःशिशुः॥ नयमांगोकुलमितिवसुदेवमचोदयं॥
समादायागमत्सोपिनंदगोकुलमंजसा॥ द्वाराण्युपाकृतान्यासंस्वप्रभावात्स्वयंविभो॥ ददौमार्गंच
कालिंदीजलकल्लोलमालिनी॥ ततोयशोदाशयनेन्यस्यचानकदुंदुभिः॥ तत्पर्यंकस्थितांगृह्य
द्वारिकामागमत्पुनः॥ द्वाराणिपिहितान्यासन्पूर्ववन्निगडंततः॥ विन्यस्यपादयोरासीत्शयनेन्यस्यदारिकां॥ ततो
रोदमद्वत्तास्वरेणाप्रूर्यसादिशः॥ तस्यारुदितशब्देनउत्थितायामिकागृहात्॥ कंसायागत्यचाचख्युःप्रसू
तादेवकीतिच॥ सोपितल्पात्समुत्थायवेगेनातीवविह्वलः॥ जगामसूतिकागेहंदेवक्याःप्रस्खलन्पथि॥ दा
रिकांशयनाग्रेर्थरुदंत्याश्चैववसरवसुः॥ अपोथयच्छिलापृष्ठेसापितस्यकरात्च्युता॥ उवाचकंसमाभा
ष्यदेवीस्थाकाशगासती॥ किंमेग्राहतयामंदजातःकुत्रापितेरिपुः॥ इत्युक्तःसोथभुक्तंसःपरमोद्विग्न
मानसः॥ आज्ञापयामासततोबालानांकदनायवै॥ दानवाअपिबालानांकदनंचक्रुरुद्यताः॥ वने
षूपवनेषैवपुरग्रामव्रजेष्वपि॥ अहंतुचगोकुलेस्थित्वापूतनांबालघातिनीं॥ स्तनंदातुंप्रवृत्तांचप्रा
णैःसमशोषयं॥ तृणावर्त्तंबकंरिष्टंधेनुकंकेशिनंतथा॥ अन्यानपिखलान्हत्वास्वप्रभावमदर्शयं
॥ ततश्चमथुरांगत्वाहत्वाकंसादिदानवान्॥ ज्ञातीनांपरमहर्षंकृत्वावानस्मिसादरं॥ देवकीवसु
देवौपरिष्वज्यमुदामम॥ आनंदजैर्जलैर्मूर्ध्निस्नपयामासतुर्न्नृप॥ तस्मिन्रंगेचाणूरमल्लान्हत्वाचा

प्पूरमुख्यकान्॥ गजं कुवलयापीडं कंसभ्रातृनने कशः॥ एवं हते सुरे कंसे सर्वलोकैककंटके॥ अन्येषुदु
ष्टदैत्येषु सर्वलोकमहोत्सवैः॥ लोकाः समुत्सुकाः सर्वे मामुपेत्य पुरावृताः॥ कृष्ण कृष्ण महायोगिन् भक्तानाम म
भयप्रद॥ प्रलयात्पाहि नो देव शरणागतवत्सल॥ अनाथनाथ सर्वज्ञ सर्वभूतहिते रत॥ किं विधिस्त्वाम द
हे देव तन्नो वक्तुं त्वमर्हसि॥ तव जन्मदिनं लोके न ज्ञातं केन वित्कचित्॥ ज्ञात्वा च तद्दिने सर्वे कुर्मो वर्धा
पनोत्सवं॥ तेषां दृष्ट्वा तु सा भक्तिः श्रद्धा च मयि सौहृदं॥ मया जन्मदिनं तेभ्यो ख्यातं निर्मलचेतसा॥
कृत्वा लेपितया चक्रुर्विधिना येन तच्छृणु॥ पार्थ तद्दिवसे प्राप्ते दंतधावनपूर्वकं॥ स्नात्वा पुण्यजले शुभे
वाससी परिधाय च॥ निर्वर्त्यावश्यकं कर्म व्रतसंकल्पमारभेत्॥ अद्य स्थित्वा निराहारः श्वोभूते तु परे
हनि॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत॥ गृहीत्वा नियमं चैव संप्रार्थ्य नवसाधनं॥ मंडपं शोभ
नं कृत्वा फलपुष्पादिसंयुतं॥ तस्मिन्मां पूजयेद्भक्त्या गंधपुष्पादिभिः पृथक्॥ उपचारैः षोडशभिर्वेद
ज्ञाक्षरविधया॥ सद्यः प्रसूतां जननीं वसुदेवं च मारिषं॥ बलदेवसमायुक्तां रोहिणीं गुणमोहिनीं॥ ॥

१०३

ता ब्रह्माणं शरणं ययौ॥ ज्ञात्वा तदा प्रभुर्ब्रह्मा भूमेर्भारं महाहितं॥ श्वेतद्वीपे समागत्य सर्वदेवसमन्वितः॥ समा
हितमतिर्ब्रह्मा मां तुष्टाव वेदैर्विशांपते॥ स्तुत्या तयाहं संप्रीतः स्तेषां दृग्गोचरोभवं॥ दृष्ट्वा मां प्रणिपत्याशु भक्ति
भावसमन्वितः॥ ब्रह्मा प्रणामयत्नः कृत्वा तुष्टाः सर्वे दिवौकसः॥ विज्ञप्तुर्महाभूमिं तस्या भारापनुत्तये॥ उप
धार्यं तदा तेषां वचनं त्वाल्लिं चिंतयं॥ केनोपायेन हंतव्या दानवाः क्षत्रियोद्भवाः॥ स्वधर्मनिरताः सर्वे महाब
लपराक्रमाः॥ ततो निश्चित्य मनसा ब्रह्माणं महमब्रुवं॥ वसुदेवो देवकी च प्रजाकामौ पुरानघ॥ भक्त्या मां भ
जमानौ तौ तप्तवंतौ महत्तपः॥ तयोः प्रसन्नः सुप्रीतो याचतं वरमुत्तमं॥ अब्रुवंतावपि ततो वरयामासतुः
किल॥ यदि देव प्रसन्नोसि त्वादृशौ नौ भवेत्सुतः॥ तथेति च मया ताभ्यामुक्तं प्रीतेन सेवया॥ तत्कामपूर
णार्थाय संभविष्याम्यहं तयोः॥ दिवौकसोपि स्वांशेन संभवंतु सुरस्त्रियः॥ योगमाया च नंदस्य यशोदायां
भविष्यति देवक्या जठरे गर्भमनंतं धाम मामकं॥ सुनिष्कार्य ततस्तूर्णं रोहिण्या जठरे कुरु॥ इति संदि श्य
श्य तान्सर्वान्नहमंतर्हितोभवं॥ ततो देवैः समं स ब्रह्मा तां दिशं प्रणिपत्य च॥ आश्वास्य च महीं देवीं वरेण्या

नंदं यशोदां गोपीं च गोपां गांश्चैव सर्वशः॥ गोकुलं यमुनां चैव योगमायां च दारिकां॥ यशोदाशयने सुप्तां सद्यो
जातां वरप्रभां॥ सर्वं संपूजयेत्सम्यक् नाममंत्रैः पृथक् पृथक्॥ सुवर्णरूप्यताम्रादिमृन्मयैरत्नादिभिरलंकृताः
श्रि: प्रतिमाः कुर्वीत प्रीत्या तास्तु चान्यैस्तत्र यजेत्॥ रात्रौ जागरणं कुर्याद्गीतनृत्यादिभिः सह॥ पुराणैः स्तोत्रपाठैश्च जातक
र्मादिपूर्वकैः॥ श्वोभूते पारणं कुर्याद्द्विजान्संभोजयेत्ततः॥ एवं कृते महाराज व्रतानामुत्तमे व्रते॥ सर्वान्का
मानवाप्नोति विष्णुलोके महीयते॥ मोहान्न कुरुते यस्तु याति संसारगह्वरे॥ तस्मात्कुर्वन्प्रयत्नेन निःपापो जा
यते नरः॥ अत्रैवोदाहरंतीममितिहासं पुरातनं॥ अंगदेशोद्भवो राजा मित्रजिन्नामतः क्रमात्॥ तस्य
पुत्रो महासेनो सत्यजित्सत्पथे स्थितः॥ पालयामास धर्मज्ञो विधिवद्रंजयन्प्रजाः॥ तस्यैवं वर्त्तमानस्य कद
सिद्दैवयोगतः॥ पाखंडैः सह संवासो बभूव बहुवासरं॥ तत्संसर्गात्स नृपतिरधर्मनिरतो भवेत्॥ वेदशास्त्र
पुराणानि विनिंद्य बहुशो नृप॥ ब्राह्मणेषु तथा धर्मे विद्वेषं परमं गतः॥ एवं बहुतिथे काले गते भरतसत्तम॥ का
लेन निधनं प्राप्तो यमदूतवशं गतः॥ बध्वा पाशेन नीयमानो यमदूतैर्यमांतिकं॥ पीडितस्ताड्यमानो सौ

दुष्टवांसवशंगतः॥ नरके पातितः पापो यातनाबहुवत्सरं॥ भुक्त्वापापस्य शेषेण पैशाचीयोनिमास्थितः॥ तृषा
क्षुधासमाक्रांतो भ्रमन्सन्मरुधन्वसु॥ कस्यचित्त्वथ वैश्यस्य देहमाविश्य संस्थितः॥ व[illegible]विपिने सोपि कृष्ण
गामाश्रमेषु च॥ कदाचिद्दैवयोगेन मम जन्माष्टमी दिने॥ क्रियमाणा यदा पूजां ब्रतिभिर्मुनिभिर्द्विजैः॥ रात्रौ जाग
रणं चैव नामसंकीर्तनादिभिः॥ ददर्श सर्वं विधिवत्त् शुश्राव च हरेः कथाः॥ निःपापो दर्शनादेव शुद्धा निर्मलमान
सः॥ प्रेतदेहं समुत्सृज्य विष्णुलोकं विमानगः॥ यमदूतैः समानीतो दिव्यभोगसमन्वितः॥ मम सानिध्यमापन्नो
ब्रतस्यास्य प्रभावतः॥ नित्यमेवं तं चैतत्पुरा पोक्तं सार्वकालिकं॥ प्रीतये विधिवत्सम्यक् मुनिभिस्तत्वदर्शिभिः॥
सर्वकामिकमेवैतत्कृत्वा कामानवाप्नुयात्॥ एकं ते सर्वमाख्यातं ब्रतानामुत्तमं ब्रतं॥ मम सानिध्यकृद्राजन् किंश्
यःश्रोतुमिछसि॥ ॥इति श्रीभविष्योत्तरपुराणे जन्माष्टमीब्रतकथा समाप्तः॥ ॥युधिष्ठिर उवाच॥
उद्यापनविधिं वक्ष्ये देवदेव दयानिधे॥ येन संपूर्णतां याति ब्रतमेतदनुत्तमं॥ श्रीकृष्ण उवाच॥ पूर्णां तिथिम
नुप्राप्य वित्तवित्तादिसंयुतः॥ पूर्वेद्युरेकभक्ताशी स्वयं मां संस्मरन्हृदि॥ प्रातरुत्थाय संस्मृत्य पुण्यश्लोका

सर्वतीर्थस्थो मयानीतं सुशीतलं ॥ गृहाणाचमनं कृष्ण विश्वकाय नमोस्तुते ॥ आचमनीयं ॥ गंधपुष्पाक्षता
पेतं फलेन च समन्वितं ॥ अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ॥ अर्घ्यं ॥ दधिक्षौद्रघृतं शुद्धं कपिलाया
सुगंधियत ॥ सुस्वादमधुरं शौरे मधुपर्कं गृहाण मे ॥ मधुपर्कं ॥ पुनराचमनं ॥ पंचामृतेन स्नपनं करिष्यामि
सुरोत्तम ॥ क्षीरोदधिनिवासाय लक्ष्मीकांताय ते नमः ॥ पंचामृतस्नानं ॥ मंदाकिनी गोतमी च यमुना
च सरस्वती ॥ ताभ्यः स्नानार्थमानीतं गृहाण शिशिरं जलं ॥ स्नानं ॥ पुनराचमनं ॥ शुद्धजांबूनदप्रख्यं तडि
द्भासुररोचिषा ॥ मयापापादिते तुभ्यं वाससी प्रतिगृह्यतां ॥ वस्त्रं ॥ पुनराचनीयं ॥ यज्ञोपवीतं परमंवित्र ॥१०५
मिति यज्ञोपवीतं ॥ किरीटकुंडलादीनि कांचीवलययुग्मकं ॥ कौस्तुभं वनमालां च भूषणानि भज स्वभो ॥
भूषणानि ॥ मलयाचलसंभूतं गंधं सारं मनोहरं ॥ हृदयानंदनं चारु चंदनं प्रतिगृह्यतां ॥ चंदनं ॥ माल
तीचंपकादीनि यूथिकाबकुलानि च ॥ तुलसीपत्रमिश्राणि गृहाण सुरसत्तम ॥ पुष्पाणि ॥ अथाव
रदेवपूजा ॥ देवकीं वसुदेवं च रोहिणीं सबलं तथा ॥ सात्यकीं जोद्धवाक्रूरानुग्रसेनादियादवा

न् ॥ नंदयशोदा तत्कालं प्रसूता गोपिका गृहे ॥ कालिंदी कालियं चैवं पूजयेन्नाममंत्रतः ॥ वनस्पतिरसोद्भू
त कालागरुसमन्वितं ॥ धूपं गृहाण गोविंद गुणसागर गोपते ॥ धूपं ॥ आज्यं चवर्तिसंयुक्तं० दीपं० नैवेद्यं
गृह्यतां देव० नैवेद्यं ॥ पुनराचमनं ॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं ॥ कर्पूरादिसमायुक्तं
तांबूलं प्रतिगृह्यतां ॥ तांबूलं ॥ इदं फलमिति फलं ॥ हिरण्यगर्भगर्भस्थं मिति ॥ दक्षिणां ॥ नीराजयेत्ततो[illegible]
मंगलं समुदीरयन् ॥ जयमंगलनिर्घोषं देवदेवं समर्चयेत् ॥ दत्वा पुष्पांजलिं चैव दक्षिणां च पुरःसरं ॥
प्रणिपत्य दंडवद्भूमौ भक्तिनम्रः पुनः पुनः ॥ स्तुत्वा नानाविधैः स्तोत्रैः प्रार्थयेत्तं जगत्पतिं ॥ नमस्तुभ्यं
जगन्नाथ देवकीतनय प्रभो ॥ वसुदेवात्मजानंत यशोदानंदवर्धन ॥ गोविंद गोकुलाधार गोपीकांत
नमोस्तु ते ॥ ततस्तु दापयेदर्घ्यं मिंदावुदयतः शुचिः ॥ कृष्णाय प्रथमं दद्याद्देवकीसहिताय च ॥ नारिकेरेन
शुद्धेन दद्यादर्घ्यं विचक्षणः ॥ कृष्णाय परया भक्त्या शंखे कृत्वा विधानतः ॥ जातः कंसवधार्थाय भूभा
रोत्तारणाय च ॥ कौरवाणां विनाशाय दैत्यानां निधनाय च ॥ गृहाणार्घ्यं मया दत्तं देवकीसहितो हरे ॥ कृ

ह्नार्घ्यमंत्रः॥ शंखेकृत्वाततस्तोयंसपुष्पफलचंदनं॥जानुभ्यामवनींगत्वाचंद्रार्घ्यं नमोस्तुते॥क्षीरो
दार्णवसंभूत अत्रिगोत्रसमुद्भव॥गृहाणार्घ्यमयादत्तंरोहिणीसहितायच॥ शशिनः॥ज्योत्स्नापतेनमस्तु
भ्यंनमस्तेज्योतिषांपति॥नमस्तेरोहिणीकांतगृहाणार्घ्यंनमोस्तुते॥ मंत्रार्घ्यः॥ इत्थंसंप्रार्थ्यदेवेशंरा
त्रौजागरणंचरेत्॥गीतनृत्यादिनाचैवपुराणश्रवणादिभिः॥प्रत्यूषेविमलेस्नात्वापूजयित्वाजगद्गुरुं॥पा
यसेनतिलाज्येश्चमूलमंत्रेणभक्तितः॥अष्टोत्तरशतंकृत्वाततःपुरुषसूक्तकः॥इदंविष्णुरितिप्रोक्ताज्ज
ुहुयाद्धैघृताहुतिः॥होमशेषंसमाप्याथपूर्णाहुतिपुरःसरं॥ आचार्यंपूजयेद्भक्त्यावृषभेणाछादना
दिभिः॥ गामेकांकपिलांदद्यात्व्रतसंपूर्णहेतवे॥पयस्विनींसुशीलांचसवत्सांसगुणांतथा॥स्वर्णशृंगींरौ
प्यखुरांकांस्यदोहनकायतां॥रत्नपुच्छांताम्रपृष्ठांस्वर्णघंटासमन्वितां॥वस्त्रछन्नांदक्षिणाढ्यामे
वंसंपूर्णतांयजेत्॥कपिलायांमभावेपिगौरीन्यापिप्रदीयते॥ततोदद्याचऋत्विग्भ्योन्येभ्यश्चैववय
थार्हतः॥ ब्राह्मणान्भोजयेत्पश्चात्तदेषांतेभ्यश्चदक्षिणां॥कलशान्तत्रसंपूर्णान्दद्याच्चैवसमाहि

१०६

तसमाहितः॥निर्वृत्यावश्यकंकर्मब्राह्मणान्स्वस्तिवाचयेत्॥गुरुमानीयधर्मज्ञंवेदवेदांगपारगं॥वृणुयाद्धति
जेश्चैववस्त्रालंकरणादिभिः॥पलेनाथतदर्धेनतदर्धार्धेनवापुनः॥शक्त्यावाकारयेत्तत्रवित्तशाठ्यविवर्जितः॥
सौवर्णप्रतिमांकार्यापाद्यार्घ्याचमनीयकं॥पत्नीःसेपाद्यविधिवस्त्रयज्ञोपकरणंतथा॥गोचर्ममात्रंसंलिप्यमध्ये
मंडलमाचरेत्॥ब्रह्माद्यादेवतास्तत्रस्थापयित्वाप्रपूजयेत्॥मंडपंरचयेतत्रकदलीस्तंभमंडितं॥मंडपेस्था
पयेत्कुंभंताम्रंवामृन्मयंशुचि॥तस्योपरिन्यसेत्पात्रंराजतंवैणवंतुवा॥वाससाछादितंकौंतेयपूजयेत्तत्रमां
बुधः॥उपचारैःषोडशभिर्मंत्रैरेभिःसमाहितः॥ध्यात्वावाह्यामृतंनीकृत्यस्वागतादिभिरादरात्॥ध्यात्वाचतु
र्भुजंदेवंशंखचक्रगदाधरं॥पीतांबरयुगोपेतंलक्ष्मीयुक्तंविभूषितं॥लसत्कौस्तुभशोभाढ्यंमेघश्याम
सुलोचनं॥ध्यानं॥आगच्छदेवदेवेशजगद्योनेरमापते॥पुण्येस्मिन्नधिष्ठानेसंनिधेहिकृपांकुरु॥
आवाहनं॥देवदेवजगन्नाथगरुडासनसंस्थित॥गृहाणासनंदिव्यंजगद्धातर्नमोस्तुते॥आसनं॥
नानातीर्थाहृतंशुद्धंनिर्मलंपुष्पमिश्रितं॥पाद्यंगृहाणदेवारेविश्वरूपनमोस्तुते॥पाद्यं॥ गंगादि

तः॥ प्राप्य ज्ञानं तथा लेभ्यो भुंजीत सह बंधुभिः॥ एवं कृते महाराजा न व्रतोद्यापनकर्मणि॥ निःपापस्तत्क्षणा
देवजायते विबुधोत्तमः॥ पुत्रपौत्रसमायुक्तो धनधान्यसमन्वितः॥ भुक्त्वा भोगान्चिरं कालं अं
ते मम पुरं व्रजेत्॥ ॥इति श्री भविष्योत्तरे युधिष्ठिरकृष्णसंवादे सोद्यापनं जन्माष्टमीव्रतं॥
भाद्रशुक्लाष्टम्यां ज्येष्ठर्क्षे ज्येष्ठाव्रतं॥ इदं च ज्येष्ठायोगवशेन पूर्वविद्धायां परविद्धायां वा कार्यं॥ दि
नद्वये तत्तद्योगे परैव॥ पूर्वेद्युः कराचौ तद्योगे तु पूर्वैव॥ ज्येष्ठापूजनं लैंगे॥ कंन्यारस्था कौष्टमी शुक्ला
ज्येष्ठर्क्षे महती स्मृता॥ अलक्ष्मीपरिहाराय ज्येष्ठां तत्र प्रपूजयेत्॥ कन्यार्कयोगो नैकेवलं स्नावमेव
मासस्त्त॥ माद्रपदेश्वांइएव याध्यः॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुता॥ शक्तिर्यस्मिन् दिने कु
र्याज्येष्ठयाः परिपूजनामिति॥ माधवीये स्कांदोक्तेः॥ अस्याः प्रवादः॥ तत्रैव॥ यस्मिन् दिने भवेज्ये
ष्ठा मध्याह्नदूर्ध्वमप्यणुः॥ तस्मिन्नहनि पूजा वन्यभावत्पूर्ववासरे॥ इति विपरीतपूजादिना॥
पूर्वदिनेनुराधायामानहनमुत्तरदिने मूले च विसर्जनं॥ तथा च स्कांदे॥ मैत्रेणावाहयेद्देवीं ज्ये

ष्ठायां तु प्रपूजयेत्॥ मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति॥ हेमाद्रौ भविष्योत्तरे॥ युधिष्ठिर उवा
च॥ मृतवंध्या तु या नारी काकवंध्या तथापरा॥ गर्भस्रावा तृतीया च नानादोषैश्च दूषितं॥ निर्ध
नाश्च नरा ये च दारिद्र्ये महति स्थितः॥ कर्मपाकेन मुच्यंते तन्मे ब्रूहि जनार्दन॥ श्रीकृष्ण उवाच॥
मासि भाद्रपदे शुक्लपक्षे ज्येष्ठा यदा भवेत्॥ रात्रौ जागरणं कुर्याद्गीतवादित्रनिःस्वनैः॥ एवं विधाविधा
नेन एभिर्मंत्रैश्च पूजयेत्॥ एह्येहि त्वं महाभागे सुरासुरनमस्कृते॥ ज्येष्ठे त्वं सर्वदेवानां तत्समीपग
ता भव॥ आवाहनं॥ श्वेतसिंहासनस्था तु श्वेतवस्त्रैरलंकृता॥ करदंडुलकं पात्रं बिभ्रत्यै ते नमो
नमः॥ आसनं॥ ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि॥ क्षीराब्धौ तु समुद्भूते अर्घ्यं ज्येष्ठे न
मोस्तु ते॥ अर्घ्यं॥ शार्ङ्गबाणांश्च खड्गं च पाशतोमरदर्पणैः॥ अन्यैरप्यायुधैर्युक्तां ज्येष्ठां त्वा
मर्चयाम्यहं॥ सुरासुरनरैर्वंद्या यक्षकिंनरपूजिता॥ पूजितासि मया देवी ज्येष्ठे त्वामर्चयाम्य
हं॥ विप्रप्रिये महामाये सुरासुरसुपूजिते॥ स्थूलसूक्ष्ममये देवि ज्येष्ठे त्वामर्चयाम्यहं॥ पूजा

मंत्रः॥ त्वं लक्ष्मीस्त्वमुमा देवी त्वं ज्येष्ठे सर्वचामरैः॥ पूजितासि मया देवि वरदा भव मे सदा॥ प्रार्थना॥ पुत्रदारविवृध्य
र्थं लक्ष्म्याश्चैव विवृद्धये॥ अलक्ष्म्याश्च विनाशाय सर्वकालं द्विजोत्तम॥ गुरुं संपूजयेद्भक्त्या वस्त्रैराभरणादिभिः॥ इद
द्वैव तु वर्षाणि पूजनीया प्रयत्नतः॥ यावज्जन्म तथा पूर्वं विधिनानेन मानवैः॥ ददाति वित्तपुत्रांश्च अर्चनीया सदा स्त्रि
या॥ अनेन विधिना युक्तो यो हि पूजयते नरः॥ नारी वा पूजयेत्स्यै तां तस्य लक्ष्मीर्विवर्धते॥ वंध्या तु लभते पुत्रान् दुर्भ
गा सुभगा भवेत्॥ मृतवत्सा जीवपुत्री काकवंध्या प्रजावती॥ दुःखितो हि नरः कश्चित्सर्वदा स सुखी भवेत्॥
एवं विधिविधानेन ज्येष्ठायास्त्वर्चयेत्सदा॥ विघ्नास्तस्य प्रणश्यंति यथाभ्रल्लवणं तथा॥ यथा ग्राह्यं कुरु
श्रेष्ठ ज्येष्ठायाः शोभनं व्रतं॥ नीराजने कृते चैव दीपो ग्राह्यः सुभक्तितः॥ नैवेद्यसहितं प्राश्य व्रती लग्ने युधिष्ठिर॥
गुरुहस्तात्सदा ग्राह्यो दीपः प्रज्वलितो महान्॥ व्रतस्थो भक्तियुक्तस्तु शुचिः प्रयतमानसः॥ अनेन विधिना चैव
व्रतं ग्राह्यं युधिष्ठिर॥ ज्येष्ठानामपरा देवी भुक्तिमुक्तिफलप्रदा॥ यस्तु पूजयते राजन् तस्मै स्वर्गं प्रयच्छति॥
नत्रैवरकांदे॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥ यस्मिन् कस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजयेत्॥ त
त्राष्टम्यां

तत्राष्टम्यां यदा वारो भानोर्ज्येष्ठर्क्षमेव च॥ नीलज्येष्ठेति सा प्रोक्ता दुर्लभा बहुकालिकी॥ कृतस्नानो नरः कुर्यात
स्मा मामंत्रवादिने॥ भक्तियुक्तः शुचिः कुर्याज्ज्येष्ठादेव्याः स्कपूजनं॥ नद्याः पूर्वं धकाराद्यसि कृत्वाः शुभदं शुजाः॥
देवीरूपं तु तत्रैव कृत्वा तु ब्राह्मणैः सह॥ मंडले तां तु संस्थाप्य देवीं हेममयीं ततः॥ स्थापयेद्भाजनें तीतांम्रीं स्नैरवां॥
वा पटकुड्ययोः॥ आवाहयेत्ततो देवीमथ वा पुस्तकेपि वा॥ त्रिलोचनां शुक्लदंतीं बिभ्रतीं राजनीं ननु॥ वि
रक्तांरक्तनमयां ज्येष्ठामावाहयाम्यहं॥ इति मंत्रेण तां देवीमावाह्य सुकृतव्रती॥ स्नानं दद्यात्तथा पाद्यं पा
दयोरुभयोर्द्विज॥ श्रीखंड कर्पूरयुतं दद्यादर्घ्यं तथार्चनं॥ भक्त्या मया प्रयत्नेन यद्दत्तं दीयते तव॥ तद्गृहा
ण सुरेशानि ज्येष्ठे श्रेष्ठे नमो नमः॥ इत्युच्चार्य सुवर्णादि पात्रेणांजलिपिवा॥ अर्घ्यं दत्वा स्मरेद्देवीं गंधपुष्पै
स्तथार्चयेत्॥ गोधूमयवशाल्यादि तद्द्रव्यैः स्कपूजयेत्॥ ततः प्रस्थतिमात्रे रक्तघृतैः रिकादीनि सर्पिषा॥
निवेदयेच्च तैरेव दद्याद्द्रव्यैः प्रयत्नतः॥ ततस्तु तां महादेवीं सर्वकामफलप्रदां॥ ज्येष्ठायै ते नमस्तुभ्यं श्रे
ष्ठायै ते नमो नमः॥ ज्येष्ठे श्रेष्ठे तपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनी॥ एह्येहि त्वं महाभावे अर्घ्यं गृह्ण सरस्वति॥

अंर्घ्यं ॥ रक्तत्वोत्पलासंपत्यागीतानिपुरतंस्ततः ॥ सौवीरैश्चैवसंयुक्तांदद्याद्धूपेद्वेष्यवच ॥ सुवासिनीभ्यःशक्त्यात्तदद्या
वैस्तुहुत्तनीव्रती ॥ तत्रदेवीमनुज्ञाप्यततोभुंजीतवाग्यतः ॥ भक्षयित्वातदान्नम्यदेवींमत्वापुनःपुनः ॥ शयीतव्रतवर्येणाकु
र्यात्स्नातविसर्जनं ॥ एवमेवप्रकुर्याद्विव्रतंतुप्रतिवत्सरं ॥ विसर्जनांतुतेततःसिकतांवारुणीक्षिपेत् ॥ अष्टपवटका
न्दद्याद्ब्राह्मणेभ्यस्ततोद्विजः ॥ कुर्यादेवंप्रयत्नेनसायंवाथविसर्जयेत् ॥ विद्यार्थीप्राप्नुयाद्विद्यांस्त्रीकाम
स्त्रीयमेवच ॥ शिवस्मरणकारीतुदेव्यैदद्यादसौश्रियै ॥ सौवर्णरजतंतांम्रंकृतकत्याभवेत्तदा ॥ व्रतंस्वयं
चकृतवान्सिद्धांचाप्यकृतार्हणाः ॥ देव्यामहत्वंकथितंतवेदंविधिश्चमंत्रार्चनसंयुतस्तथा ॥ मंत्रोपिसायु
ज्यकरोव्रतस्यतस्यामयातेकथितंसदेव ॥ ॥ उद्यापनमह ॥ ॐ ज्येष्ठायैनमः ॥ श्रेष्ठायैनमः ॥ यस्याःसिंहार
थेयुक्ताव्याघ्रश्चापिमहाबलः ॥ ज्येष्ठामहमिमांदेवींप्रपद्येशरणंशुभां ॥ तामग्निवर्णांतपसाज्वलंतीमिति
त्वावाह्यापोहिष्ठेतितिसृभिरभिषिंचेत् ॥ नाम्नार्थीयवरंदत्वापाद्यामर्घ्यमथासनं ॥ स्नानमाचमनंचैवम
धुपर्कोपवीतकं ॥ गंधपुष्पंतथाधूपंदीपंनैवेद्यमेवच ॥ पुनराचमनंचैवकारयित्वाविसर्जयेत् ॥ ज्येष्ठायै० स

संत्यै० कलिप्रियायै० ॥ विद्यायै० ॥ विनायकायै० ॥ तोयै० ॥ श्रियै० ॥ तस्मायै० ॥ एभिर्नामभिस्तर्पणं होमं दधिमधुक्षी
रघृतैः कुर्यात्सुसंयतः ॥ हविष्यं स्वयमश्नीयात् ब्राह्मणांस्तेन भोजयेत् ॥ अनेन विधिना यस्तु ब्राह्मणानां चतुष्ट
यं ॥ व्रतान्ते प्रतिमां कुर्यात्सौवर्णं परिफलसंमितां ॥ कृष्णवस्त्रे च संयुक्तामाचार्याय निवेदयेत् ॥ वस्त्राभरणमाल्या
नि लेपनैः पूजितं द्विज ॥ प्रणिपत्य ततः पश्चात्तस्मै सर्वं निवेदयेत् ॥ ब्राह्मणा भुक्तवंतस्ते प्रकुर्युः स्वस्तिवाचनं ॥
एवं कृते व्रते सम्यक् सर्वशांतिः प्रजायते ॥ धनधान्यसमृद्धिश्च तथारोग्यं च जायते ॥ ॥ इति भविष्योत्तरज्ये
ष्ठाव्रतं ॥ ॥ अत्रैव दूर्वाष्टमीव्रतं ॥ इदं पूर्वविद्धायां कार्यं ॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ॥ पूर्वविद्धा
तु कर्तव्या शिवरात्रिर्बलेर्दिनमिति ॥ वृहद्यमवचनात् ॥ शुक्लाष्टमी तिथिर्यस्मिन्मासि भाद्रपदे भवेत् ॥ दूर्वा
ष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति हेमाद्रि मदनरत्न धृत पुराणसमुच्चयवचनाच्च ॥ मुहूर्तत्रिरोहिणे
~~ष्टमी तु सा ज्ञेया नोत्तरा सा विधीयत इति हेमाद्रि मदनरत्न धृत पुराणसमुच्चयवचनाच्च~~ ॥ एष्यां पूर्वा वाय
दि वा परा ॥ दूर्वाष्टमी सा कार्या ज्येष्ठामूलं तु वर्जयेत् परे त्युक्तं ॥ तत्पूर्वत्र ज्येष्ठा मूलयोगे कर्मकाव्याप्त्या

भावे नद्रष्टव्यं दूर्वाष्टमीदस त्याज्या ज्येष्ठामूलार्क्षसंयुता ॥ तथा ॥ प्राप्ते भाद्रपदे मासि शुक्लाष्टम्यां च भारत ॥ दूर्वाम
भ्यर्चयेद्भक्त्या ज्येष्ठामूलं तु वर्जयेत् ॥ ऐंद्रर्क्षे पूजिता दूर्वा सहपत्या निनान्यथा ॥ भर्तु स्वसुर्हरा मूले तस्मात्तां परि
वर्य जयेदिति ॥ शुक्लभाद्रपदे मासि दूर्वा संज्ञा तथाष्टमी ॥ सिंहार्क एव कर्तव्या न कन्यार्के कदाचन ॥ सिंहस्ते
सोतमास्त्वर्यमुदिते मुनिसत्तमे ॥ तत्रैव ॥ अगस्त्यनुदिते तात पूजयेदम्तोद्भवं ॥ वैधव्यं पुत्रशोकं च दद्याज्जन्मा
निपंच चेति ॥ यदा तु भाद्रशुक्लाष्टम्यां अगस्त्योदयस्तदा तत्पूर्वकृष्णाष्टम्यां कार्यं ॥ शुक्लपक्षात्प्रागेवपि भा
तमासे न भाद्रपदमासालाभात् ॥ यदा तु भाद्रपदोधिकस्तदा सिंहार्क एवे त्युदाहृतवचनादधिमासे तु संप्राप्ते
नभस्य उदये मुने ॥ अर्वागेव व्रतं कार्यं यतो न कुत्राचिदिति निर्णयदीपस्कादाद्याधिक एव कर्त्तव्यं ॥ इदं स्त्री
णां नित्यं ॥ यो न पूजयेद्दूर्वां मोहादिह यथाविधि ॥ त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः ॥ तस्मात्सं
पूजिता भक्त्या प्रति वर्षं विधिज्ञैरिति पुराण समुच्चयात् ॥ यदा तु ज्येष्ठाधिकं विना सर्वथाष्टमी न लभ्य
ते तदा कर्तव्या चेत्क्रमके न ज्येष्ठामूलं यदा भवेत् ॥ दूर्वामभ्यर्चयेद्भक्त्या नवध्यं दिवसं नयेदिति भविष्ये

तरादनुकूलब्धे नानुष्ठानंतुसर्वथाव्रतलोपः॥ अथव्रतंहेमाद्रौ भविष्ये॥ श्रवण नभाद्रपदेमासिशुक्लाष्टम्यामु
पोषितः॥ पूजयेच्छंकरं भक्त्यायोनरः श्रद्धयान्वितः॥ सयातिपरमंस्थानं यत्रदेवस्त्रिलोचनः॥ गणेशंपूजयेद्यस्तु
दूर्वयासहितंमुने॥ गणेशः शिवफलानांशकलैः दिव्यगंधपुष्पैर्विलेपनैः॥ दूर्वाभिःपूज्यतेयेश॥ नमुच्यतेसर्वपा
तकैः॥ शुचौदेशेप्रजायां दूर्वायांब्राह्मणोत्तम॥ स्थाप्यलिंगंततोगंधैः पुष्पैर्धूपैः समर्चयेत्॥ खर्जूरैर्नारिके
लैश्चमातुलिंगफलैस्तथा॥ पूजयेच्छंकरंभक्त्यादूर्वायांविधिवद्द्विज॥ दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंदद्यात्रिलो
चना॥ दूर्वाशमीभ्यांसंपूज्यसवनश्रद्धयान्वितः॥ सर्वेसुकृतजन्मानिसर्वदैवैरलंवंदितः॥ विद्याप्राप्नोतिवि
द्यार्थीपुत्रार्थीपुत्रमाप्नुयात्॥ धर्मार्थीधर्ममाप्नोति कन्यार्थीलभतेचतां॥ मनसायंयदिच्छेततत्तदाप्नो
तिमानवः॥ यएवंपूज्ययेदूर्वांक्षतेशंमानवःफलैः॥ सप्तजन्मपापौघैर्मुच्यतेनात्रसंशयः॥ कृतोपवा
सःसप्तम्यांअष्टम्यांपूजयेच्छिवं॥ दूर्वासमेतंविप्रेंद्रमध्यक्षतशुभैःफलैः॥ त्वंदूर्वेमृतजन्मासिवंदितासि
सुरासुरैः॥ सौभाग्यंसततंदेहिसर्वकार्यकरीभव॥ तथाशाखाप्रशाखाभिर्विस्तृतासिमहीतले॥ न

द्य्शृणुष्वावहितो मम॥ त्वं दूर्वेमृत मासीत्यादिमंमंत्रैश्चपाम्वत्॥ दत्वापिष्टानि विप्रेभ्यः फलंच विविधंप्रभो॥ ति
लपिष्टकगोधूमकुधान्यापिष्टानि पांडव॥ भोजयित्वासुहृन्मित्रसंबंधिस्वजनांस्तथा॥ ततोभुंजीत तच्छेषस्वयं
श्रधासमन्वितः॥ कर्तव्याचैकभक्तेन ज्येष्ठामूलंयदाभवेत्॥ दूर्वामाष्यर्चयेद्भक्त्यांनवध्यांदिवसंन्यसेत्॥
पक्षेपाद्रपदस्येयंशुक्लाष्टम्यांयुधिष्ठिर॥ दूर्वाष्टमीव्रतंपुण्यंयःकरोतीहमानवः॥ नतस्यक्षयमाप्नोतिसं
तानंसाप्तपौरुषं॥ नंदते वर्धतेनित्यंयथादूर्वातथाकुलं॥ इतिदूर्वाष्टमीव्रतं॥ भाद्रशुक्लाष्टमीमारभ्याश्वि
उत्त्रादिनपर्यंतंमहालक्ष्मीव्रतं॥ तच्चार्धरात्रातिक्रमवर्तिन्यामष्टम्यांकार्यं॥ तदुक्तंचंद्रप्रकाशेस्मृत्यंतरे॥
अर्धरात्रमतिक्रम्यवर्ततेयोत्तरातिथिः॥ तदातस्यांनरैःकार्यंमहालक्ष्मीव्रतंसदेति॥ प्रारंभस्त्वस्यांज्येष्ठा
युतायांकार्यः॥ तथाचस्कांदे॥ मासिभाद्रपदेशुक्ले पक्षेज्येष्ठायुताष्टमी॥ प्रारब्धव्यंव्रतंतत्रमहालक्ष्म्या
युतात्मभिरिति॥ तदभावेकेवलायामपि॥ समापनंतुकृष्णाष्टम्यांतच्चचंद्रोदयव्यापिन्यांकार्यं॥
चंद्रोदयव्रतेचैवतिथिस्तात्कालिकीस्मृतेत्युक्तेः॥ दिनद्वयेचंद्रोदयसत्वेसत्वेवाकृष्णपक्षेष्टमीचैव २११९।
त्यादिवाक्यात्पूर्वेवापरदिने चंद्रोदयात्तरंत्रिमुहूर्तावेत्परैव॥ तदुक्तंमदनरत्नेपुराणसमुच्चयेपूर्वावापरविद्धावाप्र
ग्राह्यचंद्रोदयेसदा॥ त्रिमुहूर्तातुसापूज्यापरतश्चोर्ध्वगामिनीति॥ अथव्रतविधिः॥ हेमाद्रौमदनरत्नेस्कांदे
स्कंदउवाच॥ सौभाग्यजननंस्त्रीणांदौर्भाग्यपरिकृंतनं॥ परमैश्वर्यजननंतद्व्रतंब्रूहिशंकर॥ ईश्वरउ
वाच॥ साधुसाधुमहाबाहोयत्पृष्टोहंत्वयानघ॥ तत्तेहंसंप्रवक्ष्यामिव्रतानामुत्तमंव्रतं॥ येचीर्णेनिनन
रोदुर्गतिंयांतिकर्हिचित्॥ सुभगादुर्भगाचापिस्त्रियोनाविधवायुता॥ अस्तिदेव्याव्रतंपुण्यंम
हालक्ष्म्याषडानन॥ नारीणांचनराणांचसर्वदुःखापहंतथा॥ स्कंदउवाच॥ देवासुरमभूद्युद्धंपूर्णम
ब्दशतंपुरा॥ वृत्रेसुराणामधिपेदेवानांचपुरंदरे॥ तत्रदैवैर्महावीर्यैर्नारायणबलाश्रयात्॥ असु
रानिर्जितास्सर्वेपातालतलमाययुः॥ केचिल्लंकांगतास्केचित्प्रविष्टावरुणालयं॥ गिरिदुर्गसमा
श्रित्यकेचित्तस्थुर्महाबलाः॥ तत्रकोल्हासुरोनाममहावीर्योमहाबलः॥ गोमंतदुर्गमंदुर्गंगिरिमाश्रित्यनि

र्पयः॥ यराजकन्यकालोके रूपवत्यो महागुणाः॥ आनीय गिरिदुर्गस्थो रमयामास सर्वशः॥ रमयित्वा
क्षिपतत्र कालरूपी विहंगमः॥ एतस्मिन्नेव काले तु आगतो मुनिसत्तमो॥ श्रुत्वा प्रभावसंपन्नो पुलस्त्य
गौतमः सह॥ तीर्थयात्राप्रसंगेन श्रुत्वा वाक्यं जनस्य तत्॥ लोका असुरेत्या जनितां कन्या हेतोः शिखिध्व
ज॥ ताऊचतुर्जनं सर्वमगस्त्योस्ति महामुनिः॥ येनतोयनिधिः पीतो विंध्याद्रिश्च निवासितः॥ वा
तापील्वल नामानो दैत्यौ येन विनाशितौ॥ तं गच्छामो वयं सर्वे कोलासुरवधाप्तये॥ इत्यामं
त्र्य जनाः सर्वे गत्वा तमभिवाद्य च॥ ऊचुः सर्वे यथावृत्तं कोलासुरविचेष्टितं॥ तच्छ्रुत्वा भगवानाह मित्रा
वरुणात्मधीः॥ सृष्टिस्थितिविनाशानां कारणं भक्तवत्सलः॥ रामस्याद्यौ तपस्यंति ब्रह्मविष्णुमहेश्व
राः॥ तिस्रः संध्यास्त्वंतिमत्यास्तेषां शुश्रूषणे रताः॥ प्रविश्य तत्र महालक्ष्मी शक्तिरूपा संस्थिता॥
सर्वशक्तियुता देवी लोकानां हितकाम्यया॥ इत्युक्त्वा कालरितं गत्वा कोलासुरवधाप्तये॥ निवेद्य नि

११२

थाविस्तृतसंतानं देहि लमजरामरं॥ दूर्वामंत्रः॥ तल्लिंगमंत्रैरीशानमर्चयेत्प्रयतः शुचिः॥ ततः संपूजयेद्विप्रा
न् फलैर्नानाविधैर्द्विज॥ अनग्निपक्वमश्नीयाद्दन्नं दधि फलं तथा॥ अक्षारलवणं ब्रह्मन्नश्नीयान्मधुनान्वितं॥
दद्यात्फलानि विप्रेषु फलाहारः स्वयं भवेत्॥ प्रणम्य शिरसा दूर्वां शिवं शिवमुपाश्नुते॥ य एवं कुरुते भक्त्या म
हादेव्यस्य पूजनं॥ गपात्वं पात्यसौ ब्रह्मन् मुच्यते ब्रह्महत्यया॥ एवं पुण्या पापहरा अष्टमी दूर्वसंज्ञिता॥ च
तुर्णामपि वर्णानां स्त्रीजनानां विशेषतः॥ ॥ इति आदित्यपुराणे तु श्री पूजनमुक्तं॥ शुक्लाष्टम्यां तु संप्रा
प्ते मासि भाद्रपदे तथा॥ दूर्वाप्रतानसंस्थे तामुत्तराशाभिगामिनं॥ पूजयेद्गृहमानीय गंधमाल्यानुलेपनैः॥
फलमूलैस्तथा नैवेद्यदीपधूपैर्विसर्जयेत्॥ अग्निपक्वं तथा सर्वं न निवेद्यं कथंचन॥ नोक्तव्यं च तथा ब्रह्मन्
नग्निपक्वं विसर्जितं॥ दूर्वांकुरस्थां संपूज्य विधिना यौवनश्रियं॥ यौवनं श्रियमाप्नोति यत्र यत्राभिजाय
ते॥ भविष्योत्तरे तु विशेषः॥ अष्टम्यां फलपुष्पैश्च खर्जूरैर्नारिकेलकैः॥ द्राक्षामोदकपुष्पैश्च वर्वदैर्लकुचैः
स्तथा॥ नारिंगैर्जंबुकैराम्रैर्बीजपूरैश्च दाडिमैः॥ दध्यक्षतैस्तथा भिश्च धूपैर्नैवेद्यदीपकैः॥ मंत्रेणानेन राजे

मुष्टमुष्टिकचाकचि॥ उद्यतेराक्षसबले भूतनाथो महाबलः। ममर्द राक्षसानीकं शरैर्बाणैर्विदारुणैः॥ हत्वं दृष्ट्वासुरबलं
क्रुधः क्रुरासुरारणे॥ अभिद्रुत्य गदापाणिस्ताडयामास भैरवं॥ ययौ मूर्छां महावीर्यस्ते नाभिहतमस्तकः। ततो देव्यो तिवेगे
नत्वाभिदुद्रुवुरुत्थिते॥ त्रिशूलैरभिजघ्नुस्तं पट्टिशैश्शौर्य व्यहारयत्। पादाघातैः समाजग्मुः सिंहः करिवरं तथा॥ स
कुंडलशिरस्त्राणो दष्टोष्ठो रक्तलोचनः॥ कृतभ्रुकुटिवक्त्रो सौ राक्षसस्ता मुहुर्मुहुः॥ गदया ताडयामास शिरःकं
ठांसिकुक्षिषु॥ बभंजस्ता गदां तां तु हसंत्यः संमदाकुलाः॥ ततो धनुर्धरो भूत्वा बलज्वालमिवाकिरत्॥ तासां
शरीरमर्माणि बिभिदुः शरपुरोगमैः॥ ननाद बधवेरो सौ हृदयं चाभिनच्छरैः॥ ततः क्रुधतरास्ताश्शुतां पादे जगृहुः
र्शं॥ आकाशे भ्रामयित्वायं चिक्षिपुर्गगने क्रुधा॥ कोलासुरो पि पतितो ताया वसुधातलुमिच्छति॥ तावं निर्गं
त्य लक्ष्मीस्तं पादाभ्यां प्रत्यपीडयत्॥ तत्पादपीडितरक्षोविहृत्य नयने भृशं॥ मुक्तकंठस्वनं कृत्वा ततो मो
हमुपेयिवान्॥ ततो देव्याः सगंधर्वा मनुष्याः कुषुमस्तकचन्॥ देवनाथाश्च देव्याश्चनन्दनुः संमदाकुलं॥

११२

देवदुंदुभयो नेदुः पुष्पवृष्टिः पपात ह॥ दिशः प्रसेदुर्मरुतो ववुर्मंदरवं जगत्॥ सुरासुरशिरोरत्नवंद्यपादांबुजास्त
लः॥ देव्यो दिव्यनयानेन यांति कोलापुरं प्रति॥ आयांति परजां वीक्ष्य मुक्तपादप्रशृंखलः॥ तुष्टवपरया भक्त्या रा
जकन्यागणो मुदा॥ राजकन्या ऊचुः॥ वंदारुवीरसुरवृंदकिरीटकोटिरोचिर्घटानिकरकल्पितरत्नदीपं॥ दे
वीत्वदीयचरणं शरणं जनानां सेवामहे सकलमंगलवर्धनाय॥ उत्फुल्लकैरवदलायतलोचनायै गंडोल्लसच्च
डलमंडितायै॥ राकाशशिप्रतिभटाननकोमलायै तस्यै नमः कमललोचनवल्लभायै॥ सद्रत्नकल्पलति
कां हरिकंठभूषां केयूरहेमकटकोज्वलकंकणांकं॥ संसारसागरमुखं पततो ममाद्य देहि त्वदीयकरदर्शि
मनंगमातः॥ दृष्टा देवि जना जयाय विविधा ब्रह्माधिपत्यं गता विष्णोर्वक्षसि याचकार नरतालीलाब्जमाला
त्तमं॥ केशाग्रंप्रहितं त्वदीयचरणद्वंद्वाब्जसेवारतं कारुण्यामृतसारपूरितदृशी मामव घपश्ययेश्वरी॥ मल्लीवि
फुल्लकुसुमोज्वलमध्यभागधम्मिल्लभाररजिततारकचित्रविश्रा उत्तंसहेमनिकषोज्वलकायकांतिलक्ष्मीस्व
यं प्रमम तां श्रियमातनोतु॥ इति स्तुत्या महालक्ष्मीर्भक्तानामिष्टदायिनी॥ योगिन्योघभविष्यध्वमिति तार

वरं ददौ॥ दृष्ट्वा तास्ता मुदा देवी सारूप्यं च प्रदापयेत्॥ ताभिर्निवेदिता देवि वरं वर्यं ददौ मुदा॥ राजकन्यास्ततः
सर्वा मुक्ताः स्वपुरं समाययुः॥ ततः प्रभृति लोकेषु पूज्यास्ताः सर्वकामदाः॥ ताः श्चतुःषष्टियोगिन्यो महाल
क्ष्मीपरिग्रहात्॥ नृत्यंति निर्वहेस्तत्र गीतवादित्रनिस्वनैः॥ पुरा देव्या महालक्ष्म्या करहाटपुरे निशि॥ ए
वं प्राप्ता वासा देवि विष्णुरामा षडानना॥ व्रतस्यास्य विधानं च शृणु मत्तो विधानतः॥ मासि भाद्रपदे शुक्ल
पक्षे ज्येष्ठायुताष्टमी॥ प्रारब्धव्यं व्रतं तत्र महालक्ष्म्या यतात्मभिः॥ करिष्यामि व्रतं देवि त्वद्भक्त्या त्वत्प
रायणाः॥ तदविघ्नेन मे यातु समाप्तिं त्वत्प्रसादतः॥ इत्युच्चार्य ततो बध्वा दोरकं दक्षिणे करे॥ षोडशग्रंथिसहि
तं गुणैः षोडशभिर्युतं॥ ततो न्वहं महालक्ष्मीं पूजयेन्नियतात्मवान्॥ गंधपुष्पैः सनैवेद्यैर्यावत्कृष्णाष्ट
मीदिनं॥ तस्मिन्दिने तु संप्राप्ते कुर्यादुद्यापनं व्रती॥ वस्त्रमंडपिकां कृत्वा माल्यरत्नोपशोभितं॥ च
तस्रः प्रतिमाः कृत्वा सौवर्णीः स्वस्वरूपिणीः॥ स्नपनं कारयेत्तासां पंचामृतविधानतः॥ षोडशैरुपचारैश्च
धूपदीपादिभिस्तथा॥ जागरं तत्र कर्त्तव्यं गीतवादित्रनिस्वनैः॥ ततो निशीथसंप्राप्ते ह्युदिते मृतदी

११४

खिन्नं तेभ्यः तस्थुः प्रांजलयो जनाः॥ तच्छ्रुत्वा निखिलं तेभ्यो ब्रह्मविष्णुमहेश्वराः॥ संध्यात्रयं समाहूय वा तं प्रोचुर्जनेश्वराः॥
वंदारुसुरवृंदं दुमौलिमाणिक्यमंडला॥ हनिष्यति महालक्ष्मीर्युद्धे कोलासुरं रिपुं॥ भगवत्यो मूर्तिमत्यो दंडश्च
लादिभिर्वरैः॥ आयुधैर्विविधैः कृत्वा जयमाप्स्यथ संयुगे॥ युष्माकं च महायोसौ युष्मत्क्रोधसमुद्भवः॥ भूतनाथो
भूतमन्युं वः सहायो भविष्यति॥ इत्युक्त्वा तरितं गत्वा रुरुधुः कोलराक्षसं॥ निरुध्य च पुरीं देव्यो जगर्जुर्जलद
स्वना॥ भिद्यस्वश्च दिशां द्वंद्वं वर्धयंत्यश्च तत्क्रुधां॥ कोलासुरोपि तच्छ्रुत्वा प्रोत्पपात महारवनात्॥ रोषणः क्रो
धतांम्रास्यो मेरोरिव महागात्रकः॥ हस्त्यश्वरथपादात्तचतुरंगबलान्वितः॥ निर्ययौ भूतनाथाद्युं कालिकाया इवा
शनिः॥ सकुंडलशिरस्त्राणकवची धृतबाणधीः॥ बद्धगोधांगुलित्राण ऊर्ध्वे वृत्र इवापरः॥ ततो राक्षससै
न्यं तं भूतनाथो न संगतं॥ देवनारीमनोल्लासी युद्धं चक्रेतिभीषणं॥ महारवैर्भेरीमघोरैर्वीणाक्रोधाकार
निस्वनैः॥ निस्वाननिनदैश्चैव लोकः शब्दमयोभवत्॥ जय भिंधीति वदंतां धावतामितरेतरां॥ वद्धयेसमरं घोर

धितो ॥ कृत्वातु स्थंडिले पद्मं सषडंगं प्रपूजयेत् ॥ तथार्घ्यं च रागेण व्रती तस्मै समाहितः ॥ क्षीरोदार्णवसंभू
तं चंद्रलक्ष्मीसहोदर ॥ पीयूषधामरोहिण्या सहितोर्घ्यं गृहाणवे ॥ क्षीरोदार्णवसंभूते कमले कमलालये ॥
प्रयच्छ सर्वकामान्मे विष्णुवक्षस्थलालये ॥ पुत्रान्देहि यशो देहि सौख्यं सौभाग्यमेव च ॥ कालि कालि
महाकालि वीरकालि नमोस्तु ते ॥ त्रैलोक्यजननि त्राहि वरदे भक्तवत्सले ॥ एकनाथे जगन्नाथे जमदग्निप्रि
ये व्यये ॥ रेणुके त्राहि मां देवि राममातः शिवं कुरु ॥ कुरु श्रियं महालक्ष्मी आश्रय त्वां शुभाश्रये ॥ मंत्रैरे
तैर्महालक्ष्मीः प्रार्थ्य श्रोत्रिययोषितां ॥ श्रीसूक्तेन तथा वह्नौ पद्मानि जुहुयाद्बुधः ॥ पायसं चैव बिल्वा
नि तदाभावे तथा घृतं ॥ ग्रहेभ्यश्चैव होतव्यं समिच्चरुतिलादिकं ॥ चंदनं तालपत्रं च पुष्पमालादिकं त
था ॥ नैवेद्यैश्च भक्ष्याणि क्षिप्त्वा बहुविधानि तु ॥ प्रत्येकं षोडशैतानि पूगपर्णानि चैव हि ॥ तान्यन्ये
षु समाच्छाद्य व्रती दद्यात्समंत्रकं ॥ क्षीरोदार्णवसंभूता लक्ष्मीचंद्रसहोदर ॥ व्रतेनानेन संतुष्टा प्रीयतां
विष्णुवल्लभा ॥ इंदिरा प्रतिगृह्णातु इंदिरैव ददाति च ॥ इंदिरा तारकोभाभ्यां इंदिरायै नमो नमः ॥ दत्वार्घ्यं

पायदानीश्च श्रोत्रियाणां च योषितां ॥ चतस्रः प्रतिमास्तास्तु ब्राह्मणाय निवेदयेत् ॥ एवं कृत्यं तु निर्वर्त्य व्रती भो
जनमाचरेत् ॥ स्कंद उवाच ॥ केनेदं स्वीकृतं पूर्वं कथमस्मिन्प्रकाशितं ॥ ब्रूहि मे तत्त्वतो देव यद्यहं तव वल्लभः ॥
शंकर उवाच ॥ आसीद्राजा स पूर्वं भो मो मंगलार्पा इति श्रुतः ॥ कुंडिन्ये नगरे रम्ये तस्य पद्मावती प्रिया ॥
तमागतः कश्चिदेकः सेवको ब्राह्मणोत्तमः ॥ कदाचिन्मृगयासक्तो भूपालो वनमाविशत् ॥ तत्र विध्वा वरा
हादीन्मृगान्हत्वा सहस्रशः ॥ क्षुत्तृट्परिगतः श्रांतो वृक्षमूलमुपाश्रितः ॥ उदकान्वेषणे वारान् प्रेषया
मास सर्वशः ॥ वने जलं तु नापश्यन्कश्चिद्भ्रांता परयत्नतः ॥ ते गत्वा नृपतिं प्रोचुर्नत्रांभ इति दुःखिताः ॥
तवल्लकोपि बभ्राम विपिनं तृषितोद्गितः ॥ भ्रममाणस्तदापश्यत् कस्मिंश्चिद्वनगह्वरे ॥ रम्यं सरोवरं दि
व्यं कुमुदोत्पलमंडितं ॥ तत्रापश्यदेककं न्याद्दिव्यरूपा मनोरमा ॥ चार्वंगी चारुनयना पीनोन्नतपयो
धराः ॥ हारकंकंकणंकेयूरनूपुरालंकृताः शुभाः ॥ पुजयंती महालक्ष्मीव्रतरूपेणासादरात् ॥ तवल्लोकोपि पप्र
च्छ किमिदं कथ्यतामिति ॥ स्त्रिय ऊचुः ॥ महालक्ष्मीव्रतमिदं सर्वकामफलप्रदं ॥ क्रियते स्माभिरेका

पशांतये॥ तद्दुःखंतत्सपादेवविनष्टमभवत्तदा॥ पुनश्चमृगयासक्तोनृपालोवनमाविशत्॥ कंचिन्मृगंसमा
विध्यबाणेनैकेनबहुमान्॥ अन्वगच्छन्मृगं--स्तस्याश्रुचिदयागमः॥ वरंसुनिंदर्शगिवासिष्ठंवीतकल्मषं॥
कृतातिथ्यक्रियोदृष्टाचरंतीचहरंतिकाल्॥ हावभावविभासाग्रेहरंतीहरिणीक्षणा॥ मंदाग्निर्गत्यन्नृपतिःप्रो
वाचमधुरंवचः॥ वासोरूकाक्षिकाल्या पिकिमर्थंचरसेवने॥ किंनरीमानुषीवात्वंयक्षिणीचारुहासिनी॥
किमत्रबहुनोक्तेनक्षजमानंभजस्वमां॥ नृपेणैतेनमत्योक्तासस्मितावाक्यमब्रवीत्॥ पुनर्भजामिचा
हंत्वांमवैहिमानुषीनव॥ महालक्ष्म्यपचारेणत्वयाहीनवसाम्यहं॥ मुनीद्रस्याश्रमेरम्येतरुगुल्मोपशो
भिते॥ ममोपरिकृपाविष्टोमहालक्ष्मीव्रतोत्तमं॥ कारयामासविधिवत्सर्वविघ्नोपशांतये॥ तयोक्तंवचनं
श्रुत्वासचोत्फुल्लविलोचनः॥ ऋषेरनुज्ञामादायप्रियामादायसत्वरः॥ हृष्टपुष्टजनैर्दृष्टंपताकध्वजशो
भितं॥ प्रविवेशतयासार्धंसपौरैरभिवंदितः॥ महालक्ष्मीव्रतंभूपस्तयासहचकारह॥ भुक्त्वेहभोगान्
विपुलान्पुत्रैःपौत्रैःसमावृतः॥ भूपालःसार्वभौमोभूत्त्वक्षोमात्यतांययौ॥ महालक्ष्मीप्रसादेनस

सन्निधिःसर्वसंपदां॥ एवंप्रभावासादेवीनराणामिष्टदायिनी॥ सर्वपापहरादेवीसर्वदुःखापहारिणी॥ एवंषो
डशवर्षेषुकर्तव्यंव्रतमुत्तमं॥ याकरिष्यतितांभक्त्यास्वयंसिद्धिमुपासते॥ लोकपालाश्चसुसितद्द्वाग्ख
मनोरथान्॥ नारीवापुरुषःकरिष्यतिमुदाभक्त्याव्रतंयत्नतःसेवांतेहरिरुद्रपद्मजसुरापुष्यंतितस्यप्रियं॥
तत्पादोपरिरंजयंतिमनुजामौलिप्रभामंडलेतस्मिन्नेवकुटुंबिनीवसतिसालक्ष्मीस्वयंविष्णुना॥ स
द्भक्त्यावाथभक्त्यावाकुर्वतंव्रतमुत्तमं॥ अंतकालेस्वयंविष्णुःसंसारात्परिरक्षति॥ यइदंशृणुयान्नि
त्यंश्रावयेद्वासमाहितः॥ नसंत्यजतितंलक्ष्मीर्नैवकामयेत्॥ सर्वपापविनिर्मुक्तःस्वर्गलोकेमहीय
ते॥ इतिस्कांदोक्तंमहालक्ष्मीव्रतं॥ युधिष्ठिरउवाच स्वस्थानलाभपुत्रायुःसर्वैश्वर्यसुखप्रदं॥ व्रतमे
कंसमाचक्ष्वविचार्यपुरुषोत्तम॥ श्रीकृष्णउवाच॥ दुर्वारवृत्तदैत्येतेपरिव्याप्तेत्रिविष्टपे॥ एतदेवकृ
तस्यादौदेवेंद्रःआहनारदं॥ तस्यश्रुत्वाततोवाक्यंसमुनिःप्रत्यभाषत॥ नारदउवाच॥ पुरंदरपुराप्र
र्वेपुरमासीत्सुशोभनं॥ रत्नगर्भाभवद्भूमियत्ररत्नाद्यधरैः॥ यत्रांगनाजनापांगभल्लालोचनसाय

यके॥ त्रैलोक्यं स्ववशं चक्रे देवः कुसुमसायकैः॥ चतुर्वर्गजनिर्यत्र यत्र चित्रविभूषणा॥ विश्वकर्मापि यद्वी
क्ष्य कंपयत्यनिशं शिरः॥ यत्राभवन्महीपालो मंगलो मंगलालयः॥ चिल्लदेवी प्रिया तस्य दुर्भगैका बभू
व ह॥ अन्या तु चोलदेवीया महिषी सा यशस्विनी॥ कदाचिन्मंगलो राजा चोलदेवीसहायवान्॥ प्रास
दशिखरारूढः स्वच्छलक्ष्मीमेकामपश्यत॥ वामालोक्य महीपालः स्मरस्मेरमुखांबुजः॥ चोलदेवी प्रति
प्राह दंतच्छायातिनदिङ्मुखः॥ चंचलाक्षि तवोद्यानं कांतिनिर्जितनंदनं॥ कारयामि तवादिष्टं तत्रो
द्यानमकारयत्॥ संपन्नं च तदुद्यानं नानाद्रुमलतान्वितं॥ नानारक्षकसंयुक्तं नानाकृतिसमा
कुलं॥ अथागत्य महालोकस्तत्र न्यस्तानभक्षत॥ पंकप्राट् घनश्यामश्मश्रुराक्षिभ्रतचलः॥ दंष्ट्रा
वष्टब्धचंद्रार्कः प्रलयांभोधरद्युतिः॥ तद्भुनक्तीति विज्ञाय संसेत्योद्यानपालकाः॥ सभयास्तस्य वृत्ता
न्तमूचुस्ते नृपतेः पुरः॥ तदाकर्ण्य ततो राजा क्रोधकुलितलोचनः॥ वधाय दंष्ट्रिणस्तस्य संदिदे
शाखिलं बलं॥ ततश्च बालभूपालस्त्रिगंडगलितैर्गजैः॥ आलोक्य तन्महीसर्वा वाजिवृंदस्तताब ११७

ग्रभनोभिस्तत्र भक्तितः॥ नवल्लोकोपि तच्छ्रुत्वा व्रतजग्राह भक्तिमान्॥ तदनुज्ञां गृहीत्वास्य जलमादाय सत्व
रः॥ अजगाम जलं तस्मै॥ -- जलिना सह॥ जलं पीत्वा नृपस्तस्य तं दृष्ट्वा दोरकं करे॥ किमिदं दोरकं विद्वन्किंव्र
तं कृतवानसि॥ राज्ञा पृष्टस्तु वल्लोपि कथयामास तद्व्रतं॥ तच्छ्रुत्वा राजशार्दूलो व्रतं जग्राह भक्तिमान्॥ नवलो
केन सहितो राजा स्वपुरमाययौ॥ पद्मावतीगृहं गत्वा तया रंतुं गतः सह॥ रममाणोऽग्रय सा देवी तेन राज्ञा प्रि
येण वै॥ तं दृष्ट्वा दोरकं हस्ते कुपितात्यंतकोपना॥ कथात्वं वचितो ब्रूहि कया बधसु दोरकं॥ ज्वालामालाकुले
वह्नौ क्षिप्तवसति कोपिता॥ हाहा कष्टमिदं पापं कृतं मूढ तया त्वया॥ इति निर्भर्त्स्य तां राजा तेभ्याज्वनगेह
र॥ सा च हातिं ययौ पश्चात्तत्र हानिं ययौ नृप॥ महालक्ष्म्य वचारिया सारण्ये जनवर्जिते॥ मृगमाणा वनेत
स्मिन कश्चिद्भूतिमाप्नुयात्॥ विचरंती वने तत्र ऋषेः कस्यचिदाश्रमं॥ ददर्श मृगसंकीर्णं शांतकृष्णमृगा
न्वितं॥ तत्रापश्यद्वने रम्ये वसिष्ठं मुनिपुंगवं॥ ववंदे चरणौ तस्य विमंज्ञा दुःखकर्षिता॥ चिरं ध्यात्वा मुनि
स्तस्यादज्ञानां दुःखकारणं॥ महालक्ष्म्योपचारेणाज्ञानं विज्ञानचक्षुषा॥ तद्व्रतं कारयामास तस्या दुःखो

रं॥ चालयन्निखिलान्शैलान्स्यंदनौघमरुद्भरैः॥ पतिव्रात्तमहाध्वानैः पूरयन्नखिला दिशः॥ ततोगारं समा
वृत्य तदुद्यानं नरेश्वरः॥ उवाचोच्चैरिति ध्वानैर्दिशो मुखरयन्दश॥ पश्चिमस्य वरोहार्य प्रयात्युपवनांतिकं॥
तस्या वश्यं शिरश्छेदं विदधामि रियोरिव॥ तस्य भूपस्य तद्वाक्यं समाकर्ण्य समस्तरुरः॥ जगामास्यैव मार्गे
ण प्रापि न च्छेषितं यथा॥ ततः क्रुधो धराशक्रो कथयत्वं प्रताड्यत॥ त्रीज्य कालं कितास्येंदुः मार्गो तस्यैव सो
गमत्त॥ गत्वा तु विपिनं घोरं सिंहशार्दूलसंकुलं॥ तमासैल्लताल हिंताल शालार्जुनसमावृतं॥ ~ झिंरु
कारसंभारवाचालितदिगंतरं॥ तत्रैकवे तसोपश्यं वभ्रवभ्रामभूपतिः॥ कोलो वलामवाप्याथ सोभव
द्राजसंमुखः॥ भल्लेन सा वधात्क्रोडं वज्रेणाद्रिं यथा नवात्॥ तत्रैकवे तसोपश्यं बभ्रवभ्रा मभूपति॥ अथ
व्योम्नि विमानस्थः स्मरसुंदरविग्रहः॥ क्रोडरूपं परित्यज्य सोब्रवीन्मंगलंनृपं॥ गंधर्व उवाच॥ स्वस्ति
तेस्तु महीपाल त्वया मुक्तिः कृता मम॥ नवाकर्णय वृत्तांतं येचाहंजातईदृशः॥ एकदा देवतावृंदैः संस्तुतः
कमलासनः॥ नंचत्युएदिभिस्तालैः षड्जाद्यैः समभिस्वरैः॥ इंद्रादिभिस्त्रिभिर्मानेग रित्नमानमवान्नृप॥

नानास्थानगुणोपेतमश्रौषाजीतमुत्तमं ॥ गीयमानश्रुतस्थानात्ततोहं कर्मणामुना ॥ क्षमस्वचित्ररथ त्वं च
ब्रह्मणा सृष्टिकर्मणा ॥ ब्रह्मोवाच ॥ कोलो भवेति मेदिन्यां मुक्तिनेस्त्व यदा भवेत् ॥ निर्जिताखिलभूपाले
मंगलस्ताह निष्यति ॥ तदयप्रतिमं सर्वं त्वत्प्रसादान्महीयते ॥ तद्गृहाण वरं भूप देवश्यापि सुदर्लभं ॥ महा
लक्ष्मीव्रतं दिव्यं चतुर्वर्गफलप्रदं ॥ लभस्व सार्वभौमत्वं गच्छ राज्यं निजं द्रुतं ॥ नारद उवाच ॥ चित्ररथो
थ गंधर्व उक्तेदं भूपतिं प्रति ॥ अंतर्धानं ततस्तुष्टः शरत्कालं द्रवांबुदः ॥ अथ मंगलभूपालः पार्श्वस्थं
द्विजमाकुलं ॥ किं त्वोक्य वटुकं किंचित्क्षमामाक्षिप्तवांबलं ॥ उवाच मधुरां वाचं स्मितपूर्वं सुविस्मितं ॥
देवस्त्वं दानवस्त्वं वा गंधर्वो वाथ राक्षसः ॥ सत्यं वद करो कस्मात्किं मर्थ त्व[illegible]मिहागतः ॥ श्रुत्वेत्याशि
ष्यनं विप्रश्चाहर्तुं देशसंभवः ॥ अर्धसार्धं त्वयायातः सत्तदाद्दिशयथोचितं ॥ राजाथ तमुवाचेदं त्वं वटो चूत
नाक्षयः ॥ अपल्याणं विधायाश्वं तूर्णं तोयं च पायय ॥ अथ विश्रम्य भूपालं वटुको वटपादपे ॥ तथाल्प
त्य तुरंगं च समारुह्य महामतिः ॥ जगाम पक्षिघोरे पायत्रास्ते सुंदरं सरः ॥ कमलेकृविलासे नरथांगाभ्या

११८

चितः कथां श्रुत्वा पूजयेत्तैश्च दोरकं॥ ततस्तु मानरारभ्य यावत्स्यादिति चाष्टमी॥ तावत्प्रक्षाल्य हस्तौ तु पादातीति क
थंतथा॥ शृणु यात्प्रसीद्यहे विप्र तत्संख्ये रक्षतादिष्टिः॥ अथ कृत्वाष्टमी प्राप्य नक्तकाले जितेंद्रियः॥ स्नानं तु कृत्वा
बरधरो व्रती पूजागृहं विशेत्॥ तत्रोपविश्य पूर्वास्यश्चारुधौतासनोरपि॥ श्वेतपत्रे लिखेदष्टदलं कमलमुत्त
मं॥ ऐंद्रादिशक्तिसंयुक्ते पार्श्वपत्रं सकेसरं॥ कर्णिकायां ततो लक्ष्मीं कर्पूरक्षोदपांडुरां॥ शुभ्रवस्त्रपरीधानं मु
क्ताभरणभूषितं॥ पंकजासनसंस्थानं स्मेराननसरोरुहां॥ शारदेंदुकलाकांति स्निग्धनेत्रां चतुर्भुजां॥ प
द्मयुग्माभयवरदो करव्यग्रकरांबुजां॥ अभितो गजयुग्मेन सिच्यमानां करांबुजां॥ संचिंत्यैवं चिरवेद्देवीं
कर्पूरागरुचंदनैः॥ ततस्त्वावाहनं कुर्यान्मंत्रेणानेन सुव्रती॥ महालक्ष्मी समागच्छ पद्मनाभपदादिह॥ पंचोपचा
रपूजेयं त्वदर्थं देवि सर्वदा॥ इत्यावाहनमंत्रः॥ आलयस्ते हि कलिनः कमलं कमलालये॥ कमले कमले
ह्यस्मिंस्तिष्ठ तित्वं कृपया कुरु॥ स्थापनं॥ गंगादिसलिलाधारतीर्थमंत्राभिमंत्रितं॥ सुतीर्थेभ्यः समानीतं स्नानं
तत्प्रतिगृह्यतां॥ स्नानं॥ मलयाचलसंभूतं नानापन्नगरक्षितं॥ शीतलं बकुलामोदं चंदनं प्रतिगृह्यतां॥

गंधं॥ मिलत्परिमलामोदं मत्तालिकुलसंकुलं॥ आनंदिनं वानघं वा पद्मायै कुसुमं गलं॥ इतिपुष्पं॥ गंधसंभा
रसंनद्धं दृष्टुवस्तुसमुद्भवं॥ सुरासुरनरानंदि धूपं देवि गृहाण मे॥ धूपं॥ श्रियं प्रजापतिं लक्ष्मीं वरदां विष्णुपत्नीं वि
ष्णुवल्लभां हिरण्याढ्यां॥ सुवर्णमालिनीं पद्मवासिनीं पद्मप्रियां मुक्तालंकारां॥ सूर्यचंद्रां विश्वमूर्तिं भुक्तिं विश्वभू
तिं॥ ऋधिं समृधिं तुष्टिं धनेश्वरीं श्रद्धां भोगिनीं भोगधात्रीमिति॥ मार्तंडमंडलाखंडचंद्रबिंबाग्नितेजसां॥ नि
धानं देवि दीपोयं निर्मितस्तव भक्तितः॥ दीपं॥ देवतालयपात्रस्थाधारधान्यजं॥ षोडशाकारसंभारं नैवेद्यं ते
नमः सदा॥ नैवेद्यं॥ स्नानादिकं विधायापि सद्यः शुद्धिरवाप्यते॥ तदेतदाचमनीयं महालक्ष्मी विधीयतां॥ इत्या
चमनं॥ पातालतलसंभूतं चंदनांभोजभूषणं॥ नानागुणसमाकीर्णं तांबूलं देवि ते नमः॥ तांबूलं॥ तंतुसंता
नसंयुक्तं कलाकौशलनिर्मितं॥ सर्वांगाभरणं श्रेष्ठं वसनं परिधीयतां॥ वस्त्रं॥ विष्णोर्वक्षसि पद्मे च शंखे च
क्रे तथाबरे॥ लक्ष्मी देवि यथासि मयि नित्या तथा भव॥ प्रार्थना॥ उत्तरादोरकं बाह्यो लक्ष्मीपार्श्वे निवेद
येत्॥ लक्ष्मीदेवि गृहाणत्वं दोरकं यन्मया धृतं॥ कथां श्रुत्वा सुवर्णं च दत्वाचार्याय दक्षिणां॥ दीपान् षोडश

पिंडाश्च गोधूमस्य द्विजायते॥ दत्वा तत्संख्यया भुक्त्वा रात्रौ जागरणं चरेत्॥ चंद्रोदये थ संजाते देयादर्घ्यं ततो व्रती॥
मंत्रेणानेन विप्रेंद्र शंखे नांबुफलादिना॥ नमोस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोस्तु ते॥ व्रतसंपूर्णतां यातु गृहा
णार्घ्यं विधो मम॥ चंद्रार्घ्यमंत्रः॥ प्रातर्विसर्जयेद्देवि मंत्रेणानेन सुव्रती॥ पंकजं देवि संत्यज्य मम वेश्मनि संविश॥
यया सपुत्रभृत्योहं सुखी स्थां त्वत्प्रसादतः॥ इति विसर्जनं॥ षोडशाहे तु संपूर्णे कुर्यादुद्यापनं व्रती॥ विधि
नायेन विप्रेंद्र स्पष्टं शृणु श्रद्धासमन्वितः॥ दातव्या धेनुरेका वै स्वर्णशृंगादिसंयुता॥ श्रोत्रियाय सुवर्णं च तथा
त्रवसनादिकं॥ यथाशक्त्या सुवर्णा वदत्वा पूर्णं भवेद्व्रतं॥ द्विजेभ्यः षोडशभ्यश्च प्रदद्याद्वसनादिकं॥ सार्थ
उवाच॥ एतत्ते कथितं विप्र व्रतानामुत्तमं व्रतं॥ यद्विधानादवाप्नोति लभते वांछितं फलं॥ कृत्वा व्रतं परं विप्र
राजानं तं च कारय॥ व्रतमेतत्त्वया विप्र देयं श्रद्धावते परं॥ नास्तिकाय पुरस्तोतुं न प्रकाश्यं परं च न॥ नमस्कृ
त्वा यतं ~~स्कास्या~~॥ संप्रार्थ्य पंकाद्युत्थाप्य वाजिनं॥ संपीयांभस्तथादाय पद्मिनीपत्रयंत्रितं॥ आरुह्य तुरगं
विप्रो राजांतिकमुपागतः॥ निवेद्य तद्वृत्तं विप्रो राजानमथ कारयत्॥ नानाप्रकारसंभारशबलं बटुकस्य

१२०

रणानि च॥ वनमालालयं तेन दधन्नारायणं पीतवस्त्रं॥ भग्नवायुसुतो वेगमक्षारं विषवर्जितं॥ नासिकाग्रस्थितं तस्मात्त
प्रसन्नं सागराधिकं॥ पंके मग्नोथ तन्नाश्वः कष्टादुन्नीयते ततः॥ चतुर्दशीं निरीक्ष्याय तस्यै वसरसस्तटे॥ दिव्यवस्त्र
परीधाने दिव्याभरणभूषिते॥ कथयंत कथां दिव्यां स्त्रीणां सार्थमपश्यत॥ उपसृत्याथ तेषां सार्थं तद्वृत्तांतं नि
वेद्य च॥ कृतांजलिरिति प्राह वटुर्मधुरया गिरा॥ वटुरुवाच॥ एतत्किं क्रियते सार्थं त्वया भक्तिपरायणे॥ को विधिः
किं फलं चास्य ब्रूहि तन्मे यथातथं॥ श्रुत्वाथ तमुवाचेदं सार्थः करुणया गिरा॥ सार्थ उवाच॥ शृणु विप्रैकचि
त्तेन श्रद्धाभक्तिसमन्वितः॥ या माया प्रकृतिः शक्तिस्त्रैलोक्यं भिधीयते॥ व्रतमेतन्महालक्ष्म्यास्तस्याः सर्वफल
प्रदं॥ आकर्णय विधिं चास्य कथ्यमानं महावटो॥ भाद्रे मासि सिते पक्षे आरंभोस्य विधीयते॥ प्रातः षोडश कृत्ये
स्नात्वा प्रक्षाल्यांघ्रिकरौ मुखं॥ तंतुषोडशसंयुक्तं ग्रंथिषोडशसंयुतं॥ मालतीपुष्पकर्पूरचंदनागरुचर्चितं॥ लक्ष्म्यै
नमोथ मंत्रेण प्रतिग्रंथ्यभिमंत्रितं॥ धनं धान्यं धर्मकीर्त्ति आयुर्यशश्रियः सुखं॥ तुरगान्दंतिनः पुत्रान्महा
लक्ष्मी प्रयच्छ मे॥ मंत्रेणानेन बध्वाथ दोरकं दक्षिणे करे॥ कांडानि षोडश्यादाय दूर्वायाश्चाक्षतानि च॥ एक

ना॥ व्रतस्यास्य प्रभावेन तूर्णं स्वपुरमागतः॥ तमायांतं समाकर्ण्य राजानंदपुरंदरः॥ उत्सवं च क्रियेपौरास्तौर्यादिकपुरस्स
राः॥ चलत्पताकदोर्माललसत्कलशमौलिकं॥ पुरं नत्यदिवा भाति छन्नं घंटो घघर्घरैः॥ अथोत्कलिकपाकाविद्धा
वंतिस्म वरांगना॥ चलन्मुक्तालताजालैश्चतुष्कनिव कुर्वती॥ कदाचिन्मुक्तकेशी वक्त्रेनेकनयनांजना॥ काचिन्नि
तंबभारार्ता काचित्पीनपयोधरा॥ अथाविशन्महीपालो बटुनासहितो गृहं॥ पौरनारीजनाक्षिप्तलाजालिः पूरित
विग्रहः॥ अयो तीर्थहयात्तस्मा बटुबाहू चलंछिन्नः॥ जगाम मंगलो राजा बालदेवी तु यत्र वै॥ दृष्ट्वा तु बालदेवी
सा दोरकं राजबटुके॥ विमृश्य मनसा क्रुधा शंकां चक्रे नृपात्तिमां॥ आखेटकस्य व्याजेन गमैतो न्यावल्लभां प्र
ति॥ सौभाग्ययतया बध्यो दोरको बुभुजोभुजे॥ तथैव बटुकश्चायं द्रष्टुमां प्रेषितोध्रुवं॥ ततो दुर्दैवदुष्टात्माको
पादाच्छिद्य दोरकं॥ चिक्षेप च महीपृष्ठे स्वसौभाग्यसुखैः सह॥ न बुबोध च तां राजा त्रोटयंतीं च दोरकं॥ सा सामं
तमंत्रभृत्यो च्चैः कुर्वन्त्यार्ता वनांद्रवं॥ चिल्लदेव्यास्तदा काचिद्दासी द्रष्टुं समागता॥ तया दोरकमादाय बटुमा
पृष्ठ्य तद्व्रतं॥ तद्भुतस्य विधानार्थं स्वस्वामिन्यै निवेदितं॥ ततो नूतनमाहूय चिल्लदेव्य करोद्व्रतं॥ अथ सं वत्स

रेत्नीतेलक्ष्मीप्रजादिनेनृप॥ तौर्यत्रिकस्य निस्वानं चिल्लदेव्यागृहे श्रुणोत्॥ तदाकर्ण्य महीपालो नूतनं वृद्धमब्र
वीत्॥ अहहा यद्दिनं लक्ष्म्याः सव्रतस्य च दोरकः॥ इति पृष्टो नृपः प्राह दोरकं चोटनं परं॥ तच्छ्रुत्वा मंगलो राजा चोलदेव्यै
प्रकुप्य च॥ मया यत्पूजनं कार्यं चिल्लदेव्यं गृहं प्रति॥ अथ मंगलभूपालो वृद्धवाक्यवलंबितः॥ चचाल कमलावीद्यै
चिल्लदेवीगृहं प्रति॥ अत्रांतरे महालक्ष्मी वृद्धारूपं विधाय च॥ जिज्ञासार्थं गृहं तस्याश्चोलदेव्याः समागतं॥ गच्छ गच्छा
थ दुष्टे किं इहागच्छ करोषि किं॥ तयादुराशयात्यर्थं लक्ष्मीसाप्यवमानिता॥ ततः क्रुध्वा महालक्ष्मीश्चोलदेवीमभाष
त॥ शशापाथ महालक्ष्मीश्चोलदेवीं पुनःपुनः॥ कोलापुरमिति ख्यातं क्षितौ तन्मंगलपुरं॥ अथायाता महाल
क्ष्मीश्चिल्लदेवीनिकेतनं। वृद्धा चिल्लदेव्या सा लक्ष्म्याः संमानिता विति॥ वृद्धारूपं परित्यज्य प्रत्यक्षा साभवत्तदा॥
पंचोपचारपूजाभिः श्रियं राज्ञी ततोर्चयेत्॥ अतितुष्टा ततो लक्ष्मीश्चिल्लदेवीमुवाच ह॥ श्रीरुवाच॥ अर्चनात प्र
सन्नास्मि चिल्लदेवी वरं वृणु॥ वव्रे वरं ततो राज्ञी चिल्लदेवी शुभाशया॥ ये करिष्यंति ते देवि व्रतमेतत्सुरेश्व
री॥ तद्गृहस्य न त्वया त्याज्यं यावच्चंद्रदिवाकरौ॥ अद्यारभ्य कथा ह्येषा भूषासंबंधिनी त्वया॥ ख्याता तु ति यातु
क्षितौ देवि भक्तिर्भवतु मे त्वयि॥ सद्भावेन कथामेतां ये शृण्वंति पठंति च॥ तेषां च वांछितं सर्वं त्वया देयं सदैव हि॥

तथेत्युक्त्वा महामहालक्ष्मीस्तत्रैवांतरधीयत॥ अथ मंगलभूपालोस्तत्र गत्वाश्रियोर्चितं॥ चक्रेपरमया भक्त्या चिल्लदेव्याः
समन्वितः॥ अथेर्ष्यया दुराचारा चिल्लदेवि ग्रहेश्वति॥ चोलदेवी समायाता द्वारस्थैर्वारिता जनैः॥ ततो जगाम विपिनं
यत्रासीदंगिरा मुनिः॥ अथालोक्य कृताकारां ज्ञानदृष्ट्या विचिंत्य तां॥ स मुनिःश्री व्रतं दिव्यं चोलदेवीमकारयत्॥ व्रते
कृतेथ संजाता चोलदेवी महायशाः॥ दक्षिणस्ये केलिलीलाभिर्लावण्यैकनिकेतनं॥ ततः कदाचिदागत्य चक्रमारवेट
केनृपा॥ मुनेर्वेश्मनि राजा तां ददर्शा वामलोचनां॥ अथ राजा मुनिं प्राह केयं धर्मेति कथ्यतां॥ तद्वृत्तांतं समाख्या
य राज्ञे तां प्रददौ मुनिः॥ अथागत्य निजं राज्यं चोलदेवी समन्वितः॥ चिल्लदेव्या च सहितो बुभुजे मंगलो नृपः॥ चिल्ल
देवीवरं वव्रे चोलदेवीसमागमे॥ समुद्रस्य यथा गंगायमुने संगमे सदा॥ तथा मंगलभूपस्य जसाते वामलोचने॥ प
रस्पराद्वेधिके ते तु॥ प्रिये राज्ञो बभूवतुः॥ चिल्लदेव्यासमं सोथ चोलदेव्या सहाखिलां॥ सप्तद्वीपावतीं पृथ्वीं बभु
जे मंगलो नृपः॥ व्रतस्यास्यैव सामर्थ्या— दुकःसोपि नूतनः॥ अभून्मंगलभूपस्य मंत्री तव यथा गुरुः॥ भुक्त्वाथ
सकलान्भोगान्मंगलो भूभुजां वरः॥ स पुनः स्वर्गमेत्याभून्नक्षत्रं विष्णुदैवतं॥ नारद उवाच॥ एतत्ते कथितं शक्र

व्रतानामुत्तमं व्रतं॥ यत्कथाश्रवणो नापि लभते वांछितं फलं॥ प्रयागमिव तीर्थेषु देवेषु भगवानिव॥ नदीषु च यथा
गंगा व्रतेष्वेवं तथा व्रतं॥ धर्मं चार्थं च कामं च मोक्षं च यद्दिवांछसि॥ तदेतच्च व्रतं शक्र कुरु श्रद्धासमन्वितः॥ कृष्ण उवाच॥
व्रतमिदमथ चक्रे नारदेनोपदिष्टं सुरपतिरपि यस्माद्वांछितार्थं स लेभे॥ त्वयिमपि कुरु तथैतं धर्मसूनो यथा स्यादभि
मतफलसिद्धिः पुत्रभिर्वृधिः॥ धनधान्यं परां धर्मं कीर्तिमायुर्यशःश्रियं॥ तुरगान् दंतिनः पुत्रान् महालक्ष्मी प्रयच्छ
मे॥ इति भविष्योत्तरे महालक्ष्मीव्रतं॥ अथ सर्वास्वष्टमीष्वाश्विन कृष्णाष्टम्यां वाशोकाष्टमीव्रतं॥ हेमाद्रावादित्य
पुराणे॥ अष्टमीषु च सर्वासु पूजनीया प्रशोककाः॥ गंधमाल्यनमस्कारधूपदीपान्नसंपदा॥ तस्मिन्नहनि या
भुंक्ते नक्तमिंदुविवर्जितं॥ भवत्यथ विशोकासा यत्र यत्रापि जायते॥ अष्टमीषु च सर्वासु न चेच्छक्नोति वै मुने॥ प्रो
ष्ठपद्यामतीतायां यास्या कृष्णाष्टमी द्विज॥ तत्र कार्यं व्रतं त्वेतत्सर्वकामफलप्रदं॥ इति अशोकाष्टमीव्रतं॥ इति
श्रीनीलकंठात्मजभट्टशंकरकृतौ व्रतार्केऽष्टमीव्रतानि॥ अथ नवमीव्रतानि॥ तत्र चैत्रशुक्लनवम्यां रामन
वमीव्रतं॥ तच्च परविद्धायां मध्यान्हव्यापिन्यां कार्यं॥ तदुक्तमगस्त्यसंहितायां॥ चैत्रशुक्ला तु नवमी पुनर्व

वतद्विष्णोः परमं पदं ॥ सर्वेषामप्ययं धर्मो भुक्तिमुक्त्येकसाधनः ॥ अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमं ॥ पूज्यः स्यात्स
र्वभूतानां यथा रामस्तथैव सः ॥ यस्तु रामनवम्यां तु भुंक्ते स च नराधमः ॥ कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः ॥
अकृत्वा रामनवमीव्रतं सर्वोत्तमं तमं ॥ व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत् ॥ रहस्यकृतपापानि ख्या
तानि सुबहून्यपि ॥ महांति च प्रणाश्यंति श्रीरामनवमीव्रतं ॥ एकामपि नरो भक्त्या श्रीरामनवमीं मुने ॥ उपोष्य
कृतकृत्यः स्यात्सर्वपापैः प्रमुच्यते ॥ नरो रामनवम्यां तु श्रीरामप्रतिमापदे ॥ विधानेन मुनिश्रेष्ठ स मुक्तो नात्र
संशयः ॥ विधानेन प्रतिमादानविधिः ॥ सुतीक्ष्ण उवाच ॥ श्रीरामप्रतिमादानविधानं वा कथं मुने ॥ कथ
यत्वपि रामेपि भक्त्यास्य मम विस्तरात् ॥ अगस्त्य उवाच ॥ कथयिष्यामि तद्विद्वान् प्रतिमादानमुत्तमं ॥
विधानं चापि यत्नेन यद्वत्तं वेद्मवोत्तमः ॥ विधिश्च तत्रैव ॥ अष्टम्यां चैत्रमासे तु शुक्लापक्षे जितेंद्रियः ॥ दंतधाव
नपूर्वं तु प्रातःस्नायाद्यथाविधिः ॥ नद्यां तडागे कूपे वा ह्रदे प्रस्रवणेपि च ॥ ततः संध्यादिकाः कार्याः संस्मरन् रा
घवं हृदि ॥ महीमाधवविप्रेंद्र कुर्याद्दौपासनादिकाः ॥ दांतं कुटुंबिनं विप्रं वेदशास्त्रपरं सदा ॥ श्रीरामपूजानि
रतं सुशीलं दंभवर्जितं ॥ विधिज्ञं राममंत्राणां राममंत्रैकसाधनं ॥ आहूय भक्त्या संपूज्य शृणुयात्वार्थमनि

ति ॥ श्रीरामप्रतिमादानं करिष्योहं द्विजोत्तम ॥ भक्त्याचार्योभवत्वीत श्रीरामोसि त्वमेव च ॥ इत्युक्त्वा पूज्य विप्रं तं स्ना
पयित्वा ततः परं ॥ तैलेनाभ्यर्चनं स्नायाच्चिंतयन् राघवं हृदि ॥ तैलेनाभ्यस्नापयित्वेत्यनन्वयः ॥ श्वेतांबरधरः श्वेतगं
धमाल्यानि धारयन् ॥ अर्चिता भूषितश्चैव कृतमध्याह्निकक्रियः ॥ अर्चितः कृतार्चनः ॥ आचार्यं भोजयेद्भक्त्या
सात्विकान्नं सुविस्तरं ॥ भुंजीत स्वयमप्येवं हृदि राममनुस्मरन् ॥ एकभक्तव्रती तत्र सदाचार्यो जितेंद्रियः ॥ शृण्व
राजकथां दिव्यां महःशेषं नयन्मुने ॥ सायं संध्यादिकाः कुर्याः क्रिया राममनुस्मरन् ॥ आचार्यसहितो रात्राव
धःशायी जितेंद्रियः ॥ वसेत्स्वयं नवेकांते श्रीरामार्पितमानसः ॥ ततः प्रातः समुत्थाय स्नात्वा संध्यां यथाविधिः ॥
प्रातः सर्वाणि कर्माणि शीघ्रमेव समापयेत् ॥ ततः स्वस्थमना भूत्वा विद्वद्भिः सहितोनघ ॥ स्वगृहे चोत्तरे देशे रा
मस्योत्तममंडले ॥ स्वगृहे स्वगृहसमीपे चतुर्द्वारं पताकाद्यं सुवितानं सुतोरणं ॥ मनोरमं महोत्सेधं पुष्पाद्यैः स
कलं कृतं ॥ शंखचक्रहनूमद्भिः आग्द्वारे समलंकृतं ॥ गरुत्मच्छार्ङ्गवाणैश्च दक्षिणे समलंकृतं ॥ गदाखड्गांगदैश्चै
व पश्चिमे सविभूषितं ॥ पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृतं ॥ मध्ये हस्तचतुष्काद्यवेदिकायुक्तमायतं ॥
विप्रस्य नृत्यगीतैश्च वाद्यैश्चापि सुसंयुतं ॥ पुण्याहं वाचयेत्तत्र विद्वद्भिः प्रीतमानसः ॥ ततः संकल्पयेद्देवं राम

मेवस्मरन्मुने॥अस्यां रामनवम्यां च रामाराधनतत्परः॥उपोष्याष्टसु यामेषु पूजयित्वा यथाविधि॥इमां स्वर्णमयीं रा
मप्रतिमां च प्रयत्नतः॥श्रीरामप्रीतये दास्ये रामभक्ताय धीमते॥प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे॥अनेन न
जन्मसिध्यानि अभ्यासानि महांतिच॥विलिखेत्सर्वतोभद्रं वेदिकोपरि सुंदरं॥मध्ये तीर्थोदकैर्युक्तं पात्रं संस्था
प्य चर्चितं॥सौवर्णे राजते ताम्रे पात्रे षट्कोणमालिखेत्॥ततः स्वर्णमयीं रामप्रतिमां पलमात्रतः॥निर्मितां द्वि
भुजां दिव्यां वामांकस्थितजानकीं॥बिभ्रतीं दक्षिणाकरे ज्ञानमुद्रां महामुने॥वामेनाधःकरेणारादेवी मालिंग्य
संस्थिता॥सिंहासने राजते च पलद्वय विनिर्मिते॥पंचामृतस्नानपूर्वं संपूज्य विधिवत्ततः॥मूलमंत्रेण नि
यतो न्यासपूर्वमतंद्रितः॥दिवैवं विधिवत्कृत्वा रात्रौ जागरणं ततः॥दिव्यां रामकथां श्रुत्वा रामभक्तैः समन्वि
तः॥नृत्यगीतादिभिश्चैव रामस्तोत्रैरनेकधा॥यामाष्टकं तथा पूज्यां गंधपुष्पाक्षतादिभिः॥कर्पूरागरुकस्तू
रीकल्हाराद्यैरनेकधा॥पूजयन्विधिवद्भक्त्या दिवारात्रं नयेद्बुधः॥ततः प्रातः समुत्थाय स्नानसंध्यादिकाः क्रि
याः॥समाप्य विधिवद्रामं पूजयेद्विधिवन्मुने॥ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवित्॥पूर्वोक्तपद्मकुंडे
वा स्थंडिले वा समाहितः॥लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः॥साज्येन पायसेनैव स्मरन्नाममतंद्रितः॥

सुस्नातायदि॥सैव माध्यान्हयोगेन महापुण्यतमा भवेत्॥दिनद्वये ऋक्षयुक्तमध्यान्हव्याप्त्यभावे ऐकदेश्यव्याप्तौ वा उत्तरा
तदुक्तं तत्रैव॥नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः॥उपोषणं नवम्यां वै दशम्यां पारणं भवेदिति॥तत्रैव॥चैत्र
मासे नवम्यां तु जातो रामः स्वयं हरिः॥पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा॥श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहा
धिका॥केवलापि सदोपोष्या नवमी शास्त्रसंग्रहात्॥तस्मात्सर्वात्मना सर्वकार्यं वै नवमीव्रतं॥अगस्त्यसंहितायां चै
त्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ॥उदये गुरुगौरांशोः स्वोच्चस्थे ग्रहपंचके॥मेषे पूषणि संप्राप्ते लग्ने कर्कट
काह्वये॥आविरासीत्सकलया कौशल्यायां परः पुमान्॥प्राक्पक्षे शुक्लपक्षे उदये लग्ने गुरुगौरांशोः गुरुनवां
शे॥तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा॥तत्र जागरणं कुर्याद्रघुनाथपरो भुवि॥भुवी लिखेद्वा दिव्यावृत्य
र्थः॥प्रातर्दशम्यां कृत्वा तु संध्याद्याः कालिकीः क्रियाः॥संपूज्य विधिवद्रामं भक्त्या वित्तानुसारतः॥ब्राह्मणान्भो
जयेद्भक्त्या दक्षिणाभिस्तु तोषयेत्॥गोभूतिलहिरण्याद्यैर्वस्त्रालंकरणैस्तथा॥रामभक्त्या प्रयत्नेन प्रीयतां मे
यामुदा॥एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतं॥अनेकजन्मसिध्यानि पातकानि बहून्यपि॥भस्मीकृत्वा व्रजेद्दे

यत्नेनप्रीतयेसुरयामुदा॥ एवं यः कुरुते भक्त्या श्रीरामनवमीव्रतं॥ अनेकजन्मराशीनि पापानि सुबहून्यपि॥ भस्मीभवन्ति पा
पानि यान्ति विष्णोः परं पदं॥ सर्वेषामप्ययं धर्मो भुक्तिमुक्त्यैकसाधनं॥ अशुचिर्वापि पापिष्ठः कृत्वेदं व्रतमुत्तमं॥ पूज्यः स्यात्स
र्वभूतानां यथा रामस्तथैव सः॥ यस्तु रामनवम्यां तु भुंक्ते स तु नराधमः॥ कुंभीपाकेषु घोरेषु पतत्येव न संशयः॥ अकृत्वा रा
मनवमीव्रतं सर्वोत्तमोत्तमं॥ व्रतान्यन्यानि कुरुते न तेषां फलभाग्भवेत्॥ महात्यपि प्रनश्यन्ति पापानि नवमीव्रतात्॥ एकाम
पि ततो भक्त्या श्रीरामनवमीव्रतं॥ उपोष्य कृतकृत्यः स्यात्सर्वपापैः प्रमुच्यते॥ नरो रामनवम्यां तु श्रीरामःप्रीतिरापरः॥ विधानेन न
रश्रेष्ठ संयुक्तो नात्र संशयः॥ सुतीक्ष्ण उवाच॥ श्रीरामप्रतिमादानं विधानं वा कथं मुने॥ कथयस्व यथा रामभक्तस्य मम म
विस्तरात्॥ अष्टम्यां चैत्रमासे तु शुक्लपक्षे जितेंद्रियः॥ दंतधावनपूर्वं तु प्रातः स्नात्वा यथाविधि॥ नद्यां तडागे कूपे वा ह्रदे प्रस्र
वणेपि वा॥ साध्यादिकाः क्रियाः कुर्यात्संस्मरन् राघवं हृदि॥ गृहमागत्य विप्रेंद्र कुर्याद्दोपासनादिकं॥ दांतं कुटुंबिनं वि
प्रं वेदशास्त्रविदं सदा॥ श्रीरामपूजानिरतं शुचिर्वं दंभादिवर्जितं॥ सर्वज्ञं राममंत्राणां राममंत्रैकसाधनं॥ आहूय भ
क्त्या संपूज्य वृणुयात्याचार्यमच्युतं॥ श्रीरामप्रतिमादानं करिष्येहं द्विजोत्तम॥ यत्राचार्यो भवेत्प्रीतिः श्रीरामोसि त्वमेव च॥
इत्युक्त्वा भोक्तुमायांतु स्थापयित्वा ततः स्वयं॥ तदैवाभ्यज्य तु स्नायाच्चिंतयन् राघवं हृदि॥ श्वेतांबरधरं देवं गंधमाल्या

दिधारयेत्॥ उपर्विनो भूषितस्तथैव कृत्वा मध्याह्न कीं क्रियां॥ आचार्यं पूजयेत्पश्चात् सात्विकान्नैः सुविस्तरं॥ भुंजीयात्स्व
यमप्येवं हृदि राममनुस्मरेत्॥ एकभक्तव्रतेतत्र सदाचार्यो जितेंद्रियः॥ शयीत भूतले सम्यक् श्रीरामार्पितमानसः॥ ततः प्रा
तः समुत्थाय स्नात्वा संध्याय यथाविधि॥ प्रातःसर्वाणि कर्माणि शीघ्रमेव समापयेत्॥ ततस्व स्वस्थमना भूत्वा विद्वद्भिः सहितोनघ॥
स्वगृहे चोत्तरे भागे मंडपद्वयमुज्वलं॥ मंडपं चचतुर्द्वारं ध्वजाःकार्यास्तु विस्तरैः॥ फलैर्नानाविधैर्युक्तां पुष्पमालासुशोभनं॥
कदलीस्तंभसंयुक्तां युगयोर्वैरलंकृतं॥ सुतोरणैर्मनोरम्यं शोभितं युगलंकृतं॥ शंखचक्रहनूमद्भिः प्राकूद्वारे समलंकृतं॥
गरुत्मता शार्ङ्गपाणिं च दक्षिणे द्वारि भूषितं॥ गदाखेटककादीश्च पश्चिमे न विभूषितं॥ पद्मस्वस्तिकनीलैश्च कौबेर्यां
समलंकृतं॥ मध्ये हस्तचतुःकार्या वेदिका हस्तमात्यतं॥ विप्रैश्च गीतनृत्यैश्च वाद्यैश्चापि समन्वितं॥ पुण्याहवाचयेत्
तत्र विद्वद्भिः प्रीतमानसैः॥ ततः संकल्पयेद्देवं राममेवमनुस्मरन्॥ अस्यां रामनवम्यां तु रामराधनतत्परः॥ उपोष्याष्टसु
यामेषु पूजयित्वा यथाविधि॥ इमां स्वर्णमयीं रम्यां प्रतिमां तु प्रयत्नतः॥ श्रीरामप्रीतये दास्ये रामभक्ताय धीमते॥ प्रीतो
रामो दहत्वाशु पापानि सुबहूनि मे॥ अनेकजन्मसंसिद्धानि अभ्यस्तानि महांति च॥ विलिखेत्सर्वतोभद्रं वेदिकोपरि सुं
दरं॥ मध्ये तीर्थोदकैर्युक्तं यावत्संस्थाप्य चर्चितं॥ सौवर्णे रजते ताम्रे पात्रे षट्कोणमालिखेत्॥ ततः सुवर्णमयीं रामप्र
तिमां पलमात्रतः॥ निर्मितां द्विभुजां रम्यां वामांकस्थितजानकीं॥ बिभ्रतीं दक्षिणे हस्ते ज्ञानमुद्रां महामुने॥ वामेना

यकरे पौ नां देहमालिंग्य संस्थिता॥ सिंहासनं राजतं च पालद्वयविनिर्मितं॥ पंचामृतं स्नानपूर्वं संपूज्य विधिवत्ततः॥ मूलमंत्रेण
दद्याच्चैवमतंद्रितः॥ एवं संपूज्य विधिवत्तु रात्रौ जागरणं तथा॥ दिव्या रामकथां शृण्वन् रामभक्तिसमन्वितः॥ नृत्यगीतादिभि
श्चैव रामस्तोत्रैरनेकधा॥ रामाष्टकेन संस्तुत्य गंधपुष्पाक्षतादिभिः॥ कर्पूरागरुकस्तूरीकल्हाराद्यैरलंकृतं॥ संपूज्य वि
धिवद्भक्त्या दिवारात्रौ नयेद्बुधः॥ ततः प्रातः समुत्थाय स्नानं संध्यादिकाः क्रियाः॥ संस्थाप्य विधिवद्रामं पूजयेद्विधि
वन्मुने॥ ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवित्॥ पूर्वोक्तकुंडे गृह्योक्ते स्थंडिले वा समाहितः॥ लौकिकाग्नौ विधानेन श
तमष्टोत्तरं नृप॥ आज्येन पायसेनैव स्मरं नाममतंद्रितः॥ ततो भक्त्या समादातुणे आचार्यं प्रार्थयन्मुने॥ कुं
डलाभ्यां सुवर्णाभ्यामंगुलीभिरनेकधा॥ गंधपुष्पाक्षतैर्वस्त्रैर्विचित्रैस्तु मनोहरैः॥ ततो रामं स्वयं दद्यादिमं मंत्रमुदी
रयेत्॥ इमां स्वर्णमयीं रामप्रतिमां समलंकृतां॥ चित्रवस्त्रयुगच्छन्नां रामोऽहं राघवायते॥ श्रीरामप्रीतये दास्ये प्रीतो भव
तु राघव॥ इति प्रतिमादानमंत्रः॥ इति दत्वा विधानेन दद्यात् दक्षिणां ध्रुवं॥ अन्येभ्यश्च यथान्याय गोहिरण्या
दिशक्तितः॥ दत्वा दासो धनं धान्यं दद्यालंकारणान्वित॥ अगस्त्य उवाच एवं यः कुरुते रामप्रतिमादानमुत्तमं॥
ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशयः॥ तुलापुरुषदानेन समयं लभते फलं॥ तत्फलं लभते मर्त्यो दानेनानेन
सुव्रत॥ सुतीक्ष्ण उवाच॥ प्रायेण हि नराः सर्वे दरिद्राः कृपणा मुने॥ अगस्त्य उवाच॥ दरिद्रस्तु महाभाग स्वस्य

वित्तानुसारतः॥ पक्षार्धेन तदर्धेन तदर्धार्धेन वा पुनः॥ वित्तशाठ्यमकृत्वैव कुर्याद्देवं व्रतं मुने॥ यदि घोरतरं दुष्टं पातकं ते
हतं क्वचित्॥ अकिंचनोपि यत्नेन उपोष्य नवमीदिने॥ एकाचित्तोपि विधिवत् सर्वपापैः प्रमुच्यते॥ प्रातःस्नानाचमनी
यं कृत्वा संध्यादिकाः क्रियाः॥ गोभूतिलहिरण्यादि दद्याद्वित्तानुसारतः॥ श्रीरामचंद्रभक्तेभ्यो विद्वद्भिः श्रद्धयान्वि
तः॥ पारणां तथा कुर्वीत ब्राह्मणैश्च स्वपंक्तितः॥ एवं यः कुरुते भक्तः सर्वपापैः प्रमुच्यते॥ प्राप्ते श्रीरामनवमीदिने सु
खोविमूढधीः॥ उपोषणं न कुरुते कुंभीपाकेषु पच्यते॥ यत्किंचित् राममुद्दिश्य क्रियते न स्वशक्तितः॥ रौरवे
तु समृद्धात्संपच्यते नात्र संशयः॥ सुतीक्ष्ण उवाच॥ यामाष्टकेषु पूज्या वै तत्रानेका महामुने॥ मूलमंत्रेण सं
युक्तं तत्कथं वद सुव्रत॥ अगस्त्य उवाच॥ सर्वेषां राममंत्राणां मंत्रराजः षडक्षरः॥ स्कांदे मोक्षखंडे श्रीरामं प्र
ति रुद्रगीतायां रुद्रवाक्यं मुमूर्षोर्मणिकांतरे वै देकनिवासः॥ अहं दिशामि ते मंत्रं तारकस्योपदेशतः॥ श्रीरामरा
म रामेति एतत्तारकमुच्यते॥ अतस्त्वं जानकीनाथ परब्रह्माभिधीयते॥ तारकब्रह्म चेत्युक्तं तेन पूजा प्रशस्यते॥
पीठांगदेवतानां तु आवृतीनां तथैव च॥ आदावेव प्रकुर्वीत देवस्य प्रीतमानसः॥ उपचारैः षोडशभिः पूजा कार्या य
थाविधि॥ आवाहनं स्थापनं च सन्मुखीकरणं न्यया॥ एवं मुद्राः प्रार्थना च पूजा मुद्राः प्रयत्नतः॥ शंखपूजां प्रकुर्वी
त स्वोक्तविधिना ततः॥ कलशं वामभागे च पूजाद्रव्याणि चादरात्॥ पीठं संपूज्य यत्नेन आत्मानं मंत्रमुच्चा

रंत॥ पात्रासादनमप्येकं कुर्य्याद्यामेष्वतंद्रितः॥ प्रीतो बराणि देवाय प्रार्थयन्नर्चयेत्सुधीः॥ स्वर्णयज्ञोपवीतानि दद्याद्देवा
यभक्तितः॥ नानारत्नविचित्राणि दद्यादाभरणानि च॥ हिमांबुघृष्टरुचिरं घनसारसमान्वितं॥ क्रमुकात्तु मूलमंत्रेण उपचारान्
प्रकल्पयेत्॥ कल्हारैः केतकैर्जात्यैः पुन्नागाद्यैः प्रपूजयेत्॥ पंचकैः शतपत्रैश्च सुगंधैः सुमनोहरैः॥ पाद्यं चंदनधूपैश्च तत्तन्मं
त्रैः प्रमुच्यते॥ जन्मकोटिशतैर्घोरैः नानारूपैश्च दारुणैः॥ विमुक्तस्य क्षणादेव राम एव भवन्मुने॥ श्रद्धानस्य दातव्यं
श्रीरामनवमीव्रतं॥ सर्वलोकहितायेदं पवित्रं पापनाशनं॥ लोहेन निर्मितं वापि शिलाया दारुणापि वा॥ एकेनैव प्रकारे
णायस्मै कस्मै थवास्तुने॥ कृतं सर्वप्रयत्नेन यत्किंचिदपि मुक्तितः॥ जपेद्दे कांतवासी भोयावत्सदशमीदिनं॥ अनेन स्या
त्तु नः पूज्य दशम्यां भोजयेद्द्विजान्॥ भक्त्या भोज्यैर्बहुविधैर्दद्याद्भक्त्या सदक्षिणां॥ कृतकृत्यो भवेत्तेन सद्यो रामप्रसीद
ति॥ तुष्णीं त्रिपृष्ठं नरो याति पुनरावृत्तिवर्जितः॥ द्वादशाब्दकृते नापि यत्पापेनापि मुच्यते॥ विलयं याति तत्सर्वं श्रीरामन
वमीदिने॥ जपेच्च राममंत्राणां यो न जानाति तस्य वै॥ उपोष्य संस्मरन् रामं न्यासपूर्वमनन्यधीः॥ गुरुलब्धो यमंत्रस्तु
न्यसेन्न्यासपुरःसरः॥ यामे यामे च विधिना कुर्यात्पूजां समाहितः॥ मुमुक्षोपि सदा कुर्यात् श्रीरामनवमीव्रतं॥ नत्य
जंति सुराश्रेष्ठ देविश्चापि विशेषतः॥ तस्मात्सर्वात्मनाः सर्वैः कर्त्तव्यं नवमीव्रतं॥ मुच्यते सर्वपापेभ्यो यांति ब्रह्म स

सनातनं॥ इतिश्रीस्कंदपुराणे अगस्त्यसंहितायां अगस्त्यसुतीक्ष्णसंवादे रामनवमी व्रतं॥ अथ रामनामोद्यापनविधिः॥
पार्वत्युवाच॥ धन्यास्म्यनुगृहीतास्मि कृतार्थास्मि जगत्प्रभो॥ विछिंनो मे ति संदेहग्रंथिर्भिवदनुग्रहात्॥ त्वन्मुखाब्जलितं
रामतत्वामृतसायनं॥ पिबंत्या मे मनो देव न तृप्यामि भवापहं॥ श्रीरामस्यामृतं नाम श्रुतं संक्षेपतो मया॥ इदानीं श्रोतुमि
च्छामि विस्तरेण स्फुटाक्षरं॥ श्रीमहादेव उवाच॥ शृणु देवि प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्॥ प्राप्नोति परमां सिद्धिं दीर्घायुः
पुत्रसंपदः॥ रामनाम लिखेद्यस्तु लक्षकोटिशतावधि॥ एकैकमक्षरं पुंसां महापातकनाशनं॥ सकामोपि लिखेद्यस्तु
निःकामो नतु वा पुनः॥ इहैव सुखमाप्नोति अंते परपदं लभेत्॥ आदावंते च मध्ये च व्रतस्योद्यापनं यजेत्॥ उद्यापनं वि
नानैव फलसिद्धिमवाप्नुयात्॥ तस्मात्सर्वप्रयत्नेन नाम्न उद्यापनं कुरु॥ पार्वत्युवाच॥ ततोस्मिदेव देवेश भक्तानुग्रह
कारक॥ नाम्न उद्यापनं ब्रूहि विस्तरेण मम प्रभो॥ महादेव उवाच॥ शृणु देवि प्रवक्ष्यामि विस्तरेण यथाविधि॥ नाम्न उद्या
पनं तत्र भक्त्या भवदनुग्रहात्॥ सुवर्णप्रतिमां कुर्यात्सीताराम सलक्ष्मणो॥ हनुमत्प्रतिमां तत्र चतुर्थांशेन हाटकैः॥
सुवर्णस्य प्रमाणं तु पलाष्टकमुदीरितं॥ अशक्तश्चेत्पले नैव तदर्धार्धेन वा पुनः॥ श्रीरामस्य प्रतिकृतिं वित्तशाठ्येन न
कारयेत्॥ रजतेनासनं कुर्यान्मासैः षोडशसंमितैः॥ पीतवस्त्रेण संवेष्ट्य स्थापयेत्तंडुलोपरि॥ तंडुलस्य प्रमाणं तु
भवेद्द्रोणचतुष्टयं॥ शुचौ देशे गृहे तीर्थे मंडपं कारयेत्सुधीः॥ तोरणानि चतुर्द्वारे बंधयेदाम्रपल्लवैः॥ भूमौ गोमयलिप्ता

क्षिरेवते॥ रामासीतासमौमित्रि हनुमद्भक्तितत्परः॥ दानेनानेन मे राम भुक्तिमुक्तिप्रदो भव॥ प्रतिमादानसिध्यर्थं शक्त्यास्वर्णं
तु दापयेत्॥ दक्षिणाहीनं तु यद्दानं तत्सर्वं निष्फलं भवेत्॥ ब्राह्मणान्शतसाहस्रं भोजयेन्मधुसर्पिषा॥ पक्वान्नैःपाय
सैःखाद्यैःकदलीशर्करान्वितैः॥ ऋत्विग्भ्यो दक्षिणां दद्याद्भूयसीं दक्षिणां यजेत्॥ तदं ते घृतपात्रं च तिलपात्रं च दापयेत्॥
शय्यां च रथदानानि दशदानानि शक्तितः॥ अशक्तश्चेत्स्वर्णमेकं दत्वा रामं नमेत्पुनः॥ तिलकं कारयेत्पश्चाद्दधिभिर्बि
ल्वसपल्लवैः॥ द्विजैरुक्ता चाशिषो देया नत्वा रक्षतां विसर्जयेत्॥ उमामहेश्वरौ पूज्यौ भोजयेद्बटुकं तथा॥ कुमारीपात्र
यं भोज्यं योगिराजं च भोजयेत्॥ क्षेत्रपालबलिं दत्वा ध्यात्वा रामं सदा जपेत्॥ ब्रह्मादिभिरक्तं तत्पुण्यं वक्तुं शक्यं न किंचन॥
अश्वमेधसहस्राणि वाजपेयशतानि च॥ एकेन राम नाम्ना तु तत्फलं लभते नरः॥ नारी वा पुरुषो वापि शूद्रो वाप्यधमो न
रः॥ रामनाम्ना तु मुक्तास्ते सत्यं सत्यं वरानने॥ मूले कल्पद्रुमस्याः खिलमणिविलसद्रत्नसिंहासनस्थो कोदंडद्वंद्वपा
णौ ललितकरयुगे नार्पितं लक्ष्मणेन॥ वामांकन्यस्तसीताभरतधृतमहामौक्तिकः छत्रकांतिं शत्रुघ्नं चामराभ्यां
विलसितमनिशं रामचंद्रं भजेऽहं॥ इति श्रीभविष्योत्तरपुराणे उमामहेश्वरसंवादे रामलेखनोद्यापनं संपूर्णं॥
आश्विनशुक्लनवम्यां देवीपूजा हेमाद्रौ विष्णुधर्मोत्तरे॥ राम उवाच॥ विधानं पूजयेत्केन भद्रकालीं नराधिप॥ नव
म्यामाश्विने मासि शुक्लपक्षे नरोत्तम॥ युधिष्ठिर उवाच॥ दूर्वांतरेतु दिग्भागे शिवे वास्तुमनोहरे॥ भद्रकालीगृहं

यांसर्वतो भद्रसंज्ञिकं॥ रचयेत्सप्तधान्येन नानारंगैः सुशोभनं॥ कुंभानष्टौ च पूर्वादि स्थापयेद्व्रणान्शुभान्॥ कुंभमेकं म
ध्यदेशे स्थापयेत्तंडुलोपरि॥ शुद्धोदकेन संपूर्य पंचरत्नैः सुपल्लवैः॥ नारिकेलफलान्यष्टौ एकं रामाय दापयेत्॥ आचा
र्यं वरयेत्तत्र वेदशास्त्रविशारदं॥ ब्रह्मादिकऋत्विजानां तु वरणं कारयेत्ततः॥ मधुपर्केण संपूज्य वस्त्रालंकारभूषणैः॥ ऋ
त्विजान्षोडशानष्टौन् वरयेद्वेदपारगान्॥ स्नात्वा नित्यं विधायादौ पूजयेद्गणनायकं॥ पुण्याहं वाचयित्वा तु पूजयेद्रामचं
द्रकं॥ ततोग्निं च प्रतिष्ठाप्य स्वशाखोक्तविधानतः॥ विष्णुसूक्तेन होतव्यं मूलमंत्रेण वा पुनः॥ नवग्रहांश्च दिक्पा
लामंत्रानुक्तांश्च हावयेत्॥ पुरुषसूक्तेन होतव्यं समिदाज्यं च सत्तिलाः॥ अष्टोत्तरसहस्रं तु राममंत्रेण हावयेत्॥ हो
मांते पूजनं कुर्यात् रामचंद्रादिदेवता॥ पूजयित्वा ततो हुत्वा बलिं पूर्णाहुतिं तथा॥ श्रेयः संपाद्य दानं च अभिषेकं
समाचरेत्॥ रामं कृत्वा नत्वा च प्रार्थयित्वा पुनः पुनः॥ आचार्यं पूजयेत्पश्चात् सुवर्णयुतधेनुना॥ प्रतिमादान
मंत्रेण आचार्याय निवेदयेत्॥ दानमंत्रः॥ नतोस्मि देवदेवेश वक्रबुद्धिर्महात्मभिः॥ यच्चिंत्यते कर्मपाशात् हृदि
नित्यं मुमुक्षुभिः॥ मायया गुणमय व्याप्तं स्वजस्य वसि लुंपसि॥ अतस्त्वत्पादभक्तेषु त्वद्भक्तश्रियोधिका॥ भक्ति
मेवाधिवां छंतित्वद्भक्ताः सारवेदितः॥ अतस्त्वत्पादकमले भक्तिर्नैरेव सदास्तु मे॥ संसारमयलप्ता नापि पूज्यं भ

शंकराद्यैरनुष्ठितं॥ कर्त्तव्यं देवराजेंद्र देव्या भक्तिसमन्वितैः॥ कन्यासंस्थे रवौ शुक्लकृष्णमारभ्य नंदिकां॥ नंदिकाप्रतिप
त्॥ अयाचीत्यथवैकाशी नक्ताशीत्यथवाप्यदः॥ प्रातस्स्नायी जितद्वंद्वस्त्रिकालं शिवपूजकः॥ शिवश्च शिवश्च शिवो॥ ज
पहोमसदासक्तः कन्यकां भोजयेत्सदा॥ अष्टम्यां नवमे चापि दारुजानि शुभानि च॥ एकवा चित्तभावेन कारयेत्कु
रुसत्तम॥ तस्मिन्देवी प्रकर्त्तव्या हेमी वा राजती तु वा॥ महाक्षील लक्षणोपेता खड्गशूले च पूजयेत्॥ सर्वोपहारसंपन्नावस्त्र
रत्नफलादिभिः॥ कारयेद्रथदोलादिपूजां च बलिदैविकीं॥ बलिर्ग्राहिणो देविनायकाद्यः॥ तत्संबंधिनी बलि वि
देवीकी पुष्पैश्च द्रोणाबिल्वाम्रजातीपुंनागचंपकैः॥ द्रोणः कुरुचकः॥ विचित्रां रचयेत्पूजां अष्टम्यामुपवा
सयेत्॥ दुर्गायतोजपेन्मंत्रमेकचित्तः शुभावितः॥ अर्द्धयामिनीशेषे विजयार्थो नृपोत्तम॥ पंचाब्दलक्षणोपे
तं महिषाख्यं सुपूजितं॥ तस्याग्रतो नृपस्नाया छत्रं कृत्वा तु पिष्टजं॥ खड्गेन घातयित्वा तु दद्यात्स्कंदविशाखयोः॥ ॥१२१॥
ततो देवीं पुनः स्नातः क्षीरसर्पिर्जलादिभिः॥ कुंकुमागरुकर्पूरैश्चंदनेश्चापि धारयेत्॥ हेमादि पुष्परत्नानि वस्त्रा
सिअहतानि च॥ द्विजातीनंदपाखंडांनन्नदानेन तोषयेत्॥ नंदाभक्ता नरा ये तु देवं देव्या सुभाविताः॥ देवीभक्ता
पूजयीत कन्यकाः प्रमदाति च॥ नंदाभक्ता नरा ये तु महाव्रतपराश्च ये॥ पूजयेतान्विशेषेण लकूपाचर्चिकायतः॥ मा

तृणां चैव देवीनां पूजां कुर्यात्तदा निशि॥ ध्वजछत्रपताकादीनुद्धेयेच्चर्चिकागृहे॥ रथयात्रां बलिक्षेपं यदुवाद्यारवाकुलं॥ का
रयेत्तुष्यते येन देवी सत्कृतनिघातनैः॥ अश्वमेधमवाप्नोति भक्तितः सुरसत्तम॥ महानवम्यां पूजेयं सर्वकामप्रदायक॥ स
र्वेषु वत्स वर्णेषु तव भक्त्या प्रकीर्त्तिता॥ दत्वाप्नोति यशो राज्यं पुत्रायुर्धनसंपदः॥ ॥देवीपुराणे महानवमी॥ तत्रैव
सौरपुराणे॥ आश्वयुक्शुक्लपक्षस्य नवम्यां प्रयतात्मवान्॥ भक्त्या संपूजयित्वैव देवीं संप्रार्थयेत्ततः॥ महिषघ्नी महामा
ये चामुंडे मुंडमालिनी॥ द्रव्यमारोप्य विजयं देहि देवि नमोस्तु ते॥ भूतप्रेतपिशाचेभ्यो रक्षोभ्यश्च महेश्वरी॥ देवेभ्यो
मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा॥ उमा ब्रह्माणि कौमारि विश्वरूपे प्रसीद मे॥ कुमार्यो भोजयित्वा च दद्यादाच्छादना
दिकं॥ नवसप्ताष्टकं चैव स्वस्य वित्तानुसारतः॥ शास्त्रं च यस्य यद्गेह वस तयत्तेन पूजयेत्॥ यतः शास्त्रेषु सा देवी निवसत्ये
संततं॥ शास्त्रमिति वा पाठः॥ शास्त्रं तत्पुस्तकं देव्यास्तय नैविशेषाः शिवरहस्ये ये मेकमूर्द्धगणासंघकृताभिषेकां पू
र्णामृतैर्गिरिसुतामभिषेचयंति दिव्यकल्पमनुसुवेषक्रूय सुवेषरूपा राज्याभिषेकमतुलं पुनराध्रुवं तिदुर्गाभक्ति
तरंगिण्यां देवीपुराणे॥ सुगंधपुष्पतोयेन स्नापयित्वा नरः शिवं॥ नागलोकं समासाद्य क्रीडते पन्नगैः सह॥ द्रो
णपुष्पं बिल्वपत्रं करवीरोत्पलानि च॥ स्नानकाले प्रयोज्यानि देव्यै प्रीतिकराणि च॥ भवत्यै वनरो दत्वा विष्णु

लोके महीयते॥ स्नापयित्वा नरो दुर्गां श्रद्धया हेमवारिणा॥ सुवर्णयानमारूढो वसुभिः सह मोदते॥ तिलोदके विष्णुलोकं
लभते बांधवैः सह॥ घृतेन स्नपयेद्यस्तु तस्य पुण्यफलं शृणु॥ दश पूर्वान् दश परान् आत्मानं च विशेषतः॥ भवार्णवात्
समुद्धृत्य दुर्गालोके महीयते॥ क्षीरेण स्नपयेद्यस्तु श्रद्धाभक्तिसमन्वितः॥ चंडिकां विधिवद्वीर रुद्रलोके महीयते॥ स्नप
येद्विधिवद्वीर दध्ना दुर्गां महीयते॥ राजते न विमानेन शिवलोके महीयते॥ पंचगव्येन या दुर्गां तथा च कुशवारिणा॥ स्ना
पयेद्विधिवन्मंत्रैः ब्रह्मस्नानं हि तत्स्मृतं॥ यः कोऽपि च यो दुर्गां पंचगव्येन चंडिकां॥ स्नपयेन्न पशाईल् सगच्छेत्स्करपीपुरं॥ क
पिलां पंचगव्येन दधिक्षीरयुतेन च॥ स्नानं शतगुणं प्रोक्तमितरेभ्यो नराधिप॥ तं च स्नपनं षडक्षरेण पाद्याद्यादीनथ षोडश॥
विन्तरेदुपचारांश्च पूर्वं प्रोक्तास्तु मेरवेत्ति वाराहीति मंत्रादृ॥ ह्रीं दुर्गायै नम इति षडक्षरमंत्रेण कार्यं भविष्यो॥ चंडिकां स्न
पयेद्यस्तु नरश्चेक्षुरसेन च॥ गारुडेन स पायेन विष्णुना सह मोदते॥ पितृनुद्दिश्य यो दुर्गां मधुना पयसानि च॥ स्ना
पयेत्तस्य पितरस्तृप्ता वर्षशतद्वयं॥ पौर्णमास्यां नवम्यां च अष्टम्यां च नराधिप॥ स्नापयित्वा तीर्थजले वाजपेयफलं
लभेत्॥ स्नपयित्वा नदीतोये गंधचंदनवारिणा॥ चंद्रांशुनिर्मलाः श्रीमान् चंद्रलोके महीयते॥ स्नपयेद्यस्तु वै देवीं न
रः कर्पूरवारिणा॥ स गच्छति परं स्थानं यत्र सा चंडिका स्थिता॥ चंडिकां स्नपयित्वा तु श्रद्धया गुरुवारिणा॥ इंद्रलोकं
समासाद्य क्रीडते सह किंनरैः॥ द्वादशांगेन यो धूपा चंडिकां पूजयेन्नरः॥ दशपद्मसहस्राणि वर्षाणां मोदते दिवि॥ पयः

१३२

कुर्याच्चित्रवस्त्रैरलंकृतं॥ भद्रकालीपदं कृत्वा तत्र संपूजयेद्विजं॥ पदं स्वरूपं॥ सा चोक्ता तत्रैव॥ अष्टादशभुजा कार्या भद्रका
ली मनोहरा॥ आलीढस्थानसंस्थाना चतुःसिंहरथे स्थिता॥ अक्षमालां त्रिशूलं च खड्गं चंद्रं च यादव॥ बाणचापे च कर्तव्ये
शंखपद्मे तथैव च॥ स्रुक्स्रुवौ च तथा कार्यौ तथा वेदिकमंडलू॥ दंडशक्ती च कर्तव्ये तथा शक्तिं कुठारं ने॥ हस्तानां भ
द्रकल्याणं भवेत्कांति कध्वतिः करः॥ एकत्रैव महाभाग रत्नपात्रधरा भवेदिति॥ आश्विने शुक्लपक्षे तु अष्टम्यां प्रयतः शुचिः
तत्रैवायुधवर्मादि च्छत्रं वस्त्रं प्रपूजयेत्॥ पुष्पैर्मेध्यैः फलैर्भक्ष्यैः भोज्यैश्च सुमनोहरैः॥ बलिभिश्च विचित्रैश्च प्रेक्षादानैस्त
थैव च॥ रात्रौ रात्रिजागरणं कुर्यात्तत्रैव वसुधाधिप॥ उपोषितो द्वितीयेऽह्नि पूजयेत्सुनरेव तां॥ आयुधाद्यं च सकलं
पूजयेद्वसुधाधिप॥ एवं संपूजयेद्देवीं वरदां भक्तवत्सलां॥ कात्यायनीं कामदां मां बहुरूपां वरप्रदां॥ पूजिताः
सर्वकामास्ता युनक्ति वसुधाधिप॥ एवं हि संपूज्य जगत्प्रधानां यात्रां विदध्याद्वसुधाधिपेन॥ प्राप्नोति सिद्धिं परमां महेशो
जनस्तथान्योऽपि च वित्तशक्त्या॥ तत्रैव देवीपुराणे॥ ब्रह्मोवाच॥ शृणु शक्र प्रवक्ष्यामि तथा त्वं परिपृच्छसि॥ महा
सिद्धिप्रदं धन्यं सर्वशत्रुनिबर्हणं॥ सर्वलोकोपकारार्थं विशेषादस्तिवृत्तिषु॥ कर्तव्यं ब्राह्मणाद्यैश्च क्षत्रियैर्भूमिपा
लने॥ गोधनार्थं विशा वत्स शूद्रैः पुत्रसुखार्थिभिः॥ सौभाग्यार्थं स्त्रिया कार्यं मन्ये धनकांक्षिभिः॥ महाव्रतं महापुण्यं

क्षीरं कुशाग्राणि अक्षता दधि तंडुलाः ॥ सहा सिद्धार्थका दूर्वा कुंकुमं रोचनं मधु ॥ अर्घ्योयं कुरुशार्दूल द्वादशांग उदाहृतः ॥
साहा सहदेवी कुमारी अत्क्रम्य ॥ अनेन पूजयेद्यस्तु स याति परमं पदं ॥ अष्टांगार्घ्यसमापूर्य देव्ये मूर्ध्नि निवेदयेत् ॥ द
शवर्षसहस्राणि दुर्गालोके महीयते ॥ अपः क्षीरं कुशाग्राणि दधि सर्पिश्च तंडुलाः ॥ तिलाः सिद्धार्थकाश्चैव अष्टांगोर्घः
प्रकीर्तितः ॥ भविष्ये ॥ रक्तबिल्वाक्षतैः पुष्पैः दधिदूर्वाकुशैस्तिलैः ॥ समान्यः सर्वदेवानां अर्घोयं परिकीर्तितः ॥ मृ
त्पात्रे पावरो दत्त्वा वाजपेयफलं लभेत् ॥ ताम्रपात्रार्घदानेन पौंडरीकफलं लभेत् ॥ पलाशपद्मपत्राभ्यां गोसहस्रफलं
लभेत् ॥ रौप्यपात्रेण दुर्गायै विष्णुयागफलं लभेत् ॥ दत्त्वा सौवर्णपात्रेण लभेद्धकु सुवर्णकं ॥ हेमपात्रेण सर्वाणि ईप्सि
तानि लभेद्भुवि ॥ अर्घ्यं दत्त्वा तु पौष्पेण आयुराज्यं शुभं लभेत् ॥ चंदनेन सुगंधेन आर्बायस्तु समालभेत् ॥
कुंकुमेन विलिप्यार्यो गोसहस्रफलं लभेत् ॥ विलिप्य कृष्णागरुणा वाजपेयफलं लभेत् ॥ मृगनुलेपनं कृत्वा ज्यो
तिष्टोमफलं लभेत् ॥ मृगः कस्तूरी तथा ॥ चंदनागरुकर्पूरैः यस्तु दुर्गां विलेपयेत् ॥ संवत्सरशतं दिव्यं शक्रलो
के महीयते ॥ देवीपुराणे ॥ चंदनागरुकर्पूरैः श्लक्ष्णैः पिष्टैः सुकुंकुमैः ॥ दुर्गामालिप्य विधिवत् कल्पकोटिवसे
द्दिवि ॥ मदकर्पूरकाश्मीररोचनाच चतुष्टयं ॥ एतेन लेपयेद्देवीं सर्वकामानवाप्नुयात् ॥ पुष्पाणि देवीपुराणे ॥ मल्लि

कामुत्पलं पद्मं शमीपुन्नागचंपकं ॥ अशोकं कर्णिकाकारं चंद्रे पुष्पं विशेषतः ॥ करवीरं शमीपुष्पं कुसुमं नागकेसरं ॥ पुंना
गः श्चंपकः कुंदो पुष्पिका वनमालिका ॥ जपा च केतकी मल्ली बृहती शतपत्रिका ॥ तथा कुमुद कल्हार बिल्व पाटल माल
मालती ॥ यवा नीच कुलाशोक रक्तनीलोत्पलानि च ॥ दमनं मरुबकं च शतधा पुण्य दृष्ये ॥ तथा ॥ केतकी चातमुक्तं च
बंधुकं बलान्यापि ॥ कुमुदं कर्णिकाकारं सिंधूराणं समृक्षये ॥ भविष्ये ॥ प्रत्येकमुक्तपुष्पेषु दश निष्क फलं लभेत् ॥ सु
द्रबंधेषु तेष्वेव द्विगुणं कांचनस्य तु ॥ करवीरस्रजोभिश्च ॥ पूजयेद्यस्तु चंडिका ॥ साग्निष्टोमफलं लब्ध्वा सूर्यलोके मही
यते ॥ पूजयित्वा नरो भक्त्या चंडिकां पद्ममालिनी ॥ ज्योतिष्टोमफलं प्राप्य सूर्यलोके महीयते ॥ शमीपुष्पस्रजोभिस्तु
आयासं पूज्य यत्नतः ॥ गोसहस्रफलं प्राप्य विष्णुलोके महीयते ॥ पूजयित्वा तु राडिं द्रश्रद्धया विधिवन्नृप ॥ शतपुष्पस्र
जोभिस्तु पितृलोके महीयते ॥ सुगंधयुत पुष्पैस्तु पूजयेद्यस्तु चंडिकां ॥ मालाभिर्मालया वापि सोश्वमेधफलं ल
भेत् ॥ सुवर्णानां सुवर्णस्य शतेदत्ते फलं लभेत् ॥ मालया बिल्वपत्राणां नवम्यां गुग्गुलेन च ॥ नीलोत्पलस्रजोभिश्च
पूजयेद्यस्तु चंडिकां ॥ वाजपेयफलं प्राप्य रुद्रलोके महीयते ॥ तथा ॥ विलिप्तां पूजयेद्दुर्गां दिव्यपुष्पाधिवासितां ॥ ताल
वृंदे तेन संवीज्य महासनफलं लभेत् ॥ भविष्ये ॥ सर्वेषामेव धूपानां दुर्गाया गुग्गुलप्रियः ॥ मंत्रस्तु ॥ धूपोयं देवदेवे १३३
शी घृतगुग्गुलयोजितः ॥ गृहाण वरदे मातर्दुर्गे देवि नमोस्तु ते ॥ शतं गुरुं नरो दत्वा गोसहस्रफलं लभेत् ॥ शीत्यगुरुः

ते॥ पित्तनाशमरुचिं निहंति चै मोदनं च कुरुते रसालया॥ यानकं वै घयकं ते गोडमम्लं मनम्लं वा पताकं सुराणी कृतं॥ नंद
वरवंड म्हद्दी काशर्करासहितं पुनः॥ साम्लं सुतीक्ष्णं सहितं पानकं स्यान्निरंडैनकं॥ निरंत्यमं तत्कालं॥ श्रध्ययापाय
से युक्तं शर्करासहितं पुनः॥ यः प्रयच्छति दुर्गायै तस्यै राज्यं करे स्थितं॥ कालिकापुराणे॥ ओमि क्षीर परमान्नं
च दधि चापि सशर्करं॥ सहाद्दव्यै निवेद्येव वाजिमेधफलं लभेत्॥ दुर्गामुद्दिश्य पानीयं केन कीशाशि वासितं॥
यः प्रयच्छति राजेंद्र सगण्याधिपूर्तिर्भवेत्॥ आम्रं च नारिकेलं च खर्ज्जूर बीजपूरकं॥ यः प्रयच्छति दुर्गायै स याति
परमं पदं॥ फलं विस्तरये तत्सर्वं नाशुभं किंचिदाप्नुयात्॥ भक्ष्यादि पंचकं देवी दत्तैरेवाभितुष्यति॥ भक्ष्यं भो
ज्यं च लेह्यं च पेयं चोष्यं च पंचमं॥ परमान्न पृष्टकं …याकं कृसरं तथा॥ मोदकं पृथुकादीनि दद्यात्पक्वानि वा त्य
जेत्॥ इत्यादित्यर्थः॥ निवेदयेन्महादेव्यै सर्वाणि व्यंजनानि च॥ क्षीरादीनि च गव्यानि माहिषाणि च सर्वशः॥
तांबूलानि च दत्वा तु गंधर्वैः सह मोदते॥ विष्णुधर्मे॥ तंतुसंतानसन नसनधं रंजितं सग्रं गवस्कृन॥ दुर्गे दिवि
भज खेदं वासस्ते परिधीयतां॥ भविष्ये॥ वस्त्राणि सुचित्राणि सूक्ष्माणि च मृदूनि च॥ यः प्रयच्छति दुर्गायै स ग
च्छति शिवालयं॥ यावंतस्तंतवो वीर तेषु वस्त्रेषु संस्थिताः॥ तावद्वर्षसहस्राणि मोदते चंडिकागृहे॥ अलंकारं

दुर्यो दद्यात् विशायाथ सुरायवा॥ स गच्छेद्वारणं लोकं नानाभरणभूषितः॥ आतः श्रीथ व्यां कालेन ततो दीपयतिर्भवे
त्॥ विष्णुधर्मे॥ विभूषणप्रदानेन राजा भवति भूतले॥ तत्रैव॥ सुवर्णतिलकं यस्तु भग… त्यै प्रयच्छ
ति॥ स गच्छति परं स्थानं यत्र सा परमा कला॥ सौवर्णे ऽजेरो ने चापि अक्षिणी यः प्रयच्छति॥ गोसहस्रफलं तस्य सूर्य लो
के महीयते॥ श्रोणिसूत्र प्रदानेन महीसागरमेखलां॥ प्रशास्ति नहि तामित्रः शक्रवद्दिवि मोदते॥ हेमनूपुरदानेन
स्थानं सर्वत्र विंदति॥ शिवरहस्ये॥ देदीप्यत्ते कनकदंडविराजितेश्च सा चामरैः प्रबल कुंडल सुंदरीभिः॥ दिव्यांग
नस्तन विराजित भूषितांगः कृत्वा तु वासार युतं… वस्त्रभूजा॥ भविष्ये॥ गौरीकस्य तु पात्राणि दुर्गायै यः प्रयच्छ
ति॥ तस्य पुण्यफलं प्रोक्तं तारागणपदं दिवि॥ गौरिकं सुवर्णं॥ निष्ककोटि प्रदानाद्धि रज तस्य ततोधिकं॥ हेमपात्रा
णि ये दत्वा पुण्यस्याद्दं द पारगे॥ ताम्रपात्रप्रदानेन देव्यै शतगुणं भवेत्॥ तस्माच्छत गुणं प्रोक्तं दत्वा मृन्मय मादरात्॥
मृन्मयं घटकरकादि॥ उपस्कर प्रदानेन प्रियमाप्नोत्यनुत्तमं॥ उपस्करः पूजार्थं धूप दीप पात्रं घंटादि॥ चंद्रांशु
निर्मलं स्वच्छं दर्पणं मणिभूषितं॥ पद्मोपशोभितं कृत्वा माला माल्यानुलेपनैः॥ दुर्गायाः पुरतः कृत्वा विष्णु वांशं
करस्यवा॥ राजसूय फलं प्राप्य हंसलोके महीयते॥ हंसः सूर्यः॥ शिवरहस्ये॥ दत्वा तु यापरमभक्तियुतो भावा

न्या घंटावितानमथ चामरमातपत्रं॥ केयूरहारमथकुंडलभूषितोसौ रत्नाधिपो भवति भूतल चक्रवर्ती॥ भविष्ये॥
शंखकुंदेंदुसंकाशं प्रवालमणिभूषिते॥ हेमदंडमयं छत्रं दुर्गायै यः प्रयच्छति॥ सच्छत्रेण विचित्रेण किंकिणीजाल
मालिना॥ धार्यमाणेन शिरसि शिवलोके महीयते॥ विष्णुधर्मे॥ यानशय्यामणिं छत्रं पादुके चाप्युपानहौ॥
वाहनं गां गृहं वापि त्रिदशाय प्रयच्छति॥ एकैकस्मादवाप्नोति वह्निष्टोमफलं लभेत्॥ भविष्ये॥ ताम्रदंडं विचित्र
वैदुर्गायै यः प्रयच्छति॥ स गच्छति परं स्थानं सा रूपाणां लोकपूजितः॥ हेमदंडविचित्रं च चामरं संप्रयच्छति॥ वायुलोकं
समासाद्य क्रीडते वायुना सह॥ आर्यायाः श्चामरं दत्वा मणिदंडविभूषितं॥ सुवर्णरूप्यविचित्रं वा दुर्गालोके महीय
ते॥ मायूरपत्रव्यजनं नानारत्नविभूषितं॥ भगवत्यै नरो दत्वा लभेद्धेनुं सुवर्णकं॥ तालवृंतं महाबाहो चित्रक
र्मोपशोभितं॥ भगवत्यै नरो दत्वा वैष्णवस्य फलं लभेत्॥ वैष्णवो यज्ञः॥ घंटां निवेदयेद्यस्तु लभते वांछितं फलं॥
हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत्॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानि वेति संप्रज्ज्वालितं वेदयेत्॥ अ
नः शब्दो मातृवाचकः॥ आनः शकटमात्तरीति कोशात्॥ आदित्यपुराणे॥ यः शय्यां तु प्रयच्छेत् देवेषु इह गुरुष्विह॥
स्नानवृद्धेषु विप्रेषु दत्वा न नरकं व्रजेत्॥ भविष्ये॥ रत्नापकरणोर्युक्तां सारदारुमयीं शुभां॥ शय्यानिवेदयेद्य
स्तु भगवत्यै नराधिप॥ कदंबवस्त्रतन्तूनां परिखाप्यातुपार्वती॥ तावद्वर्षसहस्राणि दुर्गालोके महीयते॥ विष्णुध १२५

महिषाख्यं घृताभ्यक्तं दत्वा बिल्वमथापि वा॥ वाजपेयफलं प्राप्य सूर्यलोके महीयते॥ सकृत्कृष्णागरुधूपेन महिषाख्येन मंगल॥ शो
धयेत्पापकलिलं यथारश्मिरिव कांचनं॥ कृष्णागरुं सकर्पूरं चंदनं सिंहकं तथा॥ तथा शब्दसमुच्चये॥ भगवत्यै नरो धूपमिमं
दत्वा नराधिप॥ इह कामानवाप्यान्यान् दुर्गालोके महीयते॥ भविष्ये॥ घृतदीपप्रदानेन चंडिकां पूजयेन्नरः॥ सोश्वमे
धफलं प्राप्य दुर्गायास्तु गणो हरेत्॥ तैलदीपप्रदानेन प्रपूजयित्वा च चंडिकां॥ वाजपेयफलं प्राप्य मोदते सह किंनरैः॥ म
नुस्तु॥ अग्निर्ज्योतिरविर्ज्योतिश्चंद्रज्योतिस्तथैव च॥ ज्योतिषामुत्तमो दुर्गे दीपोयं प्रतिगृह्यतां॥ शिवरहस्ये॥ व दीप्य
ते सकनकोज्ज्वलपद्मरागरत्नप्रभाभरपाहे मयेविमाने॥ दिव्यांगना परिवृतो नयनाभिरामं प्रज्वाल्य दीप
समलं भवने भवान्याः॥ दीपप्रदानं यो दद्याद्देवेषु ब्राह्मणेषु च॥ तेन दीपप्रदानेन अक्षयां गतिमाप्नुयात्॥ भवि
ष्ये॥ घृतेन कुरु शार्दूल ह्यमावास्यां तु कार्तिके॥ विशेषतो नवम्यां तु भक्त्या श्रद्धासमन्वितः॥ यावत्तं दीपसंघातं
घृतेनापूर्य बोधितं॥ तावत्कल्पसहस्राणि दुर्गालोके महीयते॥ भविष्ये॥ गुडखंडकृतान्नं च तथा शर्करयापि
च॥ घृतेन परिपक्वान्नं दत्वा च ब्राह्मणः पदं स्यादिति शेषः॥ शाल्योदनं रसानां तु पानं बदरजं तथा॥ यः प्रयच्छति दुर्गा
यै स गच्छति शिवालयं॥ शिवा दुर्गा रसा लास्यूपशास्त्रे॥ ईषदम्ल दधि शर्करा मयः साधितं डुमरिचं सुगालि

र्मे॥ पादुकासनदानेन भगवत्यै कृतेतु न॥ वह्निष्टोमफलं प्राप्य विष्णुलोके महीयते॥ योगांपयस्विनीं सुशांतरूपां
शील मंडलां॥ भगवत्यै नरो दत्वाश्वमेधफलं लभेत्॥ वृषभं परिपूर्णांगं सुदासीनं शशिप्रभं॥ यस्तु दद्यान्नरो भक्त्या
भगवत्यै स कृन्नरः॥ यावंति रोमकूपाणि वृषदेहस्थितानि वै॥ तावत्कल्प सहस्राणि रुद्रलोके महीयते॥ सवी
नितां स्त्रिपं दात्मं रतकं वा नराधिपः॥ यः प्रयच्छति दुर्गायै राजसूयाश्वमेधभाक्॥ विष्णुधर्मे॥ प्रतिपाद्य तथा भ
क्त्या ध्वजं त्रिदशौकस्मानि॥ निर्दहत्यापपानि महा(पा)तकजान्यपि॥ भविष्ये॥ ध्वजं श्वेतपत्रकाद्यमथवा पंचरं
गकं॥ किंकिणीजालसंवीतं श्वेतपद्मोपशोभितं॥ दत्वा देवे महाबाहो शक्रलोके महीयते॥ ध्वजमालाकुलं यस्तु
कुर्याद्देवं चंडिकालयं॥ महाध्वजाष्टकं चापि दिशासु विदिशासु च॥ कल्यानां तु शतं साग्रं दुर्गालोके महीयते॥
यावत्पुनः प्रमाणेन पताका चैरितैः॥ प्रतिपादिता॥ ताव द्वर्षसहस्राणि दुर्गालोके महीयते॥ चतुर्हस्तं धनु॥ का
लिकापुराणे॥ प्रशस्तं बलिदानं च नवम्यां विधिवच्चरेत्॥ कूष्मांडमिक्षुदंडश्च मद्यमासवमेव च॥ एते बलिस
मा प्रोक्तास्तृप्तौ छागसमाः सदा॥ भविष्ये॥ न तत्र शोकदुर्भिक्षं न च दुःखं प्रवर्तते॥ नाकाले म्रियते कश्चित्तत्र रा

तियत्र चंडिका॥ शरत्कालेमहाष्टम्यां चंडिकायस्तुपूजयेत्॥ विमानवरमारुह्य मोदते ब्रह्मणासह॥ अथावरणपूजा देवी
दक्षिणपार्श्वस्थापितसिंहं संपूज्य पूर्वादि॥ ॐ ह्रीं जयंत्यै नमः॥ एवं मंगलायै०॥ भद्रकाल्यै० कपालिन्यै०॥ दुर्गायै०॥ क्षमा
यै०॥ शिवायै० धात्र्यै० स्वाहायै० नत्वा ह्रीं उग्रचंडायै०॥ प्रचंडायै०॥ चंडवीरायै०॥ महाबलायै०॥ चंडवत्यै०॥ चंडरूपायै॥
ह्रीं उग्रदंष्ट्रायै०॥ दंष्ट्राकरालायै०॥ बहुरूपिण्यै० ग्रामण्यै॥ भीमसेनायै०॥ शिलालक्ष्यायै॥ मंगलायै॥ मंगल
दायै०॥ नंदिन्यै०॥ भद्रायै०॥ लक्ष्म्यै० का[illegible]दायै० भोगदायै०॥ पृथ्व्यै नमः॥ मेधायै० साध्व्यै नमः॥ यशोवत्यै०॥ शो
भायै०॥ बहुरूपायै०॥ धृत्यै नमः॥ आनंदायै०॥ सुनंदायै०॥ नंदायै०॥ अथ चतुष्षष्टिदेव्यो द्वात्रिंशत्षोडश वा द्वादश
पूज्या॥ ॐ विजया० मंगला० महीधृति·शिवाय०॥ क्षमा·सिधि·पुष्टि·जया०तुष्टि·प्रिया० ऋद्धि०रति०
दीप्ता॥ कांति०पद्मा०लक्ष्मी०॥ ईश्वरी॥ वृद्धिः शक्तिः जयवती० ब्राह्मी·जयंती॥ अपराजिता॥ अजिता॥ मा
निना॥ श्वेता० दितिमाया०॥ महामाया० मोहिनी० त्तिलालसा॥ तारा॥ विमला॥ कौमारी॥ शरणा॥ गोरूपा०
कामाक्षी०॥ मतिदुर्गा०॥ क्रिया॥ अरुंधती॥ घंटा०॥ कराली० कपाली॥ रौद्री०॥ कालिमापुरी॥ त्रिनेत्रा॥ सुरू
पा० बहुरूपा०॥ रिपुहा॥ अंबिका॥ चर्चिका० देवपूजिता॥ वैवस्वती॥ कौमारी०॥ माहेश्वरी॥ वैष्णवी॥ महाल

युधिष्ठिर उवाच॥ कथमाशादशम्येषा गोविंद क्रियते कदा॥ दमयंत्या नलस्येव यया जातः समागमः॥ कृष्ण उवा
राज्याशाय्या राजपुत्र कृष्यर्थं च कृषीवलः॥ वाणिज्यार्थं वणिक्पुत्रः पुत्रार्थं गुर्विणी तथा॥ धर्मकामार्थ
संसिध्यै लोकः कन्या वरार्थिनी॥ यष्टुकामो द्विजवरो रोगी आरोग्यार्थमेव च॥ चिरप्रवसिते कांते तालेदंतानि पी
डिते॥ एतेष्वन्येषु कर्त्तव्या माशाव्रतमिदं तदा॥ यस्मायस्य भवेदार्त्तिः कार्यं तेन तदा व्रतं॥ शुक्लपक्षे दश
म्यां तु स्नात्वा संपूज्य देवताः॥ नक्तमाशाः समभ्यर्च्य वै पुष्पभक्तचंदनैः॥ गृहांगणे लेखयित्वा यवैः पिष्टातकेन वा॥
स्त्री रूपा श्चाधिदेवस्य शस्त्रवाहनचिन्हिताः॥ अधिदेवस्य तस्या दिक्पालस्येदा यस्तत्तः छत्रे वाहिनेश्च
वन्हितालेखयित्वेत्यर्थः॥ दत्वा घृतांकेन नैवेद्यं पृथक् दीपांश्च दीपयेत॥ फलानि कालजातानि ततः कार्यं निवेदयेत॥
आशाश्चाशाः सदा संतु सिध्यंतां मे मनोरथाः॥ भवतीनां प्रसादेन सदा कल्याणमस्त्विति॥ एवं संपूज्य विधिवद्दत्वाति
शय दक्षिणां॥ अनेन क्रमयोगेन मासि मासि समाचरेत॥ वर्षमेकं कुरुश्रेष्ठ ततः पश्चात्समुद्यापयेत॥ सर्वाक्सं
वत्सरस्यापि सिध्यर्थे मासमुद्यापयेत॥ सौवर्णा कारयेदाशा शाय्या पिष्टातकेन वा॥ ज्ञातिबंधुजनैः सार्धं स्नातस्स
म्यगलंकृतं॥ पूज्यः प्रक्रमयोगेन मंत्रैरेभिर्गृहांगणे॥ त्वयि संन्निहितः शक्रः सुरासुरनमस्कृतः॥ पूर्वतं

१२०

भुवनास्यास्य ऐंद्रदिग्देवतेनमः॥ धर्मराजं समाश्रित्य लोकान्संयमयत्यसौ॥ तेन संयमनी वासी याम्ये सत्का मदा
भव॥ खड्गहस्ता दिविकृतानिर्ऋतिस्थानमाश्रितः॥ येनानिर्ऋतिनामासी त्वमाशा पूरयस्व मे॥ त्वायास्ते भुव
माधारो वरुणो यादसां पतिः॥ कामार्थं मम धर्मार्थं वारुणी प्रणवा भव॥ अधिष्ठितासि यस्मात्त्वं वायुना जगदायुना॥
वायव्ये त्वमनःशांति नित्यं यच्छ ममालये॥ धनदेनाधिष्ठितासि प्रख्याता सिमहोत्तरा॥ निरुत्तरा भवास्मासु दत्वास
घोमनोरथं॥ देवेशाभिजगदीशेन शंभुनात्वमलंकृता॥ पूरयस्व शुभे देवि वांछितानि नमो नमः॥ भुजंगाष्ट कु
लेन त्वं सेवितासि यतोऽप्यधः॥ नागांगनाभिः सहिता हिताभव ममाद्य वै॥ सर्वलोकोपरिगतासर्वदा त्वेविशायच॥
सनकाद्यैः परिवृता ब्राह्मी मोपाहि सर्वदा॥ नक्षत्राणि च सर्वाणि ग्रहास्ताराग णास्तथा॥ नक्षत्रमातरो याश्च भूत
प्रेतविनायकाः॥ सर्वे मम ष्टसिध्यर्थं भवंतु प्रणवाः सदा॥ एभिर्मंत्रैः समभ्यर्च्य पुष्पधूपादिना ततः॥ वासोभिरभि
संकल्प फलानि विनिवेदयेत॥ ततो बंदिजना दैविगीतवादित्रमंगलैः॥ न्रत्यंतीभिर्वरस्त्रीभिर्जागरत्नीवनि
शां नयेत॥ कुंकुमाक्षततांबूलदानमानादिभिः सुखं॥ प्रभाते वेदविदुषे ब्राह्मणाय निवेदयेत॥ अनेन विधिना
सर्वक्षमाप्य प्रणिपत्य च॥ भुंजीत मित्रसहितः सुहृद्बंधुजनेन च॥ य एवं कुरुते पार्थ दशमी व्रतमादरात्॥ सर्वा

न्कामानवाप्नोतिसमसोपि मतंनरः॥ स्त्रीभिर्विशेषतः कार्यं व्रतमेतद्युधिष्ठिर॥ अणिवर्गेयतो नार्यः श्रद्धाका
मपरायणाः॥ धन्यंयशस्यमायुष्यंसर्वकामफलप्रदं॥ कथितं तेमहाराज मया व्रतमनुत्तमं॥ येमानवाः मनुजपुं
गवकामसंपूजयंतिदशमीषुसदादशाशाः॥ तेषांविशेषनिहिताहृदयेपिकामानाशाफलंत्यलमलंबकुनो
दितेन॥ ॥इति भविष्योत्तरे आशादशमीव्रतं॥ अथज्येष्ठशुक्लदशम्यां दशाहाराख्यायांस्नानदानादिकं॥
स्कांदे॥ ज्येष्ठस्यशुक्लदशमीसंवत्सरमुखा स्मृता॥ तस्यांस्नानंप्रकुर्वीतदानंचैवविशेषतः॥ यांकांचित्स
रितं प्राप्य दद्यादर्घ्यं तिलोदकं॥ मुच्यते दशभिः पापैः सुमहापातकोपमैरिति॥ ज्येष्ठशुक्लदशम्यांतु भवे
द्भौमदिने यदि॥ ज्ञेया हस्तर्क्षसंयुक्ता सर्वपापहरा तिथिरिति॥ वराहपुराणे॥ दशमीशुक्लपक्षेतुज्येष्ठेमा
सेतुजान्हवी॥ अवतीर्णायतः स्वर्गाद्धस्तर्क्षेचसरिद्वरा॥ हरतेदशपापानि तस्माद्दशहरास्मृता॥ इतिस्कां
दे॥ ज्येष्ठमाससितेपक्षेदशम्यांबुधहस्तयोः॥ गरानंदेव्यतीपातेकन्याचंद्रेवृषेरवौ॥ दशयोगेनरस्नात्वा
सर्वपापैः प्रमुच्यते॥ तथा तत्रैवोक्तं॥ तस्यांदशम्यामेतच्चस्तोत्रं गंगाजलेस्थितः॥ पठेद्दशकृत्वस्तुद
रिद्रोकापिवाक्षमः॥ सोपितत्फलमाप्नोतिगंगासंपूज्ययत्नतः॥ इतिदशाहरविधिः॥ अथभाद्रशुक्लद

१३८

क्ष्मी॥ काकी॥ कौशिकी॥ शिवदूती॥ चामुंडा॥ शिवप्रसीद चामुंडे दुर्गे महिषमर्दिनी॥ अथमातरः॥ ब्राह्मी॰ माहेश्वरी॰॥
कौमारी॥ वैष्णवी॰॥ महालक्ष्मी॥ वाराही॰॥ इंद्राणी॥ चामुंडा॥ महालक्ष्मी॥ मध्येचंडिका॥ ततः ॐ कालि कालि
स्वाहा॥ हृदयाय नम इत्यग्नीशाननिर्ऋतिवायव्येषु॥ ओं कालि कालि ल्लो हृदंडायै स्वाहा॥ अस्त्राय॰ पश्चात्
ॐ कालि कालि ल्लो हृदंडायै नेत्रायपुरः॥ अथ पंचवक्त्राणि॥ ॐ ईशानाय॰ शिरसि कालि कालि तत्पुरुषाय
नमः मुखे॥ ॐ वज्रेश्वरी अघोरायनमः॥ हृदये॥ ॐ ल्लो हृदंडायैवामदेवाय नमः पादयोः॥ ॐ स्वाहा सद्योजाता
यनमः सर्वांगे॥ अथायुधानि दक्षिणोर्ध्वं क्रमात् त्रिशूलं॰ खड्गं॰ वज्रं॰ तीक्ष्णबाणं शक्तिं दोर्नखेटं॥॰
पाशं॰ अंकुशं॥ घंटा॥ ततः॥ ॐ वज्रभैरवदंष्ट्रायुधाय महासिंहासनाय॥ ॐ हुंफट्इनम इति सिंहं॥ महिषा
यनमः॥ नागपाशायनमः॥ इतिपूजा भविष्ये॥ सर्वैः पद्मैः सहस्रैस्तु यत्पापं समुपार्जितं॥ तत्सर्वं विलयं याति घृ
ताभ्यंगेन वै नृप॥ घृतेन पायसा दध्ना स्नापयेच्चंडिकां नृप॥ निंबपत्रैश्च गंधाद्यैर्घर्षयेद्घृतस्तत इति दुर्गाभ
क्तितरंगिण्यां महाष्टमी महानवम्योः पूजा॥ ॥इतिश्रीभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के नवमी
व्रतानि॥ अथदशमीव्रतानि॥ यत्रयस्यांकस्यांचिच्छुक्लदशम्यां मशा दशमीव्रते॥ हेमाद्रौ भविष्योत्तरे॥

शम्यां दशावतारव्रतं॥ भविष्ये॥ युधिष्ठिर उवाच॥ व्रतं दशावतारारव्यं कृष्ण ब्रूहि सविस्तरं॥ समंत्रं सरहस्यं च स
र्वपापोपशांतिदं॥ कृष्ण उवाच॥ दशम्यां शुक्लपक्षस्य यासौ प्रोष्ठपदे शुचिः॥ स्नात्वा जलाशये स्वच्छे पितृदे
वादितर्पणे॥ कृत्वा कुरुकुलश्रेष्ठ गृहमागत्य मानव॥ गृह्णीयाधन्यकर्णस्य स्वहस्तप्रसृतिचये॥ क्रमेणायावपेतं तु
पुंसंज्ञं घृतसंयुतं॥ वर्षे वर्षे दिने तस्मिन्नेवं वर्षाणि वै दश॥ प्रथमे पूपकान् कुर्याद्द्वितीये घृतपूरिकान्॥ तृतीये चू
पवासारीश्चतुर्थे मोदकान् शुभान्॥ सोहालकान् पंचमे वै षष्ठे खंडवेष्टकान्॥ सप्तमे दृकाकरूसानर्कपुष्पास्तथा
ष्टमे॥ नवमे कर्णवेष्टांश्च दशमे मंडकान् शुभान्॥ दशात्मनो दशविप्राय दापयेत्॥ क्रमेणाभक्षयेद्दत्वा यथो
क्तविधिना नृप॥ अर्घार्घं विष्णवे देयमर्घार्घं चद्विजायते॥ ततोपराधं कामश्री दत्वा रम्ये जलाशये॥ दशावता
राभ्यर्च्य पुष्पधूपविलेपनैः॥ मंत्रेणानेन मेधावी हरिमभ्युक्ष्य वारिणा॥ मत्स्यं कूर्मं वराहं च नारसिंहं त्रिविक्रमं॥
रामं रामं च कृष्णं च बौधं चैव सकल्किनं॥ गतोस्मि शरणं देवं हरिं नारायणं शुभं॥ प्रणतोस्मि जगन्नाथं स मे
विष्णुः प्रसीदतु॥ छिन्नं तु वैष्णवीं मायां भक्त्या प्रीतो जनार्दनः॥ श्वेतद्वीपं नयत्वस्मान्मयात्मा सनिवेदितः॥ अ

न्हैमीं मत्स्यादिदशमूर्तिर्धरणी व्रतं च कृत्वा पुत्र्या य एवं कुरुते भक्त्या विधिनानेन सुव्रते॥ दशावतारनामाद्यं तस्य
पुण्यफलं शृणु॥ श्रूयते यान्यस्मिंल्लोके पुरुषाणां दश दश॥ तोष्ठिं नतिनरं देहस्थं चक्रप्रहरणो॥ विष्णुः॥ संसारसागरान्
घोरात् समुद्धृत्य जगत्पतिः॥ श्वेतद्वीपं नयत्याशु व्रतेनानेन तोषितः॥ किं तस्य न भवेल्लोके यस्य तुष्टो जनार्दनः॥
यद्दुर्लभं यदप्राप्यं मनसो यन्न गोचरं॥ तदप्यप्रार्थितं न ध्यातो ददाति मधुसूदनः॥ सोहं जनार्दनः साक्षात् कालरूप
धरो युतः॥ मर्त्यलोके स्वयं पार्थ भूभारोत्ता[illegible]॥ या स्त्री व्रतमिदं पार्थ चरिष्यति मयोदितं॥ सा लक्ष्मीयुक्त चल
या पुत्रभर्तृसमन्विता॥ मर्त्यलोके चिरं स्थित्वा विष्णुलोके महीयते॥ ये पूजयंति पुरुषाः पुरुषोत्तमस्य मत्स्यादिकं
स्त्र दशमीषु दशावतारान्॥ मन्ये दशास्वपि दशासु सुखं विहृत्य ते यांति यानमधिरुह्य मुरारिलोकं॥ इति भवि
ष्ये दशावतारव्रतं॥ अथाश्विनशुक्लदशमी विजयदशम्याख्या सा च तारकोदयव्यापिनी ग्राह्या॥ तदुक्तं चिं
तामणौ॥ आश्विनस्य सिते पक्षे दशम्यां तारकोदये॥ स कालो विजयो नाम सर्वकामार्थसाधकः॥ रत्नकोशे
पि॥ ईषत्संध्यामतिक्रांतः किंचिदुद्भिन्नतारकः॥ विजयो नाम कालोयं सर्वकार्यार्थसाधक इति॥ दिनद्वये तद्व्या
प्तावव्याप्तौ वा अपराजितपूजोत्तरं ज्ञाया पूर्वैव तदुक्तं हेमाद्रौ स्कांदे॥ दशम्यां तु नरैः सम्यक् पूजनीया प

तदग्राम्यात्पूर्वोक्ते विजयामुहूर्ते उक्तं प्रस्थानिकमित्युपक्रम्य तद्दीपे तत्श्लोकाः। अलंकृतो भूषितभूपवर्गैः परिष्कृ
तो तुरंगमं नागैः। वादित्रनादप्रतिनादिताशः मंगलाचारपरंपराभिः॥ राजा निर्गत्य भवनात्पुरोहितपुरोगमः॥
प्रास्थानिकविधिं कृत्वा प्रतिष्ठेत्पूर्वतो दिशि॥ गत्वा नगरसीमांतं वास्तुपूजां समाचरेत्॥ संपूज्य वाथ दिक्पा
लान्पूजयेदधिदेवताः॥ मंत्रैश्च वैदिकैः पौराणैः पूजयेच्च शमीं तरुं॥ अमंगलानां शमनीं दुःकृतस्य च स्वप्नश
मनीं धन्यां प्रपद्येहं शमीं शुभां ततः कृत्वा ग्राः पूर्वस्यां दिशि विष्णुक्रमेण प्रक्रमेत्॥ रिपोः प्रतिकृतिं कृत्वा ध्यात्वा
वामनसाधने॥ शरेण स्वर्णपुंखेन सिंहे हृदयमर्मणि॥ दिशां विजयमंत्रांश्च पठितव्याः पुरोधसा॥ एवमे
वविधिं कृत्वा दक्षिणादिदिशास्वपि॥ पूज्यान्द्विजांश्च संपूज्य सांवत्सरपुरोहितौ॥ गजवाजिपदातीनां प्रेक्ष्य
कौतुकमाचरेत्॥ जयमंगलशब्देन ततस्स्वभवनं विशेत्॥ नीराज्यमानः पुण्याभिर्गणिकाभिः समंगलं॥ एवं कु
र्वन्राजा वर्षे वर्षे समंगलं॥ आयुरारोग्यमैश्वर्यं विजयं च स गच्छति॥ नाधयो व्याधयश्चैव न भवंति पराजयः॥ श्रि
यं पुण्यमवाप्नोति विजयं च सदा भुवि इति॥ उक्तं प्रस्थानं व्याख्यास्यामो जन्येषु गमिष्यत्सु पार्थिवयानस्य
दुंदुभ्या वीणाश्चोपवादय २ स्नू हृष्टाबलं कृत्वाश्वारू वदं तउदगयने पूर्वपक्षे पुण्यनक्षत्रे केशश्मश्रुलोमन

१४०

खानि वापयित्वा संभारानुपकल्पयित्वा मैत्रे मुहूर्तेग्निमुपसमाधाय शांतिं प्रतिसंस्कारयित्वा वोढारं तेनाभिषिं
चन्नपोषा कौतुकेश्चप्रवरंतिपरतस्त्रीकृतान प्रतीयातादिशतियथाक्रमं जनाभ्यंजनानुलेपनं कारयित्वा वासो
गंधान्स्रजश्चाबध्य पुरः वातीरस्थापयित्वा कर्त्ता त्वा रथोलु हात्यभयैरपराजितैरायुध्यैः स्वस्त्ययनैः शर्म्य वर्म्यभि
र्जनेत्वे दनेकृत्वा पार्थिवस्येति सा प्रत्यगायेति च कृत्वा आगदनातस्येती द्रस्थाली पाकेयेष्ट्वा आतीक्ष्णाल्लजिह्वन
अन्नहसान्नजवदितिपंथानमास्थायजेयेदिमौ व्यादोयत इंद्रं त्रातारमिंद्रं मनो विदुपपक्षयं सोम बृहस्पतिर्नः
परिषात्तु पश्चादिति त्रीन्विष्णुक्रमान्क्रांत्वा विवाहकास्येनाहूरान प्रतिष्ठेन्नरानि परिचत्से त्सत एव मर्यादिति म
दनरत्वेगोपथब्राह्मणे विजयदशमीविधिः॥ इति श्रीभट्टनीलकंठात्मज शंकरकृते व्रतार्के दशमीव्रतानि॥
अथ एकादशीव्रतानि॥ तत्रोपवास एकादशी निर्णयः॥ स च द्विविधा शुद्धा दशमीविद्धा चेति सापि द्विविधा॥ अ
रुणोदये दशमीसंबंधात्सूर्योदये चेत् त्राद्यो वैष्णवैस्त्यज्यते तथा चभविष्ये। अरुणोदयकाले तु दशमी यदि
दृश्यते॥ सा विधैकादशी तत्र पापमूलमुपोषणं॥ तथा॥ दशमीशेषसंयुक्तो यदि स्यादरुणोदयः॥ नैवोपोष्यं वै
ष्णवेन तद्दिनैकादशीव्रतं॥ अरुणोदयस्वरूपं तु हेमाद्रौ स्मृत्यंतरे दर्शितं। निशिप्रांततुयामार्द्धे देववादित्रवादने।

सारस्वतानध्ययने चारुणोदय उच्यते॥ यामार्धे मुहूर्तद्वय यल्लक्षकं॥ अतएव सौरधर्मेषु॥ आदित्योदयवेलायां यामु
हूर्तद्वयान्विता॥ सैकादशी तु संपूर्णा विधान्यापरिकीर्तितेति॥ यत्तु माधवीये स्कांदे॥ उदयात्प्राक् चतस्रः घटिका
अरुणोदय इति॥ तदपि द्वात्रिंशत् घटिका रात्रिपक्षे मुहूर्तद्वयस्य तावत्परिमाणत्वादुक्तमिति हेमाद्रि तन्निर्णयेपितामह
चरणाः॥ येपि ब्रह्मवैवर्ते॥ चतस्रो घटिकाः प्रातररुणोदयनिश्चयः॥ चतुष्टयविभागोत्र वेधादीनां किलोदितः॥ अरुणो
दयवेधस्यात्सार्धं तु घटिकात्रयं॥ अतिवेधो द्विघटिका प्रभासंदर्शनाद्रवेः॥ महावेधोपि तत्रैव दृश्यते कोन दृश्यते॥
तुरीयस्तत्र विहितो योगः सूर्योदये सति॥ त्याधयावेधास्तेष्वाकूदोषात्विद्रायार्थी इतितात च रणावैष्णवलक्षणं तु
स्कांदे॥ परमापदमापन्नो हर्षे वा समुपस्थिते॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षास्तु वैष्णवी॥ समात्मा सर्वजीवेषु
निजाचारादविप्लुतः॥ विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यत इति॥ गारुडे॥ वैखानससाधागमोक्तादीक्षां प्राप्नो
ति वैष्णवः॥ तथा॥ विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते॥ भविष्ये॥ यथा शुक्ला तथा कृष्णा यथा कृष्णा तथे
तरा॥ तुल्ये ते मन्यते यस्तु स हि वैष्णव उच्यते॥ इति वेधास्त्रयः सर्वे ये वेधास्तिथिषु स्मृताः॥ सर्वेष्ववेधा विज्ञे
या वेधः सूर्योदयः स्मृत इति॥ मदनरत्नधृत स्मृत्यर्थकृत्सूर्योदयवेधः॥ परेशेषात्तल्लक्षणारहितस्मार्तपरए

१४१

राजिता॥ ईशानीं दिशमाश्रित्य अपराह्ने प्रयत्नतः॥ या पूर्णा नवमीयुक्ता तस्यां पूज्या पराजिता॥ क्षेमार्थं विजयार्थं च
सर्वोक्तविधिना नरैः॥ नवमीशेषसंयुक्ता या दशम्यापराजिता॥ ददाति विजयं देवी पूजिता जयवर्धिनी॥ तथा॥ आश्वि
ने शुक्लपक्षे तु दशम्यां पूजितो वरः॥ एकादश्यां न कुर्वीत पूजनं चापराजितमिति॥ यत्रात्वेकादशमुहूर्तेकार्या॥ तथा च भृ
गुः॥ आश्विनस्य सिते पक्षे दशम्यां सर्वराशिषु॥ सायंकाले शुभा यात्रा दिवा वा विजयाक्षणे॥ एकादशमुहूर्तोयं
विजयः संप्रकीर्तितः॥ तस्मिन्सर्वैर्विधातव्या यात्रा विजयपक्षभिरिति॥ दिनद्वय एकादशमुहूर्तव्याप्तौ च व्याप्तौ
वा श्रवणयुता ग्राह्या॥ तथा च हेमाद्रौ मदनरत्ने च कश्यपः॥ उदये दशमी किंचित्संपूर्णैकादशी यदि॥ श्रवणर्क्षं य
दा काले सा तिथिर्विजयाभिधा॥ श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः॥ उल्लंघयेयुः सीमां तं तद्दिनर्क्षे ततो न
रः॥ इति॥ तत्र कृत्यं भविष्ये॥ शमी सलक्षणोपेतां ईशानाशाप्रतिष्ठिता॥ संप्रार्थ्य तां च संपूज्य त्वीशानीमुन्मु
खो भवेत्॥ मंत्रः॥ शमी शमयते पापं शमी लोहितकंटका॥ धारयित्वार्जुनास्त्राणां रामं संवाददायिनी॥ करि
ष्यमाणयात्रायां यथाकालं सुखं मम॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिता॥ गृहीत्वा साक्षतामार्द्रां शमीमू
लगतां मृदं॥ गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सहेति॥ अथापराजि

व॥ ये तु वैष्णवपुत्रा उक्तवैष्णवलक्षणारहितास्तेषां स्मार्त्तनिर्णय एव ज्ञेय इति॥ यद्वा मंत्रत्वादिव दृष्टियुक्तानां वैष्णव
प्रसिद्धिविषयत्वमेव वैष्णवत्वं॥ तेन तेषामपि वैष्णवनिर्णय एव भवति॥ शिष्टाचारोप्येवं॥ तत्र वैष्णवानामेकादशीनि
रूप्यते॥ यत्रादित्योदयवेलायाः प्राङ्मुहूर्त्तद्वयान्विता॥ सैकादशी तु संपूर्णा विद्धान्या परिकीर्त्तितेति॥ संपूर्णा पर
पर्यायाः शुद्धा त्रिविधा॥ द्वादशीमात्राधिका॥ उभयाधिका॥ अनुभयाधिका चेति तत्राद्या परेद्युः॥ तथा च हेमाद्रि
मदनरत्नादिधृतभागवतादितंत्रे॥ संपूर्णैकादशी त्याज्या परतो द्वादशी यदि॥ उपोष्य द्वादशीं शुद्धां द्वादश्यामेव पा
रणं॥ नगर्भेण विशेज्जंतुः परित्याह भगवान्हरिरिति॥ भविष्यत्पुराणेपि॥ उपोष्य द्वादशीं शुद्धां द्वादश्यामेव पार
णं॥ निर्गतायां त्रयोदश्यां कृत्वा वा द्विकलापि वा॥ द्विकलायां तु द्वादश्यां पारणं यः करोति हि॥ तामुपोष्य महीलम
नगर्भे विशते नरः॥ इदमपि पूर्ववत्पोक्तवाक्यतया शुद्धन्यूनाधिकद्वादशीकायामेवोत्तरत्रोपवासविधायकं तु
विद्धन्यूनाधिकं द्वादशिकायां अत एव पृथ्वीचंद्रोदये बृहन्नारदीय उक्तं॥ संपूर्णैकादशी शुद्धा द्वादश्यां नैव वर्द्धि
वन॥ द्वादशी च त्रयोदश्यां नास्ति तत्र कथं भवेत्॥ पूर्वा गृहस्थैः कार्या स्यादुत्तरा यतिभिस्तथेति हेमाद्र्यादि
धृतभागवततंत्रसमानार्थकस्यास्य वचसो हेमाद्रिलिखनमात्रप्रमाणकत्वात्किंनव्याताम्नाकरे वेति

त्तियत्तु माधवाचार्यैर्न्निर्ण्णेयेस्य कालतत्त्वविवेचने ॥ एकादशीयदालुप्तापरतो द्वादशी भवेत् ॥ उपोष्या द्वादशी तत्र यदिच्छे
त्परमां गतिमिति व्यासवचनात् ॥ शुद्धायां द्वादशी मात्राधिक्ये रेत्युक्तं ॥ तत्रेति भातचरणाः ॥ लोपपदस्य सूर्योदया
स्पर्शीरूपे चमेप्रसिद्ध्या सूर्योदये दत्तदशमीविद्धायामेतस्य वचनप्रवृत्तेः अतो नेदं शुद्धैन्यूनाधिकद्वादशीकाया
मुत्तरदिनउपवासविधायकमिति ॥ नचलोपोत्र द्वितीयसूर्योदयमात्रास्पर्शित्वरूपोपि मतो माधवाचार्याणा
मिति वाच्यं तैरेवयतो नुपदमेव स्मार्त्तनिर्णये व्यासवचनानुपूर्व्वक्रमेवक्ष्यमाणवैवर्त्तवचनमुदयविद्धद्वादशी
मात्राधिकायामेव योजितमिति एतेन एकादशीयदालुप्तेत्यकारप्रश्लेषेण व्याख्यानमपास्तं मपूर्वपरिविरो
विरोधान्मानाभावाच्च नचाथातो धर्मजिज्ञासेति जैमिनिसूत्रे कारप्रश्लेषतत्प्रश्लेषाप्रश्लेषाभ्यां वैलक्षण्यस्मा
त्तोभयविषयनिर्णयकृत्त्वमस्येति शक्यं ॥ नत्र तात्पर्यग्राहकाध्ययविधिरूपस्यैवात्र प्रमाणाभावात् ॥ वस्तुत
स्तु आकारप्रश्लेषस्य भाष्यवार्त्तिककारानुक्तत्वाद्द्वितीयाध्याये भेदापवादत्वे नाभेदवद्धर्ममपवादतया धर्मा
पि जिज्ञास्य इति ॥ धर्मस्य वेदा ॥ रवविषयत्वोन्न नानाविषत्वकल्पनमिति पितामहचरणोक्तमेव सम्यगि
ति दिक् ॥ उभयोराधिक्ये कौमुतिकन्यायेनैव प्राप्तपरत्रोपवासानुवादो नारदाभ्यां युक्तः ॥ संपूर्णैकादशीय

१४२

त्व्यापित्वरूपमेव॥ अत्र गृहस्थयतिपदे सकामनिष्कामपरे॥ अत एव मार्त्तंडेये॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव
सा॥ तत्रैवोपवसेत्कामी निष्कामस्तूत्तरां वसेत्॥ निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा॥ प्रातर्भवतु वा मा वा द्वा
दशी च द्विजोत्तम इति स्कांदे॥ निःकामगृहस्थस्यापि द्वादश्यभावे पुत्रस्योपवासविधानान्नारदादिवचनानि निःका
मगृहस्थपराण्येव न तु वैष्णवपराणीति दिक्॥ उक्तोदाहरणासंभवेनानंतभट्टैः हेमाद्रिमदनरत्नादिनिबंध
कारोर्गारुडवचने स्पष्टीकृतः॥ उदयात्प्राग्यदा विप्र मुहूर्तद्वयसंयुता॥ संपूर्णैकादशी नाम तत्रैवोपवसेद्गृही॥
पुनः प्रभातसमये घटिका यदा भवेत्॥ तत्रोपवासो विहितश्चतुर्थाश्रमवासिनां॥ विधवायाश्च तत्रैव
परतो द्वादशी न चेति॥ अत्र वचनस्वारस्येनारुणोदयादारभ्यापरसूर्योदयपर्यंतत्वरूपं संपूर्णत्वं प्रती
यते तथापि न प्रकृते तद्या विवक्षितं किंतूदयद्वयमात्रव्यापित्वरूपमेव॥ अन्यथा परतो द्वादशी न चेदिति
द्वादशीक्षयोक्तिरसंगता स्यात्॥ अरुणोदयमारभ्य प्रवृत्ताया: परेद्दिने॥ एकघटिकासत्वे पंचघटिका
त्मकतिथिवृद्ध्येकनियतं॥ तावत्याच परमवृद्धौ तदुत्तर आकस्मिकह्रासस्य ज्योतिःशास्त्रप्रसिद्धः॥ उ
दयात्प्राचीनमुहूर्तद्वययुताया: संपूर्णत्वाभिधानं तद्दर्शितदशमीयुक्ताया वैष्णवानामरुणोदयवे १४३

प्रवृत्ताया: परेद्दिने एकघटिकासत्वे पंचघटिकात्मकतिथि ध्वस्यत्याज्यत्वं ज्ञापयितुं प्रकृते तस्य कश्चिदुपयो नतु
ग इति॥ एतेन नव्यकालतत्वविवेचने॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरुत्तरतः कार्या परतो द्वादशी
यदि॥ उभयवृद्धौ सर्वेषां परत्रोपवासविधानपरयोर्गुरुनारदवचनयोरुदयात्प्रागिति पारिभाषिकमेव सं
पूर्णत्वं न तु द्वयमात्रव्यापित्वमित्युक्तं॥ उदयात्प्रागित्युपक्रम्य पुनः प्रभातसमय इति गारुडवचने हेमाद्र्या
युक्तोदाहरणसंभवो यथोक्त एव सर्वेष्वुक्तः॥ अनुपदमेव वैष्णवानां शुद्धाधिकायामनधिकद्वादशिकायां
संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी॥ द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणमिति॥ माधवोदाहृत
नारदवचनमुदाहृत्य माधवानुसार्येव निर्णयः कृतः संपूर्णा चात्रयोदश्यां प्रागिति परिभाषिते त्वधिकं
स्वयं व्याख्यातं तदयास्तु पूर्वापरग्रंथविरोधता दृष्टोदाहरणस्यासंभवदुक्तिकत्वाच्च॥ तथा हि॥ उदयात्प्रा
गित्युपक्रम्य पुनः प्रभातसमय इति गारुडवचने सार्धद्वात्रिंशन्मुहूर्तपरिततमेकादश्या: कंठरवेणोक्त
मपि तादृशोदाहरणासंभवात्परित्यज्य सार्धत्रिंशन्मुहूर्तव्यापित्वं संपूर्णत्वं हेमाद्र्यादिभिरुक्तं तदेव
ह्वास्वयमपि तद्वचने तथैव लिखित्वा भृगुद्वितीयनारदवचनयोः संभवदुक्तिं किंचिदधिकत्रिंशन्मुहूर्त

व्याप्ति त्वापित्वरूपं संपूर्णत्वं परित्यज्य तादृशोदाहरणासंगवा यदि किंचिदधिकं द्वात्रिंशन्मुहूर्तव्यापित्वं रूपं संपूर्ण
त्वमुक्तमिति पूर्वापरग्रंथविरोधो माधवग्रंथमूलक एवेत्युपरम्यते॥ इति वेधरहितात्यैकादशीनिर्णीता॥
अथ स्मार्तत्वेन प्रसिद्धानामेकादशी निर्णीयते॥ साच द्विविधा शुद्धा सूर्योदये दशमीसत्वेन विद्धा च॥ त
त्र शुद्धा चतुर्धा एकादशीमात्राधिका उभयाधिका अनुभयाधिका चेति॥ तत्रैकादशीमात्राधिक्ये पूर्वेद्युरुप
वास उक्तः॥ स्कांदे॥ प्रथमेहनि संपूर्णा व्याप्याहोरात्रसंयुता॥ द्वादश्यां तु तथा तात दृश्यते पुनरेव च॥ पूर्वा
कार्या गृहस्थैश्च यतिभिश्चोत्तरा विभो॥ इति॥ अत्र गृहस्थ यति पदे सकाम निष्काम परे तथा च मार्कंडेयः॥ सं
पूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेदिति निष्काम गृहस्थस्य तू
त्तरेव निष्कामस्त्वगृही कुर्याद्युत्तरेकादशीं सदा॥ प्रातर्भवतु वा मा वा द्वादशी च द्विजोत्तमा इति कौस्कांदात्॥
ईदृशी विषये विष्णुप्रीतिकामो स्तु दिनद्वये प्युपवासः कार्यः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ लुप्य
ते द्वादशी तस्मिन्नुपवासः कथं भवेत्॥ उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैरिति वृद्धवसिष्ठोक्तेः॥ इदं चो
पवासद्वयं नैकाधिकारिणं प्रति विधीयते एकनिमित्तकोपवासस्यावृत्तेरयुक्तत्वात् किंतु मार्कंडेय १४२

त्र प्रभाते पुनरेव सा॥ तत्रोपोष्य द्वितीयातु परतो द्वादशी यदीति अनुभयाधिकातु पूर्वैवेत्य संदेह एव अत्राधिक्याना
धिक्ये सूर्योदयानंतरानुवृत्यननुवृत्तिरूपो बोध्ये नतु षष्टिघटिकोत्तरत्वतदभावरूपे॥ यत्तु माधवाचार्ये यातु॥ चतुर्वि
धवेधरहिता शुभैकादशी सा द्विविधा॥ आधिक्येन युक्ता तद्रहिता चेति॥ आधिक्यं च त्रिविधं॥ एकादश्याधिक्यं
द्वादश्याधिक्यं॥ उभयाधिक्यं चेति मैं त्रैविध्यमुक्तं त्रिष्वप्येतेषु पक्षेष्वरुणोदयमारभ्य प्रवृत्तां शुद्धामप्येकादशीं
परित्यज्यापरेद्युरुपवासः कार्य इत्युक्तं॥ तत्र च प्रथमभेदे संपूर्णैकादशी यत्र द्वादश्यां दृश्यगामिनी॥ द्वादश्यां
लंघनं कार्यं त्रयोदश्यां तु पारणं॥ एकादशी भवेत्पूर्णा परतः पुनरेव सा॥ तुल्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणं
एकादशी कला याप्यपायेन द्वादश्युपोषिता॥ उत्तरार्धं तद्दैवेति॥ नारदस्मृत्यंतर विष्णुरहस्य रचनैर्हेमाद्र्यादिलिखि
ते रापपरे त्युक्तं॥ तदत्यंतायुक्तं॥ एतादृशतिथिद्वयानंतरदिने आकस्मिकः ह्रासस्य ज्योतिःशास्त्रप्रसिद्धे तिथ्या
दिपत्रेनुपलब्धेषु दृशाशुद्धाधिकानधिकद्वादशिकोदाहरणस्य गगनकुसुमायमानत्वात्॥ वचनानां का गति
रिति चेत् शृणु॥ प्रथमेह्नि संपूर्णा व्याप्याहोरात्रमास्थिता॥ द्वादश्यां च तथा तात दृश्यते पुनरेव च॥ पूर्वा कार्या गृ
हस्थैस्तु यतिभिश्चोत्तरा विभो इति स्कांदवाक्ये कथ्यते यापुक्त नारदादिवचनेषु॥ संपूर्णसमुदयद्वयम्

वचनात्सकामनिःकामाभ्यांतत्रसकामेनपूर्वानिष्कामेनोत्तरेतिकेचिन्नद्वंद्वसमानार्थकेनतिथि इत्येकविशेषणेत
रेतरयोगस्यप्रतीतेर्विष्णुप्रीतिमुक्त्याधिकार्यंतरश्रवणाच्चैकेनाधिकारिणेतरतयुक्तंतिथिद्वयमुपोष्यंआद्य
निश्चावाचनिकीतिपरेशुद्धायाद्वादशीमात्राधिक्येपिपूर्वैवघुरूपवासउक्तः॥स्कांदे॥शुद्धायदासमाहीनासस
माहीनाधिकोत्तरा॥एकादशीमुपवसेन्नशुद्धांचैवत्वीमबीतिशुद्धैकादशीयदासमान्यूनावाभवतिउत्तराद्वा
दशीसमान्यूनाधिकावाभवतुतदैकादशीमुपवसेन्नतुवैष्णवीद्वादशीमित्यर्थः॥एवंचनवैकादशीविष्णौ
द्वादशीपरतस्थिता॥उपोष्यैकादशीतत्रयदिच्छेत्परमंपदमितिनारदवचनमप्येतदेकवाक्यतयाएतद्विषय
येवयत्तुयदिच्छेदित्यर्थवादमात्रंनतुमुमुक्षूणांपूर्वोपवासविधायकं॥नेषांमुत्तरत्रोपवासस्यैवसर्वत्रविध
नेनतदनौचित्यादितिकालतत्वविवेचनेनान्याः॥तन्चिंत्यंमुमुक्षूणांविधानधिकायामेवपरत्रोपवासस्य
दिनक्षयेतुशुद्धेवद्वादशीमोक्षकांक्षिभिः॥उपोष्यदशमीविद्धानोपोष्यैकादशीसदा॥ममुमुक्षुभिर्दशाविद्धा
नोपोष्यैकादशीतिथिरित्यादिवचनेविधानात्तेनयदीच्छेदित्यस्यार्थवादत्वेप्युक्तोदाहरणेवैष्णवातिथि

रिक्तानांमुमुक्षूणांमपि तेषां पूर्वोपवासविधानमेवयुक्तं शुद्धायामुभयाधिक्ये तु परेह्न्येवमुपवासः पूर्णाप्ये
कादशीत्याज्यावर्धते द्वितीयं यदीति स्कांदात्॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ पूर्वैवोत्तरा कार्या परतो
द्वादशी यदीति नारदीयाच्च॥ यत्तु॥ विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत्॥ अविद्धापि च विद्धा स्यात्पर
तो द्वादशी यदीति पाद्मवचनं तत्सर्वं वैष्णवविषयं वक्तुं शक्यं॥ तेषां विद्धाया निषेधात्॥ नापि स्मार्त्तविषयं॥ शुद्धा
महासमाहीनेत्यादिवचनविरोधात्॥ किंतु पूर्वार्धस्य स्मार्त्तान्प्रति प्रवृत्तौ बाधकाभावेन तदेकवाक्यतया वर्ध
ते द्वितीयं यदीति पूर्वोक्तवचनैकवाक्यतया चत्ता प्रत्येवो भाव्यः अथ विद्धापि पूर्ववद्वेधचतुर्थ्यां तत्र विद्धैका
दशीमात्राधिक्ये विद्धायामेवोपवासः॥ तथाच प्रचेताः॥ एकादशी विद्धा वै वृद्धौ कुले विशेषतः॥ उत्तरां तु यतिः
कुर्यात्पूर्वामुपवसेद्गृही इति इदं च विशेषात् शुद्धाविद्धा तुल्यमिति माधवः॥ यत्तु॥ संपूर्णैकादशी यत्र प्रभा
ते पुनरेव सा॥ उत्तरां तु यतिः कार्यात्पूर्वामुपवसेद्गृहीत्याद्यनेकवाक्यैकवाक्यतया प्रचेतोवचनं शुद्धवि
षयमेवेति कालतत्त्वविवेचनकारो माधवमतं दूषयित्वा स्वयमनंतभट्टमदनरत्नानुसारी वैष्णवनिर्णयः कृ
तः स च द्वादशीमिश्रिता कार्या सर्वत्रैकादशी तिथिः॥ द्वादशी च त्रयोदश्यां विद्यते यदि वा न वा॥ तथा॥ सर्व १४४

धिकारिभेदेनापि प्रवर्त्तते तर्ह्येकाधिकारिणां स्मार्त्तप्रति शुद्धाविद्धासाम्ये न माधवोक्तं प्रचेतो वाक्यं किमिति शुद्धावि
षयमेव व्याख्यातमिति विद्वद्भिरालोचनीयमिति तस्मात्प्रचेतोवचनात्पूर्वेति माधवोक्तिः॥ पाद्यादिवचनैरुत्तरैत्य
नंतभट्टमदनरत्नव्योक्तिस्वाद्युक्ते त्रिविधैकादशीमात्राधिक्यं किंचिदुच्यते॥ सर्वत्रैकादशी कार्या दश
मीमिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यस्मिन्नित्यमुपोषण॥ पारणमिति कालादर्शमदनरत्नयोः ऋष्यशृंगवचनं
प्रातर्द्वादशीदिने एकादशी भवतु मा वेत्यर्थकं॥ एकादशी यदा विद्धा द्वादशी च क्षयं गता॥ दशमीमिश्रिता त
त्र उपोष्या स्यान्मुनिसत्तमेति॥ कालादर्शे धृतवायुपुराणीयं च विधोपवासविधानं विनानर्थकं॥ यत्तु॥
दिनक्षयमस्ते देवि नोपोष्या दशमीयुता॥ सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी॥ इति अनंतभट्टहेमाद्रि
धृतपद्मपुराणवचनं दिनक्षयातिरिक्त दशमीविद्धाया मुपवासनिवृत्तिं विनानर्थकमिति विरोधप्रसक्तौ ॥१४५॥
व्यवस्थैवं कार्या दशमीविधायकं वचनं पुत्रवद्गृहस्थानां नोपोष्या दशमीयुतेति निवर्त्तकं पुत्रवद्गृहस्था
नां यतीनां च॥ दशम्यनुगता यत्र तिथिरेकादशी भवेत्॥ तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेत्॥ तथा॥
उदयोपरि विद्धा तु दशम्येकादशी यदि॥ दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः॥ दशमीशेषसंयुक्तां गांध

र्यां समुपोषिता॥ तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्॥ ये कारयंति कुर्वंति दशम्येकादशीयुतं॥ आलोक्य तन्मु
खं ब्रह्मन् सूर्यदर्शनमाचरेदिति॥ तथा॥ एकादशी दशाविद्धा परतोपि न वर्धते॥ यतिभिर्गृहिभिश्चैव सैवोपोष्याद्वि
येतिथिरिति अनेकवाक्यैकवाक्यत्वात्॥ अत्र दिनक्षयः सूर्योदयन्यूनत्वरूप एव दिनत्रयम्स्ते देवीति माधवादिधृ
तपाठात्॥ यद्यपि दिनत्रयम्स्तेति पर्युदासात्साम्यपरा प्राप्ता तथापि अविद्धानिषिद्धश्चेन्नत्वभ्यते द्विनिहु॥ मुहूर्तैः
पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिरिति ऋष्यशृंगेण साम्येपि विद्धा ग्राह्यताया उक्तत्वात्॥ मुहूर्तपंचकं चारुणोदय
मारभ्य ज्ञेयं सूर्योदयमारभ्य ग्रहणे तु त्रिमुहूर्ताधिकक्षयाभावाद्द्वितीयदिने एकादश्यवश्यंभावेनाविद्धालाभ
स्यासंभव एव॥ एवं चौदयिकत्रिमुहूर्तदशम्युत्तरं प्रवृत्ताया एकादश्यास्त्रिमुहूर्तक्षीणायाः सूर्योदयसाम्यमे
व भवतीति तन्मुहूर्तपंचकनियमोपि सार्थको अन्यथा वैयर्थ्यं स्यात्॥ नत्वेकादश्यां दिनक्षये उपवासं करोति यः॥
तस्य पुत्रविनाशः तिमघायां पिंडदो यथेति पिंडदस्य आदंतान्येकवचने आतो धातोरित्याकारलोप इति मदनः॥ क्व
चित्तु पिंडतोय यथेति पाठः॥ दिनक्षये तु संप्राप्ते नोपोष्या दशमीयुता॥ यदि छेत्तु त्रपौत्राणां म्रधिं संपदमात्मन इ
त्यादिषु उपवासदिने निषेधात्॥ सैवोपोष्येति विधानाद्विहितप्रतिषिद्धत्वात् विकल्पापत्तिरिति चेन्न॥ एकादशी
प्रकरणपाठसमानानि निषेधा प्रायशः पर्युदासा एवेतु द्विरक्षय तितदापत्तिविरहात् तत्र एषु दशमीविधानि

षेधेषु॥अज्ञानाद्य दिवा मोहात्कुर्वन्भिका दशीं नरः॥ दशमीशेषसंयुक्तां प्रायश्चित्तमिदं चरेत्॥ इति प्रायश्चित्तान्मादंते पुनः
फलतो निषाद्ध्यातत्त्वतः पूर्वं दासाए वयेत्तु दिनक्षयनिषेधास्ते पर्युदासा एव उपवास निषेधेनु प्रसक्तं विचिंत्य क
ल्पयेत् नतु ध्यत्तु पवासेन उपवासफलं लभेदिति वायवीयेन सामान्यतः अभिधानाम त्वाभेतु पयोदधिफलानितु॥
सकृदेवा समश्नीयादुपवासस्त्व सोभवेदिति ऋष्यशृंगवचने नविशेषतश्च सामान्यूनत्वरूप दिनक्षये सहृयनि
यमकरणात्त्रयानितु एकादश्यां यदा वत्स दिनक्षयतिथिर्भवेत्॥ अत्रोपोष्यो द्वादशी स्यात्त्रयोदश्यां तु पारणं॥
एकादश्यां यदा ब्रह्मन्नू दिनक्षय तिथिर्भवेत्॥ तदाह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्॥ तथा॥ दिनक्षये तु सं
प्राप्ते नोपोष्या दशमीयुता॥ उपोष्य द्वादशीं शुद्धां त्रयोदश्यां तु पारणं॥ इत्यादीनि पितामह गोभिल भविष्यपु
राणवचनानि तानि दिनक्षये तु शुद्धैव द्वादशी मोक्षकांक्षिभिः॥ उपोष्य दशमी विद्धानोपोष्ये का दशी सदे
ति सुमंतु सत्यव्रत वचने कवाक्यतया मुमुक्षुपराणि॥ एतेन पुत्रवत् गृहस्थ परत्व मेतेषां क्षयश्चात्र न्यूनतु र
पसाम्येलु पुत्रघता मपि पूर्वदिन एवोपवास निषेध प्रवृत्यात त्ता पेक्षस्य द्वादश्यु पावास विधेरप्य प्रवृ
तेः॥ अत एव भविष्यत्पुराणे॥ एकादशी कलाप्येका परतो न च विद्यते॥ गृहिभिः पुत्रवद्भिश्च सैकोपोष्या

त्रैकादशी याह्यद्वादशी मिश्रिता नरैः॥ प्रातर्भवतु वा मा वा यतो नित्यमुपोषणं॥ उपोषणस्य प्राधान्यादत्य कालावधिन्नै
कादशीतत्र मुख्य पारणं लंगं तत्र द्वादश्यपि स्तिवेत्सम्यगेव नो चे त्रयोदश्यामेव तत्कार्यमित्यर्थः॥ द्वादश्येकादशी यत्र
संगता त्रिदशाधिप॥ ता उपोष्य ततः कार्यं त्रयोदश्यामेव तत्कार्यमित्यर्थः॥ द्वादश्येकादशी यत्र संगता त्रिदशाधिप॥
तु पारणं॥ एकादशी कला यत्र परतो द्वादशी भवेत्॥ तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणं॥ परत एकादशी कलोत्तरं॥
परत एकादशी कलोत्तरं॥ एकादशी द्वादशी च रात्रिशेषे त्रयोदशी॥ उत्तरार्धं तद्वेव इत्यादि पाद्म नारदस्कंद कौर्मादि
वचनैर्विधाधिकानधिक द्वादशी कायामुत्तरत्रैवोपवास इत्येवं रूप इति तद्विवेत्यं॥ यतः संपूर्णैकादशी यत्र द्वाद
श्यां वृधिगामिनी॥ द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणं॥ येकादशी कला प्रायेन द्वादश्यु पोषिता॥ तु
ल्यं क्रतु शतस्योक्तं त्रयोदश्यां तु पारणं॥ एकादशी कलाप्येका द्वादशी सकलं दिनं॥ त्रयोदशी उषः काले वैष्ण
वं तद्दिन त्रयं॥ सर्वपापहरं प्रोक्तं तदुपोष्यमिति स्मृतं॥ इत्यादीनि एकादशी मात्राधिक्ये वैष्णव विषयत्वेन स्व
यं माधवाप्रिस्वलिखितानि तदेकवाक्यतया द्वादशी मिश्रिते युक्तानि सर्वाणि शुद्धा विषयाण्येवेति कथं विद्धाधि
कायां स्मार्तपरतया योजयितुं शक्यानि यदि लेता विद्धाधिकायां स्मार्तानां विद्धशुद्धाधिकायां वैष्णवाना मित्य

तद्दा तिथिरिति न व्योक्तिः॥ परास्ता कलशिष्टाचारविरोधात्॥ साम्ये पूर्वा क्षयापरेत्यनौचित्याच्च॥ यत्तु पद्मे॥ एकादशी
दशाविद्धापरतो न च वर्धते॥ यतिभिर्गृहिभिश्चैव नैवोपोष्या क्षयेतिथिरिति॥ पुत्रवद्गृहस्थानां यतीनां चोभयविधे
क्षये पूर्वविद्धोपवासो उपोष्यलकमेवेति एवं च यानि विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत्॥ त्रयोदश्यां न लभ्ये
त द्वादशी यदि किंचन॥ उपोष्यैकादशी तत्र दशमीमिश्रितापि चेतिस्मृत्यंतरपाद्मस्कांदादिविद्धानुग्रहवचनानि ता
नि पुत्रवद्गृहस्थानामेव पूर्वविद्धोपवासे उपोष्यलकानीति सर्वेषामविरोधः तस्माद्विद्धैकादशीमात्राधिक्ये पुत्रव
द्भिन्नगृहस्थानां पूर्वा पुत्रवतां तेषां यतीनां च परेति सिद्धं॥ विद्धायां द्वादशीमात्राधिक्ये तु सर्वेषां परेद्युरेवोपवा
सः॥ उपवासदिनं विद्धं यदा भवति पूर्वया॥ द्वितीयेन्हि यदा लभ्या तत्र त्याज्यैकादशी तिथिः॥ तत्रोपवासो विहि
तः कथं तद्वद सूतज॥ सूत उवाच॥ यदा न प्राप्यते विप्रा द्वादश्यां पूर्ववासरः॥ रविचकार्धमात्रापि तदोपो
ष्यं परं दिनं॥ उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणं॥ निर्गता चेत्त्रयोदश्यां कृत्ला बाह्निकलापिवेति हेमाद्रौ
नारदीयात्॥ एकादशी यदा लुप्ता परतो द्वादशी भवेत्॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति तत्रैव
ब्रह्मवैवर्तव्यासवचनाच्च लुप्तादिनद्वये सूर्योदयानस्पर्शे क्षयं गता यदीच्छेत्यर्थवादमात्रमिति हेमाद्याद

यो बहवः मदनस्क परमां गतिं मुक्तिमिति व्याख्यायैतानि वचनानि मुमुक्षुविषयाण्येवेत्युक्तं प्रकृते अविद्धानि
निषिद्धैश्चेन्नलभ्यंते दिनानि तु मुहूर्तैः पंचभिर्विद्धा ग्राह्यैवैकादशी तिथिः॥ मुहूर्तैकमरुणोदयमारभ्य
ग्रहणे तत्तरदिने एकादश्याभावकथनं नोपपद्यते॥ सर्वत्रैकादशी कार्या दशमीमिश्रिता नरैः॥ प्रातर्भवतु
वामावायतो नित्यमुपोषणं॥ मिति ऋष्यश्रृंगवचनात्पूर्वेद्युरेवोपवासः॥ प्रातस्त्रयोदश्यां द्वादशी भवतु
मावेत्यर्थ इत्याह तदप्युक्तं॥ एकादशी यदा विद्धा द्वादश्यां न्नप्रतीयते॥ द्वादशी च त्रयोदश्यामस्ति तत्र कथं भ
वेत्॥ उपोष्या द्वादशी शुद्धा सर्वैरेव न संशयः॥ इति बृहन्नारदीय॥ सर्वेषां शुद्धद्वादश्यां उपवासविधाना
त् अविद्धानि निषिद्धैश्चेति तु विद्धासमन्यूनद्वादशिकायां सावकाशकं मुहूर्तपंचकनिर्णयोऽपि साम्य एव
सार्थका नान्यथा॥ यत्तु तेनैव सर्वत्रैकादशी वचनं प्रातः प्रातः स्त्रयोदश्यां द्वादशी भवतु मावेत्येवं प्रारभ्यायैत
त्परतया योजितं तदप्ययुक्तं दशमीमिश्रितैकादशीत्युक्ते तद्व्यवहितोत्तरः॥ प्रातःकालस्यैव प्रातः पदात्प्रतीती
ते अप्रकृत द्वादशीपदस्य कर्तृत्वकल्पनामपेक्ष्य प्रकृतैकादशीपदस्यैव नत्वोद्धित्याच्चेति॥ एतेन दशमीविधे
प्रातः संकल्पकाले एकादशी भवतु वामा वाऽथ उपोषणस्य नित्यत्वात्तत्रोपोषणं कार्यमिति पिकस्य विद्धाख्या १४७

दिष्टत्वं बोधायनवचने कंठरवेणोभयानाधिक्यएव दशमीयुतायाविधानात्॥ परेपरदिवसेत्रयोदश्यामितियावद्दिन
त्रयात्मके दिवनोपोष्यादशमीयुता॥ सैवोपोष्यासदापुण्यापरतश्चेत्त्रयोदशीतिसर्वनिबंधधृतपूर्वोदाहृतवचनाच्च॥ अ
त्र दशम्येकादशीद्वादशीद्वादश्येवदिनत्रयेनत्वेकादशीद्वादशीत्रयोदशीतित्येवंरूपं यदि दैवात्तित्यादिवचनैक
वाक्यत्वात्सैवेतिनच्छेदेनसावैष्णवेदनीइत्यत्रतापविष्टपयस्तइदिदिनत्रययुतदशमीविद्धायाएवपरामर्शेनतुद
शमीविद्धामात्रस्य परतश्चेत्त्रयोदशीत्यनेन द्वादश्याभावःकथितःतथाचउभयानधिकाविद्धैवोपोष्येति फलि
तार्थः अत्रएवचकलोद्देयमितियत्सैवोपोष्येत्ययमेवविधिर्नैवोपोष्यादशमीयुक्तेत्यनुवादोनगिरागिरेति
ब्रूयादितिवत्नवनतस्त्रिंशदितिब्रूयात्षष्टिंशतिरित्येवब्रूयादित्यत्रएवकारेणविधिशक्तिप्रतिबंधान्न
षष्टिंशतिरितिविधिःकिंतुनचतुस्त्रिंशदितिनिषेधएवमत्रापिसैवोपोष्येत्यनुवादोनोपोष्यादशयुतेति
निषेधइतिवाच्यं॥ तथासति परतश्चेत्त्रयोदशीत्यस्यव्यवहितान्वयापत्तेः ममतुसैवोपोष्येत्यनेनैवान्वयइति
दिक्॥ अयंचोभयोःपक्षयोःनित्योगृहस्थातिरिक्तस्यतस्यतुशुक्लायामेवांतथाचकौर्मे॥ एकादश्यांनभुंजी
तपक्षयोरुभयोरपि॥ वनस्थयतिधर्मोयंशुक्लामेवसदागृही॥ विष्णेतु ब्रह्मचारीचनारीचेतितृतीयपादउ १८

क्तःब्रह्मचारीसाहचर्यान्नारीविधवासधवायास्तुभर्त्राज्ञोपाधिरपरिभाषायांप्रतिपादितःशयनीबोधन्यंतर्गता
तु कृष्णापिग्रहीणीउपोष्यातदुक्तंमदनरत्नेस्मृत्यंतरे॥ शयनीबोधनीमध्येयाकृष्णैकादशीभवेत्॥ सैवोपोष्यागृह
स्थेननान्याकृष्णाकदाचनेति॥ नान्याकृष्णेतिनिषेधःप्राप्त्यभावात्॥ किंतुनांतरिक्षेनदिवीत्यादिवादद्द्युवादएवेतितच्च
पुत्रगृहविषयंपुत्रवत्कृष्णनिषेधात्सक्तानामुपवासंचकृष्णैकादशीवासरे॥ चंद्रसूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृहीतिनारदो
क्तेः॥ आदित्येहनिसंक्रांतौग्रहणेचंद्रसूर्ययोः॥ पारणंचोपवासंचनकुर्यात्पुत्रवान्गृही॥ तत्प्रयुक्तस्योपवासस्यनिषेधेय
मुदाहृतः॥ प्रयुक्तस्यंतरप्रयुक्तस्यनविधिर्ननिषेधनमितिजैमिनिःस्मृतेश्चेति॥ अत्रअधिकार्युक्तःकात्यायनेन॥ अष्टव
र्षाधिकोमर्त्योह्यशीतिन्यूनवत्सरः॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति॥ अष्टवर्षाधिकइत्युपनयनोत्तरत्वस्यो
पलक्षणं अपिवादेदतुल्यत्वादुपायेनप्रवर्तेरन्निति षष्ठंस्थापितत्वादितित्तानवरणा अयंचोपवासःप्रातःसंकल्प्यःका
र्यः॥ तथाचदेवलः अभुक्त्वाप्रातराहारंस्नात्वाचम्यसमाहितः॥ सूर्यायदेवताभ्यश्चनिवेद्यव्रतमाचरेत्॥ एतद्व्याख्यानं
परिभाषायांद्रष्टव्यंतथा॥ एकादश्यांनिराहारोभूत्वाहमपरेहनि॥ भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत॥ सप
वादशम्येकभक्तस्त्मांसमैथुनवर्जितः एकादश्यामुपवसेत्पक्षयोरुभयोरपीति॥ एतच्चकर्मत्वादिपमाकाम्यैका
दशीपरासायंमाधंतयोरन्होसायंप्रातश्चमध्यमोनुपवासफलंप्रेप्सुर्जह्याद्भक्तचतुष्टयं॥ अथनित्योपवासीचे

त्सायंप्रातर्भुजिक्रियां॥ वर्जयेन्मतिमान्विप्रः संप्राप्ते हरिवासरे॥ इति विष्णूक्तेः॥ ब्रह्मवैवर्तेपि॥ इति विज्ञाय कुर्वीत वश्य
मेकादशीव्रतं॥ विशेषनियमासक्तो होरात्रं भुक्तिवर्जित इति॥ कात्यायनोपि॥ शक्तिमांस्तु पुनः कुर्यान्नियमं सवि
शेषतेणमिति ब्रह्मवैवर्ते॥ प्राप्ते हरिदिने सम्यक् विधाय नियमं निशि॥ दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतं॥
देवलः॥ गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः॥ उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्बुधः॥ औदुंबरं ताम्रमयं यथासं
कल्पयेत्तथा॥ क्वासं संफलमुल्लिखेदित्यर्थः॥ कात्यायनः॥ अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितं॥ उपवासफलं
प्रेप्सुः पिबेत्पात्रगतं जलं॥ कपालवेधे तु विशेषो नारदीये॥ दशम्यां संगदोषेण अर्धरात्रात्परेण तु॥ वर्जयेच्चतुरो या
मान्संकल्पार्चनयोस्तदा॥ विद्धोपवासेन श्वस्तु दिनं त्यक्त्वा समाहितः॥ रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेत्॥
भुजाप्रकारश्च ब्राह्मे॥ एकादश्यामुभयपक्षे निराहारः समाहितः॥ नानापुष्पैर्मुनिश्रेष्ठ विचित्रं मंडपं शुभं॥ स्न्वलेति विशे
षः॥ स्नात्वा सम्यग्विधानेन सोपवासो जितेंद्रियः॥ संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः॥ पुष्पैर्गंधैस्तथा धूपैर्दी
पैर्नैवेद्यकैः परैः॥ उपचारैर्बहुविधैर्जपहोमप्रदक्षिणैः॥ स्तोत्रैर्नानाविधैर्दिव्यैर्गीतवाद्यमनोहरैः॥ दंडवत्प्रणिपातै
श्च जयशब्दैस्तथोत्तमैः॥ एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरं॥ याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः॥ इति
विशेषोप्यहन्नारदीये॥ पंचामृतेन संस्नाप्य एकादश्यां जनार्दनं॥ द्वादश्यां पयसा स्नाप्य हरिसारूप्यमश्नुत इति॥ १८२

नमाप्तं विद्धोपवासेन सकलं दिनं त्यक्त्वा समाहितः रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेदिति नारदीये विद्धोपवासे रा
त्रौ संकल्पस्योक्तत्वेन प्रातःकाले संकल्पासंभवाद्व्युत्क्रमकालतत्त्वविवेचनेन व्यैरिदमेव वचनं ऋष्यशृंगनाम्नानु
क्तैवयत्तु समयद्योतेद्रत्येवलिखित्वा उक्तप्रकारेण च तदीय व्याख्यां दूषयित्वा स्वारसिक व्याख्यानं चैकादशीमा
नाधिक्ये विद्धायामुपवासः स्यात्स च बहुवचनविरुध इति हेमाद्र्यादि सकलनिबंधेषु हष्टा सर्वत्रैकादशी कार्या
द्वादशीमिश्रिता नरैरित्येवरूपमेव तद्वचनमिति दशमीमिश्रितेति पाठोपलयितं तदयुक्तं प्रामाणिकतर काल्ला
दर्शमदनरत्नादिषु ऋष्यशृंग नाम्नालिखितस्यापालयितुमशक्यत्वात्॥ गतिस्तु पूर्वमुक्तैवेति बोते
दिक विद्धायामुभयाधिक्येपि सर्वैः परैव कार्या सूर्योदयनिषेधस्य स्मार्तमात्रत्वेव प्रवृत्तेः शुद्धायामुभयाधिक्ये प
रायाउक्तत्वाद्द्वादश्यां ताद्दश्यां केसुतिकंन्यायाच्च॥ विद्धायामनुभयाधिक्ये तु विशेषो पोष्यायदि दैवात्तु संस्पृश्ये
देकादश्यां तिथित्रयं तत्र क्रतुशतं पुण्यं पारणी द्वादशी भवेदिति नारदवचनात्॥ द्विस्पृगेकादशी यत्र तत्र संनिहि
तो हरिः॥ तामेवोपवसेत्कामामकामो द्विष्णुतत्परमिति कौर्माच्च विष्णुद्वादशी तथा द्वादशीतः परो दशमीविद्धामु
पवसेदिति फलितं॥ एकादशी द्वादशी च क्षयेयदि दिनत्रयं॥ नद्वादशी परे चैव कर्तव्या दशमीयुतेति हेमाद्री

सूतकादौ वाराहे॥ सूतके च नरः स्नात्वा प्रणम्य मनसा हरिं॥ एकादश्यां न भुंजीत व्रतमेवं न लुप्यते॥ मृतकेपि न भुंजीत एका
दश्यां सदा नर इति॥ स्त्रीणां रजोदर्शनेप्याह माधवीये ऋष्यशृंगः॥ संप्रवृत्तेपि रजसि न त्याज्यं द्वादशीव्रतमिति॥ एकाद
श्यां श्राद्धप्राप्तावाह॥ माधवीये स एव॥ उपवासो यदा नित्यः श्राद्धं नैमित्तिकं यदा॥ उपवासं तदा कुर्यादाम्नाय पितृसे
वितं॥ इति॥ उपवासासामर्थ्ये त्वाह॥ तत्रैव मार्कंडेयः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन दानेन न निर्द्वा
दशिको भवेत्॥ हेमाद्रौ पुराणे॥ उपवासासमर्थश्चेदेकं विप्रं तु भोजयेत्॥ तावद्धनानि वा दद्याद्भुक्तश्चेद्द्विगुणं तथा॥
सहस्रसंमिता देवी जपेद्वा प्राणसंयमान्॥ कुर्याद्द्वादशसंख्या वा यथाशक्त्या व्रती नरः॥ इति॥ अदत्वा भुक्तश्चेद्दि
ति शेषः॥ व्रताकरणे प्रायश्चित्तं स्मृत्यंतरे॥ अर्कपर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा॥ एकादश्यामहोरात्रौ भुक्त्वा चांद्राय
णं चरेदिति॥ ॥इति श्रीमीमांसकभट्टनीलकंठभट्टात्मजभट्टशंकरकृतौ व्रतार्के एकादशीनिर्णयः॥ एवमेकादशीव्रतं
विधाय द्वादश्यां पारणं कार्यं॥ कात्यायनः॥ द्वादश्यां पारणं कुर्याद्वर्जयित्वा हरिपोदकीं॥ हरिपोदकी घृतिका॥ योऽयं महारा
ष्ट्रभाषया प्रसिद्धा॥ तथा॥ प्रातः स्नात्वा हरिं पूज्य उपवासं समर्पयेत्॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसद सु
मुखो नाथ ज्ञानदृष्टिप्रदो भव॥ पारणं तु ततः कुर्याद्यथासंभवमार्गत इति॥ यथासंभवत्वं च ब्राह्मणभोजनतद्दक्षिणादा

न बंधुसहितेषु॥ तथा च बृहन्नारदीये॥ ब्राह्मणान्भोजयेच्छक्त्या दद्याद्वै दक्षिणां तथा॥ ततः स्वबंधुभिः सार्धं स्वयं भुंजी
त वाग्यतः॥ इति॥ पारणं नैवेद्यतुलसीमिश्रितान्नेन कुर्यात्॥ तथा च स्कांदे॥ कृत्वा चैवोपवासं तु योऽश्नीति द्वादशीदिने॥
नैवेद्यतुलसीमिश्रं हत्याकोटिविनाशनमिति॥ तच्च द्वादशीमध्य एव कार्यं॥ महाहानिकरी ह्येषा द्वादशी लंघिता नरैः॥ क
रोति धर्महरणमस्नातेव सरस्वती॥ पाद्मे॥ द्वादशीलंघने दोषस्मरणात्॥ अस्नाता लंघिता सरस्वती यथा धर्महरति तथोप
वासे लंघिता द्वादशीति॥ तेन सरस्वत्यां स्नात्वोत्तरणं॥ नद्यंतरे तु तीर्थस्नानमित्युक्तं भवति॥ अल्पायां द्वादश्यामरुणोद
य एव माध्याह्निकादि कृत्वा पारणं कार्यं॥ कलाद्वयं त्रयं वापि द्वादशी यत्र दृश्यते॥ स्नानार्चनादिकं कर्म तदा राधो वि
धीयते॥ अल्पायामथ विप्रेंद्र द्वादश्यामरुणोदये॥ स्नानार्चनक्रियाः कार्या जपहोमादिसंयुताः॥ यदा भवेदतीवाल्पा
द्वादशी पारणादिने॥ उषःकाले द्वयं कार्यं प्रातर्माध्याह्निकं तदेति स्कांद नारदपद्मवचनेभ्यः॥ रात्रिशेषे वारुणोदयप
रः॥ होमश्चात्र स्मार्त एव एतेन श्रौतः॥ स्मृत्या श्रौतकालबाधायोगात्॥ भूयस्यामपि द्वादश्यां मध्याह्नस्यापकर्षं कृत्वा प्रा
तरेव पारणा कार्या॥ सर्वेषामुपवासानां प्रातरेव हि पारणमिति स्मृतेः॥ भोजनमाध्याह्निकयोश्च वाचनिकक्रमसद्भा
वात्॥ अत्र हरिवासरस्वरूपं तद्वर्जनं चोक्तं॥ विष्णुधर्मे॥ द्वादश्याः प्रथमः पादो हरिवासरसंज्ञितः॥ तमतिक्रम्य कर्तव्यं
पारणं विष्णुतत्परैरिति॥ आषाढभाद्रपदकार्तिकस्थशुक्लद्वादशीषु क्रमेणानुराधाश्रवणरेवती॥ संगमे न हि भोक्तव्यं

वै

मोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत ॥ एवं प्रभातसमये शुचिर्भूत्वा समाहितः ॥ पाखंडिनां सर्वेषां पतितानां च संगमं ॥ का
मं क्रोधं दर्पं पार्थ दूरतः परिवर्जयेत् ॥ स्नानं कृत्वा मंत्रपूर्वं नद्यादौ विमले जले ॥ तर्पयित्वा पितॄन् देवान् पूजयेन्मधुसूदनं ॥ उ
पलिप्य शुचौ देशे कीटकेशविवर्जिते ॥ वर्णैश्च सर्वतोभद्रं नीलपीतसितासितैः ॥ मंडलं चोद्धरेत् भूप सर्वकर्मसु पू
धु जितं ॥ अथवा तंदुलानां च अष्टपत्राम्बुजं चरेत् ॥ वारिपूर्णं घटं ताम्रपात्रं रौप्यसमुद्भवं ॥ जातरूपमयं देवं लक्ष्म्या युक्तं जना
र्दनं ॥ साक्षतं सोपवीतं च सहिरण्यं सवाससं ॥ अक्षमालासमायुक्तं शंखचक्रगदाधरं ॥ शक्त्या सुवर्णपुष्पैश्च पूजितं
पुष्टिवर्धनं ॥ अन्यैः कालोद्भवैः पुष्पैरर्चयेद्विधिवन्नरः ॥ नैवेद्यानि चतुर्विंशत्यथ दद्यादनुक्रमात् ॥ भक्त्या चतुर्विंशति
षु तिथिष्वपि परंतप ॥ इच्छया वा तदा दद्याद्देवोद्यापनं भवेत् ॥ मोदकान् गुडका[illegible]र्णान् घृतपूरकमंडकान् ॥ सो[illegible]लि
कादिकाः सारं सिद्धासक्रव एव च ॥ वटकान् पायसं दुग्धं शालिदध्योदनं तथा ॥ इंडिकान् पूरिकान् पार्थ अपूपान् गुडमो
दकान् ॥ तिलपिष्टं खंडपिष्टं सशर्करं ॥ रंभाफलं च सघृतं मुद्गचूर्णं गुडौदनं ॥ एवं क्रमेण नैवेद्यं दद्याच्चरमेहनि ॥ अथ
नामपूजानि ॥ दामोदराय पादौ तु जानुनी माधवाय च ॥ गुह्यं चैव कामपतये कट्यां वामनमूर्तये ॥ पद्मनाभाय नाभिं तु उ
दरं विश्वमूर्तये ॥ हृदयं ज्ञानगम्याय कंठं श्रीकंठसंगिने ॥ सहस्रबाहवे बाहू चक्षुषी योगयोगिने ॥ ललाटं मरुगायेति
नासिकं सुरेश्वरं ॥ श्रवणं श्रवणेशाय शिखायां सर्वकामदः ॥ सहस्रशीर्षाय शिरः सर्वांगं सर्वरूपिणे ॥ इति पूजा ॥ शुत्रो १५१

रि

न नारिकेलेन बीजपूरेण वा पुनः ॥ हरिं ध्यात्वा जगन्नाथं दद्यादर्घ्यं विधानतः ॥ साक्षतं च सपुष्पं च सजलं चंदनान्वितं ॥ द्
र्वांकिनैव मंत्रेण अनंतपूर्तिः करः सुधीः ॥ रात्रौ जागरणं कुर्याद्गीतशास्त्रविधानतः ॥ इष्टं दत्तं धरादानं पिंडो दत्तो गयाशिरे ॥ कृतं
दानं कुरुक्षेत्रे यैः कृतं जागरं हरेः ॥ नृत्यगीतं प्रकुर्वंते वीणावंशं तथैव च ॥ ये पठंति पुराणानि ते नराः कृष्णवल्लभाः ॥ शास्त्रे
र्वा पथ्यवा प्रयत्नात् शुचिर्वाप्यथ वाशुचिः ॥ कृत्वा जागरणं विष्णोर्मुच्यते पापकोटिभिः ॥ भुक्तो वाप्यथ वाभुक्तो जागरं समुप
स्थितः ॥ मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ यावत्पदानि स्वगृहात्केशवायतनं प्रति ॥ अश्वमेधसमानि स्युः जागर
र्थं प्रगच्छतः ॥ पादयोः पांसवस्तु कपिकाधारण्यानि पतंति यत् ॥ तावद्वर्षसहस्राणि जागरी वसते दिवि ॥ बहून्यपि च पापानि कृतं
जगरणं हरेः ॥ निर्दहेन्मेरुतुल्यानि युगकोटिकृतान्यपि ॥ मनसा संस्मरेद्देवं तां रात्रिमतिबाह्य च ॥ प्रभाते विमले स्नात्वा
विप्राणां कारयेत्क्वचित् ॥ चतुर्विंशतिसंख्याकान् विप्रानागमदर्शिनः ॥ सर्वं कुर्याद्विधानेन जपहोमार्चनादिकं ॥ शत
मष्टोत्तरं होमः सर्वत्रापि प्रशस्यते ॥ इदं विष्णुर्द्विजातीनां होममंत्रः प्रकीर्तितः ॥ शूद्राणां चैव सर्वेषां मंत्रमष्टाक्षरं विदुः ॥
विविधैरपि वस्त्रैश्च भोजनैरासनैः सह ॥ पादत्राणं नवां गां च दद्यात्सार्घ्यं पृथक् पृथक् ॥ द्वादशैव अथवा शक्तो वस्त्रालंका
रभूषणैः ॥ पूजयेत्पुष्पमालाभिः सपत्नीकान् द्विजोत्तमान् ॥ कुंभान् द्वादश दातव्यान् पक्वान्नजलपूरितान् ॥ भोजयित्वा त
तो विप्रान् भक्तितो विचरेत्ततः ॥ एकाहिकपित्ताधेनुः सर्वकामफलप्रदः ॥ यथास्वर्गश्च मोक्षश्च इह संपूर्यतां व्रते ॥

सपत्नीकोगुरुःपूज्यो मंडले हरिसंनिधौ॥ भूषणाच्छादनैर्भोज्यैः प्रणामैः परितोषयेत्॥ नमस्तेकपिलादेविसर्वकामा
र्थावतारिणि॥ मयादत्ताद्विजेंद्राय प्रीयतां मे जनार्दनः॥ समाप्यैवं व्रतं श्रद्धा दद्यात्सर्वं धनंजय॥ इष्टं वान्यद्यथा
शक्त्या वित्तशाठ्यविवर्जितः॥ अल्पदानं विशेषेण भूरिदानमतः परं॥ प्रार्थयेत्तु गुरुं साधी शांतं तो भक्त्या कृतांजलिः॥
मयाद्यास्मिन्व्रते देव यदपूर्णं कृतं विभो॥ सर्वं भवतु संपूर्णं त्वत्प्रसादाद्रमापते॥ प्रदक्षिणां ततः कृत्वा दंडवत्प्रण
त्य प्रभुं॥ मंडपं मूर्तिसंयुक्तं सोपहारं सदक्षिणं॥ प्रीयतां विष्णुरित्युक्त्वा आचार्याय निवेदयेत्॥ सर्वं विसर्जयेत्पश्चा
त्संभोज्य परितोष्य च॥ तदाज्ञया ततः कुर्यात्पारणं बंधुभिः सह॥ एकादशीव्रतं चैव यथाविधिकृतं पुरा॥ यौवना
श्वेन भूपेन कथितं पुरतस्तव॥ धनंजय तव प्रीत्या भक्तानुग्रहकारणात्॥ यः करोति नरो भक्त्या व्रतमेतद्धियापहं॥ स
याति वैष्णवं स्थानं दाहप्रलयवर्जितं॥ उक्तमुद्यापनं चैव शृणुष्व कुरुसत्तम॥ किमन्यैर्बहुभिर्वाक्यैः प्रशंसा परमे
भुवि॥ एकादश्यां परं तंत्रैलोक्ये नहि विद्यते॥ अत्र दानं तु गोदानं भूमिदानमथापि वा॥ गोरोमबीजमूलानां सम
संख्यं युगानि हि॥ दातारो विष्णुभवने [illegible]का दृश्यां वसंति हि॥ येपि शृण्वंति सततं कथ्यमानां कथामिमां॥ तेपि पा
पविनिर्मुक्ताः स्वर्गं यांति न संशयः॥ इत्याकर्ण्यार्जुनो वाक्यं कृष्णस्य परमाद्भुतं॥ अनंतं दंपरमं भक्त्या सौख्यं वापि
निरंतरं॥ ॥सूत उवाच॥ एवं प्रीत्या पुरा विप्राः श्रीकृष्णेन परं व्रते॥ महात्म्यं विधिसंयुक्तमुपदिष्टं विशेषतः॥ उ

१५२

द्वादश्यां द्वादशीं हरेरिति॥ मैत्राद्यपादे स्वपतीह विष्णुः श्रुतिश्च मध्ये परिवर्तते मे॥ पौष्णांत्यपादे प्रतिबोधमेति सुप्तिप्रबोधेप
रिवर्तमेव॥ वर्जमिति॥ भविष्यविष्णुधर्मोत्तरवचसां प्रमाणेपि नेहमाद्रिस्थे इत्याधुनिका बहवो लिलिखुः॥ तत्तु सर्वेषां हे
माद्रिदर्शनेनिबंधनं॥ यतो हेमाद्रौ विष्णुशयनपारणाविचारे हेमाद्रिनाम्नात्रैतल्लिखनं साहसमिति दिक्॥ अथैकादशी
व्रतोद्यापनं॥ अर्जुन उवाच॥ कीदृक् व्रतविसर्गोत्र विधानं वा च कीदृशं॥ संपूर्णं हि भवेद्येन तन्ममेवद कृपानिधे॥ श्रीकृ
ष्ण उवाच॥ शृणु पांडव यत्नेन प्रवक्ष्यामि तदव्ययं॥ शक्तः स्वर्णसहस्रं तु अशक्तः काकिनीमपि॥ ददाति श्रद्धया पार्थ समं
स्यादुभयोरपि॥ शक्तश्चेद्द्विगुणं दद्याद्यथोक्तो मध्यमो विधिः॥ उक्तार्थमप्यशक्तस्य दानं पूर्णफलप्रदं॥ तत्र तं वि
धिं भक्तस्य कथयामि तवाग्रतः॥ यावदिष्टकेन चूर्णेन व्रतानि कुरुसत्तम॥ विफलान्येव सर्वाणि उद्यापनविधिं विना॥
प्रबोधसमये पार्थ कुर्याद्धि उद्यापनक्रियां॥ मार्गशीर्षे विशेषेण माघे भीमतिथावपि॥ दशम्यां दिनशेषेण रात्रौ गु
रुगृहं व्रजेत्॥ एकादशीदिने प्राप्ते गुरुमभ्यर्च्य शक्तितः॥ गृहीत्वा चरणौ मूर्ध्ना प्रार्थयीत विचक्षणः॥ पुण्यदेशोद्भवं वि
प्रं शांतं सर्वगुणान्वितं॥ सदाचाररतं पार्थ वेदवेदांगपारगं॥ गुरुप्रार्थना॥ अस्मदीयं व्रतं विप्र विष्णुवासरसंभवं॥ संपू
र्णं तु भवेद्येन तत्कुरुष्व द्विजोत्तम॥ तस्याग्रे नियमः कार्यो दंतधावनपूर्वकं॥ एकादश्यां निराहारः स्थित्वा चैवापरेहनि॥

प्रतियः श्रृणोत्येवमेकादश्या द्विजोत्तम॥ भुक्त्वा भोगाननेकांस्तु विष्णुलोकं प्रयाति सः॥ ॥अर्जुन उवाच॥ उपवास
स्य नक्तस्य एकभक्तस्य किं प्रभो॥ किं पुण्यं किं विधानं हि ब्रूहि सर्वं जनार्दन॥ श्रीभगवानुवाच॥ हेमंते चैव संप्राप्ते मा
सि मार्गे तथा शुभे॥ शुक्लपक्षे तथा पार्थ उपोष्यैकादशी तिथिः॥ दशम्यां चैव नक्तं तु यत्किंचित्कृत दृढव्रतं॥ नक्तं च त
द्दिने कृत्वा दशम्यां दंतधावनं॥ दिवसस्याष्टमे भागे मंदीभूते दिवाकरे॥ तत्र नक्तं विजानीयान्न नक्तं निशि भोजनं॥ ततः प्रभा
तसमये संकल्पं नियतश्चरेत्॥ मध्याह्ने च तथा पार्थ शुचिः स्नानं समाहितः॥ नद्यां वाप्यां तथा कूपे उत्तमं मध्यमं त्वधः॥ क्रमाच्छ्रे
यं तडागे तु तदभावे प्रशस्यते॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे॥ मृत्तिके हर मे पापं यन्मया पूर्वसंचितं॥ त्वया हतेन पापे
न सर्वपापैः प्रमुच्यते॥ अनेन मृत्तिकास्नानं विदध्यात्तु व्रती नरः॥ नालपेत्पतितैश्चौरैस्तथा पाखंडिभिः सह॥ मिथ्यापवादि
नो देववेदब्राह्मणनिंदकान्॥ अन्यांश्चैव दुराचारानगम्यागमिनस्तथा॥ परद्रव्यापहारांश्च देवद्रव्यापहारकान्॥ न सं
भाषेत दृष्ट्वापि भास्वंतमवलोकयेत्॥ ततो गोविंदमभ्यर्च्य नैवेद्यादिभिरादरात्॥ दीपं दद्याद्गृहे तत्र भक्तियुक्तेन चे
तसा॥ तद्दिने वर्जयेत्पार्थ निद्रां मैथुनमेव च॥ गीतशास्त्रविनोदेन दिवारात्रं नयेद्व्रती॥ रात्रौ जागरणं कृत्वा भक्तियु
क्तेन चेतसा॥ विप्रेभ्यो दक्षिणां दत्वा प्रणिपत्य क्षमापयेत्॥ यथा शुक्ला तथा कृष्णा मर्त्यो वै धर्मतत्परः॥ एकादश्यो
द्वयो राजन्न विभेदं नैव कारयेत्॥ एवं हि कुरुते यस्तु श्रृणुते स्यापि यत्फलं॥ शंखोद्धारे नरः स्नात्वा दृष्ट्वा देवं गदाधरं॥

एकादश्युपवासस्य कलां नार्हन्ति षोडशीं॥ वैधृतस्य च दानस्य लक्षमेव फलं स्मृतं॥ संक्रान्तिषु चतुर्लक्षं यो ददाति धनंजय॥
कुरुक्षेत्रे च यत्पुण्यं ग्रहणे चंद्रसूर्ययोः॥ तत्सर्वं लभते यस्तु एकादश्यामुपोषितः॥ अश्वमेधस्य यज्ञस्य करणाद्य
त्फलं लभेत्॥ ततः शतगुणं पुण्यं मेकादश्युपवासतः॥ तपस्विनो गृहे नित्यं लक्षं यस्य च भुंजते॥ षष्टिर्वर्षसहस्रा
णि तस्य पुण्यं च यद्भवेत्॥ एकादश्युपवासस्य कला नार्हन्ति षोडशीं॥ गोसहस्रस्य यत्पुण्यं दत्वा वेदांतपारगे॥ एतत्पुण्यं
दशगुणं एकादश्युपवासिनां॥ नित्यं च भुंजते यस्य दश चैव द्विजोत्तमाः॥ भवेत्तद्दशगुणं ब्रह्मचारिणि भोजिते॥
तत्सहस्रं तु भूदाने कन्यादाने ततः स्मृतं॥ तस्माद्दशगुणं प्रोक्तं विद्यादाने ततोपि च॥ विद्यादशगुणं चान्नं यो ददाति
बुभुक्षिते॥ अन्नदानसमं दानं न भूतो न भविष्यति॥ तृप्तिमायांति कौंतेय स्वर्गस्थाः पितृदेवताः॥ एकादश्याव्रतस्या
पि पुण्यसंख्या न विद्यते॥ एतत्पुण्यं प्रभावं यत्सुरैरपि सुदुर्लभं॥ नक्तस्यार्धे न चैतस्य एकभक्तस्य कारके॥ एकभ
क्तं च उपवासस्तथैव च॥ तावद्गर्जंति तीर्थानि दानानि नियमा यमाः॥ एकादशी न संप्राप्ता यावत्तावन्मखा अपि॥
नरा खेनपि बे तोयं न हन्यान्मत्स्यसूकरौ॥ एकादश्यान्न भुंजीत यन्मां त्वं पृच्छसेर्जुन॥ एतत्ते कथितं सर्वं व्रताना
मुत्तमं व्रतं॥ एकादशीसमं नास्ति क्रतुयज्ञसहस्रकं॥ अर्जुन उवाच॥ उक्ता त्वया कथं देव पुण्येयं सर्वतत्त
[illegible]थिः॥ सर्वेभ्योपि पवित्रेयमुक्ता चैकादशी तिथिः॥ केन चीर्णा पुरा देव माहात्म्यं कथयस्व मे॥ श्रीकृष्ण उवाच

मीश्वरः॥ न त्वया रहितं किंचित् त्रैलोक्ये सचराचरे॥ भगवन्देवदेवेश शरणागतवत्सल॥ त्राहि त्राहि महायोगिन्
भीतानां शरणं भव॥ दानवैर्निर्जिता देवाः स्वर्गभ्रष्टाः कृता विभो॥ स्वर्गभ्रष्टा जगन्नाथ विचरंति महीतले॥ इं
द्रस्य वचनं श्रुत्वा विष्णुर्वचनमब्रवीत्॥ कोऽसौ दैत्यो महामायो देवा येन विवर्जिताः॥ किं स्थानं तस्य किं वीर्यं किं ब
लं कस्तदाश्रयः॥ एतत्सर्वं समाचक्ष्व मघवन्निर्भयो भव॥ ॥इंद्र उवाच॥ भगवन्देवदेवेश भक्तानुग्रहकारक॥
दैत्यः पूर्वं महानासीन्नाडीजंघ इति स्मृतः॥ ब्रह्मवंशसमुद्भूतो महोग्रः सुरसूदनः॥ तस्य पुत्रोऽतिविख्यातो मुर
नामा महासुरः॥ तस्य चंद्रवती नाम नगरी च गरीयसी॥ तस्यां वसन्स दुष्टात्मा जित्वा निर्जित्य वीर्यवान्॥ सुरान्
स्ववशमानिन्ये निराकृत्य त्रिविष्टपात्॥ इंद्राग्नीयमवायीशसोमनिर्ऋतिपाशिनां॥ पदेषु स्वयमेवासीत्स्व
भूत्वा तपत्यपि॥ पर्जन्यः स्वयमेवासीदजेयः सर्वदैवतैः॥ जहि तं दानवं विष्णो सुराणां जयमावह॥ तस्य तद्व
चनं श्रुत्वा कोपाविष्टो जनार्दनः॥ उवाच शक्रं देवेंद्र हनिष्ये तं महाबलं॥ प्रयांतु सहिताः सर्वे चंद्रवत्यां महा
बलाः॥ इत्युक्ताः प्रययुः सर्वे पुरस्कृत्य हरिं सुराः॥ दृष्टो दैवैः स दैत्येंद्रो गर्जमानः स दानवः॥ असंख्याताः स
हस्रैः स दिव्यप्रहरणायुधैः॥ हन्यमानास्तदा देवा असुरैर्बाहुशालिभिः॥ ते संग्रामं समुत्सृज्य पलाय
न्दिशो दश॥ ततो दृष्ट्वा हृषीकेशः संग्रामे समुपस्थितं॥ अभ्यधावन्नभिक्रुद्धा विविधायुधपाणयः॥ अथ ता
ग्रा

१५४

न्प्रद्रुतान्दृष्ट्वा शंखचक्रगदाधरः॥ विव्याध सर्वगात्रेषु शरैराशीविषोपमैः॥ तेन छिन्नाः स्म शतशो दानवा निधनं गताः॥
एकां गोदानवस्थित्वा युध्यमानो मुहुर्मुहुः॥ तस्योपरि हृषीकेशो यद्यदायुधमुत्सृजेत्॥ पुष्पवत्तं समभ्येति कुंठितं त
स्य तेजसा॥ शस्त्रास्त्रैर्वध्यमानोपि यदा जेतुं न शक्यते॥ अयोधयत्तथा क्रुद्धो बाहुभिः परिघोपमैः॥ बाहुयुद्धं कृतं तेन
बलात्वर्षसहस्रकं॥ तेन श्रांतः स भगवान्गिरिं बदरिकाश्रमं॥ तत्र चाहिवती नाम गुहा परमशोभना॥ तां विप्रश्य म
हायोगी सुष्वाप जगतां पतिः॥ योजनद्वादशायामा सांधकारैकद्वारा धनंजय॥ अहं तत्र प्रसुप्तोऽस्मि भयभीतो न सं
शयः॥ महायुद्धेन तेनैव श्रांतोऽहं पांडुनंदन॥ दानवः पृष्ठतो लग्नः प्रविवेश स तां गुहां॥ प्रसुप्तं मां तदा दृष्ट्वा चिंतयद्दान
वो हृदि॥ हरिमेनं हनिष्यामि दानवानां क्षयावहं॥ एवं स दुर्मतेस्तस्य व्यवसायं व्यवस्य च॥ समुद्भूता मम अंगेभ्यः क
न्यैका महाप्रभा॥ दिव्यप्रहरणा देवी युद्धाय समुपस्थिता॥ ईक्षिता दानवेंद्रेण रूपा पांडवर्षभ॥ युद्धं समीहि
तं तेन स्त्रिया तत्र प्रयाचितं॥ सा कन्या युध्यते नित्यं तां दृष्ट्वा विस्मयं गतः॥ केनेयं विस्मिता रौद्रा मृत्युग्रावशनिपा
तिनी॥ इत्युक्त्वा दानवेंद्रोपि युयुधे कन्यया तया॥ ततस्तस्या महादेव्यास्त्वरया दानवो बली॥ छित्त्वा शस्त्राणि स
र्वाणि क्षणेन विरथीकृतः॥ बाहुप्रहरणोपेतो धावमानो महाबलात्॥ तेन सा हृत्य हृदये तया देव्या निपातितः॥ तत

स्तेदानवायेयेप्रसुप्तायुधिमूर्धनि॥ तत्क्षणोत्कृत्तशिरसोजगामवैवस्वतक्षयं॥ शेषाभयार्दितादीनाःपातालंविविशु
र्द्विषः॥ ततःसमुत्थितोदेवःपुरोदृष्ट्वाग्रतःमुरं॥ कन्यांपुरस्थितांचापिकृतांजलिपुटांननं॥ विस्मयोत्फुल्लनयनःप्रोवाच
जगतांपतिः॥ केनायंनिहितःसंख्येदानवोदुष्टमानसः॥ येनदेवाःसगंधर्वाःसेंद्राःसहमरुद्गणाः॥ सनागाःसह
लोकेशाश्चलीलयैवविनिर्जिताः॥ एनाहंनिर्जितोभीतःश्रांतःसुप्तोगुहामिमां॥ केनकारुण्यभावेनरक्षितोहंपला
यितः॥ कन्योवाच॥ मयाविनिहतोदैत्यःत्वदंशोद्भूतयाप्रभो॥ दृष्ट्वासुप्तंहरेत्वांतुदैत्योहंतुंसमुद्यतः॥ त्रैलोक्य
कंटकस्येत्यस्यव्यवसायंप्रबुध्यच॥ हतोमयादुरात्मासौदेवतानिर्भयाःकृताः॥ तवैवाहंमहाशक्तिःसर्वशत्रुक्ष
यंकरी॥ त्रैलोक्यरक्षणार्थायहतोलोकभयंकरः॥ निहतंदानवंदृष्ट्वाकिमाश्चर्यंवदप्रभो॥ श्रीभगवानुवाच
निहतेदानवेदुष्टेहृष्टस्तुष्टोहंतववचानघे॥ हृष्टपुष्टाश्चयेदेवाःआनंदःसमजायत॥ आनंदस्त्रिषुलोकेषुमुनि
नामपियत्कृतः॥ प्रसन्नोस्म्यनघेतुभ्यंवरंवरयसुव्रते॥ ददामितेनसंदेहोयःसुरैरपिदुर्लभः॥ एकादश्यु
वाच॥ यदितुष्टोसिमेदेवयदिदेयोवरोमम॥ याचेहंवरदत्वत्तःप्रसन्नोवरदर्षभ॥ उपवासस्ययत्पुण्यंत
स्यार्धंनक्तभोजने॥ तदर्धंचभवेत्तस्यएकभक्तंकरोतियः॥ यःकरोतिव्रतंभक्त्यादिनेममयतेंद्रियः॥ सगत्वा
वैष्णवंस्थानंकल्पकोटिशतानिच॥ भुंजानोविविधान्भोगानुपवासपरोजनः॥ भगवन्त्वत्प्रसादेनभ १५५

पुराकृतयुगेपार्थमुरुनामाहिदानवः॥ अत्यद्भुतोमहारौद्रःसर्वदेवभयंकरः॥ आदित्यावसवोब्रह्मावायुरग्नि
स्तथैवच॥ इंद्रउच्छेदितास्तेनअन्यएवपुरंदरः॥ देवतानिर्जितास्तेनअत्युग्रेणचपांडव॥ इंद्रेणाकथितःसर्वोवृत्तां
तःशंकरायवै॥ स्वर्गलोकपरिभ्रष्टाविचरामोमहीतले॥ उपायंब्रूहिमेदेवअमराणांतुकागतिः॥ ईश्वरउ॰
देवराजसुरश्रेष्ठयत्रास्तिगरुडध्वजः॥ स्वाश्रितानांशरण्यानांजगन्नाथःपरित्राणपरायणः॥ तत्रगच्छमहेस
र्वसर्वःकार्यंविधास्यति॥ ईशस्यवचनंश्रुत्वादेवराजोमहामनाः॥ पुरस्कृत्यमहादेवंसगणंसमरुद्गणः॥ यत्रदे
वोजगन्नाथःप्रसुप्तोहिजनार्दनः॥ जलमध्येप्रसुप्तंतुदृष्ट्वादेवंजगत्पतिं॥ कृतांजलिपुटोभूत्वाइंद्रःस्तोत्रमु
दीरयत्॥ ओंनमोदेवदेवेशायदेवदेवैःसुवंदित॥ दैत्यारेपुंडरीकाक्षत्राहिमांमधुसूदन॥ दैत्यभीताइमेदेवामया
सहसमागताः॥ शरणंतेजगन्नाथत्राह्यस्मान्भयविह्वलान्॥ त्वंगतिस्त्वंमतिर्देवत्वंकर्तात्वंचहारकः॥ त्वंमाता
सर्वलोकानांत्वमेवजगतःपिता॥ त्वंस्थितिस्त्वंस्तथोत्पतिस्त्वंचसंहारकारकः॥ सहायस्त्वंचदेवानांत्वंचशांति
करोभवः॥ त्वंधरातलमाधारःसर्वविश्वोपकारकः॥ भवस्त्वंचस्वयंब्रह्मात्रैलोक्यस्यचपालकः॥ त्वंरविस्त्वं
शशांकश्चत्वंचदेवोहुताशनः॥ हव्यंहोमंकृताशश्चमंत्रतंत्रर्त्विजोजपः॥ यजमानश्चयज्ञश्चफलभोक्ता

वेदेषवरोमम॥ उपवासंचनक्तंचएकभक्तंकरोतियः॥ तस्यधर्मंचवित्तंचमोक्षंदेहिनार्दन॥ श्रीभगवानुवाच॥ यत्वंवदसि
कल्यापितत्सर्वंचभविष्यति॥ ममभक्ताश्चयेलोकेतवभक्ताश्चयेनराः॥ त्रिषुलोकेषुविख्याताप्राप्स्यतिममसंनिधिं॥
एकादश्यांसमुत्पन्नाममशक्तिःपरायणः॥ अतएकादशीत्येवतवनामभविष्यति॥ सर्वासांचतिथीनांत्वमुत्तमापिभवि
ष्यति॥ उपोष्यैकादशींयोवैममप्रजांकरिष्यति॥ दग्ध्वापापानिसर्वाणिदास्यामिपदमव्ययं॥ तृतीयाचाष्टमीचैवन
वमीचतुर्दशी॥ एकादशीविशेषेणतिथयोमेमहाप्रियाः॥ सर्वतीर्थाधिकंपुण्यंसर्वदानाधिकंपरं॥ सर्वव्रताधि
कंचैवसत्यंसत्यंवदामिते॥ एवंदत्वावरंतस्यास्तत्रैवांतरधीयत॥ तदासंतुष्टहृज्जातातत्रएकादशीतिथिः॥ एवमेका
दशींपार्थकरिष्यंतिनरास्तुये॥ शत्रुंस्तेषांहनिष्यामिदास्यामिपरमांगतिं॥ अन्येपियेकरिष्यंतिएकादश्यामहा
व्रतं॥ हरामितेषांविघ्नानिसर्वसिधिंददामिच॥ एवमुक्त्वासमुत्पत्तिरेकादश्याःपृथासुतं॥ इयमेकादशीनित्यासर्वपा
पक्षयंकरी॥ एकैवचमहापुण्यसर्वपापनिषूदनी॥ पूजितासर्वलोकेषुसर्वसिद्धिकरीतिथिः॥ शुक्लावाप्यथकृष्णावा
इतिभेदनकारयेत्॥ कर्त्तव्येतुउभेपार्थतत्तुल्याद्वादशीतिथिः॥ अंतरंनैवकर्त्तव्यंसमस्तैर्व्रतकारिभिः॥ तिथिरेका
भवेत्सर्वापक्षयोरुभयोरपि॥ एकादशीतुसंपूर्णाप्रभातेघटिकायदि॥ सातिथिःपरिहर्त्तव्याउपोष्याद्वादशीतदा॥

एवंविधामयाप्रोक्ता पक्षयोरुभयोरपि॥ उपवासं प्रकुर्वंति एकादश्यां नराश्च ये॥ तेयांति परमंस्थानं यत्रास्ते गरुडध्वजः॥
धन्यास्ते मानवा लोके विष्णुभक्तिपरायणाः॥ एकादश्यास्तु माहात्म्यं सर्वकाले तु यः पठेत्॥ अश्वमेधस्य यत्पुण्यं तदाप्नो
ति न संशयः॥ यः शृणोति दिवा रात्रौ नरो विष्णुपरायणः॥ कुलकोटिसमायुक्तो विष्णुलोके महीयते॥ एकादश्याश्च मा
हात्म्यं पाद्मे कं शृणोति यः॥ ब्रह्महत्यादिकं पापं नश्यते नात्र संशयः॥ विष्णुधर्मसमं नास्ति गीतार्थस्य धनंजय॥ ए
कादशीसमं नास्ति व्रतं नाम सनातनं॥ ॥इदं मात्स्ये एकादशीव्रतकथा॥ अथ ज्येष्ठशुक्लैकादश्यां निर्जलैकाद
शीव्रतं॥ तद्विधिः स्कांदे॥ ज्येष्ठमासि नृपश्रेष्ठ याशुक्लैकादशी भवेत्॥ निर्जलं समुपोष्यात्र जलकुंभान् सशर्करा
न्॥ प्रदाय विप्रमुख्येभ्यो मोदते विष्णुसंनिधाविति॥ अथ कथा पाद्मभारतयोः॥ युधिष्ठिर उवाच॥ श्रुता मे मानवा
धर्मा वैदिकाश्च श्रुतास्त्वया॥ कलौ युगे न शक्यं ते ते वै कर्त्तुं नराधिप॥ पुराणानां च सर्वेषां सारभूतान्वदामि ते॥ ए
कादश्यां न भुंजीत पक्षयोरुभयोरपीति॥ एकादश्यां न भुंक्ते यो न याति नरकं तु सः॥ व्यासस्य वचनं श्रुत्वा कंपितो
ऽश्वत्थपत्रवत्॥ भीमसेनो महाबाहुः भीमो वाक्यमभाषत॥ भीमसेन उवाच॥ पितामह न शक्तोहमुपवासे करोमि किं॥
अतो बहुफलं ब्रूहि व्रतमेकमपि प्रभो॥ व्यास उवाच॥ वृषस्थे मिथुनस्थे वा शुक्ला ह्येकादशी भवेत्॥ ज्येष्ठमासे
प्रयत्नेन सोपोष्या जलवर्जिता॥ स्नाने चाचमने चैव वर्जयित्वोदकं बुधः॥ उपभुंजीत नैवान्यव्रतभंगोन्यथा भवेत्॥

व्रतसंपूर्णमस्तु ॥ अथाषाढशुक्लैकादश्यां शयन्येकादशीव्रतं ॥ तत्र ब्रह्मपुराणे ॥ एकादश्यां तु शुक्लायां आषाढे भगव
रो न्हरिः ॥ भुजङ्गशयने शेते तदा क्षीरार्णवे सदा ॥ तदा तत्प्रतिमां कार्या सर्वलक्षणसंयुता ॥ सुप्तां तु शेषशेषपर्यंके शैलम
द्भिस्तु वस्तुभिः ॥ ताम्रारकूटरजतैस्तु या चित्रपुटेषु च ॥ लक्ष्म्याउत्संगहस्तेन विन्यस्तचरणांबुजा ॥ उत्संगं हस्ते उत्संग
स्थितेहस्तेनानाविधोपकरणैः पूज्या च विधिपूर्वकं ॥ उपवासश्च कर्तव्यो रात्रौ जागरणं तथा ॥ तस्यां रात्र्यां व्यतीतायां द्वा
दश्यां पूजयेत्तथा ॥ त्रयोदश्यां ततो गीतं नृत्यवाद्यं निवेदयेदिति ॥ भविष्योत्तरे आषाढस्य सिते पक्षे एकादश्यां उ
पोषितः ॥ स्थापयेत्प्रतिमां विष्णोः शंखचक्रगदाधरः ॥ कांचनीं राजतीं तांम्रमयीं पैत्तलिकीं तथा ॥ पीतां
बरधरां सौम्यां पर्यंके स्वस्तते शुभे ॥ शुक्लवस्त्रसमाछन्ने सोपधाने युधिष्ठिर ॥ इतिहासपुराणज्ञो विष्णुभक्तोथ
वा पुमान् ॥ स्नापयित्वा दधिक्षीरघृतक्षौद्रजलैस्तथा ॥ तामालभ्य शुभैर्गंधैर्धूपदीपैरलंकृतां ॥ कुसुमैः विविधैः
शुक्लैः मंत्रेणानेन पांडव ॥ सुप्ते त्वयि जगन्नाथे जगत्सुप्तं भवेदिदं ॥ विबुद्धे त्वयि बुध्येत जगत्सर्वं चराचरमिति
महाभारते ॥ आषाढे तु सिते पक्षे एकादश्यामुपोषितः ॥ चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नरः ॥ सनत्कुमार
स्तु चातुर्मास्यव्रतारंभस्य कालांतरमप्याह ॥ एकादश्यां तु गृह्णीयात्संक्रांतौ कर्कटस्य च ॥ आषाढ्यां वा नरो भक्त्या १५७

चातुर्मास्योदितव्रतमिति ॥ संकल्पमंत्रश्च तेनैवोक्तः ॥ इदं व्रतं मया देव गृहीतं पुरतस्तव ॥ निर्विघ्नं सिद्धिमायातु प्रसन्ने
त्वयि केशव ॥ गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत् ॥ तन्मे भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन ॥ इति ॥ अथ च प्रारंभो गुर्व
स्तमयादावपि कार्यः ॥ तथा च वृद्धगार्ग्यः ॥ न शेषशयनं मौढ्यं च शुक्रगुर्वोर्न वा तिथेः ॥ खंडत्वं चिंतयज्ज्ञो चातुर्मास्या
वधौ नरः इति चातुर्मास्यव्रतानि भविष्योत्तरे ॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि ॥ स्त्री वा नरोपि वा भक्त्या धर्मा
र्थं सुदृढव्रतः ॥ गृह्णीयान्नियमानेतान्दंतधावनपूर्वकं ॥ तेषां फलानि वक्ष्यामि तत्कर्तृणां पृथक्पृथक् ॥ मधुर
स्वरो भवेन्नित्यं नरो गुडविवर्जितात् ॥ तैलस्य वर्जनात्पार्थ सुंदरांगः प्रजायते ॥ कटुतैलपरित्यागाच्छत्रुनाशः प्रजा
यते ॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ॥ तांबूलवर्जनाद्भोगी रक्तकंठः प्रजायते ॥ घृतत्यागात्सुलावण्यं
सर्वस्निग्धं वपुर्भवेत् ॥ फलत्यागाच्च मतिमान्बहुपुत्रः प्रजायते ॥ शाकपत्राशनत्यागी पक्वान्नादो भवेन्नरः ॥ अभ्यं
गस्य परित्यागाद्वपुःसौरभ्यमाप्नुयात् ॥ दधिदुग्धतक्रनियमाद्गोलोकं लभते नरः ॥ लभते संततिं दीर्घां स्थालीपाक
मभक्षयन् ॥ भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥ भूमौ भुंक्ते यस्तु नरः स पृथिव्याः परिभवेत् ॥ सदा मुनिः स
दा योगी मधुमांसस्य वर्जनात् ॥ निर्व्याधिर्नीरुगोजस्वी विष्णुभक्तः प्रजायते ॥ एकांतरोपवासेन विष्णुलोकमवा

मुयात्॥ धाराणास्च भवेत्तस्य गंगास्नानं दिने दिने॥ मौनव्रती भवेद्यस्तु तस्याज्ञा सवलिता भवेत्॥ नमो नारायणायेतिज मान
जं फलं॥ पादाभिवंदनाद्विष्णो भवेतो दानजं फलं॥ विष्णुपादांबुजस्पर्शात्कृतकृत्यो भवेन्नरः॥ विष्णो देवालये कुर्यादुपले
पनमार्जनं॥ कल्पस्थायी भवेद्राजन्स नरो नात्र संशयः॥ प्रदक्षिणाशतं यस्तु करोति स्तुति पाठकः॥ हंसयुक्तविमानेन स च
विष्णुपरं व्रजेत्॥ कृत्वा प्रोक्षणकं दिव्यं स्थानमप्सरसां लभेत्॥ एकभक्ताशनां नित्यमग्निहोत्रफलं लभेत्॥ अयाचितेन
वाप्नोति वापीकूपप्रयाफलं॥ द्विजेभ्यश्चान्नदानेन स्थायी स्वर्गे नरो भवेत्॥ पुत्रेषु यस्तु नो भुंक्ते कुरुक्षेत्रफलं लभेत्॥ शि
लायाभोजनं नित्यं प्रयागस्नानजं फलं॥ एवमादिव्रतैः पार्थ तुष्टिमायाति केशवः इति॥ शायन्येकादशीव्रतं॥ अथाषाढशुक्ले
कादश्यादि गोपद्मव्रतं॥ ॥तत्र पूजा॥ चतुर्भुजं महाकायं जांबूनदसमप्रभं॥ शंखचक्रगदापद्मरमागरुडशोभितं॥ से
वितं मुनिभिर्देवैर्यक्षगंधर्वकिन्नरैः॥ एवंविधं हरिं ध्यात्वा ततो यज्ञं समारभेत्॥ ध्यानं॥ आवाहयामि देवेशं भक्तानाम
भयप्रदं॥ संस्निग्धं वरदं शांतं मनसावाहयेद्धरिं॥ आवाहनं॥ सुवर्णमणिभिर्दिव्यैः खचिते देव निर्मिते॥ दिव्यसिं
हासने स्निग्धे प्रविशात्वं सुरालये॥ आसनं॥ पादोदकं सुरश्रेष्ठ सुवर्णकलशे स्थितं॥ गंधपुष्पाक्षतैर्युक्तं ग्रहाण
रमया सह॥ पाद्यं॥ आपो अष्टद्रव्यसमायुक्तं स्वर्णपात्रे स्थितं जलं॥ अर्घ्यं ग्रहाण भो देव भक्तानामभयप्रद॥ अर्घ्यं॥

१५८

उदयादुदयं यावद्वर्जयित्वा जलं बुधः॥ अप्रयत्नादवाप्नोति द्वादशीं नृप॥ ततः प्रभाते विमले द्वादश्यां स्नानमाचरेत्॥ जलं सु
वर्णं दत्वा च द्विजातिभ्यो यथाविधि॥ भुंजीत कृतकृत्यस्तु ब्राह्मणैः सहितो वशी॥ एवं कृते तु यत्पुण्यं भीमसेन शृणुष्व तत्॥
संवत्सरस्य यामध्ये एकादश्यो भवंत्युत॥ तासां फलमवाप्नोति अत्र मे नास्ति संशयः॥ इति मां केशवः प्राह शंखच
क्रगदाधरः॥ तस्य व्रतस्य यत्पुण्यं तन्मे शृणु जनार्दन॥ एकादश्यां सितेपक्षे ज्येष्ठस्योदकवर्जितं॥ उपोष्य फलमाप्नोति
यच्छृणुष्व वृकोदरः॥ सर्वेथ तीर्थेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं॥ सर्वहोमेषु यत्पुण्यं तदस्यास्त्युपोषणात्॥ संवत्सेच
पक्षास्तु शुक्ला कृष्णा वृकोदर॥ उपोषितास्तु सर्वास्तु रेकादश्यो न संशयः॥ धनधान्यवहा पुण्या पुत्रारोग्य
प्रदास्तथा॥ उपोषितानरव्याघ्र इति सत्यं ब्रवीमि ते॥ यमदूता महाकाया कराला कृष्णरूपिणः॥ दंडपाशधरा रौद्रा मरणे दृ
ष्टिगोचराः॥ न प्रयांति नरव्याघ्र एकादश्यामुपोषणात्॥ पीतांबरधराः सौम्याश्चक्रहस्ता मनोजवाः॥ अंत्यकाले नयंत्ये
नं वैष्णवं वैष्णवीं पुरीं॥ तस्मात्सर्वप्रयत्नेन उपोष्या जलवर्जिता॥ जलधेनुस्तथा दत्वा सर्वपापैः प्रमुच्यते॥ स्कंदपुराणे
तस्यां शर्करजलदानमुक्तं॥ ज्येष्ठमासि नृपश्रेष्ठ या शुक्लैकादशी शुभा॥ निर्जलं समुपोष्यात्र जलकुंभान्सशर्क
रान्॥ प्रदाय विप्रमुख्येभ्यस्तापत्रयविवर्जितः॥ विष्णुलोकमवाप्येह मोदते विष्णुसंनिधौ॥ इति निर्जलैकादशी

देवदेव नमस्तुभ्यं पुराणपुरुषोत्तम॥ मयानीतमिदं तोयं गृहीत्वाचमनं कुरु॥ आचमनं॥ पंचामृतेन स्नानस्नायान्मंत्रैर्वेदोद्भवैर
पि॥ मध्ये मध्ये प्रपूजा च मधुपर्कपुरःसरं॥ पंचामृतं॥ मदीनांचैव सरसां मयानीतं जलं शुभं॥ अनेन स्नानमंत्रेण मंत्रैर्वारुण
संभवैः॥ स्नानं॥ वस्त्रयुग्मं समानीतं पटसूत्रेण निर्मितं॥ वस्त्रं कार्पासतंतूनां सुवर्णेन विराजितं॥ वस्त्रं॥ नारायण नम
स्तेस्तु त्राहि मां भवसागरात्॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम॥ यज्ञोपवीतं॥ केयूरमुकुटैश्चैव नूपुरैरंगुलीय
कैः॥ पूजितोसि प्रयत्नेन रत्नैराभरणैर्विभो॥ आभरणानि॥ चंदनं मलयोद्भूतं कस्तूर्यागरुसंयुतं॥ कर्पूरेण च संमिश्रं
स्वीकुरुष्वानुलेपनं॥ गंधं॥ शतपत्रैः कर्णिकारैश्चंपकैर्मल्लिकादिभिः॥ पुष्पैर्नानाविधैश्चैव पूजितं पुरुषोत्तमः॥ पुष्पं
दशांगगुग्गुलं धूपं सुगंधं च मनोहरं॥ गृहाण देवदेवेश धूपाय प्रतिगृह्यतां॥ धूपं॥ एकार्तिका सुरश्रेष्ठ गोघृतेन सुव
र्तिना॥ संयुक्ता तेजसा कृष्ण गृहाणादित्यदीपित॥ दीपं॥ अन्नं च पायसं भक्ष्यं सिताघृतसमन्वितं॥ दधिक्षीरघृतै
र्युक्तं गृहाण सुरपूजित॥ नैवेद्यं॥ नानावल्लिदलैर्युक्तं पूगीफलसमन्वितं॥ कर्पूरखदिरैर्युक्तं तांबूलं प्रतिगृह्य
तां॥ तांबूलं॥ नीराजनं गृहाणेश पंचवर्तिभिरावृतं॥ तेजोराशिमयाद्दत्तं लोकानंदकर प्रभो॥ नीराजनं॥ नं
दनस्य प्रसूनैश्च तथा कल्पद्रुमस्य च॥ सुरहस्तच्युतैरीश गृहाण कुसुमांजलिं॥ पुष्पांजलिं॥ नमस्ते देवदेवे

शनमस्ते गरुडध्वज॥ नमस्ते विष्णवे तुभ्यं व्रतस्य फलदायक॥ नमस्कारः॥ ततो वायनं दद्यात्॥ मंत्रहीनं क्रियाहीनं भ
क्तिहीनं सुरेश्वर॥ व्रतेनानेन संतुष्टो तस्मं पूर्णफलदो भव॥ प्रार्थना॥ इति पूजा॥ अथ कथा॥ व्यासं वसिष्ठनप्तारं शक्तेः
पौत्रमकल्मषं॥ पाराशरात्मजं वंदे शुकतातं तपोनिधिं॥ सूत उवाच॥ द्वापरे द्वारवत्यां वै नारदः कृष्णदर्शनात्॥ उत्सा
हेनाभ्यगात्तत्र ददर्श यदुनंदनं॥ पूजितश्चैव कृष्णेन विष्टराद्भिरादरात्॥ ततः प्रोवाच तं विष्णुर्नारदं लोकपूजितं॥
कृष्ण उवाच॥ शृणु लोकसदेवर्षे भुवने विचरन्सदा॥ लोकांतरेषु चरितं यद्दृष्टं तद्वदस्व मे॥ ॥ नारद उवाच॥
भगवन्देवदेवेश भक्तोस्मि तव चांतिके॥ तत्राश्चर्यमिदं वक्ष्ये धर्मस्य सदसि स्थितः॥ तत्र सर्वे समासीना सुरा इंद्रादयस्तु
देवाः॥ आकुश्चैकादश रुद्रा आदित्या द्वादश स्मृताः॥ वसवोष्टौ तथा नागा यक्षराक्षसपन्नगाः॥ ते सर्वे यममाकुश्च स्थि
तं सिंहासने शुभे॥ मानुष्यं डुंडुभे चर्म छादनार्थं वदस्व नः॥ यम उवाच॥ ॥ चातुर्मास्य व्रतं चैकं संक्रांतिं व्रतमेव च॥
न कुर्वंति च या नार्यस्तत्त्वा मा छादनं त्वचा॥ कुर्वंतु डुंडुभेभ्यश्चास्य विवरध्वं महागणाः॥ ते तस्य वचनं श्रुत्वा भंगाः प्रवि
ष्टुर्भुवि॥ स्वामिन्निदं महाश्चर्यमतस्त्वां प्रविदामि च॥ तच्छ्रुत्वा त्वरितः कृष्णः प्राह लोकान्पुरस्थितान्॥ तथा कुर्वंतु
लोकाश्च नार्यः पुर्यां न संततिः हि॥ तच्छ्रुत्वा त्वरितः कृष्णपक्षेषु नगरेषु च॥ कृष्णाज्ञयां कृष्णदूतां प्रोचुस्ते सर्वयोषितः॥ पु
रसर्वत्र प्रभृत्येवं तु एतस्यां पुरयोषितां॥ अन्यत्र यत्र कुत्रापि ऊचुस्ता यदुनंदन॥ त्वत्सोदरीं विना स्वामिन्नान्या ना १५९

गोमयेनोपलिप्यते ॥ त्रयस्त्रिंशच्च पद्मानि गंधपुष्पैः प्रपूजयेत् ॥ तत्संख्यया च कर्त्तव्या नमस्कारं प्रदक्षिणाः ॥ तत्संख्यया द्य
रूपाण्यथ ब्राह्मणाय निवेदयेत् ॥ प्रथमे वत्सरे चैव द्वितीये चैवमेव हि ॥ वायनस्य तथा चैव पायसं सैव निर्मितं ॥ तृतीये मंडका
न्दद्याच्चतुर्थे घृतमिश्रितान् ॥ पंचमे कार्यतः स्तस्य पूर्णे वत्सरपंचके ॥ उद्यापनं प्रकुर्वीत आदौ चांते च मध्यमे
एकादश्यामुपवसेद्धत्तथा वनपूर्वकं ॥ अभ्यंगं तु प्रकुर्वीत स्वचितैः ब्राह्मणैः सह ॥ पुण्याहं वाचयित्वा तु प्रतिमा
यां यजेद्धरिं ॥ कर्षमात्रसुवर्णेन तदर्धार्द्धेन वा पुनः ॥ पुनर्द्वादशनाम्नापि सतिलाज्यसमिद्धुतं ॥ पायसं च शतं चाष्टे
कृत्वा पूर्णाहुतिं चरेत् ॥ पुंचवत्ससहितं धेनुं आचार्याय समर्पयेत् ॥ ब्राह्मणान्पंच योषिद्भिर्भोजयेत्षड्रसैः सह
भुंजीत बंधुभिः सार्द्धमेकाग्रकृतमानसः ॥ अन्यानपि यथाशक्त्या ब्राह्मणानपि योजयेत् ॥ इदं व्रतं महा
पुण्यं तुष्यंति मुनिपुंगवाः ॥ इह भुक्त्वा तु विपुलान्सर्वान्कामान्मनोरमान् ॥ अंते स्वर्गपदं गच्छेत्सर्वपापविवर्जि
ता ॥ हस्तस्य वचनं श्रुत्वा सुभद्रा च तथाकरोत् ॥ पंचाब्दं व्रतमेतत्स्या द्रात्रौ यामचतुष्टये ॥ तत्सर्वं लक्षितं कृत्वा
प्रातर्भुक्त्वा कुलाशनं ॥ एवं कृते व्रते तस्मिन्काले यमभटाविशन् ॥ यमभटा ऊचुः ॥ सुभद्रे तव देहस्य ध
र्मेर्थिनागता वयं ॥ लोकेस्मिं तु व्रतं येन न कृतं भक्तिपूर्वतः ॥ तत्कर्मणापि नद्धव्यो पटं होयमशासनात् ॥

सुभद्रोवाच ॥ भटाः पश्यत मे चीर्णं गोपद्मव्रतमुत्तमं ॥ दत्तान्युंवत्ससहिता धेनुर्विप्राय दक्षिणा ॥ गोष्पद्मानि दृ
श्यंतु हे भटा ॥ अन्योन्यवादसमये विष्णुदूतास्तदागतौ ॥ तां दृष्ट्वा ताडयामासुर्व्रतस्यास्य प्रभावतः ॥ पलायंते म
हाभीता स्मरंतो यमशासनं ॥ तां दृष्ट्वा रक्तदग्धांगान्यमो भयसमन्वितः ॥ कस्येदं कृत्यमिति च ज्ञात्वा तीद्रियदर्श
नात् ॥ उवाच दुःतान्शृण्वंतु यत्र संपूज्यते हरिः ॥ भवद्भिस्तन्न गंतव्यं हरेरद्भुतकर्मणः ॥ तस्य व्रतमिदं तत्र पश्यतो हि
तवाहलो ॥ प्राप्नुवंतो देवदशा किं कुर्मः प्रचरेतु गां ॥ इत्युक्त्वा धर्मराजो सो शालोपान्तं विवेश ह ॥ तेन देवर्षिणा मह्यं
कथितं व्रतमीदृशं ॥ दमयंत्या च पंचालाराजभ्रंशात्कृतं व्रते ॥ व्रतस्यास्य प्रभावेन राज्यसौभाग्यसंपदः ॥ पुत्रपौत्रा
दिसौख्यं तु भुक्त्वा मोक्षमवाप्नुयात् ॥ ऋषय ऊचुः ॥ ॥ त्वत्प्रसादात्कृतार्थास्मो गच्छामस्त्वाश्रमं वयं ॥ प्रणम्य
मुनिभिः साकं तत्रैवांतरधीयत ॥ मुनिभिः सर्वलोकेषु कथितं व्रतमुत्तमं ॥ नातः परतरं पुण्यं त्रिषु लोकेषु विश्रु
तः ॥ ॥ इति श्रीभविष्योत्तरपुराणे गोपद्मव्रतं ॥ ॥ अथ कार्त्तिकशुक्लैकादश्यां प्रबोधनविधि हेमाद्रौ ब्राह्मे ॥
एकादश्यां च शुक्लायां कार्त्तिके मासि केशव ॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वितः ॥ नृत्तैर्गीतैस्तथा वा
द्यैर्ऋग्यजुःसाममंगलैः ॥ वीणापणवशब्दैश्च पुराणश्रवणेन च ॥ वासुदेवकथाभिश्च स्तोत्रैरन्यैश्च वैष्णवैः ॥ सु
भाषिते रिद्वजालैर्भूरिशोभाभिरेव च ॥ पुष्पैर्धूपैश्च नैवेद्यैर्दीपैर्दृक्षैः सुशोभनैः ॥ हविर्भिरन्यैः रपूरैश्च फलैः

शर्करपायसैः॥ इक्षोर्विकारैर्मधुरैर्द्राक्षाक्षुद्रैः सदाडिमैः॥ कुटेरकस्य मंजर्या मालत्याकटूपलेनच॥ कटेरकः पूर्णाञ्ज
कल्हतुलसीति केचित्॥ हताभ्यांश्वेततरकाभ्यां चंदनाभ्यां चसर्वदा॥ कुंकुमालक्तकाभ्यां च रक्तसूत्रैः सकंकणैः॥ना
नाविधैः पुष्पैरेरकयाहतैः विक्रेत्राप्रथमतोभिहितं मूल्यंदत्वाक्रियमाणैः क्रयोवीरक्रयः तस्यां राज्यांव्यतीतायां द्वा
दश्यामरुणोदये॥ आदौ घृतेचैक्षवेण मधुनास्नपयेत्ततः॥ दध्नाक्षीरेणततः पंचगव्येन शास्त्रवत्॥ उद्वर्त्तनं माषचूर्णं
मसूरामलकानिच॥ सर्षपाश्चापियंगुश्च मातुलिंगरसैस्तथा॥ सर्वौषध्यः सर्वगंधाः सर्वबीजानि कांचनं॥ मंगला
नियथाकामं रत्नानि च कुशोदकं॥ एवं चशोध्य देवेशं दद्याद्गोरोचनां शुभां॥ ततस्तु कलशा देयायथा प्राप्ताः स्वलं
कृताः॥ जानीपल्लवसंयुक्ताः सफलाश्च सकांचना॥ पुण्याहवेदशब्देन वीणावेणुरवेणच॥ एवं संस्नाप्य गोविंदं स
मुलिप्य स्वलंकृतं॥ सवाससं तु संपूज्य सुमनोभिः सुकुंकुमैः॥ दीपैर्धूपैर्मनोज्ञैश्च पायसेन चभूरिणा॥ हविष्यैश्च
न्नदानैश्च होमैः पुष्पैः सदक्षिणैः॥ वासोभिर्भूषणैरन्यैर्गोभिरश्वैर्मनोजवैः॥ ब्राह्मणाः पूजनीयाश्च विस्तारीड्या
श्च सूतयः॥ यत्तु शिष्टामृतं पश्चाद्भोक्तव्यं ब्राह्मणैः सहेति॥ भविष्योत्तरे॥ कार्त्तिके शुक्लपक्षे तु एकादश्यां प्रथ
त्युतं॥ मंत्रेणानेन राजेंद्र देवमुत्थापयेद्द्विज॥ मंत्रश्च॥ ब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादितवंदनीया॥ बुध्य

१८१

र्यो त्रसं तिहि॥ तच्छ्रुत्वा भयसंत्रस्तः सोदरां प्रत्यभाषत॥ ॥कृष्ण उवाच॥ ॥सुभद्रे किं करोषीह आगताय मसेवकाः॥
व्रतं यानकृतं भद्रे सत्यं व्रतं सहोदरि॥ ॥समुद्र उवाच॥ सर्वं कृतान्यहं कृष्ण कर्षमात्र नसंशयः॥ नोचेत्तव सहोदर्यस्या
न्नचोर्जुनयोधितः॥ पुत्रोभिमन्युस्यान्नोषेत्कथयस्व सहोदर॥ कृष्ण उवाच॥ ॥ तथापि भगिनि त्वं हि व्रतमे
कंचरस्वहि॥ गोपद्ममितिविख्यातं व्रतं लोकेषु विश्रुतं॥ सूतेन कथितं पूर्वं ऋषीणां हितकाम्यया॥ नैमिषे हिमव
पार्श्वे सिद्धाश्रममनुत्तमं॥ तत्रस्थं तं समासीनं सर्वज्ञानविदांवरं॥ तं दृष्ट्वा मुनयः सर्वे पादयोस्तेनतामुने॥ स्वार्चि
तास्ते न मुनिनादघ्यादिभिर्यथाविधि॥ अभ्यर्च्य तं मुनिं विप्रा ऊचुस्ते प्रश्नपूर्वकं॥ ऋषय ऊचुः॥ ॥ भवां
लोकस्य धर्मज्ञ भक्तस्य दानसाधनं॥ समर्थं सर्वमुक्त्यर्थं सर्वसौभाग्यकारकं॥ कृपया मुनिशार्दूल कथयस्वो
त्तमं व्रतं॥ ॥सूत उवाच॥ ॥शृणुध्वं ऋषयः सर्वे व्रतानामुत्तमं व्रतं॥ गोपद्ममिति विख्यातं सर्वपापहरं परं॥ सर्वदुःखो
पशमनं सर्वसंपत्प्रदायकं॥ यमस्य चंडनयस्माद्दूरीकृतमनुत्तमं॥ सुवासिनित्वं भाग्यादि पुत्रपौत्रप्रवर्धनं॥ ॥ऋ
षय ऊचुः॥ कस्मिन्मासि कथं कृत्वा किं फलं कस्य पूजनं॥ केन चीर्णं पुरा विप्र तत्सर्वं कथयस्व नः॥ सूत उवाच
आषाढ्या शुक्लपक्षस्य एकादश्यां विशेषतः॥ तदारभ्य च कार्त्तिक्यां द्वादश्यंतं व्रतं चरेत्॥ गोष्ठे च शुद्धगोस्थाने

स्वदेवेशजगन्निवासमंत्रप्रभावेनसुखेनदेव ॥ इयंचद्वादशीदेवप्रबोधायसुनिर्मिता ॥ त्वय्येवसर्वलोकानांहितार्थंशेष
शायिना ॥ उत्तिष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते ॥ त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिदं ॥ उत्थितेचेष्टतेसर्वमुत्ति
ष्ठोत्तिष्ठमाधव ॥ ततःपुष्पांजलिंदद्यात् ॥ ॥ तत्रमंत्रः ॥ ॥ गतामेघावियच्चैवनिर्मलंनिर्मलादिशः ॥ शारदानिचपुष्पाणि
गृहाणममकेशव ॥ इदंविष्णुरितिप्रोक्तोमंत्रउत्थापनेहरेः ॥ समुत्थितेततोविष्णौक्रियाःसर्वाःप्रवर्तयेत् ॥ महातूर्यरवो
रात्रौभ्रामयेत्तुस्यंदनस्थितं ॥ उत्थितंदेवदेवेशंनगरेपार्थिवःस्वयं ॥ रात्रौप्रजागरंकुर्यादेकादश्यांसुरालये ॥ प्रभातेवि
मलेस्नात्वाद्वादश्यांविष्णुमर्चयेत् ॥ होमयेद्द्रव्यवाहेवैहोमद्रव्यैर्घृतादिभिः ॥ ततोविप्रान्नृपश्रेष्ठान्भोजयेत्तन्न
विस्तरैः ॥ घृतक्षीरदधिक्षौद्रंकासारगुडमोदकैः ॥ ब्रह्मस्कांदयोःपुरुषोत्तममहात्म्ये ॥ अतःपरंशृणुतत्रउत्थापन
महोत्सवं ॥ पूजयित्वाजगन्नाथंकौमुद्याख्यमहोत्सवे ॥ आश्विन्यांप्रसूनक्रीडादिभिःपुष्पवस्त्रमाल्याद्यनुलेपनैः ॥
ततःप्रभातेसंकल्प्यकार्तिकव्रतमुत्तमं ॥ व्रतेनतेनवनयेयावदेकादशीसिता ॥ तस्यामुत्थापयेद्देवंसंपूज्यजगदी
श्वरं ॥ उत्तिष्ठदेवेशतेजोराशिजगत्पते ॥ वीक्षेततत्सकलविश्वंप्रसुप्तंतवमायया ॥ प्रफुल्लपुंडरीकश्रीहारिणान
यनेनवै ॥ त्वयादृष्टंजगदिदंपवित्र्यंपरमेष्यति ॥ इत्युक्त्वाप्रजगन्नाथवेणुवेणादिनिस्वनैः ॥ शंखकाहालमुरजवा

दनैर्नृत्यगीतकैः ॥ जयशब्दैस्तथास्तोत्रैर्नयेयुर्नृत्यमंडपं ॥ सुगंधेतैलेनाभ्यज्य स्नापयेत्पुरुषोत्तमं ॥ पंचामृतैर्नालि
केरैरसैः फलरसैस्तथा ॥ सुगंधामलकेनाथ लेपयेद्गंधचंदनैः ॥ पुष्पाधिवासितैश्चैव तथा गंधादिवासितैः ॥ स्नाप्यमानं
तु गोविंदं ये पश्यंति मुदान्विताः ॥ कल्पते सुदृढं पापं तेषान्याजन्मसंचितं ॥ कुंकुमागरुकस्तूरीकर्पूरैश्चंदनार्चितैः
ततो वै मालतीमालां चंद्रचूर्णयुतां ददेत् ॥ महोपचारैः संपूज्य विष्णुं नीराजयेत्ततः ॥ कृतांजलिपुटो भूत्वा प्रार्थयेत्पु
रुषोत्तमं ॥ चराचरमिदं सर्वं त्वदेकशरणं विभो ॥ अनुग्रहात्मनालोकैराप्यायस्व जगद्गुरो ॥ नृत्यगीतैः प्रक्षणकै
रात्रिशेषं नयेद्व्रती ॥ शयनादुत्थितं देवं ये पश्यंति गदाधरं ॥ सर्वकामानाप्नुवंति अश्वमेधं लभंति ते ॥ ॥ इत्यु
त्थापनमहोत्सवविधिः ॥ अथ कार्तिकशुक्लैकादश्यादि भीष्मपंचकं ॥ हेमाद्रौ नारदीये ॥ ॥ नारद उवाच ॥
यदेतदचलं पुण्यं व्रतानां परमं व्रतं ॥ कर्तव्यं कार्तिके मासि प्रयत्नाद्भीष्मपंचकं ॥ विधानं तस्य विस्पष्टं फलं
चापि ततो वद ॥ कथयस्व प्रसादेन मुनीनां हितकाम्यया ॥ ॥ ब्रह्मोवाच ॥ प्रवक्ष्यामि महापुण्यं व्रतं व्रतव
तां वर ॥ भीष्मेणैव संप्राप्तं व्रतं पंचदिनात्मकं ॥ सकाशाद्वासुदेवस्य तेनोक्तं भीष्मपंचकं ॥ कार्तिकस्यामले
पक्षे स्नात्वा सम्यग्यतव्रतः ॥ एकादश्यां तु गृह्णीयाद्व्रतं पंचदिवात्मकं ॥ प्रातः स्नात्वा विधानेन मध्याह्ने च य

थाविधि॥ नद्यां वा विष्णुगर्ते वा समालभ्य च गोमयं॥ यवव्रीहितिलैः सम्यक् पितॄन् संतर्पयेत्क्रमात्॥ स्नात्वा मौनेन ततः
ततः कृत्वा धौतवासदृढव्रतं॥ ततः संपूजयेद्देवं सर्वपापहरं हरिं॥ स्नापयेत्परया भक्त्या मधुक्षीरघृतेन वा॥ तीर्थैश्च पं
चगव्येन गंधचंदनवारिणा॥ चंदनेन सुगंधेन कुंकुमेनाथ केशवं॥ कर्पूरोशीरमिश्रेण लेपयेद्गरुडध्वजं॥ अर्चयेदु
चितैः पुष्पैर्गंधधूपसमन्वितैः॥ गुग्गुलं घृतसंयुक्तं दहेद्दक्षय भक्तिमान्॥ दीपंकं तु दिवारात्रौ दद्यात्पंचदिनान्वितं॥
नैवेद्यं देवदेवस्य परमान्नं निवेदयेत्॥ एवमभ्यर्च्य देवेशं स्तुत्वा चैवं प्रणम्य च॥ ॐ नमो भगवते वासुदेवाय
परमान्नं निवेदयेत्॥ घृताक्तं जुहुयाद्वह्नौ तद्वाष्टोत्तरं शतं॥ जुहुयात्तु घृताभ्यक्तं तिलव्रीहियवव्रती॥ षडक्षरे
णाहोमस्तु स्वाहाकारान्वितेन च॥ ॐ नमो विष्णवे इति षडक्षरैर्मंत्रः॥ उपास्य पश्चिमां संध्यां प्रणम्य गरुडध्वजं॥ ज
पित्वा पूर्ववन्मंत्रं क्षितिशायी भवेत्ततः॥ सर्वमेतद्विधानं तु कार्यं पंचतिथिष्वपि॥ विशेषोक्ते व्रते चास्मिन्नूयदन्यूनं स्या
पुष्पतत्॥ प्रथमेऽह्नि हरेः पादौ पूजयेत्कमलैर्द्विज॥ द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत्॥ पूजयेच्च तृतीयेऽह्नि
नाभिं भृंगारकेन तु॥ बाणबिल्वजपाभिश्च ततः स्कंधौ समर्चयेत्॥ ततोऽनु पूजयेच्छीर्षं मालत्या च कृपापिनः॥
कार्त्तिक्या देवदेवस्य भक्त्या तन्मयमानसैः॥ पूजयेज्जपमंत्रेण गंधधूपं निवेदयेत्॥ अर्चयित्वा हृषीकेशं एकाद

श्यां विशेषतः॥ त्रिःप्राश्य गोमयं सम्यक् एकादश्यामुपावसेत्॥ गोमूत्रं मंत्रवद्भूयो द्वादश्यां प्रजयेद्व्रती॥ क्षीरं च
वत्रयोदश्यां चतुर्दश्यां तथा दधि॥ संप्राश्य काश्यशुध्यर्थं लंघनीयं चतुर्दने॥ प्राशनं होममंत्रेणेति हेमाद्रिः॥ पंच
मे तु दिने स्नात्वा विधिवत्पूज्य केशवं॥ भोजयेद्ब्राह्मणान् भक्त्या तेभ्यो दद्याच्च दक्षिणां॥ अतोपदेष्टारमपि पूजयेद्वस्त्र
भूषणैः॥ ततो नक्तं समश्नीयात्पंचगव्यपुरःसरं॥ एवं सम्यक् समाप्यं स्याद्यथोक्तं व्रतमुत्तमं॥ सर्वपापहरं पुण्यं प्र
ख्यातं भीष्मपंचकं॥ जन्मप्रभृति यत्पापं त्यक्त्वा पुण्यमवाप्नुयात्॥ तत्फलं समवाप्नोति स त्यक्त्वा भीष्मपंचकं॥
मद्ययोयस्त्यजेत्मध्यं जन्मतोमरणांतिकं॥ तद्भीष्मपंचके त्यक्त्वा साप्राप्नोत्यधिकं फलं॥ भविष्योत्तरे॥
कार्तिके शुक्लपक्षस्य शृणु धर्मं पुरातनं॥ एकादश्यां समारभ्य विज्ञेयं भीष्मपंचकं॥ पुष्करं सत्वदीनानाम द्रा
क्ष्यं वाल्लचे तसां॥ पापधीः परिहर्तव्या ब्रह्मचर्येण निश्चया॥ शाकाहारेण मुत्पन्नैः कृष्णार्चनपरैर्नरैः॥ स्त्री
भिर्वा कपे न कर्तव्यं स्वपत्युः पुण्यवर्धनं॥ विधवाभिस्तु कर्तव्यं पुत्राणां सुखलब्धये॥ सर्वकाम समृध्य
र्थं कर्तव्यं चैव पांडव॥ नित्यं स्नाने न दाने न कार्तिकी यावदेव तु॥ वैश्वदेवस्तु कर्तव्यो विष्णुध्यानपरायणैः॥
वैश्वदेवः सर्वदेवस्य व्याहृतिहोमो वा कार्यः॥ पापस्य प्रतिमा कार्या रौद्रवक्त्राति भीषणा॥ खड्गहस्त

त्ति विकृत्वा वौ ह्रीदं ष्ट्राकरालिनी तिलप्रस्थो परिस्थाप्या धर्मराजस्य नाममिः॥ यमाय धर्मराजाय इत्याद्यैः इममुच्चार्य मंत्रं गृही
तकुसुमांजलिः॥ यदन्यजन्मनि कृत्तमिहजन्मनि वा पुनः॥ पाप प्रशमायातु तव पादप्रसादतः॥ एवं संपूज्य विधि
वत्प्रतिमां च सकांचनं॥ ब्राह्मणाय प्रदातव्या धर्मो मे प्रीयतामिति॥ तद्वच्च देवदेवस्य कृष्णस्याक्लिष्टकारिणः॥
प्रतिमादेयेत्यनुषंगः॥ कृत्वा पूजां यथाशास्त्रं विप्राणां वेदवेदिनां॥ दद्याद्धिरण्यगांचैव कृष्णो मे प्रीयतामिति॥ अ
न्येषामपि दातव्यं सत्कृत्य च सुवांछितं॥ कृतकृत्यस्ततश्चान्त्यो विरक्तः संयतो भवेत्॥ नीलोत्पलदलश्यामश्चतु
र्दंष्ट्रश्चतुर्भुजः॥ अष्टपादैकनयनः शंकुकर्णो महास्वनः॥ जटी द्विजिह्वस्ताम्राक्षो मृगराजस्तनुच्छदः॥ चिंतनीयो
महादेवो यस्य रूपं न विद्यते॥ व्रतदेवस्य विष्णोरिदं रूपं॥ इदं तीष्मेण कथितं शरतल्पगतेन मे॥ ब्रह्मचारी गृह
स्थो वा वानप्रस्थोप्य वा यतिः॥ प्राप्नोति वैष्णवं स्थानं तत्कृत्वा भीष्मपंचकं॥ ब्रह्महा मद्यपस्तेयी गुरुगामी सदानृ
ती॥ मुच्यते पातकान्मर्त्यः कृत्वेदं भीष्मपंचकं॥ मुच्यते पातकाच्छ्रुत्वा पाठको विष्णुलोकभाक्॥ धन्यं पुण्यं पा
पहरं युधिष्ठिर महाव्रतं॥ यच्चीर्त्वा ब्रह्महा गोघ्नः सर्वपापैः प्रमुच्यते॥ यद्भीष्मपंचकमिदं प्रथितं पृथिव्या
मेकादशी प्रभृति पंचदशी निबद्धं॥ मन्युं न भोजनपरस्य तस्मिन्निष्टफलं दिशति पांडवशार्दूल धन्या॥

१६४ पाद्मे॥ पंचाहपंचगव्याशीभीष्मायार्घ्यंतुपंचसु॥ अहंस्वपितृथादद्यान्मंत्रेणानेन पांडव॥ वैय्याघ्रपाद्गोत्रा
यसांकृत्यप्रवरायच॥ अपुत्राय ददाम्येतज्जलंभीष्मायवर्मणे॥ वसूनामवताराय शंतनोरात्मजायच॥
अर्घ्यंददामिभीष्माय आजन्मब्रह्मचारिणे॥ इतिहेमाद्रौभीष्मपंचकं॥ मार्गकृष्णैकादश्यांवैतरणीव्रतं॥
हेमाद्रौभविष्योत्तरे॥ कृष्णउवाच॥ शरतल्पगतंभीष्मंपर्यपृच्छद्युधिष्ठिर॥ व्रतेचयेनपुण्येनयमलोके
नदृश्यते॥ नारीवापुरुषोवापिलोकंचैवनपश्यति॥ तत्समाचक्ष्वधर्मज्ञपितामहकृपांकुरु॥ भीष्मउवा०
एकादशीवैतरणीतांकृत्वातुसुखीभवेत्॥ यमलोकंनपश्येच्च शोकंचैवनविंदति॥ युधिष्ठिरउवाच॥
केनतातविधानेनकर्त्तव्यासामहाफला॥ पितामहसमाख्याहितद्विधानंममप्रभो॥ भीष्मउवाच॥
एकादशीतिथिःकृष्णामार्गशीर्षगतानृप॥ तासामाघनरःसम्यक्कष्टलीयान्नियमःशुचिः॥ एकादशी
तिथिःकृष्णानाम्नावैतरणीशुभा॥ साव्रतेनमयाकार्यवर्षेनोक्तोपवासिनी॥ मध्यान्हेतुनरःस्नात्वानित्यं
निर्वर्त्तितःक्रियः॥ रात्रौसुरभिमानीयकृष्णामर्चेद्यथाविधि॥ पूर्वामुखाविधातव्याकृष्णागौःकिलभूतले॥
अयपदात्समारभ्यपश्चात्पादद्याविधि॥ गोपुच्छंतुसमासाद्यकुर्याद्वापितृतर्पणं॥ ततःपूजाप्रकर्त्तव्याशा

स्त्रदृष्टिविधानतः॥ गां चैव श्रद्धया युक्तश्चंदनेनानुलेपयेत्॥ गंधतोयेन चरणौ श्रृंगे प्रक्षाल्य शक्तितः॥ ततो
नुपूजयेद्भक्त्या पुष्पैर्गंधाधिवासितैः॥ मंत्रैः पुराणसंप्रोक्तैर्यथास्थाने यथाविधि॥ अथ पूजा॥ गो अग्रपा
दाभ्यां नमः गोः आस्याय नमः॥ गोः शृंगाभ्यां नमः। गोः स्कंदाभ्यां नमः गोः पुच्छाय नमः॥ गोः पादाभ्यां नमः गोः स
र्वांगेभ्यो नमः॥ स्थानेष्वेतेषु गंधांश्च प्रक्षिपेत्पुष्पमानसः॥ पश्चात्प्रदापयेद्धूपं गोर्धूपः प्रतिगृह्यतां॥ धूपः॥
असिपत्रादिकं घोरं नदीं वैतरिणीं तथा॥ प्रसादात्ते तरिष्यामि गोमातस्ते नमो नमः॥ सुखेन तीर्यते यस्मा
न्नदी वैतरणी ध्रुवं॥ तस्मात्केकादशीं कृत्वा नाम्ना वैतरणी भवेत्॥ आनंदकृत्सर्वलोके देवानां च
सदाप्रियः॥ गौस्त्वं पाहि जगंन्नाथे दीपोयं प्रतिगृह्य तां॥ दीपः॥ आछादनं गवे दद्यात्सम्यक् शुद्धं सुनि
र्मलं॥ सुरभिर्वस्त्रदानेन प्रीयतां परमेश्वरी॥ वस्त्रं॥ मार्गशीर्षादिके भक्त्या यावन्मासचतुष्टयं॥ अन्यं नमा
सचतुष्कं तु यानकाशानमेव च॥ श्रावणादिषु मासेषु चतुर्षु दद्याच्च पायसं॥ तदन्नस्य त्रयो भागा गोगुरु
स्वार्थमेव च॥ नैवेद्यं हि मया दत्तं सुरभिः प्रीयतामिति॥ द्वितीयं गुरवे दद्यात्तृतीयं स्वयमेव च॥ मासान्मासं
प्रकुर्वंति मास द्वादशकं व्रतं॥ उद्यापनं ततः कृत्वा पूर्वे संवत्सरे तदा॥ शय्यासतल्लिकाः कार्या दंपत्योः

१६५ परिधानकं॥ सवत्सा कृष्णवर्णा तु धेनुः कार्या पयस्विनी॥ सौवर्णां सुरभिं कृत्वा स्थापयेत्तालिको परि॥ सुर
भीं पूजयेन्मंत्रैः पूर्वोक्तैः संयुतैः॥ ततस्तु गुरवे दद्यात्सर्वं तत्र क्षमापयेत्॥ नारी वा पुरुषो वापि व्रतस्यास्य
प्रभावतः॥ राज्यं बहुविधं भुक्त्वा स्वर्गलोके महीयते॥ भारो लोहस्य दातव्यः कार्पासद्रोणसंयुतः॥
वैतरण्यां सा स्पर्थं ब्राह्मणाय कुटुंबिने॥ ॥इति वैतरणीव्रतं॥ ॥इदं च गुर्जरेषु प्रसिद्धं॥ अ
थास्योद्यापनं॥ शुक्लैकादशीव्रतं हेमाद्रौ भविष्योत्तरे॥ युधिष्ठिर उवाच॥ अथातः कृष्ण मे शुक्लां द्वाद
शीं परमां वद॥ पुरा मया वरीषाच्च श्रुता सर्वमनोरथाः॥ द्वादश्यत्रैकादशीति हेमाद्रिः कृष्णः यद
छितं सफलं जन्म जीवितं च सुजीवितं॥ विनाशं सर्व पापानां सकुर्मा द्वादशीमिमां॥ युधिष्ठिर किमि
ष्टेन शिष्टैरन्यैरनुष्ठितैः॥ दुष्टानि तर दुर्गाणि तोषयस्व च केशवं॥ मार्गशीर्षे सितपक्षे द्वादशीमा
रभेद्दिने॥ यदा वा भक्तिरुत्पन्ना देवदेवं जनार्दनं॥ एकादश्यां मना हरो मासि मास्यर्चयेद्धरिं॥ द्वाद
श्यां द्वादशैतानि नामानि परिकीर्तयेत्॥ ~~एकादश्या मना हसे मासि मास्यर्चयेद्धरिं~~॥ केशवं मार्गशीर्षे
च पुष्ये नारायणं विदुः॥ माधवं माघमासे तु गोविंदं मथ फाल्गुणे॥ चैत्रे विष्णुं तथा विद्याद्वैशाखे मधुसूदनं॥

१६२

त्रिविक्रमं तथा ज्येष्ठे आषाढे वामनं विदुः ॥ श्रावणे श्रीधरं विद्धि हृषीकेशं तु भाद्रके ॥ पद्मनाभं चाश्वयुजि प
श्चाद्दामोदरं विदुः ॥ एवं द्वादशभिर्मासै व्रतं पारं गमिष्यति ॥ व्रतांते ब्राह्मणान् शांतान्मास संख्यान्निमंत्रये
त् ॥ मासनाम्ना तथा देवं पाद्यार्घ्यादिभिरर्चयेत् ॥ द्वादश्यात्र घटाश्चैव तिलपात्रं जलैर्युताः ॥ देयास्तेनो
त्सिसृणोल्लिख्या द्वादशनामभिः ॥ ततो देवस्य पुरतो गोष्ठे वा होममारभेत् ॥ मंत्रेणेदं विष्णुरिति समि
दाज्य घृतौदनैः ॥ तैरेव वयजेत्पश्चान्मंत्रैर्द्वादशनामभिः ॥ धेनुश्चैनानुदातव्या कपिला वा सकोचना ॥
माघस्नानस्य यत्पुण्यं गंगासागरसंगमे ॥ तत्फलं समवाप्नोति श्रुत्वेदं द्वादशीव्रतं ॥ यो द्वादशीव्र
तमिदं विदधाति मर्त्यः सुश्वेत धेनवरदक्षिणमक्रमेकं ॥ तस्याशुभं सकलमाशु विनाशमेति श्रीपद्म
नाभपदपंकजपूजकस्य ॥ इति शुक्लैकादशीव्रतं ॥ अथ कृष्णैकादशीव्रत ॥ हेमाद्रौ वाराहे ॥ ध,
रिण्युवाच ॥ ब्रह्महा हेमहृद्गोघ्नः सुरापो गुरुतल्पकः ॥ कृतघ्नो गरदस्त्रीघ्नोऽग्निदो विश्वस्तमित्रहा ॥
विप्रसाधुसुहृन्मित्र दैववृत्तिहरोधमः ॥ यज्ञहंताग्निहोत्रघ्नः परस्त्रीनिरतोधमः ॥ हत्यादिपापाप
हतापि तुर्वर्णोचितमस्ययः ॥ पतितो नरके घोरे भ्रूतप्रेतत्वमागतः ॥ निवृत्तिं नियते पुंसां यथा तत्तद्ब्रूहि भू

धर॥ वराह उवाच॥ समस्तपातकहरं स्वर्गदं सर्वकामदं॥ न समं कृष्ण द्वादश्या किंचिदस्त्य परं भुवि॥ मार्गशीर्षे कृ
१९६ ष्णपक्षे दशम्यामेकभुक् नरः॥ एकादश्यामुपवसेत् कृष्णस्यार्चां समर्चयेत्॥ सौवर्णीं राजतीं ताम्रां कृष्णमूर्तिं च शु
भृजां॥ अक्षतेषु च कलशं तत्र कृष्णं प्रपूजयेत्॥ स्नात्वा च कृष्णैस्तु तिलैः प्रभाते दद्याच्च सम्यक् तिलपात्र
युक्तं॥ नमोस्तु कृष्णाय पितुश्च मातुर्हत्वात्वघं प्राययतोस्वगत्यै॥ अर्घ्यं दत्वा ततः सम्यक् कृष्णं संपूजये
द्बुधः॥ अश्नीयान्मासि मास्येवं कुर्यात्संवत्सरं व्रती॥ नामानि देवदेवस्य केशवस्य पृथक् पृथक्॥ कृष्णोनं
तोच्युतश्चक्री वैकुंठोथ जनार्दनः॥ उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरिः॥ योगीशः पुंडरीकाक्षो मास
नामान्यनुक्रमात्॥ एतानि प्रातरुत्थाय यः स्मरेत्पुरुषः सदा॥ अपि दुर्गतिगास्तस्य पितरः स्वर्गमाप्नुयुः॥
तिलपात्र द्वादशकं यो दद्यात्प्रत्यहं द्विजे॥ गावश्च कपिला दद्यात् जपेन्नामानि तैः समं॥ मासोपवासि
नां पुण्यं यज्ञनां तीर्थयायिनां॥ स्याज्जपैर्देवदेवस्य प्रत्यहं मासनामभिः॥ प्रतिमासं स्वनाम्नैव पू
जा दानादिकं हरेः॥ स्वनाम्ना पूर्वोक्तं तन्मासनाम्नेत्यर्थः। कृतांते च ततो होमः कार्यस्तैर्देवतापदैः॥
अंते व्रतांते॥ अग्निप्रणयनादूर्ध्वं द्वादशैतान् अनुस्मरेत्॥ द्वादशाश्वत्थपत्रेषु स्थापयेद्घृततंडुलैः॥ १९६

अंतस्मै वम आयातु स इत्यावाहयेत्पृथक्॥ संस्थाप्याग्नि ततः प्राच्यां ध्यायेत्तानात्मसंमुखान्॥ आसनं पाद्यमर्घ्यं
च गंधपुष्पार्चनानि च॥ धूपदीपाश्ववासांसि होमशेषं समापयेत्॥ दत्वा वाजमनं पश्चाद्धोमशेषं निवेदयेत्
पूर्णाहुतौ भवेन्मंत्रैः स्तद्विष्णोः परमं पदं॥ एवं कृते तु होमांते गा कृत्वा द्वादशाष्टवा॥ षट् च तिस्रोथ वा दद्या
एका वापि पयस्विनी॥ हेमशृंगी रौप्यखुरा सघंटाभरणांबरं॥ कांस्यपृष्ठी तथा दोग्ध्री सुवर्णोत्तर दक्षिणा॥ संव
त्सां द्विजमुख्याय पूजयित्वा समर्पयेत्॥ कृत्वा भक्त्या यज्ञात्ताय विधिज्ञाय महात्मने॥ तेन प्रीयतामिति प्रोक्त्वा
देवान्द्वादश मासिकान्॥ मामेवमुद्धरस्वेति गवां वाच्यः प्रतिग्रहः॥ मासि मासि भवेत्तेषु तिलपात्रेषु तैर्घटैः॥
सहार्थस्तती या प्रति मासं युक्तः तिलपात्रदाने प्ययं मंत्र इत्यर्थः॥ तस्मिन्काले प्रदातव्यास्ते घंटामासनामभिः॥
समाप्य तु व्रतं पुण्यं तस्मादर्घ्यं समर्पयेत्॥ सूर्यायेति शेषः समाप्तेस्मिन्व्रते भूय यदभीष्टं तदाप्नुते॥ महारौ
रव पूर्णेभ्यो नरकेभ्यो पितारयेत्॥ स पितृंस्तु सतीर्थेभ्यः स च कल्प शतैरपि॥ ब्रह्महत्यादि पापानां अश्व
मेधेर्भवेत्क्षयः॥ अश्वमेधाद्दयाश्चाद्धा व्रतमेतद्विशिष्यते॥ पितॄणामात्मनश्चैवं तारकं सर्वदामदं॥ नर

१६७

कस्यास्तु ये केचिद्गर्भवासे रणेन्वये ॥ ये बाल्यमरणा ये च भूतप्रेतत्वमागताः ॥ नेष्ठा तिसंततिर्येच मुख्यं तत्तेत

किल्बिषैः ॥ उत्तारयेत्पितृगणानू दशपूर्वान् दशापरान् ॥ आत्मानमेकविंशं च कृष्ण द्वादश्यपोषणात् ॥ ॥ इतिव

राहे कृष्णैकादशीव्रतं ॥ ॥ अथोभयैकादशीव्रतं ॥ ॥ हेमाद्रौ भविष्योत्तरे ॥ युधिष्ठिर उवाच ॥ कृष्ण कृ

ष्ण नमस्त्याता द्वादशीके न हेतुना ॥ किंसा तेन प्रियादेव किंवा ख्यातुं न युज्यते ॥ कृष्ण उवाच ॥ न कस्य

चिन्मयाख्यातं गुह्यमेतदनुत्तमं ॥ महापुण्यप्रदं पार्थ महापातकनाशनं ॥ वांछितार्थप्रदं नृणां श्रुतं पापाप

हारकं ॥ श्रेष्ठं व्रतानां सर्वेषां शुभदं द्वादशीव्रतं ॥ तत्तेहं संप्रवक्ष्यामि समाहितमनाः शृणु ॥ ततो परा(ह्ने) सं

तर्प्य कृत्त संध्यादिकः शुचिः ॥ प्राप्याज्ञां वेदविदुषः पुराणज्ञाज्जितेंद्रियात् ॥ संपूज्य देवदेवेशं दंतधाव

न पूर्वकं ॥ कुर्याच्च नियमं पार्थ गुरुदेवाग्निसंन्निधौ ॥ एकादश्यां निराहारः स्थित्वाहमपरेहनि ॥ भो

क्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत ॥ इत्युक्काथ गुरुं नत्वा पूजयित्वा जनार्दनं ॥ भूमौ स्वपेत् जित

क्रोधः शब्दादिविषये जितः ॥ ततः प्रभाते विमले केशवार्पितमानसः ॥ केशवेति तदा वाच्यं सुतप्रस्खलि

१६७

१६८ ज्ञःसर्वंप्राग्विधिमाचरेत् ॥ स्नानप्राशनदानानिभोजनंतद्वदाचरेत् ॥ ब्राह्मणेभ्यस्तथादद्याद्दक्षिणांपांडुनंदन ॥ ना-
रायणःप्रीयतामित्याचार्यंक्षमापयेत् ॥ अस्यैवपुष्यमासस्यद्वादश्यांकृष्णपक्षतः ॥ वासुदेवेतिसंपूज्यप्रागु-
क्तविधिनानृप ॥ वासुदेवजगन्नाथसर्वकारणकारण ॥ ततोदद्याद्द्विजातिभ्योदक्षिणांश्रद्धयान्वितः ॥ भोज-
नंपूर्ववत्कुर्यात्ध्यानपूजादिकंततः ॥ शुक्लायांमाघमासस्यद्वादश्यांतुविशांपते ॥ माधवेतिजपन्नाम
पूजयेत्पूर्ववद्धरिं ॥ रात्रौजागरणंकुर्यात्पुष्पधूपप्रदीपकैः ॥ पूजयित्वाद्विजश्रेष्ठान्माधवःप्रीयतामिति
प्राशनादिकमप्यत्रपूर्वोक्तविधिनास्मृतं ॥ अस्यैवमाघमासस्यद्वादश्यांकृष्णपक्षतः ॥ प्रद्युम्नेतिजपन्म-
न्त्रःसर्वंप्राग्विधिनाचरेत् ॥ चैत्रस्यामलपक्षेतुद्वादश्यांपांडुनंदन ॥ पंचगव्यजलैःस्नात्वाविष्णुनामानिकी-
र्तयेत् ॥ उपस्थानंतुकुर्वीतभास्करस्यविचक्षणः ॥ यएवभास्करोदेवःसएवविष्णुःप्रकीर्तितः ॥ विष्णुर्भवतुसु-
प्रीतोदेवदेवःसनातनः ॥ भुक्तिमुक्तिप्रदानायतवदत्तोमयांजलिः ॥ इत्युच्चार्यांजलिंक्षिप्त्वागंधपुष्पाक्ष-
तैर्युतं ॥ पूर्ववद्देवमभ्यर्च्यदानंदद्यात्स्वशक्तितः ॥ विष्णुर्मेप्रीयतांदेवोजगद्योनिःसनातनः ॥ अस्मिन्
मासितथाकृष्णद्वादशींविधिनाक्षिपेत् ॥ स्नानेभोजनकालेतुजपन्पुरुषोत्तमं ॥ वैशाखेवामल-
२६८

पक्षेपूजयेन्मधुसूदनं ॥ दक्षिणांगुरवेदद्यात्प्रीयतांमधुसूदनः ॥ मासेऽस्मिन्कृष्णपक्षेतुजपेद्देवमधोक्षजं ॥ ज्ये-
ष्ठमासामलेपक्षेद्वादश्यांपूर्ववन्नृप ॥ स्नानादिसर्वंनिर्वर्त्यपूजयेच्चत्रिविक्रमं ॥ द्विजेभ्योदक्षिणांदद्यात्प्रीय-
तांमेत्रिविक्रमः ॥ इत्युच्चार्यनरव्याघ्रस्वयंभुंजीतपूर्ववत् ॥ ज्येष्ठस्यैवहिकृष्णायांद्वादश्यांतुनृपोत्तम ॥
वामनंपूजयेद्विशांपते ॥ स्नात्वाप्राग्विधिनाभक्त्यानृसिंहंपूजयेद्विभुं ॥ पुष्पैर्धूपैस्तथादीपैर्गंधैर्नै-
वेद्यकैरपि ॥ आषाढस्यैवशुक्लायांद्वादश्यांप्रयतःशुचिः ॥ वामनंपूजयेद्देवंदद्याद्विप्रायदक्षिणां ॥ वा-
मनःप्रीयतांदेवोममनित्यंसनातनः ॥ आषाढस्यैवकृष्णायांद्वादश्यांनृपोत्तम ॥ पूजयेदच्युतंदे-
वंतेनैवविधिनानृप ॥ विप्रायदक्षिणांदद्यादच्युतःप्रीयतामिति ॥ श्रावणस्यतुमासस्यद्वादश्यांशु-
क्लपक्षतः ॥ तत्रपूर्वविधानेनश्रीधरेतिजपन्बुधः ॥ पूजयेद्देवदेवेशंशंखचक्रगदाधरं ॥ विशेषोनव-
नीतंतुतच्चदेयंद्विजातये ॥ श्रीधरःप्रीयतांमेद्याश्रियपुष्णात्वनुत्तमं ॥ इत्युच्चार्यकुरुश्रेष्ठततोविप्राय
विसर्जयेत् ॥ श्रावणस्यैवकृष्णायांद्वादश्यांकुरुनंदन ॥ जनार्दनेतिसंपूज्यप्रतिमांचक्रपाणिनः ॥

१६९ ततोविप्रेषुदातव्यंभोजनंसहदक्षिणं॥जनार्दनःप्रीयतांमेवाक्यमेयदुदीरयेत्॥मासिभाद्रपदेभद्रद्वाद
श्यांशुक्लपक्षतः॥हृषीकेशेतिसंचिंत्यस्तुतप्रस्खलितादिषु॥विशेषेणचदेवंचक्षीरंविप्रेषुपांडव॥हृषी
केशःप्रीयतांमेवाक्यमेतदुदीरयेत्॥कृत्वाप्येवंहिकर्तव्यामासिभाद्रपदेनृप॥उपेंद्रेतिचसंपूज्यप्रतिमां
शार्ङ्गधन्वनः॥आश्वयुक्शुक्लपक्षेतुद्वादश्यांनियतःशुचिः॥पद्मनाभेतिनाम्नैवपूजयेत्प्रतिमांहरेः॥
विप्रान्संभोजयित्वाचतेभ्योहेमस्वशक्तितः॥प्रीयतांपद्मनाभोमेइतिवाचमुदीरयेत्॥आश्वयुक्शुक्लप
क्षेतुद्वादश्यांभक्तिमान्नरः॥उपोष्यविधिनानेनहरमित्यंप्रपूजयेत्॥हरिर्मेप्रीयतांदेवोमंत्रमेतदु
दीरयेत्॥कार्त्तिकस्यतुमासस्यद्वादश्यांशुक्लपक्षतः॥आद्येनविधिनासर्वंस्नानादिविनिवर्त्यच॥दा
मोदरेतिसंपूज्यमूर्त्तिंदेवस्यचक्रिणः॥कृत्वाप्येवंतुनिर्वर्त्यद्वादशींकार्त्तिकेतदा॥कृष्णेतिनाम्नासं
पूज्यदेवदेवस्यचक्रिणः॥प्रागुक्तोऽस्यविधिंपार्थविशेषात्तुविधीयते॥अत्रदेयानिदानानिषोडशैव
विदुर्बुधाः॥गोलक्षंगोसहस्रंवागोशतंद्वादशीवगाः॥तुलापुरुषदानानिमुख्यानिविधिवत्तदा॥ १६९

नादिषु॥पाखंडादिभिरालापंदर्शनंस्पर्शनंतथा॥त्यजेद्दिनत्रयंपार्थव्रतेवैकल्यकारकं॥ततोमध्याह्नसमयेनत्वा
दौविमलेजले॥स्नानंकुर्याज्जितक्रोधःपंचगव्यपुरःसरं॥आदित्यायनमस्कृत्यकेशवंशरणंव्रजेत्॥स्ववर्णचा
रविधिनाकृतकृत्योगृहंव्रजेत्॥पूजयेत्तत्रगोविंदंकेशवेतिजयन्बुधः॥पुष्पधूपैस्तथादीपैर्नैवेद्यैर्वि
विधैरपि॥गीतकथाभिश्चजागरंकारयेन्निशि॥कुंभंसंस्थापयित्वातुरत्नगर्भंसकांचनं॥छादितंवस्त्रयुग्मे
नधूपितंचंदनचर्चितं॥गंधमाल्यसमायुक्तंदीपैर्दिक्षुस्वलंकृतं॥कुंकुमाक्तांनगंदेशेसितचंदन
चर्चितं॥प्रतिमांदेवदेवस्यशंखचक्रगदाभृतं॥कृत्वाचपूजयेत्यथान्यायंप्रभातेविमलेसति॥द्वादश्यां
कृतकृत्यस्तुसमभ्यर्च्यजगद्गुरुं॥विप्रायदद्यात्कलशंदक्षिणापावकान्वितां॥पावकंसुवर्णं॥संभोज्यविप्र
मुख्यायदद्याच्छक्त्याचदक्षिणां॥भृत्यान्संभोजयित्वातुदत्वागोषुगवाह्निकं॥पंचगव्यंतुसंप्राप्यस
यंभुंजीतवाग्यतः॥अनेनविधिनामासितस्मिन्कृत्वामुपोषयेत्॥द्वादशीपुरुषव्याघ्रध्यायन्संकर्ष
णंविभुं॥प्रागवत्सर्वंततःकृत्वाब्राह्मणायनिवेदयेत्॥भोजयित्वाद्विजश्रेष्ठंदद्यात्तस्मैचदक्षिणां॥भुं
जीतवाग्यतःपश्चात्पंचगव्यकृताशनः॥एवंपोषेत्तुसंकल्पद्वादश्यांशुक्लपक्षतः॥नारायणंजपन्प्रा

देयानि विप्रमुख्येभ्यो व्रतांते समुपस्थिते॥ चंद्रसूर्योपरागे ति कुरुक्षेत्रे कुरूत्तम॥ हेमभारव्रतं दत्वा तत्फलं त
द्दिने भवेत्॥ उभयद्वादशीयोगात् श्रद्दधानो नरोत्तम॥ कुलान्युद्धृत्य सप्तैव विष्णोः सायुज्यतां व्रजेत्॥ एतदुद्देश
तः प्रोक्तमुभयद्वादशीफलं एतत्पुण्यं पवित्रं च व्रतानामुत्तमं व्रतं॥ नाशिष्याय प्रदातव्यं वचानुश्रूषवे क्वचित्॥
इदं हि यः पार्थ नरो महात्म्यं श्रृणोति यो भक्तियुतः पठेद्वा॥ विमुक्तपापः स निहत्य दुःखं प्रयाति सान्निध्यमनं
तमूर्तेः॥ इति भविष्योत्तरोक्तमुभयैकादशीव्रतं॥ इयमेवाभवेत्युच्यते गुर्ज्जरैः॥ ॥इति श्रीमीमांसकभ
ट्टनीलकंठात्मज शंकरकृतौ व्रतार्के एकादशीव्रतानि॥ अथ द्वादशीव्रतानि॥ तत्र भाद्रशुक्लद्वादश्यां श्र
वणद्वादशीव्रतं॥ तच्चैकादशीयुत द्वादश्यां श्रवणयोगे कार्यं। तथा च मात्स्ये॥ द्वादशी श्रवणस्पृष्टा स्पृशे
देकादशी यदि॥ स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितः॥ तस्मिन्नुपोष्य विधिवन्नरः संक्षीणकल्मषः॥
प्राप्नोत्यनुत्तमां सिद्धिं पुनरावृत्ति दुर्लभां॥ विष्णुधर्मेपि॥ एकादशी द्वादशी च वैस्वयमपि नक्षत्रं चेत्॥ तद्विष्णु
शृंखलं नाम विष्णुसायुज्यकृद्भवेदिति॥ तदा तत्रैणैकादशी द्वादश्योरुपवासः कार्यः॥ यदा श्रवणमेका

१७०

शीसंस्पृश्य द्वादशीं स्पृशति तदा प्रशस्तेत्युक्तं नारदीये ॥ संस्पृश्यैकादशी राजन् द्वादशीं यदि संस्पृशेत् ॥ श्र
वणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहतीति यत्तूदयव्यापिनी ग्राह्या ॥ श्रवणद्वादशीव्रते इति बृहन्नारदीयवच
नं तत्सर्वं घुः श्टं खलु योगाभावे दिनद्वये च श्रवणयोग उदयकाले च परदिन एव तद्योस्तदा सावकाश
मतो न तद्योगउपवासविधायकं द्वादश्यां श्रवणाभावे नारदीये यद्दानप्राप्यते कृत्स्नं द्वादश्यां वैष्णवं क्व
चित् ॥ एकादशी तद्दोपोष्या पापघ्नी श्रवणान्विता ॥ उपवासद्वयसामर्थ्ये तूपवासद्वयं कार्यं ॥ तदुक्तं भविष्ये
एकादशीमुपोष्यैव द्वादशीं समुपोषयेत् ॥ न चात्र विधिलोपः स्यादुभयोर्देवता हरिः ॥ विधिलोप एकाद
शीपारणहानिकृतः ॥ उपवासद्वयासामर्थ्ये कृते काद्दशीव्रतसंकल्पस्य श्रवणद्वादश्युपवासफल
प्रेप्स्यो श्वां काम्यं नित्यस्य बाधकमिति न्यायेन प्राप्तस्य श्रवणद्वादश्युपवासस्य बाधो नास्त्ये ॥ द्वादश्यां
शुक्लपक्षे तु नक्षत्रं श्रवणं यदि ॥ उपोष्यैकादशीं राजन् द्वादश्यां पूजयेद्धरिमिति ॥ तादृशस्या कृतैका
दश्युपवासव्रतसंकल्पस्य काम्यं नित्यस्य बाधकमिति न्यायात्प्राप्तश्रवणद्वादश्यामेवोपवासस्या

१७०

णेहेमाद्रुदाहृतैर्दशम्यामेकभक्तश्च मांसमैथुनवर्जित इत्यादिवचनैरेकादशीव्रतप्रकस्य त्रिदिनसाध्यत्वा
वगत्या श्रवणयुक्तद्वादशीव्रतं पुण्डवत्प्रसंगीतितंत्रप्रसंगितो विरोधतंत्रिणो बलवत्वे नद्वादश्यामेवकार
णं कार्यमित्यपास्तं॥ ॥ अथ कथा॥ अग्निपुराणे॥ मैत्रेय उवाच। विधानं शृणु राजेंद्र यथा दृष्टं मनीषि
णः॥ यथोक्तं नियमं कुर्यादेकादश्यामुपोषितः॥ दंतकाष्ठं प्रगृह्याथ वाग्यतो नियतेंद्रियः॥ श्रवणद्वाद
शीयोगे समुपोष्य जनार्दनं॥ अर्चयेत्तु विधानेन त्रयोदश्यां परेहनि॥ नदीनां संगमे स्नात्वा दर्चयेद्वा
मनं॥ सौवर्णं वस्त्रसंयुक्तं द्वादशांगुलमुच्छ्रितं॥ पीतवस्त्रैः शुभैर्वेष्ट्य भृंगारे निर्व्रणे नवे॥ हिर
ण्मयेन पात्रेण अर्घ्यपात्रं प्रकल्पयेत्॥ दध्यक्षतफलैश्चैव सहिरण्यं सचंदनं॥ पूजा प्राग्वत्ततः नमस्ते
पद्मनाभाय नमस्ते जलशायिने॥ तुभ्यमर्घ्यं प्रयच्छामि बालवामनरूपिणे॥ नमः कमलकिंजल्क
पीतनिर्मलवाससे। महाहवरिपुस्कंधघृष्टचक्राय चक्रिणे॥ नमः शार्ङ्गशिखबाणपाणये वामनाय
च॥ यज्ञभुक्फलदात्रे च वामनाय नमो नमः॥ मत्स्यकूर्मवराहाय नरसिंहस्वरूपिणे॥ रामरामाय

१७१

रामाय वामनाय ० श्रीधराय नमस्तेस्तु नमस्ते गरुडध्वज॥ चतुर्बाहो नमस्तेस्तु नमस्ते धरिणीधर॥ एवं संपूज्य विधि
वन्नैवेद्यस्कंदनादिभिः॥ रात्रौ जागरणं कुर्यात्सुरतो जलशायिनः॥ ध्यात्वा जलमयं रूपं देवदेवस्य चक्रिणः॥
ब्रह्मांडमुदरे यस्य महद्भूतैरधिष्ठितं॥ मायावी वामनः श्रीशः स्तोत्रयातु जगत्पतिः॥ एवं संपूज्ययित्वा तं द्वा
दश्यामुदये रवेः॥ भृंगारसहितं तत्तु ब्राह्मणाय निवेदयेत्॥ वामनः प्रतिगृह्णाति वामनोहं ददामि ते॥ वाम
नः सर्वतोभद्रं द्विजाय प्रतिपादयेत्॥ जलधेनुं तथा दद्याच्छत्रं चैवं तु पादुके॥ सहिरण्यानि वस्त्राणि द्वधे
नुं तथा नृप॥ यत्किंचिद्दीयते तत्र तद्दानं त्यायकल्पत॥ श्रवणद्वादशीयोगे संपूज्य गरुडध्वजं॥ दत्वा दा
नं द्विजातिभ्यो वियोगे पारणं ततः॥ सिंहस्थिते तु मार्तंडे श्रवणस्थे निशाकरे॥ विष्णुधर्मोत्तरे॥ या राम
श्रवणोपेता द्वादशी महती तु सा॥ तस्यामुपोषितः स्नात्वा पूजयित्वा जनार्दनं॥ प्राप्नोत्ययत्नाद्धर्मज्ञ द्वा द्वादश
दशीफलं॥ दध्योदनयुतं तस्यां जलपूर्णं द्विजे घटं॥ वस्त्रसंवेष्टितं दत्वा छत्रोपानहमेव च॥ न दुर्गतिमवा
प्नोति गतिमग्र्यां च विंदति॥ अक्षयं स्थानमाप्नोति नात्र कार्या विचारणा॥ श्रवणद्वादशीयोगे बुधवारो भ

१७२

वेद्यदि॥ अत्यंतं महती नाम द्वादशी सा प्रकीर्तिता॥ स्नानं जप्यं तथा दानं होमश्राद्धं सुरार्चनं॥ सर्वमक्षयमा
प्नोति तस्यां भृगुकुलोद्वह॥ तस्मिन्दिने तथा स्नातो यत्र क्वचन संगमे॥ सगंगास्नानजं राम फलं प्राप्नोत्यसं
शयं॥ श्रवणासंगमाः सर्वे परतुष्टिप्रदाः सदा॥ विशेषाद्द्वादशीयुक्ते बुधयुक्ते विशेषतः॥ तथैव द्वादशी प्रो
क्ता बुधश्रवणसंयुता॥ तृतीया च तथा प्रोक्ता सर्वकामफलप्रदा॥ नदा तृतीया धर्मज्ञ तथा पंचदशी शु
भा॥ अत्रैव वर्तते नभस्ये फाल्गुने मासि यदि वा द्वादशी भवेत्॥ शुद्धश्रवणसंयुक्ता संगमे विजया स्मृता॥
वारिधानीं प्रदास्यामि दध्योदनसमायुतां॥ प्रेतमोनौ न जायेत प्रजयित्वा च वामनं॥ वंशाः समुद्धृताः स्ते
न मुक्ताः पितृऋणादसौ॥ नमस्ये संगमे त्वा वामनो येन पूजितः॥ भविष्योत्तरे॥ युधिष्ठिर उवाच॥ उ
पवासासमर्थानां सदैव पुरुषोत्तम॥ एकाया द्वादशी पुण्या तां वदस्व ममानघ॥ श्रीकृष्ण उवाच॥ मासि
भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥ सर्वकामप्रदा पुण्या उपवासे महाफला॥ संगमे सरितां स्नात्वा द्वाद
शीं समुपोषितः॥ समग्रं समवाप्नोति द्वादशीफलं। साधनुर्द्वादशी ज्ञेया नस्याद्भाद्रपदाद्दते॥ दशम्येका

१७२

न्नुपवासाद्दोनारदीये॥ उपोष्य द्वादशी पुण्या विष्णुऋक्षेण संयुता॥ एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशय
मिति॥ यएतद्व्रतपारणं तु पारणाहं भयात्तु ष्टत्तत्नुभयांतइति मुख्यः कल्पः॥ तथा च स्कांदे॥ तिथिनक्ष
त्रनियमे तिथिभांते च पारणं अतोन्यथा पारणायो व्रतभंगमवाप्नुयात्॥ अन्यतरांतस्य तु कल्पः॥ यत्तु
तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्॥ पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः॥ ततः पारणकं कुर्या देवं देवविदो
विदुरिति नारदीयाभ्यामन्यतरांतस्य सांगिके व्रते भय॥ कुतुमल्दक्षत्तमुकं नक्षत्रं णो रोहिणीशिनि
मदनरत्नधृतवचने श्रवणरोहिण्योः पर्युदासात्॥ अथ च पर्युदास श्रवणयोगानिमित्त व्रतपारणायामु
भयांत पक्षस्य घातको न त्वेकांतमात्रे पारणाधिक्ये श्रवणं विहाय त्रयोदशीमध्ये तदुक्तं वह्निपुराणे॥ पा
रणं तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात्॥ उडुवृद्धौ त्रयोदश्यां तत्र दोषो न विद्यत इति॥ एतेन यद्वा तिथ्य
पेक्षया नक्षत्राधिक्ये पारणादिने भवति तदेकादशीव्रतपारणायां द्वादश्यालंघने दोषात् श्रवणद्वाद
शीव्रतपारणायास्तूभयांते न्यतरांते वा कर्तव्यत्वाद्विरोधप्रसक्तिः॥ तस्याश्च सामिकादशीव्रत प्रकर

दशीयत्रसानोपोष्याभवेत्तिथिः॥ श्रवणेनतुसंयुक्तासाशुभासर्वकामदा॥ पारणंतिथिवृद्धौतुद्वादश्यामुडुसंक्ष
यात्॥ वृद्धौकुर्यात्त्रयोदश्यांतत्रदोषोनविद्यते॥ इत्येषाकथितताराजन्द्वादश्यांश्रवणेमया॥ कर्त्तव्यासाप्र
यत्नेनइहामुत्रफलप्रदा॥ इतिहेमाद्रौश्रवणद्वादशीव्रतं॥ विष्णुरहस्ये॥ द्वादश्यामुपवासोत्रत्रयोद
श्यांतुपारणं॥ निषिद्धमपिकर्त्तव्यमित्याज्ञापरमेश्वरी॥ तथा॥ बुधश्रवणसंयुक्तासैवचेद्द्वादशीभवेत्
अतीवमहतीतस्यांसर्वंकृतमिहाक्षयं॥ द्वादशीश्रवणोपेतायदाभवतिभारत॥ संगमेसरितां
स्नात्वागंगादिस्नानजंफलं॥ सोपवासःसमाप्नोतिनात्रकार्याविचारणा॥ जलपूर्णंतदाकुंभंस्थापयि
त्वाविचक्षणः॥ पंचरत्नसमोपेतंसोपवीतंसुचर्चितं॥ सितवस्त्रयुगच्छन्नंछत्रोपानद्युगान्वितं॥ ॐनमो
भगवतेवासुदेवायशिरःसंपूजयेत्ततः॥ श्रीधरायमुखंतद्वत्कुंठायदशेनमः॥ नमःश्रीपतयेवक्षं
भुजौसर्वास्त्रधारिणे॥ व्यापकायनमःकुक्षिंकेशवायोदरंनमः॥ त्रैलोक्यजनकायेतिमेढ्रंसंपूज

येध्रसे॥ सर्वाधिपतयेजंघेपादौसर्वात्मनेनमः॥ अनेनविधिनाराजन्पुष्पधूपैःसमर्चयेत्॥ ततस्तस्याग्रतो
देवीनैवेद्यंघृतपाचितं॥ मोदकांश्चनवान्कुंभान्शक्त्यादद्याच्चदक्षिणां॥ एवंसंपूज्यगोविंदंजागरंतत्रका
ज्य रयेत्॥ प्रभातेविमलेस्नात्वासंपूज्यगरुडध्वजं॥ पुष्पधूपादिनैवेद्यैःफलैर्वस्त्रैःसुशोभनैः॥ पुष्पांजलिंततो
दत्वामंत्रमेतमुदीरयेत्॥ नमोनमस्तेगोविंदबुधश्रवणसंज्ञक॥ अघौघसंक्षयंकृत्वासर्वसौख्यप्रदो
भव॥ अनंतरंब्राह्मणेषुवेदवेदांगपारयेत्॥ पुराणज्ञेविशेषेणविधिवत्तंप्रदापयेत्॥ प्रीयतांदेवदेव
शोममनित्यंजनार्दन॥ अनेनैवविधानेननद्यांस्त्रीवानरोत्तमः॥ सर्वंनिवर्त्तयेत्सम्यगेकभक्तरतोपि
सन्॥ श्रीकृष्णउवाच॥ अत्राप्युदाहरंतीममितिहासंपुरातनं॥ महत्पुराण्यमयवृत्तंभूमिपालश्रृणुष्व
त्॥ देशोदशार्णकोनामतस्यभागेतुपश्चिमे॥ अतीवासीन्मरुदेशःसर्वसत्वभयंकरः॥ सुतप्तसि
कताभूमिर्यत्रकृष्णामहोरगाः॥ अल्पछायद्रुमाकीर्णोमृतप्राणिसमाकुलः॥ शमीखदिरपालाशक

देशे प्रवेशो भवतः कथं ॥ तमुवाच वणिक् धीमान् समर्थो नष्टगोवशः ॥ प्रवेशो दैवयोगेन कष्टकर्म कृतेन तु ॥
तस्मामे बाधते त्वार्थं क्षुत् तृष्णा च भृशं तया ॥ प्राणाः कंठमनुप्राप्ता वचनं नश्यती व मे ॥ अत्रोपायं न पश्या
मि जीवेयं येन केन चित्तु ॥ प्रेत उवाच ॥ एवमुक्तः प्रेतस्तु वणिजं वाक्यमब्रवीत् ॥ पुंनागमिमम्मा
श्रित्य प्रतीक्षस्व मुहूर्त्तकं ॥ कृतातिथ्यो यथा पश्चाद् गमिष्यसि यथासुखं ॥ एवमुक्तस्तथा चक्रे स व
णिक् तृट्क्षुधार्दितः ॥ मध्यान्हसमये प्राप्ते ततः संदेशमागतः ॥ पुंनागवृक्षात् छीतोदा वारिधानी म
नोरमा ॥ दध्योदनस्य भक्तेन वर्धमानेन संयुता ॥ अवतीर्य ततः सोयं ददावतिथये तदा ॥ तेषा
मामंत्रणो वाणिक्पुरां तृप्तिमुपागतः ॥ पितृस्तो विजाश्चैव क्षणेन समपद्यत ॥ ततस्तु प्रेतसंघस्तस्मा
द्वागत्र मादद्दो ॥ दध्योदना त्वया नीया तेतास्तु तृप्तिं परां गताः ॥ अतिथिं तर्पयित्वा च प्रेतलोके च स
र्वशः ॥ ततः स्वयं च बुभुजे भुक्तशेषं यथासुखं ॥ तस्य भुक्तवतस्त्वन्नं पानीयं वदृश्ययं ययौ ॥ प्रे ७४

ताधिपं ततस्तु प्रेतं वणिग्वचनमब्रवीत् ॥ आश्चर्यमेतत्परमं वनेस्मिन् प्रतिभाति मे ॥ अन्नपानस्य संप्राप्तिः प
रमस्य कुतस्त्वया ॥ स्तोकेन च तथान्नेन विप्राः प्राप्ता निर्जले वने ॥ तृप्तश्चासि कथं ग्रासमात्रेण वदशुभोब्रवीत् ॥ शयो
शृणु भद्र प्रवक्ष्यामि दुष्कृतं कर्म चात्मनः ॥ शाकले नगरे रम्ये नास्तिकस्य दुरात्मनः ॥ धनलोभात्त था
तत्र कदाचित्प्रमेदरिता ॥ न दत्ता भिक्षवे भिक्षा तृष्णायां तु कदाचन ॥ प्रतिवेश्यस्तु तत्रासीद् ब्राह्मणो गु
णवान् मम ॥ श्रवणद्वादशीयोगो मासि भाद्रपदे तथा ॥ स कदाचिन्मया सार्धं तापीनाम नदीं ययौ ॥
तस्यास्तु संगमः पुण्यो यत्रासीच्चंद्रभागया ॥ चंद्रभागा सोमसुता तापी चार्कनंदिनी ॥ तयोः शीतो
ष्ण सलिले संगमे स्तु मनोहरे ॥ तत्तीर्थवरमासाद्य प्रतिवेश्यस्तु मे द्विजः ॥ श्रवणद्वादशीयोगे स्ना
नं श्रीवत्तथोषितः ॥ चंद्रभागस्य तोयस्य वारिधान्यो नवा दृढाः ॥ दध्योदनयुतैः सार्धं संपूर्णे वर्धमा
नकैः ॥ छत्रोपानद्युगं वस्त्रं प्रतिमां विधिवत्परैः ॥ प्रददौ विप्रमुख्याय रहस्यज्ञो महामुनिः ॥ वित्त

१७५ संरक्षणार्थाय तस्यापि चत्ततो मया ॥ सोपवासे न दत्तावै वारिधानी सुशोभना ॥ चांद्रभागविप्राय दध्यो
दनयुता तदा ॥ एवं गृहे प्राप्तः ततः कालेन केनचित् ॥ पंचत्वमहमासाद्य नास्ति क्वापि प्रेतत्वं आगतः ॥
तस्यामटव्यां घोरायां यथा दृष्टस्त्वयानघ ॥ ब्रह्मस्वहारिणस्त्वेते पापाः प्रेतत्वमागताः ॥ परदाररताः
केचित्स्वामिद्रोहरताऽपरे ॥ यद्दीयते तमुद्दिश्य अक्षयं तत्र कीर्तितं ॥ मया विहीनाः किं त्वेते वने
स्मिन्नत्र दारुणे ॥ पीडामनुभविष्यन्ति दारुणां कर्मयोनिजां ॥ एतेषां तु महाभाग ममानुग्रहकाम्य
या ॥ अनेकनामगोत्राणि गृह्णीयास्त्वखिलेन च ॥ अस्ति कस्यागतान्वेवत्त त्वसंपुटिकाशुभा ॥ हि
मवंतमयासाद्य तत्र त्वं लप्स्यसे निधिं ॥ गयाशीर्षं ततो गत्वा श्राद्धं कुरु महामते ॥ एकमेकमथो
द्दिश्य प्रेते प्रेते यथासुखं ॥ एवं संभाष्य मारागास्तत्प्रजां ब्रूनदग्रभाः ॥ समारुह्य विमाने सौ स्वर्गलो
कमितो गतः ॥ स्वर्गे तु प्रेतनाथेन प्रभावात्स वणिक्क्रमात् ॥ नामगोत्राणि संगृह्य प्रययौ तत्सहि
मावलं ॥ तत्र प्राप्य निधिं गत्वा विनिक्षिप्य स्वके गृहे ॥ धनभागमुपादाय गयाशीर्षे वटं ययौ ॥ १७५

रीरैश्च समीलुभिः ॥ तत्र भीमद्रुमैः पार्थ कंटकैरावृतो दृढः ॥ गंधप्राणीगणाकीर्णो तत्र भूर्दृश्यते क्वचित् ॥ अनेका
क नाप विंसाभीषणपुरुषाश्वराः ॥ ज्वलिताग्निसमप्रख्यं यत्किंचित्तत्र दृश्यते ॥ तथापि जीवाजीवंति सर्वकर्मनिबं
धनाः ॥ नोदकं नोल्वषा भीमाराजंस्तत्र बल्गाहकाः ॥ कदाचिदपि दृश्यंते प्लवमाना विहंगमाः ॥ सकोंतारागते क
श्चिच्छिसुभिः स्त्वषितैः समं ॥ सेकते षेवनश्यंति जल्लैः सैकतसेतुवत् ॥ तस्मिंस्तथाविधे देशे कश्चिद्दैव
वशाद्वणिक् ॥ निजसार्थपरिभ्रष्टः प्रविष्टो मरुजंगले ॥ दृष्ट्वान्मलिनान्वृक्षान्विमंन्निभीमदर्शनात् ॥ ख
बभ्रामोभ्रांतहृदयः क्षुत्तृष्णाश्रमकर्षितः ॥ क्व ग्रामः क्व जनः क्वाहं यास्यामि बऊधीरपि ॥ अथ प्रेतान् दद
र्शासौ तृष्णाव्याकुलितेंद्रियः ॥ स्नायुबद्धास्थिवरणान्धावमानानितस्ततः ॥ प्रेतस्कंधसमारूढमेकं वि
कृतदर्शनं ॥ ददर्श बहुभिः प्रेतैः समंतात्सरिवारितं ॥ आगच्छन्तं शवभक्षी सस्कतिशाबृपुरःसरं ॥ प्रेतः
स्कंधान्महीं गत्वा तस्यांतिकमुपागमत् ॥ सो भक्षिवा वणिक्श्रेष्ठमिदं वचनमब्रवीत् ॥ अस्मिन्घोरतरे

प्रेतानांक्रमशस्तत्र चक्रे श्राद्धं दिने दिने ॥ यस्य यस्य यथा श्राद्धं स करोति दिने वणिक् ॥ स स तस्य तदा स्व
प्नेदर्शयत्यात्मनस्कृतं ॥ अब्रवीति च महाभाग प्रसादेन तवानघ ॥ प्रेतभावमिमं त्यक्त्वा प्राप्तोस्मि प
रमां गतिं ॥ स कृत्वा धनलोभेन प्रेतानां सद्गतिं वणिक् ॥ जगाम स्वगृहं तत्र मासि भाद्रे युधिष्ठिर ॥
चकार विधिवद्दानं ततो दिष्टांतमागतः ॥ अवाप परमं स्थानं दुर्लभं सर्वमानवैः ॥ यत्र कामफलावृ
क्षा नद्यः पायसकर्दमाः ॥ शीतलामलपानीयाः पुष्करिण्यो मनोरथाः ॥ तं देशमासाद्य वणिक्म
हात्मा सुपुष्पजाच्चनदृश्यपि तीगः ॥ कल्पं समग्रं सुरसुंदरीभिः स्वर्गे स्थिरं रमे मुदितः सदैव ॥ बुधः श्रवण
संयुक्ता द्वादशी सर्वकामदा ॥ दानं दद्याद्दानं शस्तमुपवासः परो विधिः ॥ सदैवं गरेण कृकुल्छे धुंधु
मारपागाधिन ॥ एतेश्चान्यैश्च राजेंद्र कामदा द्वादशी कृता ॥ या द्वादशी बुधयुता श्रवणेन सार्धं सा
वैजयंती कथिता मुनिभिस्ये ॥ तामादरेण समुपोष्य नरो हि सम्यक् प्राप्नोति सिद्धिमणिमा

द्विगुणोपपन्नां॥ इतिहेमाद्रौभविष्योत्तरेश्रवणद्वादशीव्रतं॥ ॥हेमाद्रौभविष्योत्तरे॥ कृष्णउवाच
द्वादश्यास्तुविधिःप्रोक्तःश्रवणेनयुधिष्ठिर॥ सर्वपापप्रशमनःसर्वसौख्यप्रदायकः॥ एकादशीयदासास्या
त्तुश्रवणेनसमन्विता॥ विजयासातिथिःप्रोक्ताभक्तिनामभयंप्रदा॥ पुरादेवगणैःसर्वैःसमेत्यचयु
धिष्ठिर॥ सावरःप्रार्थितोविष्णुरिंद्राग्न्यनिलसंयुतैः॥ चनवानितिलोदैत्योबलिर्नाममहाबलः॥
तेनदेवगणाःसर्वेपराजितानिजमंदिरं॥ त्वंगतिःसर्वदेवानांशीघ्रंकुरुष्वमुक्षर॥ जहिदैत्यंमहाबा
हुबलिंबलवत्तांवर॥ श्रुत्वाविष्णुस्तदावाक्यंदेवानांकरुणोदयं॥ उवाचवाक्यंवाक्यज्ञोदेवानां
हितकाम्यया॥ जातेवैरोचनेपुत्रेबलित्रैलोक्यशांकिते॥ तपसाभावितात्मानंशांतंदांतंजि
तेंद्रियं॥ सद्भक्तंमद्गतप्राणंसत्यसंधंमहाबलं॥ प्रजायंतिसमंस्वात्मा प्रजानांप्रियकारकं॥ न
गुणास्तस्यशक्यंतेवक्तुंतेनापिभूतले॥ अवश्यंतपसोयत्तेर्प्राक्तव्यंतपसःफलं॥ तपसोंत १७६

स्कबहुनाकालेनास्यभविष्यति॥ यदाविजयदैदैत्यं ज्ञास्येकालेनकेनचित्॥ समाहृत्यश्रियं तस्यतवदास्येदिवौ
कसां॥ अदितिर्मेप्रयत्नाद्वैपुत्रार्थेपुत्रगंधिनी॥ तस्यामनीषितं देवकार्यं विष्णुरचिंतयेत्॥ संचिंतयित्वासुवि
रंदेव्यागर्भावधारणं॥ अदितिं वारयामास वांछितंतेभविष्यति॥ अथकाले बहुतिथिगते सागुर्विणीभवेत्॥
सुषुवेनवमेमासिपुत्रंसा वमनंहरिं॥ ह्रस्वपादंह्रस्वकायं महाशिरसमर्भकं॥ पाणिपादोदरह्रस्वांह्रस्वजंघो
दितिर्मोदमापन्ना रूकेसरं॥ दृष्ट्वातुवामनंजातं मोक्षिते मोदनंतथा॥ भयंवभूवदैत्यानां देवतास्तोषमागमन्॥ जातकादीन्
शुभकरान्संस्कारान्स्वयमेवह॥ चकारकश्यपोधीमान्प्रजापतिसमन्वितः॥ आबद्धमेखलोदंडी
जटीयज्ञोपवीतिवान्॥ कुशाचर्माजिनधरःकमंडलुविभूषितः॥ बलेर्बालवतोयज्ञंजगामबहुविस्त
रं॥ दृष्ट्वादैत्यबलंसर्वंवामनोप्यथ्येत्यतत्क्षणात्॥ अर्थनाहंयज्ञपतयेदीयतांममभेदिनी॥ पदत्रय
माणेनपदनार्थेस्थितोस्महं॥ दत्तादत्तत्त्वतथाबलिःप्राहद्विजोत्तमं॥ ततोवर्धितुमारब्धोवामनेन

तविक्रमः॥पादौभूमौप्रतिष्ठाप्यशिरसाहृत्यरोदसी॥नाभ्यांस्वर्गादिकान्लोकान्ललाटेब्रह्मणःपदं॥नतती
यंपदंलभेजातोनेंदुर्दिवौकसः॥तंदृष्ट्वामहदाश्चर्यंसिद्धादेवषयःस्तथा॥साधुसाध्वितिदेवेशंप्रशशंसुर्मु
दान्विताः॥ततोदैत्यगणान्सर्वान्जित्वात्रिभुवनंवशी॥बलिंप्राहचमांगच्छपातालंस्वबलानुगः॥तत्रत्वमी
प्सितान्भोगान्भुक्त्वामद्बाहुपालितः॥अस्यद्वद्वयवसेनेतुत्वमेवेंद्रोभविष्यसि॥एवमुक्तोबलिःप्रायान्न
मस्कृत्यनरोत्तमां॥विसर्ज्यबलिंदेवोलोकपालान्नुवाचह॥स्वानिधिष्ण्यानिगच्छध्वंतिष्ठध्वंविगतज्व
राः॥देवेनोक्तागतादेवाःप्रहृष्टाःपूज्यवामनं॥दैवैःकृत्वाद्भुतंकार्यंतत्रैवांतरधीयत॥एतत्सर्वंसमभवद्द्वा
दश्यांनराधिप॥तेनेष्टादेवदेवस्यसर्वथाविजयातिथिः॥एवंचफाल्गुनेमासिपुष्येणसहितानृप॥विजयाप्रोच्य
तेसद्भिःकोटिकोटिगुणोत्तरा॥एकादश्यांसोपवासोरात्रौसंपूजयेद्धरिं॥शेषेसौवर्णंपात्रंवादारवंशाम
यपिवा॥सौवर्णंवामनंकुर्यात्स्ववित्तस्यानुसारतः॥शिखीकमंडलुधरःछत्रीयज्ञोपवीतवान्॥एवंलक्षण
संपन्नंवामनंपूजयेद्धरिं॥ओं पात्रंवासोपिरहत्तैःफलसंयुतैः॥तिलाढकेनसंपूर्णंप्रस्थेनकुडवेन

न्निबोधमे॥ यावत्कल्पशतंपूर्णमेकं वसति संख्यया॥ प्राप्य विष्णुपुरं भोगान्भुंजते कालमक्षयं॥ इहाग
त्य भवेद्राजाराजभिः सुसेवितः॥ सर्वांगपूजा॥ धूपोयं देवदेवेश शंखचक्रगदाधर॥ अच्युतानंत गोविंद
वासुदेव नमोस्तुते॥ धूपः॥ त्वमेव पृथिवीज्योतिर्वायुराकाशमेव च॥ त्वमेव ज्योतिषां ज्योतिर्दीपोयं प्र
तिगृह्यतां॥ अन्नं चतुर्विधं स्वादुरसैः षड्भिः समन्वितं॥ मया निवेदितं देव प्रसीद परमेश्वर॥ अग्निर्यो
मो वैश्रवणः पापं मे हंतु मेव्ययं॥ नैवेद्यं॥ जगत्पूज्यो जगद्वंद्यः अनादिर्जगदंतकृत्॥ जलशा
यी जगद्योनिः प्रीयतां मे जनार्दनः॥ अनेककर्मनिर्बंधध्वंसने जलशायिनं॥ ततोभिमथु
रावासः माधवं मधुसूदन॥ नमो वामनरूपाय नमस्तेस्तु त्रिविक्रम॥ नमस्ते बलिबंधाय वासुदे
व नमोस्तु ते॥ नमस्ते सर्व गोविंद गमने शास्त्रिविक्रम॥ पापसंक्षयं कृत्वा सर्वकामप्रदो भव॥ सर्व
गः सर्वदेवेशः श्रीधरः श्रीनिकेतनः॥ विश्वेश्वराय विभवे श्रीशायच नमो नमः॥ सर्वं संपूजयेद्द्वा
दशी एकादश्यां नरोत्तम॥ जागरं तत्र कुर्वीत गीतवादित्रमंगलैः॥ एवं पूर्वोक्तविधिनाआचार्यं

७८

द्वामनं हरिं॥ प्रदेयास्त्रिदशो विदुषि ब्राह्मणश्चापि मंत्रवित्॥ वामनः प्रतिगृह्णाति वामनो वै ददाति च॥
वामनस्तारको भाभ्यां वामनाय नमो नमः॥ इति प्रतिग्रहमंत्रः॥ एवं दत्वा ततः प्राप्तः भोजनं पूषदाज्यकं॥
पूर्वं दद्या ब्राह्मणेभ्यो पश्चाद्भुंजीत वात्मना॥ भूयो यथेच्छया राजन्सर्वत्रैष विधिः स्मृतः॥ एवं व्रतेन कृ
ते ब्रह्मन्यत्पुण्यं तन्निबोधमे॥ हस्त्यश्वरथवाजीनां दाता भोक्ता विमत्सरी॥ रूपसौभाग्यसंपन्नो
दीर्घायुर्नीतिजो भवेत्॥ पुत्रैः पौत्रैः परिव्राप्तो जीवेत्स शरदां शतं॥ एषा व्युष्टिः समाख्याता एकादश्यां
मया तव॥ पूर्वमेव समाख्याता द्वादशी श्रवणान्विता॥ व्युष्टिः कालं॥ उपोष्यैकादशीं पश्चाद्द्वाद
शीमप्युपोषयेत्॥ न चात्र विधिनोपस्यात् उभयोर्देवता हरिः॥ बुधः श्रवणसंयुक्ता द्वादशी संग
मोदकं॥ दानं दध्योदनं सम्यक् उपवासपरो विधिः॥ सगरेण ककुत्स्थेन धुंधुमारेण गाधिना॥ ए
तैश्चान्यैश्च राजेंद्रः कृता वै द्वादशी तिथिः॥ ॥ इति भविष्योत्तरपुराणे वामनजयंती॥
अथ पौषकृष्णद्वादश्यां गुर्जराचारप्रसिद्धं सुरूपद्वादशीव्रतं॥ उमा उवाच॥ भगवन्श्रोतुमिच्छा

१७२ भिप्रसादं कुरु मे प्रभो ॥ कथितव्यं प्रसादेन यद्यस्ति मयि सौहृदं ॥ व्रतेन केन चीर्णेन विरूपत्वं प्रणश्य
ति ॥ सौभाग्यं चैव मतुलं प्राप्यते कस्य रोचनात् ॥ तन्मे कथय देवेश परमाभीष्टदायक ॥ ईश्वर उवाच ॥
श्रूयतां परमं गुह्यं व्रतं पापहरं शुभं ॥ सुरूपद्वादशी नाम महापातकनाशनी ॥ सुरूपदायिनी चैव म
हापातकनाशनी ॥ कुलवृद्धिकरी चैव सर्वसौख्यप्रदायिनी ॥ तच्छृणुष्व प्रयत्नेन कथ्यमानं मया
नघे ॥ पुरा वै द्वापरस्यांते विष्णुर्दैत्यनिषूदन ॥ अवतीर्णो मर्त्यलोके वसुदेवकुले किल ॥ तेनोढा रु
क्मिणी नाम भीष्मकस्य सुता पुरा ॥ अत्यंतरूपा सुभगा पतिव्रतपरायणा ॥ नहि तस्य विना कृष्णस्तो
कमुद्वहते सुखं ॥ श्वश्रूश्वशुरयोः पाद --- चंदनतत्परा ॥ केनापि कर्मदोषेण कुपिता विष्णुमा
तरं ॥ न प्रसादयति क्षिप्रमिति ज्ञात्वा तु देवकी ॥ कृष्णं प्राबाच कुपिता यदि ते जननी त्वहं ॥ ततस्त्य
जाहि वै बाल्या कुलरूपगुणाधिका ॥ मद्वाक्यमन्यथा कर्त्तुं नार्हसि त्वं कुलोद्वह ॥ कृष्ण उवाच ॥
अपापां रुक्मिणीं त्यक्त्वा उद्वहेहं कथं शुभां ॥ यः परित्यज्यते भार्यामविप्लवसदेहिनां ॥ समा १७२

त ॥ अलाभे यवगोधूमे फलैस्तु कृतिलैर्नवैः ॥ पुष्पैर्गंधैः फलैः धूपैः कालोद्भवैरर्चयेद्धरिं ॥ नानाविधैश्च नै
वेद्यैर्भक्ष्यभोज्यगुडौदनैः ॥ स्वस्य वित्तानुसारेण सहिरण्यं च कारयेत् ॥ एभिर्मंत्रपदैस्तत्र पूजयेद्गरुडध्व
जं ॥ उपहारैर्नरश्रेष्ठ तु विसृष्टत्वा समाहितः ॥ ॥ अथाग्नेयभविष्ययोः पूजा ॥ ॥ धृत्वा जलमयं देवं देवदेव
स्य चक्रिणः ॥ ब्रह्मांडमुदरे यस्य महद्भूतैरधिष्ठितं ॥ मायावी वामन श्रीशो समायातु जगत्पतिः ॥ आ
वाहनं ॥ अजनाय महेशाय जलजासनाय हंसिने ॥ नमस्ते केशवानंत वासुदेव नमोस्तु ते ॥ स्ना
नं ॥ मलयेषु समुत्पन्नं गंधपुष्पं मनोहरं ॥ मया निवेदितं तुभ्यं गृहाण पुरुषोत्तम ॥ पुष्पं ॥ नमः किंमल
किंजल्कपीतनिर्मलवाससे ॥ महाहवरिपुस्कंधधृष्टचक्राय चक्रिणे ॥ पूजामंत्रः ॥ मत्स्यकूर्मव
राहं च नारसिंहं च वामनं ॥ रामं रामं रामकृष्णं अर्चयामि हितेनमः ॥ पादाद्येकमस्यांगं पूजयेच्छीर्षमंत
तः ॥ पादौ मत्स्याय च नमो नमः कूर्माय जानुनी ॥ वराहाय नमो गुह्यं नृसिंहायेति नामभिः ॥ उरस्तु वा
मनायेति भुजौ रामाय वै नमः ॥ मुखं रामाय च नमः कृष्णाय च नमः शिरः ॥ एवं कृते ब्रह्मन् यत्पुण्यं त

समाप्नोतिहिमं दत्तं दौर्भाग्यं सप्तपौरुषं॥ विरूपत्वमवाप्नोति न सुखं विंदते क्वचित्॥ व्याधिर्वाजाय
ते लोके निंदनीयः सदेहिनां॥ इत्यहं जानमानोपि कथं कुर्यां वचस्तव॥ देव्युवाच॥ सर्वेषामेव
देवानां तीर्थादीनामपि ध्रुवं॥ माता गुरुतरा पुत्र कस्तस्या वाचनं त्यजेत्॥ मम वाक्यस्याकरणे क
थं पापिष्टता भवेत्॥ जननेश्ज्यते तेन भार्याच यदुनंदन॥ कृष्ण उवाच॥ परित्यजामि नाहं तां
प्रियां प्राणधनेश्वरीं॥ इति तूष्णीपरां भूतां मातरं प्रेक्ष्य केशवः॥ चिंतयामास परमं कथं सौख्यं भवे
दिति॥ एतस्मिन्नेव काले तु नारदो भगवानृषिः॥ आजगाम सहसा विष्णुं संप्रेक्ष्य विस्मि
तो॥ पूजितः परया भक्त्या अर्घ्यंजग्राह नारदः॥ उपविष्टो यथान्यायं पर्यपृच्छदनामयं॥ नार
द उवाच॥ किं चिरचेदं करोषि त्वं कथमुद्वेषकारणं॥ किंन्न सिध्यति ते भिष्टं त्यज्जोद्वेगं यदू
त्तम॥ कृष्ण उवाच॥ मात्रा नियुक्तो ब्रह्मर्षे परिणेतुं द्विजोत्तम॥ कन्यामुद्वाहयिष्यामि कुत

पांकस्यचित्यभो॥ नारदउवाच॥ श्रूयतामभिधास्यामिपूर्ववृत्तान्तमादरात्॥ लक्ष्मीयुक्तःपुरानाथः
क्रीडमानोहिनंदते॥ तत्रायतःसभगवान्दुर्वासाऋषिसत्तमः॥ सत्कृतस्त्वयथाज्ञानंमभ्युत्थायनष्ट
वकं॥ प्रेक्ष्यबीभत्सरूपंतंदेव्याहास्यंकृतंनदा॥ सकोपेनमहातेजाकृष्णानरसमप्रभुः॥ शशापल
क्ष्मींदूर्वासामुनिक्रोधनसंयुतः॥ हसितोहंत्वयामुग्धे आत्मनोरूपमेक्ष्यतु॥ विरूपाभवदुर्दृते
किन्नज्ञानोत्यहंत्वया॥ इत्युक्तासततयादेव्यायथाज्ञात्याप्रसादितःदे॥ प्रसन्नोजगदेवाक्यंम
छापोनान्यथाभवेत्॥ जन्मान्तरेणास्यफलंकरिष्यतिविरूपितं॥ साबमर्त्येहिरतूर्णंहिगोपकस्यगृ
हेशुभा॥ सत्यभामाविरूपांगीविरूपंदर्शनीतथा॥ कर्णनासातिविकृतासंजातातत्प्रभावतः॥ पा
णिपादकटिग्रीवासर्ववैरूप्यलक्षणं॥ तत्रगच्छमहाप्राज्ञसातेकंन्याप्रदास्यति॥ कृष्णउवाच
भगवन्विरूपवदनांकथंद्रक्ष्यामिनित्यशः॥ तांगतिंचगमिष्यामिनांविवाह्यकुरूपिणां॥

नारदउवाच ॥ तस्याः शापप्रसादेन रुक्मिण्याय दुनंदन ॥ उत्तमं प्रश्यते रूपं सौभाग्यं परमं सुखं ॥ मा
तापितासाकिल वै धर्मकामार्थमिच्छते ॥ एवं भविष्यतीत्येवं सं बंधो विदितः सुरैः ॥ त्वयाच नान्यथाका
र्यं गुरूणां वचनं महत् ॥ माता गुरुतरा भूमेरिति वेदेषु पठ्यते ॥ ईश्वरउवाच ॥ एवमुक्त्वा महादेवि ना
रदः स्त्रिदिवं गतः ॥ कृष्णोपि मातरं प्राह वैवाह्यं हि विधीयते ॥ विवाहिता वसा तेन वेदोक्तविधिना ततः ॥ आ
नीय स्व गृहं मातुः दर्शयामास तां वधू ॥ पश्यार्घ्य वचनं भामा परिणीता रुचिव्रता ॥ निर्दृष्टिपर
मां गच्छ प्रसादपरमा भव ॥ इत्युक्त्वा वीक्ष्य तं कृष्णः प्रणिपत्य च मातरं ॥ जगाम कृतकार्याणां कारणाय
महाबलः ॥ तां दृष्ट्वा देवमाताच बभो दुःखाधिताभृशं ॥ ईदृग्विरूपा विकृता कथं भर्त्तास्मि गोपितः ॥
चिंतामवाप महती मती वोद्विग्नमानसा ॥ कस्यापि नावचक्षेथा विरूपतत्सरीरजं ॥ अथकस्मि
न्सुकाले तु रुक्मिणीत त्रभावनः ॥ नमस्कृत्य ततश्चश्रूं सघृष्टं गोमयं सदा ॥ उवाच मश्रूतं वाक्यं

भक्तियुक्तं शुभावहं ॥ आवहं द्रष्टुमिछामि सपत्नीं कृष्णवल्लभां ॥ दर्शयामास शीघ्रं तां प्रसादं सुविधीयतां ॥ ॥ दे
व्युवाच ॥ श्वश्रूस्त्वहं ते सुभगे मममामि वचनं कुरु ॥ पूर्वमाचरितं सुभ्रू सुरूपाद्वादशीव्रतं ॥ संप्रयछस्व चेत्तस्यै
दर्शनं ते भविष्यति ॥ ॥ रुक्मिण्युवाच ॥ कृष्टेन क्रियते धर्मः व्रतं चापि सुदुष्करं ॥ कथं तस्यै प्रयछामि फ
लं देवैः सुदुर्लभं ॥ देव्युवाच ॥ अर्धं प्रदीयतामस्मै तदर्धमथवा पुनः ॥ पंचमांशमथो षष्ठं षोडशांशम
मथापि वा ॥ रुक्मिण्युवाच ॥ सुरूपाद्वादशीपुण्यं तिलार्धमपि नोत्सहे ॥ किं पुनः षोडशांशं त्वं तु
सपत्न्या दुःखचेतसि ॥ एवमुक्त्वा जगामाशु मंदिरं स्वं शुभेक्षणा ॥ पुनः पप्रछ कृष्णं संप्राप्य पार्थेन वै
ज्रुषा ॥ देवं पृछामि चैवोक्तं न स्पृशोषि प्रभो मम ॥ कथं पश्यामि तामप्यनवोढां कृष्णवल्लभां ॥ ॥ कृ
ष्णउवाच ॥ अंब द्रक्ष्यामि ते शंभुर्विरूपां तां सुमध्यमां ॥ विरूपश्रवणाक्षीं तां कुरूपां विकृताननां ॥
अदृष्टैव विस्मयकृतं रूपाद्यत्र न संशयः ॥ प्रार्थयाथ प्रियां सुभ्रू सुरूपाद्वादशीव्रतं ॥ तिलादपि हव १८१

षांश देहि मे से विकास्त्यहं ॥ सगता तत्स्काशं तु पिधाय द्वारमादरात् ॥ उवाच रुक्मिणी सा तु सत्यभामां पु
तिव्रता ॥ एकां मयाकृतिं देवि देहि भीष्मकनंदिनी ॥ कुब्जाकृतिर्वामदेयाय द्यस्तिमपि सौहृदा ॥ रुक्मिण्यु
वाच ॥ कोयं मतिभ्रमस्त्तोयं सुरूपां द्वादशीप्रति ॥ तिलाकृति प्रयच्छाभि उद्घाटय कपाटकं ॥ इत्युक्त्वा त्वरितं
स्नात्वा दत्वाद्य कांतिलाकृतिं ॥ तस्यां चैव प्रदत्तायां रूपेणासाधिका भवत् ॥ तां दृष्ट्वा विस्मयपरां पप्रछतपि
तां हरेः ॥ कथ्यतां मम काहि त्वं किमर्थं इह चागता ॥ ॥ सत्यभामा उवाच ॥ तवाहं भगिनी भद्रे कृष्णानो
टास्मि धार्मिके ॥ सत्यभामेति मे नाम नमामि चरणौ तव ॥ इति श्रुत्वा तु वचनं विस्मयोत्फुल्ललोचना ॥
नोवाच किल चार्वंगी श्रुत्यर्थं विस्मिता भवत् ॥ एतस्मिन्नेव काले तु वाग्उवाचाशरीरिणी ॥ न च दान
प्रभावेन सत्यव्रतपरायणा ॥ सुरूपा द्वादशी पुण्यं देवानामपि दुर्लभं ॥ देव्युवाच ॥ कर्मणा केन कर्त्त
व्या किमाचारं वदस्व मे ॥ नियमो होमदानं च प्रसादं स विधीयतां ॥ ॥ ईश्वर उवाच ॥ पौषे मासे तु संप्राप्ते
पुष्यर्क्षे संयदा भवेत् ॥ तस्यां रात्रौ संयता त्वा ध्यात्वा विष्णुं सनातनं ॥ श्वेतां गौरैक वर्णां वा तस्या ग्राह्यं

तुगोमयं॥ अंतरिक्ष्यंतुपतितंशुचिर्मौनिमवस्थितः॥ तस्यकृत्वाव्रतीनांतुशतमष्टोत्तरंतिलैः॥ प्रतीक्ष्येद्वाद
शीकृष्णांउपवासपरायणैः॥ स्नात्वानद्यांतडागेवाविष्णुंवामथचिंतयेत्॥ सौवर्णंतुहरिंकृत्वारूप्यंवाभक्ति
शक्तितः॥ तिलपात्रोपरिस्थंचततोविष्णुंप्रपूजयेत्॥ इतिसंपूज्यविहितंपुष्पैर्धूपैस्तुधूपितैः॥ नैवेद्यंतिल
मिश्रंतुफलानिविविधानिच॥ नमःपरमशांतायविरूपाक्ष नमोस्तुते॥ सर्वसंकटनाशायगृहाणार्घ्यंन
मोस्तुते॥ अर्घ्यमंत्रः॥ एवंसंपूज्यदेवेशंकुर्याद्धोमंसमाहितः॥ आवाह्यदेवंलक्ष्मीशंहोमयेज्ञोमयाकु
तीन्॥ शतमष्टाधिकंचैवतिलान्व्याहृतिसंयुतान्॥ सहस्रशीर्षेतुतिमंत्रेणहृदिध्यात्वाजनार्दनं॥ ल
क्ष्मीयुक्तंचमेघाभंशंखचक्रगदाधरं॥ होमांतेकारयेच्छ्राद्धंवैष्णवंद्विजसत्तमैः॥ दत्वाचभोजनंतेभ्यःस
तकुंडंचदक्षिणां॥ धर्मश्रवणसंयुक्तोजागरस्त्वायातुततोनिशां॥ तंकुलंवैष्णवींमूर्तिंविप्रायप्रतिपादये
त्॥ मंत्रहीनंविधिहीनंचसर्वंतत्क्षमापयेत्॥ ७॥ ईश्वरउवाच॥ एवंयःकुरुतेदेविसुरूपद्वादशीव्रतं॥
नरोवायदिवानारीतत्पुण्यंशृणुषमे॥ दौर्भाग्यंनश्यतेतस्यअपिजन्मांतरार्जितं॥ अपिधूमस्वयं

पक्वाज्जायते करणांतरात्॥ तस्यापि तस्य ते दुःखं वैरूप्यं तस्य जन्मनि॥ बंधुभिर्न वियोगं च नेष्टैः सह वियोग
ता॥ जायते गोत्र वृद्धिश्च कीर्तिमान्जायते भुवि॥ जातिस्मरण माप्नोति पदं निर्वाण मच्युतात्॥ पच्यमा
नमिदं भक्त्याय शृणोति समाहितः॥ पुण्य माप्नोति सततं स्वर्गलोके महीयते॥ इति सुरूपद्वादशीव्रतं॥
इतिश्री भट्टनीलकंठ भट्टात्मज भट्टशंकर कृतौ व्रतार्के द्वादशीव्रतानि संपूर्णा॥ ॥अथ त्रयोदशी
व्रतानि॥ तत्राषाढ शुक्ल त्रयोदश्यादि जया पार्वतीव्रतं॥ भोविष्योत्तरपुराणे॥ लक्ष्मिरुवाच॥
देवदेव जगन्नाथ भुक्तिमुक्तिप्रदायक॥ कथयस्व प्रसादेन लोकानां हितकाम्यया॥ नारीणां तु व्र
तं चैव अवैधव्यकरं शुभं॥ येन चीर्णेन नारीणामखंड फलदं भवेत्॥ श्रीभगवानुवाच॥
सत्यमुक्तं त्वया देवि न च मिथ्या त्वयोदितं॥ तद्व्रतं कथयिष्यामि ताख्यातं कस्यचित्पुरा॥ अकथ्यं प
रमं गुह्यं पवित्रं पापनाशनं॥ येन चीर्णेन नारीणामवैधव्यं च जायते॥ आषाढे चैव कर्त्तव्यं शुक्ल
पक्षे त्रयोदशी॥ गृह्णीयान्नियमं तत्र दंतधावन पूर्वकं॥ दंतधावन मंत्रः॥ आयुर्बलं यशो वर्चः प्र

जाःपशुवस्तूनिच॥ब्रह्मप्रज्ञांचमेधांचतन्नोधेहिवनस्पते॥ नियमात्सुफलंभाप्नोतिनिःफलंनियमं
विना॥एतत्सर्वंप्रयत्नेनव्रतंनियमपूर्वकं॥ एकभक्तव्रतंचैककरिष्येचमयाधुना॥स्वादुरहितं
तथान्येनतेनपापंव्यपोहतु॥उमामहेश्वरौकार्यौसुवर्णरजतादिभिः॥ अथवामृन्मयौकार्यौ
सिंहदोषोपरिस्थितौ॥गोष्ठेदेवालयेवापितथाब्राह्मणवेश्मनि॥स्थापयेदिदमंत्रेणप्रतिष्ठांतत्र
कारयेत्॥तद्दिनेदंतकाष्ठंहियूथिकांचवरानने॥स्नानंशुद्धिंचततःकृत्वाततःपूजांप्रकल्पयेत्॥
ऋषिभिःसनसनकैःपूजांकृत्वापृथक्पृथक्॥कुंकुमागरुकस्तूरीसिंदूरैरष्टगंधकैः॥चंपकैः
शतपत्रैश्चयूथिकादिरतोद्भवैः॥ यीवासूत्रेनदूर्वयापूजयित्वाविधानतः॥ अर्घेणवानिशु
भ्रेणउत्तरीयुगरवत्र॥श्रीफलद्राक्षादाडिबैस्तथाजातिफलेवत्र॥आद्यादेवीचशर्वाणीशंक
रस्यसदाप्रिये॥अर्घ्यंगृहाणदेवेशममोपरिकृपांकुरु॥ इतिपूजाप्रकर्तव्याकथांचकेद्विजोत्त
मः॥ श्रीलक्ष्मीरुवाच॥ अच्युतायनमस्तुभ्यंपुरुषायादिरूपिणे॥ व्रताध्यक्षमहाप्राज्ञत्वंहि

२०३

क्षयकारक॥ कथयस्वप्रसादेन व्रतानामुत्तमं व्रतं॥ केन चादौ पुरा चीर्णं मर्त्यलोके च कारितं॥
एतत्सर्वं प्रयत्नेन ब्रूहि मे जगदीश्वर॥ श्रीभगवानुवाच ॥ अथातः संप्रवक्ष्यामि पार्वत्याश्च कथामिमं ॥
यां श्रुत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः॥ आसीत्पुरा कृतयुगे कौंडिन्ये नगरे वरे॥ ब्राह्मणो वसते
तत्र सत्यशौचपरायणः॥ गुणवान्शीलसंतोषी वामनो नाम नामतः॥ तस्य भार्या प्रिया सत्या
रूपलक्षणसंयुता॥ धनाढ्यो वेदविदुषः गृहे वै सर्वसंपदः॥ तस्य कर्मविपाकेन संतानरहितो
भवेत्॥ अपुत्रस्य गृहं शून्यं श्मशानसदृशं भवेत्॥ दंपती तेन दुःखेन क्षामौ जातौ शरीरतः॥
एककालसमायोगे नारदो गृहमागतः॥ अर्घ्यं पाद्यं कृतं तस्य कथां चक्रे मुनासह॥ वामन उ-
वाच॥ नारद त्वं ऋषिश्रेष्ठ सर्वज्ञानपरायणः॥ कथयस्व प्रसादेन कथं दुःखं प्रशाम्यति॥
दानेन केन देवर्षे व्रतनियमपुरःसरे॥ तीर्थेन च मुनिश्रेष्ठ कथं संतान भविष्यति॥ नारद उ०॥

शृणुविप्रप्रवक्ष्यामिसंतानंचभविष्यति॥ वनस्यदक्षिणेपार्श्वेबिल्वपूर्यतुमध्यसः॥ द्विपुल्लिंगंचविख्या
तंभवानीसहितंहरं॥ सपर्यांकुरुयत्नेनतुष्टेदास्यतिसंततिं॥ अपूज्यंलिंगमभ्यर्च्यापूज्यस्यस्ययद्दीयते॥
अनाथप्रेतसंस्कारकोटियज्ञफलंलभेत्॥ इत्युक्त्वानारदःस्वर्गंगतोवैमुनिपुंगवः॥ वनमध्येगतौ
द्वैतौदंपतीपुत्रकांक्षिणौ॥ बिल्वमध्येततोदृष्ट्वाशिवलिंगंपुरातनं॥ बिल्वपत्रेणजीर्णेनलिंगंतत्रै
वछादितं॥ विहायबिल्वपत्राणिसन्मार्ज्योपलेपनं॥ पंचामृतेनप्रक्षाल्यपूजांकृत्वामनोरमां॥ नित्यंनिय
मसंयुक्तंपूजयेत्परमेश्वरं॥ पंचाब्दंपूजितस्तेनपार्वतीसहितोहरः॥ एकदातुगतोसौतुपुष्पार्थंब्रा
ह्मणाश्रहि॥ कुसुमंगृह्यतेयावत्तावद्दष्टेसुपन्नगैः॥ पतितस्तद्वनघोरेसिंहव्याघ्रसमाकुले॥ त्य
तीयेनमुहूर्तेनतद्भार्याचिंतितंतदा॥ केनापिकारणेनैवकथंनायातिमेपतिः॥ रुदंतीशोकसंयुक्ता
वनमध्येगतासती॥ आगतातत्रयत्रास्तेभर्त्ताचपतितोपिच॥ भर्त्तारंपतितंदृष्ट्वासापितत्रउपागता॥

१०४

परिधानं भोजनैः सह ॥ नानारसैः समायुक्तं घृतखंड समन्वितं ॥ सभर्तृकायाश्च दातव्यं भोज्यं सौभा
ग्य हेतवे ॥ कुंकुमं कज्जलं देयं अब्दे अब्दे स्वशक्तितः ॥ रात्रौ जागरणं कुर्याद् अखंड फलदं भवेत् ॥
अनेन विधिना यस्तु कुरुते व्रतमुत्तमं ॥ जागरणे कृते याति व्रतं संपूर्णतां सदा ॥ व्रतेन चैव विना ना
री विधवा जन्म जन्मनि ॥ शोचंति दुःखसंयुक्ता न च सौभाग्यभाग्भवेत् ॥ नारीयाच व्रतेदं निर्य
ति भक्त्या तत्परं ॥ सौभाग्यमतुलं याति पति संतोषदा न तः ॥ एतावदुक्त्वा व्रतमिदं तत्रैवांतरधी
यत ॥ पश्चाद्गृहं समागत्य दंपत्यौ च मुदान्वितौ ॥ पूर्वोक्तेन विधानेन प्राप्तं पुत्रसुखं तयोः ॥ भर्तारं
त्वविशेषेण अवैधव्यं परं सुखं ॥ भुक्त्वा तु विविधान्भोगान् अंते प्राप्तं शिवं गृहं ॥ भगवानुवाच
एवं या कुरुते नारी न च भर्त्रा वियुज्यते ॥ कुलत्रयं समुद्धृत्य नीयते शिवमंदिरं ॥ सान्निध्य सुखमा
प्नोति शिवलोके महीयते ॥ कथां श्रुत्वा विधानेन सर्वपापं विमुच्यते ॥ ॥ इति भविष्योत्तर पुरा
णे जयापार्वतीव्रतं ॥ इदं च गुर्जराचारप्राप्तं ॥ अथ भाद्र शुक्ल त्रयोदश्यादि गोत्रिरात्रव्रतं ॥

१८२

हेमाद्रौ भविष्योत्तरे ॥ युधिष्ठिर उवाच ॥ भगवंस्त्वत्प्रसादेन बहूनि सुकृतानि मे ॥ श्रुतानि बहु
पुण्यानि कृतानि मधुसूदन ॥ सर्वपापहराणि स्युः सर्वकामप्रदानि च ॥ सांप्रतं श्रोतुमिच्छामि व्रतानामुत्तमं
व्रतं ॥ किंचिद्योगव्रतं ब्रूहि यदि तुष्टोसि माधव ॥ यत्कृत्वा सर्वपापेभ्यो नरो नारी विमुच्यते ॥ कृष्ण उवा०
कथयामि नृपश्रेष्ठ व्रतानामुत्तमं व्रतं ॥ यन्न कस्यचिदाख्यातं तत् शृणुष्व नृपोत्तम ॥ यान्यान्कामान्वां
छयंति लभेस्तांस्तथैव च ॥ तस्य पापाद्विमुच्यंते नरा नार्यश्च सर्वशः ॥ प्रभोर्भगवतो राजन् कामधेनोः
प्रसादतः ॥ सौभाग्यं संततिं लक्ष्मीं प्राप्नोति सुखमुत्तमं ॥ युधिष्ठिर उ० ॥ यदि तुष्टोसि भग
वन् व्रतस्यास्य विधिं शुभं ॥ ब्रूहि मे राजशार्दूल करोमि त्वत्प्रसादतः ॥ के मंत्राः के नमस्कारा देवतथि
प्रकीर्तिताः ॥ किं दानमर्घ्यमंत्रं च कथयस्व सुरोत्तम ॥ ॥ कृष्ण उवाच ॥ नारदेन पुरा राजन्नयदु
क्तं सागरादिषु ॥ स्मारितं तत्त्वया राजन् शृणुष्वैकमना व्रतं ॥ मासि भाद्रपदे शुक्ले त्रयोदश्यां स
मारभेत् ॥ त्रयोदश्यां प्रभाते तु समुत्थाय शुचिर्भवेत् ॥ गृह्णीयान्नियमं पूर्वं दंतधावनपूर्वकं ॥

आचम्योदकमादायइमंमंत्रमुदीरयेत्॥ गोत्रिरात्रिव्रतस्यास्योपवासकरणेमम॥ शरणंभवदेवित्वंनमस्ते
धेनुरूपिणी॥प्रसीदतुमहादेवोलक्ष्मीनारायणःप्रभुः॥ लक्ष्मीनारायणंदेवंसौवर्णंवास्वशक्तितः॥ पंचामृ
तेनगव्येनस्नापयेत्कमलापतिं॥ स्थापयेत्सर्वतोभद्रमंडलेष्टदलेपिवा॥ गंधपुष्पैःसुनैवेद्यैःस्तुतिगी
तादिनृत्तकैः॥ नालिकेरार्घ्यदानेनप्रीणयेश्रीहरिंतथा॥ लक्ष्मीकांतजगंनाथगोत्रिरात्रिव्रतंमम॥प
रिपूर्णंकुरुषेमंगृहाणार्घ्यंनमोस्तुते॥ इत्यर्घ्यः॥ आरार्तिकंततःकुर्याभक्त्याकलस्वतुष्टिदं॥ न
वंकुंभंजलमृतंहविष्यान्नेनपूरितं॥ कृतादिनत्रयंपार्थप्रीतयेविनिवेदयेत्॥ धेनुपूजांततः
कुर्याज्जलधारांप्रदक्षिणां॥ पुरादत्वातुमुकुटंकुंडलंकुंकुमंतथा॥ अन्नाछादनगंधादिदिव्यपुष्पैःसदी
पकैः॥ अहोरात्रंभवंकिंचित्घृतदीपंदिनत्रयं॥ अर्घ्यदानंततःकुर्यानारिकेलादिभिःफलैः॥ ॥अर्घ्यमंत्रः॥
पंचगावःसमुत्पन्नामथ्यमानेमहोदधौ॥ तासांमध्येतुयानंदातस्यैधेन्वैनमोनमः॥ प्रदक्षिणीकृता
येनधेनुर्मार्गानुसारिणी॥ प्रदक्षिणाकृतातेनसप्तद्वीपावसुंधरा॥ गावोममाग्रतःसंतुगावोमेसं
तुपृष्टतः॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥ आरार्तिकंसनैवेद्यंगीतवाद्यंमहोत्सवः॥ कुंकु

१२६

ततःश्वश्चेतनायुक्तास्मरंतीचनदेवतां॥ पर्वतीतत्रसामायातायत्रतिष्ठतिब्राह्मणी॥ क्रंदमानांचतांदृष्ट्वा
पार्वतीवरदाभवेत्॥ सुधाशीकरहस्तेनविप्रवक्त्रेविमुंचति॥ उत्थिताब्राह्मणीतत्रनिशीथेनिद्रयामिव॥
तावेत्यचरणौगृह्यदंपतीविनयाचितौ॥ पार्वत्योदितमिदंवरंवरयसुव्रते॥ ब्राह्मण्युवाच॥ त्वत्प्रसा
देनरुद्राणीलभ्यवान्वांछितंमया॥ संतानंचैवमेनास्तिएतदुःखंचमेहृदि॥ ॥पार्वत्युवाच॥ व्रतं
कुरुविधानेनममनाम्नाचविश्रुतं॥ जयाममव्रतंनाममैत्रैलोक्येपावनं॥ जयापार्वतीव्रतंचआषाढे
चारुलोचने॥ स्वादुरहितेनचान्येनलवणेरहितेनच॥ भोक्तव्यंदिनपंचकंचकर्तव्यंचवटव्रतं॥ त्रयोदश्यां
व्रतारंभंतृतीयायांसमापनं॥ शुक्लपक्षेव्रतारंभंकृष्णपक्षेसमापनं॥ पंचाब्दंयावनालेस्तुव्रतंकार्यंप्रयत्न
तः॥ पंचाब्दंहियवैश्चैवव्रतंतुलवणंविना॥ पंचाब्दंतंदुलैःकार्यंईक्षुरसविवर्जितं॥ पंचाब्दंमुद्गलैःकार्यंए
वंहायनविंशति॥ विंशतिर्नमेततो॥ व्रतोद्यापनंसमाचरेत्॥ दंपत्याःपरिधानंहिप्रदद्यात्दुकूलवो॥ भो
जनंसुवासिनीनांचतृतीयायांयथोदितं॥ विंशतिप्रथमेपक्षेवित्तशाठ्यमतःपरं॥ पंचकंपंचकंकार्यं

पश्चात्तस्य वस्त्रं सर्वकामकं॥ सागरांबरसंयुक्ता दत्ता तेन वसुंधरा॥ एवं या कुरुते पार्थ त्रिरात्रव्रतमुत्तमं॥ भवांतर
कृतात्पापात्त्रिविधामुच्यते नरैः॥ यावत्कालविंल पश्येत्तु भर्तृदुःखं नराधिप। पुत्रपौत्रसुखं तस्या भविष्यति न
संशयः॥ जन्मांतरेऽथ सा नारी वैधव्यं नैव पश्यति॥ वैधव्यं च महद्दुःखं न भवेत्तु भवांतरे॥ अपुत्रो ल
भते पुत्रान् धनहीनो धनं लभेत्॥ कामेन मनसा वैव कर्मणा यदुपार्जितं॥ तत्सर्वं पातकं याति गोत्रिरात्र
व्रतेन वै॥ इह भोगान्स्वविपुलान् भुक्त्वायुः पूर्णमेव च॥ व्रतस्यास्य प्रभावेन गोलोके च महीयते। कीर्ति
दं धनदं चैव सौभाग्यकरणं नृप॥ आयुरारोग्यकरणं सर्वपापप्रणाशनं। एतस्मात्कारणाद्राज
न्सभार्यस्त्व कुरु व्रतं॥ यदि राज्यं वास कीर्तिं नित्यमामुदिदिच्छसि॥ तदेतत्पांडवश्रेष्ठा व्रतं चक्रे समा
हितः॥ व्रतस्यास्य प्रभावेन लब्धं राज्यमकंटकं॥ ॥ इति हेमाद्रौ भविष्योत्तरे गोत्रिरात्रव्रतं॥
इदं च गुर्जरेषु प्रसिद्धं॥ स्कांदे तु आश्विनशुक्लत्रयोदश्यामुक्तं॥ अथ गुर्जरांतरप्राप्तं गोत्रिरात्रव्रतं
युधिष्ठिर० येन लक्ष्मीः सकुलापि नराणां भुवने भवेत्॥ संततिर्वर्द्धते स्त्रीणां तद्व्रतं वद मे प्रभो॥ कृ
ष्णउवाच० शृणु राजन्प्रवक्ष्यामि व्रतानामुत्तमं व्रतं॥ येन वै क्रियमाणेन सर्वपापक्षयो भवेत्॥ गोत्रि

१८७

रात्रमिति ख्यातं नस्त्रीणां फलदायकं॥ वांछितं जायते तेषां येषां चेतसि वर्त्तते॥ युधिष्ठिर० कीदृशं त
द्व्रतं देव विधानं तच्च कीदृशं॥ कथमेषा समुत्पन्ना कस्मिन्काले तु केशव॥ श्रीकृष्णउ० पुराकृतयु
गे पार्थ मनुर्नाम बभूव ह॥ वैवस्वतकुले जातो बभूव पृथिवीपतिः॥ तदन्वये दिलीपश्च प्रसूत्तमतिरुत्तमः
नृपो सर्वं वसतत्तस्य संजाताः करदायकाः॥ नित्यं धर्मपरो राजा पूजनीयो मनीषिणां॥ न जायते तु संत
नं तस्यैवं च ततः सदा॥ वांछितान्तनयं तेन दत्ता मंत्रिषु कौशलाः॥ स पुत्रार्थं सपत्नीको वसिष्ठ
स्याश्रमं ययौ॥ पश्यान्हि पथि कल्याणि सारसे स्तोरणांकृतं॥ विविधानि च वृक्षाणि मार्गेषु फलिता
नि वै॥ स राजा महिषी सार्द्धं रथारूढं सुवाहनः॥ संध्यायां योगिनस्तस्य महर्षेः मापदाश्रमं॥ सारथिं
च समादिश्य वादीन् विश्रामयेत्यथ॥ रथादुत्तीर्य दंपत्या वाश्रमं च गतो मुनेः॥ एकं कर्मणि संध्यायां दि
लीपा ददृशे गुरु॥ अरुंधत्या सहासीनं सावित्र्येव पितामह॥ तौ प्रणम्य गुरुं तत्र मुनिं विशेषतः॥
स्थितौ तस्य समीपे तु प्रीत्या चनं दितौ त्तयोः॥ दिलीपं च दत्तदात्यर्थं धर्मज्ञं लोकपालकं॥ पप्रच्छ कुशलं
राज्यं वसुधायां शुभो मुनिः॥ ॥ दिलीपउवाच॥ कुशलं नः सदा देव स्थिते त्वयि गुरौ सति॥

सुराणांच मनुष्याणां विपद्दा रक्षिता भवान् ॥ विषये मम कांतायां अपत्यं किं न राजते ॥ न तु कार्यं धरिष्यामि निराशाः पितरो मम ॥ तथा कुरु मुनिश्रेष्ठ पुत्रो भवति मे यथा ॥ राज्ञां विपदि संप्राप्ते त्वदायत्तं सुखं मुने ॥ वदेति कथितं राज्ञा मुनये वै युधिष्ठिर ॥ तदा मुनिः क्षणं तस्थौ ध्यान स्तिमितलोचनः ॥ करपांसं ततो राज्ञो मुनिर्दृष्ट्वा समाधिना ॥ पश्चान्निवेदितं तस्मै दिलीपाय प्रयत्नतः ॥ ॥ वसिष्ठ उवाच ॥ पूर्वं वृत्तारिमाराध्य त्वं सुधां गच्छतस्तव ॥ अधः कल्पकुलस्याधः कामधेनुर्न वंदिता ॥ जातस्तस्यास्तदा कोपो दत्तस्ते शापईदृशः ॥ न वंदिताहं भवता सांप्रतं यदि मामपि ॥ भविष्यति न ते पुत्रं तच्छापोन श्रुतस्त्वया ॥ न हि जयेद्यो पूज्यानां वंधानां यो न वंदते ॥ न जायते तु कल्याण पातकैरेव लिप्यते ॥ दिलीप उवाच ॥ कृतो मयापराधोयं करोमि किमहं मुने ॥ संततिर्जायते येन तद्व्रतं वद मे प्रभो ॥ वसिष्ठ उवाच अन्यैर्नानाविधैः पुष्पैः स्तपोभिर्न्नृप दुःसहैः ॥ न जायते तु संतानं गोत्रिरात्रव्रतं विना ॥ सपत्नीकः सवत्सा मे धेनुं राजन् फलप्रदां ॥ आराधयैकाग्रमना गोत्रिरात्रव्रतं कुरु ॥ यावद्दिव्यं दिलीपस्य मुनिना कथितं व्रतं ॥ तावज्जनं दिनी धेनुर्वनाद्वै चागता शुभा ॥ कुंडोघ्नी तिलकं सितं सुखफलादुग्धं शुचिर्विं

मं कलशं सत्त्वं धेनु दद्याद्विचक्षणः ॥ एवं संपूज्यतां धेनुं समग्रं त्यादिनत्रयं ॥ ग्रावांश्च यवसां चैव चारये पापयेद्यः ॥ गोमयाद्दागते धौतैः कुर्यात्तेरेव पारणं ॥ धेन्वै प्रजागरं कुर्यात्सर्वपापप्रनाशनं ॥ त्रिविधान्मुच्यते पापात् प्रहरार्धेन पांडव ॥ तस्योत्तरं कृत्वा त्सापांस हारार्द्धेन मुच्यते ॥ चत्वारि वेणुपात्राणि कारयित्वा प्रपूजयेत् ॥ नालिकेराम्रकदल द्राक्षाखर्जूर दाडिमैः ॥ शुभैर्विरूढैः सिंदूरैर्वस्त्र कुंकुमकज्जलैः ॥ प्रथमे बीजपूराद्यो द्वितीये दाडिमं शुभं ॥ तृतीये नालिकेरेण दद्यादर्घ्यं दिनत्रयं ॥ करकास्तु त्रयः कार्या हविष्यान्नेन पूरिताः ॥ लक्ष्मीनारायणं देवं ब्रह्माणं भार्यया सह ॥ पूजयेत्कुसुमैर्वस्त्रैः हेमसत्त्रैर्युधिष्ठिर ॥ दंपत्योर्भोजनं दद्यं धेनुं भक्त्या दिनत्रयं ॥ पारणे गोरिपां विप्रान् इष्टं वधूश्च भोजयेत् ॥ गुरुरूपायत्ताधेनुं द्विजाय प्रतिपादयेत् ॥ सुकुंकुमांस वस्त्रां सघंटां मुकुटभूषितां ॥ गीतवादित्रनृत्यादि इति पाठपुरःसरं ॥ पायाद्दिग्र गृहं यावत्स प्राप्य तत एव च ॥ एवं या कुरुते नार्या गोत्रिरात्रव्रतोत्तमं ॥ दुर्लभं तु सदा सर्वं पानं नराणां नृपसत्तम ॥ अश्वमेधसहस्राणि वाजपेयशतानि च ॥ कृत्वा यत्फलमाप्नोति गोत्रिरात्रव्रते कृते ॥ प्रभासे च कुरुक्षेत्रे चंद्रसूर्य ग्रहे तथा ॥ हेमभारशतं दद्यात्फलं तत्प्राप्नुयान्नृप ॥ धेनुदानं ततः

तो धेनुं विसर्जयेत्॥ ततो धेनुं सवत्सां तु मंत्रेणानेन पार्थिव॥ दद्याद्विप्राय विदुषे धर्मज्ञे शास्त्रपारगे॥ परि
पूर्णं व्रतं कृत्वा इष्टान्कामानभीप्सितान्॥ विप्राय त्वां मया दत्ता मातर्गच्छ यथासुखं॥ दानमंत्रः सर्वदानानि
देयानि स्वशक्त्या प्रीतिभिर्नरैः॥ विविधेभ्यो द्विजेभ्यश्च दक्षिणां च स्वशक्तितः॥ वित्तशाठ्यं न कुर्वीत दा
पयेच्च ततो नरः॥ गृह्य यावत् व्रजे दृष्ट्वा गीतनृत्यपुरःसरं॥ गोपालानां च पाथेयं द्विजाः कुरुकरं वरं॥ य
मायेचारितानित्यं फलैर्नानाविधैः सह॥ मुक्त्वा वै कामधेन्वा च संयुक्ता गोमयं न तु॥ पारणं वै प्रकर्त
व्यं सर्वैरिष्टजनैः सह॥ सपत्नीकाय गुरवे दत्वा चान्नं सदक्षिणं॥ कृष्ण उवाच॥ एवमाराध्य तां धेनुं रा
जा वै भक्तितत्परः॥ ततः प्रजानामधिपः प्रभाते सुरभिं मुनेः॥ भाद्रपदसितपक्षत्रयोदश्यां युधिष्ठिर॥
पूजां कृत्वा विधानेन मुमोच त्वरितं शुचिः॥ संध्यायां प्रभृति स्थित्वा आययौ पुनराश्रमे॥ अर्चां स
दक्षिणां कर्तुं नीत्वा च विधिवद्बलिं॥ ययौ धेनोः समीपे तु बलिं दत्वा दिनत्रयं॥ अनुयातस्ततो धेनो
स्तृतीये दिवसे पुनः॥ जगत्तां गौरूपधरामिवोद्धधिपयोधरां॥ लताभिश्च ततो राजा पुष्पैर्वद्यापित
स्तदा॥ जयशब्दं च भाषंते पक्षिणः सुंदराननाः॥ गीतं च वनदेवीभिर्गीयमानं तथा यशः॥ शुश्राव १८९

च ततो राजा भृशं मनसि हर्षितः॥ चिरं शुभे वने व्यक्तं भूमिपे भ्रमिते सति॥ धेनुश्च शिशुभे राज्ञा धेन्वा
वभौ पुनः॥ तद्दिवैव मुनेर्धेनू राज्ञो भावं च पश्यति॥ विवेश गव्हरं तत्र पार्वत्याश्च पितुर्नृप॥ कृत्रिमश्च
ततः सिंहो मुनिधेन्वा भयंकरः॥ सिंहश्च ददृशे राज्ञा धेनुं कर्षन्बलेन वै॥ दृष्ट्वा राज्ञा च सा धेनुः क्रं
दमानाः स्वरोल्बणैः॥ ततो धनुर्धरः सोपि तां मोक्तुमुपचक्रमे॥ वध्यासिंहवधार्थाय राजा बाणं करे
दधौ॥ उत्पन्नस्तु तदा शोकः कोपयुक्तो बभ्रूवसः॥ धनुष्यारोपयन्बाणं चित्रन्यस्त इव स्थितः॥
हस्तस्य निश्चलत्वेन क्रोधस्तस्य व्यवर्धत॥ विस्मयं प्रापयन् सिंहो राजानं वै युधिष्ठिर॥ मानव
स्यगिरा प्राह दुष्टत्वेन गवि स्थितः॥ सिंह उवाच॥ बाणप्रयुक्तं भवता वृथा मयि भविष्यति॥ ततः क
ष्टेन महता श्रमं मा कुरु सर्वथा॥ न मारुतस्य वेगोपि पर्वतोन्मूलने क्षमः॥ जायते न महाराजस्याकेवल
मनोकुहं॥ महेश्वरस्य मां राजन्नाम्ना कुंभोदरेण तु॥ सेवकानां च सर्वेषां मुख्यं जानीहि भूमिप॥
विलोकयेमं पुरतो देवदारुमहाद्रुमं॥ सिक्तः स्नेहेन भूपाल शिशिवेन सिंहत्वं मुक्तो हंतीव भोजनं॥
तर्हि यं खलु गौ राजन्भक्ष्या तु समुपागता॥ त्यक्तकालज्ञो निवर्तस्व भक्तोसि गुरवे भवान्॥ आप

कालइदंकृत्तंतस्याछत्रकृतोयदि॥ दोषोनजायतेतस्ययशोराजनगछसि॥ श्रुत्वागिरंचसिंहस्यराजोवे
नमुवाचह॥ ईश्वरेणसमोनान्योवैसिंहंभवानपिसमीपात्कथंयातिममधेनुर्गुरोरियं॥ प्रसीदत्य
क्तदेहमधेनुंमुंचसवत्सकां॥ भविष्यतिजनन्याश्चवत्सोमार्गविलोकयन्॥ सिंहेनचदिलीपाय
कथितंवैतदापुनः॥ देहांतरेचदृष्टानिभयकारिणिकुर्वत॥ स्तोकेनहेतुनापार्थकांतंछत्रंचसं
त्यजते॥ सर्वस्यजगतोराज्यंवपुरेतन्नवंवयः॥ त्यक्तुमिछसिवाराजन्मूर्खःस्त्वमीदृशःकथं॥ ददासि
चकथंप्राणानूर्जःपालनतत्परः॥ जीवन्नामहाराजमुनेःकोपश्चयास्यति॥ ततोरक्षयदे
हंस्वंराज्यंचकुरुभूमिप॥ यावत्प्रोवाचसिंहोसौनगेनानुगतांगिरः॥ दिलीपोपितदापार्थवापी
मेतामुवाचह॥ गवानिरीक्षितश्चैवभूमिपादीननेत्रया॥ किंमेराज्येनमेसिंहविषयेजीवते
नवा॥ यशोगतंचमेसर्वंयदिधेनुंग्रहीष्यसि॥ यदिसिंहतवश्चाग्रेसिंहस्यपतितस्तदा॥ यावद्दि
ग्धंचपतितोमांयस्यपिंडवन्नृपः॥ तावत्सिंहोवरंत्यक्त्वाधावितश्चभयंकरः॥ दृष्ट्वासिंहंनिपतितंच
चलोनवभूवह॥ तावत्तस्योपरिष्टाच्चपुष्पवृष्टिःपपातवै॥ उत्तिष्ठवत्सभूपालवाचमित्यंनि

मतीदेवानांवरदाशुभादधिभवाकामप्रदापावना॥ गीर्वाणासकलाश्रुतेवपुषिवैतिष्ठंतियस्याध्रुवंतेसं
पूर्णाशशिनःकलांचदधतीश्रेयस्कराहर्णिमा॥ भाद्रपदेसमायातेशुक्लपक्षेतुपार्थिव॥ प्रातर्नरैलात्र
योदश्यांनियमंतुसुभक्तितः॥ समुपोष्यगोत्रिरात्रंभक्तिंकृत्वाततस्त्वव॥ मोक्ष्यहनिचतुर्थेहंसौभाग्यं
देहिगोमम॥ नियममंत्रः॥ ततोगावःसमभ्यर्च्यमंडलगंधदीपकैः॥ नगरैःशतपत्रैश्चचंपकाद्यैःशुभा
नमां॥ गावोममाग्रतःसंतुगावोमेसंतुपृष्ठतः॥ गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥ पंचगावःसमु
त्पन्नामथ्यमानेमहोदधौ॥ तासांमध्येतुयानंदातस्मैधेन्वैनमोनमः॥ पूजामंत्रः॥ फलैर्नानाविधैः
पुष्पैःगंधैरपिस्वशक्तितः॥ पूजनीयाप्रयत्नेनदद्यादर्घ्यंविधानतः॥ नालिकेरस्वकूष्मांडमातु
लिंगंचदाडिमं॥ हविष्यान्नंचनैवेद्यंकार्यंघृतसंयुतं॥ गोत्रिरात्रव्रतार्थायफलंमयाकरेधृतं॥ स
र्वकामप्रदादेविगृहाणार्घ्यंनमोस्तुते॥ अर्घ्यमंत्रः॥ वस्त्रयुग्मंविधानेनदद्याद्वासांसिदक्षिणां॥ सप
त्नीकायगुरवेसशक्त्याचव्रतीनरः॥ दिनानित्रीणिभिःस्त्रीणिश्रोतव्याचकथाशुभा॥ जितक्रोधैः
स्तुतःसर्वैस्त्रीभिर्वापुरुषैरपि॥ एवंसंपूज्यविधिवत्लक्ष्मीयुक्तंतुकेशवं॥ चतुर्थदिवसप्राप्तेत

शम्यसः॥ उत्थितःसन्पुनस्थाग्रे गांदर्शनेवैहरिं॥ सेवयाचतुरोपार्थभक्त्याचापिविशेषतः॥ प्रीताकामदुघा
हंचवरंयाचयतद्भवान्॥ योजयित्वाकरौराजाययाचैतनयंततः॥ वंशकर्त्तामहाप्राज्ञोशिवभक्तोनिरंतरं॥
गोत्रिरात्रव्रतंराजन्नयद्भक्त्याभिवताकृतं॥ ततोयस्याघेतदक्षपुत्रःपौरुषविग्रहः॥ येअन्येपिकरिष्यंतिगोत्रि
रात्रव्रतंमम॥ तेषांकामंचदास्यामिमनसीप्सितंसंशयः॥ इत्युक्त्वाचलिताधेनुर्वसिष्टस्याश्रमंप्रति॥ द्वासुरवी
तुबलिनीत्वाआययौतुसुदक्षिणा॥ पूजांकृत्वाविधानेनराजपत्नीविशेषतः॥ प्रदक्षिणक्रियांकृत्वाचलितावैयु
धिष्ठिर॥ आश्रमंचततोगत्वादिलीपोसौयुतस्तदा॥ गुरोरग्रेचवृत्तांतंकृतंतमवदन्मुनिः॥ वृंदितौचतदापार्थदंप
तीतौसुकोमलौ॥ पारणंचततःकृत्वाप्रस्थितोनगरंप्रति॥ कृत्वाशींचनमस्कृत्यहोतारंगालवेत्कृत्॥ आगतश्चततो
राजाउत्पत्ताकुपुरंपुनः॥ राज्ञातेनकृतंराज्यमारोपितंभुजे॥ दिनैःकतिपयैरेवगोत्रिरात्रप्रभावतः॥ राज्यंचकु
र्वतस्तस्यसुतस्तस्यमहाबली॥ प्रभातेसुमुहूर्तेचउत्पन्नोरघुसंज्ञया॥ रम्यंजातंतदासर्वंसंजातानिर्मला
दिशः॥ आदर्शचकृतंवद्धिवायवःशीघ्रगाववुः॥ मृदंगस्यस्वनैरम्यैःपूर्णंस्वर्गमनुत्तमं॥ प्रजाःसर्वास्तदापार्थ
वदंतिचपुनःपुनः॥ गोत्रिरात्रप्रभावाच्चराज्ञःपुत्रोबभूवह॥ पुरंदरस्यजेताचमहाधर्मपरायणः॥ दिग्विज

यस्य यज्ञस्य कर्ता सोपि युधिष्ठिर। यज्ञं दिग्विजयं कृत्वा विप्रेभ्यश्च ददौ वसु॥ ईदृशश्चाप्ययं सूतो गोत्रिरात्रप्रभव
तः॥ तदा प्रभृति लोकेस्मिन् लोकाः कुर्वंति तेव्रतं॥ देवैः सर्वैः कृतं तत्र सर्वकामार्थसिद्धये। सर्वाभिर्देवपत्नीभिः
कृतं च व्रतमुत्तमं॥ गोत्रिरात्रव्रतं पुण्यं विधानेन फलप्रदं॥ कुरुष्वत्वं महाराज न भवानीप युधिष्ठिर॥ साक्षादनंत
रं मातुः कृत्वा मनसि पार्थिव। भाद्रपदे सवत्सां तु भक्त्या त्वाराधयस्व गां॥ एवं यः कुरुते भक्त्या गोत्रिरात्रव्रतं पुनः।
सिध्यंति सर्वकार्याणि सुखं चैव प्रवर्धते॥ न जायते त्वपत्यं तु यस्याः पार्थ भुवस्तले॥ भक्त्येदं यदि कुर्वंति त
स्य स्यान्न संशयः॥ तपोभिर्दुष्करैः किं वितं यज्ञैस्तीर्थगवादिभिः। मुक्ताखिलेभ्यः पापेभ्यो व्रतमेतद्विधाय
तु॥ कुर्वंति ये व्रतमिदं जगति प्रसिद्धं पापापहं सकलचिंतितकामदं च। आरुह्य देववविमानमनुत्तमं च
स्वर्गं प्रयांति पदमत्र भयं विहाय॥ ॥इति भविष्योत्तरपुराणे गोत्रिरात्रव्रतं॥ ॥अथोद्यापनविधिः॥
युधिष्ठिर उवाच। कथयस्व महापुण्यं गोत्रिरात्रव्रतस्य वै। उद्यापनविधिं कृष्ण येन चीर्णेन तत्फलं॥ कृ
ष्ण उवाच॥ वर्षे चतुर्थे संप्राप्ते गोत्रिरात्रव्रतस्य वै॥ उद्यापनविधिं वक्ष्ये सर्वेषां व्रतसिद्धये॥ तृतीये दिवसे स्ना
यान्मध्याह्ने विधिपूर्वकं॥ देवान् पितॄन् समभ्यर्च्य इच्छेच स्वगृहे व्रती॥ रात्रौ च सर्वतोभद्रं गौरीतिलकमेव

वेद

च ॥ पूजयेत्तं च तभिर्वर्णैः शोभनं च यथोदितं ॥ तांम्रस्य कलशं कुर्यात्तांम्रपात्रसमन्वितं ॥ माषैकेन चरजेंद्रलक्ष्मी
नारायणं प्रभुं ॥ नवे सूक्ष्मे घृते वस्त्रे देवार्थे च प्रकल्पयेत् ॥ वंशपात्राणि कुर्वीत सौभाग्यचिन्हहविन्हितैः ॥ विरूढकैश्च
पक्वान्नैर्नालिकेरादिभिः फलैः ॥ विलेपनैश्च पुष्पैश्च धूपदीपैस्तथोत्तमैः ॥ पंचामृतैश्च नैवेद्यैः पूजयेद्विधिपूर्वकं ॥
लक्ष्मीनारायणं देवं गां सवत्सां विशेषतः ॥ रात्रौ जागरणं कृत्वा गीतवादित्रकौतुकैः ॥ ततः प्रभातसमये हो
मं कृत्वा च वैष्णवे ॥ आचार्यं वरयेत्तत्र वेदांगपारगं ॥ तथा ज्ञयान्व कर्तव्यं साधुकर्मप्रयत्नतः ॥ गोत्रयं च प्रदातव्यं
एकामपि सवत्सकां ॥ बहुदुग्धा सुशीला च तरुण्याभरणान्विता ॥ दंपती परिधानैर्वस्त्रैराभरणैः शुभैः ॥ त्र
य्यां सोपस्करां दद्यात् दानपात्रं कमंडलुं ॥ चामरं घृतपात्रं च तिलपात्रं सदक्षिणं ॥ दात्रा पिच सुवर्णं च भोज्या गव्ये
नैव द्विजाः ॥ एवं धेनुं च विप्राय दत्वा च पृष्ठतो व्रजेत् ॥ पदे पदे श्वमेधस्य फलं प्राप्नोत्यसंशयं ॥ अवारितानि
दानानि दत्वा लच विसर्जयेत् ॥ भूयसीं दक्षिणां दद्यात् व्रतसंपूर्णहेतवे ॥ गोपालेभ्यः प्रदातव्यं शष्कुल्यादिकं र
बलं ॥ सर्वं क्षमापयित्वा तु पारणं च ततश्चरेत् ॥ अनाथैर्व्याधिमुक्तैश्च सीदद्भिश्च कुटुंबकैः ॥ गवां सक्रितम
न्नं यत् दुग्धेन परिपाचितं ॥ येनान्नेन प्रकर्त्तव्या देहस्य शुद्धिमिच्छता ॥ एवमुद्यापनं कार्यं व्रतस्य फ

श्रीराम

लसिक्षये॥ नारीवापुरुषोवापिपुत्रवान्जायतेध्रुवं॥ इहलोकेसुखंभुक्त्वा अंतेगोलोकमाप्नुयात्॥ ॥श्रीकृष्णः॥
एतत्तेकथितंराजन्व्रतस्योद्यापनंशुभं॥ श्रोष्यंतिवापठंतीतितेषांसर्वेमनोरथाः॥ येकरिष्यंतिसततंतेषांलो
कश्चशाश्वतः॥ ॥इतिश्रीभविष्योत्तरपुराणेगोत्रिरात्रव्रतोद्यापनं॥ ॥अशोकत्रिरात्रव्रतं॥ श्रीकृष्णः॥
शृणुराजन्पुरावृत्तमयोध्यायांव्रतंशुभं॥ वसिष्ठेनमुनींद्रेणसीतायैयन्निवेदितं॥ विधायरावणवधंयदा
रामपुरंप्यगात्॥ तदादेवीप्रणम्याथवसिष्ठंवाक्यमब्रवीत्॥ सीतोवाच भगवन्दंडकारण्याद्रावणेनहृ
तापुरा॥ नपश्यामितदाकिंचिदात्मीयंविकलेंद्रिया॥ मासान्दशोषितातत्रराक्षसेनहृतासती॥ अशोक
वृक्षप्रणतातत्स्थितातत्परायणा॥ उक्तंत्रिजटयातत्रवाक्यंहेत्वर्थसंयुतं॥ अशोकप्रणतासीतेविशोका
त्वंभविष्यसि॥ तथेत्युक्तंमयाब्रह्मन्यथोक्तंत्रिजटावचः॥ ततःप्रभृत्यहंशश्वदशोकव्रतमारभे॥ तेनव्र
तप्रभावेनहनुमान्पवनात्मजः॥ शतयोजनविस्तीर्णंतीर्त्वासागरमव्ययं॥ मयादृष्टोनृपश्रेष्ठसाभि
ज्ञानोमहाबलः॥ पुनश्चकुशलीजातोदग्ध्वालंकांमहाबलात्॥ ततोमेप्रत्ययोजातोव्रतस्यास्यमभोहाल
रोः॥ अस्यचव्रतराजस्यप्रभावेनगतोहरिः॥ ततःकेश्चिद्दहोरात्रैर्भर्तामेराघवोबली॥ निहत्यरावणंसंख्ये १९२

णुपौलोमि देवेंद्रोयथा नष्टोभयातुरः॥ मानसांभसि संभूतपंकजांतरमाश्रितः॥ ब्रह्महत्याप्रभावेन उद्वेगगु
रुमाश्रितः॥ अभिभूतमिवापश्य तत्तो भुनिश्चयंगतः। कामं तपःप्रसंगेन सर्वं प्राप्स्यसि सुव्रते॥ बकुकालेप्सि
तं यस्मात्तपसा लभ्यते फलं॥ स्त्रीणां पुष्टिकरं ह्येकं व्रतं प्रोक्तं स्वयंभुवा॥ सावित्र्यापृच्छमानायाः स्तत्वं कर्तु
मिहार्हसि॥ अशोकव्रतमित्येव नाम्ना ख्यातं त्रिविष्टपे॥ येन चीर्णेन पौलोमि नारी दुःखं न संस्मरेत्॥ हर
स्य यं भुवस्त्येव वृक्षराज्ञे पुनंदने॥ अस्मिंस्तुष्टे हरस्तुष्ट इति विज्ञामि निश्चितं॥ शच्युवाच॥ पुंनागनाग
बकुलं चंपकाद्यान्महीरुहान्॥ परित्यज्य कथं चान्यान्कृतोस्मिन्कृतसंनिधिः॥ वाक्पतिरुवाच
हरेण निर्मितः पूर्वमशोकोयं कपालिना॥ लोकोपकारकरण तत्तायेशिववल्लभः॥ वसिष्ठउवाच निर्मा
य वृक्षप्रवरस्तेणाम्य भक्त्या चर्चयित्वा विधिवद्बुधः॥ पप्रच्छ देवी पुनराह नं त्वादेवि श्रृणुत्वं विधिमस्य सर्वं॥
वाक्पतिरुवाच॥ आरभ्य नद्व्रतं कार्यं त्रिरात्रे समुपोषणं॥ त्रिरात्रं देवि विख्यातमशोकस्तरुमूलके॥
कार्यं नारीभिरमलमनोवाक्कायकर्मभिः॥ ततः प्रदक्षिणादेया अष्टोत्तरशतं फलैः॥ नालिकेरैः खर्जू
रैः गोस्तनीभिर्दिने दिने॥ मंत्रेणानेन मनसा पूजयंति सदाशिवं॥ अशोक शोकापुनदसर्वकाम

११३

फलप्रद॥ व्रतेनानेन चीर्णेन यथोक्तफलदो भव॥ इति प्रदक्षिणमंत्रः। ततस्तृतीये दिवसे समभ्यर्च्य विधानतः
महादेवं वृषयुतं वंशपात्राणि कारयेत्॥ अनेनैव विधानेन यः कुर्याद्व्रतमुत्तमं॥ वैधव्यं नाप्नुयान्नारी पुत्रसौख्य
युता भवेत्॥ वसिष्ठउवाच बृहस्पतिमुखाच्छ्रुत्वा शची चक्रे व्रतं शुभं॥ शास्त्रोक्तविधिना सीते भक्त्या देव
समागतः। ब्रह्महत्याविनिर्मुक्तो तत्कालमपि वासवः॥ व्रतमेतत्समाचारयथा साध्वीषु सुश्रुताः॥ अथा
न्यं जायते क्षितौ॰ व्रतमेतत्कृतं लोके ख्यातादविभविष्यति॥ व्रतमेतदशोकस्य सर्वकामफलप्रदं॥ श्री
कृष्णउवाच वसिष्ठस्य वचः श्रुत्वा सीता चक्रे व्रतोत्तमं॥ रामाज्ञां समनुप्राप्य अयोध्यायां चकार सा॥ सी
ता व्रते कृते यस्मिं दुःखहीनाभयात्पुरा॥ युधिष्ठिरउवाच॥ अशोकस्य समाख्याता पूजा देव विधान
तः॥ का देवता तत्र पूज्या नारीभिर्व्रतसिद्धये॥ श्रीकृष्णउवाच अशोकवृक्षे तिष्ठंति सर्वदेवा युधिष्ठिर॥ प
ल्लवेषु तु शाखासु शिवाद्याः सर्वदेवताः। अशोकसंनिधौ रामं पूजानीयः सलक्ष्मणः॥ सीतया सहित
राजन्रविहोरिशोय तोमतः॥ पृथक्मंत्रैः पृथग्वस्त्रैरशाकाख्याय यथाक्रमं॥ पूज्याश्च भारतश्रेष्ठ पु
राणोक्तविधानतः॥ अशोकवृक्षविहिता शिवाद्याय सुरोत्तमाः॥ अशोकपूजनं नारुतेनुप्समम भवं लिह॥

गोर्यालक्ष्म्या तथेंद्राण्या अरुंधत्याच सीतया॥ त्वं समाराधितः पूर्व अशोक फलदो भव॥ इति पूजामंत्रः अशो
कवाटिकामध्ये सीतयालब्धप्रसादतः॥ अशोकसंपन्न फलो गृहाणार्घ्यं कृतं मया॥ इत्यर्घ्यं। रावणस्य वधार्थाय उ
त्पन्नस्तु महीतले॥ विष्णोरंशोसि देवेश गृहाणार्घ्यं नमोस्तु ते॥ दशावतारग्रहणं करोषि त्वं प्रभावतः॥ गृ
हाणार्घ्यं मया दत्तं सीतालक्ष्मणसंयुत॥ इति राम पूजामंत्रः। तातभक्त्युन्मुख वीर रक्षोयानुपयोगद॥
तं लक्ष्मीवर्धनं गौरं लक्ष्मणं पूजयाम्यहं॥ लक्ष्मण पूजामंत्रः॥ अवनीतलसंभूते सीते सर्वांगसुंदरि। गृहा
णार्घ्यं मया दत्तं पूजां जनकनंदिनि॥ लक्ष्मीस्त्वं सर्व देवस्य विष्णोरंशे महीतले॥ अवतीर्णमिया दत्तं गृहाणार्घ्यं नमो
स्तु ते॥ इति सीता पूजामंत्रः॥ एवं संपूज्य विधिना सर्वशोकविनाशनं॥ सर्वपापप्रशमनं सर्वकीर्तिविवर्धनं॥ अपु
त्रया पुरा पार्थ पार्वत्या मंदराचले॥ अशोकः शोकशमनः पुत्रत्वपरिकल्पितः॥ जातकर्मादिकं तस्य अशोक
स्य महातरोः॥ कारितं विधिवत्तत्र तेन वृक्षो नगोत्तमः॥ यावव्रतं कुरुते नारी पुराणोक्तविधानतः॥ अशोकस्य वि
धानेन सर्वान्कामानवाप्नुयात्॥ सर्वोपहारान्सराजेंद्र ब्राह्मणाय निवेदयेत्॥ कथामपि समाकर्ण्य यः कुर्या
द्द्विजतर्पणं॥ व्रतस्य फलमाप्नोति साकल्येनानेन संशयः॥ युधिष्ठिर उवाच॥ विशेषं ब्रूहि मे देव अशोक
तरुपूजने॥ येनार्चित तरोः सर्वं प्राप्यते सफलं फलं॥ श्रीकृष्ण उवाच कथयामि तरो राजन्यां पि

र्भविशुद्धात्मा गृहीतवान्॥ तदहं भाषे चन् विशिष्टं छामितां दृढव्रतं॥ अशोकस्य प्रभावमेवक्तुमर्हस्य शेषतः॥ व्रतस्य त
स्य पुराणोक्तं महीतले॥ अथवा सुरलोकेषु सुरनारीनिषेवितं॥ वसिष्ठ उवाच एवमेतज्जनकृतेयथा
वक्ष्यसि सुव्रत॥ अशोकस्य प्रभावेन तद्दृष्टं मया धुना॥ शृणु चात्र मया ख्यातं नंदने दिव्यकानने॥ बृह
स्पतिमुखाच्छ्रुत्वा च्छायज्जातं परमाद्भुतं॥ वृत्राभिभूतेन द्रेण हतादेवान्महासुरः॥ विध्वंसलाबुधिहा नि
स्तस्य धर्मं च श्रावयतां॥ ब्रह्महत्यामवाप्याथ देवेंद्रो नष्टचेतनः॥ र। त्रैलोक्यराज्यं त्यक्त्वा प्रसु मम ज्ञारिव्यया
दितः॥ एतस्मिन्नंतरे देवि नहुषो नृपसत्तमः॥ त्रैलोक्यराज्यं सकलं जहार बलदर्पितः॥ ततः शची प्रव्यथिता
हंताराज्यमवेक्ष्य सा॥ नंदनांतरमासाद्य तत्र पस्ते पसु दुस्तरं॥ तौ श्रुत्वा धर्मनिरतो बृहस्पतिरुदारधीः॥ आ
गत्य नंदने देवी वाक्यमाह महातपाः॥ बृहस्पतिरुवाच॥ किमर्थं तप्यते देवि तपः परमदुस्तरं॥ त्वया किं प्रार्थ्य
ते नेन तपसा ब्रूहि कारणं॥ शच्युवाच हताभिभूतदेवेंद्र हनराज्यं हृतद्विषं॥ क्वापि प्रनष्टं तं विप्रनजा
ने हप्रियं पतिं॥ एतस्मात्कारणं ब्रह्मन्स्तपउग्रं समाश्रिता॥ यथा पुनर्निजराज्यं देवेंद्रः प्राप्नुयादिति॥ के
तिष्ठति मुनेब्रूहि सुरराट् शत्रुतापनः॥ प्रसादं कुरु मे देव संयोगं तेन चाप्नुयां॥ वाक्पतिरुवाच शृ

येमनच॥ अजेयोयंमहातेजावृत्रनशत्रुविनाशनः॥ आराधयतत्तो देवंसर्वेशंकरमव्ययं। व्रतेनविधियुक्तेनत्वत्र
जेष्यथमाचिरं॥ देवाऊचुः गुरोकेनविधानेनकिंदृशेनव्रतेनच॥ आराधनीयोगौरीशोह्यस्माभिर्जयका
मुकैः॥ तद्वदस्वसुराचार्यत्वंहिनःपरमागतिः गुरुरुवाच कार्तिकादिषुमासेषुमंदवारेत्रयोदशी॥ वि
ज्ञेयाशुक्लपक्षेतुसर्वकामकरीशुभा॥ तस्यांप्रदोषसमयेलिंगरूपीसदाशिवः॥ पूजनीयोहिदेवंद्रैःसर्वकाम
समृद्धये॥ स्नात्वामध्याह्नसमयेतिलामलकसंयुतं॥ शिवस्यचार्चनंकुर्याद्गंधपुष्पफलादिभिः। पश्चात्प्र
दोषसमयेस्थावरंलिंगमर्चयेत्॥ स्वयंभुस्थापितंचापिपौरुषंयमपौरुषं॥ जनेवानिर्जनेवापिअर
ण्येवाप्तपोवने॥ ग्रामाद्बहिःस्थितंलिंगंग्राम्याच्छतगुणंस्मृतं॥ वाह्याच्छतगुणंपुण्यमारण्यस्यचपूजने॥ व
न्याच्छतगुणंप्रोक्तंलिंगंवैपर्वतस्थितं॥ पर्वताच्चायुतंपुण्यंतपोवनसमाश्रिते॥ कंदर्यादिसंस्थितंलिंगंपूजितंस्या
दनंतकं॥ एवंविशेषलिंगानांतीर्थानांनिपुणोर्चनं॥ ज्ञात्वाचशिवपूजायाविधिंशंभुंप्रपूजयेत्॥ कूप
वापीतडागादिदेवखातनगेषुच॥ क्रमाच्छतगुणंप्रोक्तंगंगायांस्यादनंतकं॥ पंचपिंडाननुध्धृत्यनस्ना
यात्परवारिणि॥ ततःप्रदोषसमयेस्नात्वामौनंसमाचरेत्॥ प्रदीपानांसहस्रेणदीपनीयःसमःशिव॥ ३१२

शतेनाप्यथवादेवंद्वात्रिंशद्दीपमालया॥ घृतेनदीपयेद्दीपान्शिवस्यपरितुष्टये॥ तथाफलैश्चधूपैश्चनैवेद्यैर्विविधै
रपि। उपचारैःषोडशभिर्लिंगरूपीसदाशिवः॥ पूज्यःप्रदोषसमयेनृभिःसर्वार्थसिद्धये॥ नाम्नाशतेनरुद्रोसौस्तोत
व्यश्चस्तुतिप्रियः॥ नमोरुद्रायभीमायनीलकंठायवेधसे। कपर्दिनेसुरेशायव्योमकेशायवैनमः। वृषध्वजा
यसोमायसोमनाथायवैनमः॥ दिगंबरायभर्गायउमाकांतकपर्दिने॥ तपोमयायव्याप्तायशिपिविष्टाय
वैनमः॥ व्यालप्रियायव्यालायव्यालानांपतयेनमः॥ महीधरायव्याघ्रायपशूनांपतयेनमः॥ त्रिपुरांतकाय
सिंहायशार्दूलायऋषभायच॥ मितायमितनाथायसिद्धायपरमेष्ठिने॥ कामांतकायकामायबुधीनांप
तयेनमः॥ कल्याणायविशिष्टायशिष्टायपरमात्मने॥ वेदवीतायगुप्तायवेदगुह्यायवैनमः॥ दीर्घायदीर्घ
रूपायदीर्घार्थायमहायच॥ नमोजगत्प्रतिष्ठायव्योमरूपायवैनमः। गर्वकृत्सुमहादैत्यअंधकासुरसूदिने॥
नीललोहितशुक्लायचंडमुंडप्रियायच॥ भक्तिप्रियायदेवायज्ञानज्ञातव्ययायच॥ महेशायनम
स्तुभ्यंमहादेवहरायच॥ त्रिनेत्रायत्रिवेदायवेदांगायनमोनमः॥ अर्थायअर्थरूपायपरमार्थायवैने
मः॥ विश्वरूपायविश्वायविश्वनाथायवैनमः। शंकरायचकालायकालावयवरूपिणे॥ अरूपायविरूपा

था

यस्सूक्ष्मसूक्ष्मायवै नमः॥ श्मशानवासिने तुभ्यं नमस्ते कृत्तिवाससे॥ शशांकशेखरायेव रुद्रोभूमिश्रयाय
चामुंडुर्गायदुर्गपारायदुर्गावयवसाक्षिणे॥ लिंगरूपाय लिंगाय लिंगानांपतये नमः॥ नमःप्रभावरूपायप्रभाव
र्थायवै नमः॥ नमोनमः कारणकारणायते मृत्युंजयायात्मभवस्वरूपिणे॥ त्र्यंबकायामितकंठभर्गव
गौरीपते मंगलहेतवे नमः॥ बृहस्पतिरुवाच॥ नाम्नांशतं महेशस्य उच्चार्यं व्रतिनीतदा॥ प्रदक्षिणा
नमस्कारैस्तत्तत्संख्यैःप्रयत्नतः॥ कार्याश्च दोषसमये तुष्ट्यर्थं शंकरस्यच॥ एवंव्रतं समादिष्टं तव शक्रम
हामते॥ शीघ्रं कुरु महाभाग पश्चाद्युद्धं कुरु प्रभो॥ शंभोः प्रसादात्सर्वं ते भविष्यति जयादिकं॥ शक्रउ
वाच एतः कदा महेशानं समाराधय दादरात्॥ कथं च सवरः प्राप्तः पुरा कस्य भवद्द्विज॥ गुरुरुवाच
चैत्रो हायं महातेजास्तपस्वी तपसा पुरा॥ शिवं प्रसादयामास पर्वते गंधमादने॥ गंधर्वाच्चित्ररथोरा
जा वनं चित्ररथस्य तत्॥ एतज्जानीहि भोइंद्र त्वत्पुर्याः समीपतः॥ यस्मिन्वने महाभाग वसति महदुर्मे
यः॥ तस्माच्चैत्ररथं नाम वनं परममंगलं॥ यस्य राज्ञः शिवेनैवयानंचापरमाद्भुतं॥ कामगं किंकिणीयुक्तं
सिद्धचारणसेवितं॥ गंधर्वैरप्सरोभिश्च किंनरैरुपशोभितैः॥ ततस्तेनैव याने नष्टपृथिवीपर्यटन्पुरा॥ १९८

व्रतमिदं कृतं॥ मनुष्यदेवगंधर्वनारीभिः पुत्रवृद्धये॥ अनुसूयात्रिपत्न्या वारुंधत्यातथैवच॥ देवक्यासीतया
चैवयाद्रौपद्या सत्यभामया॥ दमयंत्या च सावित्र्या कृतं तद्व्रतमुत्तमं॥ अशोकः पूजितः सर्वैर्यथावच्छृणु पा
र्थिव॥ अशोकाराजतश्चैव सौवर्णाश्च तथा॥ शीतः॥ नैवेद्यं कारयेत्स्त्री तां सीतां वर्मा राममलक्ष्मणौ॥ पूजयेद्वि
विधैर्मंत्रैः सर्वैः कैर्नृपसत्तम॥ अशोकं पूजयेद्वृक्षं प्ररूढं शुभपल्लवैः॥ विरूढैः सप्तधान्यैश्च गुणकर्णादिकैः शु
भैः॥ कालोद्भवैः शुभैर्दिव्यैर्नालिकेरैः सदाडिमैः॥ पुष्पादिना तथा धूपैः पूजयेत्तरुमुत्तमं॥ अशोकः पांडवश्रे
ष्ठ शोकनाशनकृत्क्वचित्॥ पितृमातृपतिश्चैव श्वशुराणां तथैव च॥ अशोकस्त्वं शोकहर्त्ता रोभवसर्वत्रनः
कुले॥ इतिश्रीभविष्योत्तरपुराणे अशोकत्रिरात्रव्रतं॥ अथ कार्त्तिकादिमासेषु शनियुक्तायां त्रयो
दश्यां शनिप्रदोषव्रतं स्कांदे॥ लोमश उवाच पुरा वृत्रादिभिर्दैत्यैर्वर्तमाने महाहवे॥ हतः शक्रेण नमुचिर्वि
रथः फेनेन वै बली॥ दैत्यान्पलायितान्दृष्ट्वा हन्यमानान्सुरैर्भृशं॥ वृत्रः कोपपराविष्टो देवान्योद्धुम
थाययौ॥ कालाग्निरूपः सद्दृशोरूपं कृत्वा महाहवे॥ व्यवर्धत्त महातेजा रोदसी पूरयन्निव॥ तद्दृष्ट्वा
भयवित्रस्ता देवाः शक्रपुरोगमाः॥ कर्तव्यं नाध्यपद्यंत तदा गुरुरुवाच ह॥ तपसा तु महोग्रेण व्रतेनचनि

हृतयेव॥ अस्यात्यत्तविमानात्त्वंदैत्यास्त्वासुदुर्मते। एवंशप्तस्तयादेव्याभवान्याराजसत्तमः॥ राजाचित्रर
थः सद्यः पपात सतदादिवः॥ आसुरींयोनिमासाद्यवृत्रोनाम्नाभवत्तदा॥ तपसापरमेणैवत्त्वष्टुःसंयोजित
क्रमात्॥ तपसाब्रह्मचर्येणशंभोराराधनेनवा। व्रतेनानेनचबलीजातुंशक्योनकेनचित्॥ अनसुरेणाहिभा
वेनव्यंगंचकेव्रतंयतः॥ तेनछिद्रेणवैवासोपश्चात्तेजाभविष्यति॥ तस्मात्त्वमपिदेवेंद्रकृत्वावैद्रव्रतंशुभं॥
हनिष्यसिमहाबाहोवृत्रेनास्त्यत्रसंशयः॥ गुरोस्त्वद्वचनंश्रुत्वाउवाचाथशतक्रतुः॥ सोद्यापनविधिंब्रूहिप्र
दोषस्यचमेधुना॥ गुरुरुवाच कार्त्तिकेमासिसंप्राप्तेमंदवारेत्रयोदशी॥ संपूर्णातुभवेद्यास्मिन्सास
मग्रव्रतसिद्धये॥ वृषभोरजतःकार्यःपृष्ठेतस्यसुपीठकं॥ तस्योपरिन्यसेद्देवंउमाकांतंत्रिलोचनं॥ पंच
वक्त्रंदशभुजमर्धांगेगिरिजासती॥ सौवर्णप्रतिमांकृत्वातांम्रकुंभजलावृते॥ पंचरत्नकलोपेतं
पंचपल्लवचर्चिते॥ चंदनेनसुगंधेनमिश्रितेशोभितेतथा॥ रूप्यपात्रंततःकृत्वाकुंभस्योपरिविन्यसेत्॥ अश
क्तोमृन्मयेकुंभेवंशपात्रमथापिवा॥ पर्णशरावंचारोप्यसैवपाशप्रतिमांतथा॥ शक्त्याकृतांपरि
स्थाप्यवस्त्रमाल्यविभूषणैः॥ पूजयित्वाविधानेनरात्रौजागरणंचरेत्॥ पुष्पमंडपिकामाद्यौकृत्वाश्र १२७

द्धासमन्वितः॥ आवाहयेदथमंत्रत्रमंत्रेणानेनसुव्रते॥ एह्येहित्वमुमाकांतसुरवस्येशसुनिर्मले॥ उपविश्य
मंडेदानींसर्वशांतिप्रदोभव। आसनं। पाद्यंचतेमयादत्तंपुष्पगंधसमन्वितं॥ गृहाणदेवदेवेशप्रसंन्नोवरदोभव॥
पाद्यं तांम्रपात्रस्थितंतोयंफलगंधादिसंयुतं॥ अर्घ्यंगृहाणदेवेशमयदत्तंहिभक्तितः॥ अर्घ्यं॥ शीतलंनिर्म
लंतोयंकर्पूरेणसुवासितं॥ आचम्यतांसुरश्रेष्ठमयादत्तंहिभक्तितः॥ आचमनीयं पंचामृतेनस्नापन तत्त
न्मंत्रैस्तुकारयेत्॥ गोक्षीरधामदेवेशगोक्षीरेणमयाकृतं॥ स्नपनंदेवदेवेशगृहाणपरमेश्वर॥ दुग्धं रंभा
त्वेवमयादेवस्नपनंक्रियतेतव॥ गृहाणभक्त्यादत्तंमेसुप्रसन्नोभवाव्ययः॥ दधि सर्पिषादेवदेवेशस्नपनंक्रि
यतेमया॥ उमाकांतगृहाणेदंश्रद्धयासुरसत्तम॥ घृतं॥ इदंमधुमयादत्तंतवपुष्ट्यर्थमेवच॥ गृहाण
शंभोमेभक्त्याममशांतिप्रदोभव॥ मधु॥ सितयादेवदेवेशस्नपनंक्रियतेमया॥ गृहाणश्रद्धयादत्तंसुप्र
सन्नोभवप्रभो॥ कावेरीनर्मदावेणीतुंगभद्रासरस्वती॥ गंगाचयमुनाचैवताभ्यस्नानार्थमाहृतं॥ गृहाणत्व
मुमाकांतस्नानायश्रद्धयाजलं॥ एतद्वासामयादत्तंसोत्तरीयंसुशोभनं॥ गृहाणत्वंसुरश्रेष्ठममाचायुः

प्रदो भव। वस्त्रं॥ यज्ञोपवीतं सौवर्णमयादत्तं च शंकर॥ गृहाणपरयातुष्ट्यातुष्टिं मेकुरु सर्वदा॥ उपवीतं। सुगंध
चंदनं देव मया दत्तं तव प्रभो। भक्त्यापरमया शंभो सुगंधं कुरु मे भव॥ चंदनं॥ मालती चंपकादीनि कुमुदान्युत्प
लानि च। बिल्वपत्राणि पूजार्थं स्वीकुरुत्वमुमापते॥ पुष्पं॥ धूपविशिष्टं परमं सर्वौषधिविजृंभितं॥ गृहाणपर
मेशान मम शांत्यर्थमेव च॥ धूपं। दीपं च परमं शंभो घृत प्रज्वलितं मया॥ दत्तं गृहाण देवेश ममज्ञानप्रदो
भव॥ दीपं। दीपावली ममादत्ता गृहाण परमेश्वर॥ आरार्त्तिकाप्रदानेन मम तेजः प्रदो भव॥ नीराजनं। शाल्यो
दनं घृताद्यपपायसादिसमन्वितं॥ नैवेद्यं विविधं दत्तं भक्त्या मे प्रतिगृह्यतां॥ नैवेद्यं॥ कर्पूरैला लवंगादि
पूगीफलसमन्वितं॥ ताम्बूलं कलितं भक्त्या गृहाण गिरिजाप्रियं॥ तांबुलं। इदं फलं मया दत्तं मिति फलं॥ हि
रण्यगर्भगर्भस्थ मिति दक्षिणा। निपत्य दंडवद्भूमौ प्रणम्य च पुनः पुनः। क्षमापयित्वा देवेश रात्रौ जाग
रणं चरेत्॥ गीतवादित्रनृत्याद्यैर्गृहं वलात्रयेच्चतुः। वितानं मंडपं कृत्वा नानावर्णैः समन्वितं। प्रभातायां
तु शर्वर्यामुदिते रविमंडले॥ स्नात्वा पुनः समभ्यर्च्य जुहुयात्पायसेन च॥ आचार्यं च सपत्नीकं वस्त्रालंकार १८

तथा गिरीन् समुद्रांश्च दीपांश्च विविधांस्तथा॥ एकदा पर्यटन् राजा नाम्ना चित्ररथो महान्। कैलासमागतस्तत्र दद
र्श परमाद्भुतं॥ तथा सभामहेशस्य गणैश्चैव विराजितां॥ अर्धांगलग्नया देव्या शोभितं च महेश्वरं॥ निरीक्ष्य
देव्या सहितं सदा गिरीशं न्यायान्वितं वाक्यमिदं बभाषे॥ वयं च शूरा विषयान्विताश्च मर्त्यो द्वयं स्त्रीजितश्चा
पि चान्ये। न लोकमध्ये वयमेव वाञ्छा स्त्री सेवयं लज्जयानैव कुर्मः॥ एवं वाक्यं निशम्यतं महेशः प्रहसन्निव॥
उवाच न्यायसंयुक्तं सर्वेषामपि शृण्वतां॥ भयं लोकायवादोत्र सर्वेषामपि नान्यथा॥ भक्षितं कालकू
टं मे सर्वेषामपि दुर्जयं॥ लोकातीतं च मे वृत्तं तथाप्युपहसत्यसौ॥ ततश्चित्ररथं देवी गिरिजा वाक्य
मब्रवीत्॥ रे दुरात्मन् कथं त्वद्य शंकरश्चोपहासितः। मया सहैव मंदात्मन् द्रक्ष्यसे कर्मणः फलं॥ साधूनां
समचित्तानां मेषमार्गं करोति यः॥ देवो वाप्यथवा मर्त्यः स विज्ञेयाधमाधमः। एते मुनीन्द्राश्च महानुभा
वास्तथाप्यमी ऋषयो वेदगर्भाः॥ तथैव सर्वे सनकाद्या ह्यमी अज्ञाननाशं शिवमर्चयंते॥ रुद्रास
विष्णुजनैश्च भिन्नस्तमेषैः कृत्वासि परो न कश्चिकाः॥ तस्मादतिस्तब्ध महं कृतं त्वा सशिक्ष्यैनेव कुर्याद

चंदनैः॥तोषयित्वागुरुंविद्वांतंगांचदद्यात्पयस्विनं॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिःप्रतोषयेत्॥ दीना
नाथांश्चसंतर्प्यअछिद्रंवाचयेत्ततः॥ लब्धानुज्ञांब्राह्मणेभ्योबंधुभिःसहितःशुचिः॥ हरिस्मरन्शिवंभक्त्या
भुंजीतनियतोव्रती॥ अनेनैवविधानेनकुर्याद्उद्यापनंबुधः॥ एवंयःकुरुतेभक्त्याप्रदोषव्रतमुत्तमं॥ श
निवारेणसंयुक्तंसोद्यापनविधिंनरः॥ आयुरारोग्यमैश्वर्यंपुत्रपौत्रमनंतकं॥ शत्रूंश्चजयतेनित्यंप्रसादच्छं
करस्यच॥ तस्मात्त्वमपिदेवेंद्रकृत्वजयस्वसदाशिवं॥ शनिप्रदोषविधिनाक्रमंवृत्रंविजेष्यसि॥ एवंनिशम्य
गुरुणाकथितंतदानींइंद्रोयमेनविधिनागिरिशंप्रपूज्य॥ लोकंत्रयस्त्रमिवदैत्यपतिंप्रवृद्धंतत्तत्क्षणाद्ग
मयत्स्वयमीशतुष्ट्या॥ इतिस्कंदोक्तकेदारखंडेशनिप्रदोषव्रतं॥ स्कांदेव्यासउवाच ॥ त्रयोद
श्यांतथारात्रौसोपहारंत्रिलोचनं॥ दृष्टव्यंप्रथमयामंमुच्यतेसर्वपातकैः॥ मनरत्नेस्कांदेदेव्युवाच॥ दिव
केनविधानेनप्रदोषव्रतमुत्तमं॥ विधातव्यंनरैःस्त्रीभिःसंतानफलसिद्धये॥ ईश्वरउवाच॥ यदात्रयोदशी
युक्तामंदवारेणसंयुता॥ आरब्धव्यंव्रतंतत्रसंतानफलसिद्धये॥ ऋणनिर्मोचनार्थंतुसोमवारेणसं
सौभाग्यस्त्रीसमृध्यर्थंशुक्रवारेणसंयुता॥ आयुरारोग्यसिध्यर्थंभानुवारेणसंयुता॥ एकवत्सरप

र्यंतप्रतिपक्षेत्रयोदशी॥ प्रदोषेशिवमभ्यर्च्यनक्तंभोक्ष्यामिशंकर॥ भवायनमः। महादेवाय॰ नीलकंठाय॰ श
शिमौलिने॰ उग्राय॰ ईशानाय॰ भावाद्यैःषोडशोपचारपूजामष्टप्रदक्षिणीः नमस्काराश्चाष्टकंकुर्यात्॥ य
थाभवान्समस्तानां पशूनांपाशमोचकः॥ तथाव्रतेन संतुष्टः पुत्रं देहिसुलक्षणं॥ ऋणरोगादिदारिद्र्यंपापक्षु
दपमृत्यवः। भयशोकमनस्तापनश्यंतुममसर्वदा॥ निवेद्यकर्मणातंतुदद्याद्वित्तानुसारतः॥ दक्षिणां
लपोभ्यश्च ततोमौनंविसर्जयेत्॥ एवंसंवत्सरंकुर्यात्त्रयोदश्यामिदंव्रतं॥ इदमपिस्कांदोक्तमेव॥ अथानंगे
त्रयोदशीव्रतं॥ श्रीकृष्णउवाच॥ शृणुपार्थव्रतश्रेष्ठंनाम्नानंगत्रयोदशी॥ व्याशिवायेपुराणोक्तमर्द्धेंदु
दुमौलिना॥ गौर्युवाच॥ पुरासौभाग्यकरणीख्यातानंगत्रयोदशी॥ तस्यांव्रतंमहादेवमयापिकथयप्र
भो॥ कस्मिन्मासेप्रकर्तव्यंसंपूर्णंवकथंभवेत्॥ पूज्यानिकानिनामानिविधिनाकेनचेमृड॥ दुर्भगानांच
नारीणांसौभाग्यकरणंपरं॥ वंध्यानांपुत्रजननंधनधान्यविवर्धनं॥ एतद्व्रतंमहादेवप्रसादाद्वक्तुमर्हसि॥
ईश्वरउवाच॥ कथयामिनसंदेहोमहापुण्यंमहाफलं॥ चीर्णेनयेनदेवेशिसर्वसंपद्यतेसुखं॥ नारीणांतुन्न
णांचैवविधातव्यंप्रयत्नतः। हेमंतेहिऋतौप्राप्तेमासिमार्गशिरेशुभे॥ शुक्लपक्षेत्रयोदश्यांउपवासंतुका
१११

रयेत्॥ मल्लिकादंतधावनंपूजांवर्मनुरेणतु। नारंगेणार्घ्यमन्त्रंचनैवेद्योफणिकास्तथा॥ गंधैःपुष्पैस्तथाधूपैर्दयेश्च
यथाविधि॥ अस्तैश्च फलैश्चैव एकाग्रहृदयस्थितः॥ सम्यग्जितेंद्रियोभूत्वा अनंगंहृदि कल्पयेत्॥ अभ्यासदासि
पीकृत्वा अर्घ्यंचैवनिवेदयेत्॥ नमस्कुर्यादनंगंचमंत्रेणानेनमानिनि॥ नमोस्त्वनंगदेवाय सर्वसंचनिवासि
ने॥ हृद्दूयस्थायनित्यायसूक्ष्मायपरमेष्ठिने॥ स्वर्गेचैवतुपातले मर्त्यलोकेतथैवच॥ सर्वव्यापीत्वनंगत्वंगृ
हाणार्घ्यंनमोस्तुते॥ इत्यर्घ्यं॥ पूजयेत्स्वस्थचित्तेनमधुवचप्राशयेन्निशि॥ रंभातुल्याभवेन्नारी सौभाग्य
मतुलंभवेत्॥ नश्यंति सर्वपापानि अन्यजन्मकृतानिच॥ लावण्यमतुलंचैवरूपैश्वर्यसमन्वितं॥ अश्वमेध
स्ययज्ञस्यफलंप्राप्नोतिमानवाः॥ पौषस्येव्रतुमासस्योदुंबरंदंतधावनं॥ जातीपुष्पैःपूजनस्यात्वद्वाऽडिमेना
र्घ्यएवच॥ अशोकवर्त्तिकास्निग्धानैवेद्यंचप्रकल्पयेत्॥ उपोष्यपूजयेद्देवंभक्त्यानाद्येश्वरप्रिये॥ ॐ नमोना
द्येश्वरायईश्वरायनमोनमः। नमस्तेभुवनेशायगृहाणार्घ्यंनमोस्तुते॥ इत्यर्घ्यं॥ व्रतस्थस्वस्थचित्तेन
चंदनंप्राशयेन्निशि॥ सर्वपापविशुद्धात्मा सौभाग्यमतुलं१ लभेत्॥ माघस्येवृतुमासस्यविष्णुक्रांतादं
तधावनं॥ कुंदपुष्पैः समभ्यर्च्य स्वर्चयेद्बीजपूरकैः॥ नैवेद्यंशर्कराद्यादद्वायोगेश्वरस्तथा॥ ओनमो

योगेश्वराययोगजंबुनिवासिने॥ ग्रहाणार्घ्यं मयादत्तं योगेश्वर नमोस्तुते॥ इत्यर्घ्यं॥ मौक्तिकं प्राशयेद्रात्रौ वाज
पेय फलं लभेत्॥ सर्वाभिप्रायसिध्यर्थं वीरेशं नाम पूजयेत्॥ ओं वीरेश्वर वीरभद्र उमाकांत सुरेश्वर॥ हिमम
ध्यनिवासिस्त्वं ग्रहाणार्घ्यं महेश्वर॥ सीतातुल्या भवेन्नारी कंकोलं प्राशयेन्निशि॥ चैत्रस्य तु मासस्य न
वमालिर्दंतधावनं॥ दमनेनार्चयेद्देवं तथार्घ्यं च प्रकल्पयेत्॥ नैवेद्यं खर्ज्जुकान्दद्याद्विश्वरूपं तु पूजयेत्॥ नम
स्ते विश्वरूपाय सुरूपाय महात्मने॥ ग्रहाणार्घ्यं मयादत्तं विश्वरूप नमोस्तुते॥ उमातुल्या भवेन्नारी कर्पूरं प्रा
शयेन्निशि॥ वैशाखस्य तु मासस्यापामार्गं दंतधावनं॥ पूजा च मल्लिकापुष्पै रुत्तरार्घ्यं च दापयेत्॥ नैवेद्यं घृतपू
रं दद्यात् महारूपं तु पूजयेत्॥ नमस्ते महारूपाय सर्वविज्ञानरूपिणे॥ ग्रहाणार्घ्यं मयादत्तं महारूप नमोस्तुते॥
ततः शुद्धमना भूत्वा जाजीफलं प्राशयेन्निशि॥ अश्वमेधस्य यज्ञस्य फलमष्टगुणं लभेत्॥ ज्येष्ठस्य तु मा
सस्य सहदेवी दंतधावनं॥ पूजा बकुलपुष्पैस्तु श्रीफलेनार्घ्यकल्पनं॥ नैवेद्ये मंडकान्दद्याल्लवंगं प्राशये
न्निशि॥ प्रद्युम्नं पूजयेद्देवं सर्वपापप्रणाशनं॥ नमस्ते पशुपतये प्रद्युम्न भुवनेश्वर॥ ग्रहाणार्घ्यं मयाद
त्तं प्रद्युम्न परमेश्वर॥ सुवर्णशतदानस्य फलमष्टगुणं लभेत्॥ आषाढस्य तु मासस्य नारिंगी दंतधावनं॥ २००

वं समाहितः। नमस्ते जगदीशाय तापिने शूलपाणये॥ गृहाणार्घ्यं महेशान जगदीश नमोस्तु ते॥ अर्घ्यमंत्रः रजो
ते जागरं कुर्याद्गीतवाद्यमहोत्सवैः। अर्धनारीश्वरं कुर्यात् सौवर्णं रूप्यमेव वा॥ वस्त्रयुग्मेन संवेष्ट्य शय्यायां विनि
वेशयेत्॥ एवं कृत्वा तु देवेशं तत्र शोभां तु कारयेत्॥ श्वेतपुष्पैस्तु संपूज्य श्वेतचंदनचर्चितं॥ धूपं सुगंधिं संक्षि
प्य सवत्सां गां प्रदापयेत्॥ श्वेतवस्त्रपरीधानां घंटाभरणभूषितां। सुसूक्ष्मं वस्त्रयुगलमाचार्याय निवेदयेत्। त
थैव दक्षिणां दद्यात् आसनं चैव पादुकां। छत्रं च मुद्रिकां चैव कंकणं चैव भूषणं॥ खट्वां चादिव्यां प्रदद्यात्तु तूल्या
च्छादनसंयुतां॥ गृहोपस्करसंयुक्तां भक्तिसंयुक्तचेतसा॥ तत्रोपवश्याचार्यमुपवासव्रती ततः॥ पा
दौ मूर्ध्नि समारोप्य प्रणिपत्य वचो वदेत्॥ भगवंस्त्वत्प्रसादेन व्रतं संपूर्णतां मम॥ एवमस्त्विति सं्व्रूयात् तव
तुष्टोस्तु शंकरः॥ ईश्वर उवाच॥ एवं कृत्वा प्रयत्नेन दंपती विप्र पूजयेत्॥ तयोश्च भोजनं दद्याद्दंपत्योः
परितोषकं॥ अनेन विधिना तुष्टा भाम्यहं सुमुखस्त्वयानघे॥ तेभ्यो दत्तं च यत्किंचिदक्षयं नात्र संशयः॥ आचा
र्यमग्रतः कृत्वा तस्यादेशं तु कारयेत्॥ नह्याचार्यसमं तीर्थं नह्याचार्यसमं तपः॥ तस्याहं कायमास्थाय
धर्मसिद्धिं नयेध्रुवं॥ तेनैवाचार्यदानेन न सर्वं भवति चाक्षयं॥ एतद्व्रतोत्तमं श्रेष्ठं गुह्याद्गुह्यतरं परं। राज्य
मर्थान्सुतान्क्षिप्रं वैधव्यं च यच्छति॥ रूपं धनं धान्यमायुरारोग्यं च प्रदापयेत्॥ इष्टलाभं च सौभाग्यं २०१

वर्धयेच्च वरानने॥ त्रयोदशीव्रतान्नास्ति सौभाग्यकरणं परं॥ इति भविष्ये अनंगत्रयोदशीव्रतं॥ ॥इतिश्री
भट्टनीलकंठात्मजभट्टशंकरकृते व्रतार्के त्रयोदशीव्रतानि॥ ॥अथ चतुर्दशीव्रतानि॥ तत्र वैशाख
शुक्लचतुर्दश्यां नृसिंहचतुर्दशीव्रतं॥ तच्च प्रदोषव्यापिन्यां कार्यं॥ तदुक्तं हेमाद्रौ नृसिंहपुराणे॥ वैशाखशु
क्लपक्षे तु चतुर्दश्यां निशामुखे। मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं॥ वर्षे वर्षे तु कर्तव्यं मम संतुष्टिका
रणमिति॥ स्कांदेपि। वैशाखस्य चतुर्दश्यां सोमवारे निलर्क्षके॥ अवतारो नृसिंहस्य प्रदोषसमये द्विजा इ
ति॥ अनिलर्क्षं स्वाती। दिनद्वये तद्व्याप्तावव्याप्तौ वैकदेशसमव्याप्तौ परा। अनंगेन समायुक्ता न कार्या
चतुर्दशी॥ धनापायेर्वियुज्येत तस्मात्तां परिवर्जयेदिति तत्रैव निषेधात्॥ इदं च व्रतं संयोगपृथक्त्वन्यायेन नि
त्यं काम्यं च। स्कांदे। विज्ञाय मद्दिनं यस्तु लंघयेत्स पापकृन्नरः॥ स याति नरकं घोरं यावच्चंद्रदिवाकरे। मम सं
तुष्टिकारणमिति फलश्रवणाच्च॥ अथ कथा॥ सूत उवाच॥ हिरण्यकशिपुर्हत्वा देवदेवं जगद्गुरुं॥
सुखासीनं तु दुर्लंघे शांतकोपं रमापतिं॥ प्रल्हादो ज्ञानिनां श्रेष्ठः पालयन्राज्यमुत्तमं॥ एकाकी वत दुर्लंघे
इदं वचनमब्रवीत्॥ प्रल्हाद उवाच नमस्ते भगवन्विष्णो नृसिंहरूपिणे नमः॥ त्वद्भक्तोहं सुरेश

कृताश्चाभिस्तुतस्त्वत्तः। स्वामिन्त्वयि ममाभिन्ना भक्तिर्जाता त्वनेकधा।। कथं च नेप्रियो जातः कारणं वद मे प्रभो।।
नृसिंह उवाच।। कथयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः।। मत्कार्यकारणात्त्वं तु प्रिय तस्य च कारणं। पुरा
काले ह्यहं विप्रः किं तु त्वन्नाथ धीतवान्।। नाध्यात्मवास्तु देवाहि वेश्यासंसक्तमानराः।। तस्मिन्जाते तु नवेच
त्वच कारस्तु कृतं कियत्।। युक्तानु मद्व्रतं चैकं वेश्यासंगतिलालसः।। मद्व्रतस्य प्रभावेन भक्तिर्जाता त्वन
नघ।। प्रसिद्धो च्य तांतावत्कस्य पुत्रस्य किं व्रतं। वेश्यायां वर्तमानेन कथं तच्च कृतं मया। येन तद्विष्णुमाहात्म्य
वक्तुमर्हसि सांप्रतं।। नृसिंह उवाच।। पुरावतीपुरे ह्यासीत् ब्राह्मणो वेदपारगः। तस्य नाम सुशर्मेति बहुलो
केषु विश्रुतः। नित्यहोमं क्रियां चैव विदधाति द्विजोत्तमः। ब्रह्मक्रियां सु नियतं सर्वासु किल तत्परः। आग्नेष्ट
मादिभिर्यज्ञै रिष्टासर्वे सुरोत्तमाः।। तस्य भार्या सुशीला च विख्याता भुवनत्रये। पतिव्रता सदाचाराप
ति भक्तिपरायणा। जज्ञिरे स्यां सुताः पंच तस्या द्विजवरात्तथा।। सदाचाराः सुविद्वांसः पितृभक्तिपरायणाः
तेषां मध्ये कनिष्ठस्त्वं वेश्यासंगति तत्परः।। तथापि विद्यमानेन सुरापानस्तु पातकं।। सुवर्णं चाप्युपहृतं
चौरैः सार्धं त्वया बहु।। विलासिन्या सुतां तेश्च समं चीर्णमिधं बहु। विलासिनी वेश्या। एकदा तद्गृहे २०२

कदंबैः पूजयेद्देवं नालिकेरार्घ्यकल्पना। नैवेद्यं दधि नक्तं वो मापतिं प्रपूजयेत्।। प्राशयेत्तिलबीजानि शिवसक्तेन
चेतसा। उमापते महाबाहो कामदहनाय ते नमः।। गृहाणार्घ्यं चंद्रमौले उमाकांत नमोस्तु ते।। वाजपेयस्य यज्ञस्य
फलमाप्नोति मानवः।। श्रावणस्य तु मासस्य जातीभिर्दंतधावनं।। पूजयेत्सप्तपुष्पैश्च जंबूकैरर्घकल्पना।। नैवेद्यं
क्षीरसं दद्यात् शूलपाणिं तु पूजयेत्।। प्राशयेद्दधितोयं तु रात्रौ चैव समाहितः। ॐ नमः शक्तिधराय भक्तिभावन
शूलिने।। गृहाणार्घ्यं मया दत्तं शूलपाणे नमोस्तु ते।। सौत्रामण्याख्ययज्ञस्य फलमष्टगुणं लभेत्।। भाद्र
स्य वरमासस्य अंकोल्लं दंतधावनं।। अर्चयेच्चंपकैः पुष्पैर्नैवेद्यैर्घृतपूरिकां। अर्घपूगफलं दद्यात्सद्योजात
तु पूजयेत्।। ततः स्वच्छमना भूत्वा अगुरुं प्राशयेन्निशि।। त्रिदशेश्वर देवाय सद्योजाताय ते नमः।। गृहाणा
र्घ्यं मया दत्तं सद्योजात नमोस्तु ते।। दशानामश्वमेधानां फलं प्राप्नोति मानवः। आश्विनस्य तु मासस्य केतक
ती दंतधावनं।। अर्चयेत्करवीरैस्तु अर्घ्यं कर्कटिकाफलं।। पूज्यस्त्रिदशाधिपो देवो नैवेद्यं घृतमंडिका।। प्राश
येत्कनकं तोयं निशि देवं प्रपूजयेत्।। ॐ त्रिदशाधिपदेवेश उमाकांत महेश्वर।। त्रिधारूपमयस्त्वं हि अर्घमि
प्रतिगृह्यतां।। चातुर्मास्यस्य यज्ञस्य फलं दशगुणं लभेत्।। कार्तिकस्य तु मासस्य कदंबं दंतधावनं।। रक्तो
त्पलैः पूजनं च कूष्मांडार्घ्यं प्रदापयेत्।। नैवेद्यं पूरिकां दद्यात् पूजयेज्जगदीश्वर। प्राशयेन्मदनफलं निशि

बहुनोक्तेन किं वत्स व्रतस्य फलमुत्तमं ॥ प्रल्हाद उवाच ॥ व्रतस्यास्य फलं साधु त्वयि मे भक्तिकारणे ॥ स्वा
मिन् जातं विशेषेण त्वत्तः पापनिकृंतनं ॥ अधुना श्रोतुमिच्छामि व्रतस्यास्य विधिं परं ॥ कस्मिन्मासि भवेद्दत
त्कस्मिंश्च वासरे प्रभो ॥ एतद्विस्तरतो देव वक्तुमर्हसि सांप्रतं ॥ विधिना येन वै स्वामिन्सम्यक्फलभुग्भवे
त् ॥ ममोपरि कृपां कृत्वा ब्रूहि त्वं सकलं प्रभो ॥ श्रीनृसिंह उवाच ॥ साधु साधु महाभाग व्रतस्यास्य विधिं
परं ॥ सर्वं कथयतो मे घत्वमेकाग्रमनाः शृणु ॥ वैशाखशुक्लपक्षे तु चतुर्दश्यां समाचरेत् ॥ मज्जन्मसंभवं
पुण्यं व्रतं पापप्रणाशनं ॥ वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारकं ॥ महापुण्यमिदं श्रेष्ठं मानुषैर्भवभीरुभिः ॥
तेनैव क्रियमाणेन सहस्रद्वादशीफलं ॥ जायते मन्मुखाद्द्विप्र मानुषाणां महात्मनां ॥ स्वांतिनक्षत्रयो
गेन शनिवारेण संयुते ॥ सिद्धयोगस्य योगेन वणिजे करणे तथा ॥ पुण्यसौभाग्ययोगेन लभ्यते दैवयोग
तः ॥ सर्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनं ॥ एतदन्यतरे योगे तद्दिने पापनाशनं ॥ केवलेपि च कर्तव्यं त
द्दिने व्रतमुत्तमं ॥ अन्यथा नरकं याति यावच्चंद्रदिवाकरौ ॥ यथा यथा प्रवृत्तिः स्यात्पातकस्य कलौ युगे ॥
तथा तथा प्रणश्यंति सर्वधर्मा न संशयः ॥ तद्व्रतस्य प्रभावेन मतिर्नस्याद्दुरात्मनां ॥ विचार्येत्थं प्रकर्त्त २०३

व्यं माधवे मासि मद्व्रतं ॥ नियमं च प्रकर्तव्यं दंतधावनपूर्वकं ॥ श्रीनृसिंह महोदय दयां कृत्वा ममोपरि ॥ अद्याहं ते
विधास्यामि व्रतं निर्विघ्नतां नय ॥ इति नियममंत्रः ॥ व्रतस्थेन न कर्तव्या संगतिः पापिभिः सह ॥ मिथ्यालापो न क
र्तव्यः सम्यक्फलकांक्षिभिः ॥ स्त्रीभिर्दुष्टैश्च आलापान्व्रतस्थो नैव कारयेत् ॥ स्मर्तव्यं मे महारूपं तद्दि
नं सकलं शुभं ॥ ततो मध्याह्नवेलायां नद्यादौ विमले जले ॥ गृहे वा देवखाते वा तडागे विमले शुभे ॥ वैदि
केन च मंत्रेण स्नानं कुर्याद्विचक्षणः ॥ मृत्तिकागोमयेनैव तथा धात्रीफलेन च ॥ तिलैश्च सर्वपापघ्नैः स्नानं कृ
त्वा महात्मभिः ॥ परिधाय शुचिर्वासो नित्यकर्म समाचरेत् ॥ ततो गृहं समागत्य स्मरन्मां भक्तियोगतः ॥ गोम
येन प्रलिप्याथ कुर्यादष्टदलं शुभं ॥ कलशं तत्र संस्थाप्य ताम्रं रत्नसमन्वितं ॥ तस्योपरि न्यसेत्सात्रं वंशजं
व्रीहिपूरितं ॥ हैमीं तत्र च मन्मूर्तिं स्थाप्य लक्ष्म्यास्तथैव च ॥ फलेन तदर्धेन तदर्धार्धेन वा पुनः ॥ यथाश
क्ति मे यथा कार्या वित्तशाठ्यविवर्जितः ॥ पंचामृतेन संस्नाप्य पूजनं तु समाचरेत् ॥ ततो ब्राह्मणमाहूय तमाचा
र्यमलोलुपं ॥ सदाचारसमायुक्तं शांतं दांतं जितेंद्रियं ॥ तेनैव कारयेत्पूजां दृष्ट्वा शास्त्रानुसारतः ॥ आचा
र्यवचनाद्धीमान्पूजां कुर्याद्यथाविधि ॥ मंडपं कारयेत्तत्र पुष्पस्तवकशोभितं ॥ ऋतुकालोद्भवैः पुष्पैः पू

येद्यत्तमानसः। उपचारैः षोडशभिर्मंत्रैर्वेदोद्भवैस्तथा॥ ततः पौराणिकैर्मंत्रैः पूजनीयो यथाविधि। चंदनं शी २
तलं दिव्यं चंद्रकुंकुममिश्रितं॥ ददामि तव तुष्ट्यर्थं नृसिंह परमेश्वर॥ चंदनमंत्रः। कालोद्भवानि पुष्पाणि तुल
स्यादीनि वै प्रभो। पूजयामि नृसिंह त्वां लक्ष्म्या सह नमोस्तु ते॥ पुष्पमंत्रः॥ कृष्णागरुमयं धूपं श्रीनृसिं
ह जगत्पते। तव तुष्ट्यै प्रदास्यामि सर्वदेव नमोस्तु ते॥ धूपमंत्रः। सर्वतेजोमयं तेजस्तस्माद्दीपं ददामि ते।
दीपमंत्रः॥ नैवेद्यं सौख्यदं चारु भक्ष्यभोज्यसमन्वितं॥ ददामि ते रमाकांत सर्वपापक्षयं कुरु। इति नैवेद्यं
पीतांबर महाबाहो प्रल्हादभयनाशन। यथाभूतेनार्चनेन यथोक्तफलदो भव॥ इति प्रार्थना॥ रात्रौ जाग
रणं कार्यं गीतवादित्रनृत्यकैः। पुराणपठनाद्यैश्च श्रोतव्याश्च कथाः शुभाः। ततः प्रभातसमये स्नानं कृ
त्वा जितेंद्रियः। पूर्वोक्तेन विधानेन पूजयेन्मां प्रयत्नतः। वैष्णवान्पूजयेन्मंत्रान्मदग्रे स्वच्छमानसः॥ त
तो दानानि देयानि वक्ष्यमाणानि चानघ॥ पात्रेभ्यस्तु द्विजेभ्यो हि सोदकदर्य जिगीषया॥ सिंहस्वर्णम
यो देयो मम संतोषकारकः। गोभूतिलहिरण्यानि देयानि च फलेप्सुभिः। शय्या सतूलिका देया स
प्तधान्यसमन्विता॥ अन्यानि च यथाशक्त्या देयानि मम तुष्टये॥ वित्तशाठ्यं न कुर्वीत यथोक्तफलकां २०४

स्यासीन्महाकलिस्त्वया सह॥ तेन कलहभावेन व्रतमेतत्त्वया कृतं॥ अज्ञानात्सद्व्रतं चक्रे व्रतानामुत्तमं व्रतं॥ त
स्या विहारयोगेन रात्रौ जागरणं कृतं॥ वेश्यायाः वल्लभः किंचित्संजातं न त्वया समं॥ रात्रौ जागरणं चीर्णं त्व
त्कं भाग्यमनेकधा। व्रतेनानेन चीर्णेन मोदंति त्रिदिवे देवताः॥ सृष्ट्यर्थं च पुरा ब्रह्मा चक्रे ह्येतदनुत्तमं॥ म
द्व्रतस्य प्रभावेन निर्मितं सचराचरं। ईश्वरेण पुरा चीर्णं वधार्थं त्रिपुरस्य च॥ महाप्राज्ञेन विहितं व्रतमेत
न्महाफलं॥ एतद्व्रतप्रभावेन सर्वसिद्धिमुपागताः। वेश्यापि मत्प्रियाज्जाता त्रैलोक्यसुखकारिणी॥ ईदृशं म
द्व्रतं वत्स त्रैलोक्येषु सुविश्रुतं॥ कलहेन विलासिन्या व्रतमेतदुपस्थितं। प्रल्हाद तेन ते भक्तिर्मति
र्जाता ह्यनुत्तमा। धूर्तया च विलासिन्या ज्ञाता व्रतमिदं महत्॥ कलहश्च कृतो येन मद्व्रतं यत्कृतं भवेत्। सा वेश्या
तु वराजाता भुक्त्वा भोगाननेकशः॥ मुक्ता कर्मविलीना तु तं प्रल्हाद विशस्व मां। कार्यार्थं च भवनास्त्वं म
च्छरीरस्थ्य कृतया॥ विधाय सर्वकार्याणि शीघ्रं चैव गमिष्यसि॥ यदिदं व्रतमावश्यं प्रकरिष्यंति मानवाः।
न तेषां पुनरावृत्तिर्मतः कल्पशतैरपि। अपुत्रो लभते पुत्रान्धनकामो धनं तथा॥ ज्ञानं च मम भक्तश्च दि
व्यसौख्यं भवेत्ततः। स्त्रियो वा पुरुषाश्चापि कुर्वंति व्रतमुत्तमं। तेभ्यो ददाम्यहं सौख्यं भुक्तिमुक्तिसमन्वितं॥

मास्यां चतुर्दशी॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययं॥ तिथौ भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम॥
पौर्णिमास्याः समायोगे व्रतं चानंतकं चरेदिति स्कांदे भविष्योक्तेः। मुहूर्त्तेति त्रिमुहूर्त्तप्रशंसापरं। अतए
व माधवः। उदये त्रिमुहूर्त्तापि ग्राह्यानंतव्रते तिथिरिति। यद्यपि मध्यान्हे भोज्यवेलायां समुत्तीर्य सरित्तटे॥
इत्यादि भविष्यान्मध्यान्हे पूजाकालो भाति तथापि तत्र पूजाविध्यभावान्न तद्व्यापिनी ग्राह्येति॥ इति
हासरूपार्थवादाद्विष्णुन्नयनत्वाकप्रत्यक्षविधिनोदयव्यापिन्यां तस्यां पूजाविधानादि अस्मिं[illegible]
ल्लपूजितचतुर्दशग्रंथियुतदोरकबंधनं प्रधानं॥ संसारगह्वरगुहासु सुखं विहर्तुं वांछंति ये कुरुकुलो
द्भवशुद्धसत्वाः॥ संपूज्य च त्रिभुवनेशमनंतदेवं बध्नंति दक्षिणकरे वरदोरकं ते॥ इति तस्यैव फलसं
बंधात्॥ ॥अथ व्रतविधिः॥ मासपक्षाद्युल्लिख्य पापनिर्मुक्त्युत्तमसिद्धिपुत्रपौत्रेप्सितभोगधनधा
न्यपरमगतिप्राप्तये चतुर्दश वर्षावध्यनंतव्रतं करिष्य इति संकल्प्य सर्वतोभद्रमंडलं विधाय तत्र
मंडलदेवता आवाह्य तदुपर्येकं कलशं संस्थाप्य तत्र फणाः सप्तफणमंडितं दर्भमयं तदग्रे चतुर्दशग्रंथि २०५

स्या। ब्राह्मणान्भोजयेत्पश्चात्तेभ्यो दद्याच्च दक्षिणां॥ निर्धनेनापि कर्त्तव्यं देयं शक्त्यानुसारतः॥ सर्वेषा
मेव वर्णानामधिकारोस्ति मद्व्रते। मद्भक्तैस्तु विशेषेण कर्त्तव्यं मत्परायणैः। तद्वंशे नास्ति दुःखानि दोषश्च म
त्प्रसादतः। नान्समुद्धर देवेश दुस्तराद्भवसागरात्॥ पातकार्णवमग्नस्य व्याधिदुःखांबुवासिभिः। जीव
तु परिभूतस्य मोहादुःखगतस्य मे॥ करावलंबनं देहि शेषशायि जगत्पते॥ श्रीनृसिंह रमाकांत भक्ता
नां भवनाशन॥ क्षीरांबुधिनिवासस्त्वं चक्रपाणे जनार्द्दन। व्रतेनानेन देवेश भुक्तिमुक्तिप्रदो भव। इति प्रा
र्थनामंत्रः॥ एवं प्रार्थ्य ततो देवं विसृज्य च यथाविधि। उपहारादिकं सर्वमाचार्याय निवेदयेत्॥ दक्षि
णाभिस्तु संतोष्य ब्राह्मणांस्तु विसर्जयेत्॥ मध्याह्ने तु समायुक्तो भुंजीत बंधुभिर्नरः। य इदं शृणुया
द्भक्त्या व्रतं पापप्रणाशनं॥ तस्य श्रवणमात्रेण ब्रह्महत्या व्यपोहति॥ पवित्रं परमं गुह्यं कीर्त्तयेद्यस्तु मानवः॥
सर्वान्कामानवाप्नोति व्रतस्य च फलं लभेत्॥ इति हेमाद्रौ नृसिंहपुराणे नृसिंहचतुर्द्दशीव्रतं॥ अ
थ भाद्रशुक्लचतुर्दश्यां अनंतव्रतं॥ तच्च त्रिमुहूर्त्तोदयव्यापिन्यां कार्यं॥ मुहूर्त्तमपि चेद्भाद्रे पौर्णि

अनंतानंतदेवेश। अनंतफलदायक॥ अनंतानंतरूपोसि गृहाणार्घ्यं नमोस्तु ते। त्रिपादूर्ध्वमित्यर्घ्यं॥ क
र्पूरवासितं तोयं मंदाकिन्या समाहृतं॥ आचम्यतां जगन्नाथ मयादत्तं हि भक्तितः॥ तस्माद्विराडित्याचम०
पंचामृतेन स्नपनं करिष्ये सर्वसिद्धिदं। कार्यं मे सिद्धिमायातु पूजिते त्वयि धातरि॥ पयो दधि घृतं गव्यं
माक्षिकं शर्करा तथा। पंचामृतेन स्नपनं गृहाण जगतः पते॥ पंचामृतस्नानं॥ गंगा च यमुना चैव नर्म
दा च सरस्वती॥ तापी पयोष्णी रेवा च ताभ्यः स्नानार्थमाहृतं। तोयमेतत्सुखस्पर्शं स्नानीयं प्रतिगृह्य
तां॥ यत्पुरुषेणेति स्नानं॥ पीतांबरयुगं देव सर्वकामार्थसिद्धये॥ मया निवेदितं भक्त्या गृहाण पुरु
त्तम॥ तं यज्ञमिति वस्त्रं॥ दामोदर नमस्तेस्तु त्राहि मां भवसागरात्॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरु
षोत्तम॥ तस्माद्यज्ञादिति यज्ञोपवीतं॥ कस्तूरीकुंकुमोपेतं कर्पूरेण च संयुतं। गंधं दास्यामि देवेश
अनंताय नमो नम इति॥ तस्माद्यज्ञात्सर्वहुत ऋच इति गंधं। अक्षताश्च सुरश्रेष्ठ कुंकुमोक्ताः सुशो
भनाः॥ वासुदेव जगन्नाथ प्रीत्या मे स्वीकुरु प्रभो॥ अक्षताः। माल्यादीनि सुगंधीनि मालत्यादीनि २०६
सुगंधीनि मालत्यादीनि वै प्रभो। मयाहृतानि पुष्पाणि पूजार्थं स्वीकुरु प्रभो॥ तस्मादश्वा इति पुष्पं॥ अथां
गपूजा॥ अनंताय नमः। पादौ पूजयामि। संकर्षणाय नमः। गुल्फौ० कालात्मने० जानुनी० विश्वरूपाय० जंघे०
विश्वनेत्राय०। कटिं० मधुसूदनाय० मेढ्रं पद्मनाभाय० नाभिं परमात्मने नमः हृदयं। श्रीकंठाय० कंठं०
सर्वास्त्रधारिणे० बाहू० हरये० मुखं०। वाचस्पतये० जिह्वां॥ दामोदराय० दंतान्। केशवाय। ललाटं। कम
लासनाय शिरः। सर्वात्मने सर्वांगं। वनस्पतिरसोद्भूतो दिव्यो गंधाढ्य उत्तमः। आघ्रेयः सर्वदेवानां धूपो
यं प्रतिगृह्यतां॥ यत्पुरुषमिति धूपं॥ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया॥ दीपं गृहाण देवेश त्रैलो
क्यतिमिरापह॥ ब्राह्मणोस्येति दीपं॥ अन्नं चतुर्विधं स्वादु रसैः षड्भिः समन्वितं॥ नानाभक्ष्यसमायुक्तं नैवेद्यं
प्रतिगृह्यतां॥ नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु। ईप्सितं मे वरं देहि परत्र च परां गतिं॥ चंद्रमा मनस
इति नैवेद्यं इदं फलं मया देव स्थापितं पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ नाभ्या
आसीदिति फलं॥ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतं॥ कर्पूरादिसमायुक्तं तांबूलं प्रति० सप्ता

स्यासमिति तांबूलं। हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शांतिं प्रयच्छमे॥
यज्ञेनयज्ञमिति दक्षिणां। पंचवर्त्तिसमायुक्तं सर्वमंगलदायकं। नीराजनं निरीक्षस्व अनंतायनमोनमः॥
इतिनीराजनं॥ मालतीमल्लिकापुष्पैः नागचंपकसंयुतैः पुष्पांजलिंगृहाणमां पादांबुजयुगार्पितं॥ वि
ष्णुमंत्रैः पुष्पांजलिः॥ अनंतकामान्मेदेहिसर्वकामफलप्रद। अनंतायनमस्तुभ्यं पुत्रपौत्रप्रवर्धय॥
अनंतः सर्वकामानां अधिपः सर्वकामदः॥ अनेनानेनसुप्रीतो भवतिहसदामम॥ नमस्ते देवदेवेश
नमस्ते धरणीधर॥ नमस्ते कमलाकांत नमस्ते ह्यमरप्रिय॥ नमस्ते सर्वभूतेश वासुदेवनमोस्तुते॥
प्रार्थना॥ अनंताय नमस्तुभ्यं सहस्रशिरसे नमः॥ नमस्ते पद्मनाभाय नागाधिपतये नमः॥ संसा
रगंहरगुहासु सुखं विहर्तुं वांछंति ये कुरुकुलोद्भवशुद्धसत्वाः॥ संपूज्य च त्रिभुवनेशमनंतदे
वं बध्नंति दक्षिणकरे वरदोरकं ते॥ अनंतसंसारमहासमुद्रे मग्नं समभ्युद्धर वासुदेव॥ अ २०७
नंतरूपे पावि नियोजयस्व अनंतरूपाय नमोनमस्ते॥ ॥दोरकबंधनमंत्रः॥ जीर्णदोरकं पूर्व

युतदोरकमनंतं पूजयिष्ये इतिसंकल्प्य षोडशोपचारैः कलशोपरि पूजयेदित्याद्यप्रयोगे द्वितीयादौ तु गृही
तानंतव्रते पूजनं दोरकबंधनं च करिष्ये इतिसंकल्पयेत्॥ ॥अथानंतपूजा॥ मंडलं सर्वतोभद्रं कृत्वा
कुंभं तु विन्यसेत्॥ तत्र चाष्टदले पद्मे पूजयेद्विष्णुमव्ययं॥ कृत्वा देवं दर्भमयं देवं फणाः सप्तकमंडितं॥ तस्या
ग्रतो दृढं सूत्रं कुंकुमाक्तं सुशोभनं। चतुर्दशग्रंथियुतमुपस्थाप्य प्रपूजयेत्॥ ततस्तु मूलमंत्रेण नमस्कृत्य
चतुर्भुजं॥ नवाम्रपल्लवाभासपिंगभ्रूश्मश्रुलोचनं॥ पीतांबरधरं देवं शंखचक्रगदाधरं॥ प्रसन्न
वदनं विष्णुं विश्वरूपं विचिंतयेत्॥ ध्यानं। आगच्छानंत देवेश तेजोराशे जगत्पते॥ क्रियमाणां मया
पूजां गृहाण सुरसत्तम। सहस्रशीर्षेत्यावाहनं॥ ततोग्रंथिदेवताः॥ विष्णुरग्निस्तथादित्यः सहस्राक्षः
पितामहः। इंद्रः पिनाकी विघ्नेशः स्कंदः सोमस्तथैव च। वरुणः पवनः पृथ्वी वसवो ग्रंथिदेवताः। नानार
त्नसमायुक्तं कार्तस्वरविभूषितं॥ आसनं देवदेवेश प्रीत्यर्थं प्रतिगृह्यतां॥ पुरुष एवेदमित्यासनं॥ ग
गादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं। तोयमेतत्सुखस्पर्शं पाद्यार्थं प्रतिगृह्यतां॥ एतावानस्येति पा०

वत्संपूज्यविसर्जयेत्॥ न्यूनातिरिक्तानिपरिस्फुटानि यानीहकर्माणिमयाकृतानि॥ क्षम्याणिचैतानि ममक्षमस्व
प्रयाहितुष्टःपुनरागमाय॥ इतिपूजा॥ दाताचविष्णुर्भगवाननंतःप्रतिग्रहीताचसएवविष्णुः। तस्मात्त्वयासर्व
मिदंततंचप्रसीददेवेशवरान्ददस्व॥ प्रतिगृह्यद्विजश्रेष्ठअनंतफलदायकं॥ त्वत्प्रसादादहंविप्रमुच्येहंकर्मबं
धनात्॥ पक्वान्नफलसंयुक्तंसघृतंदक्षिणान्वितं॥ द्विजवर्य्यायदास्यामिव्रतसंपूर्णहेतवे॥ मंत्रः। अनंतः
प्रतिगृह्णातिअनंतोवैददातिच। अनंतस्तारकोभाभ्यामनंतायनमोनमः॥ इतिवायनदानं॥ ॥अथकथा
द युधिष्ठिरउवाच॥ अहंदुःखीसर्वजातोभ्रातृभिःपरिवारितः। कथंमुक्तिर्भवेदस्माकमनंतादुःखसागरात्कोद्भव त
पूजयित्वावैप्राप्स्यामिराज्यमुत्तमं॥ अथचाकिंव्रतंकृत्वात्वत्प्रसादाद्भवीहिनः॥ श्रीकृष्णउवाच॥ अनंतव्रतमस्ती
म्य न्यपूर्तिथावक्ष्यामिनुत्तमं॥ सर्वपापहरंनृणांस्त्रीणांचैवयुधिष्ठिर॥ शुक्लपक्षेचतुर्दश्यांमासिभाद्रपदेभवेत्॥
तस्यानुष्ठानमात्रेणसर्वपापंव्यपोहति॥ युधिष्ठिरउवाच॥ कृष्णकोयमनंतेतिप्रोच्यतेयस्त्वयाविभो॥ किं
ग शेषनागोआहोस्विदनंतस्तक्षकःस्मृतः॥ परमात्माथवानंतउताहोब्रह्मगीयते॥ कएषोनंतसंज्ञोवैतथ्यंमेब्रू
हिकेशव॥ श्रीकृष्णउवाच॥ अनंतइत्यहंपार्थममरूपंनिबोधयत्॥ आदित्यादिग्रहात्मायःश्रूयतेयःकालउप

पद्यते॥ लवकाष्ठमुहूर्त्तादिदिनरात्रिशरीरवान्॥ पक्षमासर्त्तुवर्षाणियुगकल्पव्यवस्थया॥ योयंकालोमया
ख्यातः सोनंत इति कीर्त्यते। सोहंकालोवतीर्णोत्रभूभारोत्तारणायच॥ दानवानांवधार्थायसाधूनांपाल
नायच॥ अनादिमध्यपर्यंतंकृष्णंविष्णुंहरिंशिवं। वैकुंठंभास्करंसोमंसर्वव्यापिनमीश्वरं॥ विश्वरूपंमहाकालंसृ
ष्टिसंहारकारकं। प्रत्ययार्थंमयारूपंफाल्गुनायप्रदर्शितं॥ पूर्वमेवमहाबाहोयोगिध्येयमनुत्तमं॥ विश्वरूपम
नंतंचयस्मिनिंद्राश्चतुर्दश॥ वसवोष्टौद्वादशादित्यारुद्राएकादशस्मृताः॥ सप्तर्षयः समुद्राश्च पर्वताःसरितो
द्रुमाः॥ नक्षत्राणिदिशोभूमिः पातालंभूर्भुवादिकं॥ माकुरुघात्रसंदेहंसोहंपार्थनसंशयः॥ युधिष्ठिरउ०
अनंतव्रतमाहात्म्यंविधिंवदविदांवर॥ किंपुण्यंकिंफलंचास्यअनुष्ठानवतांनृणां। केनचादौपुराचीर्णंमर्त्येकि
नप्रकाशितं॥ एवंसविस्तरंकृत्वा ब्रूह्यनंतव्रतंमम॥ श्रीकृष्णउवाच॥ आसीत्पुराकृतयुगेसुमंत्तोनामवै
द्विजः॥ वसिष्ठगोत्रेचोत्पन्नःसुरूपांसभृगोःसुतां॥ दीक्षानाम्नींचोपयेमवेदोक्तविधिनानृप॥ तस्याःका
लेनसंजाताडुहितानंतलक्षणा॥ शीलानामसुशीलासावर्धतेपितृवेश्मनि॥ मातातत्स्याः कालेनज्व
रदाहेनपीडिता॥ विननाशनदीतीरेययौस्वर्गंपतिव्रता॥ सुमंतस्तुततोन्यांवैधर्मपुंसःसुतांपुनः॥ उपये

सवो

नामनामतः॥ ततोदंदौमुनींद्राय कौंडिन्याय ४

मेविधानेनदुःशीलांनाम नाम ततः। दुःशीलांकर्कशांचंडीनित्यंकलहकारिणीं॥ सापिशीलापितुर्गेहेगृहार्चनपराभवत्॥
कुड्यस्तंभतलाधारदेहलीतोरणादिषु॥ वर्णकैश्चित्रमकरोन्नीलपीतौसितासितैः। स्वस्तिकैःशंखपद्मैश्च अर्चयं
तीपुनःपुनः॥ ततः कालेबहुतिथेकौमारवशवर्तिनी॥ पित्रादृष्टाततदातेनस्त्रीचिन्हांयौवनेस्थितां। कस्मैदेया
मयाशीलाविचार्येतिसुदुःखितः। एतस्मिन्नेवकालेतुमुनिर्वेदविदांवरः। कन्यार्थीचागतःश्रीमान्कौंडिन्यो
थशुभेदिने॥ गृह्योक्तविधिनापार्थविवाहमकरोत्तदा॥ निर्वर्त्योद्वाहिकंसर्वंप्रोक्तवान्कर्कशांद्विजः॥ किंचिद्द
यादिकंदेयंजामातुःपरितोषकं। तच्छ्रुत्वाकर्कशाक्रुद्धाप्रोत्सार्यगृहमंडपं॥ पेटायांसुस्थिरंबध्वास्फटहंगम्यतां कूपाटं नं
मिति। भोज्यावशिष्टचूर्णेनपाथेयंचचकारसा॥ कौंडिन्योपिविवाह्येनांपथिगच्छन्शनैःशनैः॥ शीलांसुमंतं
दारायनपोढांगोरथेनहि॥ मध्यान्हेभोज्यवेलायांसमुत्तीर्यसरित्तटे॥ ददर्शशीलासास्त्रीणांसमूहंरक्तवास
सां। चतुर्दश्यामर्चयंतंभक्त्यादेवंजनार्दनं। उपगम्यशनैःशीलापप्रच्छस्त्रीकदंबकं। अ[illegible]ःकिमेतन्मेब्रूहि
किंनामव्रतमीदृशं॥ तास्तुचुर्योषितस्ताउशीलांशीलविभूषणां॥ अनंतव्रतमेतद्धिव्रतेनंतःसुपूज्य
ते॥ साब्रवीदहमप्येतत्करिष्येव्रतमुत्तमं॥ विधानंकीदृशंतत्र किंदानंकोत्रपूज्यते॥ स्त्रियऊचुः॥ शी
उवाचवित्तंनैवास्तिगृहेपरंयदिस्थितं॥ तच्छ्रुत्वाविमनाःपार्थसंयतात्मामुनिस्तदा॥ भोज्यावशिष्ट ५

लिसदन्नप्रस्थस्यपुन्नाम्नासंस्कृतस्यच॥ अर्धंविप्रायदातव्यंअर्धमात्मनिभोजनं॥ शक्त्याचदक्षिणांदद्याद्वित्त
शाठ्यविवर्जितः॥ कर्तव्यंसरसिस्तीरेविधिनानेनमानिनि॥ स्नात्वानंतंसमभ्यर्च्यमंडलेधूपदीपकैः॥ पुष्पैर्गं
धैश्चनैवेद्यैःपीतरक्तैश्चतुःसमैः॥ चतुःसमंपरिभाषायांज्ञेयं। तस्याग्रतोदृढंसूत्रंकुंकुमाक्तंसुदारकं॥ चतु
र्दशग्रंथिसंयुक्तंवामेकरतलेन्यसेत्॥ अनंतसंसारमहासमुद्रेमग्नंसमभ्युधरवासुदेव। अनंतरूपीविनियो
जयस्वअनंतसूत्रायनमोनमस्ते॥ अनेनदोरकंबध्वाभोक्तव्यंस्वस्थमानसैः॥ ध्यात्वानारायणंदेवमनंतंविश्व
रूपिणं॥ भुक्त्वायांतिव्रजेद्वेश्मभद्रप्रोक्तंव्रतंतव॥ श्रीकृष्णउवाच॥ एवमाकर्ण्यराजेंद्रप्रहृष्टेनांतरात्मना॥
सापिचक्रेव्रतंशीलाकरेबध्वासुदोरकं॥ पाथेयमर्धंविप्रायदत्वाभुक्त्वास्वयंततः। पुनर्जगामसंहृष्टागोरथेनस्व
कंगृहं॥ भर्त्रासहैवशनैःकौंडिन्यस्तात्क्षणाद्गृहं। तेनानंतव्रतेनास्याबभौगोधनसंकुलं॥ गृहाश्रमंश्रिया
जुष्टंधनधान्यसमन्वितं॥ आकुलंव्याकुलंरम्यंसर्वत्रातिथिपूजनैः॥ सापिमाणिक्यकांचीभिर्मुक्ताहारविभू
अं षिता॥ दिव्यांगवस्त्रसंछन्नासावित्रीप्रतिमाभवत्॥ कदाचिदुपविष्टायाहस्तेबद्धंसुदोरकं॥ शीलायाहस्त
मूलस्थंभर्त्रातेनद्विजन्मना॥ श्रीमदांधेनकौरव्यसाक्षेपंत्रोटितंरुषा॥ कोनंतइतिमूढेनजल्पतापाप

कारिणा। क्षिप्तो ज्वालाकुले वह्नौ हाहा कृत्वा प्रधावती॥ शीला गृहीत्वा ततस्तत्तु क्षीरमध्ये समाक्षिपत्। तेन कर्म
विपाकेन सा श्रीस्तस्य क्षयं गता॥ गोधनं तस्करैर्नीतं गृहे दग्धं धनं गतं॥ यद्यथैवागतं गेहे तत्तथैव पुनर्गतं॥ स्वज
नैः कलहो नित्यं बंधुभिस्तर्जनं तथा॥ अनंतक्षेपदोषेण दारिद्र्यं पतितं गृहे॥ न कश्चिद्वदते लोके तेन सार्धं यु
७ धिष्ठिर॥ शरीरेणाति संतप्तो मनसाप्यति दुःखितः। निर्वेदं परमं प्राप्तः कौंडिन्यः प्राह तां प्रियां॥ कौंडिन्य उवाच
शीले मेमद उत्पन्ने सहसा शोककारके। येनाति दुःखितोस्माकं जातः सर्वधनक्षयः। स्वजनैः कलहो गृ
हे न कश्चिन्मां प्रभाषते। शरीरे नित्य संतापः खेदश्चेन मनसि दारुणः॥ जानासि दुर्नयः को ऽ किं कृते
सुकृतं भवेत्॥ शीलोवाच॥ प्रत्युवाचाथ तां शीला सुशीला शीलमंडना। प्रायोनंतकृताक्षेपपापसं
भवजं फलं॥ भविष्यति महाभाग तदर्थं यत्नमाचर॥ एवमुक्तः स विप्रर्षिर्जगाम मनसा हरिं॥ निर्वे
यो दान्निर्जगामाथ कौंडिन्यः प्रययौ वनं॥ तपसो कृतसंकल्पो वायुभक्षो द्विजोत्तमः॥ मनसाध्यास्यवानं
तं कदा द्रक्ष्यामि चतं विष्णुं॥ यस्य प्रसादात्संजातं माक्षेपान्निधनं गतं। धनादिकं ममातीव सुखदुःखप्रदायकं॥
एवं संचिंतयन्सोथ बभ्राम विजने वने॥ ५ तत्रापश्यन्महात्मासौ। ब्रूहि सोम्य ममातीव दुःखं चेत्ति

१ चूतं फलितं पुष्पितं तथा॥ वर्जितं पक्षिसंघातैः कीटकैर्भ्रमरैः शुकैः॥ १

सिवर्त्तते॥ सोब्रवीद्दृक्ष्ये नानंतं क्वचिद्दृक्ष्यामि वा द्विज। एवं निराकृतस्तेन स जगामाथ दुःखितः। क्वचिद्द्रक्ष्या
मीति गच्छन्स गां पश्यत्सवत्सकां॥ तृणमध्ये प्रधावंतीमितश्चेतश्च पांडव। अब्रवीद्धेनुके ब्रूहि यद्यनंतस्त्व
येक्षितः। सोवाचाथ कौंडिन्यं नानंतं वेद्म्यहं द्विज॥ ततो व्रजन्ददर्शाग्रे रम्यं पुष्करिणीद्वयं॥ अन्योन्य
जलकल्लोलैर्वीचीपर्यंतसंगमं॥ छिन्नकिंजल्ककल्हारकमलोत्पलमंडितं। सेवितं भ्रमरैर्हंसैश्चक्रकैः का वर्जितं
रंडकैर्बकैः। तेऽपृच्छद्द्विजोऽनंतो भवद्भ्यां वोपलक्षितः। ऊचतुस्ते द्विजश्रेष्ठ नानंतो वीक्षितो द्विज॥ ददर्शाथव
ने तस्मिन्गर्दभं कुंजरं तथा॥ ताभ्यां पृष्टो द्विजेनेत्थं नेति ताभ्यां निवेदितं॥ एवं संपृच्छमानस्तु श्रांतस्तत्रैव
निषसाद ह॥ कौंडिन्यो विह्वलीभूतो निराशो जीविते नृप॥ दीर्घमुष्णं च निश्वस्य पपात भुवि भारत। प्राप्य सं
ज्ञामनंतेति जल्पन्नुत्थाय स द्विजः। नूनं त्यक्ष्याम्यहं प्राणानिति संकल्पचेतसि। उत्थाप्योद्बध्य वृक्षे स्थि
तस्तावद्भरतसत्तम॥ कृपयानंतदेवोपि प्रत्यक्षः समजायत॥ वृद्धब्राह्मणरूपेण इत एहीत्युवाच तं॥ प्रगृह्य दक्षि
णपाणौ गुहायां प्रविवेश्य तं॥ स्वां पुरीं दर्शयामास दिव्यनारीनरैर्युतां॥ तस्यां निविष्टमात्मानं दिव्यसिं
हासने शुभे॥ पार्श्वस्थं तु शंखचक्रगदागरुडशोभितं॥ दर्शयामास विप्राय स्वीयं रूपमनंतकः॥ विश्वतिम २१०

दृष्ट्वानंतैरनंतममितौजसं॥ तं दृष्ट्वा ताद्धोरं रूपमनंतमपराजितं। ॐ वंद्यमानो जगादोच्चैर्जयशब्दपुरःसरं॥ पा
पोहं पापकर्माहं पापात्मा पापसंभवः॥ त्राहि मां पुंडरीकाक्ष सर्वपापहरो भव॥ तच्छ्रुत्वानंत देवेशः प्राह सुस्निग्ध
भै या गिरा। मा भैस्त्वं ब्रूहि विप्रेंद्र यत्ते मनसि वर्तते॥ कौंडिन्य उवाच मया भूत्वा बलिष्ठेन त्रोटितोनंत
दोरकः। तेन पापविपाकेनाप्राप्तिर्मे प्रलयं गता। स्वजनैः कलहो गेहे न कश्चिन्मां प्रभाषते॥ निर्वेदाद्भ्रमते श्री
रण्ये तव दर्शनकांक्षया॥ कृपया देवदेवेश त्वयात्मा संप्रदर्शितः॥ तस्य पापस्य मे शांतिं कारुण्यात्कर्तुमर्हसि॥
श्रीकृष्ण उवाच॥ तच्छ्रुत्वानंतदेवस्तमुवाच द्विजसत्तमं॥ भक्त्या संतोषितो देव किं वदस्य युधिष्ठिर॥ अनं
त उवाच॥ स्वगृहं गच्छ कौंडिन्य मा विलंबं करिष्यसि॥ चरानंतव्रतं भक्त्या नव वर्षाणि पंच च॥ सर्वपापवि
नं शुद्धात्मा प्राप्स्यसे सिद्धिमुत्तमां॥ पुत्रपौत्रान्समुत्पाद्य भुक्त्वा भोगान्यथेप्सितान्॥ अंते मत्स्मरणं प्राप्य मामुपैष्य
स्यसंशयं॥ अमुं ते वरं दद्मि सर्वलोकोपकारकं॥ इदमाख्यानकवरं शीलानंतव्रतादिकं॥ करिष्यति नरो
यस्तु कुर्वन्व्रतमिदं शुभं॥ सोचिरात्पापनिर्मुक्तः प्राप्नोति परमां गतिं। गच्छ विप्र गृहं शीघ्रं यथा येनागतो ह्य
सि॥ कौंडिन्य उवाच॥ स्वामिन्पृच्छामि मे ब्रूहि किंचित्कौतूहलं मया॥ अरण्ये भ्रमता दृष्टं नतत् द्विज

शृंगदुरे। सच्चूतवृक्षः कस्तत्र का गौः को वृषभस्तथा॥ कमलोत्पलकल्हारैः शोभितं सुमनोहरं॥ मया दृष्टं महारण्ये
किं तत्पुष्करिणीद्वयं॥ कः खरः कुंजरः कोसौ कोसौ दृष्टो द्विजोत्तमः॥ ॥श्रीकृष्ण उवाच॥ सच्चूतवृक्षो विप्रोसौ विद्या
वेदविशारदः॥ सोर्थिनोपि न च प्रादाच्छिष्येभ्यस्तरुतां गतः॥ सा गौर्वसुंधरा दृष्टा सफला यातया द्विज॥ वृषो धर्मस्त्व
या दृष्टः शाद्वलं समास्थितः। धर्माधर्मव्यवस्थानं तच्च पुष्करिणीद्वयं॥ ब्राह्मण्यौ केचिदप्यास्तां भगिन्यौ ते परस्परं
धर्माधर्मादि यत्किंचित्तं निवेदयतो मिथः। विप्रायन क्वचिद्दत्तमतिथौ दुर्बलेपि वा॥ भिक्षा दत्ता न चार्थिभ्यो ते यान्विता
न कर्मणा। वीचीकल्लोलमालाभिर्गच्छ तस्ते परस्परं॥ खरः क्रोधस्त्वया दृष्टः कुंजरो मद उच्यते॥ ब्राह्मणोसावनंतो
हं गुहा संसारगह्वरं॥ इत्युक्त्वा देवदेवेशस्तत्रैवांतरधीयत॥ स्वप्नप्रायं स तद्दृष्ट्वा मतः स्वगृहमागतः॥ कृत्वानंतव्रतं
सम्यक नव वर्षाणि पंच च॥ भुक्त्वा सर्वमनंतेन यथाकल्पं पांडुनंदन॥ अंते च स्मरणं प्राप्य गतोनंतपुरं द्विजः॥ तथा त्व
मपि राजर्षे कथां श्रुत्वा व्रतं कुरु॥ प्राप्स्यसे चिंतितं सर्वमनंतस्य वचो यथा॥ यद्वच्चतुर्दशो वर्षे फलं प्राप्तं द्विज
न्मना। वर्षैकेन तदाप्नोति कृत्वोपाख्यानकं व्रतं॥ एतत्ते कथितं भूप व्रतानामुत्तमं व्रतं॥ यत्कृत्वा सर्वपापेभ्यो
मुच्यते नात्र संशयः। येपि शृण्वंति सततं पाठ्यमानं पठंति ये॥ तेपि पापविनिर्मुक्ताः प्राप्स्यंति च हरेः पदं॥ सं
सारगह्वरगुहासु सुखं विहर्तुं वांछंति ये कुरुकुलोद्भव शुद्धसत्वाः॥ संपूज्य च त्रिभुवनेशमनंतदेवं बद्धं २११

ततस्तुपूजयेद्देवमनंतंविश्वरूपिणं॥वस्त्रयुग्मंशुचिर्यस्माद्वासुदेवस्यवल्लभं॥अनंतप्रीयतांतेनपीतवस्त्रेणपा
मेसदा॥वस्त्रयुग्मसमाछन्नंपीतयज्ञोपवीतिनं॥चंदनेनसुगंधेनकर्पूरागरुमिश्रिणा।लेपयेहत्तवांगानिप्री
यतांमधुसूदनः।गंधं।पुनःपुष्पाणिसंगृह्यपूजयेन्नामभिःपृथक्॥अनंतायनमः।पादौगुल्फौसंकर्षणा
यच॥कालात्मनेतुजानुभ्यांघनेविश्वरूपिणे॥कटिंवैविश्वरूपायमेढ्रंवैविश्वरूपिणे॥नाभ्यांतुपद्मना
भायहृदयेपरमात्मने।कंठंश्रीकंठनाथायबाहूसर्वास्त्रधारिणे।वाचस्पतेनमस्तुभ्यंमुखेसंपूजयेद्धरिं।
ललाटेकेशवायेतिशिरःसर्वात्मनेनमः॥लोकात्मासर्वभूतात्मानिमेषत्रुटिसंभवः॥जन्ममृत्युज
राव्याधिसंसारभयनाशनः॥वनस्पतिरसोदिव्योगंधाढ्यःसुमनोहरः॥आघ्रेयःसर्वदेवानांधूपोयंप्र
तिगृह्यतां॥धूपं॥आज्यंचवर्तिसंयुक्तंवह्निनायोजितंमया॥गृहाणदेवदेवेशत्रैलोक्यतिमिरापहं॥दीपं
अन्नंचतुर्विधंस्वादुभक्ष्यानांजीवनंपरं॥नैवेद्यंतेमयादत्तंदेवप्रीतःप्रगृह्यतां॥नैवेद्यं॥पूगीफ
लंसपत्रंचकर्पूरंचमनोहरं॥पवित्रीकृतमत्यंतंतांबूलंप्रतिगृह्यतां॥तांबूलं॥एवंपूजांततःकृत्वा
गच्छेत्कुंडसमीपतः॥स्वगृह्योक्तविधानेनकृत्वाग्निस्थापनंबुधः॥प्रारभेत्ततोहोममश्वत्थसमिधैस्ति २१२

लैः।व्रीहिभिर्मिश्रितैश्चापिघृतेनतुविधानतः॥पुरुषसूक्तेनजुहुयाद्दतोदेवेतिवापुनः॥इदंविष्णुर्विचक्रमेत्रे
धानिदधेइति॥शतमष्टोत्तरंयावत्प्रत्येकंजुहुयाद्गुरुः॥चरुहोमंततःकार्यंमंत्रैरेतैर्विचक्षणः॥अनंत
पकालायअहोरात्रायवैपुनः॥अर्धमासायमासायऋतुभ्यश्चतथापुनः॥संवत्सरायस्वाहेतिजुहुया
द्व्याहृतीस्ततः॥स्विष्टकृत्प्रभृतीर्हुत्वाग्रहादीनर्चयेत्पुनः।मदनरत्नेजुहुयाद्गुरुरित्यस्यायंसर्वहुत्वेत्या
दित्यनुषंगः।अनंतायस्वाहा।कालायस्वाहा।अहोरात्रायस्वाहा।अर्धमासाय॰मासाय॰ऋतुभ्यः॰
संवत्सराय॰ततोमहाव्याहृतयःसर्वप्रायश्चित्तंचदक्षिणा॥आज्यतिलैःस्विष्टकृतंप्रजापतिभ्योजुहुया
त्॥ततोवैलोकपालांश्चग्रहान्संपूज्ययथाक्रमं।गीतवादित्रनिनदैःकृत्वापूर्णाहुतिंप्रती॥पुराणश्र
वणैस्तद्वद्रात्रिशेषंनयेद्व्रती॥तेनरात्रौहोमः॥ततःप्रभातसमयेस्नात्वाशुद्धःकृताह्निकः॥कृविधमादि
पुस्तकंपुराणश्रवणेरितितत्रलोकस्थाने।पुराणश्रवणंकृत्वाकृतमध्याह्निकक्रियइत्यर्थमेवपठि
तंनदत्तुरात्रौहोमोभवतीति॥पूर्वोक्तेनविधानेनपूजयेद्विश्वरूपिणं॥पूजयित्वाहरिंदेवमाचार्यंपूज

येत्ततः॥ परिधायसपत्नीकं वस्त्रालंकारभूषणैः॥ मंत्रैः संपूज्य विधिवद्धेनुं दद्यात्प्रयत्नतः॥ सुरभी वैष्णवी माता
नित्यं विष्णुपदे स्थिता॥ ग्रासं गृहाण मया दत्तं गोमातस्त्वं तु महसि॥ गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः॥ गा
वो मे हृदयः संतु गवां मध्ये वसाम्यहं॥ मंत्रेणानेन संपूज्य आचार्याय निवेदयेत्॥ गोदानस्य विधानार्थं दद्या
त्स्वर्णं यथाविधि॥ अनंतं परिवारं च आचार्याय निवेदयेत्॥ तत आमंत्रितान् विप्रान् पूर्वं दृष्टश्च चतुर्दश॥ व
स्त्रोपवीतैः संपूज्य भोजयेदन्नविस्तरैः॥ ततस्तु दक्षिणां तेभ्यो वित्तशाठ्यविवर्जितः॥ स्वशक्त्या दक्षिणां
दद्यादाचार्याय क्षमापयेत्॥ क्रियाहीनं भक्तिहीनं द्रव्यहीनं तथैव च॥ मंत्रहीनं पठेन्न्यत्त व्रतसंपूर्णहेतवे
दीनांधकृपणेभ्यश्च दद्याच्चैव तथाधमं॥ ततश्चेष्टैः समस्तैश्च पुत्रसंबंधिबांधवैः॥ यथोपपन्नं सौक्ष्यं कु
लामानसमव्यये॥ आचम्य च शुचिर्भूत्वा नित्यो विष्णुश्च तद्दिने॥ एवं कृते नृपश्रेष्ठ कर्मण्याशु जना
र्दनः॥ अनंतरूपी भगवांस्तुष्टो भवति सर्वदा॥ व्रतस्य फलमाप्नोति विष्णुलोके महीयते॥ ॥ इति म
द्रौ भविष्योत्तरे सोद्यापनमनंतव्रतं॥ ॥अथ हेमाद्रिमदनरत्नलिखित भविष्यपुराणानुयायी अ
नंतव्रतोद्यापनप्रयोगः॥ व्रतग्रहणदिनावधिकचतुर्दशवर्षसमाप्तिदिनत्रयोदश्यां कृते कभक्त २१२

नि दक्षिणकरे बद्धदोरकं ते॥ ॥इति श्रीभविष्योत्तरपुराणे अनंतव्रतकथा॥ ॥अथोद्यापनविधिः॥ ॥युधिष्ठि
र उवाच॥ देवदेव समासेन व्रतस्य परमाद्भुतं॥ उद्यापनविधिं ब्रूहि अनुग्राह्योस्मि केशव॥ उद्यापनविधिं हित्वा न
व्रतस्य फलं लभेत्॥ तस्माद्वृथा तथा कुर्याद्वित्तशाठ्यं विवर्जयेत्॥ श्रीकृष्ण उवाच॥ मासि भाद्रपदे प्राप्ते परि
पूर्णे व्रते ततः॥ शुक्लायां च चतुर्दश्यां ब्रह्मचारी व्रते ततः॥ एकभक्तेन नियमं कृत्वा भक्तिसमन्वितः॥ स्नात्वा नद्यां देव
खाते तीर्थप्रस्रवणे तथा॥ सर्वौषध्यैः सर्वगंधैः तिलकल्कैरथामलकैः॥ वेदोक्तविधिना सम्यक् तर्पयेत्पि
तृदेवताः॥ ततो गृहं समागत्य वेदिं कृत्वा तु शोभनां॥ तत्रालिखेन्मंडलकं पंचवर्णैः सुपशालैः॥ नवनाभसु
संपूर्णं सर्वतोभद्रमेव वा॥ तस्योपरि न्यसेत्कुंभं अव्रणं सुदृढं नवं॥ ताम्रपात्रसमायुक्तं पंचरत्नसमन्वितं॥
सुवर्णदोरकं चतुर्दशग्रंथियुतमाह माषकेन सुवर्णस्य दरिद्रेणापि पार्थिव॥ कृत्वानंतं प्रयत्नेन ताम्रपात्रोपरिन्य
सेत्॥ सुवर्णप्रतिमामाह शय्यां सुविस्तरां कृत्वा तत्रानंतं न्यसेद्व्रती॥ लक्ष्म्यायुतं वासुदेवं मुसलेन हलेन च॥
कुंभस्य ताम्रपात्रोपरि सुवर्णनिर्मितं शय्योपरि तथा सूत्रमयमनंतं पूजयेदित्यर्थः॥ इति केचित्॥ तन्न लक्ष्म्या
युतमित्यादिरसंगतेः॥ आचार्यं पूजयित्वा च वस्त्रैराभरणैस्तथा॥ कर्णांगुलीपवित्रैश्च भक्त्या च सुसमाहितः॥

स्तदुत्तरभाद्रशुक्लचतुर्दश्यां ब्रह्मचर्योपवासनियमयुतो यथासंभवं पुण्यतीर्थादौ सर्वौषधिसर्वगंधति
लकल्कमल्लकैः स्नातः स्नानांगतर्पणं कृत्वा गृहमागत्य भूदावेदिं कृत्वा तत्र नवनाभं सर्वतोभद्रं वा आलिख्य
पंचरंगैर्यथावत्परिपूर्य पवित्रपाणिराचम्य मासपक्षाद्युल्लिख्याचरितानंतव्रतपरिपूर्णतायै उत्तरांगमुद्या
पनमहं करिष्य इति संकल्प्य निर्विघ्नतार्थं गणपतिं पूजयेत्॥ ततः आचार्यं वृत्वा वस्त्रासनकुंडलादिभिः
पूजयेत्॥ तत आचार्यो यदत्र संस्थितमिति सर्षपान् विकीर्य शुचीवो हव्येति प्रोक्ष्य सर्वतोभद्रकरणप
क्षे तत्र सर्वतोभद्रदेवता आवाह्य पूजयेत्॥ तास्च देवतास्तासां स्थापनपूजाप्रकारादि परिभाषायां द्रष्ट
व्यं॥ ततो मंडलमध्ये महीद्यौरित्यादिप्रकारेणाव्रणं दृढं॥ ताम्रपूर्णपात्रयुतं कलशं स्थापयेत्॥ त
त्रषाषादिपरिमितस्वर्णनिर्मितचतुर्दशग्रंथियुतानंतं स्थापयेत् तदुत्तरतः॥ शुविस्तृतो शायामासा
ध तत्रापि स्वर्णादिनिर्मितलक्ष्मीहितं मुसलहलयुतानंतप्रतिमां स्थापयेत्॥ ततः स्वर्णदोरकप्रतिम
योः श्रीमदनंतायनम इति मंत्रेणावाहनस्थापनांतं चार्षिकपूजां वा कुर्यात्॥ ततो वस्त्रयुग्मं शुचिर्यस्मा

वासुदेवस्यवल्लभं॥ अनंतः प्रीयतांतेन वस्त्रयुग्मेनसर्वदेति मंत्रेण वस्त्रयुग्मंसमर्प्य कर्पूरागरुमिश्रित्त
चंदनंसमर्पयेत्॥ चंदनेनसुगंधेन कर्पूरागरुमिश्रिणा। लेपयेहंतवांगानिप्रीयतां मधुसूदनइत्ति॥ ततः
पुष्पाणिसंगृह्यांगपूजांकुर्यात्॥ अनंताय नमः॥ पादौपूजयामि॥ संकर्षणाय॰ गुल्फौ॰ कालात्मने॰
जानुनी॰ विश्वरूपिणे॰ जघनं॰ विश्वरूपाय। कटिं॰ विश्वरूपिणे॰ मेढ्रं॰ पद्मनाभाय॰ नाभिं॰ परमात्म
ने॰ हृदयं॰ श्रीकंठाय॰ कंठं॰ सर्वास्त्रधारिणे॰ बाहू॰ वाचस्पतये॰ मुखं॰ केशवाय॰ ललाटं॰ सर्वा
त्मने॰ शिरः॰ ततोकाच्छात्मासर्वम्लानांनिमेषत्रुटिसंचयः॥ जन्ममृत्युजराव्याधिसंसारभयनाश
नइतिमंत्रेण पुष्पाणिसमर्प्य धूपंदद्यात्॥ तन्मंत्रः। वनस्पतिरसोदिव्योगंधाढ्यःसुमनोहरः॥ आघ्रेयः
सर्वदेवानां धूपोयंप्रतिगृह्यतां॥ ततस्त्वंज्योतिसर्वदेवानांतेजसांतेजउत्तमः॥ आत्मज्योतिःपरंधामदीपो
यंप्रतिगृह्यतामितिदीपं॥ ततः अन्नंचतुर्विधंस्वादुम्लानांजीवनंपरं॥ नैवेद्यंतेमयादत्तंदेवप्रीत्या
प्रतिगृह्यतां॥ पूगीफलंसपत्रंचकर्पूरंचमनोहरं। पवित्रीकृतमत्येतत्तांबूलंप्रतिगृह्यतां॥ मितितांबू
लं॥ ततः पूजासांगुण्यार्थंदक्षिणांदत्वानीराजनंकुर्यात्॥ ततःकुंभात्पश्चिमभागेकुंडंस्थंडिलंवानि

नेनधेनुंसंपूज्यसुरभीवैष्णवीमातानित्यंविष्णुपदेस्थिता। ग्रासंगृह्णमयादत्तंगोमातुस्त्रातुमर्हसी
तिमंत्रेणगोग्रासंदत्वातामाचार्यायदद्यात्॥ ततःप्रतिमांकलशशय्यादियुत्तामाचार्यायप्रतिपाद
येत्॥ पूर्वेद्युर्निमंत्रितान्चतुर्दशब्राह्मणान्वस्त्रयज्ञोपवीतैःसंपूज्य नानाविधान्नेनाचार्यसहि
तान्भोजयित्वायथाशक्तितेभ्योदक्षिणांचदत्वाआचार्यायद्दत्वासमापयेत्॥ तत्रमंत्रः। क्रियाही
नंभक्तिहीनंद्रव्यहीनंतथैवच। मंत्रहीनंकृतंयज्ञंपरिपूर्णंतदस्तुमेइतिपठित्वास्वयंभुंजीतेतिअनंतव्र
तोद्यापनप्रयोगः॥ ॥अथनष्टदोरप्रायश्चित्तं॥ ॥युधिष्ठिरउवाच॥ अनंतव्रतमाहात्म्यं
कृत्स्नंकृष्णत्वयोदितं॥ भगवन्दोररूपेणभास्यदासिमहात्मनां॥ दोरंप्रमादत्तोनष्टंयस्याद्देदितं
जनैः। तदाकिंकरणीयंस्याद्व्रतंत्रैलोक्यपावनं॥ ॥श्रीकृष्णउवाच॥ साधुपृष्टंत्वयाराजन्वक्ष्या
मिव्रतनिष्कृतिं। फलंलोकस्यसर्वस्यरक्षार्थंशृणुतत्क्रमात्॥ दोरेनष्टेमहान्दोषःप्रभवेद्भुतिनामिह॥
तस्मात्तद्दोषनाशार्थंप्रायश्चित्तंविधीयते॥ गुरुंप्रदक्षिणीकृत्यनमस्कृत्यसमाहितः। विज्ञाप्यदोरना
शंचकृत्वादोरंव्रतीततः॥ हव्यवाहंप्रतिष्ठाप्यतस्मिन्ध्यात्वाहरिंपरं। आज्यमन्वावधिश्रित्यदद्या २९५

द्विप्रायवासनं॥ अष्टोत्तरशतंहुत्वामूलमंत्रेणवैष्णवं। नाममंत्रेणतत्कृत्वाद्वादशाक्षरसंयुतः॥ केश
वादिसकृधत्वाप्रायश्चित्तंतुशक्तितः। पूर्णाहुतिंततोकृत्वाहोमशेषंसमापयेत्॥ व्रतछिद्रंतपछि
द्रंयछिद्रंयस्यकर्मणि॥ वचनाद्भूमिदेवानांसर्वसंपूर्णतांव्रजेत्॥ मंत्रहीनंक्रियाहीनंभक्तिहीनंजनार्द
न॥ यत्पूजितंमयादेवपरिपूर्णंतदस्तुमे। आचार्यपूजनंकार्यंदक्षिणाधेनुदंपोत्तम। एवंशांतिविधिंकृ
त्वापूर्ववद्विधिमादिशेत्॥ कृत्वादोरंव्रतीपश्चात्पूजितैःसहबंधुभिः। तस्मात्सर्वप्रयत्नेनप्रायश्चित्तं
चरेत्सुधीः। प्रायश्चित्तमकृत्वातुपुण्यंतस्याशुभंकचित्॥ व्याधितोग्रसितोदेहःप्रियासंत्यज्यतेगृहं॥
दोरस्यातिक्रमंचैववदेत्सर्वमिदंबुधः॥ यइदंकुरुतेपार्थह्यायुःपुत्राश्चसंपदः॥ ॥इतिश्रीअनं
तदोरप्रायश्चित्तं॥ ॥अथापरमनंतव्रतोद्यापनं॥ ॥युधिष्ठिरउवाच॥ ॥त्वत्प्रसादात्कृतंकृष्ण
मयानंतव्रतंशुभं॥ इदानींब्रूहिमेनंतव्रतोद्यापनमुत्तमं॥ ॥श्रीकृष्णउवाच॥ ॥शृणुपांड
ववक्ष्यामिव्रतोद्यापनमुत्तमं॥ कृतेनयेनसफलंव्रतंभवतिनिश्चितं॥ आदौमध्येतथांतेतुव्रतस्य

द्यापनंभवेत्॥ यदावित्तस्यवित्तस्यसंपत्तिःशुभकालतः। तदावोद्यापनंकुर्याच्छुभेलग्नेशुभेदिने॥ चतु
र्दशेंसुवर्षेषुमुख्यंतूद्यापनंमतं॥ कायशुद्धिंत्रयोदश्यामेकभक्तादिनाचरेत्॥ ततःप्रातश्चतुर्द
श्यांस्नात्वादेशेशुचौशुचिः॥ संकल्पयेदुपवासंदेशकालावनुस्मरन्॥ ततोनदीतडागवागत
सर्वौषधिस्तथा॥ तिलकल्कनामलकैस्नायान्मार्जनपूर्वकं॥ तीरमंडपिकांकुर्याद्गृहेवापिसु
शोभितां। तन्मध्यउपविश्याथदेशकालौस्मरन्ततः॥ गणेशंपूजयित्वाथपुण्याहंवाचयेद्द्विजः॥
आचार्यंवरयेद्भार्यायुतंवेदांगपारगं। ब्रह्माणमृत्विजश्चापिचतुर्दशफलादिना॥ सर्वान्वस्त्रा
लंकरणजलपात्रादिनार्चयेत्॥ विरच्यसर्वतोभद्रंमंडपांतस्तुमध्यगं॥ ब्रह्मादिदेवतास्त
स्मिन्नावाह्यापिचपूजयेत्॥ तन्मध्येपंकजेधान्यंयथाशक्तिक्षिपेत्ततः॥ सौवर्णराजतंवापि
ताम्रजंवापिमृन्मयं। कुंभंन्यस्येत्तदुपरिसुधाचंदनचर्चितं॥ तस्मिन्जलंगंधपुष्पफलंपल्लव
मृत्तिकाःक्षिप्त्वारत्नहिरण्यंचवससावेष्टयेत्ततः॥ सौवर्णराजतंताम्रंजातंवशाजयेववा॥ पात्रे २१६

र्मायउद्यापनांगभूतंहोमंकरिष्यइतिसंकल्प्यस्थंडिलोपलेपनाद्यग्निप्रतिष्ठापनांतंकृत्वान्वादध्यात्॥
तत्रैव। अस्मिन्नग्नौजातवेदसमग्निमिध्मेनप्रजापतिंचाज्येनअग्नीषोमौचक्षुषा। आज्येनप्रधान
देवमनंतमश्वत्थसमित्तिलव्रीहियवघृतद्रव्यैःप्रत्येकमष्टोत्तरशतसंख्याकाहुतिभिःपुनरनंतका
लांसंवत्सरंअर्धमासंऋतुंसंवत्सरंअग्निंवायुंसूर्यंप्रजापतिंवरुणाएकैकयांआहुत्यायहान्
समिदाज्यचरुद्रव्येणप्रत्येकमष्टोत्तरशतमष्टाविंशत्यष्टान्यतमसंख्ययासर्वतोभद्रपी
ठदेवताआज्येनैकैकयाहुत्यास्विष्टकृतंप्रजापतिंचाज्यहुततिलैःइध्मसन्नहनेनरुद्रमित्यादि
सर्वमाज्यभागांतंकृत्वोक्तद्रव्यैःपुरुषसूक्तेनअतोदेवेत्यनेनवाइदंविष्णुरित्यनेनवाअन्वाधानक्र
मेणजुहुयात्॥ ततःप्रायश्चित्तहोमशेषंसमाप्यलोकपालान्ग्रहांश्चपंचोपचारैःसंपूज्यबलिदानंच
कृत्वागीतवादित्रनिनदैःपूर्णाहुतिंजुहुयात्पुराणश्रवणादिनारात्रिजागरणेनातिवाहयेत्॥ ततो
परेन्हिकायजमानस्थापितानंतपूर्ववत्पूजयित्वाआचार्यंपूजयेत्॥ ततोगावोममाग्रतःसंतिः

तदुपरिन्यस्यपट्टकूलादिकंशुभं॥ प्रसार्यतदुपपत्राष्टदलंचंदनादिनांपद्मंविलिख्यतन्मध्येनंतमूर्त्तिंनिधायच॥
पलेनवातदर्धेनतदर्धेनापिवाकृतां। सौवर्णीरमयायुक्तांशंखचक्रगदाब्जभां॥ आवाहनाद्युपचारैःपूजयेत्सुसमा
हितः। पंचामृतेनसंस्नाप्यततश्चवसनद्वयं॥ पट्टकूलादिकंपीतमर्पयित्वार्चयेद्व्रती॥ गंधपुष्पादिभिर्नानाभक्ष्यै
र्नानाफलैस्तथा॥ एवंसंपूज्यविधिवद्विधिनावर्षिकेणतु॥ पुष्पैःसंपूजयेदंगान्यनेनतस्यचनामभिः। अनंतायनमः
पादौगुल्फौसंकर्षणायच। कालात्मनेजानुनीचजघनंविश्वरूपिणे॥ कटिंचविश्वनेत्रायमेढ्रंवैविश्वसाक्षिणे॥
नाभिंचपद्मनाभायहृदयंपरमात्मने। कंठंश्रीकंठनाथायबाहूसर्वास्त्रधारिणे। मुखंचवाचस्पतयेचक्षुषी
कपिलायच। ललाटंकेशवायेतिशिरःसर्वात्मनेनमः। नमःपादौपूजयामीत्येवमादिप्रपूजयेत्॥ एवंपूजां
विधायैवरात्रौजागरणंचरेत्॥ गीतवादित्रनृत्यादिपुराणश्रवणान्वितं॥ प्रतिमांचप्रकुर्वीतपूजांगंधादिना
हरेः॥ नानाफलानिसस्यानिवापवासानिवेदयेत्॥ ततःप्रभातसमयेस्नात्वाचार्यादिभिःसह। अनंतंपू
जयेत्यागवज्जुकुर्यात्पश्चिमेततः। कुंडेवास्थंडिलेकुर्यादग्निस्थापनपूर्वकं॥ आज्यभागांतमाचार्यःस्व
गृह्योक्तविधानतः। ततोश्वत्थसमिद्भिस्तुतदलाभेन्याभिरेववा॥ दधिमध्वाज्यदुग्धाभिस्तिलैर्वै

पायसेनच॥ आज्येनच प्रतिद्रव्यमष्टोत्तरसहस्रकं॥ अष्टोत्तरशतं चाष्टाविंशतिर्जुहुयात्क्रमात्॥ अनंतो
देवेतिमंत्रेण त्रीणि वै नाममंत्रतः। प्रणवादिचतुर्थ्यंतनमोंतानंतनामतः। नाममंत्रैश्च जुहुयाच्चतुर्दशभि
राद्रात्॥ ॐ अनंताय नमः स्वाहा। कपिलाय स्वा० शेषाय स्वा० कालात्मने० अहोरात्राय० मासाय० अ०
षड्ऋतुभ्यः ॐ संवत्सराय० परिवत्सराय० उषसे० ॐ कालायै० काष्ठायै० मुहूर्ताय० समिदादिभिरेवच प्र
त्येकं जुहुयात्क्रमात्॥ ततः स्विष्टकृदादाय पूर्णपात्रांतमाचरेत्॥ जपेत्पुरुषसूक्तं तु स्मृत्वानंतं सुरोत्तमं।
पूर्णाहुतिं च जुहुयात् धामंते विश्वमित्यृचा। होमशेषं समाप्याथ कृत्वा च्यायुषमप्यथ॥ पूजयित्वा ह
रिं देवं आचार्यं पूजयेत्ततः॥ वस्त्रालंकारभूषाद्यैस्ततो धेनुं समर्चयेत्॥ पयस्विनीं सुशीलां च वस्त्राल
कारभूषितां। स्वर्णशृंगीं रौप्यखुरां ताम्रपृष्ठीं सुवाससं॥ कांस्यदोहां रत्नपुच्छां निष्ककंठीं सवत्सकां। ग
वां मंत्रेण संपूज्याचार्याय निवेदयेत्। मंत्रस्तु। गवामंगेष्विति। गावो मे अग्रतः संतु गावो मे संतु पृष्ठतः। गावो
मे हृदये संतु गवां मध्ये वसाम्यहं॥ मंत्रमेतं समुच्चार्य वस्त्रालंकारभूषणैः। ततस्तौ पूजयित्वाथ ब्राह्मणां
तोषयेत्ततः। ऋत्विजः पूजयित्वाथ तेभ्यो दद्याच्च दक्षिणां। चतुर्दशैव कुंभांश्च पक्वान्नपरिपूरितान्॥ च २२७

स्त्रोपवीते दद्याच्चाह्वयन्नंतः प्रीयतामिति। आचार्यादीन्भोजयित्वा पूर्णतां वाचयेत्ततः॥ अथानंतं विसृ
ज्यापि गृह्णीयादाशिषस्ततः। भक्तियुक्तो नमस्कृत्य ब्राह्मणाणां स्तास्तान्विसर्जयेत्॥ ततो हृष्टो बं
धुयुतो भुंजीत सुसमाहितः॥ एवं कृते नंतफलदातानंतो भवेन्नृणां॥ इति भविष्योत्तरपुराणेऽनंत
व्रतोद्यापनं॥ अथ भाद्रशुक्लचतुर्दश्यां कदलीव्रतं॥ हेमाद्रौ भविष्ये॥ यत्त्वस्तिक्षं समाख्यातं कदली
व्रतमुत्तमं॥ तत्तेहं संप्रवक्ष्यामि लोकानुग्रहकारकं॥ नाकपृष्ठपुरा देवैर्यक्षगंधर्वकिंनरैः। अप्सरोमरक
न्याभिर्नागकन्याभिरर्चित॥ संसारासरतां ज्ञात्वा कदलीनंदनस्थिता॥ शुक्लपक्षे चतुर्दश्यां मासि
भाद्रपदे नृप। देयमर्घ्यं वरस्त्रीभिः फलैर्नानाविधैस्तथा। विरूढैः सप्तधान्यैश्च दीपालीरक्तचंदनैः॥
दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्धूप पाचित्तैः॥ जातीफलैः पूगफलैः पूजयेद्गतमत्सरा॥ तस्मिन्नहनि दात
व्यं स्त्रीभिरन्याभिरेव च। मंत्रेणानेन वै चार्घ्यं तच्छृणु नराधिप। चिंतयेत्कदलीं नित्यं दलकैः कामदीप्तिव
थिः। शरीरारोग्यलावण्यं देहि देव नमोस्तु ते। एवं यः पूजयेद्रंभां पुरुषो भक्तिमान्नृप। नारी वानघ

पक्षाशीत्रीन्मासांश्चतुरोपिवातस्मिन्कुलेनहि भवेत्काचिन्नारीकुलटिनी॥ दुर्गतादुर्भगाव्यंगास्वैरि
णीपापचारिणी॥ भवेत्सौभाग्यसौख्याद्यापुत्रपौत्रश्रियायुता॥ आयुष्मतीजीववत्साजीवेद्वर्षशतंभु
वि॥ इतिहेमाद्रौकदलीव्रतं॥ ॥अथगुर्जराचारप्राप्तंकार्त्तिक्यांमाघ्यांवैशाख्यांवाकदलीव्रतं॥
तत्रकदलीपूजनं॥ आगच्छकदलीदेविसौभाग्यफलदायिनी॥ रूपंदेहिजयंदेहियशोदेहिसुनिश्चि
तं॥ आगच्छागच्छवरदेशंकरेणमहेश्वरी॥ करिष्यमाणांपूजांमेगृहाणानुग्रहंकुरु॥ आवाहनं॥ कार्त्त
स्वरमयंदिव्यंनामरूपगणान्वितं॥ अधितिष्ठमहादेविशिवेनसहपार्वती॥ आसनं॥ दूर्वाक्षतादिभि
र्युक्तंस्वर्णपात्रस्थितंशुभं॥ पाद्यार्थंकल्पितंभक्त्यागृहाणपरमेश्वरी॥ पाद्यं॥ अर्घ्यपात्रस्थितंतोयंफल
पुष्पसमन्वितं॥ अर्घ्यंगृहाणमेदेविभक्त्यादत्तंशिवप्रिये॥ अर्घ्यं॥ कर्पूरोशीरसुरभीशीतलंनिर्म
लंजलं॥ गंगायास्तुसमानीतंगृहाणाचमनीयकं॥ आचमनं॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थन
याहृतं॥ स्नानार्थंतेमयादेविगृहाणत्वंसुरेश्वरि॥ स्नानं॥ यथारंभेविवृद्धिस्तुशाखादीनांसदाभि
वृत्॥ तथावृद्धिर्यमांदेविसंचिनात्पार्वतीप्रिये॥ सेचनमंत्रः॥ वस्त्रंशुभ्रमिदंदिव्यंकुंकुमालंकृ

भवो वर्धत्ति स्वयं॥ कदलीदानमंत्रः॥ अथ कथा॥ युधिष्ठिर उवाच॥ कृष्ण कृष्ण महाबाहो सर्वविद्याविशारद॥
अनाथानाथ विश्वात्मन्दीनदैन्यनिकृंतन॥ त्वमस्माकं परो बंधुस्त्वमस्माकं पुरःसरः॥ त्वयाभिरक्षिता
नित्यं विचरामोत्र निर्भयाः॥ किंचित्पृछामि देवेश कृपां कुरु वदस्व मे॥ यत्कृत्वा सर्वधर्मेषु कृते यस्मिन्महत्फ
लं॥ सौभाग्यारोग्यदं पुण्यं धनधान्याभिवृद्धिदं॥ अन्नाछादनपुत्रादि वर्धनं श्रीनिकेतनं॥ तन्ममाच
क्ष्व भगवन्लोकानामुपकारकं॥ श्रीकृष्ण०॥ शृणु राजन्प्रवक्ष्यामि व्रतानामुत्तमं व्रतं॥ यत्कृत्वा सर्व
दुःखेभ्यो नारी मुच्येत तत्क्षणात्॥ वस्त्रान्नपानविछित्तिर्न भवेत्तु कदाचन॥ पुरा मानत्यचैकांते रुक्मिणी
प्राणवल्लभा॥ प्रणिपत्याब्रवीद्दीना सर्वकामामयेशुभा॥ सौभाग्यं मे कथं देव भवेज्जन्मनि जन्मनि॥ सपत्नी
नां श्रियं वीक्ष्य स्पृहा मे जायते प्रभो॥ इति प्रियाया वचनं श्रुत्वाहं तां समब्रुवं॥ रंभाव्रतं कुरुष्वाद्य सौभाग्याव
हं यशुभे॥ कृते यस्मिन्व्रते देवि परं सौभाग्यमाप्स्यसि॥ इति श्रुत्वा वचो देवी रुक्मिणी मामभाषत॥ रंभा
व्रतं भवेत्कीदृक्को विधिः किं च पूजनं॥ केन चादौ पुराचीर्णं मर्त्ये केन प्रकाशितं॥ रुक्मिणी भाषितं श्रुत्वा
पुनरेवाहमब्रुवं॥ रंभाव्रतमिदं वक्ष्ये शृणु देवि यथोदितं॥ गोचर्ममात्रं संलिप्य सर्वतोभद्रमंडलं॥ लि २१९

खेत्तस्य कृपा वर्णैर्नीलपीतैः सितासितैः॥ ब्रह्माद्या देवतास्तत्र स्थापयित्वा प्रपूजयेत्॥ कलशोपरि संस्था
प्य वै पात्रे पट्टे शुभे॥ उमामहेश्वरौ तत्र मूलमंत्रेण पूजयेत्॥ अथ वा स्वस्तिकं कुर्यात्सपद्ममष्टदलं तु वै॥
ततः सा ग्रासपूर्णाहि सस्य वृत्तां सुशोभनां॥ समूलां कदलीं स्थाप्य पूजयेता यथाविधि॥ उत्तमाद
कृमानीय सेवयेतां समाहिता॥ यथा रंभे विवृद्धिस्ते शाखादीनां सदा भवेत्॥ यथा वर्धय मां देवि सिंचनात्
पार्वती प्रिये॥ यथा यथा तु प्रसवो वर्धते कदली तव॥ तथा मनोरथानां मे प्रभावो भवतु स्वयं॥ एवं सं
पूज्य विधिवद्भक्तियुक्तेन चेतसा॥ रात्रौ जागरणं कुर्याद्गीतवादित्रनिस्वनैः॥ एवं या कुरुते नारी व्रतानामु
त्तमं व्रतं॥ भुक्त्वा तु विविधान्भोगान्सौभाग्यं विंदते ध्रुवं॥ एवं यः कुरुते देवी कदलीव्रतमुत्तमं॥ तस्मात्कुरु
विधानेन यथोक्तफलमाप्स्यसि॥ इति श्रुत्वा विधानेन चकार व्रतमुत्तमं॥ अवाप सकलं कामं मनसा यदपी
प्सितं॥ अन्यच्च शृणु राजेंद्र व्रतस्य फलमुत्तमं॥ अत्याश्चर्यकरं पुंसां शृणुष्वावहितो भवेत्॥ द्यूते यदा निता
पूर्वं कृष्णा नीता सभां प्रति॥ दुःशासनेन दुष्टेन द्रौपदी मुक्तमूर्धजा॥ आकृष्यमाणा वस्त्रेषु चिंतेमाकस्मि
त्तदा॥ तत्पतंतत्र गतो राजन्द्रौपद्यास्त्राणनाय वै॥ अदृश्यमाणो कृष्णायै व्रतं समुपदिष्टवान्॥ तदा कृतं

महाक्येतु व्रतेस्मिन्राजसत्तम॥ रुक्मिण्याचरितं ह्येतद्येन तद्व्रतमुत्तमं॥ तस्य पुण्यफलं दत्तं कृष्णायै राजसत्तम॥
तत्कालमेव वस्त्राणां समृद्धिरभवत्पुरा। दुःशासनेन दुष्टेन आक्षिप्ते ष्वंशुकेषु च। प्रादुर्भूतानि वस्त्राणि नाना
वर्णानि भारत॥ खिन्नो दुःशासनः पापो विरराम शुक्रयहात्॥ तावद्भूरिवस्त्राणि कदलीफलगर्भतः॥ इत्थं व्र
तप्रभावोयं गुह्योपि कथितो मया। कारयस्व विधानेन पूर्णकामो भविष्यति॥ अथोद्यापनं॥ युधिष्ठि
र उवाच॥ कस्मिन्मासे तिथौ कस्यामाचरेद्व्रतमुत्तमं॥ कथं भावेन किं कार्यं तन्मयाचक्ष्व केशव॥ श्री
कृष्ण उवाच॥ कार्तिके माघमासे वा वैशाखे चैत्र एव तथा। पुण्ये मासि प्रकुर्वीत पौर्णमास्यां शुभे दिने॥
तिथिक्षयं वर्जयीत शुभपांसु समाहितः॥ यस्मिन्देशे न लभ्येत कदली राजसत्तम॥ सुवर्णस्य शुभां तत्र कृ
त्वा पूजां समाचरेत्॥ यदि लभ्येत कदली मारोप्यादौ प्रपूजयेत्॥ यावत्तस्यां फलं यावत्तस्मिंस्तन्नीरेपाल्पयेत्॥
फलेषु त्रिषु मेघस्याः पश्चाद्विप्रान्समाह्वयेत्॥ प्रभाते विमले स्नात्वा नद्यादौ विमले जले॥ अहते वाससी
धृत्वा कृत्वा संध्यादिकर्म च॥ अरत्निमात्रं कृत्वा तु स्थंडिलं वाग्यतः शुचिः॥ अग्निं संस्थाप्य विधिवत्तत्र होमं
समाचरेत्। शतमष्टोत्तरं विद्वान् तिलाज्याहुतिभिस्तथा। एकाग्रचित्तः संहृष्टः कृतव्याहृतिभिः पृथक्॥ २२०

शोभनं॥ गृहाणाच्छादनं देवि सर्वसिद्धिमात्पार्वती प्रिये॥ तथाच्छादनमांसदा॥ वस्त्रं॥ आचमनीयं। श्रीखंडं चंदनं
दिव्यं घनसारमनोहरं॥ विलेपनं गृहाणेदं रुद्राणी प्रियवल्लभे॥ चंदनं। मालती चंपकादीनि शतपत्रादिकानि
च॥ सुगंधीनि गृहाण त्वं पूजार्थं सुमनासिनः। पुष्पाणि। अगुरुं गुग्गुलं धूपं दत्तं गंधमनोहरं॥ गृहाणेदं तृ
प्तिकरं घ्राणस्य दर्पितं परं॥ धूपं। चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणं॥ आर्तिक्यं कल्पितं भक्त्या गृहा
ण परमेश्वरी॥ दीपं॥ नानापक्वान्नसंयुक्तं रसैः षड्भिः समन्वितं। नैवेद्यं विविधं भक्त्या कल्पितं त्वं गृहाण
मे। नैवेद्यं॥ कर्पूरेलावं लवंगादिनागवल्लीदलान्वितं॥ पूगीफलसमायुक्तं तांबूलं प्रतिगृह्यतां॥ तांबूलं॥ इ
दं फलं मया देवि स्थापितं पुरतस्तव॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि॥ फलं॥ हिरण्यगर्भगर्भस्थं हेम
बीजं विभावसोः॥ अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे। हिरण्यं। नीराजनं। त्वमिंद्राणी प्रिया नित्यं पार्वत्यश्च
प्रियवल्लभा॥ सतीनां कामदा भूत्वा कं मां त्वं परिरक्षय॥ प्रार्थनं॥ आश्रयो देवपत्नीयां जितानां च प्रियास्वयं
सौभाग्यारोग्यमायुष्यं देहि रंभे नमोस्तुते॥ नमस्कारः। कदलीकामदायिन्यै मेधायै तन्मे नमः॥ रंभा
रंभायै प्रतिसारायै सर्वसौख्यप्रदे नमः॥ यथा यथा तप्रसवा वर्धते कदलीध्रुवं॥ तथा मनोरथानां मे प्र

ब्राह्मादिभ्योदेवताभ्योनाममंत्रैःपृथक्पृथक्।आचार्यंचसपत्नीकंवस्त्राद्यैःपूजयेत्ततः॥ धेनुंपयस्विनींवत्सयु
तांरत्नैःस्वलंकृतां।स्वर्णशृंगींरौप्यखुरांकांस्यदोहनिकायुतां॥ ताम्रपृष्ठींरत्नपुच्छींक्षुद्रघंटासमन्वितां।अ
भ्यर्च्यवरविदुषेआचार्यायनिवेदयेत्॥ पादुकोपानहौछत्रंअलंकाराननेकशः।यथाशक्तिप्रदेयानिव्रत
स्यपरिपूर्त्तये॥ चतुर्विंशतंषोडशवायुग्मान्याहूयसंयतः।वस्त्रालंकारगंधाद्यैःपूजयित्वातुभोजयेत्॥
वायनानिचदेयानिवंशपात्रैस्तुशक्तितः।दद्याच्चदक्षिणांसम्यक्यथाविभवसारतः॥ अन्येभ्योपिय
थाशक्तिदद्यादन्नंसुसंस्कृतं॥ क्षमापयित्वातान्देवीव्रतस्यपरिपूर्णतां॥ वाचयित्वायथान्यायम
छिद्रत्वंचभाषयेत्।दीनानाथान्प्रतर्प्याथस्वयंभुंजीतवाग्यतः॥ एवंयःकुरुतेदेविकदलीव्रतमुत्तमं॥
भुक्त्वातुविविधान्भोगान्सौभाग्यंविंदतेध्रुवं॥ तस्मात्कुरुविधानेनयथोक्तफलमाप्स्यसि। एवंनारी
नरोवापियःकुर्यात्कदलीव्रतं॥ सर्वान्कामानवाप्नोतिस्वर्गलोकेमहीयते॥ ॥इतिभविष्योत्तरेकदली
व्रतं॥ ॥अथपूर्णिमांतमासेनकार्तिककृष्णचतुर्दशी॥ तस्यांतिलतैलस्नानमुक्तं॥ भविष्ये।कार्ति

फेरुलपक्षेतुर्दश्यांविधूदये॥ कर्त्तव्यंमंगलस्नानंनरैनिरयभीरुभिरिति॥ कालादर्शधृतमात्स्यममातमा
सनज्ञेयं। अत्रचंद्रोदयस्यकर्मकालत्वात्तद्व्यापिनीचतुर्दशीतैलाभ्यंगस्नानादौग्राह्या॥ दिनद्वयेचंद्रोद
यव्याप्तौतुपूर्वा॥ तैलाभ्यंगस्नानयमतर्पणादिबहुकर्मकालव्याप्तिलाभात्। त्रयोदशीयुतायांचच
तुर्दश्यामिषासिते॥ विधूदयेनरस्नात्वानरकंनैवपश्यतीतिगौडग्रंथधृतस्मृत्यंतरवचनाच्च॥ दिन
द्वयेतद्व्याप्तावपिपूर्वैव॥ साचद्वेधाभवति। त्रयोदश्यधिकरणकचंद्रोदयोत्तरंरात्रिशेषप्रविष्टाचतु
र्दशीपरदिनेह्रासवशाच्चंद्रोदयात्पूर्वमेवसमाप्तेत्याद्यःपक्षः। सूर्योदयोत्तरंकिंयत्यपित्रयोदशीत
दुत्तरंप्रतिपच्चतुर्दशीचंद्रोदयात्पूर्वमेवसमाप्तेतिद्वितीयः॥ तत्राद्येदिनद्वयेमुख्यकालालाभा
द्विशेषेपिपूर्वविधचतुर्दश्यांकार्त्तिकस्यसितेतरे॥ पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतइतिपृथ्वी
चंद्रोदयधृतस्कांदेनप्रत्यूषस्य॥ कार्त्तिकेकृष्णपक्षस्यचतुर्दश्यांदिनोदयइतिलैंगे। नसूर्योदय
स्यचस्वकालादुत्तरोगौणःकालःसर्वस्यकर्मणइति अनेन गौणकालत्वेनाभिहितोत्तरकालव्याप्ति

२२१

लाभात्॥ अत्र तैलाभ्यंगस्य रात्रिकर्मत्वाद्रात्रावेववर्तमानया त्रयोदश्या चतुर्दशी विद्धा भवति॥ द्वितीय
पूर्वैव। त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी। रात्रिशेषे त्वमावास्या तदाभ्यंगे त्रयोदशी॥ सभ्यमभ्रख
चंद्रप्रकाशधृताचारात्तु संवादिवचनात्॥ यत्तु हेमाद्र्यादिभिर्लिखितं दत्तानश्वासस्तदा तैले लक्ष्मी
जले गंगा दीपावल्याश्चतुर्दशीप्राप्येति विशेषः। प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यतीति ब्राह्मवचनात्प्रा
तःकालव्यापिनी पूर्वैव॥ अत्र चंद्रोदये चतुर्दश्यसत्वेपि चंद्रोदय एवाभ्यंगस्नानादि कार्यं। तिथ्यादौ तु भ
वेद्यावान् ह्रासो वृद्धिः परेहनि। तावन्न ग्राह्यः सपूर्वेद्युरदृष्टोपि स्वकर्मणीति वाक्येन त्रयोदश्यंते चतुर्दशी
ह्रासपक्षे येन चंद्रोदये न चंद्रोदयपारिभाषिकचतुर्दशीसत्वात्। पूर्वेद्युः। पूर्वतिथ्यादिषु। स्वकर्मणीपि उ
त्तरतिथ्यादिप्रयुक्तकर्मानुष्ठाननिमित्तं यत्र पूर्वा वा परा वा प्रमाणांतरेण ग्राह्या तिथिर्ग्राह्यत्वेन प्राप्ता
तत्रानेन मुख्यकाले ग्राह्यतिथेरसत्वेपि क्षयादिप्रत्यूक्षेपेण शास्त्रतस्तत्तिथेस्सत्वान्मुख्यकाल ए
वकर्मानुष्ठानं कार्यमिति ज्ञाप्यते न त्वनेन प्राप्तं कर्तव्यत्वमुच्यते॥ तथा सति जन्माष्टम्यादौ दिन
द्वये कर्मकालव्याप्तौ पूर्वविद्धा प्रसज्येत रात्रौ स्वतः तिथेः सत्वात् मुख्यकाले कथमप्यनुष्ठानास

भवेगोपाकालेकर्त्तव्यत्वंशास्त्रांतरेणबाध्यते॥तथाचप्रकृतेचतुर्दश्याःखंडत्वेपूर्वोक्तस्कांदेनपूर्वाप्राप्तेग्र
ह्यतिथिचतुर्दशीगतक्षयस्यैवपूर्वतिथौप्रक्षेपोनत्वमाक्षयस्यचतुर्दश्यांएवमेवतातचरणानव्याख्या।
एतनविधेयान्वापिन्याःपूर्वेद्युःप्रदोत्कायात्तिथेरेवस्वशब्देननिर्देशादमागतक्षयस्यैवचतुर्दश्यां
प्रक्षेपणकर्मकालव्याप्तिनिर्णयःकार्यः।स्वशब्दस्यस्वपितृभ्योदद्यादित्यादौतथैवव्युत्पत्तेः।तेनदिनद्वये
चंद्रोदयेचतुर्दश्यभावेचंद्रोदयव्यापिन्याममायांस्नानंकार्यं।इषासितचतुर्दश्यामिंदुक्षयतिथा
वपि।ऊर्जादौस्वातिभेतिसंयोगेतदादीपावलीभवेदितिनारदवचनेपिशब्देनचतुर्दशीस्नानमायानु
कल्पत्वेनविधानस्यदर्शाविषयएवप्रवृत्त्योदन्यादितिपरास्तं।अमांतमासेनाश्विनकृष्णचतुर्दश्य
मावास्ययोःऊर्जादावित्यनेनकार्त्तिकशुक्लप्रतिपद्येवंसंलग्नतिथित्रयेदीपोत्सवस्नानादि।कुर्यात्स
लग्नमेतच्चदीपोत्सवदिनत्रयं॥तैलेलक्ष्मीर्जलेगंगादीपावलितिथौवसेत्।अलक्ष्मीपरिहारार्थ
मभ्यंगस्नानमाचरेदितिनारदेनवाग्रेस्पष्टीकृतत्वात्॥चतुर्दशीस्नानमायाअनुकल्पत्वविधिर २२२
यमितियत्किंचिदेतत्॥तस्माद्दिनद्वयेचतुर्दश्यभावेत्रयोदश्यामेवाभ्यंगस्नानादिकुर्यादिति

सिध्यं॥ यस्तु कालादर्शधृत मात्स्ये॥ मृगांकोदयवेलायां त्रयोदश्यां यदा भवेत्॥ दर्शोयामंगलस्नानं दुः
खशोकाशुभप्रदमिति त्रयोदश्यादनिषेधन्यायपरूणोदयतोन्यत्ररिक्तायां स्नानं नियानरः। तस्याह्निकभवे
दर्मोनश्यत्येव नसंशय इतिक्तविष्णो। तस्याह्निक तथोदर्मोयं स्ननहितं दान्यायेन चतुर्दशी॥ स्तुत्यर्थोऽ
यान्यथोक्तोदाहरणेविहितस्नानादलौपाधत्तिरितिदिक्। सूर्योदकस्नानं विशेषाद्ग्राह्यं। तैले लक्ष्मीर्जे
ले गंगादीपावल्यां चतुर्दशी। प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति। अपामार्गमथो तुंबीप्रपुन्ना
टमथापरं। भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै। अपामार्गस्य पत्राणि भ्रामयेच्छिरसोपरि इति। अत्र
यमलोकदर्शनाभावकामः स्नास्ये इति प्रयोगः। प्रपुन्नाटश्च कर्मर्दकः। तद्भ्रामणमंत्रः। सीतालोष्ट
समायुक्तः सकंटकदलान्वितः। हर पापमपामार्ग भ्राम्यमाणः पुनःपुनरिति॥ तथा च नरकस्य क्षयार्थं
मपामार्गशाखया सीतलोष्टसमायुक्तया स्नानमध्ये शिरस उपरि भ्रामणं पुनःपुनः कार्यमुक्तमंत्रे
ण। तच्छाखालाभे त्रिभिस्तैस्तत्रैव कार्यं॥ तदलाभे तुंबीप्रपुन्नाटान्यतरेण वा॥ स्नानानंतरकृत्यं

तत्रैव। ततश्चैतत्तर्पणंकार्यंधर्मराजस्यनामभिः। नामानिच। यमायधर्मराजायमृत्यवेचांतकायच। वैवस
ताय कालायसर्वभूतक्षयायच॥ औदुंबरायदध्नायनीलायपरमेष्ठिने॥ वृकोदरायचित्रायचित्रगुप्ता
यवैनमः। इतितर्पणविशेषः। तत्रैव। यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाथवा। देवत्वंचपितृत्वंचय
मस्यास्तिद्विरूपतेति। विशेषांतरंस्कांदे। दक्षिणाभिमुखोभूत्वातिलैःसम्यक्समाहितः। देवतीर्थेन
देवत्वात्तिलैःप्रेताधिपोभवइति। इदंचजीवत्पितृकेणापिकार्यं। जीवत्पितापिकुर्वीततर्पणंयमभीष्म
योः। कृष्णैस्तिलैस्तथान्यैश्चकुर्यात्तर्पणं। भप्यतइतिपद्मोक्तेः। अन्येतुशुक्लैः। देवत्वपक्षेशुक्लैस्तिलैः।
पितृत्वपक्षेकृष्णैस्तिलैरितिव्यवस्था। एवंस्नानाव्यवहितमेवप्रातःकालेयमादींस्तांस्तर्प्यप्रदोषदीपदा
नंकार्यंतदुक्तंब्राह्मे। ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनांमठेषुभवने
षुच॥ प्राकारोद्यानवापीषुप्रतोलीनिष्कुटेषुच॥ मंदुरासुविविक्तासुहस्तिशालासुचैवहीति। विशे
षांतरंलैंगे। ततःप्रेतचतुर्दश्यांभोजयित्वातपोधनान्। शैवान्विप्रांस्तथापरान्शिवलोकेमहीयते॥ २२३

दानंदत्वातुतेभ्यश्चयमलोकंनगच्छति। तथा। माषपत्रस्यशाकेनभुक्त्वातत्रदिनेनरः। प्रेतचतुर्दशीका
लेसर्वपापैःप्रमुच्यते। तथानक्तभोजनमप्युक्तं। तत्रैव। नक्तंप्रेतचतुर्दश्यांयःकुर्याद्दिवचतुष्टये। नतस्य
तुशातेनापिप्राप्यतेपुण्यमीदृशमिति॥ ॥अथकार्तिकशुक्लचतुर्दश्यांवैकुंठचतुर्दशीव्रतं॥ त
दुक्तंसनत्कुमारसंहितायां। वर्षेवैहमलंबाख्येमासिश्रीमतिकार्तिके॥ शुक्लपक्षेचतुर्दश्यामरुणा
ऽभ्युदयंप्रति॥ महादेवदितिथौब्राह्मेमुहूर्तेमणिकर्णिके। स्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयत्।
संक्षेपज्योतिषस्तस्यप्रतिष्ठांव्यतदाकरोत्। स्वयमेवस्वमात्मनंचरन्पाशुपतव्रतं॥ ततःप्रभातेविम
लेकृत्वापूजांमहाद्भुतां। दंडपाणेर्महानाम्निवनेऽस्मिन्कृतपारणः। श्रीमद्भवानीसदनंप्रविश्यदमनुत्त
ममितिसनत्कुमारसंहितोक्तेः। अत्रपरकृतिस्वरूपेपानेनार्थवादेनस्नात्वाविश्वेश्वरःपूज्यइतिविधिः
कल्प्यते। ततश्चप्राभातिकपारणाविधेश्चपूर्वदिनेउपवासःसचचतुर्दशीयुक्तारुणोदयव्याप्यहोरात्रे
कार्यइतितातचरणाः। शिवरहस्ये। पुराचकार्तिकेमासिचतुर्दश्यांसुराःशिवे। सायंकालेसमागत्य

दानंदत्वातुतेश्यश्वयमलोकंनगच्छति।तथा।माषपत्रस्यशाकेनभुक्त्वातत्रदिनेनरः।प्रेतचतुर्दशीका
लेसर्वपापैःप्रमुच्यते।तथानक्तभोजनमप्युक्तं।तत्रैव।नक्तंप्रेतचतुर्दश्यांयःकुर्याच्छिवतुष्टये।नतत्र
तुशतेनापिप्राप्यतेपुण्यमीदृशंमिति॥ ॥अथकार्तिकशुक्लचतुर्दश्यांवैकुंठचतुर्दशीव्रतं॥त
दुक्तंसनत्कुमारसंहितायां।वर्षेवैहमलंबाख्येमासिश्रीमतिकार्त्तिके॥शुक्लपक्षेचतुर्दश्यामरुणा
तुभ्युदयंप्रति॥महादेवदतियोब्राह्मेमुहूर्त्तेमणिकर्णिके।स्नात्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयत्।
सक्षेपज्योतिषस्तस्यप्रतिष्ठांस्वयंतदाकरोत्।स्वयमेववस्वमात्मनंचरन्पाशुपतव्रतं॥ततःप्रभातेविम
लेकृत्वापूजांमहाद्भुतां।दंडपाणेर्महानाम्निवनेस्मिन्कृतपारणः।श्रीमद्भवानीसदनंप्रविश्यदमनुत्त
ममितिसनत्कुमारसंहितोक्तेः।अत्रपरकृतिसरूपपानेनाथवादेनस्नात्वाविश्वेश्वरःपूज्यइतिविधिः
कल्प्यते।ततश्चप्राभातिकपारणाविधेश्चपूर्वदिनेउपवासःसचचतुर्दशीयुक्तारुणोदयवल्यहोरात्रे
कार्यइतितातचरणाः।शिवरहस्ये।पुराचकार्तिकेमासिचतुर्दश्यांसुराःशिवे।सायंकालेसमागत्य

पूजांकृत्वास्थितामुदेत्याद्युक्त्वा ततः परं ऋषिगणाः सर्वेपि मदनुग्रहात्। संपूज्य निशि यत्नेन चक्रुर्जा
गरं शिवे। कार्तिकस्य चतुर्दश्यां बिल्वैश्चकनकाह्वयैः। द्रोणपुष्पैश्च पूजां च चक्रुर्मयि महेश्वरा। त
तः पूजामुक्त्वा रात्रिं नीत्वा प्रयत्नमत्कथाश्रवणादिभिः। ततोरुणोदये जाते स्नात्वा स्नात्वा च भस्मना।
त्रिपुंड्रधारणं कृत्वा कृत्वा रुद्राक्षधारणं॥ संध्यां समाप्य विश्वेशं समभ्यर्च्य यथाविधि॥ मद्भक्तान्भो
जयामासु ऋषयो बुभुजुस्ततः। यः शुक्लोर्जचतुर्दश्यामुपोष्य प्रयतः शिवे। मामर्चयति विश्वे
शं समुक्तो भवति ध्रुवं॥ मल्लिंगपूजनं पुण्यं सर्वदा सर्वकामदं॥ ऊर्जशुक्लचतुर्दश्यामर्चितं बहु
पुण्यदमिति। एवमप्युक्तं पुण्येस्मिन्कार्तिके मासि सामवारे तु शंकरं॥ उपोष्याभ्यर्चयेत्प्रीत्या नि
शियामचतुष्टये। ऊर्जशुक्लचतुर्दश्यां काश्यां विश्वेश्वरं प्रभुं। समर्चयित्वा मिंद्राद्यैर्गम्यते स्मा
भिरादरादिति॥ ॥इति वैकुंठचतुर्दशी॥ ॥अथामांतमासेन माघकृष्णचतुर्दश्यां शिव
रात्रिव्रतं॥ तच्चार्धरात्रिव्यापिन्यां कार्यं। तदुक्तं नारदीयसंहितायां। अर्धरात्रयुता यत्र माघकृ २२४

दृष्टवैव निष्कृतिः पुरा। न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शिवां। इति स्कांदे दर्शयोगस्य निंदितत्वाच्च॥
यत्तु कालतत्वविवेचने नव्यैर्दिनद्वये निशीथव्याप्तावेव पूर्वविधायकान्युत्तरविधायकानि निषेधकानि च
वचनानि सावकाशानीत्युक्त्वा पूर्वैव ग्राह्येत्युक्तं। तन्न समंजसं निशाद्वये चतुर्दश्यां पूर्वा त्याज्या परा शुभे
ति माधवाद्युदाहृतस्कान्दिकवचनविरोधात्। न च पूर्वविधायकानामुत्तरविधायकनिषेधकानां विषयलाभ
इति शाक्यं। प्रदोषनिशीथयोर्विरोधे निशीथग्राह्यत्वं या उपोद्बलकत्वेन विषयलाभस्यानुपदमेवोक्त
त्वात् प्रदोषव्याप्तिलाभात्तु माघासिते भूतदिने हि राजन्नुपैति योगं यदि पंचदश्या। जयाप्रयुक्तां न तु जातु
कुर्याच्छिवस्येति हेमाद्रिमाधवाद्युदाहृतपुराणवचनादपि एव। अस्मिंश्च व्रते उपवासजागरणाजा
ना फलसंबंधात्त्रयमपि प्रधानं। तच्च नागरखंडे। उपवासप्रभावेन बलादपि च जागरात्। शिवरा
त्रेस्तथा तस्यां लिंगस्यापि प्रपूजया। अक्षयान् लभते भोगान् छिवसायुज्यमाप्नुयादिति। इदं च व्रतं
संयोगपृथक्त्वन्यायेन नित्यं काम्यं च। परात्परतरं नास्ति शिवरात्रिः परात्परं। न पूजयति भक्त्येशं रुद्रं
त्रिभुवनेश्वरं। जंतुर्जन्मसहस्रेषु युज्यते नात्र संशय इति स्कांदे अकरणे प्रत्यवायश्रुतेर्नित्यं। शिवं च २२५

पूजयित्वा यो जागर्ति च चतुर्दशीं। मातुः पयोधररसं न पिबेत्स कदाचनेत्यादि तत्रैव च फलश्रुतेः काम्य
मिति। विस्तरस्तु तातचरणकृतसमयमयूखे द्रष्टव्यः। पारणं तु तत्रैव स्कांदे तिथिमध्ये तदंते चोक्तं। उप
षोणं चतुर्दश्यां चतुर्दश्यां तु पारणं। कृतैः सुकृतलक्षैश्च लभ्यते यदि वा न वा॥ ब्रह्मांडोदरमध्ये तु या
नि तीर्थानि संति वै। संस्थितानि भवंतीह भूतायां पारणे। तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीं॥ त
तथा। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिस्तथैव च। एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेदिति। अनयो
र्विरुद्धवचनयोर्व्यवस्थैवं माधवेनोक्ता। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणमिति वचनाद्या
मत्रयमध्ये चतुर्दशीसमाप्तौ तिथ्यंते तदुत्तरगामित्वे तिथिमध्य एवेति। तातचरणास्तु ति
थिमध्यकालो मुख्यस्तदंतकालो गौण उत्तरभावित्वादित्याहुः। केचित्तु शक्तस्तिथ्यंते। अशक्त
स्तिथिमध्य एवेत्याहुः। न च कृतैः सुकृतलक्षैरित्यादिस्तुतिरनर्थिकेति वाच्यं। आपः स्वभावतोम
ध्याः किं पुनर्वह्निसंयुता। अतः संतः प्रशंसंति स्नानमुष्णेन वारिणेत्यादिवदशक्तं प्रत्येव तिथिमध्यपा
रणायास्तावकत्वेन सार्थक्यादिति। परे तु तिथ्यंततया पारणविधानं न शिवरात्रिपरं। किंतु यत्राष्ट

स्यादौ तिथ्यंत पारणाप्राप्तिरस्ति तत्परमेव। शिवरात्रिग्रहणं तु पूर्वविधाविधानार्थमिति वस्तुतस्तु साल
स्तमयपर्यंतव्यापिनी चत्परेह्नि दिवैव पारणं कुर्यात् पारणा नैव दोषभागिति शिवरात्रिप्रकरणे पठितका
लादर्शादिलिखितवचनाद्दिवा तिथिसमाप्तौ तिथ्यंते न्यथा तन्मध्य एवेति इति निर्णयः॥ ॥अथव्रत
विधिः॥ मासपक्षाद्युल्लिख्य मम पापक्षयार्थं अक्षयभोगमोक्षप्राप्त्यर्थं शिवरात्रिव्रतं करिष्य इति
संकल्प षोडशोपचारैः शिवपूजां कुर्यात्॥ तत्र पूजा। आगच्छ देवदेवेश मर्त्यलोकहितेच्छया॥ पू
जयामि विधानेन प्रसन्नः सुमुखो भव। आवाहनं। पादासनं कुरु प्राज्ञ निर्मलं स्वर्णनिर्मितं॥ भूषि
तं विविधै रत्नैः कुरु त्वं पादुकासनं। आसनं। गंगादिसर्वतीर्थेभ्यो मया प्रार्थनयाहृतं। तोयमेतत्सुख
स्पर्शं पाद्यार्थं प्रतिगृह्यतां। पाद्यं। गंधोदकेन पुष्पेण चंदनेन सुगंधिना॥ अर्घ्यं गृहाण देवे
श भक्तिं मे ह्यचलां कुरु। अर्घ्यं। मंदाकिन्यास्समानीतं हेमांभोरुहवासितं। स्नानाय ते मया
भक्त्यानीतं स्वीक्रियतां विभो॥ स्नानं॥ वस्त्रं सूक्ष्मं दुकूलं च देवानामपि दुर्लभं॥ गृहाण त्वमुमाका २२६

न्त चतुर्दशी॥ शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत्॥ ईशानसंहितायामपि। माघकृष्णचतुर्दश्यामादि
देवो महानिशि॥ शिवलिंगमभूत्तच्च कोटिसूर्यसमप्रभः॥ तत्कालव्यापिनी ग्राह्या शिवरात्रिव्रते तिथिरिति
माघकृष्णत्वं चात्रामांतमासपरत्वेन अत एव चतुर्दश्यां तु कृष्णायां फाल्गुने शिवपूजनं॥ तामुपोष्य प्रय
त्नविषयान्परिवर्जयेदिति सुमंतुवचने पूर्णिमांतमासोप्युक्तः। महानिशा च॥ महानिशा द्वे घटिके रात्रे
र्मध्यमयामयोरिति देवलोक्तं निशीथरूपैव। एवं चार्धरात्रशब्दोपि तत्पर एव। दिनद्वयनिशीथव्याप्तौ च
व्याप्तौ वा परैव। प्रदोषव्याप्तिलाभात्॥ निशाद्वये चतुर्दश्यां पूर्वा त्याज्या परा शुभा। आदित्यास्तमये काले
अस्ति चेद्या चतुर्दशी। प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुर्दशी॥ रात्रौ जागरणं यस्मात्तस्मात्तां समुपोष
येत्॥ अहोरात्रिव्रते यज्ञ एवमेकतिथौ गतं॥ तस्यामुभययोगिन्यामाचरेत व्रतं व्रतीति कामिके शिवर
हस्यस्मृत्यर्थसारादिवचनाच्च पूर्वदिने निशीथ परदिने प्रदोष तदा पूर्वैव। अर्धरात्रात्पुरस्ताच्चेज्जयायोगो यद
भवेत्॥ पूर्वविधैव कर्तव्या शिवरात्रिः शिवप्रियेति पाद्मे। जयायोगस्य विहितत्वात्॥ महतैव पापानां

तकं। पूजांगृहाणदेवेशयथाशक्त्योपपादितां। द्वितिये। बधोहंविविधैःपाशैःसंसारभयबंधनैः। पति
तंमोहजालेमातंसमुध्दरशंकर। तृतीये। चतुर्थेआद्यवत। नमःशिवायशांताय सर्वपापहरायच। शिवरा
त्रौमयादत्तंगृहाणार्घ्यंप्रसीदमे। द्वितीये। दुःखदारिद्र्यभावेश्च दग्धोहंपार्वतीपते। मांवेत्राहिमहादेव
गृहाणार्घ्यंनमोस्तुते। तृतीये। किंनजानासिदेवेशत्वद्भक्तिंप्रयच्छमे। स्वपादाग्रतलेदेवदास्यंदेहिज
गत्पते। चतुर्थेकुर्वंतियेवत्सरकांशिवस्यपूजांसुभक्त्यातुयथाकथंचित्‌सकृत्स्वयांत्येवशिवस्यलो
कंव्याधोपिपापात्‌धहृदीशमस्मात्‌॥ इतिपूजा॥ ॥अथकथा॥ सूतउवाच॥ सकारणमहे
श्वरशशांकरूतःशेखरकपालधारिणं। भीमंवरदंचाभयप्रदंवक्त्रंदक्षजगतःसर्वदाशिवः। गोब्रालपान्
पापांचशिवंभवतुसर्वदा॥ कैलासशिखरासीनंदेवदेवंजगद्गुरुं। पंचवक्त्रंदशभुजंत्रिनेत्रंशूलपा
णिनं। पिनाकंशाभितकरंखड्गखट्वांगधारिणं। कपालखट्वांगधरंकृत्तिवाससमीश्वरं॥ भस्मांगव्याल
शोभाढ्यंअस्थिमालाविभूषितं। नीलजीमूतसंकाशंसूर्यकोटिसमप्रभं॥ क्रीडंतंचशिवंतत्रगण
श्चपरिवारितं। विसृज्यदेवताःसर्वास्तिष्ठंतंपरमेश्वरं। तंदृष्ट्वादेवदेवेशंप्रहस्योत्फुल्ललोचना॥ पार्वतीपरि २२७

पप्रछविनयावनतास्थिता। गौरीप्रोवाचभर्तारंविस्मयोत्फुल्ललोचना। पार्वत्युवाच॥ कथयस्वप्रसादे
नयज्ञाप्यंव्रतमुत्तमं। श्रुतास्त्वयोक्तादेवेशव्रतानांनिर्णयाःशुभाः। तथावेदानधर्माश्चतीर्थधर्मास्त्वयो
दिताः। नास्तिमेनिश्चयोदेवश्रांताहंचपुनःपुनः। तस्माद्वदस्वमेदेवएवंनिःसंशयंप्रभो। व्रतानामुत्तमं
देवभुक्तिमुक्तिप्रदायकं। तदहंश्रोतुमिछामिकथयस्वममप्रभो॥ ॥ईश्वरउवाच॥ श्रृणुदेविपरं
गुह्यंव्रतानामुत्तमंव्रतं। यन्नकस्यचिदाख्यातंरहस्यंमुक्तिदायकं। येनैवकथ्यमानेनयमोविलयतां
व्रजेत्‌। तदहंकीर्तयिष्यामिश्रृणुष्वैकमनाःप्रिये। माघांतेकृष्णपक्षेतुअविधायाचतुर्दशी॥ शिव
रात्रिस्तुसाज्ञेयासर्वयज्ञोत्तमोत्तमा। दानैर्यज्ञैस्तपोभिश्चव्रतैश्चविविधैरपि। नतीर्थैस्तत्कृतंपुण्यंय
त्पुण्यंशिवरात्रितः। शिवरात्रिसमंनास्तिव्रतानामुत्तमंव्रतं॥ अज्ञानाज्ञानतोवापिफलंमोक्षमवाप्नुया
त्‌॥ मृतास्तेनिरयंत्यक्त्वागतास्तेशिवसंनिधौ॥ सर्वमंगलशीलाचसर्वामंगलनाशिनी। भुक्तिमु
क्तिप्रदान्वेषासत्यंसत्यंवरानने॥ देव्युवाच॥ कथंयमपुरंमार्गंत्यक्त्वादेवंव्रजेन्नरः। एतन्मेमह
दाश्चर्यंप्रत्यक्षंकुरुशंकर॥ ॥शंकरउवाच॥ श्रृणुदेवियथावृत्तांकथांपौराणिकींशुभां। यम

शासनहंत्रीचशिवशासनदायिका॥ कश्चिद्दासीत्पुरादेविनिषादस्त्वामिषप्रियः॥ प्रत्यंतदेशवासी
चम्लधरासन्नकेतनं। सीमांतेसमदातिष्ठत्कुटुंबपरिपालकः। तन्वापीनोधनुर्धारीशमांगःकृ
ष्णकंचुकः। बध्दगोधांगुलित्राणःसदैवमृगयारतः। एवंविधोनिषादोसौचतुर्दश्यांदिनेशुभे। व्य
वहारिकेश्चद्रव्यार्थंदेवगारेप्ररोधितः। तेनापिदेवतादृष्टाजनानांवचनंश्रुतं। उपवासव्रतानांचशिवःशि
वशिवेतिच। दिनांतेतैस्तदामुक्तःप्रातर्द्रव्यंप्रदीयतां। ततोसौधनुरादायदक्षिणेनगतःस्वयं। आग
छन्सवनोद्देशेजनहास्यंचकारसः। शिवःशिवकिमेतद्धिकुर्वंतिनगरेजनाः। वनेचरांस्तिरीक्ष्यंस्तुच
तुर्दिक्षुद्रवंस्ततः। पदंश्वापदमार्गंचआत्रमेश्शूकरान्मृगान्। इतश्चेतश्चधावंसआमिषलुब्ध
मानसः। वनेसपर्वतंसर्वंभ्रमतस्तद्दिनंगतं॥ संप्राप्तंतेननोकिंचिन्मृगश्शूकरतित्तिरं। निराशोलुब्ध
कोजातेतदाह्यस्तंगतेरवौ। चिंतयित्वाजलोपांतेजागरंजीवघातने। संविधा[illegible]स्यहेरात्रोनिश्चि
तंममजीवनं॥ गतोसौजलसामीप्यंतीरस्थोजालमध्यतः। छेदनंकर्तुमारेभेआत्मनोगुप्तिका २३८
रणात्। जालमध्येमहालिंगमस्तिस्वायंभुवंशुभं। बिल्ववृक्षोमहादिव्योजालिमध्येचसंस्थितः। गृही

तमप्रसन्नोभवसर्वदा। वस्त्रं। श्रीखंडंचंदनंदिव्यंमलयाचलसंभवं। विलेपनंसुरश्रेष्ठगृहाणपरमेश्वर। गंधं। य
ज्ञोपवीतंसहजंब्रह्मणानिर्मितंपुरा। आयुष्यंभववर्चस्वमुपवीतंगृहाणमे। यज्ञोपवीतं। माल्यादीनि
पुष्पं। वनस्पतिरसोधूपोगंधाढ्यःसुमनोहरः। आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां॥ धूपं। आज्यंत्रि
वर्तिसंयुक्तंवह्निनायोजितंमया। दीपंगृहाणदेवेशत्रैलोक्यतिमिरापहं। दीपं। नैवेद्यंगृह्यतांदेव०नै
वेद्यं। पूगीफलंमहद्दिव्यंनागवल्लीदलैर्युतं॥ कर्पूरादिसमायुक्तंतांबूलंप्रतिगृह्यतां॥ तांबूलं। इदंफलं
मया०फलं। हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः। अनंतपुण्यफलदमतःशांतिंप्रयच्छमे। दक्षिणा।
नीराजनं। पुष्पांजलिः। प्रदक्षिणा॥ अथकथा॥ श्रूयतांधर्मसर्वस्वंशिवरात्रौशिवार्चनं। व्रतेस्येन
विधानेनस्वर्णपुण्येनकर्मणा॥ कृत्वास्नानंशुचिर्भूत्वाधौतवासससमन्वितः। स्थापयेद्देवदेवेशमंत्रैर्वे
दसमुद्भवैः। ततःपूजाप्रकर्तव्यापूर्वोक्तविधिनाततः। नमोयज्ञजगन्नाथनमस्त्रिभुवनेश्वर। पूजांगृही
णमहत्तांमहेशप्रमथेपदे। प्रथमप्रहरपूजा। पूर्वेनंदिमहाकालोगणश्शृंगीचदक्षिणे। वृषस्कंधोपश्चि
मेचंदेशाकालीतथोत्तरे। गंगाचयमुनाचैवपार्श्वेचैवव्यवस्थिते। नमोव्यक्तायसूक्ष्मायनमस्तेत्रिपुरां

त्वातस्यपत्राणि मार्गशुध्यर्थमक्षिपत॥ क्षिप्तानि दक्षिणे भागे पेतुर्वै लिंगमूर्धनि। नदिवाभोजनंतस्य अ.
मिषेलुब्धके तसः। ततश्चिंतयमानस्य न निद्रा समजायत। तस्य गंधं समासाद्य लुब्धकस्य वरानने॥ नतिष्ठं
ति मृगाः सर्वे शरघातभयात्तदा। मृगान्निरीक्षितस्तस्य निद्रानाशो प्यजायत॥ बिल्वपूजा लिंगसंस्था प्रथ
मः प्रहरो गतः। ततो जलार्थमायांती हरिणी गर्भसंयुता। यौवनस्था सुरूपा च स्तनपीना सुशोभना। निरीक्षं
ती दिशः सर्वा भृशमुत्फुल्ललोचना। लुब्धकेनापि सा दृष्टा वाणगोचरमागता। बाणश्च संधितस्तेन एक
निष्ठेन चेतसा। त्रोटयित्वाथ पत्राणि प्रक्षिप्तानि शिवोपरि। शिवं देवं सदा ध्यायन्नसौ तेन परिपीडि
तः। एतस्मिन्नंतरे दृष्टो हरिण्या लुब्धकस्तदा। लुब्धकः कालस्वरूपेण कृतांतइव तिष्ठति॥ दृष्ट्वा तु तस्य सं
धानं यमदंष्ट्रासमप्रभं। सा मृगी दिव्यया वाचा लुब्धकं वाक्यमब्रवीत्॥ स्थिरो भव महाव्याध सर्वजीव
निकृंतन। हनिष्यसि। किमर्थं मां कथयस्व मम प्रभो॥ ।लुब्धक उवाच॥ कुटुंबं पीडितं मे च क्षुधया
च मया सह॥ धनं वै मम गृहे नास्ति तेन त्वां हन्मि शोभने॥ ॥सूत उवाच॥ जातपूजाप्रभावेन जागरो
पोषणेन च। चतुर्थांशेन पापानां विमुक्तो लुब्धकस्तदा॥ लुब्धकस्तु ततो दृष्ट्वा मृगीं मानुषभाषिणीं॥ जा

श्वर्यं परमं दृष्ट्वा किंचिधर्मसमन्वितः॥ लुब्धक उवाच॥ मयाह्निपातिताजीवउत्तमाधममध्यमः।नश्रु
ताईदृशावाणीश्वापदानांकथंचन।कस्मिन्देशेत्वमुत्पन्नाकस्मात्स्थानादिहागता।कथयस्वप्रयत्नेन
परंकौतूहलंहिमे॥ मृग्युवाच॥ शृणुत्वंलुब्धकश्रेष्ठकथयामितवाखिलं।आसीत्पूर्वंमहारम्या
स्वर्गेशक्रस्यचाप्सरा।अनंतरूपलावण्यासौभाग्येनापिगर्विता॥ सौभाग्यमदपुष्टांगेदानवोबल
गर्वितः।मयैवसुकृतोभर्ताहिरण्याक्षोमहासुरः।तेनसार्धंमयाभुक्तंचिरकालंयथेप्सितं।अन्यस्मिं
दिवसेव्याधक्रीडंत्यामसुरेणतु।प्रत्यहंप्रेक्षतेनित्यंशंकरस्यायतस्तदा।यावद्गच्छाम्यहंतत्रतावन्मांशं
करोब्रवीत्।कगतात्वंवरारोहेकेनवासंगताशुभे।किंवासौभाग्यगर्वेणनायातामममंदिरे॥स
त्यंकथयसीघ्रंत्वंनोवाशापंददामिते।शापभीत्यामयातत्रइत्युक्तंशंकराग्रतः।शृणुदेवप्रवक्ष्या
मिशापानुग्रहकारक।ममास्तिभर्ताविख्यातोदानवेंद्रोमहाबलः।तेनसार्धंमयादेवक्रीडितं
निजमंदिरे॥तेनाहंनागताशीघ्रंसृष्टिसंहारकारक।रुद्रस्तद्वचनंश्रुत्वासकोपोवाक्यमब्रवीत्॥ २२९
मृगःकामातुरोनित्यंहिरण्याक्षोभविष्यति।त्वंमृगीतस्यभार्याविख्याविष्यसिनसंशयः।त्यक्त्वा

प्रत्ययो भवेत्। पृथिवी वायुरादित्यः सत्ये तिष्ठंति देवताः। तस्मात्सत्येन गंतव्यं भवत्यास्वगृहं प्रति। त
स्य तद्वचनं श्रुत्वा गर्भार्ता सा मृगी तदा। चक्रे सत्यप्रतिज्ञां वै व्याधस्याग्रे पुनः पुनः। मृगीउ०॥ द्विजो भू
त्वा तु यो व्याध वेदभ्रष्टोभिजायते। स्वाध्यायसंध्यारहितः सत्यशौचविवर्जितः। अविक्रय्याणां वि
क्रेता अयाज्यानां च याजकः। तस्य पापेन लिप्याम्यहं यदि गृहं नागमे पुनः। दुष्टकुक्षौ तु यत्पापं धूर्ते वा
ग्रामकूटके। नास्तिके च विशीले च परदाररते तथा। वेदविक्रयणे चैव शवसूतकभोजने। तेन पाप
न लिप्यामि०। मृतशय्याप्रतिग्राहे मातापित्रोरपालके। तेन पापेन लिप्यामि०। द्रानं दातुं प्रवृत्तस्य पोंत
रायकरो नरः। तेन०। देवद्रव्यं गुरुद्रव्यं ब्रह्मद्रव्यं हरेत्तु यः। तेन०। दीपं दीपेन यः कुर्यात्पादं पादेन
धावयेत्॥ तेन०। भर्तारं स्वामिनं मित्रं आत्मानं बालमेव च। गां विप्रं च गुरुं नारीं यो मारयति दु
र्मतिः। तेन०। अवेक्ष्यं वंचयत्पापं यत्पापं दांभिके जने। अजितेंद्रिये धूर्ते च परदोषानुकीर्तने। कृत
घ्ने च कदर्ये च परदाररते तथा। सदाचारविहीने च परपीडाप्रदायके। परपैशून्ययुक्ते च कन्याविक्र २३०
यकारके। परापवादसंतुष्टे सर्वधर्मविवर्जिते॥ वृषलीपतौ वार्धुषिके पित्रोरदायके। हेतुकेब

स्वर्गंतथादेवान्दानवंभोक्तुमिच्छसि। द्वादशाब्दानिभोभद्रेभवित्ताशापर्वते। परस्परस्यशोकेन शा
पांतोपिभविष्यति। अनुग्रहः पुनस्त्वेषः शंकरेण कृतः स्वयं। कदाचित्क्षिव्याधवरो मम सान्निध्यमाश्रि
तः। वधार्थंतस्यसंप्राप्तःपूर्वजन्मस्मरिष्यसि। अतऊर्ध्वंतदारुद्रं दृष्ट्वामोक्षमवाप्स्यसि॥ शंकरेणमया
दृष्टेवसंत्यास्मिन्महावने। ततोदुःखमनुप्राप्तामांसमेदोविवर्जिता। गर्भाक्रांताविशेषणनवध्यास्
तिनिश्चितं। सकुटुंबस्यतेनूनंभोजनंनभविष्यति। आयास्यतिमृगीत्वन्यामार्गणानिललुब्धक। पी
नायौवनसंपन्नाबहुमांसामदोक्षता। भोजनंसकुटुंबस्यतवसद्योभविष्यति। अथान्योमृगोव्याध
पानार्थंतुजलाशये। आगमिष्यतिप्रत्यूषेक्षुधार्थस्यनसंशयः। मर्पित्यत्वांपुनःप्रातर्बालान्संदि
श्यबंधुषु। शपथैरागमिष्यामिसंदिश्यचसर्वजने॥ तस्यास्तद्वचनंश्रुत्वाव्याधोविस्मयमागतः।
क्षणमेकंतथास्थित्वाव्याधोवचनमब्रवीत्। नागमिष्यतिचेद्धन्योजीवंस्त्वमपिगच्छसि। क्षुधयापीडि
तोहंवैकुटुंबंचविशेषतः। प्रातस्त्वयाममगृहमागंतव्यंयथापथं। शपथैश्चव्रजत्वंहिययामेप्र

दृक्षासालुब्धकेनतु। पुनर्वृक्षस्य पत्राणि त्रोटयित्वा करेणतु॥ क्षिप्तानि दक्षिणे भागे लिंगोपरि दिद
स्या। तस्यावधार्थं तेनाथ बाणो धनुषि संधितः॥ तिष्ठं स्तत्रैकचित्तेन कुटुंबार्थे जिघांसया। निरीक्ष
लुब्धको यावद्धापांतस्यां विमुंचति। तावन्मृग्या समं दृष्टो दृष्ट्वा तं विह्वलाभवत्। अद्यैव भगिनीमपि लु
ब्धकेन विनाशिता। मम किं जीवितव्येन तस्या दुःखेन पीडिता। वरं मृत्युर्न शोको वै दृष्ट्वा व्याधं विशे
षतः। एवं संचित्य हरिणी लुब्धकं वाक्यमब्रवीत्। धनुर्धरवर व्याध सर्वजीवनिकृंतन। देहि
मे वचनं चैकं पश्चात्त्वं मां निपातय। आयाता हरिणी चैका मार्गेणानेन लुब्धक। समायाताथ
वानैव सत्यं कथय सुव्रत। तच्छ्रुत्वा लुब्धकस्तत्र विस्मितः क्षणमैक्षत। तस्यास्तु यादृशी वाणी अस्या
श्चैव तु तादृशी॥ सा चैषा वाग्गता नूनं प्रतिज्ञापालनाय च। अथवान्या समायाता न याया कथि
ता पुरा॥ ॥लुब्धक उवाच॥ अहोरात्रकृतं कष्टं कुटुंबार्थे मया मृगी। अधुना त्वां हनिष्यामि
देवानां स्मरणं कुरु। व्याधोक्तं वचनं श्रुत्वा हरिणी दुःखिता भृशं॥ व्याधं प्राह रुदित्वा वै भो मां व्या २३१

धनिपातय। तेजो बलं त्वया सर्वं निर्दग्धं विरहाग्निना। अहं प्राणान्विमोक्ष्यामि भोजनं तेन जायते। बल
वांश्च महातेजा मेदो मांससमन्वितः। अन्यश्च पीनगौरांगो मृगो ह्यत्रागमिष्यति। अहं च दुर्बला नूनं
मेदो मांसविवर्जिता। केवलं पापभाक्त्वं हि मम प्राणविमोचकः। मार्गेणानेन भो व्याध आगमिष्यति स
स्फुटं। तं हत्वा तव भो व्याध तृप्तिर्नूनं भविष्यति। तयोक्तं लुब्धकः श्रुत्वा किं करोमीति चिंत्य च। मृगीं
प्राह स युक्तार्थं एष मे निश्चयो हृदि। संचिंत्य लुब्धकः प्राह मृगीं शोकातुरां कृशां। सत्यं वद महाभा
गे प्रत्ययो मे यथा भवेत्। तस्यास्तद्वचनं श्रुत्वा हरिणी दुःखकर्षिता। चक्रे सत्यप्रतिज्ञां तु व्याध
स्याग्रे पुनः पुनः। मृगी० क्षत्रियस्तु रणं श्रुत्वा संग्रामं यो न गच्छति। तस्य पापेन० भेदयंति तडा
गानि वापीनां च गवामपि। मार्गस्थानं च ये घ्नंति सर्वसत्वभयंकरा। तेषां वै पातकं मह्यं यदि नायामि
ते गृहे। एतच्छ्रुत्वा तु व्याधेन सापि मुक्ता मृगी तदा। जलं पीत्वा तु बहुशो गता सद्यो यथागतं। जालिम
ध्ये स्थितस्यास्य द्वितीयः प्रहरो गतः। त्रुटित्वा बिल्वपत्राणि पुनर्देवे नियोजयेत्। पीडितो तीव सी
तेन क्षुधया गृह चिंतया। शिवः शिवेति जल्पन्वै न निद्रामुपलब्धवान्। कृतं सुरार्चनं तेन प्रह

रेप्रहरेगते॥ वीक्षन्नेवदिशःसर्वाःसत्वमार्गान्निरीक्षयन्। लुब्धकेनाथदृष्टोसौ हरिणःस्फुरितेक्षणः
विलोकयन्ददृशःसर्वामार्गणोमाम्मृगीपदान्। सौभाग्यबलदर्पाढ्यो मदेनोन्मत्तपीवरः। तंदृष्ट्वा
बाणमुद्यम्य आकर्णंतुष्टचेतसा। बाणंमुमोचतियावद्धत्तावद्दृष्टोमृगेणसः। कालरूपंतुतंदृष्ट्वामृगः।
श्चिंतितवान्भृशं। निश्चयोभवितामृत्युर्गत्वरोस्यगतोयतः। भार्याप्राणसमामेद्यव्याधेनहनिपाति
ता। तयाविरहितस्याद्यनूनंमृत्युर्भविष्यति। हाहाकालकृतंपापंयद्भार्यादुःखमागतं। भार्ययान
समंसौख्यंगृहेपिवनेपिच। तयाविनानधर्मोस्तिनार्थकामौविशेषतः। वृक्षमूलेपिदयितायत्र
त्रतिष्ठतिलङ्गृहं। प्रसादापितयाहीनःकालारादतिरिच्यते। धर्मकामार्थकार्येषुभार्यापुंससह
यिनी। विदेशगतेनापिमित्रविश्वासकारिणी॥ नास्तिभार्यासमाबंधुर्नास्तिभार्यासमंसुखं।
नास्तिभार्यासमंलोकेनरस्यार्तस्यभेषजं। यस्यभार्यागृहेनास्तिसाध्वीचप्रियवादिनि। अरण्य
तेनगंतव्यंयथारण्यंतथागृहं। एकाप्राणसमामेभूद्द्वितीयाप्राणदामम। इत्येवंचिंतयित्वातु
लुब्धकंवाक्यमब्रवीत्। ॥मृगउवाच॥ शृणुव्याधनरश्रेष्ठआमिषाहारभोजन। २३२

कूटसाक्षिप्रदेतथा। एतेषांपातकंमह्यंयदिनायामितेगृहं। यत्पापंब्रह्महत्यायांपितृमा
तृवधेतथा। तेनपापेन॰ यत्पापंलुब्धकानांचयत्पापंगरदायिनां। तेनपापेन॰ द्विभार्यःपुरुषोयस्तु
समदृष्ट्यानपश्यति। तस्यपा॰ सकृद्दत्वातुयःकन्यांद्वितीयंनप्रयच्छति। तेन॰ कथायांकथ्यमानायां
मंतरंकुरुतेनरः। तस्य॰ यतिनिंदापरोनित्यंवेदनिंदापरोहियः। तस्य॰ यस्यासंग्रहणीभार्याब्राह्म
णीचविशेषतः। तस्य॰ प्रेतश्राद्धेतुयोभुंक्तेपतितेबहुयाचके। असच्छास्त्रार्थनिरतेपुराणार्थवि
वर्जिते॥ मूर्खेपाखंडनिरतेक्रयविक्रयकेद्विजे। एतेषांपातकंमह्यं॰ एकाकीमृष्टमश्नाति
भार्यापुत्रविवर्जितः। तेन॰ आत्मजांगुणसंपन्नांसमानसदृशेवरे। नप्रयच्छतियःकन्यांनरोवेश्म
नदुर्बलः। तस्य॰ मृगीवाक्यंततःश्रुत्वालुब्धकोहृष्टमानसः। संहृत्यबाणंसंधानान्मुमोचहरिणीं
तदा। तस्यामुक्तिप्रभावेनलिंगस्यापिप्रपूजनात्। सद्भावोलुब्धकस्यापिजातोजातादयालुता॥ तस्मि
नेवक्षणेप्राप्तेपराप्राप्तामृगीतदा॥ संत्रस्ताभयसंप्राप्तापतिमन्वेष्यतीमुहुः॥ जालिमध्येस्थितेनाथ

यत्तेपृच्छाम्यहंवीरतच्चत्वंवदमेप्रभो।आगतंहरिणीयुग्मंकेनमार्गेणतद्गतं।त्वयाविनाशितंवाथसत्यंकथय
मेधुना।तस्यतद्वचनंश्रुत्वालुब्धकोविस्मयंगतः।असावपिनसामान्यादेवताकाप्युत्तमा।उवाचलु
ब्धकःसद्यस्तस्याग्रेवाक्यमुत्तमं।तेनगतंतेनेनमार्गेणसत्यंकृत्वाममाग्रतः।ताभ्यांदत्तोस्मिभुक्त्यर्थं
ममत्वमधुनानय।संप्रतित्वांहनिष्यामिनैवमोक्ष्यामिकर्हिचित्॥ मृगउवाच॥ तत्सत्यं
कीदृशंताभ्यांवाक्यमुक्तंतवाग्रतः।येनतेप्रत्ययोजातोमुक्तंतस्यरिपोद्वयं॥ तेगतेकेनमार्गे
णयेमुक्तेव्याधत्वधुना॥ व्याधउवाच॥ तेगतेनेनमार्गेणाश्रमाश्रमपदंप्रति॥ व्याधेनक
थितास्ताभ्यांज्ञापयायेकृतास्तदा।तच्छ्रुत्वावचनंतस्यहरिणोहृष्टमानसः॥ मृगउवाच॥ ताभ्यांव्याध
यदुक्तंचतत्करोमिनचान्यथा।प्रभातेतद्गृहंनूनमागमिष्यामिनिश्चितं।भार्याऋतुमतीमेद्यकामा
म्यधुनास्ति।गत्वागृहेयथायुक्तोतांअष्टच्छवसुहृज्जनान्।शपथैरागमिष्यामित्वदहंतैश्चनात्र
संशयः।मदेहंत्वद्गृहनायनेतुंशक्तःकथंचन।तद्वथामरणंमेस्याद्यदित्वंचाद्यघातये।लुब्ध

कउवाच॥ भगवत्तं शपथान्ब्रूहि विश्वासो मे भवेद्यथा। यथा हि प्रेषया मित्तांस्वगृहं प्रत्तिकामुक॥ म्य

गउवाच॥ भर्त्तारं वंचयेद्यास्त्री स्वामिनं वंचते नरः। मित्रं च वंचयेद्यस्तु गुरुद्रोहं करोति यः। विरसं त्तुरसं द

द्यात्प्रेमभेदं करोति यः। भेद्ये द्यस्तडागानि प्रासादं पातयेत्तदा॥ प्रवासशीलो यो विप्रः क्रयविक्रयकारकः।

संध्यानविहीनश्च वेदशास्त्रविवर्जितः। मद्यपः स्त्रीषु रक्तो यः परनिंदारताश्च ये। परस्त्रीसेवका विप्राः

परपेशून्यसूचकाः। शूद्रान्नभोजना ये च भार्यापुत्रांस्त्यजंत्ति ये। वेदनिंदापरा ये च वेदशास्त्रा

र्थनिंदकाः। तेषां वै पातकं मे स्याद्यदि नायामि ते गृहात्॥ ज्ञार्यासंग्रहणीयस्य वृत्तशौचवि

वर्जिता। सर्वाशी सर्वविक्रेता द्विजानामपि निंदका। [illegible] श्रुत। तस्याः स्नुषा [illegible]

[illegible] सा च [illegible] गतान्नूनं [illegible] कथ वाक्य [illegible]

[illegible] श्रुता पुरा॥ लुब्धकउवाच॥ [illegible] कुटुंबार्थं मया [illegible]

[illegible] व्याधोक्तं वचनं श्रुत्वा हरिणी दुःखिता [illegible] व्याधं प्राह [illegible]

जीवकं तथा सर्वं निर्दग्धं विरहाग्निना। [illegible] आयाते [illegible]



षुवर्णेषु शुश्रूषांयः शूद्रो न करोति वै। विप्रवाक्यं परित्यज्यं पाखंडाशाभिरताः सदा॥ ब्रह्मचर्यरताः शूद्रा ये च
पाखंडसंश्रुताः। तेषां वै पा० तिलास्तैलं घृतं क्षौद्रं लवणं सगुडं तथा। लोहं लाक्षादिकं सर्वं रंगान्नानाविधान
पि। विक्रय्यैतानि शूद्रेण तद्दोषान विद्यते। मद्यं मांसं विषं दुग्धं नीलीं च वृषभं तथा। मीनं क्षीरं सर्पकूटं च वि
तातकफलानि च। विद्यादि विक्रयेद्यस्तु शूद्रो पि मदमोहितः। आदित्यं विष्णुमीशानं गणाध्यक्षं तु पार्वती॥
एतास्त्यक्त्वा गृहे मूढो यो न पूजयते नरः। तस्य पापेन लि० योगांस्य शांतिपादेन उदितेर्कपितृणुष्पाति। एकाकी
मिष्टमश्नाति तस्य पापस्य भाग्य हं। मातापित्रोरपोष्टं च क्रियामुद्दिश्य याचकः। कन्याशुल्कोपजीवी च देव
ब्राह्मणनिंदकः। गोग्रासं हंतकारं च अतिथीनां च पूजनं॥ यो न कुर्वंति गृहिणस्तो पापापं भवेन्मम॥ वृंता
कानि पटोलानि कालिंगं तुंबकानि च॥ मूलकं लशुनं कंदं सुसभकनशाककं। एतानि भक्षये यस्तु
नरो वै ज्ञानदुर्बलः। तस्यै वै जायते शुधिश्चांद्रायणशतैरपि। एतेषां पातकं यदि ०। यः पठत्त्व रहीनं च
लक्षणेन विवर्जितं। इत्यासु संचरतद्विप्रो वेदाशुद्धीरयत्तुयः। विप्रस्य पठतः क्के पिष्यति तियदिवा

जः। वेदोपजीविकोविप्रो। तिलोभारश्शूद्रभोजनः। तस्यपापेनसंध्याहीनेव्रतत्रष्टविप्रेवेदविवर्जिते।
तेन। शूद्रान्नेषुचयेसक्ताः शूद्रसंपर्कदूषिताः। तेषां। लेखकश्चित्रकर्ताचवैद्योनक्षत्रसूचकः। कूट
कर्ताद्विजोयश्चतस्यपापस्यभाग्यहं॥ कूटसाक्षीमृषावादीपरद्रव्यस्यतस्करः। परदाराभिगामीचये
चविश्वासघातकाः। द्रव्येद्रव्यंविनिक्षिप्यपानकूटसमाश्रिताः। वेश्यारतासदायेचदानंदातुंनिवार
काः। भर्त्तारमर्थहीनंचकुरूपंव्याधिपीडितं॥ यानत्यजयतेनारीरूपयौवनगर्विता। एकादशींतथामा
घवासाशिवचतुर्दशीं॥ एवंविघ्नांप्रकुर्वंतितेषांपापस्यभाग्यहं। अथकिंबहुनोक्तेनभोलुब्धकतवा
ग्रतः। यदिनायामितगेहंममसत्वंभवेतव। तेनवाक्येनसंतुष्टोव्याधोवैवीतकल्मषः। संहृत्यध
नुषोबाणंमृगोमुक्तोगृहंप्रति। जलंपीत्वातुहरिणःप्रविष्टोगहनंवनंगतोसौतेनमार्गेणगतंये
नमृगीद्वयं॥ लुब्धकेनलदातत्रजालिमध्यस्थितेनहि। प्रत्यूषेबिल्वपत्राणित्रोटयित्वाप्रतर्प्पतः। शि
वःशिवेतिजल्पन्वैआजुयातोनिजाश्रमं॥ अथोदितेसूर्यबिंबेअकामाज्जागरेकृते। पापान्मुक्तो
प्यसौसद्यः शिवपूजाप्रभावतः। यावद्दिशोनिरीक्षेतनिराशोभजनंप्रति। तावच्छिशुंसूताचा

न्याम्मृगी तत्र समागता। दृष्ट्वा मृगीं तदा व्याधो बाणं धनुषि योजयत्। यावन्मुंचत्यसौ बाणं तावदुक्तं तद
तदा। मा बाणं मुंच धर्मात्मन् धर्मं मा मुंच सुव्रत। अहं न वध्या सर्वेषामिति शास्त्रविनिश्चयः। राजा नो मिथु
नासक्तौ स्तनयो व्याधिपीडितः। न हंतव्यो मृगो राज्ञा मृगी च शिशुनावृता। अथवा धर्ममुत्सृज्य मां हनिष्य
ति मानव। बालकं स्वगृहे मुक्त्वा सखीनां च निवेद्य वै। शपथै रागमिष्यामि व्याध शृणु वचो मम। या स्त्री भ
र्तारमुत्सृज्य परपूरुषं सिरता सदा॥ तस्याः पापेन लिप्यामि॰ मद्यमांसविषं दुग्धं नीलीकुंभफलानि च॥ ए
तानि विक्रयेद्यस्तु नरो मोहसमन्वितः। तस्याः स्तद्वचनं श्रुत्वा व्याधो विस्मयमागतः। ततो व्याधेन सा मु
क्ता गता वै निजमंदिरं। व्याधोपि तत्सरस्त्यक्त्वा जगाम स्वगृहं प्रति। सर्वेषां वचनं ध्यायन्मृगाणां सत
वादिनं। एतेषां घातको नित्यमहं यास्यामि कां गतिं। क्रमाद्गृहं समायातो बालकाः क्षुधयावृताः। नचान्नं
मांसं गृहे तस्य भोजनं येन जायते। निरामिषं तु तं दृष्ट्वा निराशास्ते भवंस्तदा। व्याधोपि च तदा तत्र तेषां
वाक्यानि संस्मरन्॥ न भोजनं न निद्रां च लभते विस्मयान्वितः। आगमिष्यंति ते नूनं शपथैरपि यंत्रि
ताः। न तानहं विधिष्यामि सतां व्रतमनुस्मरन्। लुब्धकेन तदा मुक्तो हरिणः शपथं गतः। स्वमाश्र

मंतुसंप्राप्तोयत्र तत्र धरिणीद्वये। सद्यः प्रसूता सा चैका द्वितीया रतिलालसा। तृतीयापि समायाता बालकैर्बी
हुभिर्वृता। सर्वाः समेता एकत्र मरणे कृतनिश्चयाः। परस्परं प्रजल्पंतो लुब्धकस्य विचेष्टितं। आयाता ह
रिणी मुक्ता रूपाद्यां रतिलालसा। कृतकृत्या भव त्वं सत्तेभ्या वाक्यमथाब्रवीत्। पुष्पाभिरिह संस्थेयं
कर्त्तव्यं प्राणरक्षणं। व्याघ्रादीपाल्लुब्धकेभ्यो बालकानि प्रयत्नतः। अहं सत्यानुभार्या नक्षुको मा
हसं त्वतः। भ्रूणहा सत्तु विज्ञे यत्तस्य जन्म निरर्थकं॥ संतानात्स्वर्गमाप्नोति इह कीर्तिश्च शाश्वती॥
संततिर्यत्नतः पाल्यः सर्वसौख्यप्रदायिका। अपुत्रगतिर्नास्ति इहलोके परत्र च। येन केनाप्युपायेन पुत्रमु
त्पादयेत्पुमान्। मया च तत्र गंतव्यं यत्र व्याधस्य मंदिरं। सत्यं तु पालनीयं स्यात्सत्ये धर्मः प्रतिष्ठितः। एतच्छ्रु
त्वा तु तानार्यो वाक्यमूचुः सुदुःखिताः। वयमप्यागमिष्यामि त्वया सार्धं मृगोत्तम॥ तयात विप्रियं का
तन स्मराम कदाचन। पुष्पितेषु वनांतेषु नदीनां संगमेषु च। कंदरेषु च शैलानां पुष्याभी रक्षिता वयं॥
न कार्यमद्य मस्माकं क्रीडितेन त्वया विना। नारीणां पतिहीनानां जीवितेः किं प्रयोजनं। मितं ददाति
हि पिता मितं भ्राता मितं सुतः। अमितस्य तु दातारं भर्तारं का न पूजयेत्। अपि द्रव्ययुता नारी

तनिश्चयः। अनाशकं व्रतं ग्राह्यं दृष्ट्वा लग्नाः समाययुः। भार्यापुत्रैः परिवृतो मृगस्तं देशमागतः। क्षुधितो बाल
कैर्युक्तो लुब्धको यत्र तिष्ठति। मृगस्तं देशमागत्य कुटुंबेन समन्वितः। पालयन् सत्यवाक्यानि लुब्धकं वा
क्यमब्रवीत्॥ मृग उवाच॥ हनमां प्रथमं व्याध पश्चाद्दत्ता क्रमेण तु। बालकानि ततः पश्चाद्भन्यतां
माविलंबय। लुब्धकैस्तु मृगा भक्ष्या नास्ति दोषाः कदाचन। वयं यास्यामः स्वर्लोकं सत्यप्रतानसं
शयः। तथा ते सकुटुंबाश्च पापायश्च भविष्यति। एतच्छ्रुत्वा तु वचनं मृगेण परिभाषितं। आत्मानं
निंदयित्वा तु लुब्धको वाक्यमब्रवीत्॥ व्याध उवाच॥ अहो मृग महासत्व गच्छ गच्छ स्वमाश्रमं। आ
मिषेण न मे कार्यं यच्छ्राव्यं तद्भविष्यति। जीवानां घातने पापं बंधने तर्जने तथा। नैव पापं करिष्यामि कु
टुंबार्थं कदाचन। त्वं गुरुर्मे मृग धर्माणां उपदेष्टा मृगोत्तम। गच्छ गच्छ मृगश्रेष्ठ कुटुंबेन समन्वितः। मया
त्यक्तानि शस्त्राणि सत्यधर्मसमाश्रितः॥ मृग उवाच॥ कर्मन्यासमहं कृत्वा लत्सकाशमिहागतः॥
हन्यतां हन्यतां शीघ्रं न ते पापं भविष्यति। मया दत्ता पुरा वाचा तया बद्धो न यास्यहे। एतच्छ्रुत्वा तु वचनं २३६
लुब्धको वाक्यमब्रवीत्॥ लुब्धक उवाच॥ त्वं बंधुस्त्वं गुरुस्त्राता त्वं मे माता पिता सुहृत्। मया

त्यक्तानि शस्त्राणि त्यक्ता मायादिकं बलं। कस्य भार्याः सुताः कस्य कुटुंबस्य महामृग। तेः स्वकर्मैव भोक्त
व्यं मृग गच्छ यथासुखं। इत्युक्त्वा स तदा तूर्णं बभंज सशरं धनुः। मृगं प्रदक्षिणीकृत्य नमस्कृत्य क्षमापये
त्। एतस्मिन्नंतरे नेदुर्देवदुंदुभयो दिवि। आकाशात्पुष्पवृष्टिस्तु पपात सुमनोहरा। तदा दूतः समाया
तो विमानस्थः शोभने॥ देवदूत उवाच॥ अहो व्याध महासत्व सर्वसत्वक्षयंकर। विमानमिद
मारुह्य सदेहः स्वर्गमाविश। शिवरात्रिप्रभावेन पातकं ते क्षयं गतं। उपवासस्तु संजातो निशि जागरणं कृ
तं। यामे यामे कृता पूजा अज्ञानेन शिवस्य च। सर्वपापविनिर्मुक्तो गच्छ त्वं भद्र मंदिरं। विमानं च समारु
ह्य सत्याच्छिवपदं व्रज। मृगराज महासत्य भार्यापुत्रसमन्वितः। भार्याद्वितीयसंयुक्तो नक्षत्रपदमा
प्नुहि। तव नाम तु तद्दृश्यं लोके ख्यातं भविष्यति। एतच्छ्रुत्वा तु वचनं लुब्धकेन समन्वितं। विमा
नं तु तदारुह्य नक्षत्रपदमागतः। हरिणीद्वयमन्येन पृष्ठतो मृगमेव च। तारात्रितयसंयुक्तं मृगशीर्षं त
दुच्यते। बालकद्वितयं चाग्रे तृतीया पृष्ठतो मृगी। पृष्ठतस्तत्र संप्राप्ता मृगशीर्षस्य सन्निधौ। मृगरा
ड् दृश्यते ह्यापि ऋक्षं व्योमगमुत्तमं। उपवासं करिष्यंति जागरणसमन्वितं। यथोक्तशास्त्रमार्गेण

तेषां मोक्षो न संशयः ॥ शिवरात्रिसमं नास्ति व्रतं पापक्षयावहं । यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ।
अश्वमेधसहस्राणि वाजपेयशतानि च । प्राप्नोति तत्फलं सर्वं नात्र कार्या विचारणा ॥ ॥ इति श्री लिंगपुराणे उ
मामहेश्वरसंवादे शिवरात्रिव्रतं ॥ ॥ अथोद्यापनं । हेमाद्रौ स्कांदे ॥ स्कंद उवाच ॥ व्रतस्योद्यापनं कर्म
कथं कार्यं च मानवैः । को विधिः कानि द्रव्याणि कथयस्व मम प्रभो ॥ ईश्वर उवाच ॥ शृणु षण्मुख तत्ते
न लोकानां हितकाम्यया । उद्यापनविधिं चैव कथयामि तवाग्रतः । यथा संजायते वित्तं भक्तिश्रद्धासमन्वि
तं । स एव व्रतकालस्य यतो नित्यं हि जीवितं । चतुर्दशाब्दं कर्तव्यं शिवरात्रिव्रतं शुभं । एकभक्तं त्रयोद
श्यां चतुर्दश्यामुपोषणं संपाद्य सर्वसंभारान्मंडपं तत्र कारयेत् । वस्त्रैः पुष्पैः समाछन्नं पट्टवस्त्रैश्च शो
भितं । तन्मध्ये लेखयेद्दिव्यं लिंगतोभद्रमंडलं ॥ अथवा सर्वतोभद्रं मंडपांतः प्रकल्पयेत् । शोभापद्मशोभा
संयुक्तं दीपैः सर्वत्र सोज्वलं । आचार्यं वरयेत्तत्र ऋत्विग्भिः सहितं शुचिं । शिवरूपाश्च ते विप्राः पूज्याश्चं
दनपुष्पकैः । अनुज्ञातश्च तैर्विप्रैः शिवपूजां समारभेत् ॥ रुद्रनाम्ना नमो तेन ब्राह्मणानपि पूजयेत् २३७

बहुपुत्रसुहृद्वृता । साशोच्या बंधुवर्गस्य पतिहीना कुरंगना । गंधमाल्यौ स्त्रियो नित्यं म्रियते भर्तुरग्रतः । नांत
त्रीवाद्यते वीणा न चक्रो भ्रमते रथः । नापतिः सुखमाप्नोति नारी पुत्रशतैर्वृता । नास्ति भर्तासमो धर्मो ना
स्ति धर्मसमः सुहृत् । नास्ति भर्तासमो ~~धर्मो नास्ति धर्मसमः सु~~ नाथः स्त्रीणां भर्तासमा गतिः । एवं विलिप्यतः
सर्वाः मरणे कृतनिश्चयाः । बालकैस्तैः समायुक्ता भर्तृशोकेन दुःखिताः । मृगस्तासां वचः श्रुत्वा हृदि
चिंतापरोऽभवत् । गंतव्यं किं न गंतव्यं मया व्याधस्य मंदिरे । एकतः सुकृतं रक्षन्कुटुंबस्य क्षयो भवेत् ।
तदंतिकं न चेद्यामि मम सत्यक्षयं व्रजेत् । वरं पुत्रस्य मरणं भार्यया आत्मनस्तथा । सत्यं कृते परो नि
त्यं मा कल्पं रौरवं व्रजेत् । तस्मात्सत्यं पालनीयं नरैः श्रेयोर्थिभिः सदा । एवं संचिंत्य हरिणो धर्मांध
हृदि मनोरमान् । ताभिः सहैव शावकैः क्षणात्तदाश्रमं ययौ । तस्मिन्सरसि संस्नात्वा कर्मन्यासं च कारह
तं लिंगं प्रणिपत्याशु हृदि ध्यायन्सदाशिवं । गानपानं परित्यज्य मैथुनं भोगमेव तु । कामं क्रोधं तथा
लोभं भयामोक्षविनाशिनी । वंदयित्वा तु ते देवं लुब्धकाभिमुखा ययौ । गास भार्याश्च पुत्राश्च मरणे कृ

त।अव्रणंसजलंकुंभंतस्योपरितुविन्यसेत्॥ सौवर्णंराजतंताम्रंमृन्मयंवापिकारयेत्।कुंभोपरिन्य
सेद्देवमुमयासहितंशिवं।सौवर्णंप्यथवारौद्रंवृषभेसंस्थितंशुभं।रत्नालंकारणैर्हेमैरलंकृत्यप्रपूजयेत्॥
पुलेनवातदर्धेनतदर्धार्धेनवापुनः।वस्त्रयुग्मेनसंवेष्ट्यबिल्वपत्रैःप्रपूजयेत्।उमामहेश्वरीमूर्तिंपूजयेद्वृष
भेस्थितौ।सोमंचसगणंचैवपूजयित्वामहेश्वरं।होमंकुर्यात्प्रयत्नेनरौद्रमंत्रैर्यथाविधिब्राह्मणान्पू
जयेद्भक्त्याभोजयेच्चचतुर्दश।आचार्यंचसपत्नीकंवस्त्रालंकारभूषणैः।यज्ञोपवीतंवस्त्रादि
दद्यात्तेभ्यःपृथक्पृथक्।गांसवत्सांसवसनांनानालंकारभूषणां॥दद्यादाचार्यवर्यायशिवोमेप्रीय
तामिति।ततःसकुंभांमूर्तिंचसवस्त्रांवृषभेस्थितां॥सर्वालंकारसहितामाचार्यायनिवेदयेत्।व्रत
मेतत्कृतंयन्मेपूर्णंवापूर्णमेवच।सर्वंसंपूर्णतांयातुप्रसादाद्भवतोमम।इतिसंप्रार्थ्यतान्विप्रान्प्रणा
म्यचपुनःपुनः।अजैकपादंभिस्तेभ्योदद्यात्कुंभान्पृथक्पृथक्।पुराणस्तोत्रपाठैश्चरात्रिशेषंनये
द्बुधः॥ततःप्रभातसमयेकृत्वासंध्यादिकाःक्रियाः।पुनःपूजांप्रकुर्वीतततोहोमंसमारभेत्।तिलव्रीहिय

वैश्वैवपायसान्नेन भक्तितः। त्र्यंबकमितिमंत्रेणनमःशंभवेचेतिच। गौरीर्मिमितिमंत्रेणशतमष्टोत्तरहुतं॥
होमंकुर्याच्चमतिमान्बिल्वपत्रैस्तुनामभिः। अजैकपादहिर्बुध्न्योभवःशर्वउमापतिः। रुद्रःपशुपतिःशंभुव
रदःशिवईश्वरः महादेवोहरोभीमोनामान्येवंचतुर्दश॥ पूर्णाहुतिंततोकृत्वाकर्मशेषंसमापयेत्॥
एतैर्होमप्रकर्तव्यःकुंभदानेपितान्स्मरेत्। भोज्यंक्षमापयेद्देवमेभिर्नामपदैःपृथक्। प्रतिमांकु
भसंहितामाचार्यायनिवेदयेत्। शंभोप्रसीददेवेशसर्वलोकेश्वरप्रभो। तवरूपप्रदानेनममसंतु
मनोरथाः। यज्ञोपवीतवस्त्राणिदद्यात्तेभ्यःपृथक्पृथक्। आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूष
णैः। गांसवत्सांततोदद्यात्कर्मसंपूर्तिहेतवे॥ अन्येभ्योपियथाशक्तिब्राह्मणेभ्योहिदक्षिणां॥ आचा
र्यायप्रदद्याच्चमूर्तिंमाहेश्वरींतथा। आचार्यंपूजयेद्भक्त्यावस्त्रालंकारभूषणैः। चतुर्दशप्रदातव्या
विप्रेभ्योजलपूरिताः॥ कुंभायज्ञोपवीतानिवस्त्राणिचपृथक्पृथक्। पूर्णमेवचवस्त्राणिशय्यासो
पस्करांतथा॥ द्वादशैवतुगादद्यात्परिधानादिकंतथा॥ एतैर्होमःप्रकर्तव्यःकुंभदानेपितान्स्मरेत्॥ २३८

[illegible]पापयेद्देवमेभिर्नामपदैः पृथक्॥ प्रतिमां पूजयेद्भक्त्या आचार्याय निवेदयेत्॥ अथवा दक्षिणामेव प्रद
[illegible]गुरु कुर्यात्तिलोन्। व्रतमेतत्कृतं यन्मे पूर्णं वाप्यूर्वमेव वा। सर्वसंपूर्णतां यातु प्रसादाद्भवतां मम। इति सं
प्रार्थ्य तान्विप्रान्प्रणम्य च पुनः पुनः॥ ततश्च स्वजनैः सार्धं स्वयं भुंजीत सव्रती॥ ॥इति रकांदशिवरात्र्यु
द्यापनं॥ ॥इति श्रीभट्टनीलकंठात्मजशंकरकृतौ व्रतार्के चतुर्दशीव्रतानि॥ ॥अथ पूर्णिमाव्रतानि
तत्र ज्येष्ठपूर्णिमायां वटसावित्रीव्रतं। तत्र पूर्वविद्धा ग्राह्या। पूर्वविद्धा न कर्तव्या अमावस्या च पूर्णिमा। वर्जे
यित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्। वर्जयित्वेति पर्युदासादष्टदश नाडीवेधः सावि
त्रीव्रतातिरिक्तपरः। इदं च त्रयोदशीमारभ्य पूर्णिमांतं कर्तव्यं॥ तथा च स्कांदभविष्ययोः। ज्येष्ठमासि सितेप
क्षे द्वादश्यां रजनीमुखे॥ व्रतं त्रिरात्रमुद्दिश्य त्वहोरात्रे स्थिरा भवेद्दिलुपक्रम्यांते उपसंहते॥ ज्येष्ठे मासि
सितेपक्षे पूर्णिमायां तथा व्रतं। चीर्णं पुरा महाभक्त्या कथितं मे मयन द्योति। धर्मराज उवाच॥ ना
रीवा विधवा वापि सपुत्रापुत्रवर्जिता। सभर्तृका सपुत्रा वा कुर्याद्व्रतमिदं शुभं। ज्येष्ठे मासि तु संप्राप्ते पू

पूर्णिमासीपृतिव्रता। स्नात्वैवचतुर्त्विभुक्त्वानियमंकारयेत्ततः। अमायामुक्तेनिर्णयामृतेभविष्ये। अमायां
चलयाज्येष्ठस्यवासत्त्नी॥ त्रिरात्रोपोषितानारीविधिनानेनपूजयेदिति॥ ॥अथव्रतविधिः॥ ॥
आचम्यमासपक्षाद्युल्लिख्यममभर्तुःपुत्राणांच आयुरारोग्यप्राप्तयेजन्मजन्मनि अवैधव्यप्राप्त
येचसावित्रीव्रतमहंकरिष्य इतिसंकल्प्य। वटसिंचामितेमूलंसलिलैरमृतोपमैः। सूत्रेणवेष्टयेद्भक्त्या
गंधपुष्पाक्षतैःशुभैः। ॐनमोवैवस्वतायेतिमंत्रमयंतिप्रदक्षिणं। भक्त्यादत्तंधर्मराजसावित्रीप्रतिगृह्यतां।
पाद्यंभक्त्यासमाहृततोयफलपुष्पसमन्वितं। अर्घ्यंगृहाणसावित्रीममास्यव्रतसिद्धये। अर्घ्यं।सु
गंधंसहकर्पूरंसुरभीस्वादुशीतलं। स्वपत्न्यापहसावित्रीकुर्यादाचमनीयकं। आचमनीयं। अथपं
चामृतस्नानं॥ मयाभक्त्यासंकल्पितंमंदाकिन्यासमानिच। उदकंसमौदाप्रीत्यैसावित्र्यैधर्म
[illegible]वे॥ स्नानं। आचमनं सूक्ष्मतंतुमयंवस्त्रंकार्पासेपोविनिर्मितं॥ सावित्रीसत्यवत्कांतमयादत्तं २२१
[illegible]ह्यतां॥ वस्त्रं। सावित्रीसत्यवत्कांतधर्मराजसुरेश्वर। सावित्रीब्रह्मणासार्धमुपवीतंप्रतिगृह्यतां।

नि

मित्युपवीतं।कुंकुमागरुकर्पूरकस्तूरीरोचनायुतं। चंदनं ते मया दत्तं सावित्री प्रतिगृह्यतां चंदनं।अ
क्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभनाः।मयानिवेदिता भक्त्या गृहाण परमेश्वरीरित्यक्षताः।माल्या
दीनि सुगंधीनि माल्त्यादीनि वै प्रभो। मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यतां।पुष्पं।अथांगपूजा।
सावित्र्यै नमः पादौ पूजयामि। प्रसावित्र्यै० जंघे।कमलायताक्ष्यै० कटिं० भूतधारिण्यै० उदरं।ब्रह्म
पाःप्रियायै०शिरः।अथ ब्रह्मसत्यव्रतांगपूजा। धात्रे नमः पादौ पूज्यंपेष्ठाय० उदरं।परमेष्ठिने० मेढ्रं
अग्निरूपाय०कटिं। वेधसे० ऊरू। पद्मनाभायन० हृदयं। वेदैधसे०कंठं।हिरण्यगर्भाय०मुखं।ब्र
ह्मणे०शिरः विष्णवे०सर्वांगपू० देवद्रुमरसोद्भूतः कालागरुसमन्वितः।आघ्रेय तामयं धूपो सा वि
त्री प्रतिगृह्यतां।।धूपं। चक्षुर्दं सर्वलोकानां तिमिरस्य निवारणं।आर्तिक्यं कल्पितं भक्त्या गृहाण परमेश्व
री।दीपं।।अंनं चतुर्विधं नैवेद्यं।आचमनं।इदं फलमिति फलं।पूगीफलं महद्दिव्यमिति तांबूलं।हिरण्य
गर्भगर्भमिति दक्षिणां।।सावित्री च प्रसावित्री सततं ब्रह्मणः प्रिये।जगत्पूज्ये जगन्माते विधात्रि

वरदेनमः। सावित्रीत्वंविधाददीचत्तुर्वर्षश्च तायुषं। पतिंप्राप्तासिगुणिनंममदेवितथाकुरु॥ सावित्रीव
प्रसावित्रीसततंब्रह्मणःप्रिये। पूजितासिद्विजैःसर्वैःस्त्रीभिर्मुनिगणैस्तथा। त्रिसंध्यांदेविभूतानांवं
दनीयासिसुव्रते। मयादत्ताचपूज्यंजयंतंगृहाणनमोस्तुते। इतिपुष्पांजलिंदत्वाततोर्घ्यंदद्यात्॥ ॐ
कारपूर्वकेदेविसर्वदुःखनिवारिणि। देविमातर्नमस्तुभ्यमवैधव्यंप्रयच्छमे। इतिव्रतमहाभागेचांद्वि
जातेसुविस्मिते। दृढव्रतेदृढमतेभर्तुश्चप्रियवादिनि। अवैधव्यंचसौभाग्यंदेहित्वंममसुव्रते॥ पुत्रान्
पौत्रांश्चसौख्यंचगृहाणार्घ्यंनमोस्तुतेनमइत्यर्घ्यं। अथप्रार्थना॥ सावित्रीब्रह्मगायित्रीसर्वदाप्रि
यभाषिणी॥ तेनसत्येनमांपाहिदुःखसंसारसागरात्॥ त्वंगौरीत्वंशचीर्गौरीत्वंप्रभाचंद्रमंडले॥ त्व
मेवचजगन्मातात्वमुद्धरवरानने॥ यन्मयादुष्कृतंसर्वंकृतंजन्मशतैरपि॥ भस्मीभवतुतत्स
र्वंअवैधव्यंचदेहिमे। अवियोगोयथादेविसावित्र्यासहितस्तव॥ अवियोगस्तथास्माकंभूयाज्ज
न्मनिजन्मनीतिप्रार्थना॥ ॥इतिशं॥ ॥अथकथास्कांदे॥ ॥सनत्कुमारउवाच॥ कुळ २४०

स्त्रीणांव्रतंदेवमहाभाग्यंतथैवच।अवैधव्यकरंस्त्रीणांपुत्रपौत्रप्रदायकं। ईश्वरउवाच॥ आसीन्महीपतिर्धर्मा
श्व त्माज्ञानीपरमधार्मिकः।नाम्नाचाश्वपतिर्विप्रोवेदवेदांगपारगः।अनपत्योमहाबाहुःसर्वैश्वर्यसमन्वितः।सपत्नी
कस्तपस्तेपेसमाराधयतेन्नृपः।सावित्रीदशसावित्रीजपन्नास्तेमहामनाः।जुहोतिचैवसावित्रींजल्याप
रमयायुतः।ततस्तुष्टस्तुसादेवीसावित्रीद्विजसत्तम।सावित्रीविग्रहवतीतस्यदर्शनमागता।तांतुदृष्ट्वाजग
दृधांसावित्रींचनृपोत्तमः।प्रणिपत्यनृपोभक्त्याप्रहृष्टेनांतरात्मना।तंदृष्ट्वापतितंभूमौतुष्टादेवीजगादह॥
तुष्टाहंतवराजेंद्रवरंवरयसुव्रत।एवमुक्तस्तयाराजाप्रसन्नांतामुवाचह।अनपत्योस्म्यहंदेविपुत्रमिच्छा
मिशोभने।नान्यंवृणोमिसावित्रीपुत्रमेकंजगन्मये।अन्यदस्तिसमग्रंमेक्षितौयच्चापिदुर्लभं।प्रसाद
त्तवदेवेशितत्सर्वंविद्यतेगृहे।एवमुक्तातुसादेवीप्रत्युवाचनराधिपं।पुत्रस्तेनास्तिराजेंद्रकन्यैकातेभ
विष्यति।कुलद्वयंतुसाराजन्नुद्धरिष्यतिभामिनी।मन्नाम्नाराजशार्दूलतस्यानामभविष्यति।इत्यु
क्त्वातंमुनिश्रेष्ठराजानंब्रह्मणःप्रिया।अंतर्धानंगतादेवीसंतुष्टःसोमहीपतिः।ततःकतिपयाहस्यत्त

स्यराज्ञीमहीभुजः।ससत्वासमभज्जायेतपूर्णेकालेसुषावच।सावित्र्यातुष्टयादत्तासावित्र्याजप्तयातथा॥
सावित्रीतिनवरदा।तस्यानामबभूवह।साजज्ञेदेवगर्भाभांकन्यांकमललोचनां।ववृधेतुमुनिश्रेष्ठचंद्रोर
खेवचांबरे।सावित्रीब्रह्मणोवैसाश्रीरिवायतलोचना।तांदृष्ट्वाहेमगर्भाभांराजा।चिंतामुपेयिवान्॥अ
याच्यमानांवरैरूपेणाप्रतिमांभुवि॥तस्यारूपेणतेसर्वेसंनिरुद्धामहीभुजः।ततःसराजाचाहूयसुवा
न चकमलेक्षणां।पुत्रिप्रदानेकालस्तेनचयाचंतिकेचन।स्वयंवरंत्वहृद्यंतेपतिंगुणसमन्वितं॥मनोह्
ल्हादानकरंशीलेनाभिकुलेनच।इत्युक्तातांसराजेंद्रोवृद्धामात्यैःसहैवतां॥वस्त्रालंकारसहितां
धनरत्नैःसमन्वितां।विसृज्यचक्षणंतत्रयावत्तिष्ठतिभूमिपः।तावत्तत्रसमागच्छन्नारदोभगवानृषिः॥
संपूज्यचततोराजाअर्घ्यपाद्येनतंमुनिं।आसनेनसुखासीनंपूजितस्तेनभूभुजा॥पूजयित्वामुनिंरा
जाप्रोवाचेदंद्विजोत्तमं।पावितोहत्वयाविप्रदर्शनेनाद्यनारद॥यावदेवंवदेद्राजातावत्साकमलेक्षणा
आश्रमादागतादेवीवृद्धामात्यैःसमन्विता।अभिवाद्यपितुःपादौवंदेसाचमुनिंततः।नारदेनतुदृष्टा २४१
वै

सादृष्ट्वा प्रोवाच नृपमिदं। कन्येयं देवगर्भा सा किमर्थं न प्रयच्छसि। वराय त्वं महाबाहो वरयोग्यापि सुंदरी। एवमु
क्तस्तदा तेन मुनिना नृपसत्तमः। उवाच तं मुनिं वाक्यमनेनार्थेन प्रेषिता। आगतेयं विशालाक्षी मया त्वं प्रेषि
तासती।। अनया च वृतो भर्ता पृच्छ त्वं मुनिसत्तम। सा पृष्टा तेन मुनिना तस्मै वाचष्ट भामिनी। आश्रमे सत्यवान्ना
म द्युम्नसेनसुतो मुने। भर्ता त्वे मनसा विप्र वृतो सौ राजनंदनः। नारद उवाच।। कष्टं कृतं महाराज दुहित्रा तव
सुव्रत। अजानत्या वृतो भर्ता गुणवानिति विश्रुतः। सत्यं वदत्यस्य पिता माता चित्राश्वस्तेन चोच्यते।। रूपवान्
गुणवांश्चैव सर्वशास्त्रविशारदः। न तस्य सदृशो लोके विद्यते चेह मानवः। सर्वैर्गुणैः स्वयं पूर्णो रत्नैरिव म
हार्णवः। एको दोषो महानासीद्गुणानाहृत्य तिष्ठति। संवत्सरेण क्षीणायुर्देहत्यागं करिष्यति।। ।अश्व
पतिरुवाच।। अन्यं वरय भद्रं ते वरं सावित्रि गम्यतां। विवाहस्य तु कालोयं वर्तते शुभलोचने। सावित्र्युवाच
नान्यमिच्छाम्यहं तात मनसापि वरं प्रभो। यो मया च वृतो भर्ता स मे मान्यो भविष्यति।। विचिंत्य मनसा पू
र्वं वा संपश्चात्समुच्चरेत्।। क्रियते च ततः पश्चाच्छुभं वा यदि वाशुभं।। तस्मान्मनः पुमांसं च कथं चान्यं वृणोम्य

हे।सकृज्जल्पंति राजानः सकृज्जल्पंति पंडिताः। सकृत्कन्या प्रदीयंते त्रीण्येतानि सकृत्सकृत्।पतिंम
ब्र त्वा नमे बुधिर्विक्लवेऽसि कथंचन। सगुणो निर्गुणो वापि मूर्खः पंडित एव च। दीर्घायुरथवाल्पायुः सवै भर्त्ता मम
प्रभो। नान्यं वृणोमि भर्तारं यदि वा स्याच्छचीपतिः। इति मत्वा मया तात यत्कर्तव्यं त्वया स्वेन च॥ ॥नारद
उवाच॥ स्थिराबुधिश्च राजेंद्र सावित्र्याः सत्यवान्प्रति॥ वरयस्व विवाहाय भर्त्ता सह कुर्वे त्विमं॥ ईश्वरउ सौ
वाच॥ निश्चितां तु मतिं ज्ञात्वा स्थिरा बुधिश्च निश्चला। सावित्र्याश्च महाराजो प्रतस्थे सो वनं प्रति। गृहीत्वा
तु वनं राजा द्युम्नसेनस्य संनिधौ। सत्यानुगो महाराजो वृधामात्यैः समन्वितः॥ नारदस्तु ततो देवस्त्वत्रै
वांतरधीयत। सगत्वा राजर्गाईलो द्युम्नसेनवनागतः। दृष्ट्वा चांधश्च राजासौ वृक्षमूलमथाश्रितः। सर्वो चा
जा श्वपति राजासौ पादौ जग्राह वीर्यवान्। स्वनाम च समुच्चार्य तस्थौ तस्य समीपतः॥ उवाच राजा तं भूपं किमाग
मनकारणं। पूजयित्वार्घ्यदानेन वन्यमूलफलैश्च सः। ततः पप्रच्छ कुशलं स राजा मुनिसत्तम॥ अश्वपति
रुवाच॥ कुशलं दर्शनेनाद्य तव राजन्ममाधवे॥ दुहिता नाम सावित्री तव पुत्रमभीप्सति॥ भर्त्तारं राज २४२

दूलभाप्नोतिय मनिंदिता। ममेदंकांक्षितं पूर्वं भर्तारमनयाविभो। आवयोश्चैव संबंधो भवेत्तद्य ममेप्सितः।
द्युम्नसेन उ०। भ्रष्टश्चांधश्च राजेंद्र फलमूलाशनो नृप। राज्यान्नश्च्युतश्च मे पुत्रो वन्ये नाद्य वजीवति। साक
थं सहते दुःखं दुहिता तव कानने। अनभिज्ञा वदुःखानामित्यहं नाभिकांक्षे॥ अश्वपति०। अनयाचा ये
क्तो भर्ता जानं त्या राजसत्तम। अनेन सह मंसंस्ते तव पुत्रेण मानद। स्वर्गतुल्यो महाराज भविष्यति न सं
शयः॥ एवमुक्तस्तदा तेन राज्ञा राजर्षिसत्तमः॥ तथेति सप्रतिज्ञाय चकारोद्वाहमुत्तमं॥ कृत्वा विवाहं राजेंद्र
संपूज्य विविधैर्धनैः॥ अभिवाद्य द्युमत्सेनं जगाम नगरं प्रति। सावित्री तु पतिं लब्ध्वा इंद्रं प्राप्य शचीय
यथा। सत्यवानपि ब्रह्मर्षे तया पत्न्याभिनंदितः। क्रीडते तद्वनोद्देशे पौलोम्या माधवानिव॥ नारदस्य च
तद्वाक्यं हृदये न मनस्विनी॥ वहंती नियमं चक्रे व्रतस्यास्य च भामिनी। गणयंती दिनान्येव वनस्थे भर्तोषमु
त्तमं॥ ज्ञात्वा तद्दिवसं विप्र भर्तुर्मरणकारणं। अत्रांतरे च नियमं त्रिदिनस्य मनस्विनी। अस्मिन्दिने च
मर्तव्यं तदा सत्यवता मुने। कुठारं संपरिगृह्यापी ब्रकं चैव सुव्रत॥ प्रतस्थितं वनायैव सावित्री वाक्यम

ब्रवीत्॥ नगंतव्यंवनंत्वयाममवाक्येनमानद। अथवागम्यतेसाधोमयासहवनंव्रज। संवत्सरंव्रतसंपूर्णआश्रम
स्मिन्ममप्रभो। तद्वनंद्रष्टुमिच्छामिप्रसीदंकुरुमेप्रभो। सत्यवानुवाच॥ नाहंस्वतंत्रःसुश्रोणिपृच्छस्वपितरौम त्मा
म॥ ताभ्यांप्रस्थापितागच्छमयासहसुविस्मिता। एवमुक्तातदातेनभर्त्रासाकमलेक्षणा। श्वश्रूश्वशुरयोः
पादौअभिवाद्यतमब्रवीत्। वनंद्रष्टुंसमिच्छेयंआज्ञांमह्यंप्रदीयतां। उवाचवचनंसाध्वीवरमेवंप्रयच्छय॥
प सध भर्त्रासहवनंगंतुंततस्त्यमेमनः। तस्यास्तद्वचनंश्रुत्वाद्युम्नसेनोब्रवीदिदं। व्रतेकृतंत्वयाभद्रेपारणांकुरुसु
व्रते। पारणांतेभीरुततोगंतुंचार्थत्वमर्हसि॥ सावित्र्युवाच॥ नियमश्चकृतोस्माकंरात्रौचंद्रोदयेसति॥
जातेमयाप्रकर्तव्यंभोजनंतातमेशृणु। वनदर्शनकामास्तिभर्त्रासहममाद्यवै। नमेतत्रभवेद्ग्लानिर्भर्त्रास
हनराधिप। इत्युक्तस्तुतदाराजाद्युम्नसेनोमहीपतिः। यत्तेभिलषितंपुत्रीतत्कुरुष्वसुमध्यमे॥ नमस्कृ
नि त्वातुसावित्रीश्वश्रूश्वशुरयोरपि। सहितातेनकुशार्दूलतेनसत्यवताविभो। अवलोकयंतीभर्तारंतंच
कालंमनस्विनी। वनंचफलितंदृष्ट्वापुष्पितंद्रुमसंकुलं। द्रुमाणांचैवनामानिमृगाणांचैवभामिनी।पश्यं २४२

तिम्रगयूथानि हृदयेन प्रवेपती। तत्र गत्वा सत्यवान्वै फलान्यादाय सत्वरं। काष्ठानि च समादाय बबंधे भारकं ततः॥
पिटकं [redacted] पूरयामास कृत्वा वृक्षावलोकनं। कृतवृक्षस्य सास[illegible]ीउपवीष्टा महसती। काष्ठान्पातयतस्तस्य जाता
शिरसि वेदना। ग्लानिश्च महती जाता गात्राणां वेपथुस्तदा॥ आगत्य वृक्षसामीप्यं सावित्रीमिदमब्रवीत्। ग्ला
निश्च महती जाता शिरसश्चापि वेदना। कंटकैर्भिद्यते सद्रे शिरो मे शूलसंयुतं। उत्संगे तव सुश्रोणि स्वप्तु
मिच्छामि सुव्रते। अभिज्ञा सत्ते विशालाक्षी तस्य मृत्यो मनस्विनी। प्राप्त काल मन्यमाना तस्मै तत्रैव
भामिनि। सत्यवानपि सुप्तस्तु कृत्वोत्संगे शिरस्तथा॥ तावत्तत्र समागच्छत्पुरुषः कृष्णपिंगलः। जाज्वल्य
मानो वपुषा ददृशे च यशस्विनि। उवाच वाक्यं वाक्यज्ञः कर्त्ता लोके भयंकरः। क्षीणायुस्तु वरारोहे भर्त्ता तव
मनस्विनी। विना केनापि निर्मातुं शक्यस्त्वदंतिकात्त्वद् विदुर्विषहं तेजः सोढुं शक्यं न ते शुभे। इति ज्ञात्वा
महाभागे स्वयमागमनं मम। इत्युक्त्वा तां वरारोहां तस्य देहान्महात्मनः। अंगुष्ठमात्रं पुरुषं बध्वा पाशेन
सुस्थिरं। निचकर्ष ततो वेगात् गृहीत्वा प्रास्थितः पुरीं॥ सावित्री तु ततः पश्चादनुयाति स्म तं पतिं॥ यमउवा०

निवर्त्तस्वमहाभागेत्वंदूरंसमुपागता।। गत्वास्वभवनंशीघ्रंकुरुचैवौर्ध्वदेहिकं।। एवमुक्तातुसातेनप्रत्युवा
चयमंतदा। नश्रमोनैवचग्लानिंसकाशेतवमानद।। विशेषतश्चभर्तुर्मेकुतोग्लानिःसुरेश्वर। धर्मेणात्वंपा
लयसेधर्मेणात्वंविवर्धसे। नाफलंदर्शनंदेवसतामुक्तंकदाचन। आकुःसप्तपदींमैत्रीमितिवेदविदोवि
दुः।। ईश्वरउवाच।। संतुष्टस्तेनवाक्येनधर्मराजोयमस्तदा। वराणामीश्वरोदातावरंतस्यैदिदेशह।।
सापश्चादात्मनःपुत्रान्पितुःपुत्रशतंतथा। चक्षुःप्राप्तिंवसावव्रेश्वश्रूश्वशुरयोस्तदा। राज्यप्राप्तिंतथाभ्र
ष्टांवृत्तिंचतथाविभोः। भर्तुःकमलपत्राक्षीनिवृत्तासासुमध्यमा। प्रदक्षिणांततःकृत्वाधर्मराजायसु
व्रता। तथेत्युक्त्वाधर्मराजोजगामचस्वमालयं।। सागत्वावटसामीप्यंकृत्वोत्संगेशिरस्ततः। प्रबुद्धस्तु
ततोब्रह्मन्सत्यवानिदमब्रवीत्। मयास्वप्नंवरारोहेदृष्टमद्यैवभामिनी। तत्सर्वंकथितंतस्यायच्छ्रुतं
सर्वमेवतत्।। तयाचकथितंसर्वंसंवादंचयमेनहि। अस्तंगतेततःसूर्येद्युमत्सेनोमहीपतिः।। पुत्रस्या
मनेकाक्षीइतश्चेतश्चधावति। आश्रमादाश्रमंगच्छन्पुत्रदर्शनकांक्षया।। आवयोरंधयोर्यष्टिःक्वगतोसि २४५

वनाश्रमोः। एवंसविविधंक्रोशन्सपत्नीकोमहीपतिः। चकारदुःखतप्तः सन्पुत्रपुत्रेतिवासकृत्॥ अकस्माद्देव
राजेंद्रोलब्धचक्षुर्महेश्वरः। तंदृष्ट्वापरमाश्चर्यंचक्षुःप्राप्तिंद्विजोत्तम। सोत्वंपूर्वंतदावाक्यमब्रुवंस्तेतापसाः
[illegible]॥ चक्षुःप्राप्यामहींराजस्त्वंचितंतेमहामते। पुत्रेणचसमंयोगंप्राप्स्यतेनृपसत्तम॥ ईश्वरउवाच॥
यावदेवंवदंत्येतेतापसाद्विजसत्तम॥ सावित्रीसहितःप्राप्तःसत्यवान्द्विजसत्तमः। नमस्कृत्यद्विजान्सर्वान्
तरंपितरंततः॥ सावित्रीचततोब्रह्मन्ववंदेचरणाविति। श्वश्रूश्वशुरयोर्ब्रह्मन्सावित्रीकमलेक्षणा॥ मुन
यऊचुः॥ किंतुसावित्रिजानासिकारणंवरवर्णिनि। वृद्धस्यचक्षुषःप्राप्तेश्वशुरस्यवरानने॥ ॥सावित्र्यु
वाच। नजानामिमुनिश्रेष्ठचक्षुषःप्राप्तिकारणं। चिरंसुप्तस्तुमेभर्तातेनकालव्यतिक्रमः॥ ॥सत्यवा
नुवाच॥ अस्याःप्रभावात्संजातंनदृश्यंयत्रकारणं। तत्सर्वंविद्यतेविप्राःसावित्र्यास्तपसःफलं॥ व्रतस्यैवतु
माहात्म्यंदृष्टमेतन्मयाधुना॥ ॥ईश्वरउवाच॥ एवंतुवदतस्तस्यतदासत्यवतःप्रभो। पौराःसमागतास्त
स्यआचख्युर्नृपतिर्हतः। येनराज्यंबलाद्राजन्हृतंक्रूरेणमंत्रिणा॥ अमात्येनहतःसोपिइतिपौराः

समागताः। पौराऊचुः॥ उत्तिष्ठराजशार्दूलस्वराज्यंपालयप्रभो। अभिषिंचस्वराजेंद्रपुरेमंत्रिपुरोहि
तैः॥ ईश्वरउवाच॥ सगत्वाराजशार्दूलस्स्वपुरंजनसंवृतः॥ पितृपैतामहंराज्यंसंप्राप्तंचमहात्मना। सावि
त्रीसत्यवांश्चैवपरांमुदमवापह॥ जनयामासपुत्राणांशतंवैबाङ्गशालिनी॥ ॥व्रतस्यैवतुमाहात्म्यात्तस्याः
पितुरजायत। पुत्राणांचशतंब्रह्मन्प्रसन्नाद्यमात्तथा॥ एतत्तेकथितंसर्वंव्रतमाहात्म्यमुत्तमं। क्षीणा
युर्जीवितोभर्ताव्रतस्यास्यप्रभावतः॥ कर्तव्यंसर्वनारीणामवैधव्यफलप्रदं॥ सनत्कुमारउवाच॥ वि
धानब्रूहिदेवेशव्रतस्यास्यवच्यंक। क्रियतेविधिनायेनस्त्रीणांपुरनिषूदन॥ ॥ईश्वरउवाच॥ चर्वैकंनि
यमंकृत्वाएकभक्तेनमानदानक्तोहारेणवाविप्रशुक्लंप्राप्यद्विजर्षभ। त्रिदिनंतुलंघयित्वाचतुर्थेदिवसे
शुभे। वस्त्रायार्घ्यंप्रदद्याद्वपूजयित्वासुवासिनी॥ सावित्रींचप्रसावित्रींगंधधूपनिवेदनैः। मिथुनानियथाश
क्त्याभोजयित्वायथासुखं। भोज्येहंतुजगधात्रीनिर्विघ्नंकुरुमेशुभे॥ दिनंप्रतिदिनंश्रेष्ठकुर्यान्ययाध
सेवनं। कृत्वावंशमयेपात्रेवालुकाप्रस्थमेवच॥ सप्तधान्यभृतंपात्रंप्रस्थैकेनद्विजोत्तम। कारयेन्मुनि
शार्दूलवस्त्रयुग्मेनवेष्टयेत्॥ तस्योपरिन्यसेद्देवींसावित्रींब्रह्मणासह॥ सावित्रीसत्यवांश्चैवकार्येरौप्य २५२

मयाशुभे॥ पीठकं च कुठारं च कृत्वा रोप्यमयं द्विज। फलैः कालोद्भवै देवीं पूजयेद्ब्रह्मणः प्रियां॥ हरिद्रारंजि
तैश्चैव कंठसूत्रैः समर्चयेत्॥ सखीनां कंठसूत्राणि त्रिदिनं प्रतिपादयेत्॥ पक्वान्नानि च देयानि त्वेभिर्म
वद्द्विजोत्तम। माहात्म्यं चैव सावित्र्याः श्रोतव्यं मुनिसत्तम। पुराणश्रवणं कार्यं सतीनां चरितं विप्र। पूजयेन्नि
त्यमेवेह मंत्रेणानेन सुव्रत॥ सावित्री च प्रसावित्री सततं ब्रह्मणः प्रिया। पूज्यसे हयसे देवि द्विजैर्मुनिगणैः
सदा। त्रिसंध्यं देवि भक्तानां वंदिता त्वं जगन्मये॥ मया दत्ता च पूजेयं प्रतिगृह्य नमोस्तु ते॥ न
मः सावित्रीपादेभ्य इति पूर्वं कल्पजनं॥ सावित्री प्रसावित्री द्विस्वाभूतासि शोभने॥ जगत्त्रयास्थिता देवि
त्रिसंध्या च तथानघे॥ कृते देवि त्रिलोके च त्रेतायां त्वं महेश्वरि॥ व्यापितं सकलं लोकं अतो मां पाहि
सर्वदा॥ रूपं देहि यशो देहि सौभाग्यं देहि मे शुभे। पुत्रान्देहि धनं देहि सर्वजन्मसु सर्वदा॥ यथा ते
न वियोगस्तु भर्त्रा हि सुरेश्वरि॥ तथा मे सु महाभाग कुरु त्वं जन्मजन्मनि॥ एवं संपूजयेद्देवीं कमला
सनसंस्थितां॥ एवं दिनत्रयं नीत्वा चतुर्थेहनि सत्तम। मिथुनानि च संभोज्य षोडशौ वद्द्विजोत्तम॥ पूज

येद्वस्त्रदानैश्च भूषणैश्च द्विजोत्तम॥ अर्चयित्वा तथाचार्यं सपत्नीकं सुसंमतं॥ तस्मै संकल्पितं सर्वं हेमसा
वित्रीसंयुतं॥ मंत्रेणानेन दातव्यं द्विजमुख्याय सुव्रतं॥ सावित्रीकल्पविदुषे प्रणिपत्य तथा मुने॥ सावित्री ज
गतां माता सावित्री जगतः पिता॥ मया दत्ता च सा सावित्री ब्राह्मणाय प्रतिगृह्यतां॥ अवैधव्यं च मे नित्यं यावज्ज
न्मनि जन्मनि॥ मृता च वसते लोके ब्रह्मणः पतिना सह॥ तत्रैव च चिरं कालं भुंजन्भोगाननुत्तमान्॥ अ
नेनैव विधानेन कर्तव्यं व्रतमुत्तमं॥ सर्वान्मनोरथान्प्राप्य अंते रुद्रोपजायते॥ इति स्कांदे सावित्रीव्रतं॥
अथाब्दसाध्यं हेमाद्रौ स्कांदे धर्मराजवरदानानंतरं सावित्र्युवाच॥ याम दीयं व्रतं देव भक्त्या नारी
करिष्यति॥ भर्तुः सा सहिता साध्वी समस्तसुखभाजनं॥ धर्मराज उवाच॥ नारी वा विधवा वापि अ
पुत्रा पतिवर्जिता॥ सभर्तृका सपुत्रा वा कार्यं व्रतमिदं शुभं॥ ज्येष्ठमासे तु संप्राप्ते पौर्णमास्यां पतिव्र
ता॥ स्नात्वा चैव शुचिर्भूत्वा वटं सिंचेद्बहूदकैः॥ सूत्रेण वेष्टयेद्भक्त्या गंधपुष्पाक्षतैः शुभैः॥ नमो वै
वस्वतायेति भ्रामयंती प्रदक्षिणं॥ रात्रौ कुर्वीत नक्तं च अब्दमेकं समाहिता॥ तथैव वटवृक्षं च पक्षे २४९

पसे प्रपूजयेत्॥ संप्राप्ते तु पुनर्ज्येष्ठे लघुभुक् द्वादशीं नयेत्॥ दंतानां धावनं कृत्वा नियमं कारयेत्ततः॥ त्रिरात्रं लं
घ्यं घयित्वा च चतुर्थे दिवसे त्वहं॥ चंद्रायार्घं प्रदत्वा च पूजयित्वा शुभां सतीं॥ मिष्टान्नानि यथाशक्त्या भोजयि सवा
द्विजोत्तमान्॥ मोक्षहेतु जगद्धात्री निर्विघ्नं कुरु मे शुभे॥ नियममंत्रः॥ कृत्वा वंशमये पात्रे वालुकाप्रस्थमेव च॥
सप्तधान्ययुतं पात्रं प्रस्थेकेन द्विजोत्तम॥ वस्त्र धोपरि संस्थाप्य सावित्रीं ब्रह्मणा सह॥ हैमीं कृत्वा तयोः प्रीत्यै
त्रिरात्रमुपवासतः॥ न्यग्रोधस्य तले तिष्ठेद्यावच्चैव दिनत्रयं॥ सौवर्णीं चैव सावित्रीं सत्येन सह कारयेत्॥
रौप्य पर्यंकमारोप्य रथोपरि निवेशयेत्॥ पश्चाद्दूर्ध्वं यथाशक्त्या रथं रौप्यमयं शुभं॥ काष्ठभारं कुठारं
च वंशैश्चैव सुविस्तृतं॥ एवं च मिथुनं कृत्वा पूजयेत्तु तमत्सरः॥ वर्तुलं मंडलं कार्यं गोमयेन तपोधन॥ पंचामृ
तेन स्नपनं गंधपुष्पादिकेन च॥ चंदनागरुकर्पूरैर्माल्यवस्त्रविभूषणैः॥ नमः सावित्र्यै पादौ तु प्रसावि
त्रै च जानुनी॥ कटिं कमलपत्राक्ष्यै उदरं व्रतधारिणी॥ ॐ गायत्र्यै नमः कंठे शिरसि ब्रह्मणः प्रिये॥
अथ ब्रह्मसत्यव्रतो पादौ धात्रे नमः॥ हृद्या हरु ज्येष्ठाय वै नमः॥ परमेष्ठी च मेढ्रं च अग्निरूपाय वै कटिं॥ वध

धसेचोदरंपूज्यंपद्मनाभायवैहृदि। कंठंतुवेधसंपूज्य मुखं हिरण्यगर्भते॥ ब्रह्मणेवैशिरःपूज्यंसर्वांगंवि
ष्णवेनमः। आयचर्चैवंक्रमेणैव शास्त्रोक्तविधिनाशुभां॥ ततोरजतपात्रेण अर्घ्यं दद्याद्द्वयोरपि॥ अथार्घ्यं
ओंकारपूर्वके देवि वीणापुस्तकधारिणी॥ वेदमातर्नमस्तेस्तु वैधव्यंमयक्षमे॥ पतिव्रते महाभागे वन्हि
जातेशुचिस्मिते॥ दृढव्रते दृढमते भर्तुश्चप्रियवादिनि। अवैधव्यंचसौभाग्यं देहित्वंममसुव्रते॥ पुत्रान्
पौत्रांश्चसौख्यं च गृहाणार्घ्यं नमोनमः। अथ ब्रह्मसत्यवतोरर्घ्यमंत्रः। त्वयाधृतंजगत्सर्वं सदेवासु
रमानुषं। सत्यव्रतेधरोदेव ब्रह्मरूप नमोस्तुते॥ अथयमायार्घ्यं॥ त्वंकर्मसाक्षी लोकानांशुभाशुभ
विवेककृत्॥ वैवस्वत गृहाणार्घ्यं धर्मराज नमोस्तुते॥ धर्मराजः पितृपतिः साक्षी धर्मेषु जंतुषु॥ कालरूपगृ
हाणार्घ्यंमवैधव्यंचदेहिमे॥ गंधपुष्पैश्च नैवेद्यैः फलैः कुसुमदीपकैः। रक्तवस्त्रैरलंकारैः पूजयेद्भक्तिम
त्परा॥ अथसावित्रीप्रार्थना। सावित्रीब्रह्मगायत्री सर्वदाप्रियभाषिणी॥ तेनसत्येनमांपाहिदुःखसं
सारसागरात्॥ त्वंगौरीत्वंशचीलक्ष्मीस्त्वंप्रभा चंद्रमंडले॥ त्वमेवचजगन्माता त्वमुद्धरवरानने॥ २४७

सौभाग्यं कुरु दीर्घं च देवि त्वं मम सुव्रते॥ यन्मया दुष्कृतं सर्वं कृतं जन्मशतैरपि॥ भस्मीभवतु तत्सर्वं अवैधव्यं च
देहि मे॥ अथ यमसत्यव्रतोः प्रार्थना॥ अवियोगो यथा देव सावित्र्या सहितस्तव॥ अवियोगस्तथास्माकं भूयाज
न्मनि जन्मनि॥ यमप्रार्थना॥ कर्मसाक्षी जगत्पूज्य सर्वं च प्रसीद मे॥ संवत्सर व्रतं सर्वं परिपूर्णं तदस्तु मे।
सावित्री त्वं यथा देवि चतुर्वर्षशतायुषं॥ पतिं प्राप्तासि गुणिनं मम देवि तथा कुरु॥ सावित्री च प्रसावित्री स
तंत ब्रह्मणः प्रिया। पूजिता सिद्धिजैः सर्वैस्त्रिभिर्मुनिगणैस्तथा। त्रिसंध्यां देवि भक्तानां वंदनीयासि सुव्रते॥
मया दत्तान् पूजेयं तां गृहाण नमोस्तु ते॥ जागरं तत्र कुर्वीत गीतनृत्यादिमंगलैः। सुवासिन्यस्ततः पूज्या
दिवसे द्वितीये संगते॥ सिंदूरं कुंकुमं चैव तांबूलं वस्त्रयुगकं॥ तथा दद्याच्च द्रूपापि भक्ष्यं सौभाग्य
मष्टकं॥ सौभाग्याष्टकं परिभाषायामुक्तं॥ सा तिष्ठेच्च दिवारात्रौ कामक्रोधविवर्जिता। दिनत्रयेपि
कर्त्तव्यमेवमर्घ्यादिपूजनं॥ ततश्चतुर्थे दिवसे यत्कार्यं तच्छृणुष्व मे॥ मिथुनानि चतुर्विंशाः षोडशाथवा
दशाष्टकं॥ पूजयेद्वस्त्रगोदानैर्भूषणाच्छादनासनैः। आचार्यं च ततः पश्चाद् व्रतस्य विधिकारकं॥ स

र्वलक्षणासंपन्नं सर्वशास्त्रार्थपारगं ॥ वेदविद्याकृतस्नानं शांतं तु विजितेंद्रियं ॥ सपत्नीकं समभ्यर्च्य व
स्त्रालंकारकुंडलैः ॥ शय्यां सोपस्करीं दद्याद्गृहं चैवातिशोभनं ॥ अशक्तस्तु यथाशक्त्या स्तोकं स्तोकं प्रक
ल्पयेत् ॥ सौवर्णीं प्रतिमां पुत्रपतिनासह दापयेत् ॥ दानमंत्रः ॥ सावित्री त्वं यथा देवि चतुर्वर्षशतायुषं ॥ स
त्यवंतं पतिं लब्ध्वा मया दत्ता तथा कुरु ॥ सावित्री जगतां माता सावित्री जगतः पिता ॥ मया दत्ता च सावित्री ब्रह्म
णः प्रतिगृह्यतां ॥ प्रतिग्रहमंत्रः ॥ मया गृहीता सावित्री त्वया दत्ता सुशोभने ॥ यावच्चंद्रश्च सूर्यश्च सह भ
र्त्रा सुखी भव ॥ गुरुं च गुरुपत्नीं च ततता भक्त्या क्षमापयेत् ॥ यन्मया कृतवैकल्यं व्रतेस्मिंदुरधिष्ठितं ॥ सर्वं सं
पूर्णतां यातु युवयोरर्चनेन तु ॥ धर्मराजो यमो धाता निर्लिः कालीतकोव्ययः ॥ वैवस्वतश्चित्रगुप्तः दक्षसौम्य
त्युः क्षयावहः ॥ मासिमासि तथा स्वैते नर्मासिः सेचयेद्दृढं ॥ न्यग्रोधे हं वसे नित्यं तस्माद्यत्नेन सेच व्रो
येत् ॥ ततो गुरुं सपत्नीकं पूजयेद्व्रतविस्मया ॥ भूषणैश्च सुवस्त्रैश्च कुंकुमैश्च मनोहरैः ॥ न्यग्रोधस्य स २४८
मीपे तु गृहे वा स्थंडिले शुभे ॥ सावित्र्याश्चैव मंत्रेण घृतहोमं तु कारयेत् ॥ पायसं जुहुयाद्भक्त्या घ

तिन सहभामिनी॥ व्याहृत्याचैवमंत्रेण तिलव्रीहियवांस्तथा॥ होमांते दक्षिणां दद्याद्वित्तशाठ्यविवर्जितः॥
समापयेत्ततो विप्रं वंद्य पादौ प्रयत्नतः॥ भुंजीत वासरांते तु नक्तेशं तात पस्विनी॥ अर्घ्यं दद्यादरुंधत्यै दृष्ट्वा
चैव प्रणम्य च॥ अरुंधति नमस्तेस्तु वसिष्ठस्य प्रिये शुभे॥ सर्वदेवनमस्कार्ये पतिव्रते नमोस्तु ते॥ अर्घ्यमेतन्म
या दत्तं फलपुष्पसमन्वितं॥ पुत्रांदेहि सुखं देहि गृहाणार्घ्यं नमोस्तु ते॥ साखिभिर्ब्राह्मणैः सार्द्धं भुंजीत वि
जितेंद्रिया। एवं करोति या नारी व्रतमेतदनुत्तमं॥ भ्रातरः पितरो पुत्राः श्वशुरो स्वजनस्तथा॥ चिरायुषः
स्तथारोग्यास्सुखश्च जन्मशतत्रयं॥ भर्त्रा च सहिता साध्वी ब्रह्मलोके महीयते॥ ।इति व्रतार्के स्कांदे से
द्यापनं सावित्रीव्रतं॥ ॥आषाढपौर्णमास्यां गोपद्मव्रतं॥ तत्र पूजा॥ चतुर्भुजं महाकायं जांबूनद
समप्रभं॥ शंखचक्रगदापद्मरमागरुडशोभितं॥ सेवितं मुनिभिर्देवैर्यक्षगंधर्वकिंनरैः॥ एवंविधं
हरिं ध्यात्वा ततो यजनमारभेत्॥ ध्यानं॥ आवाहयामि देवेशं भक्तानामभयप्रदं॥ शंखचक्रगदाप
स्निग्धकोमलकेशं च मनसावाहयेद्धरिं॥ सहस्रशीर्षेत्यावाहनं॥ सुवर्णमणिभिर्दिव्यैः रचिते देव

निर्मितं॥ दिव्यसिंहासनेकृष्णउपविश्यप्रसीदमे॥ पुरुषएवेत्यासनं॥ पादोदकंसुरश्रेष्ठसुवर्णकलशेस्थि
तं॥ गंधपुष्पाक्षतैर्युक्तंपाद्यंमेगृह्यतांविभो॥ एतावानस्येतिपाद्यं॥ अष्टद्रव्यसमायुक्तंस्वर्णपात्रोदकंशुभं॥
शोभयंकरभक्तानांगृहाणाचमनीयकं॥ तस्माद्विरा० आचमनीयं। गंगागोदावरीचैवयमुनाचसरस्व
ती॥ नर्मदासिंधुकावेरीताभ्यस्नानार्थमाहृतं॥ यत्पुरुषेणेतिस्नानं॥ वस्त्रयुग्मंसमानीतंपट्टसूत्रेणनि
र्मितं। सुवर्णखचितंदिव्यंगृहाणत्वंसुरेश्वर॥ तंयज्ञंवस्त्रं। कार्पाससूत्रतंतुभिर्युक्तंब्रह्मणानिर्मितंपुरा॥ अ
नेकरत्नखचितंसुपवीतंगृहाणमे॥ तस्माद्यज्ञोपवीतं॥ चंदनंमलयोद्भूतंकस्तूर्यगरुसंयुतं। कर्पूरेण
चसंयुक्तंस्वीकुरुष्वानुलेपनं॥ तस्मा० गंधं॥ शतपत्रैःकर्णिकारैश्चंपकैर्मल्लिकादिभिः। तुलस्यासुक्तपु
ष्पाणिगृहाणपुरुषोत्तम॥ तस्माद्श्वा० पुष्पं॥ दशांगंगुग्गुलंधूपंसुगंधिंचमनोहरं॥ कृष्णावारसमायु
क्तंधूपंदेवगृहाणमे॥ यत्पुरुषंव्य० धूपं। आज्यंचवर्त्तिसंयुक्तंवह्निनायोजितंचयत्॥ दीपंगृहाणदेवेशत्रै
लोक्यतिमिरापहं। ब्राह्मणस्येतिदीपं॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं॥ भक्ष्यभोज्यसमायुक्तंनै

तःपूज्यपद्मसंख्यान्समुत्सृजेत्॥ प्रथमेद्धेथवटकैर्द्वितीयेपूपकैर्व्रती॥ तृतीयेशालिपिष्टान्नैश्चतुर्थेपू
रिकादिभिः। पंचमेपरमान्नैस्तुसम्यग्वैपूजयेद्व्रती॥ अत्रैवोदाहरंतीममितिहासंपुरातनं॥ ऋषीणांपृच्छ
मानानांसूतेनोक्तंमयाश्रुतं॥ ऋषयऊचुः॥ केनचादौपुराचीर्णमर्त्येकेनप्रकाशितं। कथमुद्याप
नंतस्यकिंफलंसूतकथ्यतां। सूतउवाच॥ पुराशक्रोमरावत्यांदेवदानवकिंनरैः। रुद्रैरादित्ययक्षाद्यै
र्गंधर्वैर्वसुभिःसह। रंभानृत्यंसमारंभेक्रीडालोभेनविह्वला॥ एवंनृत्येक्रियमाणेत्रुटितंमासिमंड
लं। क्षणमात्रंविचार्याथधर्मराजस्तमुक्तवान्। यमउवाच॥ जन्ममध्येव्रतंयैश्चनकृतंप्राणिभिःक्वचि
त्। तच्चर्मस्नायुभिःशक्रकर्तव्यंछादनंतयोः। नारदेनश्रुतंतत्रजगामयदुनंदनं॥ स्वर्चयित्वातुतंकृष्णो
वचनंवेदमब्रवीत्॥ ॥कृष्णउवाच॥ सर्वलोकज्ञदेवर्षेभुवनेषुचरन्सदा॥ तत्रजातंमहाश्चर्यं
कृतंमेसर्वसंसदि। तत्रसर्वेसमायाताःसुराइंद्राश्चतुर्दश॥ रुद्राएकादशविभुरादित्याद्वादशा
पिच। वसवोष्टौतथानागायक्षराक्षसपन्नगाः। रंभयाचसमारब्धंनृत्यंशक्रस्यपश्यतः॥ त्रुटितंच

र्मवाद्यानांमध्येवंशस्तस्यसाधनं। यमःप्रहितस्तथादूतान्सुभद्राह्यव्रतास्तिभो। तामानयध्वंतच्चर्मवाद्ययो
र्ज्यंसदात्विति। तच्छ्रुत्वातुमयाभीत्यासर्वंह्यपिनिवेदितं॥ सूतउवाच॥ इतिनारदवाक्यंतुश्रुत्वाकृष्णस्त्व
रान्वितः। सुभद्रयागृहंगत्वापूजितस्तामुवाचह॥ किंचिद्व्रतंत्वयाभद्रेकृतवानेतिसंशयं॥ सुभद्रोवाच॥ स
र्वव्रतानिभोकृष्णव्रतान्येवनसंशयः॥ नोचेत्वसहोदर्यंतस्यामर्जुनवल्लभा। पुत्रोभिमन्युश्चकथं
कथयस्वजगत्पते॥ कृष्णउवाच॥ तथापित्वंमहाभागेव्रतमेकंसमाचर। गोपद्मेतिचविख्यातंत्रिषुलोके
षुविश्रुतं। इतिकृष्णवचःश्रुत्वासुभद्रातत्तदाकरोत्॥ कृष्णोपदिष्टविधिनासत्वरंचसमापितं। सोद्याप
नेव्रतेपूर्णकालेयमभटाययुः। दूताऊचुः॥ सुभद्रेत्वंचदेहस्यचर्मार्थेत्वागतावयं। तच्चर्मसुरवाद्यार्थं
यमेनचप्रकल्पितं। इतिदूतवचःश्रुत्वासव्रतास्मीतिसाब्रवीत्॥ ततोभटासर्वएवददृशुःसादरास्तदा॥
पद्मानांनिचयंतस्यागृहेगांचसवत्सकां॥ स्थंडिलेहस्तमात्रेतुसुसमिद्धकृताशनं॥ कृष्णोपदिष्टं
वीक्ष्यैवभटाजग्मुर्ययातिकं॥ प्रापद्यतप्रभावेनसुभद्रापदमुच्यते॥ नारदउवाच॥ इतिसूतवचःश्रु

त्वाऽऽरभ्य यश्च क्रियेद्व्रतं॥ सन०॥ भो भो नारद देवर्षे सर्वज्ञानसुधानिधे॥ शीघ्रं ब्रूहि सखे मेद्य व्रतस्योद्या
पनेविधिं॥ नारद उ०॥ पूर्णे तु पंचमे वर्षे व्रतस्योद्यापनं भवेत्। श्रीविष्णोः प्रतिमा कार्या सुवर्णस्य पलेन वै
पुष्पमंडपिका कार्या चतुर्द्वारा सुशोभना। तन्मध्ये पूजयेद्भक्त्या रमया सहितं हरिं। त्रयस्त्रिंशत्ततो विप्रा
न्कृत्वा होमं समाचरेत्॥ अतो देवेति मंत्रेण जुहुयात्तिलपायसं। रक्तवस्त्रयुतां धेनुमाचार्याय निवेदये
त्॥ ब्राह्मणांश्च सपत्नीकान्भोजयेत्पूजयेत्तथा॥ एवं यः कुरुते विप्र तस्य श्रीरचला भवेत्। यं यं चिंत
यते कामं तं तं प्राप्नोत्यसंशयं। अंते विष्णुपदं गच्छेत्सर्वपापविवर्जितः॥ ॥इति नारदीये गोपद्मव्र
तं समाप्तं॥ ॥अत्र मूलं शिष्टाचार एव॥ ॥ अथाषाढपौर्णमास्यां कोकिलाव्रतं॥ आषाढस्या
धिमासत्वे लोकानुष्ठानं प्रमाणं तद्विधिः॥ आचम्य प्राणानायम्य मासपक्षाद्युल्लिख्य मम इहजन्मनि
सर्वपापक्षयपुत्रपौत्रलक्ष्मी अवैधव्य सपत्नीनाशसौभाग्यसिद्धिद्वारा कोकिलारूपगौरीप्रीत्यर्थं को
किलाव्रतं करिष्ये॥ इति संकल्प्य आषाढपौर्णमास्यां तु संध्याकाले ह्युपस्थिते। संकल्पयेन्मास
मेकं श्रावणे प्रत्यहं ह्यहं॥ स्नानं करिष्ये नियमाद्ब्रह्मचर्ये स्थिता सती। भोक्ष्यामि नक्तं भूशय्यां २५१

वेद्यं गृह्यतां हरे॥ चंद्रमा० नैवेद्यं। इदं फलं० पूगीफलं महद्दिव्यं० नाभ्या आसीत्० तांबूलं। हिरण्यगर्भ० सप्ता
सन्। दक्षिणा। यज्ञेन यज्ञं० पुष्पांजलिः। तत्र द्वर्षोक्तिः। वायणं। सुपक्वान्नमिदं विप्र गृहाण त्वं द्विजोत्तम। त्व
त्प्रसादादहं विप्र व्रतस्य फलमाप्नुयात्॥ प्रदक्षिणा। मंत्रहीनं प्रार्थना। अथ कथा॥ सूत उवाच॥ नाथे
कृत्वा हि पृच्छामि चतुर्वर्गफलप्रदं॥ सर्वरोगप्रशमनं विष्णुसारूप्यमुक्तिदं। नारीणामथ वा पुंसां भुक्ति
मुक्तिफलप्रदं॥ ब्रूहि चेदस्ति देवर्षे कृपां कृत्वा ममोपरि॥ नारद उवाच॥ भगवन्सर्वमाख्यास्ये
यत्पृष्टं विदुषा त्वया। गोपद्मकं व्रतं ह्येनं व्रतानां व्रतमुत्तमं॥ तद्व्रतं ब्रूहि मे ब्रह्मन्कथमुद्यापनं भवेत्॥
पुरेदं केन वा चीर्णं देवर्षे कथय व्रतं॥ नारद उवाच॥ आषाढकार्तिकावधि तत्तिथौ। तिलामलककल्के
न स्नानं नित्यं विधाय च॥ नदीतीरेथवा गोष्ठे शिवागारे गृहे गृहे॥ शुभे वृंदावने वापि लिखेद्गोपद्म
कं पदं॥ त्रयस्त्रिंशत्तु पद्मानि कुर्याद्भक्त्या दिने दिने॥ तत्संख्यया प्रकर्तव्या अर्घ्यप्रदक्षिणानतीः। बाल
कृष्णं समुद्दिश्य लक्ष्म्या सह जगद्गुरुं॥ गंधाद्यैरुपचारैस्तु यथाशक्त्या प्रपूजयेत्॥ ब्राह्मणं वत

करिष्ये प्राणिनां दया मित्युक्त्वा। स्नानं करोमि देवेशि कोकिले प्रीतये तव। जलेस्मिन्या वने पुण्ये सर्वदे
वजलाशये। इति मंत्रेण तिलामलकैः सर्वौषधि जलेन च वापिष्टेन वाष्टौ दिनानि प्रत्येकं। तिलामलक
पिष्टेन वचौ दधि पिष्टेन च षट् दिनान्येवं मासावधि स्नानं क्रमः। एवं स्नात्वा रविं ध्यात्वा तस्मै अर्घ्यं दद्या
त्। ततः आदित्य भास्कर रवे अर्क सूर्य दिवाकर। प्रभाकर नमस्तुभ्यं गृहाणार्घ्यं नमोस्तुते॥ इति र
व्यर्घ्यः। ततः स्वर्णपक्षां रौप्यपदां मौक्तिकनेत्रां प्रवालमुखां रत्नपृष्ठां चूतचंपकवृक्षस्थां पक्षिरूपि
णीं कोकिलां लिखित्वा पूजयेदित्युक्तं। स्वर्णपक्षां रत्ननेत्रां प्रवालमुखपंकजां॥ कस्तूरीवर्णसं
युक्तामुत्पन्नां नंदने वने॥ चूतचंपकवृक्षस्थां पुष्टस्वर समन्वितां। चिंतयेत्पार्वतीं देवीं कोकिलारू
पधारिणीं। ध्यानं॥ आवाहयामि त्वां देवी कोकिलारूपधारिणी। आगच्छ कोकिले देवि देहि मे वांछितं
फलं। चंपकद्रुममारूढा क्रीडसे नंदने वने॥ आवाहनं॥ आसनं क्षौमवस्त्रेण निर्मितं सन घेतवा गृहा
णेदं मया दत्तं कोकिले गृह्यतां नमः॥ आसनं॥ तिलस्नेहे तिलमुखे तिलसौख्ये तिलप्रिये॥ सौभा

ग्यंधनपुत्रांश्चदेहिमे कोकिले नमः। तिलपुष्पफलैर्युक्तंपाद्यंमेप्रतिगृह्यतां। पाद्यं। रक्तचंपकपुष्पैश्च
पीतचंदनसंयुतं। हेमपात्रस्थितंतोयंगृहाणार्घ्यंनमोस्तुते॥ अर्घ्यं॥ निर्मलंसलिलंगांगंकोकिलेप
क्षिरूपिणी॥ वसंतेचसुगंधेनगृहाणाचमनीयकं॥ आचमनं। पंचामृतेनस्नपनंकोकिले कलकंटके॥
मयादत्तेनपीतात्वंभवत्वं परमेश्वरी। पंचामृतं॥ मंदाकिनीजलंपुण्यंसर्वतीर्थसमन्वितं॥ स्नानार्थंते
मयादत्तंकोकिलेगृह्यतांनमः। स्नानं। यस्मात्कार्पाससूत्रेणवासांसिविविधानिच॥ पीतवस्त्रप्रदा
नेनप्रीताभवममांबिके॥ वस्त्रं॥ कंचुकंचमयादत्तंनानावर्णविचित्रितं। कोकिलेगृह्यतांदेविप्र
सीदपरमेश्वरी। कंचुकं। हरिद्रारंजितेदेवि कंठसूत्रसमर्पितं॥ कोकिलेसुभगेदेविवरदाभवमं
बिके। कंठसूत्रं॥ यानिरत्नानिसर्वाणि गंधर्वपुरगेषुच॥ तैर्युक्तंभूषणंहैमं कोकिलेप्रतिगृह्यतां॥
भूषणं। श्रीखंडंनंदनंदिव्यंमाल्याद्रिसमुद्भवं॥ विलेपनंसुरश्रेष्ठंगृह्यतांपरमेश्वरि॥ गंधं॥ अ
क्षताः॥ कुंकुमालक्तकंदिव्यंकामिनीभूषणास्पदं। सौभाग्यदंगृहाणेदंप्रसीदहरवल्लभे॥ कुंकुमादि॥ २५२
ज्ञातपत्रैर्जातिपुष्पैश्चंपकैर्मरुपत्रकैः॥ पाटलैश्चैवदूर्वाभिर्युक्तंपुष्पंगृहाणमे॥ पुष्पं॥ वनस्पतिर

जिलासितं कोकिले हरवल्लभे॥ कोकिले कलकंठासि माधवे मधुरस्वरे॥ वसंते वसते देवि गछ त्वं नंदनं वनं॥
विसर्जनं इति कोकिलाव्रतपूजा॥ ॥अथ कथा॥ युधिष्ठिर उवाच॥ ॥स्वभर्तृरतिसंबंधे महास्नेहो यथा
भवेत्॥ कुलस्त्रीणां तथा वक्ष्व व्रतं मम जगद्गुरो॥ ॥कृष्ण उवाच॥ यमुनायास्तटे पूर्वं मथुरास्ति पुरी शुभा॥
तस्यां शत्रुघ्ननामाभूद्राजा राघववंशजः॥ तस्य भार्या कीर्तिनामा नाम्नासीत्प्रथिता भुवि॥ तयाप्र
णम्य भगवान् वसिष्ठो मुनिसत्तमः। पृष्टः कथं मुनिश्रेष्ठ सौभाग्यमतुलं भवेत्॥ एवमुक्तस्तया ज्ञानी
वसिष्ठः कीर्तिमालया। ध्यात्वा मुहूर्तमाख्यौ कोकिलाव्रतमुत्तमं॥ ॥वसिष्ठ उवाच॥ आषाढ
पौर्णमास्यां तु संध्याकाले ह्युपस्थिते॥ संकल्पयेन्मासमेकं च श्रावणे प्रत्यहं गृहे॥ स्नानं करिष्ये नि
यता ब्रह्मचर्ये स्थिता सती। भोक्ष्यामि नक्तं भूशय्यां करिष्ये प्राणिनां दयां॥ इति संकल्प्य पुरुषो नारी
वा ब्राह्मणांतिके॥ प्राप्यानुज्ञां ततः प्राह्णे सर्वसामग्रिसंयुतः। पुरुषः प्रतिपत्काले दंतधावनपूर्वकं
स्नानं कुर्याद्व्रते पार्थ सुगंधामलकैस्तिलैः॥ दिनाष्टकं ततः पश्चात्सर्वौषध्या पुनः पुनः॥ वचया पि
ष्टया चाष्टौ दिनानि पृथगाचरेत्॥ स्नात्वा ध्यात्वा रविं संध्यां तर्पयित्वा पितॄंस्तथा। तर्पयित्वालि २५३

खे त्पिष्टैः कोकिलां पक्षिरूपिणीं। कलकं गंधशुभैः पुष्पैः पूजयेच्चंपकोद्भवैः। पत्रैर्वा धूपनैवेद्यैर्दीपालक्तकचं
दनैः। तिलतंडुलदूर्वाद्यैः पूजयेत्तां समापयेत्॥ नित्यं तिलप्रं व्रती भक्त्या मंत्रेणानेन पांडव॥ तिलस्नेहे
तिलमुखे तिलसौख्ये तिलप्रिये॥ सौभाग्य धन पुत्रांश्च देहि मे कोकिले नमः॥ इत्युच्चार्य ततः पश्चा
द्गृहमभ्येत्य संयुतः। कृताहारस्वपेत्पार्थ यावन्मासः समाप्यते॥ मासांते तांम्रपात्र्यां तु कोकिलां तिल
पिष्टजां। रत्ननेत्रां स्वर्णपक्षां ब्राह्मणाय निवेदयेत्॥ वस्त्रैर्गुडैस्तथायुक्तां श्रावण्यां कुलजाय च॥ श्वश्रू
श्वशुरवर्गे वा देवा लेबापुरोहिते। व्यासे वसं प्रदात व्याप्रति भिः शुभकांक्षया॥ तिलस्नेहे इति दानमंत्रः॥
एवं या कुरुते नारी कोकिलाव्रतमादरात्॥ सप्तजन्मनि सौभाग्यं सा प्राप्नोति सुविस्तरं। निःसपत्नं प
तिं भव्यं सस्नेहं प्राप्य भूतले। मृतो गौरीपुरं याति विमानेनार्कवर्चसा॥ एतद्व्रतं वसिष्ठेन मुनिना गदि
तं पुरा॥ तया चानुष्ठितं पार्थ समग्रं कीर्तिमालया॥ तस्याश्च सर्वसंपन्नं वसिष्ठवचनादिह॥ पुत्रसौभा
ग्यसत्कारं शत्रुघ्नस्य प्रसादजं॥ एवमन्यापि कौंतेय कोकिलाव्रतमादरात्॥ चरिष्यति व्रतं तस्या

सौभाग्यं न भविष्यति॥ ये कोकिलां कलरवां कलकंठपीठां यच्छंति साज्यतिलपिष्टमयीं द्विजेभ्यः॥ तेनं
दनादिषु वनेषु विहृत्य कामं मर्त्यैः समेत्य मधुरध्वनयो भवंति॥ ॥इति हि माद्रो भविष्योत्तरे कोकिल
व्रतं॥ ॥अथापरमाषाढाधिमासे गुर्जराचारप्राप्तं कोकिलाव्रतं॥ ॥युधिष्ठिर उवाच॥ स्वभर्त्रा
सह संयोगस्नेहसौभाग्यमेव च॥ भवेद्यथा कुलस्त्रीणां तद्व्रतं ब्रूहि केशव॥ श्रीकृष्ण उवाच॥ यमुनाया
स्तटे रम्ये मथुरा नगरी शुभा। तस्यां शत्रुघ्ननामाभूद्राजा राघवनंदनः॥ तस्य भार्या कीर्त्तिमाला नाम्ना
सीत्प्रथिता भुवि॥ प्रणम्य भगवान् पृष्टो वसिष्ठो मुनिसत्तमः॥ कीर्तिमालोवाच॥ वद मे त्वं मुनिश्रेष्ठ
सौभाग्यप्राप्तिदं व्रतं॥ पूज्यः कथं च भगवान् शिवः केन व्रतेन च॥ वसिष्ठ उवाच॥ यदि पृच्छसि मे
त्वं हि व्रतानामुत्तमं व्रतं॥ तारणं सर्वपापानां कथयामि निबोध तत्॥ दक्षप्रजापतेर्यज्ञे पुरा देवाः स
मागताः॥ ऋषयश्च तथा सर्वे विद्याधरगणास्तथा। ब्रह्मा विष्णुश्च वायुश्च देवराजस्तथैव च॥ व
रुणाग्निर्ग्रहाः सर्वे ये चान्ये च दिवौकसः। वसिष्ठो वाल्मिको गार्ग्यो विश्वामित्रो महानृषिः॥ एते २५४

सो धूप इति धूपं। आज्यं च वर्त्तिसंयुक्तं दीपं॥ शर्कराखंडखाद्यानि दधि क्षीरघृतानि च। आहारार्थं मया
दत्तं नैवेद्यं प्रतिगृह्यतां॥ नैवेद्यं सम०॥ पाटलोशीरकर्पूरयुतं स्वादु सुशीतलं। पानीयार्थं मयानीतं कोकि
ले प्रतिगृह्यतां॥ चंदनागरुकर्पूरकस्तूरीकेसरान्वितं। करोद्वर्त्तनकं देवि गृह्यतां हरवल्लभे। करोद्वर्तं।
कूष्मांडनारिकेरं च पनसं कदलीफलं। जांबवं मातुलिंगं च फलं गृह्ण नमोस्तु ते॥ फलं। पूगीफलं
महद्दिव्यं। तांबूलं। हिरण्यगर्भेति दक्षिणा। कोकिले कृष्णवर्णे त्वं सदा वससि कानने॥ भव
न्येहरकांतायै कोकिलायै नमो नमः॥ नीराजनं। पूजिता परमा भक्त्या कोकिला गिरिशप्रिया
पुष्पैर्नानाविधैः श्रेष्ठैर्वरदास्तु सदा मम। पुष्पांजलिः। कोकिलारूपधारिण्यै जगन्मात्रे नमोस्तु ते॥
शरणागतदीनार्त्त्राहि देवि सदांबिके। गंधपुष्पाक्षतैर्युक्तं तोयहेमफलान्वितं। अर्घ्यं गृहाण दे
वेशि वांछितार्थप्रयच्छ मे। आषाढस्यासिते पक्षे मेघवर्णे हरिप्रिये। कोकिले त्वं जगन्मातर्गृहाणा
र्घ्यं नमोस्तु ते। पुनरर्घ्यं। तिलस्नेहे तिलसुखे॥ रूपं देहि यशो देहीति प्रार्थना। अंते हेममीं ति
लपिष्टजां कोकिलां तत्वा विप्राय दद्यात्॥ देवि चैत्ररथोत्पन्ने विंध्यपर्वतवासिनि। अर्चिताष्ट

चान्येचऋषयःसर्वेयज्ञार्थमागताः। अपश्यन्नारदःस्तत्रसंतिकेत्वागताइति॥ ईश्वरेणविनासम्य
गृष्वासर्वार्थयज्ञार्थमागताः॥ अपश्यन्नारदःस्तत्रसंतिकेत्वागताइति। ई न्समागतान्॥ शिखां
संस्पृश्यपाणिभ्यांननर्तकलहप्रियः। ज्ञात्वाकलहमूलंचततःकैलासमाययौ। सर्वाघनाशनंस्था
नंकैलासशिखरंशुभं॥ तत्रदृष्ट्वासमासीनंगौरीसहितशंकरं॥ कृतांजलिपुटोभूत्वाप्रणिपत्यमुनि
स्थितः। ईश्वरस्तमुवाचाथनिश्वसंतमनेकधा॥ किमागमनकृत्यंतेमदीयंसदनंप्रति॥ श्वासोच्छ्वा
सेनसंयुक्तःस्तन्मेब्रूहिद्विजोत्तम॥ ईश्वरस्यवचःश्रुत्वाशिखांसंस्पृश्यपाणिना। दुःखयुक्तइवो
वाचनारदःकलहप्रियः॥ ॥नारदउवाच॥ यन्निमित्तंमहादेवमर्त्यलोकात्समागतः॥ तदं
तिकंदुःखयुक्तस्त्वंशृणुष्वजगत्पते॥ दक्षयज्ञंमहद्द्रष्टुमद्यदेवास्समागताः। तत्रयज्ञेस्थिताःसर्वेद
क्षजामातरःप्रभो॥ दृष्टास्त्वंचनतन्मध्येदृष्टस्त्रिभुवनेश्वरः। तवावज्ञाकृतातेनदक्षेणापुण्य
कर्मणा॥ तेनविश्वाससंयुक्तआगतोस्मित्वदंतिकं॥ ईश्वरेणविनाकिंचिद्धर्मकार्यंनसिध्यति॥

अतोस्य विफलः सर्वः प्रयासः स्वमखं प्रति॥ तस्य तद्भाषितं श्रुत्वा नत मिथ्येति चिंतयत्॥ स क्रोधस्तु तदा
ज्ञात ईश्वरो जगदीश्वरः। गौर्या तु प्रार्थितो देवः श्रुत्वा तन्नारदेरितं॥ तस्य यज्ञस्य घातार्थं देवदेव व्रजाम्य
हं॥ इत्युक्त्वा चलिता रोषादीश्वरेणानिवारिता। जगदीशं नमस्तुभ्यं व्रजामि पितृवेश्मनि॥ नारदेनाथ सहि
ता गणेनोनाथ संयुता॥ यज्ञार्थमागता चैव दक्षद्वारे शिवप्रिया। वन्हौ दृष्ट्वा वसोर्द्वारां ह्लज्जिता च शिव
प्रिया॥ तिष्ठंती द्वारितो दक्षो न ददर्श महासती॥ क्षणमेकं च तिष्ठंती यदा दक्षो न पश्यति॥ तदेवं चिंतितं
गौर्या जीवितव्यं मया कथं॥ धाविता कुंडनिकटे हाहाकृत्या च सा ततः॥ क्षिप्तं वन्हौ तदा गौर्या जीवितं तेन मे
या कथं॥ ५। शापं दत्वा सुदारुणं॥ दृष्ट्वा तच्च गणेशेन पाशः परशुरुद्यतः॥ क्षुब्धोत्यसौ तदात्यर्थं गौर्या
अर्थे गणाधिपः॥ पाशेन बध्वा कतिचित्कोपान्निहतवान्सुरान्॥ दक्षे पानोदिता देवा सर्वे युद्धाय नि
र्ययुः॥ महद्युद्धमभूत्तत्र सह देवैर्गणेशितुः॥ तं दृष्ट्वा नारदः शीघ्रं पुनः कैलासमाययौ। निवेदयामास
वृत्तमुदंतं सर्वमीश्वरं॥ तच्छ्रुत्वा स्फालयामास जटां कोपादुमापतिः॥ ततो जातो ति विकटः पुरुषो रक्त २५५

सोमल्लययोदक्षः पिनाकिनः। अपराधः क्षमस्वेति पुनः पुनरुवाच ह॥ उत्थापितः करेणासौ दक्षोपि सकृपाणिना॥
उक्तः श्रमस्व पुनः कार्षीरेवमीशावमाननं। क्वचित्त्वं सुखेनेति भूयस्तं कोप आविशत्॥ शशाप च तदा गौरीय
ज्ञविघ्नकरीं शिवः। मखे विघ्नं कृतवती दक्षस्यैवाधितुश्चिरात्॥ तिर्यक्त्वोनिं समापन्ना विचरिष्यति भूतले॥ त
तो गौरी बभाषेनं प्रणिपत्य सदाशिवं। कथं यास्यामि तिर्यक्त्वं भूतले चरितः कथं॥ अन्यथा वचनं भविता
शाप एष त्वयोदितः। कोकिला मधुरालापा भवेयं नंदने यतः। कोकिलानां स्वरो रूपं नारीरूपं पतिव्रता॥ विद्या
रूपं कुरूपाणां क्षमारूपं तपस्विनां। अचिरादेव च पुनः कुले मह तिजन्मने। भूयास्त्वमेव भर्त्ता च
न वियोगश्च मे यतः। वरयेत्कुलजां प्राज्ञः कुरूपामपि कन्यकां। दुष्कुले च समुत्पन्ना भर्त्तुः पातयते कुलं॥ न
दी पातयते कूलं नारी पातयते कुलं॥ नदीनां चैव नारीणां स्वच्छंदललिता गतिः॥ ततस्तुष्टो महादेवस्त्वे
शापविमोचनं॥ दशवर्षसहस्राणि कोकिलारूपधारिणी॥ नंदने देवविपिने चरिष्यसि ततः परं॥ हिमाचल
सुताभूत्वा मत्प्रिया त्वमुपेष्यसि॥ देवनां तु यथा विष्णुः सहकारो महीरुहां॥ गंगा च सर्वतीर्थानां तथा तिर्य २५६

क्षु कोकिला॥ आषाढे द्वे यदास्यामि तां कोकिलायास्तदार्चनं॥ तदा या कुरुते नारी न सा वैधव्यमाप्नुयात्॥
वसिष्ठ उवाच॥ एतद्वाक्यावसाने तु गौरी सा कोकिलाभवत्॥ ततः आदिष्टु विद्वेते प्रथितं कोकिलाव्रतं॥ या
नारी न व कुरुते मोहात्सा विधवा भवेत्॥ कुरु त्वमेतत्कल्याणि कीर्तिमालिव्रतोत्तमं॥ ॥कीर्तिमालोवाच॥
कथमाराध्यते गौरी कोकिलारूपधारिणी॥ विधानं ब्रूहि तद्विप्र त्वत्प्रसादात्करोम्यहं॥ वसिष्ठ उवाच॥ को
किलाव्रतमाहात्म्यं विधानं च वदामि ते॥ शृणु देवि प्रयत्नेन मंत्रैः पौराणिकैर्युतं॥ मलमासे लतिक्रांते उद्धा
षाढे समागते॥ आषाढ्यां पौर्णमास्यां तु संध्याकाले ह्युपस्थिते॥ संकल्पयेन्मासमेकं श्रावणे प्रभृति ह्य
हं॥ स्नानं करिष्ये नित्यं च ब्रह्मचर्यसितासितं॥ भोक्ष्ये नक्तं च भूशय्यां करिष्ये प्राणिनां दयां। सौभा
ग्यधनधान्यादिप्राप्तये शिवतुष्टये॥ इति संकल्प्य विप्राग्रे नारी विप्रेभ्य एव च॥ प्राप्यानुज्ञां तु संबाधस
मग्रीस कलामपि॥ प्रत्यूषे च प्रतिदिनं दंतधावनपूर्वकं॥ नद्यां गत्वा यदा वाप्यां तडागे गिरिनिर्झरे॥ स्ना
नं करोमि देवेशि कोकिले प्रीतये तव॥ कुलेस्मिन्यावने पुण्ये सर्वदेवकुलाश्रये॥ स्नानं कुर्याद्व्रती दे

विसुगंधामलैकेस्तिलैः॥ दिनाष्टकं ततः पश्चात्सर्वौषध्यायुतः पृथक्॥ यवापिष्टेन च स्नानं दिनान्यष्टौ स
माचरेत्॥ तिलामलकपिष्टेन वचौषधियुतेन च॥ षट् दिनानि ततः स्नानं संपूर्णफललिप्सया॥ स्नात्वा
ध्यात्वा रविं तस्मै दद्यादर्घ्यं प्रयत्नतः॥ आदित्य भास्कर रवे ह्यर्क सूर्य दिवाकर॥ प्रभाकर नमस्तुभ्यं गृहाणा
र्घ्यं नमोस्तु ते॥ सूर्यार्घ्यमंत्रः॥ कारयेत्कोकिलां देवीं सौवर्णां सर्वकामदां॥ रौप्यं चरणयोश्चैव नेत्रयो
श्चापि मौक्तिकं॥ रत्नानि पंचपृष्ठे तु स्तत हस्तसमाश्रिता॥ अथवा तिलपिष्टेन कोकिलां पक्षिरूपिणीं॥ नि
धाय ताम्रपात्रे तां पूजयेत्तु समाहितः॥ उपचारैः षोडशभिर्यथावत्तं निबोध मे॥ आवाहयामि त्वां
देवीं कोकिलरूपधारिणीं॥ अवतारं कुरुष्वात्र प्रसादं कुरु सुव्रते॥ अर्घ्यं॥ आषाढस्य सितपक्षे मेघ
वर्णास्वरूपिणी॥ कोकिले नाम त्वं देवि स्नानार्घ्यं प्रतिगृह्यतां॥ स्नानं॥ कोकिले कलकंठे च माधवे
मधुरस्वरे॥ वसंते वाससे देवि वस्त्रं च प्रतिगृह्यतां॥ वस्त्रं॥ श्रीखंडं चंदनं दिव्यं गंधाढ्यं सुमनोहरं॥
विलेपनं मया दत्तं प्रीत्यर्थं प्रतिगृह्यतां॥ गंधं॥ हरिद्राकुंकुमद्रव्यैः कोकिले कामसंभवे॥ कुंकुमेन॥ २५७

लोचनः॥ स बाष्पाक्षो महादेवं स्वामिन्नाज्ञां च देहि मे॥ वीरभद्र इति नामास्य कृत्वाज्ञां समर्पयत्॥ दक्षय
ज्ञविघातार्थं गच्छ वीराति सत्वरं॥ श्रुत्वा तदीश्वरवचः सर्वप्रमथसंयुतः॥ आययौ यज्ञसदनमस्रग्व
ह्निषु निक्षिपत्॥ ततः इंद्रादयो देवास्त द्रुधाय विनिर्ययुः॥ क्षणात्परांजिता स्तेन विद्रुताश्च दिशो दश॥
अनुद्रुतश्च तान्सोपि पूष्णो दंतानपातयत्॥ भगस्य नेत्रे नासां च सरस्वत्या न्यकृंतत॥ एवं विद्राव्य ता
न्सर्वांश्छिरो दक्षस्य चिच्छिदे॥ कृत्वैवं यज्ञघातं स आजगाम शिवांतिकं॥ नमस्कृत्य पुरस्तस्थौ
कृतं कार्यमिति ब्रुवन्॥ तथाप्यशांतकोपोस्य ज्ञात्वेति ज्ञानचक्षुषा॥ प्रसादयतु मीशानं ब्रह्मविष्णुस
मीपतुः नमस्कृत्य स्तुतस्ताभ्यां प्रसन्नोभूत्स दाशिवः॥ नारदः स्तुंबरश्चैव गीतैः शिवमतोषयत्॥ प्रस
न्नं वीक्षितं विप्रः शिखां संस्पृश्य पाणिना॥ नंनदेशानादस्तत्र तोषयंन्नधिकं शिवं॥ एतस्मिन्नंतरे ब्रह्मावि
ष्णुश्च प्रथमाधिपं॥ व्यजिज्ञपन् दक्षादीन्कृपादृष्ट्या विलोकय॥ कृतो गां कुरु पूर्णा गान्सतां संजीवय प्र
भो॥ विलोकितास्ते देवेन कृपादृष्ट्या विलोकिताः॥ पूषादयः सुरा दीर्घं सुबुद्धा वंस्ततः प्रसादतः॥ उत्थितो

र्चितासित मतः शांतिप्रयच्छमे॥ हरिद्रा। कृष्णं शुक्लं च रक्तं च वासांसि विविधानि च॥ पीतसूत्रप्रदानेन प्रीता
स्युः सर्वदेवताः॥ वस्त्रयुग्मं॥ माल्यादीनीति पुष्पं॥ वनस्पत्युद्भव इति धूपं॥ आज्यं च वर्तिसंयुक्तं मि
ति दीपं॥ सर्वभक्ष्यसमायुक्तं रसैः सर्वैः समन्वितं॥ सर्वदेवसमाहारं नैवेद्यं प्रतिगृह्यतां॥ इति नैवेद्यं॥
कूष्मांडैर्नालिकेरैश्च खर्जूरैर्दाडिमीफलैः॥ चूतजंबीरजंबूनीफलैरामलकैस्तथा॥ द्राक्षानारिं
गबदरैर्मातुलिंगैः सशर्करैः। फलानि॥ नागवल्लीदलमिति तांबूलं॥ हिरण्येति दक्षिणां॥ प्रा
र्थना॥ भिन्नानि कंबसूत्राणि दद्याद्यापि दिने दिने॥ कुंकुमं पुष्पतांबूलमक्षताश्च दिने दिने॥ कु
र्यादेवं विधिं धर्मज्ञो श्रावण्यंतं च सुव्रते॥ विसर्जयिच्च पश्चात्तां सौवर्णीं कोकिलां यदि॥ यद्वा तु तिल
पिष्टस्य कोकिला क्रियते तदा॥ कुर्यात्प्रत्यहमाह्वानं भिन्नायास्तु विसर्जनं॥ रम्यं वनं समागत्य श्रु
त्वा कोकिलकूजितं॥ यदा न श्रूयते शब्दमुपवासं तु तद्दिने॥ कोकिले कृष्णवर्णे च सदावासो वनेषु
च॥ सौभाग्यमतुलं देहि गृहाणार्घ्यं नमोस्तु ते॥ विसर्जनमंत्रः॥ चैत्ररथवनोत्पन्ने विंध्यपर्व

नवासिनी॥ गछ२गछ महादुर्गे स्वस्थानेनंदनेवने॥ विसर्जनं॥ रूपं देहि धनं देहि सर्वसौख्यं च देहि मे॥ पुत्रा
देहि यशो देहि सौभाग्यं देहि संपदा॥ इत्युक्त्वा च ततः पश्चाद्द्विष्यान्नेन सुव्रती॥ नक्तभोजी भवेत्पार्थ या
वन्मासः समाप्यते॥ मासांते तांम्रपात्रे तु कोकिलां स्वर्णनिर्मितां॥ वस्त्रधान्यगुडैर्युक्तां श्रावण्यां कु
र्यात्तथा। दद्यात्सदक्षिणां चापि दैवज्ञे वा पुरोहिते॥ एवमाषाढमासस्य द्वैविध्ये समुपस्थिते॥ सध
वा विधवा वापि या नारी कोकिलाव्रतं॥ करोति सप्तजन्मानि सौभाग्यं लभते तु सा॥ मृता गौरीपुरं या
ति विमानेनार्कतेजसा॥ ॥भगवानुवाच॥ एतद्व्रतं वसिष्ठेन मुनिना कथितं पुरा॥ तथा कृतं
तु तत्पार्थ समस्तं कीर्तिमालया॥ तस्याश्चाः सर्वनिष्पन्नं वसिष्ठवचनं तथा॥ एवं यान्यापि कौंते
य कोकिलाव्रतमुत्तमं॥ करिष्यति ततस्तस्याः सौभाग्यं च भविष्यति॥ आषाढो द्वौ यदा स्यातां को
किलाव्रतमाचरेत्॥ न करोति यदा नारी व्याला भवति कानने॥ एकतः सर्वदानादि कोकिलाव्रत २५८
मेकतः॥ कृतं पुरा स्वरोमिश्वकर्षिपत्नी गिरा दरात्॥ अहल्या याच सा स्नात्वा अर्चिता शापमु

ल्ये॥ अरुंधत्यासह स्नात्वा पूजिता कोकिला नृप॥ सीतया पूजिता सापि सर्वकामार्थसिद्धये॥
गौतम्यहंडकारण्ये स्नानं कृत्वा यथाविधि॥ नलान्वेषणकामाय दमयंत्या च पूजिता॥ रुक्मिण्या च
ततः स्नाता पूजिता कोकिला शिवा॥ विष्णोः पत्युरवाप्त्यर्थं तच्च जातं न संशयः॥ कुवेला मालि
नादीना परकर्मरता तथा॥ एवं वंध्या काकवंध्या विवत्सा मृतवत्सका॥ सर्वास्ताः फलभाजस्तु ज
तस्यास्य प्रभावतः॥ आयुरारोग्यमैश्वर्यं सुखं वृद्धि यशः प्रजा॥ सौभाग्यं सुंदरं रूपं नारी प्राप्नोति
नान्यथा॥ येतद्व्रतं मया ख्यातं कार्यं वारत्रयं नृप॥ तृतीयांते च विधिवत्कार्यमुद्यापनं शुभं॥ एकस्मा
ज्जायते द्रव्यं द्वितीयाल्लभते सुतान्॥ तृतीयाच्चापि सौभाग्यं प्राप्नुयान्नात्र संशयः॥ ॥इति वा
राहे कोकिलाव्रतं॥ अथोद्यापनं॥ उद्यापनविधिं ब्रूहि व्रतस्यास्य मम प्रभो॥ येन विज्ञान
मात्रेण सौभाग्यं च भविष्यति॥ श्रावण्यां पौर्णमास्यां तु शुक्लपक्षे विशेषतः॥ द्वितीयायामेक
भक्तं दंतधावनपूर्वकं॥ उथवा सस्य नियमं कर्तुं व्रतपरायणा॥ तृतीयापुण्यकाले मध्यान्हे

समुपोषिता॥ श्रावणशुक्लद्वितीयायामेकभक्तंकृत्वातृतीयायामुपोषयेदिति॥ पौर्णमासीका
लात्कालात्॥ उपलिप्यशुचौदेशेमंडलंतत्रकारयेत्॥ अष्टदलंलिखेत्पद्मंचतुष्कोणंसभद्रकं॥
कलशंवारिसंपूर्णंपंचरत्नसमन्वितं॥ तस्योपरिन्यसेत्पात्रंशूर्पंविधैकविंशतिः॥ सप्तधान्यपू
तंपात्रंप्रस्थेनैकेनपूरयेत्॥ तदभावेतदर्द्धंवाकुडवेनाथनारद॥ ऊर्णपट्टंकृत्वावर्णयुग्मंदद्याच्च
शक्तितः॥ तस्योपरिन्यसेद्देवींकोकिलांपूर्ववत्तदा॥ अत्रगंधप्रदानेनधूपदीपप्रदायकं॥ नैवेद्यं
मोदकाद्यंचपक्वान्नंसघृतंबहु॥ अर्घ्यंचैवप्रदातव्यंतांबूलंफलमुत्तमं॥ रात्रौजागरणंकार्यंवा
द्यंनृत्यप्रभृतिकं॥ पूजिताएकचित्तेनफलंप्राप्नोतिवाञ्छितं॥ प्रभातेविमलेजातेस्नानंकृत्वाविधा
नतः॥ पूजयेद्विधिवद्देवींहोमंचविधिवद्द्विजः॥ तिलचंपकपुष्पैश्चतंडुलैर्घृतपायसैः॥ अष्टोत्त
रंशतंकृत्वादुर्गामंत्रेणवैदिकैः॥ कोकिलाप्रीतयेब्रह्मन्व्याहृतीनांचतत्रय॥ ब्राह्मणान्भोज
येत्पश्चात्सपत्नीकांश्चपंचच॥ अशक्तोह्येकयुग्मंचभोजयेच्चतथागुरुं॥ त्रिस्त्रीभ्यश्चप्रदात

गोपशमनं सर्वाशुभविनाशनं॥ सकृत्कृतेनाब्दमेकं येन रक्षा कृता भवेत्॥ ॥कृष्ण उवाच॥ शृणु त्वं राजशार्दूल इतिहासं पुरातनं॥ इंद्राण्या यत्कृतं पूर्वं शक्रस्य ब्रज वृद्धये॥ देवासुरमभूद्युद्धं पुरा द्वादश वार्षिकं॥ तयाः संवदतोरेव शचीप्राह सुरेश्वरं॥ अद्यात्त तद्दिनं देव प्रातः सर्वं भविष्यति॥ अहं रक्षां विधास्यामि येनाजेयो भविष्यति॥ इत्युक्त्वा पौर्णमास्यां सा पौलोमी कृतमंगला॥ बबंध दक्षिणे पाणौ रक्षमोदलिकां ततः॥ बद्धरक्षः स्ततः शक्रः कृतस्वस्त्ययनो द्विजैः॥ दुद्राव दानवानीकं क्षपाद्दलदेवं प्रजाः॥ शक्रश्च विजयं प्राप्त्वा पुनरेव जगत्त्रये॥ एष प्रभावो रक्षायाः कथितस्ते युधिष्ठिर॥ जयदः सुखदश्चैव पुत्रारोग्य धनप्रदः॥ ॥युधिष्ठिर उवाच॥ क्रियते केन विधिना रक्षाबंधः सुरोत्तम॥ कस्मिंतिथौ कदादेव एतन्मे वक्तुमर्हसि॥ यथा यथा हि भगवन्विचित्राणि प्रभाषसे॥ तथा तथा तमे तस्मिन्बह्वर्थाः शृणुतः कथाः॥ ॥कृष्ण उवाच॥ संप्राप्ते श्रवणस्यातः पौर्णमास्यां दिनोदरे॥ स्नानं कुर्वीत मतिमान्श्रुतिस्मृतिविधानतः॥ ततो देवान्पितॄंश्चैव तर्पयेत्प २९

रमांभसा॥ उपाकर्मादिकं प्रोक्तं ऋषिणां चैव तर्पणं॥ कुर्वीत वास्तेतैस्तद्दु सिद्धार्थैर्हेमचर्चितैः॥ वस्त्रैर्विचित्रैः कीर्णैश्च विचित्रैर्मलवर्जितः॥ विचित्र तंतुग्रंथिर्वा स्थापयेद्भाजनोपरि॥ कार्यं गृहस्य रक्षागामयरवितैः स्वक्षतण्डुलिकैः सर्वा वर्णसहिते भिन्नोदुरि नोयशमानाया उपलिप्ते गृहे मध्ये दत्तचतुष्केस्वेन्यसेत्कुंभपीठं नरोपरि विप्राद्द्वा माल्यैपुरतश्च सुमुहूर्तवेश्याजनेभसहिता मंगल्य सहितैः सुस्थितैछिन्नैः॥ रक्षाबंधः कार्यः प्रशांतिदः सर्वविघ्नानां॥ पुरोधान्नृपते रक्षां बध्यात्तत्रेति मंत्रेणं॥ येन बद्धो बली राजा दानवेंद्रो महाबलः॥ तेन त्वामभिबध्नाति रक्षे माचल माचल॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चैव च मानवैः॥ कर्तव्यो रक्षिकाबंधो द्विजान्संपूज्य भक्तितः॥ यः श्रावणे विमलमासि विधानविज्ञो रक्षाविधानमिदमाचरते मनुष्यः॥ आस्ते सुखेन परमेण स वर्षमेकं पुत्रप्रपौत्रसहितः ससुहृज्जनास्यात्॥ अयं रक्षाबंधो भद्रायां न कर्तव्यः॥ भद्रायां द्वे न कर्तव्ये श्रावणी फल्गुनी तथा॥ श्रावणी नृपतिं हंति ग्रामं दहति फल्गुनीति वचनात्॥ ॥इति रक्षाबंधनविधिः॥ अथ भाद्रपौर्णमास्यामुमामहेश्वर

व्रतं शिवरहस्ये॥ ॥राजोवाच॥ भगवन्मुनिशार्दूल व्रतमेकं वदस्व मे॥ सांगं यस्मिन्कृते चीर्णे स
र्वकामान वा पुमान्॥ उमामहेश्वरं नाम व्रतमस्ति व्रतोत्तमं॥ सांगं यस्मिन्व्रते चीर्णे कामान्सर्वान्नवा
प्नुयात्॥ मासि भाद्रपदे शुक्ले पौर्णमास्यां प्रयत्नतः॥ तद्व्रतं कार्यमनघे ब्राह्मणाद्यैर्विधानतः॥ भाद्रशु
क्लचतुर्दश्यां प्रातःस्नानविधानतः॥ शिवं संपूज्य विधिवत् शैवान व्यतियत्नतः॥ शिवं ध्यात्वा जगद्वं
द्य सोमं सोमार्द्धशेखरं॥ कृतांजलिपुटो भूत्वा मंत्रमेतत्पठेन्नरः॥ श्वः करिष्ये व्रतं पत्नी उमा महेश्व
रां प्रिये॥ अज्ञां देहि महादेव सोम सोमार्द्धशेखर॥ इति विज्ञाप्य चैवं देवं पुनः संपूज्य यत्नतः॥ मध्याह्ने
पि महादेवमर्चयेन्नियतो व्रती॥ ततो देवान् ऋषीन्सर्वान् अभ्यर्च्य विधिवन्नृप॥ हविष्याशी त्रि
वं सायं पूजयेद्विधिपूर्वकं॥ निद्रा कार्या तथायोगं महादेवस्य संन्निधौ॥ उत्थाय पश्चिमे यामे महा
देवं ततस्मरेत्॥ ततः शौचादिकं सर्वं निर्वर्त्य प्रीतिमानसः॥ स्नानं कुर्याद्यथायोगं यथाशास्त्रं य
थाक्रमं॥ परिधाय ततो वस्त्रं क्षालितं शुभमक्षतं॥ उद्धूलनं ततः कार्यं त्रिपुंड्रं च यथाक्रमं॥ रु २६१

व्याकारिकाः पंचमेव च॥ मोदकाश्च ससूत्राश्च वंशपात्रसमन्विता॥ कृष्णवर्णा सिमायुक्ता पक्वान्नं
च प्रपूरयेत्॥ सर्वोपस्करसंयुक्तस्त्रिः स्त्रीभ्यश्च प्रदापयेत्॥ आचार्यं पूजयेद्भक्त्या गां कृष्णां च स
वत्सकां॥ उपानहौ तथा शय्यां चामरं छत्रमेव च॥ मुद्रिका कर्णवेष्टौ च चंदनं कुसुमानि च॥
सर्वं दद्याद्द्विजेंद्राय सपत्नीकाय नारद॥ दापयेद्विधिवत्सर्वं ब्राह्मणाय कुटुंबिने॥ व्रतोपदिष्ट
दानं च भोजनं च सदक्षिणं॥ एवं या कुरुते राजन् कोकिलाव्रतमुत्तमं॥ सर्वं प्राप्नोति सौभाग्यं पुत्रध
न्यधनानि च॥ ततो भुंजीत तन्नैवेद्यं पुत्रपौत्रसमन्वितः॥ कोकिले पूजिता गच्छ विधिवत्सर्वका
मदे॥ कारयेत्कोकिलां देवीं सौवर्णां सर्वकामदां॥ रौप्यं चरणचंचुभ्याम् रचिता नेत्रमौक्तिका॥ पंचर
त्नानि पृष्ठे च चूतवृक्षसमाश्रिता॥ एवं त्वं च यथा पूज्या यथोक्ता च शनैः शनैः॥ विप्रे करार्पिता लक्ष्मीः
संस्थ भावमिदं शृणु॥ महाक्रममवाप्नोति महामाया प्रसादतः॥ इति नारदीये कोकिलाव्रतोद्या
पनं॥ ॥अथ श्रावणपौर्णमास्यां रक्षाबंधनविधिर्भविष्ये॥ ॥युधिष्ठिर उवाच॥ ॥सर्वरो

द्राक्षधारणंकार्यंसंध्या कार्यात्ततःपरं॥ ततःशिवार्चनंकार्यंबिल्वपत्रादिभिर्नवैः॥ ततोहोमोपि कर्तव्यःशि
वःप्रीत्यर्थमादरात्॥ ततःपरंनियमनं प्रणमेत्त्सोममव्ययं॥ सग्रंथिकुशयुजोत्तं ततःसंपाद्यमादरात्॥
गव्यंपंच दशाग्रंथितत्पुंजीतं शिवात्मकं॥ एवंपंचदशाग्रंथिदोरकंकुमान्वितं॥ संपादनीयंयत्नेनत्र
तनिष्टैरनाकुलैः॥उमामहेश्वरंनैवसौवर्णप्रतिमाद्वयं॥संपादनीयंयत्नेनराजतंवामनोहरं॥पल
दुनेनकर्त्तव्यंप्रतिमाद्वयमुत्तमं॥ अधिकंचेद्यथा शक्तिःकर्तव्यमतियत्नतः॥सौवर्णोराजतो
वापिताम्रोवाकलशोनवः॥ संपादनीयोयत्नेनप्रयतैर्व्रततत्परैः॥ ततःसंदर्भयुंजीतवस्त्रंयुग्मार्चि
तंशुभं॥ पृथक्पृथक्स्थापनीयंकलशेप्रतिमाद्वयं॥आपोहिष्ठादिभिर्मंत्रैस्तथात्रेअग्निसप्तिंवाजंभ
रंदचैकैरपि॥ अभिषिच्य प्रयत्नेन पूजयेत्प्रतिमाद्वयं॥ ततःप्रयत्नतोगच्छेदलंकृतशिवालयं॥शि
वस्थानंततोगच्छेतोरणाद्यैरलंकृतं॥ ततःषोडशपत्रंकेबहिरतश्चतुर्गुणे॥ अलंकृतेस्वस्तिकाद्यैः
स्थापयेत्कलशंनवं॥ ध्यायेत्ततोमहादेवंउमादेहार्धधारिणं॥मुक्तामालापरीतांगंदुकूलंपरिवेष्टि

तं॥ पंचाननमुमाकांतमनलेंदुरविप्रभं॥ चंद्रार्धशेखरंनित्यंजटामुकुटमंडितं॥ त्रिपुंड्ररेखाविलस
द्भालभागमनामयं॥ भस्मोद्धूलितसर्वांगंरुद्राक्षाभरणान्वितं॥ मंदस्मितमनाधारमाधारंजगतांप्रभुं॥
देवैरनेकैरनिशंस्तूयमानमनेकधा॥ देवात्मकंदेववंद्यंविष्णुब्रह्मादिवंदितं॥ विष्णुनेत्रीचितार
क्तपादपंकजमुत्तमं॥ अप्रतिद्वंद्वमद्वंद्वंसर्ववृंदारकार्चितं॥ सर्वोत्तममनाद्यंतंसर्वदेवनिवेदितं॥
ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं॥ ऊर्ध्वकेशंविरूपाक्षंविश्वरूपंचिदात्मकं॥ निष्कलंनिर्गुणंशां
तंनिरवद्यंनिरंजनं॥ अप्रमेयंजगन्मध्येस्थितिसंहारकारणं॥ विश्वबाहुंविश्वपादंविश्वाक्षंवि
श्वशंभुवं॥ विश्वंनारायणाराध्यमक्षरंपरमंपदं॥ विश्वतःपरमान्नित्यंविश्वस्येशमनामयं॥ एवंध्या
त्वामहादेवंसर्वदेवोत्तमोत्तमं॥ ध्यायेत्ततःपरंगौरीमादिविद्यामनामयां॥ लक्ष्मीसेवितपादाब्जांवा
णीं।वीसेवितपादुकां॥ सरस्वत्यादिभिर्नित्यंस्तूयमानपदांबुजां॥ अधरोष्ठधरीभूतपक्कबिंबफ
लामुमां॥ मुखकांतिकलोपेतपूर्णचंद्रमनामयां॥ तिरस्कृतालिमालांतामलक्ष्यावलिभिः २५२

रालिष्टसोमार्द्धकृतशेखरे॥ नानारत्नसमाकीर्णमासनप्रतिगृह्यतां॥ इत्यासनं॥ अर्घ्यं गृहाण दे
वेशसपुष्पं गंधसंयुतं॥ शिवानंतगुणग्रामसर्वाभीष्टप्रदायक॥ गृहाणार्घ्यं शिवे नित्ये सर्वावय
वशोभिनि॥ शिवप्रिये शिवाकारे नित्यं भक्तवरप्रदे॥ इत्यर्घ्यं॥ पाद्यं गृहाण गौरीश त्वाद्हेमपात्रस्थि
तं नव॥ गृहाण देवि पाद्यं त्वं वेदवेदांतसंस्तुत॥ पाद्यं॥ गृहाणाचमनं शंभो शुचिभिर्स्तत्शुचिप्रिय॥
गृहाणाचमनं देवि शुचिभिर्स्तत्शुचिप्रिये॥ इत्याचमनं॥ मधुपर्कं गृहाणेश सर्वदा मधुपर्कद॥ म
धुपर्कप्रदानेन प्रीतो भव महेश्वर॥ मधुपर्कमिदं देवि स्वीकुरु प्रिय शंकरे॥ मधुपर्कप्रदानेन
प्रीयता भव शोभने॥ मधुपर्कं॥ शंभो पंचामृतस्नानं स्वीकुरुष्व कृपानिधे॥ सर्वतीर्थमयं स्नानं नि
त्य शासनपावनं॥ शिवे पंचामृतस्नानं स्वीकुरुष्व शिवप्रिये॥ सृष्टतीर्थोत्तमे शुद्धे तीर्थराजनि
षेविते॥ पंचामृतस्नानं॥ शंभो शुद्धोदकं देस्नानं स्वीकुरुष्व सुरोत्तमं॥ प्रसीद परमं भक्त पाहि
मां करुणानिधे॥ शिवे शुद्धोदकं स्नानं स्वीकुरुष्व शिवप्रिये॥ प्रसीद देवि हीनत्वं पाहि मां श २६३

शरणागतं॥ शुद्धोदकस्नानं॥ सोत्तरीयं गृहाणेश दुकूलमिदमुत्तमं॥ पाहि मां कृपया शंभो करुणाकर
शंकर॥ सोत्तरीयं गृहाणेदं दुकूलं शंकरप्रिये॥ प्रसीद पाहि मां दीनमनन्यशरणां शिवे॥ वस्त्रं॥
उपवीतं गृहाणेश शंभो सर्वमरोत्तम॥ उपवीतं गृहाण त्वं बिंशि वसंश्लिष्टविग्रहे॥ इत्युपवीतं॥ गृह्
णा चंदनं रम्यं गंधपुष्पेन विराजितं॥ प्रसीद पार्वतीनाथ शरणागतवत्सल॥ गृहाण चंदनं देवि चंद्र
भागविराजिते॥ विश्वं विश्वात्मिके पाहि विश्वनाथप्रिये सदा॥ चंदनं॥ गृहाणाभरणानीश निराशनि
यमाश्रय॥ विश्वाभरणा विश्वेश रत्नाभरणभूषित॥ गृहाणाभरणान्यंबे सर्वाभरणभूषिते॥ शर्व
प्रिये जगद्वंद्ये जगदानंददे शिवे॥ इत्याभरणं॥ गृहाण बिल्वपत्राणि सपुष्पाणि महेश्वर॥ सुगंधी
नि भवानीश शिवत्वं कुसुमप्रिये॥ गृहाण बिल्वपत्राणि सामोदानि शिवप्रिये॥ सुगंधबिल्वमं
दारमालिकासमलंकृते॥ इति सबिल्वपुष्पपूजा॥ दशांगं गुग्गुलं धूपं सगोघृतमनुत्तमं॥ गृहा
ण पार्वतीनाथ घ्राणतर्पणमादरात्॥ दशांगं गुग्गुलं धूपं सगोघृतमनुत्तमं॥ गृहाण भक्तवरदे लक्ष्मी

देवादिसेविते॥ धूपं॥ आज्यं त्रिवर्तिविस्फूर्जिदीपं शर्व शिवायते॥ गृहाणानंतसूर्याग्निचंद्रप्रभ नमो
स्कृते॥ साज्यं त्रिवर्तिविस्फूर्जिदीपमीशानवल्लभे॥ गृहाण चंद्रसूर्याग्निमंडलाधिकसुप्रभे॥ दी
पं॥ शंभो योघृतसंयुक्तं परमान्नं मनोहरं॥ सशर्करं गृहाणांबे परमान्नं प्रदायिनी॥ नैवेद्यं॥ शंभो
गृहाण गंधाढ्यमिदमाचमनीयकं॥ कृताचमन देवेश स्वतः शुद्ध शिवायते॥ शिवे गृहाण गंधाढ्यमि
दमाचमनीयकं॥ शुद्धे शुद्धिप्रदे देवि शिव भूषितविग्रहे॥ इत्याचमनं॥ नीराजनं गृहाणेश बहुदीप
विराजितं॥ स्वप्रकाशप्रकाशात्मन् प्रकाशितदिगंबरं॥ शंभो गृहाणतांबूलमेलाकर्पूरसंयुतं॥
प्रसीद भगवान् शंभो सर्वज्ञामितविक्रम॥ शिवे गृहाण परमेशान् सरत्ने छत्रचामरे॥ दर्पणं व्यज
नं त्वीश सर्वदुःखविनाशकं॥ गृहाणोमे सुरासध्य सरले छत्रचामरे॥ दर्पणं व्यजनं चाद्य विद्याधरेन
मोस्कृते॥ प्रदक्षिण नमस्कारान् गृहाण परमेश्वरि॥ नर्तनं च महादेवि शिव माद्य प्रिये शिवे॥ इति
प्रदक्षिणानमस्काराः॥ एवं प्रयत्नतः कार्यं शिवयोः पूजनं शिवे॥ शिवानी च प्रयत्नेन सर्वेक्षमपि पूज २९४

सदा॥ पीनवक्षोजनिर्भूत चक्रवाकवरांगना॥ नित्यं तिरस्कृतांभोजा नयनाभ्यामनिंदिता॥ सीमांतधिक्
ताशेषकामभल्लामहर्निशं॥ भ्रूकुरोद्धी कृताशेष शामभल्लमनाकुलं॥ बाहुतालकल्लोलहूतहेमनालं
विलासिनी॥ रोमावलीतिरोभूत भ्रमद्भ्रमनालिका॥ नाभिरंध्रतिरोभूत घनावर्तमवर्तुलं॥ उ
त्तमोरुत्तिरोभूतं तरं भास्तंभाशुभावहा॥ पादयुग्मप्रभाकांति निर्जितारुणपंकजा॥ ब्रह्मेंद्रोपेंद्रज
ननीमहेशार्द्धांगभागिनी॥ महेशाश्लिष्टवामांगा चरदाभयदा सदा॥ प्रसन्नवदनाशांतांस्मि
तपूर्वाभिभाषिणी॥ पूर्णचंद्रदुकूलाद्या नानाभरणभूषिता॥ स्तूयमानां सदा देवैर्यक्षैर्दिनेश्र
कोटिशः॥ एवं ध्यात्वा ततः सम्यगुपचारान् प्रकल्पयेत्॥ ततः पुष्पाणि संगृह्य शिवमावाहयेच्छिवां॥
आवाहनं॥ महादेव दयासिंधो विष्णुब्रह्मादिवंदित॥ आवाहयामि देव त्वां प्रसीद परमेश्वर॥ ल
क्ष्म्यादि देववनितापरिसेवितपादुके॥ आवाहयामि देव त्वां प्रसीद परमेश्वरि॥ इत्यावाहनं॥ गृहा
णासोमविश्वात्मन् आसनं रत्ननिर्मितं॥ अनंतासनविध्येशाकरुणासागरप्रभो॥ उमे सोमध

नं॥ उक्तंमंत्रंसमुच्चार्ययथापूर्वयथाक्रमं॥ शिवायनमः शिवंपूजयामि॥ आवहंतीति मंत्रस्तुप्रवाच्य
परिकीर्तितः॥ कपर्दिनेनमः कपर्दं भाललोचनायनमः॥ आवहं। भालं॥ सोमसूर्याग्निलोचनायत्रि
नेत्राणि॥ श्रुतिश्रोत्रायनमः श्रोत्राणि। घ्राणगंधायनमः॥ घ्राणानि। स्फतिदंताय॰ दंतान्। श्रुति
जिह्वायनमः॥ जिह्वाः। कंठकपोलायनमः॥ कपोलानि॥ ज्ञानोष्ठायनमः। ओष्ठान्॥ नीलकंठाय॰। कं
ठान्॥ हरिवक्षसेन॰ वक्षांसि। हिरण्यबाहवेनमः। बाहून्। विश्वोदरायनमः। जंघान्। विश्वोरवेनमः।
ऊरून्। विश्वजंघायनमः। जंघान्। विश्वपदेनमः॥ पादान्। विश्वनखायनमः॥ नखान्॥ सर्वात्मकायन
मः। सर्वांगंपूजयामि। शिवायैनमः॥ शिरःपूजयामि। पृथुवेण्यैनमः वेणीं॰ सीमंतराजिताये॰ सी
मंतं॰। कुंकुमभालायै॰ भालं। सोमसूर्याग्निलोचनायै॰ लोचनानि॥ श्रुतिश्रोत्रायै॰ श्रोत्रा
णि। गंधप्रियायै॰ घ्राणं। सुभगकपालायै॰ कपोलं। कुंद्यदंतायै॰ दंतान्। विद्याजिह्वायै॰ जिह्वां॥
बिंबोष्ठायै॰ ओष्ठौ॰ रत्नकंठायैनमः। कंठं। पृथुककुचायै॰॥ कुचौ। विश्वगर्भायै॰ उदरं। सु

ककुद्येनमः। कटिं। दिव्योरुदंडायेनमः। ऊरू०। वृतजंघायै०। जंघे। लक्ष्मीसेवितपादुकायै०। पदौ।।
महेश्वरप्रियायै०। नखान्। शोभनविग्रहायै०। सर्वांगं पूजयामि।। अंगपूजासमाप्यैवं दोरकं चविस
र्जयेत्।। प्रत्येकं ग्रंथिषु स्वच्छे स्वच्छे बिल्वदलादिभिः। प्रथमं ग्रंथिमारभ्य मनसो मे निमंत्रितः। यथा
क्रमेण संपूज्य ततो धार्यं हि दोरकं।। तत्रोपचाराः सर्वे पि तेन मंत्रेण सादरं।। व्रतिभिर्यत्नतः कार्यं कुंकुमां
किलदोरकं।। ततः पंचदश प्रस्थ गोधूमास्तंडुलापि वा।। उपायनार्थमानेयाः शुद्धाः कीटाद्यदूषिताः।।
यद्वा पंचदशाज्योक्ता गोधूमापूपमंडकाः।। उपायनार्थमानीताः कृष्णगोघृतपाचिताः।। ततः शिवे
कृतारणाः शैवं शैव व्रतप्रियः।। पूजनीयः प्रयत्नेन गंधपुष्पादिभिः क्रमात्।। ततः सवस्त्रं कलशं शि
वयोः प्रतिमा द्वयं।। शिवाय देवं पलेन स्वर्णफलसंयुतं।। आदौ चोपायनं दत्वा देवमेतं दत्तः पुरं।। उपाय
नस्य मंत्रोपि वक्ष्यते त्र विशेषतः।। उमेशः प्रतिगृह्णातु उमेशो वै ददातिच।। उमेशस्तारकोभाभ्यां
उमेशायनमो नमः।। अमुं मंत्रं समुच्चार्य दत्वा पापं निवेदयेत्।। तथा शैवाः प्रयत्नेन भोजनीया वि

त्रौशिवकथाः श्राव्याः श्रोतव्यं यत्नतोऽनघ॥ कर्तव्या यत्नतो रात्रौ पूजायामचतुष्टये॥ ततः स्वयं प्र
यत्नेन स्नात्वा शंकरसंन्निधौ॥ पूजनीयाः प्रयत्नेन शिवो देवशिखामणिः॥ चतुरस्रं ततः कार्यं
कुंडमष्टदलान्वितं। कटिदघ्नं प्रांतदेशे हस्तद्वयसमन्वितं॥ तत्र वन्हिं प्रतिष्ठाप्य विधिवद्गृह्यमा
र्गतः॥ कार्यः प्रयत्नतो राजेन्नमः पूर्वं ततस्ततः॥ ततः पूर्णाहुतिं कृत्वा शैवाग्निं पूजयेत्ततः॥ बिल्व
पत्रैः पुष्पमाल्यैर्भस्मना च यथाक्रमं॥ एकैकस्मै प्रदातव्यं शिवयोः प्रतिमाद्वयं। कलशो
ऽपि प्रदातव्यस्ततो वस्त्रद्वयान्वितः॥ आचार्याय प्रदातव्यं सुवर्णशतमादरात्॥ ततो यत्नेन शै
वेंद्रा भोजनीयाः कृतव्रतैः॥ सुवासिन्योऽपि शैवानां भोजनीयाः प्रयत्नतः॥ ततो देयास्वश
क्त्या च भोजितेभ्यश्च दक्षिणा॥ ततश्च स्वकृतं कर्म शिवाय विनिवेदयेत्॥ उद्यापनं कृतं शंभो
मयैतदधुना प्रभो॥ इदं संपूर्णतामेतु त्वत्प्रसादान्महेश्वर॥ मंत्रहीनं भक्तिहीनं शक्तिहीनं २६६
मुमापते॥ कृतं कर्म भवत्वद्य त्वत्प्रसादात्फलप्रदं॥ प्रायश्चित्तं वैदिकानां पंगानामपि कर्मणां॥

शिवस्मरणमेवेति श्रुतिरप्यस्ति शांकरी॥ अतः कृतमिदं श्रौतं कर्म व्यंगमपि प्रभो॥ सांगं भवतु विश्वेश
तवैव स्मरणात्प्रभो॥ इति संप्रार्थ्य देशं सांबं सर्वसुरोत्तमं॥ भुंजीयाद्बंधुभिः सार्द्धं समौनं तैल
वर्जितं॥ एवं यः कुरुते सम्यगुमामाहेश्वरव्रतं॥ स सर्वभोगान्भुक्त्वांते मोक्षं प्राप्नोति सर्वथा॥ रा
जोवाच॥ ॥ गौतमैतद्व्रतं चीर्णं पुरा केन वदस्व मे॥ कस्य का समभूत्सिद्धिर्व्रतस्यास्य प्रभावतः
गौतम उवाच॥ पुरा शैववरोऽराजन्दुर्वासाख्यो मुनीश्वरः॥ कदाचित्संचरन्लोकात्ददर्श क
मलापतिः॥ ततः समागतं दृष्ट्वा दुर्वासाख्यं मुनिस्त्तवः॥ बिल्वमालां ददौ तस्मै शंकरेण समर्पितां॥
गृहीत्वा बिल्वमालां तां हरिर्गमिनसंभ्रमात्॥ शिवसाऽपूजनीयां तां गरुडे सविनिक्षिपत्॥ ततस्तं ता
दृशं दृष्ट्वा दूर्वासाः क्रोधमूर्छितः॥ हरिं शशाप बहुधा धिग्धिग्जन्मेति संवदन्॥ मया शिवार्पिता
दाता माला तुभ्यमघापह॥ सा कथं गरुडस्कंधे विनिक्षिप्ता त्वया हरे॥ गर्वस्य मूलभूतेयं लक्ष्मीस्त्व
विनश्यतु॥ लक्ष्मीः पततु दुग्धाब्धौ गरुडोऽपि विनश्यतु॥ वैकुंठस्याधिकारो तव यातु मुदा त्वया॥

निजेजस्कोवनीष्टेसंचराघाबधिध्रुवं। इत्युक्तासत्दूवसींययौलोकातरंन्नृप। ततःपपातदुग्धाब्धौ
लक्ष्मीर्विष्णुमनोहरा॥ ततोतिदुःखितोविष्णुप्रलपन्वनमाश्रिमः। उवासविपिनेघोरेस्वकृतंकर्मसं
स्मरन्॥ ततःकदाचिद्भूपालमयात्तत्रगतंपुरा॥ तदामामागतंदृष्ट्वाप्रतयामासमांहरिः॥ ततोश्रुपूर्णन
यनःकृतांजलिपुटोहरिः॥ जगादसर्ववृत्तांतंस्वलक्ष्मीनाशकारणं॥ ततोतिक्लांतचित्तायविष्णवेव्र
तमुत्तमं। तत्कष्टेनमयाभूप कथितंसादरंमया॥ ततोविलंबंविधिवच्चकारश्रद्धयान्वितः॥ ततः
प्रसन्नोभगवान्हरस्यपार्वतीपतिः॥ ददौलक्ष्मींसगरूडांकरुणानिधिरव्ययः॥ इदमेवव्रतंचीर्ण
मिंद्रेणापिहतौजसा॥ तेनप्राप्तस्ततस्वर्गःस्वर्गभोगश्चशाश्वतः॥ ब्रह्मणापिसुराचीर्णमिदमे
वव्रतंनृप॥ नष्टावागीश्वरीतेनसंप्राप्तादुर्लभापिसा॥ मुनिभिश्चपुराचीर्णव्रतमेतन्मुमुक्षुभिः॥ अ
स्यव्रतस्याचरणान्मुक्तिःप्रापमुनीश्वरैः॥ इदंव्रतंप्रयत्नेनयःकरिष्यतिभक्तितः॥ तस्यसौभाग्य २८७
संपन्निर्भविष्यत्येवसर्वथा॥ यस्यास्त्यैश्वर्यभोगेछामोक्षेस्छाप्यनपायिनी॥ यस्यसर्वाधिपत्ये

विशेषतः॥ अतिथीनपिसंतर्प्यद्वारदेशस्थितान्नृप॥ एवंप्रयत्नतःकार्यंप्रतिवत्सरमादरात्॥ नियमे
नैवविधिवदुक्तरीत्यायथाक्रमं॥ ब्राह्मणाद्यैरिदंकार्यंव्रतमाहितमानसैः॥ सर्वाभीष्टप्रदंपुण्यंव्रतमे
तच्छिवात्मकं॥ प्राप्तेतुषोडशेवर्षेकार्यमुद्यापनंनृप॥ उद्यापनविधानंचवक्ष्येशृणुयथाक्रमं॥ पौ
र्णमास्यांभाद्रपद्यांव्रतोद्यापनमादरात् कर्त्तव्यमतियत्नेनद्रव्यंसंपाद्यसादरं॥ हैमीकार्यासार्द्धष
ष्टिपलिमाचपरन्यान्विता॥ तदर्धेनाथवाकार्यातदर्धेनाथवानृप॥ रजतेवाथवाकार्यायथो
क्तपलमानतः॥ संपादनीयाःकुंभाश्चहैमाःपंचदशोत्तमाः॥ अथवाराजतःकार्यायद्वाताम्रमया
नृप॥ भाद्रशुक्लचतुर्दश्यांशैवाब्राह्मणपुंगवाः॥ निमंत्रणीयायत्नेनप्रात्तःसप्तदशोत्तमाः॥ त
तोप्रहंवितानाद्यैरलंकृत्यप्रयत्नतः॥ स्वस्तिकाद्यैरलंकुर्याशिवस्थापनवापहं॥ ततःसायंप्रयत्ने
नतस्मिन्शंकरमंदिरे॥ पूजनीयाःप्रयत्नेनशिवयोःप्रतिमाःशुभाः॥ सर्वोक्तेनविधानेनमंत्रैस्तैस्तै
वसाधनैः॥ रात्रौजागरणंकार्यंसोपवासंप्रयत्नतः॥ ऋषिभिःसहसोत्साहंपयोमात्राशनेनवा॥ रा

पह्नेतुयातस्यापिंडानांकरणंबुधमित्यमावास्यांप्रकृत्यहारीतेनोक्तत्वात्॥ परेद्युर्व्येवतद्व्याप्तौपरेच॥
अपराह्णः पितृणांतुयापराह्णानुयायिनि॥ साग्राह्यापितृकार्येतुनपूर्वास्तानुयायिनीतितेन
वोक्तत्वात्॥ येतुभूतविधाममावास्यांमोहादज्ञानतोपिवा॥ श्राद्धकर्मणियेकुर्युस्तेषामायुः
प्रहीयतइतिकात्यायनकृष्णाजिनिवचसीतदुत्तरस्याएवापूराह्णव्यापित्वेउपोद्बलके॥ दिनद्वय
तुल्यैकदेशव्याप्तौक्षयेपूर्वा॥ वृद्धिसाम्ययोःपरा॥ एवंदर्पवाक्यात्॥ अमावास्यातुयाहिस्या
पदपराह्णद्वयेपिसा॥ क्षयेपूर्वापराग्राह्यासाम्येपिचपरास्मृता॥ तिथिक्षयेसिनीवालीतिथिवृद्धौ
कुहूर्मता॥ साम्येपिचकुहूर्ज्ञेयावेदवेदांगवेदिभिरितिशिवराघवसंवादप्रचेतसोवचनाभ्यांचेति॥ य
तुकालतत्वविवेचनेदिनद्वयेसंपूर्णपराह्णव्याप्तौयाद्यतिथ्युत्तरतिथिवृद्धिसाम्ययोरुत्तरा॥ त
स्याक्षयेपूर्वाइत्येतद्वचनविषयत्वयमुक्तायत्वेतस्परवर्षादिवचनदिनद्वयसाम्यैकदेशव्या
प्तिविषयत्वंमाधवेनोक्तं॥ तदेकदेशानुपादानात्स्वरसतःसकलव्याप्तावेवप्रतीतेर्नादर्त्तं॥ तेन २६०

सैः॥ वासोभिर्दक्षिणाभिश्च सवस्त्रान्पूजयेद्द्विजान्॥ यथाशक्ति च दातव्या दीपाश्च पर्वविनिर्मिताः॥ एवं नि
र्वर्त्य विधिवद्व्रतपारणमाचरेत्॥ व्रतस्यास्य विधानेन कल्पांते वापि संख्यकान्॥ अप्सरोभिः परिवृतः स्व
र्गलोके महीयते॥ इह चायुष्यमारोग्यं पुत्रपौत्रादिसंपदः॥ लभंति व्रतमाहात्म्यात्कुलश्रेष्ठगुणेश्वरी
त्ति लिंगे। निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी॥ जगत्प्रभ्रमते तस्यां लोकचेष्टावलोकिनी॥ ना
लिकेरोदकं पीत्वा अक्षक्रीडां समाचरेत्॥ तस्मै वित्तं प्रयच्छामि को जागर्ति महीतले॥ ॥इति कोजागरव्र
तं॥ ॥इति श्रीमद्दनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के पौर्णिमाव्रतानि॥ ॥अथामावास्या
व्रतानि॥ ॥तत्रास्मिन्व्रतसामान्ये प्रतिपद्यमावास्येति युग्मवचनादमावास्या प्रतिप द्विद्धान्याग्राह्या॥ अ
थ प्रसंगात्श्राद्धे अमावास्यानिर्णयः॥ तत्र ये निरग्नयो ये वैकदिने नाधानपिंडपितृयज्ञश्राद्धं तत्
यानुष्ठानरहिता आश्वलायना। परत्वे बादयः साग्नयः पंचधाविभक्तदिनचतुर्थभागरूपापराह्णव्या
पिनी ग्राह्या॥ तत्र पूर्वेद्युरेवापराह्णव्याप्तौ पूर्वा॥ यस्यां संध्या गतः सोमो मृणाल्लमिव दृश्यते॥ अपरा

छातेनकार्यमिदंव्रतं॥ शारदोनामविप्रोभूत्पुरावेदांतपारगः॥ मोक्षार्थमतियत्नेनतेनचीर्णमिदंव्रतं॥ वैधुने
नापिविप्रेण मोक्षार्थमतियत्नतः॥ कृतमेतद्व्रतंपूर्वंसर्वाभीष्टप्रदायकं॥ मुक्तिःप्राप्ता चतेनापिव्रतस्यास्यप्र
भावतः॥ यंयंकामंसमुद्दिश्यव्रतमेतदनुत्तमं॥ यःकरिष्यतितंकामंसमाप्नोतिनिर्मलं॥ इदंव्रतंमहेशेनस
माख्यातमुमांप्रति॥ कुमारायसमाख्यातमुमयैतद्व्रतंमम॥ नंदिकेशायकथितंमयाचैतद्व्रतंततः॥ नंदिकेश
नकथितंदुर्वाससमुनयेनघः॥ दूर्वाससापिकथितमगस्त्यायव्रतोत्तमं॥ व्रतंतत्सागरेमह्यमगस्त्येनमहात्म
ना॥ मयातिक्लिन्नचित्तायवशिष्ठेव कथितंपुरा॥ तेनचीर्णंव्रतमिदंसर्वसौभाग्यदायकं॥ ब्रह्मणेकथितं
पूर्वमिदमेवव्रतंमया॥ तेनचीर्णंव्रतंसांगंवाणीप्राप्त्यर्थमादरात्॥ सूर्यायेंद्रायचंद्रायमयैतत्कथितंव्रतं॥
तैश्चचीर्णंव्रतमिदंसर्वसौभाग्यदायकं॥ कश्यपादिमुनिभ्यश्च कथितंव्रतमुत्तमं॥ तैश्चचीर्णंव्रतंसम्य
ग्भुक्तिमुक्तिफलप्रदं॥ भूपव्रतानिसंत्येवबहूनिविविधानिच॥ तथाप्येतद्व्रतसमंव्रतंनास्त्येवसर्वथा॥
भवानतिकुरुप्रीत्याभूपालव्रतमुत्तमं॥ इदंव्रतंशिवक्षेत्रेयःकरिष्यतिभक्तितः॥ तस्यसर्वार्थसंपत्ति

र्भवित्यैवनसंशयः॥ शिवउवाच॥ इतितद्वचनंश्रुत्वासराजाप्रीतमानसः॥ सपुत्रःपूजयामासगौतमंशैवपुं
गवः॥ ततोधर्मव्रतंचेदमुपदिश्यसगौतमः॥ पुनःसंपूजितोराज्ञास्वाश्रमंप्रतिसंययौ॥ राजासपुत्रस्तद्वाक्या
तइमंमाहेश्वराभिधं॥ व्रतंचकारविधिवद्यथाक्रममतंद्रितः॥ योमामनन्यहृदयाःसकलामरेशांसंपू
जयंतिसततंधृतभस्मयुक्ताः॥ तेमामुपेत्यविगताखिलदुःखबंधामद्रूपमेसुखेनोनिवसंतिविश्वे॥ ॥
इतिशिवरहस्येउमामहेश्वरव्रतं॥ ॥इदंयकर्नाटकेषुप्रसिद्धं॥ ॥अथाश्विनपौर्णमायांकोजाग
व्रतं॥ स्कांदे॥ अस्तिकोजागरंनामव्रतानामुत्तमंव्रतं॥ यत्कृत्वासमवाप्नोतिजंतुर्लोकाननुत्तमान्॥
पौर्णमास्यांयुजेमासिकौमुदीपरिकीर्तिता॥ तत्राराध्यमहालक्ष्मीमिंद्रंवैरावणस्थितं॥ उपवासंप्रकु
र्वीतदीपादद्याद्भक्तितः॥ लक्षंतदर्धमयुतंसहस्रंशतमेववा॥ घृतेनदीपयेद्दीपतिलतैलेनवाव्रती॥
रात्रौजागरणंकुर्यान्नृत्यगीतपुरःसरं॥ येहविन्नवतादेयाःप्ररोवीथिषुदीपिका॥ सुदेवतायतनेषु
आरामेषुगृहेषुच॥ ततःप्रभातेसुस्नातःसंपूज्यशतक्रतुं॥ ब्राह्मणान्भोजयेत्क्षीरघृतशर्करपाय २९

तस्यायमभिप्रायः॥ संपूर्णव्याप्तेरित्यत्र वचनेऽनुपादानादिनद्वयेसंपूर्णापराह्णव्याप्त्यभावेकतरदिन
निर्धारणे विनिगमकापेक्षायां याद्यतिथिगतवृद्धेरविनाभावेनतिथिवृद्धौ कुहूर्मतेतिवचनांचल
स्यानिरंकुशप्रवृत्याकुहुयमारभ्याशेषमुख्यकालव्याप्त्याच परत्रैवानुष्ठानं व्याप्तमिति॥ तेनदि
नद्वयेसमैकदेशव्याप्तौ कृत्स्नाव्याप्तौवा पूर्वामायाह्येति माधवसिद्धांत एवयुक्तो वन्यइतिसर्वमन
वद्यं। यदादिनद्वयेऽपराह्णस्पर्शस्तदाहिताग्नेःपूर्वानिरग्न्यादेरुत्तरा तथा चजाबालिः॥ अपराह्ण
द्वयाव्यापीयादिदर्शनतिथिक्षये आहिताग्नेः सिनीवाली निरग्न्यादेःकुहूर्मतेति॥ निरग्निमते
नाधिकारवतोग्निरहितस्यग्रहणादादिमास्त्रीशूद्रयोर्ग्रहणं तथा च गोभिलः॥ सिनीवालीद्वि
जःकार्यासाग्निकैः पितृकर्मणि। स्त्रीभिःशूद्रैःकुहूःकार्यातथाचानग्निकैर्द्विजैरिति॥ अतएव
जाबालिवचनस्थमाहिताग्निपदं पिंडपितृयज्ञाधिकारिसाग्निकमात्रोपलक्षणं॥ यएवाहिता
ग्नेधर्मःसएवौपासनिकस्येतिशास्त्रांतराच्चेति। वैषम्येणैकदेशव्याप्तावधिकायाह्या॥ तथाचसर्व २८०

निबंधोदाहृतस्मृत्यंतरे॥ अपराह्णद्वयव्यापिन्यमावास्यायदाभवेत्॥ तत्राल्पत्वमहत्वाभ्यां निर्णयः
पितृकर्मणीति अत्रयद्यपिन्यापिपदबलात्समस्तापराह्णव्यापिन्येव प्रतीयते तथाल्पत्वमहत्त्वपद
बलात्वैषम्येनैकदेशव्याप्तिविषयतैव कल्प्यते तेनाधिकव्याप्तेर्विग्राह्योतेइत्यनग्निकानांसाग्नि
कंचाश्वलायनास्तंबादीनां श्राद्धेन्वानिर्णयः॥ अतएवकातीयादीनां चंद्रदर्शनवति प्रतिपद्दिनेया
गनिषेधःस्तैनिर्णीतस्वस्वाधानदिने पिंडपितृयज्ञोत्तरममावास्याश्राद्धं कार्यं॥ पक्षांतंकर्मनिर्व
र्त्यवैश्वदेवं चसाग्निकः॥ पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइति॥ वाक्यात्॥ तत्रत्रेधाविभक्तदिनेतृ
तीयभागरूपापराह्णव्यापिन्यमावास्याग्राह्यापिंडान्वाहार्यकंश्राद्धं क्षीणे राजनिशस्यते वासरस्य
तृतीयंशेनापि संध्यासमीपइति छंदोगपरिशिष्टकात्यायनवचनात्॥ पिंडयज्ञंतु निर्वर्त्यवि
प्रःश्चंद्रःक्षयेग्निमान्॥ पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकमितिमानवेन पिंडपितृय
ज्ञानंतरविहितदर्शश्राद्धस्य मासेमासे क्रियमाणस्य प्राप्तत्वात् पिंडान्वाहार्यकमितितत्प्रख्यन्या

येन दर्शश्राद्धस्यैव नामधेयं॥ चंद्रक्षये तु अमायां॥ नातिसंध्यासमीपत इति अनेन त्रिमुहूर्तपरिमितः
सायान्हो निषिध्यत इति माधवमदनौ॥ युक्तं तु सायान्हांतर्गतदिनांत्यमुहूर्त एव निषिध्यते॥ अतिसंध्या
त्यस्य सार्थक्याय तत एव पिंडपितृयज्ञदर्शश्राद्धोभयानुष्ठानार्थं दिनांत्यमुहूर्तत्यागेन तत्पूर्वतनमुहू
र्तचतुष्ट्यापराह्णांशः कर्मद्वयपर्याप्तः कल्प्यते॥ सायान्हत्यागे त्ववशिष्टैकादश द्वादशमुहूर्त
योः पितृयज्ञश्राद्धानुष्ठानं दुर्घटं स्यादिति॥ पिंडपितृयज्ञोपि पूर्वाह्णो वै देवानां मध्यंदिनं मनुष्या
णामपराह्णः पितॄणामिति तत्प्रकरणपठितश्रुत्या त्रेधाविभक्तापराह्ण एव भवति॥ ॥इति श्राद्ध
मावास्यानिर्णयः॥ ॥अथ क्षयाहे पार्वणैकोद्दिष्टश्राद्धे तिथिद्वैधनिर्णयः॥ तत्र हेमाद्रिमदनर
त्नमते निर्णयः॥ दिनद्वये तुल्यापराह्णैकदेशव्याप्तावेव याद्यतिथिक्षये पूर्वा तिथिवृद्धौ तूत्तरा
न तु समस्तापराह्णव्याप्तौ॥ तत्र तिथिक्षयासंभवात्॥ तदाह बोधायनः॥ अपराह्णद्वयव्यापिन्यती २७१
तस्य यदा तिथिः॥ क्षये पूर्वा तु कर्तव्या वृद्धौ कार्या तथोत्तरेति॥ दिनद्वये संपूर्णापराह्णव्याप्तौ

क्षयाद्योत्रोत्तरतिथिरेवेत्युक्तं॥ उक्तं च दिनद्वयेप्यपराण्हव्यापिनी खर्वादिवचनबलात्तत्रैव॥ सर्वदा
रद्धविनाभावादिति माधवीयमदनरत्ने च यदुक्तं यदयुक्तमेव॥ खर्वादिवाक्यरातानां क्षयादी
नां याद्यतिथिगतत्वव्यवस्थापनादिति॥ तदयुक्तं॥ तत्र क्षयवृद्धिसामान्यान्युत्तरतिथिगता
निग्राह्यपीत्युपक्रमोपसंहारयोर्यदुक्तं॥ तदुत्तरतिथेः क्षयसाम्यबाधानवधानात्॥ परमतिथि
वृध्युत्तरदिने आकास्मिकक्षयस्य ज्योतिःशास्त्रप्रसिद्धेरित्याद्यनुपदमेव वक्ष्यते विस्तरेण॥ हे
माद्रिणा स्वयं चैकादशीनिर्णयेप्यक्रमेणोक्तं॥ यत्तु माधवग्रंथद्दूषणद्वयमुक्तं॥ तस्याप्यनवका
शः॥ तत्राद्यस्यैवं॥ क्षयाहप्रकरणपठितबोधायनवचने पराण्हद्वयव्यापिनी परस्यैवात्र व्या
पिपदाभावे न वचनेस्वरससत्तः सकलव्याप्तेरप्रतीतेरेकदेशसमव्याप्तेरेवात्र माधवेनाभिधा
नात्॥ द्वितीयस्यापि दिनद्वयेप्यपराह्णव्यापिनी खर्वादिवचनबलादुत्तरेत्यस्य माधवेनाभि
धानात्॥ एतावत्परं तेनोक्तं॥ कार्त्स्न्येनोभयदिनापराह्णव्याप्तौ तिथिवृद्धितात्कुहूरेव ग्राह्येति॥

क्षयवृद्धिसाम्यनालोचनेनसर्वदापूर्वैव॥ तदाहसुमंतुः॥ इहेतुव्यापिनीचेत्स्यान्मृताहस्यतुयातिथिः॥
पूर्वस्थान्निर्दयेत्पिंडमित्यांगिरसभाषितं॥ शिवरहस्यब्रह्मवैवर्त्तसौरेनारदीयपुराणेपि। दर्शंचपूर्ण
मासंचपितुःसांवत्सरंदिनं॥ पूर्वविद्धमकुर्वाणो नरकंप्रतिपद्यतइति॥ एकदेशापराह्णव्याप्तौतिथिसा
म्येचपूर्वैव॥ एताभ्यामेवदिनद्वयेसर्वथापराह्णसंबधाभावेनपिपूर्वैव॥ तदाहसुमन्तुर्गोभिलो॥ न
द्व्यहव्यापिनीचेत्स्यान्मृताहस्ययदातिथि॥ पूर्वविद्धैवकर्त्तव्यात्रिमुहूर्तापियाभवेत्॥ पूर्वेद्युःसा
यान्हेइतिशेषः॥ तथाचपूर्वदिनेसायान्हस्यायाहतिथिः॥ त्रिमूर्त्तान्वितदेवपूर्वाग्राह्येतिसिंहालोकनेन न
निर्णयः॥ एवमेवहेमाद्रिसिद्धांतोदीपिकायामुक्तः॥ यत्रान्यधिकापराह्णमयतेसास्यातिथिःपार्वणेसा
म्येनद्व्यपराह्णभागयुगसोवृद्धौतिथेरुत्तराग्राह्येति॥ ह्रासस्ससमत्वयोस्तुपूर्वतोथ्यानापराह्णस्य
ह्रासघट्यायाखिलमश्नुतद्व्यहगनासासर्वदाग्राह्यस्मृतेति॥ यत्तुहेमाद्रियथर्दशिभिर्माधवाचार्यै
स्संपूर्णापराह्णव्याप्तौग्राह्यतिथ्युत्तरतिथेःषष्टिघटिकापेक्षयावृद्धिक्षयसम्येषुनिपर्यायायप्रवृत्त॥

तत्र क्षये पूर्वोत्तरार्द्धयोर्व्याप्तिश्चेदपराह्णयोः॥ नग्राह्यतिथिगोचरधिक्षया द्वैधतिथेस्तुतो॥ साम्येतत्पूर्वति
थेर्ग्राह्यापरविद्धोरद्धिवतइतिसकारिको लिखित्वा निर्णयावसरेग्राह्यतिथ्युत्तरतिथिगतावेद्दद्धिक्ष
योनग्राह्यातिथिगतोक्तत्कादिनद्वयापराह्णव्यापित्वाभिधानात्॥ पूर्वद्युर्मध्याह्नावसानममावा
स्याप्रवृत्तेस्ततोपराह्णपक्षममारभ्यपरेद्युरपराह्णावसानपर्यंतत्वेसति प्रतिपदो द्युपराह्णव्याप्त्व
पित्वंभवति॥ तत्रत्रिमुहूर्तदृध्याचसपाद्यतेनतुक्षये तथासति क्षयेपूर्वातु कर्त्तव्येत्येतन्नोपपद्येत
उत्तरतिथिगतक्षयस्वीकारेत्वसुतरामिदंवचनमुपपद्यते॥ तथाहि॥ यदापरेद्युर्द्वितीयासायान्हं प्रविश
तिथिगतक्षयस्वीकारेत्वसुतरामिदंवचनमुपपद्यते॥ तथाहि॥ वृद्धिः॥ तत्रपरेद्युरनुष्ठानंनाय्ये॥ त
न्मारभ्याशेषमुख्यकालव्यापित्वात्॥ यदाद्वितीयापरेद्युपराह्णेपिक्रियती क्षीयते तदाप्रतिप
न्न पूर्वविद्धा कर्त्तव्या॥ उत्तरविद्धायाः प्रतिपदोज्योतिःशास्त्रप्रक्रिययाज्यराह्णव्यापित्वेपिपारि
भाषिक्यातद्व्यापित्वान्तथावस्मर्यते॥ तिथ्यादौतुभवेद्यायान्‌ह्रस्वो वृद्धिःपरेहनितावान्नग्रा ३५२

लभ्यते तत्तथैवस्फुटतरं तिथ्यादिपत्रे ॥ तेन सूत्रे पूर्वेति बोधायनस्य वचनो बलोनिर्विषय एव भवन्म
तेस्यात् ॥ स्याच्चोत्तरतिथिसाम्ये उत्तरेति देवस्वामिवचनवैयर्थ्यं । तेन तिथ्यादौ भवेद्यावन्न्हासइति
स्मृतिवचनाच्च बलबोधितन्ह्रासस्य ग्राह्यतिथौ प्रक्षेपणोत्तरविद्धाप्रतिपन्नसंपूर्णापराह्णव्यापिनी
पूर्वविद्धा तु संपूर्णपराह्णव्यापिनीति सैव ग्राह्येति माधवाचार्यकल्पना क्लेशो गर्भस्त्रावेणैव गलित
इति ॥ यत्तु कालनत्वविवचनेन व्येकसंपूर्णापराह्णव्याप्तौ तिथिक्षये पूर्वा वृद्धौ परेति बोधायनवचन
विषय इति तेषु मते पूर्णो वा एवमेव वा ॥ सर्वसंपूर्णतोयस्तु प्रसादाद् द्रवतां मम ॥ इति संप्रार्थ्य ते ता
न्विप्रान्प्रणम्य च पुनः पुनः ॥ ततश्च स्वजनैः सार्धं स्वयं भुंजीत सव्रतं ॥ ॥ इति एकादशीवरा च्यधा
पनं ॥ ॥ इति श्री भट्टनीलकंठात्मज शंकरभट्टकृतौ व्रतार्के एकादशीव्रतानि ॥ ॥ अथ पूर्णि
माव्रतानि ॥ तत्र ज्येष्ठपूर्णिमायां वटसावित्रीव्रतं ॥ तत्र पूर्वविद्धा ग्राह्या । पूर्वविद्धा न कर्तव्या
अमावस्या च पूर्णिमा ॥ वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् इति ब्रह्मवैवर्तात् । वर्जयित्वेति २७३

रिशेषासंपूर्णापराह्णव्याप्तौ तिथिसाम्ये पूर्वैव वृद्धौ हि तु व्यापिनीति सुमंतुवचनविषयस्तु तत्रात्र क्षयवृ
द्धिसाम्यानि दिनद्वयेसंपूर्णकोलत्वात्तेष्वेकनियतत्वात तिथावसंभवेन ग्राह्यतिथ्युत्तरतिथिगतानि
ग्राह्याणीति वोक्का मदनरत्नमतं दूषितमेवं सुमंतु बोधायनवचनयोः संपूर्णकालव्याप्तावेवस्पष्ट
प्रतीयमानायोकेन विशेषेण बोधायनमेकदेशव्याप्तिविषयं क्रियते एकदेशव्याप्तिविषयत्वे चैतस्य
तद्गतयोः क्षयवृध्योरुत्तरतिथिगतत्वं निःप्रमाणं ॥ तदा तन्निगतयोरेव तयोः संभवान्न च स्कंदादिवा
क्यवदत्रापि ग्राह्यतिथिगतावेव वृद्धिक्षयावस्त्विति वाच्यं तथा सत्ये कोद्दिष्टादिवृद्ध्यादौ ह्रासवृद्धि
चोदनेति वचनात् सर्वपित्र्यविषयेण स्कंदवाक्येनैव निर्णयसिद्धौ क्षयाह बोधायनवचनं पुनरर्थ
कंस्यात्तदुपात्तयोः क्षयवृध्योः स्कंदादिवाक्यसमानार्थत्वात् साम्यस्य त्वनुपादानमेव । वृद्धिगोच
रपरपुनर्वचनस्य साम्य गोचरपरनिवृत्त्यर्थत्वे तु परिसंख्यापत्तेः ॥ तस्मादस्मदुक्तमेव साधीय इति
तदसाधीय एव दिनद्वयसंपूर्णापराह्णव्याप्तौ क्षयसाम्ययोर्ग्राह्यतिथिगतयोरेव तदुत्तरतिथिग

तयोरपि सर्वथाबाधात्॥ क्षयोदाहरणवदुदाहरणसंभवमभिप्रेत्यैव मदनरत्नकारेण भासमानतु
ल्यार्थयोरपि सुमंतुबोधायनवचनयोः सुमंतुवचनस्य स्वरसतः प्रतीयमानसंपूर्णव्यापित्वे च निःसं
कोचेन सर्वदा पूर्वैवतिविषयत्वात्संभवोसंभवश्च बोधायनीयस्य क्षयवृध्योरुपादानात् तत्र
क्षयस्य ग्राह्यतदुत्तरतिथिगतत्वस्य बाधादेकदेशाविषयत्वकल्पनादुक्तः। यत्तु बोधायनीयस्यैक
देशव्याप्तिविषयत्वं तत्तु तयोः क्षयवृध्योरुत्तरतिथिगतत्वं निःप्रमाणकं तदा ग्राह्यतिथिगतयोरेव
तयोः संभवादित्युक्तिरयुक्तैवं तन्न्यायेनोपेक्षणीयैवेयं उत्तरतिथिनाम्नापि मदनेनाकथनात्॥ य
त्तु खर्वादिवाक्यवद्ग्राह्यतिथिगतत्वे क्षयवृध्योर्बौधायनवचनानर्थक्यापादनं॥ तदपि॥ खर्ववा
क्येन वृद्धिसाम्ययोः पराक्षये पूर्वेति प्राप्तौ क्षयो दर्विशेषविहितेन तु दर्शे च पौर्णमासं चेत्यनेन दिनद्व
यापराह्णव्याप्तावव्याप्तौ चैकदेशव्याप्तौ वा क्षयवृद्धिसाम्येषु सर्वत्र प्राप्त पूर्वविद्धेत्यनेन बाधिपर
विद्धाप्रतिप्रसवार्थत्वेन बोधायनवचनस्य सार्थक्यात् एतेन वृद्धिगोचरपरपुनर्वचनस्य साम्य २७५

स्य पूर्वेद्युः रहः पोपिस्वकर्मणीति॥ तथा सति प्रकृते उत्तरविद्धा प्रतिपन्नापराह्णव्यापिनी पूर्वविद्धात्वपराह्ण
व्यापिनीति सैव गृहीतव्या भवतीति ग्रंथेन बोधायनवचनविषये मुक्तेऽनंतरं च ग्राह्यतिथ्युत्तरतिथेः सा
म्ये संपूर्णापराह्णव्याप्तौ देवस्वामिवचनादुत्तरा एकदेशसमव्याप्तौ खर्ववाक्येन निर्णय इत्युक्तं त
दत्यंतासंगतं॥ संपूर्णापराह्णव्याप्तौ ग्राह्योत्तरतिथेः षष्टिघटिकापेक्षया क्षयसाम्ययोरुदाहरणस्य
गगनकुसुमायमानत्वात्॥ तथाहि॥ दिनद्वये संपूर्णापराह्णव्याप्तिर्ग्राह्यतिथिः पंचघटि
कारूपपरमवृद्धित्वमपि निर्विवादमेव। एतादृशापरमवृध्यनंतरदिने षष्टिघटिकापेक्षया मुहूर्तद्वि
याधिकोत्तरतिथिर्वृद्धिरेव भवति न कदाचिदप्युत्तरतिथेः षष्टिघटिकापेक्षया क्षयसाम्यं भवेत् भ
वतश्च पूर्वतिथ्यपेक्षयैव ते॥ तत्र यदापरदिने पूर्वतिथ्यपेक्षया ह्रासस्तदा सार्धघटिकानधिक
एव॥ ततः परं ततोधिकोपीति क्रमेण षष्टिघटिकातोपि षट्घटिकापर्यंतं भवतीति तिथिः चतुःपंचा
शत्घटीमिततिपरमह्रासः। अतएव बाणवृद्धिरसक्षय इत्यादि सर्वज्योतिःशास्त्रप्रसिद्धतरं॥ उप

टिका १०।७ ।अमापंचविंशति पलाधिकपंचदशघटिका॥१५।२५। प्रतिपत्पंचाशत्पलाधिकविंश
तिघटिका।२०।५५। अत्रामाभोगोष्टादशपलाधिकपंचषष्टिघटिकामितः।६५।१८। प्रतिपद्भोगः
सार्द्धपंचषष्टिघटीमितः ६५।३०। एवंसतिद्वादशपलानिपूर्वतिथ्यपेक्षयाग्राह्यप्रतिपतिथेर्वृद्धि
स्यैष्टव॥साम्योदाहरणं यथा॥दर्शचतुर्दशीदशघटिका १० अमापंचविंशतिपलाधिकपंचदश
घटिका १५।२५ प्रतिपत्पंचाशत्पलाधिकविंशतिघटीमिता २०।५० अत्रामप्रतिपदोःपंचविं
शतिपलाधिकपंचषष्टिघटीमितः।६५।२५ भोगइतिपूर्वतिथ्यपेक्षयाग्राह्यप्रतिपतिथेःसाम्यं
इत्युदाहरणत्रयमपिस्फुटत्तरं॥एवंमष्टाविंशतिघटीमितद्दिनमानावधिक्षयाद्युदाहरणानि
सुधीभिर्नीतिदिक्॥ ॥इतिश्राद्धामावास्यानिर्णयः॥ ॥अथपौर्णिमांतमासेनकार्ति
कक्रष्णामायांप्रभातेतैलाभ्यंगस्नानं॥तथाचचतुर्दशीस्नानमाभेधायभविष्योत्तरे॥एवं
प्रभातसमयेत्वमावास्यानराधिप॥स्नात्वादेवान्पितृन्भक्त्यासंपूज्याप्पप्रणम्यचेतिएव ३७५

गोचरपरनिवृत्यर्थत्वे परिसंख्यापादानमपास्तं॥ तस्माद्बौधायनवचनगतक्षयादयो ग्राह्यतिथ्युत्तरतिथि
गता एव ग्राह्या इति माधवाचार्यतदर्वाचीनानां सर्वेषां मुक्तिर्गगनकुसुमायमानेव॥ हेमाद्रिमदनरत्न
रत्यकर्दृङ्व्यापित्वेन ग्राह्यतिथिगता एव यादय इत्युक्तिः संभवदुक्तिकापि व्यापिनी पदानर्थस्य ग्रस्तेति
तत्सार्थक्ययोमयदिनसंपूर्णपराह्णव्याप्तौ पूर्वतिथ्यपेक्षया ग्राह्यतिथिगतक्षयाद्युदाहरणानि सद्रूप
ज्ञानि। तथाहि। यदा दिनमानं षड्विंशतिघटिकामितं॥ २६ तदा पूर्वतिथ्यपेक्षया ग्राह्यतिथिगतक्षयो
दाहरणं॥ चतुर्दशी दशघटिका॥ १०। अमावास्या सार्धपंचदशघटिका। १५।३०॥ प्रतिपच्च चत्वारिं
शत्पलाधिकविंशद्घटिका २०।४८। अत्रामाभोगः सार्द्धपंचषष्टिघटीमितः। ६५।३०। प्रतिपद्भोगोष्टाद
श पलाधिकपंचषष्टिघटीमितः ६५।१८ एवं च सति ग्राह्याया प्रतिपत्तिथिर्दिनद्वयसंपूर्णपराह्णव्याप्तिः
पूर्वतिथ्यपेक्षया ग्राह्यप्रतिपत्तिथिगत एव च क्षयो द्वादशपली क्षयोदाहरणसंभवात्। तत्र प्रति
पन्निमित्तकं श्राद्धममायुक्तप्रतिपद्येव भवति॥ वृद्ध्युदाहरणं यथा॥ चतुर्दशी सप्तपलाधिकदशघ

प्रभातसमयेत्वमावास्यानराधिप॥ स्नात्वादेवान्पितॄन्भक्त्यासंपूज्याप्यप्रणम्यचेतिएवमित्येनेन
तैलाभ्यंगादरात्दिशः।अस्यामेवप्रदोषसमयेदीपदानादिकार्यं॥ तथाचामोप्रकृत्यादित्यपुराणे॥दिवा
तत्रनभोक्तव्यंकृतेबालातुराज्जनात्॥ तत्रामावास्यायां। प्रदोषसमयेलक्ष्मींपूजयित्वायथाक्रमं॥
दीपवृक्षास्तथाकार्याःशक्त्यादेवगृहेषुच॥ वस्त्रैःपुष्पैःशोभितव्याक्रयविक्रयभूमयः॥ दीपमालाप
रिक्षिप्तप्रदेशेतदनंतरं॥ ब्राह्मणान्भोजयित्वादौसंभोज्यचबुभुक्षितान्। अलंकृतेनभोक्तव्यंन
ववस्त्रोपशोभिता॥। स्निग्धैर्मुग्धैर्दिदग्धैश्चनिवृत्तेब्राह्मणैःसहेति॥ अत्रप्रदोषस्यकर्मकालत्वा
त्प्रदोषव्यापिनीग्राह्या॥ दिनद्वयेतद्व्याप्तावव्याप्तौवाउत्तरैव॥ कृत्वातुपार्वणश्राद्धंदधिक्षीरघृतादि
भिः॥भोज्यैर्नानाविधैर्विप्रान्भोजयित्वाक्षमापयेत्॥ ततोपराह्णसमयेघोषयेन्नगरेनृपेत्यादिरा
जकर्तव्याभिधानमध्येदीपमालाकुलेरम्येविध्वस्तध्वांतरात्रये। प्रदोषेदोषरहितेशस्तेदो
षागमेशुभइत्यनेनपार्वणश्राद्धानंतर्यानुग्रहात्॥ ज्योतिर्निबंधेचस्पष्टं॥ अमायामाश्विन

मासि पितृकर्म विधाय च ॥ दीपदानं ततः कुर्यात् प्रदोषे च तथोल्मुकमिति ॥ यदा तु पूर्वेद्युरेव प्रदोषे तदा पू
र्वेद्युरेव दीपदानं न तु परदिने तु पार्वणश्राद्धोत्तरं क्रमस्य कालाद्दुर्बलत्वात् ॥ अखंडामायाएव प्रा
यो व्यवहार्यत्वेन प्राप्तत्वात्क्रमस्याविधेयत्वाच्च ॥ दिनद्वये तद्व्याप्तौ पूर्वैव ॥ गौणकालसत्त्वादिति
तातचरणाः ॥ उल्कादानमपि प्रदोषव्यापिन्यामेव कार्यं ॥ तुलासंस्थे सहस्रांशौ प्रदोषे भूतद
र्शयोः ॥ उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनमिति ज्योतिर्निबंधवचनात् ॥ तुलाग्रहणं प्रा
शस्त्यार्थं ॥ कार्तिके शुक्लप्रतिपदि तैलाभ्यंगस्नानमुक्तं नारदसंहितायां ॥ ऊर्जादौ स्वातिसंयु
क्ते तदा दीपावली भवेत् ॥ तैले लक्ष्मीर्जले गंगा दीपावलितिथौ वसेत् ॥ अलक्ष्मीपरिहारार्थमभ्यं
गस्नानमाचरेदिति ॥ अकरणे अनिष्टमप्याह वृद्धवसिष्ठः ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥
तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति ॥ अत्र पूर्वविद्धा ग्राह्या ॥ पूर्वविद्धा प्रकर्तव्या शिवरा
त्रिर्बलेर्दिनमिति बृहद्यमोक्तेः ॥ अस्यामेव द्यूतमुक्तमादित्यपुराणे ॥ कार्तिके शुक्लपक्षे तु

२७६

प्रसयेत् पंचरंगकृतामूर्तिं राजा प्रपूजयेत्॥ अन्यस्तु लोकः शुक्लतंडुलकृतामित्यर्थः॥ बलिपूजामं
त्रः॥ पाद्मे॥ बलिराम नमस्तुभ्य दैत्यदानववंदित॥ इंद्रशत्रोमराराते विष्णुसांनिध्यदो भवति॥ ब
ल्युद्देशेन दीपदानमुक्तं॥ वामनपुराणे॥ कार्त्तिके शुक्लपक्षे प्रकल्प्य वीरप्रतिपदं प्राप्य तव भावी म
होत्सवः॥ तत्र त्वां नरशार्दूल हृष्टाः स्वच्छकृताः॥ अर्घ्यदीपप्रदानेन अर्चयिष्यंति मानवाः॥ बलिरा
जन्नमस्तुभ्यं विरोचनसुत प्रभो॥ भविष्येंद्रसुराराते पूजेयं प्रतिगृह्यतामिति॥ गोवर्द्धनपूजा
दि स्कांदे॥ प्रातर्गोवर्द्धनः पूज्यो द्यूतं चापि समाचरेत्॥ पूजनीयास्तथा गावः त्याज्यं वाहनदोह
ने॥ इति पुराणसमुच्चये॥ नंदाध्युतत्रैव पूजये त्सुरभी स्तयेति॥ तथा॥ स्त्रियः क्रीडंत्यमावा
स्यां गावो नंदास्तु कार्त्तिके इति॥ नंदा प्रतिपत्। तत्संबधिनि उदयोसूर्योदयोपलक्षिते प्रातः
काले यद्यप्येतद्वचनात्प्रातःकालव्यापिनी प्रतिपद्ग्राह्येति प्रतिभाति तथापि प्रतिद्दर्शिसंयोगे क्री २७७
डनं तु गवां मतं॥ परविद्धेषु यः कुर्यात्पुत्रदारधनक्षयः॥ या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृ

प॥ पूजने त्रीणि वर्द्धंते प्रजा गावो महीपतिः॥ गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमा॥ सोमो राजा पशून् ह
न्हंति सुरभी पूर्वकं तथैतिदेवलोकेन परविद्धा निषेधाद्दमा विद्धैव ग्राह्या॥ चंद्रदर्शनाभावेति द्वितीया
विद्धैव त्रियाम गा दर्शातिथिर्भवचेत्तु सार्द्धत्रियामा प्रतिपद्वृद्धौ॥ दीपोत्सवे तु मुनिभिः प्रदिष्टेऽ
तोन्यथा पूर्वयुतविधेये वर्द्धमानतिथौ नंदा यदा सार्द्धत्रियामिका॥ द्वितीयावृद्धिगामित्वात् उत्तरा त
त्रोच्यते इति मदनरत्नधृतवचनात्॥ तेदर्शप्रतिपदो॥ तथा च ततो पराह्णसमये घोषयेन्न
गरे नृपेत्यादिना विहितराजकर्तृकं कर्म प्रतिद्दिहितं॥ क्रीडनं च दीपोत्सवप्रदे नोच्यते न तु दीप
दानं तथा सति तत्र विहित प्रदोषकालबाधप्रसंगात्॥ नीराजनमंगलमालिके तूत्तरस्यामेव कर्तव्ये॥
तथा च ब्रह्मपुराणे॥ कार्त्तिके शुक्लपक्षे तु विधानाद्दितव्यं हितं॥ नारी नीराजनं प्रातः सायं गं
इमालिकामिमिति॥ अथ मार्गशीर्षमायां गौरीतपोव्रतं॥ ॥सूत उवाच॥ इंद्राणी प्रांजलिर्भू
त्वा स्वपतिं वाक्यमब्रवीत्॥ एकं व्रतं समाचक्ष्व पुत्रपौत्रसुखप्रदं॥ इति वाक्यं तदा श्रुत्वा

चवचनं शची ॥ शृणु चार्वंगि सकलं यन्मया सुकृतं कृते ॥ बृहस्पतेस्तु जनकः पृष्टश्चाह गिरा सुधीः ॥
यद्व्रतं कथयाम्यद्य सद्यः सुखकरं परं ॥ पतिपुत्रसुखावाप्तिर्जायते जगति स्थिरा ॥ गौरीप्रीत्यर्थमे
वादौ स्त्रीभिर्यत्क्रीयते तपः ॥ गौरीतप इति ख्यातं तस्मात्तद्व्रतमुत्तमं ॥ तस्मात्स्त्रिया तपोभिश्च तोषणीया
शिवप्रिया ॥ आदौ मार्गशिरे मासि ह्यमावास्या दिने शुभे ॥ गृह्णीयान्नियमं तत्र दंतधावनपूर्वकं ॥
उपवासस्य नक्तस्य गौरीश प्रीतये मुदा ॥ ईशार्धांगहरे देवि करिष्ये हं व्रतं तव ॥ पतिपुत्रसु
खावाप्तिं देहि देवि नमोस्तु ते ॥ नियममंत्रः ॥ ततो मध्याह्नसमये स्नात्वा नद्यादिषु व्रती ॥ सूर्याया
र्घ्यं ततो दत्वा ध्यात्वा गौरीश्वरं हरं ॥ अहं देव व्रतमिदं कर्तुमिच्छामि शाश्वतं ॥ तवाज्ञया महादेव त
त्र निर्विघ्नं कुरु ॥ उक्त्वैवं नियमं गृह्णन् वर्षाण्येव तु षोडश ॥ गृहमागत्य पूजार्थं उपचारान् प्रक
ल्पयेत् ॥ शिवालयं ततो गत्वा शिवं संपूजयेत्सुधीः ॥ गौरीमभ्यर्चयेत्पश्चात् विधिनानेन तं २७८
शृणु ॥ पार्वतीति ततः पादौ जान्वो हैमवतीति च ॥ जंघयोरंबिकेत्येव गुह्यं गिरिशवल्लभे ॥

प्रथमेहनि सत्यवत् ॥ शंकरस्तु पुरा द्यूतं ससर्ज सुमनोहरं ॥ जितश्च शंकरस्तत्र जयं लेभे च पार्वती ॥ तस्मा
द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः ॥ तस्मिन् द्यूते जयो यस्य तस्य संवत्सरं जयः ॥ पराजये विरुद्धं तु लब्ध
नाशस्ततो भवेत् ॥ श्रोतव्यं गीतवाद्यादि स्वनुलिप्तैः स्वलंकृतैः ॥ विशेषवत्र भोक्तव्यं प्रशस्तैर्बांधवैः
सह ॥ तस्यां निशायां कर्तव्यं शय्यास्थानं सुशोभनं ॥ गंधैर्वस्त्रैस्तथा पुष्पैरत्नमाल्यैरलंकृतं ॥ दी
पमालापरिक्षिप्तं तथा धूपेन धूपितं ॥ दयिताभिश्च सहितैर्नेया सा च भवेन्निशा ॥ नैवेर्वस्त्रैश्च सं
पूज्या द्विजसंबंधिबांधवाः इति ॥ अस्यामेव रात्रौ बलिपूजा उक्ता भविष्ये ॥ कृत्वेतत्सर्वमेवेह रात्रौ दै
त्यपतेर्बलेः ॥ पूजा कृता नृपः साक्षात् भूमौ मंडके कृते ॥ बलिमाख्य दैत्येंद्रं वर्णकैः पंचरंगकैः ॥ सर्वाभ
रणसंपूर्णं विंध्यावल्या समन्वितं ॥ कूष्मांडबाणजंभोरुमुरुदानवसंवृतं ॥ संपूर्णहृष्टवदनं किरीटोत्क
टकुंडलं ॥ द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयं ॥ गृहस्य मध्ये शालायां विशालायां ततोर्चये
त् ॥ लोकस्यापि गृहख्यातैः शय्यायां शुक्लतंदुलैः ॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च

तएतद्व्रते नारी पश्चादुद्यापयेद्व्रतान्॥ तिथिमेकां समाप्येदं दंपती भोज्य शक्तितः॥ परिधाप्यखलंकृत्य वा
सोभिर्भूषणं जनेः॥ माल्यैः सुगंधैर्विविधैः फल सिंदूर कुंकुमैः॥ संतोष्य समनुज्ञाप्य स्वयं भुंजीत बंधुभिः॥
एवं द्वितीयवर्षे च प्रतिपद्याद्यापरे तिथीः॥ वर्षे वर्षे क्रमादेवं द्वितीयादिषु वा चयेत्॥ एवं षोडशवर्षाणि कृत्वा वै
वत्सवत्सरं॥ पश्चादुद्यापनं कुर्याद्व्रतं संपूर्ण हेतवे॥ मार्गशीर्षेथ संप्राप्ते मासे गोरीश्वरो प्रिये॥ पोर्णमास्यां
दिनेराभ्ये निमंत्र्य द्व्यष्टदंपतीन्॥ मध्यान्हे ष्टदले पद्मे मोनी नारीः समर्चयेत्॥ यथोक्तेन विधानेन पुष्पधू
पादिभिस्तथा॥ सोहालिभिश्च कासारैः पूपाद्यैश्च भामिनि॥ पायसेन घृतेनापि शर्करामोदकैस्त
था॥ पूरयित्वा द्व्यष्टसंख्यान् धातुमन्मय संपुटान्॥ दंपतीभोजयित्वा तु तेभ्यो दद्याद्यथाविधि॥
अलंकृत्य यथा शक्त्या गोरी मे प्रीयतामिति॥ गुरवे लक्षणोपेता गोरी कनकनिर्मिता॥ दद्याद्धेनुं
सुपयसां सवत्सां संवत्सांस्तस्य दक्षिणां॥ अन्यन्यापि यथा शक्त्या दद्याद्दानानि भामिनी॥ यद्यदि
ष्टतमं लोके तत्तद्देयं द्विजन्मने॥ चापल्यमायुषो ज्ञात्वा संवत्सपि वसेद्दरि॥ षोडशाब्दं व्रतमिदं कु २७२

र्याद्धर्षेण भक्तितः॥ गोरीतपोव्रतमिदं या करोतीह भामिनी॥ बाल्ये योवन काले वा वार्द्धके वा हरिप्रिये
तस्याः सोभाग्यमतुलं धनधान्यसुतान्वितं॥ भवेद् व्याहतैश्वर्यं भत्व सोख्यं न संशयः॥ दुर्लभं मानवं ज
न्म तत्रापि द्विजजन्मना॥ सदाचार परत्वं च तत्रापि तु विशिष्यते॥ एववार त्रयं या स्त्री कुरुते व्रतमुत्तमं॥
मातापित्रोः प्रियं वापि प्र---द्धवं शतां॥ निर्मलं जन्म नो वापि मनस्सश्चापि संपदः॥ लभते शुभतेजश्चा
पतिपुत्रसमन्विता॥ इह भोगान्यथा कामं भुक्त्वा स्वर्गमवाप्नुयात्॥ इत्यं गिरो वचन मप्पपुरापुराणां गोरी
तपोव्रतमिदं विदधेयथेष्ठ॥ तस्य प्रभाव वचनात्सुलभं हि सत्यं स्वाराज्य सोख्यमतुलं पतिपुत्रयुक्तं
इति गोरीतपोव्रतं॥ ॥ इदमेव महाव्रतापरनायकमुक्तं हेमाद्रौ कालिकापुराणे॥ निल्हाद उवाच॥
माहाव्रतमथो वक्ष्ये येनारोहति तत्पदं॥ गोरीतपोव्रतं वक्ष्ये इत्यपि क्वचित्पाठः॥ सुरासुरमुनीनां च
दुर्लभं तद्विधिं शृणु॥ पर्वरायाश्वयुजस्यान्ते पायसं च घृतप्लुतं॥ नक्तं भुंजीत शुद्धात्मा ओदनं वेक्ष
वान्वितं॥ आश्वयुजस्यांते कार्त्तिके पर्वणि॥ अमावास्यायां कार्त्तिकादर्शे इत्यर्थः॥ एकं वं इक्षु

रसः ॥ शर्वव्यंते शुचिर्भूत्वा बिल्वजं दंतधावनं ॥ भुक्त्वा चैवं महादेवं नत्वा भक्तियुतो व्रती ॥ अहं देव
व्रतमिदं कर्तुमिच्छामि शाश्वतं ॥ तवाज्ञया महादेव तत्र निर्वहणं कुरु ॥ उक्त्वा मन्त्रियमं गृह्य वर्षाण्ये
वं तु षोडश ॥ तिथीः मतिपदाद्यास्तु पारयिष्याम्यनुक्रमात् ॥ ततो मार्गशिरे मासि प्रतिपद्यपरेहनि ॥ उपा
से कुरु पृष्ठ्वा महादेवस्य मुन्मुक्तः ॥ महादेवं स्मरं विप्रान् भक्ष्य छन्नविग्रहान् ॥ षोडशाष्टो तदर्धं वा दं
पतीश्च निमंत्रयेत् ॥ देवं च नक्तमासाद्य द्वीपान्प्रज्वाल्य षोडश ॥ पशुनाथं महादेवं भक्त्या नत्वा निवेद
येत् ॥ आमंत्र्य च गृहं गत्वा महादेवं स्मरन्नुषितो ॥ शुचिवस्त्रास्तृतायां तु निराहारो निशी स्वपेत् ॥ अ
थोदये सहस्रांशोः स्नात्वा चादाय दीपकान् ॥ नैवेद्यं स्नपनाद्यं चादाय गच्छेच्छिवालयं ॥ स्नापयेत्तं
च गव्येन घृतेन तदनंतरं ॥ मधुना च तथा दध्ना भूयश्च पयसा तथा ॥ रसेन चाथ खंडेन पलेश्च स्न
पयेत्पुनः ॥ तिलांबुना ततः स्नाप्य पश्चादुष्णेन वारिणा ॥ लेपयेत्स्नपनं पश्चात्कर्पूरागरुचंदनैः ॥ एवं
संपूज्य ते भक्त्या हेमन्यस्य व्रजेद्गृहे ॥ हेम सुवर्ण पुष्पे ॥ नानाफलैश्चैव संपूज्य दद्यान्नैवेद्यमेव हि ॥ २८०

नाभिं गंभीरनाभीति अपर्णेत्युदरं पुनः ॥ महादेवीति हृदये कंठे श्रीकंठकामिनी ॥ सुरेशेषण्मुखमातेति
ललाटे लोकमोहिनी ॥ मेनकाकुक्षिरत्नेति शिरस्यर्चयेत्ततः ॥ दक्षिणगणाय पूज्या वामे रुद्रः सगह
नः ॥ धूपदीपादिनैवेद्यं कृत्वा नत्वा प्रदक्षिणं ॥ फलेनार्घ्यं ततो दत्वा ध्यात्वा देवीं महेश्वरीं ॥ कृत्वा तां
म्रमयं पात्रं मृन्मयं वा शुभानने ॥ अष्टतंतुमयीं मूर्तिं तस्मिन्पात्रे निवेशयेत् ॥ घृतेनापूर्य गव्येन ततस्ता
त्रे विमलवच ॥ दीपमुज्वालयेत्पश्चाद्यावत्सूर्योत्तरे स्थितः ॥ एवं संक्षिप्य तां रात्रिं जागरेण स
मन्वितां ॥ ब्राह्मे मुहूर्ते ह्युत्थाय पूजयेद्द्विजदंपती ॥ कुर्याद्दौर्भाग्यदलनी पाकाग्निशमनी तदा ॥ प
क्वान्नेन गुडान्नाद्यैः पूर्णापूर्णफलप्रदा ॥ ऋतुद्भवैः फलैश्चैव पूरिकातिलतंडुलैः ॥ सौभाग्याष्ट
कसंयुक्तं पात्रं कुर्यात्सुधातुकं ॥ तस्योपरि गतं दीपं ताम्रमये तिथि नामभिः ॥ सुवासिनी वचो याल्पं दीपं
स्सूर्याय दर्शयेत् ॥ यावत्कलकलाशब्दकुर्वंति बककाकाः ॥ तावत्पुरस्तात्कर्तव्यमिदं समवादरा
त्मगे ॥ उत्तिष्ठंते यदि नगात्तद्विहगाश्चारु लोचने ॥ तदाकर्णनमात्रेण सौभाग्यं व्रजति स्त्रिया ॥ अ

ग्रहंगत्वायथास्थायंहिरण्यरेतसंविभुं ॥ जातवेदसमाधायतर्पयेत्तिलसर्पिषा ॥ व्रतिनश्चतथाचार्यंमिथु
नानिचभोजयेत् ॥ हेमवस्त्रादिदानेनयथाशक्त्यातुदक्षयेत् । एवंविसृज्यतान्सर्वान्सार्धंबंधुजनैःस्व
यं । पीत्वादौपंचगव्यंचहृष्टोभुंजीतवाग्यतः ॥ यत्किंचिदंतदुदृष्टंमहादेवमुदीरयेत् ॥ प्रारंभमविधिंकुर्याद्द
रिद्रोपाथचेश्वरः ॥ वित्तसामर्थ्यतश्चैवप्रतिमासंचतंचरेत् ॥ स्वल्पवित्तोथवाकश्चिल्लुप्यादौकार्त्तिका
वधि ॥ नक्तंकृत्वात्वमावास्यांप्रागुक्तविधिनाततः ॥ प्रतिपद्यामुपोष्यैवंपंचगव्यंपिबेच्छुचि ॥ महादेवंस्म
रन्सार्धंभक्त्याभुंजीतलिंगिभिः ॥ मासस्यकार्तिकस्यांतेकृत्स्नंप्राग्विधिनाचरेत् ॥ प्रतिपदंद्वितीयांचउ
भेतिथ्यामुपोषयेत् ॥ एवंपौषेतुसंप्राप्तेप्रतिपन्नक्तमाचरेत् ॥ द्वितीयेद्वेद्वितीयांतामुपवसेत्कार्त्तिकाव
धि ॥ अद्दृहीततिथिंचैकांमार्गमासेतथापरां ॥ पूर्ववत्संत्यजेत्पौषेप्रत्यब्दंचैवमाचरेत् ॥ दर्शेनक्तं ॥ प्रतिपद्यु
पवासइतिप्रथमेवर्षे ॥ दर्शेप्रतिपदिचनक्तंद्वितीयायामुपवासोद्वितीये ॥ प्रथमेमासिप्रतिपदिनक्तं ॥
द्वितीयातृतीययोरुपवासः ॥ शेषेषुद्वितीयायांनक्तं ॥ तृतीयायामुपवासइतितृतीये ॥ एवंशेषवर्षे

षु॥कृत्वैवंषोडशेवर्षेपौर्णमास्यासमुद्गमे॥कार्त्तिक्यामुद्यमेइत्यर्थः॥पूर्ववद्देवमभ्यर्च्यकुर्यात्तुधा
त्रिपर्ययेत्॥महादेवायगांदद्याद्दीक्षितायद्विजायच॥हेमशृंगांसवत्सांचसघंटांकांस्यदोहनी॥शिवव्र
तधरान्विप्रान्महाचार्यांश्चषोडश॥संयोज्यहेमवस्त्राद्यैर्यथाशक्तिनुदक्षयेत्॥छत्रोपानहकुं
भांश्चदद्यात्तेभ्यःपृथक्पृथक्॥भोजयेत्तान्विसृज्यैवंमिथुनानितुषोडश॥ब्राह्मणांश्चयथाशक्त्या
भोजयेद्वेदपारगान्॥एवंमहाव्रतंचैतद्ब्रह्मघ्नोप्यघमर्षणं॥धन्यमायुःप्रदंनित्यंरूपसौभाग्यदं
परं॥स्त्रीहसोश्चैवनिर्दिष्टंव्रतमेतत्पुरातनं॥विधवायापिकर्त्तव्यंभवेच्चसधवाज्ञया॥उपोष्यप्रतिमा
संतुभुंजीतबंधुभिःसह॥एतद्द्वित्रिचतुर्भिर्वासर्वैरब्देषुशक्तितः॥अंतेवांतेतुवर्षाणांआरंभविधिमा
चरेत्॥अथारब्धेव्रतेकश्चिदसमाप्तेमृतोभवेत्॥सोपितत्फलमाप्नोतिव्रतारंभप्रभावतः॥वाचकः
श्रावकश्चैवश्रोतारश्चव्रतस्यये॥भवंतिपुण्यसंयुक्तास्तत्पदाभिमुखाश्चये॥ ॥इतिहेमाद्रौका
लिकापुराणेमहाव्रतसंज्ञंगौरीतपोव्रतं॥ ॥अथमाघामायामर्धोदयव्रतं॥ ॥अर्धोदयंस्वरू २०१

भारते॥अमार्कपातश्रवणैर्युक्ताचेत्पुष्यमाघयोः॥अर्धोदयःसविज्ञेयःकोटिसूर्यग्रहैःसमः॥दिवैवयोगः
शस्तोयंनतुरात्रौकदाचन॥पुष्यमाघयोःसंघाचित्यर्थः॥आमांतमासेनपुष्येपूर्णिमांतमानेनमाघेइति
प्रयागसेतौमहद्वरगारम्यपुष्येवामाघेवाइतिपरे॥तन्न॥तथासतिरवेरपेक्ष्येसमासानुपपत्तेरिति॥
हेमाद्रौस्कांदे॥अगस्त्यउवाच॥ भगवंस्त्वत्प्रसादेनश्रुतोयंव्रतविस्तरः॥अर्धोदयंतुमेब्रूहिदुर्ल
भंसचराचरे॥जीवितंपापिनांपुण्यंयदिचेद्वदसिप्रभो॥ कथंकार्यंकृतंकिंस्याफलंकथयषण्मुख॥
स्कंदउवाच॥ ॥श्रूयतांपुण्ययोगोयंदुर्लभोर्द्धोदयाह्वयः॥तिर्यङ्मनुष्यदेवानांदुःप्राप्यःसर्वकाम
दः॥माघामायांव्यतीपातेआदित्येविष्णुदेवते॥अर्धोदयंतदित्याहुःसहस्रार्कग्रहैःसमं॥पुराकृतंवसि
ष्ठेनजामदग्न्येनसुव्रत॥सनकाद्यैर्मनुष्यैश्चबहुभिर्बहुविश्रुतैः॥अन्यैःसहस्रैश्चकृतंतद्विभवत्कुं
भज॥दानानांयज्ञतीर्थानांफलंयेनकृतंभवेत्॥ससागराधरातेनसप्तद्वीपसमन्विता॥दत्तास्या
त्सर्वभावेनयेनतदर्धोदयंकृतं॥गंगागयाप्रयागेचपुष्करपांडलेत्तथा॥मानसादिषुयत्पुण्यंतीर्थे

षुस्नानदानतः॥तत्समंवाप्यवाविप्रव्रतेनानेनकुंभज॥अश्वमेधायुतंश्रेष्ठमिष्टपूर्त्तंचयद्भवेत्॥अर्घ्यं
दयंकृतंयैस्तुविधिदृष्टेनकर्मणा॥यान्तिसत्यंगृहेलक्ष्मीसंतिष्ठतिश्चानपायिनी॥आयुर्यशोतिविपुलंव्र
तकर्त्ताफलंलभेत्॥इंद्राग्नियमलोकेषुनिर्गतीनामपांतलः॥वायोःकुबेरस्येशस्यलोकेषुसुकृतीप्र
भुः॥वासःस्यंद्रार्कलोकेत्यलोकपालैश्चसेवितः॥गोकोटिदानजंपुण्यंसर्वतीर्थनिवासितो॥अर्घ्यद
यस्यमत्पुण्यंकलांनार्हतिषोडशीं॥भूर्लोकाभिरतिश्चैवभुवलोकाधिपस्तुयः॥स्वर्लोकेयोजनानांच
तपोलोकेनरेश्वरः॥महर्लोकसेभित्यंयावदिंद्राश्चतुर्दश॥ततोहिरण्यगर्भस्यपुरुषोव्रतकारकः॥तस्य
लोकाधिपःसाक्षीलोकानांपुरुषोव्ययः॥अर्घ्यदिस्यप्रसादेनब्रह्मलोकेवसेत्तुयः॥तथामानेनविष्णुर्वा
ब्रह्मारुद्रस्ततोभवेत्॥शिवलोकेगणेशःपूज्योदेवराजसमन्वितः॥वासेच्छाक्रेणमानेनव्रतस्यास्यप्र
भावतः॥ततोविष्णुस्वरूपेणत्रैलोक्याधिपतिर्भवेत्॥शंखचक्रगदाधारीवनमालीहरिःस्वयं॥व्रतप्र
भावाल्लक्ष्मीशोदेवोनारायणोभवेत्॥ ॥अगस्त्यउवाच॥ स्कंदकेनविधानेनकर्त्तव्यंव्रतमुत्तमं॥ २८२

अर्धोदयं मनुष्याणां जीवितं दुर्लभं भुवि॥ ॥ स्कंद उ०॥ कृते कृतं वसिष्ठेन त्रेतायां रघुणा कृतं॥ द्वापरे धर्म
राजेन कलौ पूर्णोदरेण च॥ अन्यैर्देवमनुष्यैश्च दैत्यैश्च द्विजसत्तम॥ कृतं धर्मोदयं सम्यक् सर्वकामफ
प्रदं॥ माघमासे कृष्णपक्षे पंचदश्यां रवेर्दिने॥ वैष्णवे न तु ऋक्षे पा व्यतीपातं सुदुर्लभं॥ पूर्वाह्णे संगमे स्नात्वा
शुचिर्भूत्वा समाहितः॥ सर्वपापविशुध्यर्थं नियमस्थो भवेन्नरः॥ त्रिदेवत्यं व्रतं देवाः करिष्ये भुक्तिमुक्तिदं॥
भवंतु संन्निधौ मेघ त्रयो देवास्त्रयोग्नय इति नियममंत्रः॥ ब्रह्मविष्णुमहेशानां सौवर्णपलसंख्यया॥ प्र
तिमास्तु प्रकर्तव्या तदर्धेन द्विजोत्तम॥ साग्रं शतत्रयं शाभाद्रोणानां तिलपर्वतः॥ शंभु ब्रह्मा ब्रह्मविष्णु शि
वप्रीत्यै दातव्यं तु गवां त्रयं॥ हिरण्यभूमिधान्यादिदानं विभवसारतः॥ दातव्यमाश्रयोपेतं ब्राह्मणेभ्यस्तु 2
यत्नतः॥ मध्याह्ने तु नरः स्नात्वा शुचिर्भूत्वा समाहितः॥ तिलपर्वतमध्यस्थं पूजयेद्देवतात्रयं॥ आदौ ब्र
ह्मपूजा॥ नमो विश्वसृजे तुभ्यं सत्याय परमात्मने॥ देवाय देवपतये यज्ञानां पतये नमः॥ ॐ ब्रते ब्रह्म
णे नमः॥ पादौ हिरण्यगर्भाय नमः॥ ऊरूभ्यां जंघाभ्यां परमेष्ठिने॥ वेधसे नमो गुह्यं पद्मोद्भवाय नमो व

स्ति॥ हंसवाहनाय कटिं॥ ज्ञातानंदाय वक्षसि॥ सावित्रीपतये नमो बाहुषु॥ पूर्वादिचतुर्मुखेषु॥ ऋग्वे
दाय यजुर्वेदाय सामवेदाय अथर्ववेदाय॥ ॐ चतुर्वक्त्राय नमः शिरसि॥ हंसाय नमः॥ कपिलाय नमः॥
ततो लोकपालपूजा स्व मंत्रैः॥ हिरण्यगर्भपुरुष प्रधान व्यक्तरूपके॥ प्रसीदप्रमरवोभूत्वा पूजां गृह्ण नमोस्तु ते॥
ब्रह्मप्रार्थना॥ नारायपाजगन्नाथ नमस्ते गरुडध्वज॥ पीतांबर नमस्तुभ्यं जनार्दन नमोस्तु ते॥ अ
नंताय नमः॥ पादौ विश्वरूपाय नमः। ऊरुभ्यां॥ मुकुंदाय नमः॥ जानुभ्यां॥ गोविंदाय नमः जंघाभ्यां प्रद्यु
म्नाय नमः गुह्ये। पद्मनाभाय नमः नाभौ॥ लंबोदराय नमः॥ उदरे॥ कौस्तुभाय नमः वक्षसि। चतुर्भुजा
य नमः। बाहुषु॥ वदनैर्विश्वतोमुखाय नमः। नमः शांतसहस्रशिरसे नाभौ। आदित्यचंद्रनयन दिग्बा
हो दैत्यसूदन॥ पूजां दत्तां मया भक्त्या गृहाण करुणापर॥ विष्णुप्रार्थनामंत्रः। महेश्वर महेशाय नम
स्ते त्रिपुरांतक॥ जीमूतकेशाय नमो नमस्ते वृषभध्वज॥ ईशानाय नमः॥ पादौ जंघाभ्यां चंद्रशेखर॥
जानुभ्यां पशुपति देवाश्चोरुभ्यां शाश्वतः स्मृतः। उमाकांताय गुह्ये तिनाभौ विनीललोहितः॥ उद

रेकृतिवासेचवदंके नागोपवीतिने॥ भोगिरूपंयजौद्वाहौ नीलकंठंतु कंठके॥ मुखेवैपंचवक्त्राय मौलौचैवक
पर्दिने॥ अंधकारअंगेयालन्न मोलौ कांतकायच॥ पूजामयाकृतां भक्त्या गृहाणवृषभध्वज॥ महेश्वरप्रार्थना
मंत्रः॥ इतिपूजाक्रमःप्रोक्तोमंत्रैरेतैःप्रयत्नतः॥ आचार्यपूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥ हस्तमात्राकर्पा
मात्रापीठं छत्रंकमंडलुं॥ श्वेतवस्त्रयुगंदेयंब्रह्मरूपोसर्वमूर्तये॥ उपवीतंवस्त्रयुगंविष्णोर्लोहितशंकर
स्यच॥ पंचामृतेनस्नपनंपूजनंकुसुमैस्तकैः॥ कमलैस्तुलसीपत्रैर्बिल्वपत्रैरखंडितैः॥ तत्कालसंभ
वैर्दिव्यैः पूज्यादेवायथाक्रमं॥ यथाशक्त्या प्रकर्तव्यंव्रतमेतत्सुदुर्लभं॥ जीवितंप्राणिनामेतदनित्यंनि
श्चितंयतः॥ अथव्रतस्य करणंविधानं शृणुयत्नतः॥ देवतात्रयमुद्दिश्य शास्त्रदृष्टेनकर्मणा॥ प्रजा
पतयेविष्णुरूपायरुद्रायनमः॥ इत्यनेनैवमंत्रेण वह्निंसंस्थाप्यभक्तितः॥ ततोहोमः॥ अथहोमाव
सानेचगांदद्यात्पयस्विनीं॥ स्वर्णशृंगीरौप्यखुरांघंटाभरणभूषितां॥ तांम्रपृष्ठीं कांस्यदोहांसवो
पस्करसंयुतां॥ सदक्षिणांशुभांपुण्यां ब्राह्मणायनिवेदयेत्॥ तेनदत्तंकृतंजपमिष्टंयज्ञैःसहस्रधा॥ह

तत्फले।भवेद्द्विप्रोव्रतस्यास्यप्रभावतः॥एवंसर्वंसमाख्यातंदुर्लभंव्रतमुत्तमं॥अर्धोदयंतथादृष्टंकिमन्य
त्परिपृच्छति॥ ॥इतिस्कांदोक्तमर्धोदयव्रतं॥ ॥अथसोमवत्यमावास्याव्रतं॥ अमावास्यातुसोमेन
सप्तमीभानुनासह।चतुर्थीभूमिपुत्रेणसोमपुत्रेणचाष्टमी॥ चतस्रास्तिथयःस्वत्तास्सूर्यग्रहणसंनि
भाइति॥ अथतद्व्रतकथास्कांदे॥ सूतउवाच॥ ॥शरतल्पगतंभीष्ममुपगम्ययुधिष्ठिरः॥ कृतप्र
णामोधर्मात्माहितंवचनमुक्तवान्॥ ॥युधिष्ठिरउवाच॥ हतेषुकुरुमुख्येषुभीमसेनेनकोपिना॥
तथापरेषुवीरेषुहतेषुयुधिजिष्णुना॥दुर्योधनकुमंत्रेणजातोस्माकंकुलक्षयः॥ नसंतिभुविपांचा भ्र
लिबालवृद्धाचुराहते॥अवशिष्टावयंपंचवंशेभारतसंज्ञके॥एकातपत्रमपिचराज्यंमत्यंनरोचते॥
जीवितेपिजिगुप्सामेनचोगेषुरतिःक्वचित्॥दृष्ट्वासंततिविच्छेदंसंतापोहृदयेनिशं॥अश्वत्थामास्त्रनि
र्दग्धोउत्तरागर्भसंभवः॥अतोमेद्विगुणंदुःखंपिंडविच्छेददर्शनात्॥किंकरोमिक्वगच्छामिपितामह
वदाधुना॥येनप्रयांतेसद्यःसंततिःश्चिरजीविनी॥ ॥भीष्मउवाच॥ ॥अमावास्यायदापार्थसोम २५४
सं

वारयुता भवेत्॥ तस्यामश्वत्थमागत्य पूजयित्वा जनार्दनं॥ अष्टोत्तरशतं कुर्यात्तस्मिन् वृक्षे प्रदक्षिणाः॥ ता
न्यु वत्संख्यानुपाशय रत्नधातुफलानि च॥ व्रतराजमिदं राजन् विष्णोः प्रीतिकरं परं॥ उत्तराकारयत्या
ज्ञा गर्भो जीवमवाप्स्यति॥ भविष्यति गुणी पुत्रस्त्रिषु लोकेषु विश्रुतः॥ श्रुत्वा पितामहवचः प्रत्युवाच यु
धिष्ठिरः॥ ॥युधिष्ठिर उवाच॥ ॥तद्व्रतं व्रतराजाख्यं विस्तरेण प्रकाशय॥ केन प्रकाशितं मर्त्यलो
के नेदं विहितं विभो॥ ॥भीष्म उवाच॥ आसीद्या सर्वविख्याता कांचीसंज्ञा महापुरी॥ ब्रह्मक्षत्रियवि
ट्शूद्रैः स्वकर्मनिरतैर्वृता॥ रजताचलसंकाशैः सौधसंघैर्विराजिता॥ सुवेषैर्नागरैर्जनैर्नारी
भिरूपशोभिता॥ रूपचातुर्यवर्याभिर्वेश्याभिः समलंकृता॥ अलकेव कुबेरस्य शक्रस्येवाम
रावती॥ तेजोवतीव रत्नाढ्या पावकस्य महापुरी॥ तत्र राजा रत्नसेनो बभूवामितविक्रमः॥ त
६ स्मिन्वसति [illegible] वेदशास्त्रविशारदः॥ तस्य भार्याभवद्रूपनाम्ना [illegible]नवती शुभा॥ यथार्थनामधे ध
यासा लक्ष्मीरिव सविग्रहा॥ तस्यां संजनयामास सप्त पुत्रान् सुभान् पिता॥ एकां दुहितरं रम्यां ना

म्नागुणवतींन्त्य॥ कदा दारास्थतेपुत्रा विहरंति यथासुखं॥ कंन्याकुमारिका चासीदनुरूपप्रियार्थिनी॥
अत्रांतरेद्विजःकश्चिद्भिक्षार्थंसमुपागतः॥ दीप्यमानःस्वतेजोभिर्मूर्त्तिमानिवपावकः॥ द्वारदेशमुपा
उ.पा. गत्यप्रयुंजनाशिषंतदा॥ देवस्वामीस्नुषाःसप्तसमुत्थायससंभ्रमं॥ भिक्षांमेत्येकमानिन्युर्ददुस्त
रा. स्मैद्विजन्मने॥ अवैधव्याशिषंप्रादात्ताभ्यःसौभाग्यसंपदां॥ ततोगुणवतीमात्राप्रहितासहभिक्षया॥
विप्रायभिक्षांप्रददौकृत्वापादाभिवंदनं॥ आशिषंचददौचित्रंशुभेधर्मवतीभव॥ श्रावेलक्ष्यगुणव
तीश्रुत्वाप्रत्यायये॑गृहं॥ मात्रेनिवेदयामास आशिषंतेनयोजितां॥ श्रुत्वाधनवतीपुत्रींकरेधृत्वास
मायया॥ प्रणतिंकारयामासपुनस्तस्मैद्विजन्मने॥ तथैवाशिषमुच्चार्यविप्रस्तामभ्यनंदयत्॥
श्रुत्वाशिषंधनवतीसविताप्रत्युवाचह॥ ॥धनवत्युवाच॥ ॥प्रसीदभगवन्विप्रवचनंमेवधा
रय॥ स्नुषाभ्यःप्रणताभ्योमेत्वयादत्तावराशिषः॥ अवैधव्यकराःपुत्रसुखसौभाग्यसाधिकाः॥ २८५
सुतायाःप्रणतायामे विपरीतंत्वयाहितं॥ भद्रेधर्मवतीभूयाइत्युदीर्यपुनःपुनः॥ आशीःप्रयुक्तावि

प्रश्नेकारणंवदस्तत्वरं॥ ॥द्विजउवाच॥ धन्यासित्वंधनवतीप्रख्यातैर्वरितस्तुभुवि॥ यथायोग्यं प्रयुक्तेयंमया
शीर्दुहितुस्तव॥ इयंसप्तपदीमध्ये विधवात्वमवाप्स्यति॥ धर्माचरणमत्यर्थं कर्त्तव्यं परमेतया॥ यदागं
ताभवेत्सोमागृहेवैतत्प्रसुदरि॥ तस्याःपूजनमात्रेणभवेद्वैधव्यनाशनं॥ अतोमयाशीर्दत्तेयंशुभेधर्मव
तीभव॥ श्रुत्वाधनवतीजाताचिंताकुलितचेतसा॥ उवाचवचनंदीनंप्रणिपत्यपुनःपुनः॥ ॥धनवत्यु
वाच॥ ॥सोमागमनमात्रेणभवेद्वैधव्यभंजनं॥ कासासोमात्वयाप्रोक्ताकाजातिःकुत्रसंस्थिता॥ तत्सर्वं न्यां
वदमहाभागनकालोविस्तरस्यमे॥ ॥द्विजउवाच॥ सासोमारजकीजात्यास्तिष्ठतिस्तस्याश्चवसिं
हले॥ साचेदायातितेवेश्मतत्तदावैधव्यभंजनं॥ इत्युक्त्वाब्राह्मणोन्यत्रगतोभिक्षाप्रतीक्षया॥ ध 2
नवत्यपिपुत्रेभ्यःप्रोवाचवचनंतदा॥ ॥धनवत्युवाच॥ इयंदुर्ल्ललितापुत्रीस्वसागुणवतीशुभा॥
सोमागमनमात्रेणभवेद्वैधव्यभंजनं॥ अस्तितस्यापितुर्भक्तिर्मातुर्वचनगौरवं॥ सभयात्तुसहस्व
स्रासोमामानयितंद्रुतं॥ पुत्राऊचुः॥ ज्ञातंमातस्तववचोतिपुत्रस्नेहवशंवदं॥ यातदेशान्तरे भिति

प्रख्यापयसि दुर्गमं ॥ अंतरा दुस्तरः सिंधुः शतयोजनविस्तरः ॥ अशक्यं गमनं तत्र न क्षमा गमने वयं ॥
देवस्वाम्युवाच ॥ अपुत्रः सप्तभिः पुत्रैरहं यास्यामि सिंहलं ॥ आनयिष्यामि तां सोमां पुत्री वैधव्यनाशनीं ॥
एवं वादिनि सक्रोधं देवस्वामि[नि] तत्क्षणे ॥ शिवस्वामी कनिष्ठस्तु पुत्रः प्रोवाच संमतः ॥ मैवं वद महाभागे
रोषावेशवशंगतः ॥ मयि तिष्ठति कः शक्तो गंतुं द्वीपं हि सिंहलं ॥ इत्युक्त्वा सहसोत्थाय प्रणम्य शिरसा
मुदा ॥ प्रतस्थे सहितः स्वस्रा द्वीपं सिंहलसंज्ञितं ॥ स कियद्भिर्दिनैर्गत्वा तीरं प्राप सरित्पतेः ॥ तंनर्तुं
बुधिं तत्र प्राकारमकरोद्द्विजः ॥ ददर्श सुविस्तीर्णं न्यग्रोधद्रुममंतिके ॥ तत्कोटरस्थुरवासी नायं ध्रराजसु
स्त्र तौ यः ॥ तत्पादपतले स्थित्वा लालाभ्यां नीतं तु तद्दिनं ॥ शावकानां कृते गृध्रो गृहीत्वा द्विजभोजनं ॥ भो आगतइतिशेषः
जनं दत्तमपि ते भुंजते स्मन शावकाः ॥ पप्रच्छ चागतो गृध्रः शावकास्तौ हि विह्वलः ॥ गृध्र उवाच ॥ नू
कथं न भुंजते पुत्रा भवंतः क्षुधिता अपि ॥ आनीतं कोमलं मांसं भवद्योग्यमिदं मया ॥ शावकावू
चुः ॥ एतद्वृक्षतले तात मानवाव[त्र] तिष्ठतः ॥ अस्वीकृते तयोस्तात कथं भुंजामहे वयं ॥ एतच्छ्रुत्वा सगृ २८८

अस्तु करुणाहृत्तत्वेतनः॥ तयोरंतिकमागत्य वचनंसमभाषत॥ ॥गृध्र उवाच॥ जानंस्तु युवयोः कामो भो
जनं क्रियतामिदं॥ पारमुत्तारयिष्यामि जलधेः प्रांत्तरे वतु॥ ततो रात्र्यां व्यतीतायां उदिते तु दिवाकरे॥
पारमुत्तारितौ तौ तु गृध्रराजेन वेगिना॥ सिंहलद्वीपमागत्य स्थितौ तौ सोमागृहांतिके॥ ततः प्रत्यूष
समये संमृज्यांगणं मंडलं॥ लेपनं च कुरुतस्तत्र तदा वासे दिनं प्रति॥ सेवां विदधतोस्तत्र पूर्णः संवत्सरो
ययौ॥ स्नुषाः पुत्रान्समाहूय सोमा पप्रच्छ विस्मिता॥ मार्जनं लेपनं को वा करोति मम कथ्यतां॥ एकदैवाथ
न जगदुः सर्वाः कार्यमिदं दिने॥ एकदा रजकी सोमा निशीथे संस्थिता निशि॥ ददर्श ब्राह्मणीं कन्यां मार्जयंती स
गृहांगणं॥ लिंपंतमंगणं प्राप्तं भ्रातरं च सुदुर्गतं॥ सोमा पप्रच्छ तौ गत्वा कौ युवां कथ्यतां मम॥ ऊचतुस्तौ
तदा दृष्टौ वावां ब्राह्मणपुत्रकौ॥ ॥सोमोवाच॥ दग्धास्मि बत नष्टास्मि ब्राह्मणौ गृहमार्जकौ॥ कां ग
तिं बत यास्यामि पापादस्मादसंशयं॥ पापजातिरहं ख्याता रजकी सर्वतो द्विज॥ कथं त्वं ब्राह्म
णो भूत्वा विरुद्धं मे चिकीर्षसि॥ ॥शिवस्वाम्युवाच॥ एषा गुणवती नाम स्वसा मम सुमध्यमा॥

अस्याः सप्तपदीमध्ये वैधव्यं संप्रपत्स्यते ॥ तव सान्निध्यमात्रेण भवेद्वैधव्यभंजनं ॥ अतो हेतोः सह स्वस्रा
दासकर्म करोमि ते ॥ ॥सोवाच॥ ॥अतः परं न कर्तव्यं यास्यामि तव शासनात् ॥ इत्युक्त्वा गृहमागत्य
स्नुषाभ्यः प्रसुवाच ह ॥ यः कश्चिन्मम राज्येस्मिन् म्रियते मानवः क्वचित् ॥ तथैव रक्षणीयोसौ यावदा
गम्यते मया ॥ कस्यचिद्दहनात्कोपि न दग्धव्यः कथंचन ॥ तथेत्युक्ता स्नुषाभिः सा सोमा तं महांबु
धिं ॥ पारमुत्तारयामास क्षणेन द्विजपुत्रकौ ॥ स्वयमाकाशयानेन सोत्ततार महार्णवं ॥ प्राप्ताः का
ञ्चीपुरीं सर्वे निमेषात्तत्प्रभावतः ॥ सदृशं वरमानेतुं जगामोज्जयिनीं प्रति ॥ आनीय च वरं तत्र देवश
र्मसुतं सुधीः ॥ ब्राह्मणं रुद्रशर्माणं गुणेन सदृशं स्वसुः ॥ ततः सा रजकी सोमा वैवाहिकमकारयत् ॥
सुलग्ने सुनक्षत्रे देवस्वामी तु कन्यकां ॥ ददौ तस्मै गुणवतीं गुणिने रुद्रशर्मणे ॥ ततो वैवाहिके मंत्रे हूय
माने कृशाने ॥ ततः सप्तपदीमध्ये रुद्रशर्मा मृतस्तदा ॥ रुरुदुर्बांधवाः सर्वे खिन्ना सोमा निराकुला ॥
आक्रंदः सुमहानासील्लोकानां तत्र पश्यतां ॥ धनवत्यै च सा तूर्णं व्रतराजप्रभावजं ॥ पुण्यं संकल्प २८७

विधिवद्दत्तो मृत्योर्विनाशने॥ रुद्रशर्मापि तस्माच्च व्रतराजप्रभावतः॥ आससाद तदा जीवं सुप्तवत्सहसोत्थि
तः॥ एवं विवाहं निर्वर्त्य व्रतराजं निवेद्य च॥ आमंत्र्य तां धनवतीं सोमाप्रायाद्गृहं प्रति॥ एवं सा रजकी सोमा ऊ
जीवयित्वा मृतं द्विजं॥ अवाप्य सर्वसंपूर्णा पूर्णकामा स्वमंदिरं॥ आचांतरे गृहे तस्याश्च मंततनया मृता॥ पु
नः स्वामी मृतस्तस्या जामाता च ततो मृतः॥ आगच्छंत्यक्षन दा[illegible] सोमवारान्विता तिथिः॥ सा ददर्शलिता
यांती वृद्धां कांचित्स्त्रियं तदा॥ तूलभारपराक्रांतां कंदमानां सुदुःखितां॥ ॥वृद्धोवाच॥ अवतारय मे पु
त्रि तूलभारं शिरःस्थितं॥ एतद्भारभराक्रांता कंदमाना सुदुःखिता॥ ॥सोमोवाच॥ ॥अमावास्याद्य
हे वृद्धे सोमवारयुता तिथिः॥ तूलकं न स्पृशाम्यद्य नियमोऽयं मया कृतः॥ पुनर्ददर्श यांती सा [illegible]भारवतीं स्त्रि घू
यं॥ साप्युवाच ततः पुत्रि मूलभारो महानिति॥ अवतीर्य क्षणं तिष्ठ संगे यास्याम्यहं तव॥ सोमोवाच॥ अ
द्य मूलं तथा तूलं न स्पृशामि कथंचन॥ ततोऽश्वत्थतरुं प्राप्य नदीतीरे [illegible]वं पथि॥ स्नात्वा विष्णुं समभ्यर्च्य
शर्कराभिः प्रदक्षिणं॥ सा चकार महाभागा तदेवाष्टोत्तरं शतं॥ ॥भीष्म उवाच॥ यदा प्रदक्षिणावर्त्त

कृतं शर्करहस्तया॥ तदा जीवितवंतस्ते जामातृपतिपुत्रकाः॥ नगरं श्रीसमाकीर्णं तद्गृहं च विशेषतः॥ अथा
था [illegible]ता महाभागा सोमा स्वभवनं प्रति॥ जीवितं वीक्ष्य भर्त्तारं पुत्रीं जामातरं तथा॥ अतुला[illegible]नंदमासाद्य
जगाम कृतकृत्यतां॥ प्रणिपत्य स्नुषाः सर्वा पप्रच्छुस्तां तपस्विनीं॥ ॥स्नुषा ऊचुः॥ मृतास्ते तनया देवि
पतिजामातृबांधवाः॥ जीवितास्ते कथं देवि मृतास्तेन कथं वद॥ ॥सोमोवाच॥ गुणवत्यै मया दत्तं
व्रतराजस्य पुण्यकं॥ मृतास्ते तद्विपाकेन पतिजामातृपुत्रकाः॥ तूलकं न मया[illegible]ष्टं मूलकं च तथा अपि॥
अश्वत्थे विष्णुमभ्यर्च्य तदा तत्र प्रदक्षिणं॥ शर्कराहस्तया तत्र कृतमष्टोत्तरं शतं॥ जीवितास्तत्प्रभावेन
पतिजामातृपुत्रकाः॥ सर्वाभिः क्रियतामद्य व्रतराजो विधानतः॥ भविष्यति न वैधव्यं सौभाग्यं संभविष्य
ति॥ स्नुषास्ताः कारयामास तथा सोमा व्रतेश्वरं॥ भुक्त्वा भोगान् बहूंस्तत्र पुत्रपौत्रादिभिः सह॥ तैश्च
सर्वैः परिवृता विष्णुलोकमवाप्य सा॥ इत्येतत्कथितं पार्थ विस्तरेण मया तव॥ ॥युधिष्ठिर उवाच॥ २८
माहात्म्यं व्रतराजस्य को विधिर्वद विस्तरात्॥ कर्त्तव्यं केन भीष्मेदं नारीभिः पुरुषेण वा॥ ॥भीष्म उ०॥

अमावास्यातिथिःपार्थसोमवारान्वितायदा॥ तदापुण्यतमःकालोदेवानामपिदुर्लभः॥ प्रातरुत्थायव्रतिना
स्नानंकार्यंजलाशये॥ स्नात्वामौनेनकौशेयंपरिधायव्रतीततः॥ प्राप्यादश्वत्थवृक्षस्यसमीपंकुरुनं
दन॥ अश्वत्थमूलेकर्त्तव्याविष्णुपूजासमंत्रकं॥ व्यक्ताव्यक्तस्वरूपायसृष्टिस्थित्यंतकारिणे॥ आदिमध्यांत
हीनायविश्वरश्रवसेनमः॥ विष्णुमंत्रः॥ एवंसंपूज्यगोविंदंपीतवस्त्राक्षतैःफलैः॥ कुसुमैर्विविधैश्चैवभ
क्षभोज्यैस्तथाविधैः॥ अश्वत्थपूजनंकार्यंप्रोक्तामंत्रेणपांडव॥ अश्वत्थहुतभुग्वासगोविंदस्यसदाश्र
य॥ अशेषंहरमेशोकंवृक्षराजनमोस्तुते॥ अश्वत्थपूजामंत्रः॥ मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे॥
अग्रतोरुद्ररूपायवृक्षराजायतेनमः॥ प्रदक्षिणामंत्रः॥ अमावास्यायैनमः। सोमवारायनमः। सोमायैनमः
एवंपूजाविधिंकृत्वाततःकुर्यात्प्रदक्षिणां॥ मौक्तिकैःकांचनैरौप्यैर्हीरकैर्मणिभिस्तथा॥ कांस्यपात्रैःस्ताम्र
पात्रैःभक्ष्यपूर्णैःपृथक्पृथक्॥ गृहीत्वाभ्रमणंकार्यंप्रादक्षिण्येनपिप्पले॥ तावत्प्रदक्षिणंकार्यंया
वदष्टोत्तरंशतं॥ तद्वस्तुजातंविप्रायपुरंध्रीभिःप्रदीयते॥ ततोनिरामिषाहारंकुर्यान्नारीजनैःसह

एषतेकथितोभूपव्रतराजविधर्मया॥ द्रौपदीचसुभद्राचकारयस्वतथोत्तरां॥ उत्तरागर्भसंस्थस्तुजी
वितंलप्स्यतेचिरात्॥ ॥युधिष्ठिरउवाच॥ यास्वल्पवित्तकानारीकांचनाद्यैर्विनाकृता॥ साकथंलप्स्यतेपू
र्णंव्रतराजफलंवद॥ ॥भीष्मउवाच॥ फलैःपुष्पैस्तथाभक्ष्यैर्वस्त्राद्यैरपिपांडव॥ कुर्यात्प्रदक्षिणावर्तं
सापिपूर्णंलभेत्फलं॥ व्रतमिदमखिलंनरेंद्रविष्णोःकृतमनयाद्विपराक्रमत्वयापि॥ पतिसुतधनमिष्ट
तीपुरंध्रीसपदिकरोतुनचास्यावृत्तिरस्ति॥ ॥भीष्मउवाच॥ ॥शृणुपार्थप्रवक्ष्याम्युद्यापनविधिंशु
भं॥ यंविनापूर्णतानस्याव्रतस्यनफलंभलभेत्॥ सर्वतोभद्रमध्येतुस्थापयेत्कुंभमुत्तमं॥ तत्रचप्रतिमां
विप्रसौवर्णांचचतुर्भुजां॥ लक्ष्म्यावाहनसंयुक्तामामाषाञ्चपलावधिं॥ उपचारैरनेकैश्चयथाविवि
भवविस्तरैः॥ नैवेद्यैपुष्पधूपैश्चदीपैश्चपरितस्थितैः॥ रात्रौजागरणंकुर्यात्प्रभातेहोममाचरेत्॥ स
मिद्भिःपिप्पलमिस्तुपायसेनतिलैस्तथा॥ पूर्णाहुतिंचजुहुयागांचदद्यात्पयस्विनीं॥ द्वादशब्रा २८२
ह्मणाभोज्याघृतपायसलड्डुकैः॥ उपवीतानिवस्त्राणितेभ्योदद्याच्चदक्षिणां॥ प्रणम्यदंडवद्भूमौ

प्रर्थयित्वाविसर्जयेत्॥ ॥इतिभविष्येसोद्यापनंसोमवत्यमावास्याव्रतं॥ महानिबंधेषुदर्शनेपिशिष्टा
चारएवैहमूले॥ ॥इतिश्रीभट्टनीलकंठात्मजभट्टशंकरकृतेव्रतार्केऽमावास्याव्रतानि॥ ॥अथचा
तुर्मास्यादिव्रतानि॥ तत्राषाढादिआश्विनांतस्वस्तिकव्रतं॥ कर्नाटकेषुप्रसिद्धं॥ लोकानामोदकंदेवंप्र
ऊरेवंमनीषिणः॥गोपालमदनाख्यांतुनत्वास्वार्थस्यसिद्धये॥ ॥युधिष्ठिरउवाच॥ ॥व्रतानिसर्व
सिद्धानांकथितानित्वयाविभो॥ तथापिस्वस्तिकंनामकथितंयत्त्वयाविभो। नैवतद्विधानंतुक
थितंतेसुरेश्वर॥ काचेयंदेवतातत्रकिंदानंकोविधिर्भवेत्॥ केनचेदंपुराचीर्णंकिंफलंकिंचदैवतं॥ किं
दानंविधिवत्प्रोक्तंतद्वदस्वसुरेश्वर॥ ॥श्रीमदनगोपालउवाच॥ साधुपृष्टंमहाभागलोकानां
हितकाम्यया॥ यस्माच्चीर्णेननराजेंद्रनरिष्टुर्जायतेभुवि॥ स्वस्तिकानुत्कीर्यस्तस्मात्स्वस्तिकंविष्णवेर्पये
त्॥ स्वस्तिकायानुविधायाशुविष्णवेयदिचार्चयेत्॥ ज्ञातजन्मार्जितपापंतस्यनश्यतितत्क्षणात्॥
गोमूत्रगोमयैराजन्स्थंडिलंसंविधापयेत्॥ तदेवाधिकंध्यात्वापूजाकर्मसमारभेत्॥ रमयासहि

तदेवंपूजयेत्सत्यहंतुनः॥ इतिसंकल्प्यमेधावीस्वस्तिकंकर्मका॰२रयेत्॥ अष्टोत्तरंस्वस्तिकानिसत्यहवि
ष्ठवेपुनः॥ रंगवल्याकृतंराजंयदिभक्त्यासमर्पयेत्॥ सप्तजन्मार्जितंपापंतत्क्षणादेव २ नश्यति॥ नील
पीतसितैरक्तैःरंगैःस्वस्तिकधारणं॥ यदिकुर्याद्द्विजश्रेष्ठाविष्णुलोकंसगच्छति॥ पंचवर्णैस्तुनीला
द्यैर्यदिस्वस्तिकमंडलं॥ नारीवापुरुषोवापियदिभक्त्यासमन्वितः॥ विष्णुप्रीतिकरंकुर्यात्तस्यपु
ण्यमनंतकं॥ विष्ण्वालयेविष्णुभक्त्याप्रकर्तव्यास्वगृहेवापिवा॥ पंचरंगकवर्णोस्तुकोटियज्ञफलंलभेत्॥
एवंयदिरंगवल्ल्याविष्णोस्तुपुरुषोन्यसेत्॥ स्वस्तिकेनशोभयित्वातुविष्णुस्थानंसमंगलं॥ अशुभंत
त्कुलेनैवस्याद्विष्णुप्रभावतः॥ सहस्रंस्वस्तिकानांतुयेनभक्त्यासमर्पितं॥ पुत्रपौत्रसमायुक्तोमो
दमानःपुनःपुनः॥ स्वर्गलोकेवसेद्दीर्घंधनवान्भूमिपोभवेत्॥ तत्कुलेपिदरिद्रत्वंनैवनैवास्ति
पार्थिव॥ आयुतंस्वस्तिकानांतुविष्णवेह्यर्पयेद्यदि॥ पुत्रपौत्रादिकंतस्यस्वस्तिमान्जायतेध्रु २९०
वं॥ नरोगादिभवत्येवंगोपालस्यप्रसादतः॥ नारीविधवानैवपुरुषोविधवानहि॥ विजयाभि

भवेनैवनात्रकार्याविचारणा॥ नारीयोभिभवत्येवंस्वस्तिकैःपूजकंनरं॥ अथस्वस्तिकलक्ष्यंतुयदिकुर्याद्द्वि
चक्षणः॥ तस्याःपुण्यफलंवक्तुंकःशक्तोदिविवाभुवि॥ आषाढेमासिराजेंद्रप्रथमंचरणंभवेत्॥ आश्विने
तुसमाप्तिर्वैकार्त्तव्यास्वस्तिकारणे॥ धनिनातुकृतंविप्रगोदानादिपुरस्सरं॥ कर्तव्यफलसिध्यर्थंनात्र
कार्यविचारणा। दरिद्रेणतुकर्तव्यंयदिस्वस्तिकलक्षणं॥ कंबलाद्यासनंदद्याद्व्रतसाद्गुण्यसिद्धये॥
विभवेसतिराजेंद्रमहद्व्रतकारणं॥ स्वस्तिकंत्वासनंदद्याद्व्रतंसंपूर्तिसिद्धये॥ आहिताग्नेस्तुहोमःस्या
तदभावेद्विजार्चनं॥ द्विजसंतर्पणाद्देवव्रतपूर्तिर्भविष्यति॥ शुभाकारिणिराजेंद्रस्वस्तिकानिविधाप
येत्॥ ब्राह्मणेभ्यःप्रदेयानिव्रतसंपूर्तिहेतवे॥ यथावर्त्तिविधानेनगदितंपुण्यमुत्तमं॥ तथैवस्वस्तिके
पुण्यमित्याहुर्वेदवादिनः॥ अथहोमंप्रवक्ष्यामिलक्षस्वस्तिकसिद्धये॥ पायसेनघृतेनैवद्विजानस्वस्तत्रो
क्तंऋचाबुधः॥ घृताज्येनतुहोमस्याद्दृढं॥ ज्ञानेनैवसादरं॥ स्वस्त्ययनंताक्ष्यमरिष्टनेमिंइतिमंत्रतः॥ हो
मेमंत्रोयंविधिवत्कुर्याणाःसाधुसाधकाः॥ आहिताग्निर्वैदिकास्तुमंत्रास्युर्होमसिद्धये॥ अनाहि

तान्निनाविद्यातं त्रमार्गे भवेध्रुवं॥ तन्मंत्रं कथयिष्यामि फलानां तस्यसिद्धये॥ स्वस्ति नाम परं देवं स्वस्तिका
रपाकारणं॥ स्वस्तये पायसं घृतसंयुक्तं मग्नये स्वाहायुतं॥ तुभ्यं महादेव त्वत्तो भव महामते॥ स्वस्तिंकर
महादेव स्वाहायासंयुतः सखीन्॥ एवं दशांशतो होमः कुर्या विष्णेश्च तुष्टये॥ ब्राह्मणान्भोजयेत्त
श्वात्तद्दशांशेन वै बुधः॥ अथासनानि देयानि पंच रंगयुतानि तु॥ ब्राह्मणेभ्यो विशिष्टेभ्यः फलानां त
स्य सिद्धये॥ और्णानि वापि देयानि दर्यजाप्पथवा पुनः॥ तत्पूजाविधिं वक्ष्ये शुध्यर्थमाचार्यवरयेत्सुधीः॥
गोपालं तु मंत्रेण तमेव पूजयेत बुधः॥ पंचामृतैः स्नापयित्वा पूजयेद्भक्तिसंयुतः॥ आयुर्वैभस्य भो
ज्यैश्च नैवेद्यं परितर्पयेत॥ तांबूलैर्धूपदीपैश्च कुसुमैः चंपकैः शुभैः॥ शतपत्रैश्च कल्हारैरर्चय
त्पुरुषोत्तमं॥ नमस्कारैस्तथा दिव्यैस्तोत्रपाठैर्विशेषतः॥ प्रदक्षिणामथो कृत्वा वाग्यतः संयतेंद्रियः॥
ततो गोमिथुनं दत्वा व्रतसंपूर्णहेतवे॥ तदभावे पाठकानां तु द्रोपामात्रं प्रदीयते॥ अथवा द्वादकानां तु २९९
याद्रकेपरिकीर्त्तितं॥ पुरीका मोदकाद्यैश्च भोजयेद्द्विजसत्तमान्॥ आचार्यायि तु तां शुद्धां प्रतिमां

दापयेत्सुधीः॥ हस्तमात्रा कर्णमात्रा कटिस्तनादिभिः पुनः॥ पीतो वैरैश्च संपूज्य कोटियज्ञफलं लभेत्॥ यथा
शक्त्यापि कर्तव्यं व्रतमेतच्छुभावहं॥ वित्तशाठ्यमकृत्वा तु कोटियज्ञफलप्रदं॥ य एवं कुरुते भक्त्या विष्णु
भक्तिपुरःसरः॥ तस्यानंतफलं राजन् गदितं वेदपारगैः॥ स्वस्तिकव्रतमेतत्तु गंगास्नानफलप्रदं॥ तस्मा
दादौ प्रकर्तव्यं धर्मकामार्थसिद्धये॥ राजानो मित्रतां यांति शत्रवो यांति दासतां॥ नरो गाभिर्भवेत्येन
स्वस्तिकव्रतधारणे॥ स्त्रीणामपि च कर्तव्यं सर्वसौभाग्यसिद्धये॥ शांडिल्या कृतमेवं तु व्रतं विष्णुवल्ल
भ्ये॥ सगरे दिलीपेन दमयंत्या तथैव च॥ आदौ मासे प्रकर्तव्यं अंते चापि विशुद्धये॥ मासत्रये समाप्ति
स्याच्चतुर्भिर्वा तिथौ पुनः॥ एकसीमान्यपि मासे तु समाप्तिः कोटिपुण्यदा॥ य इदं शृणुयाद्भक्त्या तस्यैव
फलदं भवेत्॥ नैवकस्यापि व्याख्येयं यदिच्छेद्विपुलं धनं॥ न देयं यस्य कस्यापि विकल्पोपहतात्मने॥
भक्तिश्रद्धाविहीनाय यज्ञसामान्यदर्शिने॥ विकल्पहतवित्ताय नास्तिकाय शतानिव॥ देयं पुत्रा
य शिष्याय फलानंतस्य सिद्धये॥ अपि ज्ञात्वा तु तत्सर्वं च कौरवं युधिष्ठिरः॥ ॥इति श्री भविष्यो

त्तेरस्यास्ति कव्रतं॥ अत्रमूलंचित्यं॥ ॥अथ श्रावणस्योत्यभृगुवारे वरलक्ष्मीव्रतं॥ ॥तत्रपूजाविधिः॥
क्षीरसागरसंभूता क्षीरार्णवसमप्रभा॥ क्षीरवर्णसमं वस्त्रं दधान हरिवल्लभा॥ ध्यानं॥ ब्राह्मीहंससमारू
ढाधारिणीक्षकमंडलुं॥ विष्णुतेजोधिकादेवी सामांपातुवरप्रदा॥ आवाहनं॥ महेश्वरि महादेवि आसनं ते
ददाम्यहं॥ महेश्वर्यसमायुक्ते ब्राह्मणी ब्राह्मणप्रिये॥ आसनं॥ तीर्थोदकैर्महो दिव्यैः पापसंहारकार
कैः॥ अर्घ्यंगृहाणदेवेशि देवानामुपकारिणी॥ अर्घ्यं॥ कुमारशक्तिसंपन्ना कौमारी शिखिवाह
ना॥ पाद्यं ददाम्यहं देवि वरदे वरलक्षणे॥ पाद्यं॥ वैष्णवी विष्णुसंयुक्ता असंख्यायुधधारिणी॥ आ
चम्यां देवपूज्ये वरदे असुरमर्दिनि॥ आचमनं॥ स्नानं पंचामृतैर्शुद्धैः स्नपयिष्ये हरिप्रिये॥ वरदे श
क्तिसंभूते वरदे विवरप्रिये॥ पंचामृतस्नानं॥ आप्यायस्व दधिक्राव्णः घृतं मीमिक्षे॥ मधुवाताः स्वा
दुः पवस्व॥ गंगाजलसमानीतं सुगंधिद्रव्यसंयुतं॥ स्नानार्थं ते मयादत्तं गृहाण परमेश्वरि॥ शुद्धो
दकस्नानं॥ रजताद्रिसमं दिव्यं क्षीरसागरसन्निभं॥ चंद्रप्रभासमं दिव्यं वस्त्रं ते प्रददाम्यहं॥ वस्त्रं॥ २१२

न्नादिसंयुतं ॥ नैवेद्यं । कर्पूरेणनागवल्लीचक्रमुकंचूर्णसंयुतं ॥ वरलक्ष्मीर्गृहाणत्वंतांबूलंप्रददाम्यहं ॥
तांबूलं ॥ सुवर्णंसर्वधातूनांश्रेष्ठंदेविपरंसदा ॥ भक्त्याददामिवरदेस्वर्णवृष्टिंप्रदेहिमे ॥ सुवर्णं ॥ निरा
जनसुमांगल्यंकर्पूरेणसमन्वितं ॥ चंद्रार्कवन्हिसदृशंप्रपश्यदेविनमोस्तुते ॥ नीराजनं ॥ सर्वमंग
लमांगल्येसर्वपापप्रणाशिनी ॥ दोरकंप्रतिगृह्णामिसुप्रीताहरिवल्लभे ॥ दोरकग्रहणं ॥ करिष्या
मिव्रतंदेविलक्ष्मिस्त्वत्परायण ॥ श्रियंदेहियशोदेहिसौभाग्यंदेहिमेशिवे ॥ दोरकबंधनं ॥ क्षीरा
र्णवसुतालक्ष्मीचंद्रेणैवसहोदरि ॥ गृहाणार्घ्यंमहालक्ष्मीदेवितुभ्यंनमोस्तुते ॥ पुनरर्घ्यं ॥ श्री
वृक्षस्यदलंदेविमहादेविप्रियंसदा ॥ बिल्वपत्रंप्रयच्छामिपवित्रंतेसुनिर्मितं ॥ बिल्वपत्रं ॥ इह
जन्मनियत्पापंममजन्मांतरेषुवा ॥ निवारयमहादेविलक्ष्मीनारायणप्रिये ॥ प्रदक्षिणा ॥ दोमोद
रिनमस्तेस्तुनमस्त्रैलोक्यनायके ॥ हरिकांतनमस्तेस्तुत्राहिमांपरमेश्वरि ॥ नमस्कारः ॥ क्षीरार्णव २०२
समुद्भूतेकमलेकमलालये ॥ प्रयच्छसर्वकामांश्चविष्णुवक्षस्थलालये ॥ व्रतसमर्पणं ॥ छत्रचामर

मंदोलव्यजनदर्पणंतथा ॥ गीतवाद्यादिनृत्यैश्चराजसन्मानेनैस्तथा ॥ रूपचोरैःसमभ्यर्च्यक्षमाप्य
प्यचमहेश्वरि ॥ वरलक्ष्मीमहादेविसर्वकामप्रदायिनी ॥ क्षमापणं ॥ प्रयच्छपुत्रकामांश्चविष्णुवक्षस्थ
लेनघे ॥ पुत्रान्देहियशोदेहिसौख्यंसौभाग्यमेवच ॥ त्रैलोक्यजननीत्राहिवरदेभक्तवत्सले ॥ प्रार्थना ॥
अथवायनं ॥ एकविंशतिपक्वान्नघृतशर्करसंयुतं ॥ इंदिराप्रियतांदेवि अतःशांतिंप्रयच्छमे ॥ वा
यनं ॥ इंदिराप्रतिगृह्णाति इंदिरावैददातिच ॥ इंदिरातारकोभाभ्यांइंदिरायैनमोनमः ॥ इतिप्रति
ग्रहमंत्रः ॥ ॥ इतिपूजाविधिः ॥ अथकथा ॥ सूतउवाच ॥ कैलासशिखरेरम्येसर्वदेवनि
षेविते ॥ गौर्यासहमहादेवोदिव्याक्षैश्चविनोदितः ॥ जितोसित्वांजितेत्याहपार्वतीपरमेश्वरं ॥ सोपि
त्वंचजितेत्याहसुविवादस्तयोरभूत् ॥ चित्रनेमिस्तदादृष्टोमृषावादमभाषत ॥ तदाकोपसमाविष्टा
भ गौरीशापंददौततः ॥ कुष्ठीत्वंमृषावादिन्चित्रनेमेहतक्रियः ॥ नान्यतहिसमंपापंक्वापिदृष्टंश्रुतंव
पि ॥ चित्रनेमिर्महाप्राज्ञसत्यंवदतिनोमृषा ॥ प्रसादःक्रियतांदेविमाहवृषध्वजः ॥ प्रसादसुमुखी

तस्मै विशापं स जगाद स॥ यदा सरोवरे दिव्ये करिष्यति त्वपङ्कजं च॥ ततस्त्व गणिकाः सर्वा विश्वंति तेनास
माहिताः॥ तदाभावाद्विशापः स्यादित्युक्तः स पपात ह॥ ततो दिनैश्च कतिभिश्चित्रनेमिः सरोवरे॥ क
ष्टी भूत्वा वसंस्तत्र ददर्श खर्विलासिनीः॥ देवतापूजनोद्युक्ताः पप्रच्छ प्रणिपत्य ताः॥ किमेतद्वो महाभागाः
किं पूजायां तु वांछितं॥ किं वास्माभिरनुष्ठेयमिहामुत्र सुखाप्तये॥ इति व्रतं चित्रनेमिश्चक्रेऽथ वसु
लोचनाः॥ येनास्मान्गिरिजा शापान्मोक्ष्यामि चिरदुःखितान्॥ तानूचुः कियमोस्याने व्रतमे
तदनुत्तमं॥ वरलक्ष्मीव्रतं दिव्यं सर्वकामसमृद्धिदं॥ यदा रवौ कुलीरस्थे मासे च श्रावणे तथा॥ गं
गागमनयोर्गंतुं गम्भद्रा समस्तदा॥ तस्मिन्वै श्रावणे मासि शुक्लांते तु भृगोर्दिने॥ प्रारब्धव्यं व्रतं
तत्र महालक्ष्म्या यतात्मभिः॥ सुवर्णप्रतिमां कुर्याच्चतुर्भुजसमन्वितां॥ पूर्वं गृहमलं कृत्य तोरणै
रंगवल्लिजैः॥ गृहस्य पूर्वदिग्भागे ईशान्यां च विशेषतः॥ तंडुलान्प्रस्थसंख्याकान्भूमौ निक्षिप्य पू २९४
जयेत्॥ संस्थाप्य कलशं तत्र तीर्थतोयैः प्रपूरयेत्॥ फलानि च विनिक्षिप्य सुवर्णं प्रक्षिपेत्ततः॥ प

मांगल्यमणिसंयुक्तं मुक्ताफलसमन्वितं॥ दत्तं मंगलसूत्रं च गृहाण सुरवल्लभे॥ मंगलसूत्रं॥ यज्ञोपवीतं
परमं पवित्रं उपवीतं॥ सुवर्णभूषणं दिव्यं नानारत्नसुशोभितं॥ त्रैलोक्यभूषणे देवि गृहाणाभरणं
शुभं॥ आभरणं॥ रक्तगंधसुगंधाढ्यं अष्टगंधसमन्वितं॥ दास्यामि देवि वरदे लक्ष्मी देवि प्रसीद मे॥
गंधं॥ महाप्रीहिसमुद्भूतानक्षतानपि षोडश॥ मुक्ताविशेषजप्रख्यान् गृहाण परमेश्वरि॥ अक्षतां
नानाविधानि पुष्पाणि नानावर्णयुतानि च॥ पुष्पाणि ते प्रयच्छामि भक्त्या देवि वरप्रदे॥ पुष्पं॥ अथांग
पूजा॥ वरलक्ष्म्यै नमः॥ पादौ पूजयामि॥ कमलवासिन्यै॰ गुल्फौ॥ पद्मालयायै॰ जंघे॥ श्रियै॰ जानु
नी॥ इंदिरायै॰ ऊरू॰ हरिप्रियायै॰ कटिं॰॥ लोकमात्रे नमः॥ नाभिं॥ शंखनिध्यै॰ हस्तौ॰ त्रैलोक्यपाव
न्यै॰ कंठं॰ धात्र्यै॰ नासां॥ पद्मनिध्यै॰ नयने॰ भार्गव्यै॰ कर्णौ॰ क्षीरसागरजायै॰ ललाटं॥ श्रीवरलक्ष्म्यै
नमः॥ शिरः॥ श्रीमहालक्ष्म्यै नमः सर्वांगं पूजयामि॥ धूपं दास्याम्यहं देवि गोघृतेन प्रपूरितं॥ प्रयच्छामि
महादेवि भक्तानां वरदप्रिये॥ दीपं॥ नैवेद्यं परमं शुभ्रं दृष्टिप्रीतिकरं शुभं॥ भक्ष्यभोज्यादिसंयुक्तं परम

स्तांदेकंपूगफलंतथा॥ पर्णाकंचूर्णरहितंचर्वणीयंप्रयत्नतः॥ भक्षयित्वातुवैरात्रौतेबंधयित्वा छंततः॥ त-
तःप्रभातेउत्थायदर्शनीयंप्रयत्नतः॥ आरक्तेसतिसंजातेकुर्याद्व्रतमनुत्तमं॥ नोचेन्नत्रव्रतंकुर्यात्स-
र्वदाभूतिमिच्छता॥ अनेनैवक्रमेणैवनैसंगृहीतयत्नतः॥ अहंतस्मात्करिष्यामिव्रतंसर्वसमृद्धिदं
इत्युक्त्वासर्वदेव्यास्तुकारयामासतत्क्षणात्॥ सुवर्णनिर्मितांदेवींवस्त्रालंकारसंयुतां॥ पूर्वोक्तेनवि-
वा धानेनपूजांकृत्वाप्रयत्नतः॥ पंचवायनकंकृत्वादत्त्वातेभ्योयथाक्रमं॥ विप्रायवाथपत्येदेव्यैचब्र-
ह्मचारिणे॥ सुवासिन्यैततस्त्वेकंअर्पितंचित्रनेमिना॥ एवंसम्यक्क्रमेणैतांकृत्वावायनपंचकं॥ ततोगृ-
हंगतंतेनदेवींनत्वायथाक्रमं॥ ततोह्यनुज्ञांसंप्राप्यभक्षयित्वाततोव्रती॥ नागवल्लीदललकंक्रमुकं
चूर्णवर्जितं॥ भक्षयित्वातुवेलांतेप्रभातेतंनिरीक्ष्यच॥ आरक्तेचततोजातोव्रतस्यास्यप्रभावतः॥
अद्याहंगतपापोस्मिदेवीदर्शनयोगतः॥ एतत्सम्यग्व्रतंचीर्णंव्रतंयन्मेमयाकृतं॥ चित्रनेमिर्व्रतं १९५
कृत्वाकैलासंशंकरालयं॥ गत्वाप्रणम्यदेवेशंदेवींसादरपूर्वकं॥ पार्वतीचतदाप्राहचित्रनेमेस्त्वप्र-

त्ववत्॥ पालनीयोमयात्वंवैसत्यमित्यवधार्यतां॥ चित्रनेमिस्तदाप्राहपार्वतींहरवल्लभां॥ तवपादांबु-
जंदृष्टंवरलक्ष्मीःप्रसादतः॥ महादेवस्ततःप्राहचित्रनेमिंशुचिव्रतं॥ अद्यप्रभृतिकैलासेभुंक्ष्वभोगा-
न्यथेप्सितं॥ पश्चाद्गतासिवैकुंठंव्रतस्यास्यप्रभावतः॥ पार्वत्यापिकृतंपूर्वंपुत्रलाभार्थयातया॥ दृष्ट-
श्चषण्मुखस्तेनव्रतेनसुमहाव्रतः॥ नंदिश्चविक्रमादित्योराज्यंप्राप्तंतदाज्ञया॥ नंदिश्चकांतयाहीनोका-
तालब्धाप्रसादतः॥ तयावतव्रतंकृत्स्नंकृतंवैपुत्रहेतुतः॥ पुत्रंप्रसुषुवेसात्रैलोक्यभरणक्षमं॥ इह
मानुषलोकेषुहिव्रतंचीर्णंसुविस्तरं॥ तदाप्रभृतियेनैवंवरलक्ष्मीव्रतंशुभे॥ व्रतंपुण्यंनरोवापिकुर्या-
त्सैतत्तथांगना॥ सत्याकरोतिविपुलान्भोगान्प्राप्यश्रियंव्रजेत्॥ व्रतानामुत्तमंपुण्यंवरलक्ष्मीव्र-
तंशुभं॥ तत्कृतीचनरोनारीह्येपरोस्वर्नसंशयः॥ यइदंशृणुयान्नित्यंश्रावयेद्वासमाहितः॥ धनधा-
न्यमवाप्नोतिवरलक्ष्मीप्रसादतः॥ ॥इतिश्रीभविष्योत्तरपुराणेवरलक्ष्मीव्रतं॥ ॥आश्विनशुक्ल-
स्यभानुवासरमारभ्यमाघशुक्लसप्तवधिदानाफलव्रतं॥ तत्रपूजा॥ ध्येयःसदासवित्रमंड

लमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः॥ केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मय
वपुर्धृतशंखचक्रः॥ इति ध्यानं॥ जगन्नाथायनमः॥ आवाहनं॥ पद्मासनायनमः॥ आसनं॥ ग्रह
पतयेनमः॥ पाद्यं॥ तमोहर्त्रेनमः॥ अर्घ्यं॥ मित्रायनमः॥ आचमनं॥ विश्वतेजसे नमः॥ पंचामृतस्नानं॥
जगत्पतयेनमः॥ वस्त्रं॥ त्रिमूर्तयेनमः॥ यज्ञोपवीतं॥ हरयेन॰ गंधं॰ सूर्या॰॥ अक्षताः॥ भास्करा॰ पुष्पं॥ अहस्पतये॰॥
धूपं॥ अज्ञाननाशिने॰ दीपं॥ लोकेशाय॰ नैवेद्यं॰ विश्वतेजसे॰ तांबूलं॰ सूर्याय॰ सुवर्णपुष्पं॰ विश्वतेजसे॰॥ नी
राजनं॥ भास्कराय॰ मंत्रपुष्पं॥ नमस्ते देवदेवेश नमस्ते सर्वकामद॥ नमस्ते पद्महस्ताय नमस्ते देवमूर्तये॥
नमस्कारः॥ सर्वात्मने नमः॥ प्रदक्षिणं॥ दिवाकर नमस्तुभ्यं पापनाशाय भास्कर॥ त्रयीमयार्क विश्वात्मन्
गृहाणार्घ्यं नमोस्तु ते॥ द्वादशं वा त्रमर्घ्यं॥ ततो ब्राह्मणपूजा॥ यथ्यस्मृत्यामि॥ ॥ इति पूजावि
धानं॥ पितृगृहे वर्तमाना कुंती व्यासं ददर्श ह॥ नमस्कृत्वा सत्कृत्य पाद्यार्घ्याचमनीयकं॥ कृ १२८
त्वा संप्रार्थितं व्यासं कुंती मुकुलितांजलिः॥ पतिपुत्रात्मसौख्यार्थं व्रतं ब्रूहि महामुने॥ ॥व्यास उवाच॥

त्वा चैव विनिक्षिप्य वस्त्रेणाच्छादयेत्ततः॥ प्रतिमां स्थापयेत्तत्र पूजयेच्च यथाविधि॥ अग्न्युत्तारणपूर्वं तु उद्वर्त्त
नं यथाक्रमं॥ पंचामृतेन स्नपनं कारयेन्मंत्रतः सुधीः॥ शुद्धोदकैः स्नानं ततः कुलादेवीसूक्तेन वै ततः॥ अष्ट
गंधैः समभ्यर्च्य पल्लवैश्च समर्पयेत्॥ अश्वत्थवटबिल्वादि चूतदाडिंबमालती॥ एतेषां पत्रमादाय
एकविंशतिसंख्यया॥ नानाविधानि पुष्पाणि मालत्यादीनि वै ततः॥ धूपदीपैर्महालक्ष्मीं पूजयेत्स
र्वकामदां॥ पायसं सर्वमंत्रं च सर्वभक्ष्यैश्च संयुतं॥ एकविंशतिसंख्याकैरपूपैः पूजयेच्छ्रियं॥ देव्यै सर्वं
समर्प्याथ वरं संगृणुयात्ततः॥ एवं संपूजयित्वा तां तांबूलाद्यैश्च षोडशैः॥ उपचारैर्बहुविधैर्नाना सं
माननैस्तथा॥ नृत्यगीतादिसहितं देवीं संप्रार्थयेच्छ्रियं॥ उमा सरस्वती माया शची त्वं प्रियवादिनी॥
एताभिश्च कृतं सम्यग्व्रतं सर्वसमृद्धिदं॥ पूजावसानपर्यंत चित्तेन स्थिरभूततः॥ होमधूपसमाघ्राय घृ
तदीपप्रभावतः॥ गतकुष्टः स्वर्णतेजोस्तु चिरस्तु कृतमानसः॥ तस्मिन्नेव व्रते सम्यक् मनः संधाय सर्वदा॥
पंचपायनकं दत्वा कथां श्रुण्वीलयत्नतः॥ तथा मौनं गृहीत्वा तु आरतीभिः प्रपूजयेत्॥ व्रतं च कुर्वतां ह

दत्तं येन केन धवं तु मे ॥ महादेव फलं दत्तं पार्वत्या कृपया मम ॥ ततः शिवपुरं प्राप्य भार्यया सममब्रवी
त् ॥ नमस्कृत्या तु सद्भक्त्या पप्रच्छेदं शिवं द्विजः ॥ तत्फलं कथ्यतां देवी वरं प्राप्य द्विजोत्तमः ॥ तदारभ्य
कृतं सर्वं तूर्णं दाता फलं महत् ॥ सुपुत्रं लभते कुंति त्वं कुरु व्रतमुत्तमं ॥ यः पठतीदमाख्यानं शृणो
ति श्रद्धयान्वितः ॥ ते सर्वपापनिर्मुक्ता यास्यंति परमां गतिं ॥ ॥ इति स्कंदे दानाफलव्रतं ॥ अ
थ चातुर्मास्यैकादशीमारभ्य धारणापारणव्रतं ॥ ॥ भविष्योत्तरपुराणे ॥ ॥ कृष्ण उवाच ॥
शृणु कौंतेय वक्ष्यामि व्रतं धारणपारणं ॥ बांधवादिवधदोषं सर्वेंद्रियनियामकं ॥ चातुर्मास्ये तिथा
वादौ मासि कौंतेय सुव्रतं ॥ पुण्याहं कारयेत्पूर्वमेकादश्यां शुभे दिने ॥ पश्चात्संकल्प राजेंद्र तदा रा
म व्रतं चरेत् ॥ आदौ मासि तथा चांते चातुर्मास्यमथापि वा ॥ एकस्मिन्धारणं कार्यं पारणं च तथा
परं ॥ उपवासो धारणं स्यात्पारणं भोजनं भवेत् ॥ अष्टोत्तरशतं दद्यादर्थं देवायतन्मनाः ॥ समा
प्ते मासि राजेंद्र कुर्यादुद्यापनं बुधः ॥ चातुर्मास्यव्रती चापि मासे मासे तु कारयेत् ॥ उपवासदिने २९
प्राप्ते पुण्याहं कारयेत्पुरा ॥ आचार्यं वरयेत्पश्चात्तद्ब्राह्मणं तु ततः परं ॥ कुर्यात्तु प्रतिमां पश्चात्तु

शेषेपाफलप्रदं॥ नीवार ध्याद्गनिववि शेषःसद्ग्रहःस्मृतः॥ एवंकुर्याद्व्रतंसम्यकप्रत्येकंभानुवासरे॥ माघ
मासेशुक्लपक्षेसप्तम्यांयावदंतिके॥ षष्ठ्यामुपोष्यविधिवत्सप्तम्यामुदयेशुचिः॥ पूर्ववद्रविमभ्यर्च्यप्रति
मांवस्त्रसंयुतां॥ आचार्यपाग्निमादायगोमयेनोपलिप्यच॥ सघृतंपरमान्नंचहोमयेत्सौरमंत्रकं॥ पा
यसंप्रतिमांवस्त्रंब्राह्मणायनिवेदयेत्॥ एवंकुर्यात्पंचवर्षंपंचधान्यंसमर्पयेत्॥ पंचप्रस्थप्रमाणंचप्र
थमंव्रीहिमेवच॥ गोधूमाश्चद्वितीयेचतृतीयंलवणंतथा॥ चतुर्थेतिलदानंचपंचमेमाषमेवच॥ स
फलंदक्षिणांदद्याद्विप्रान्द्वादशभोजयेत्॥ एवंकुर्याद्व्रतंसम्यक्सर्वसंपूर्णतामियात्॥ तद्व्रतोद्यो
गृहीत्वाथसर्वंतत्रचकारच॥ पद्मावतीपतिंप्राप्यदमयंतीतथानलं॥ सुमित्रपुत्रपिंडार्थेतत्प्रा
प्यद्विजोत्तमं॥ सर्वभाग्ययुतागौरीस्वर्णमाषूफलंतथा॥ तद्गृहीत्वागतेमार्गेददर्शब्राह्म
णस्त्रियं॥ तांदृष्ट्वातत्फलंदत्वाततःशिवपुरंययौ॥ ततःसफलविप्रश्चगृहंगत्वासविस्मया॥ ध
नधान्यसमृद्धिस्तुबहुगोधनसंकुलं॥ सर्वरत्नमयोभूत्वाभार्यायासमब्रवीत्॥ सविस्मयविस्मि
स्मितोभार्याएष्वानरकिंकृतंमया॥ साब्रवीद्गृहगतान्सर्वाभिन्नभवद्भिःप्रलयंगतं॥ स्वर्णमाषूफलं

कव्रतं॥सर्वदानफलंचैकंतस्माद्दानाफलव्रतं॥सागंव्रतंव्रतंब्रह्निकालद्रव्यविशेषतः॥ ॥स्त्रियऊचुः॥
अकाहयेजगन्नाथंभास्करंवेदरूपिणं॥ पद्मासनःपद्मकरःपद्मगर्भसमद्युतिः॥ सप्ताश्वःसप्तरज्जुश्चद्विभुज
स्यात्तदारविः॥ ध्येयःसदासवितृमंडलमध्यवर्ती॥ एवंध्यात्वाद्विजःसम्यक्भास्करंवेदरूपिणं॥ नमःपद्मा
सनायेतिदद्यादासनमुत्तमं॥पाद्यंगृहपतेतुभ्यंमित्रायाचमनंतथा॥ त्रैलोक्याधतमोहंत्रेअर्घ्यंदद्यात्प्रयत्न
तः॥पंचामृतविधानेनस्नापयेद्विश्वतेजसा॥जगत्पतयेतुवस्त्रंचउपवीतंत्रिमूर्तये॥रक्तगंधाक्षतंपुष्पंर
वेर्दद्यात्समंत्रकं॥अहस्पतयेतुवैधूपंदीपमज्ञाननाशिने॥ नैवेद्यंपरमान्नंचसफलंचाज्यत्वार्क
रं॥ गृहाणसर्वलोकेशसर्वकामफलप्रदं॥तांबूलंचसकर्पूरंप्रदद्याद्विश्वतेजसे॥ नमस्तेदेवदेवेश
नभस्तेदेवमूर्तये॥ नमःकमलहस्ताय आदित्यायनमोनमः॥नमस्कुर्यादनेनैवप्रार्थयेद्विश्वतेजसं॥कृ
त्वाप्रदक्षिणांदेवमर्घ्यंदद्यात्प्रयत्नतः॥ रक्तगंधाक्षतैःस्तांम्रपात्रेणार्घ्यंसमंत्रकं॥ दिवाकरनमस्तेस्तुप्रपंप 297
पंनाशायभास्कर॥ त्वयांमयार्कविश्वात्मन्गृहाणार्घ्यंनमोस्तुते॥ द्वादशवारंचव्रतीदद्यात्समंत्रकं॥तैल
क्षारलवणक्षारंवर्जयित्वातुभोजयेत्॥ बहुबीजफलंवर्ज्यशेषद्रव्यंतुभोजयेत्॥ कंदमूलफलाहारंवि

शृणुदानाफलंनामवक्ष्येव्रतमनुत्तमं॥ कैलासशिखरेरम्येपार्वतीपरमेश्वरं॥ दानानांसर्वदानानामुत्तमंब्रू
हितत्वतः॥ ॥शंकरउवाच॥ साधुदेवित्वयापृष्टमुमेमेसर्वतःशुभं॥ आश्रमौतुभारतेवर्षेपुण्येचयमुनात
टे॥ ऋषिपत्निसमूहश्चव्रतांगेनसुसंस्थितः॥ तत्रगत्वातुहेदेविशृणुसर्वव्रतोत्तमं॥ शंभोरनुज्ञयादे
वीकैलासादागताभुवि॥ आगच्छमानामार्गेपाददर्शकुसुमावती॥ किंवनेक्लिश्यतेबालेतामुवाचाथ
पार्वती॥ हेदेविवरसेत्वंहिपतित्यक्तास्मिदुःखिता॥ आगच्छत्वंमयासार्द्धंकरिष्यामोवयंव्रतं॥ भविष्य
तिपतेर्योगःसुपुत्रोधनवान्परः॥ तयासहव्रजत्वंमेदर्शयंतीददर्शह॥ तथेवचपतित्रिशशुत्रही
नास्मिदुःखिता॥ तावुक्त्वातांगृहीत्वातुताभ्यांसार्द्धंजगामह॥ पुण्यांचयमुनांगत्वापूर्वाह्णेभानुवासरे॥
तत्रदृष्ट्वातुसादेवीपप्रच्छस्त्रीकदंबकं॥ इदंव्रतंकिमेतन्मेवक्तव्यंतुऋषिस्त्रियः॥ ॥स्त्रियाउचुः॥
पुण्यंव्रतमिदंदेविसौरंपापप्रणाशनं॥ सर्वसंपत्करंस्त्रीणांपतिपुत्रान्नमोक्षदं॥ धर्मार्थकाममोक्षाणां
सिद्ध्येतद्व्रतंन्टपां॥ कन्यादानसहस्रैस्तुगोदानंचत्रिलक्षकं॥ हिरण्यतिलादीनांसर्वेषामधि

पांकुर्याद्व्रतानामुत्तमंव्रतं॥ सर्वयज्ञेषु तीर्थेषु सर्वदानेषु यत्फलं॥ तत्फलंसमवाप्नोति कृत्वा धारणपारणं॥
इदंव्रतंमहापुण्यंतपसामुत्तमंतपः॥ यज्ञानांच तथा यज्ञव्रतानामुत्तमंव्रतं॥ तस्मात्वमपि राजेंद्र कुर्विदं
विधिपूर्वकं॥ बांधवादिव्रतदोषैर्मुच्यते नात्र संशयः॥ इति तं संप्रभाष्याथ विष्णुस्वां च पुरीं ययौ॥
दृश्यमानः पौरजनैः समस्तैः पांडुपुत्रकैः॥ युधिष्ठिरोपि राजर्षिश्चकार दमहाव्रतं॥ विमुक्तः सर्वपापेभ्यो
वंशायश्च ततो भवत्॥ ॥इति भविष्योत्तरपुराणे धारणापारणव्रतं॥ ॥अथाश्विनशुक्लैकादश्या
दि मासपर्यंतं मासोपवासव्रतं हेमाद्रौ विष्णुरहस्ये॥ ॥नारद उवाच॥ भगवन् श्रोतुमिच्छा
मि व्रतानामुत्तमस्य च॥ विधिं मासोपवासस्य फलं चास्य यथोदितं॥ यथा विधानैः कार्यो व्रतचर्या
यथा भवेत्॥ आरभ्यते यथा पूर्वं समाप्यं हि यथाविधि॥ यावत्संख्यं हि कर्तव्यं तत्त्वं ब्रूहि प्रपितामह॥
व्रतमेतत्सुरश्रेष्ठ विस्तरेण ममानघ॥ ॥ब्रह्मोवाच॥ साधु नारद सञ्ज्ञेलस्त्वं वरतपोधन॥ या
दृश्यति मनांश्रेष्ठ तच्छृणु प्रब्रवीमि ते॥ सुराणां च यथा विष्णुस्तपतां च यथा रविः॥ मेरुः शिखरिणां यद्व
त्वैनतेयस्तु पक्षिणां॥ तीर्थानां तु यथा गंगा प्रजानां तु यथा वणिक्॥ श्रेष्ठं सर्वव्रतानां तु तद्वन्मासोपवा २९९

सनं॥ सर्वव्रतेषु यत्पुण्यं सर्वतीर्थेषु यद्भवेत्॥ सर्वदानोद्भवं चापि लभेन्मासोपवासकृत्॥ अग्निष्टोमादिभि
र्यज्ञैर्विधिवद्भूरिदक्षिणैः॥ न तत्पुण्यमवाप्नोति यन्मासपरिलंघनात्॥ तेन दत्तं कृतं जप्तं स्तप्तं स्वधाकृतं॥
यः करोति विधानेन नरो मासमुपोषणं॥ प्रविश्य वैष्णवं यज्ञं येनाभ्यर्च्य जनार्दनं॥ गुरोराज्ञां ततो लब्ध्वा कुर्या
न्मासोपवासनं॥ वैष्णवानि यथोक्तानि कृत्वा सर्वव्रतानि तु॥ द्वादश्यादीनि पुण्यानि ततो मासमुपावसेत्॥
अतिकृच्छ्रं पराकं च कृच्छ्रं चांद्रायणं ततः॥ मासोपवासं कुर्वीत ज्ञात्वा देहबलाबलं॥ वानप्रस्थो यतिर्वापि ना
री वा विधवा मुने॥ मासोपवासं कुर्वीत गुरुविप्राज्ञया ततः॥ आश्विनस्यामले पक्षे एकादश्यामुपोषितः॥ व्रतमे
तत्तु गृह्णीयाद्यावत्त्रिंशद्दिनानि तु॥ वासुदेवं समुद्दिश्य कार्त्तिकं सकलं नरः॥ मासं चोपवसेद्यस्तु समुक्तिः
फलभाग्भवेत्॥ अच्युतस्यालये भक्त्या त्रिकालं कुसुमैः शुभैः॥ मालती दीवरैः पद्मैः कमलैस्तु सुगंधिभिः॥
कुंकुमोशीरकर्पूरैर्विलिप्य वरचंदनैः॥ नैवेद्यधूपदीपाद्यैरर्चयेत जनार्दनं॥ मनसा कर्मणा वाचा पूजयेद्ग
रुडध्वजं॥ कुर्यान्निरस्त्रिषवणं त्रकृष्णक्ति जितेंद्रियः॥ नाम्नामिवत थाल्पं विष्णोः कुर्याद्दहनिशं॥ भक्त्या
विष्णोः स्तुतिर्वाच्या मृषावादं विवर्जयेत्॥ सर्वसत्वदयायुक्तः शांतवृत्तिरहिंसकः॥ सुप्तो वा आसनस्थो वा वासुदे

वप्रकीर्तयेत् ॥ स्मृत्यालोकनगंधादिस्वादनं परिकीर्तनं ॥ अन्नस्य वर्जयेत्सर्वं ग्रासानां चाभिकांक्षिणं ॥
३०० गात्राभ्यंगं शिरोभ्यंगं तांबूलं सविलेपनं ॥ व्रतस्थो वर्जयेत्सर्वं यच्चान्यत्र निराकृतं ॥ व्रतस्थो न स्पृशेत्कि
चित्क्विकर्मस्थो न बालयेत् ॥ देवतायतने तिष्ठन्न गृहस्थश्चरेद्व्रतं ॥ कृत्वा मासोपवासं तु यथोक्तविधि
ना नरः ॥ नारी वा विधवा साध्वी वासुदेवं समर्चयेत् ॥ अन्यूनाधिकमेवं तु व्रतं त्रिंशद्दिनेरितं ॥ कृत्वा मा
सोपवासं तु संयतात्मा जितेंद्रियः ॥ ततोर्चयेन्महद्भक्त्या तीर्थचंदनवारिभिः ॥ चंदनेनानुलिप्तांगं पुष्प
धूपैरलंकृतं ॥ वस्त्रदानादिभिश्चैव भोजयेत् द्विजोत्तमान् ॥ दद्याच्च दक्षिणां तेभ्यः प्रणिपत्य क्षमापयेत् ॥
क्षमापयित्वा विप्रांश्च विसर्ज्याभ्यर्च्य च ॥ एवं वित्तानुसारेण भक्तियुक्तेव शक्तितः ॥ एवं मासोपवासं
तु कृत्वाभ्यर्च्य जनार्दनं ॥ भोजयित्वा द्विजांश्चैव विष्णुलोके महीयते ॥ एवं मासोपवासान्हि सम्यक् कृत्वा
त्रयोदश ॥ निर्वापयेत्तु तस्तद्वै विधिना येन तत् शृणु ॥ कारयेद्दै स्वर्वं यज्ञमेकादश्यामुपोषितः ॥ पूजयि
त्वा च देवेशमाचार्याज्ञया हरिं ॥ अर्चयित्वा हरिं भक्त्या अभिवाद्य गुरुं तथा ॥ ततोतु भोजयेद्विप्रा
न् भोजयीत यथाविधि ॥ विशुद्धकुलचारित्रान् विष्णुपूजनतत्परान् ॥ पूजयित्त्रयोदश ॥ तावं ३००

क्ष्मीनारायणस्यैव ॥ पूर्णकुंभेतु तांस्थाप्य पूजयेन्निशि भूमिप ॥ पंचामृतैस्तथा पुष्पैस्तुलसीदलसंयुतैः ॥ माल
तीकेतकीभिश्च मल्लिकाकुसुमैस्तथा ॥ रात्रौ जागरणं कुर्यात्पुराणपठनादिभिः ॥ प्रातःकाले समयाते ब्राह्मणां
स्तु निमंत्रयेत् ॥ मासे विंशान्पंचदश द्विमासे द्विगुणं भवेत् ॥ चातुर्मास्ये तथा राजन् तथाचिं शत्स्मृतान् ॥ आ
नीय संख्यया राजन् ब्राह्मणांश्च निमंत्रयेत् ॥ पश्चात्स्नानादिकं कृत्वा देवपूजां समाचरेत् ॥ पश्चादग्निं समाधा
य होमं कुर्याद्यथाविधि ॥ निषुसीदेति मंत्रेण जुहुयात् तिलोदनं ॥ अराय्यि काणे मंत्रेण जुहुयाद्घृतौदनं ॥ अ
ष्टाक्षरेण मंत्रेण पायसं जुहुयात्ततः ॥ लक्ष्मीनारायणो देवस्तं अन्नं ये पि देवताः ॥ पूर्णाहुतिं ततो हुत्वा होमशे
षं समापयेत् ॥ ब्राह्मणान्भोजयेत्पश्चादाचार्यं पूजयेत्ततः ॥ एवं कृत्वा महाभाग ब्रह्महत्यादिपातकैः ॥
मुच्यते नात्र संदेहस्तस्मात्कुरु महाव्रतं ॥ सुग्रीवस्तु पुरा राजन् हत्वा वालिनमाहवे ॥ रामादिष्टु ततो भूत्वा
कृत्वा धारणपारणं ॥ विमुक्तस्तत्कृताद्दोषात्तथान्यैः पातकैरपि ॥ नारदोपि तथा राजन् पूर्वजन्मनि शूद्र
कः ॥ द्विजेभ्य उपदेशात्स कृद्धारणपारणं ॥ होमादिकं विनावापि तस्य पुण्यप्रभावतः ॥ जितेंद्रियस्ततो
भूत्वा ब्रह्मणो भूर्व शिनां वरः ॥ तस्मात्सर्वप्रयत्नेन कुर्याद्धारपारणं ॥ इंद्रियाणां वशार्थाय सर्वपापा
यनुत्तये ॥ तस्मात्त्वमपि राजेंद्र कुरुष्व व्रतमुत्तमं ॥ किं दानैस्तपसा किं वा किमन्यैश्च व्रतैर्यमैः ॥ धारणपार

वेत्तिवस्त्रयुग्मानिभाजनान्यसनानिच।। योगपट्टानिशुभ्राणिब्रह्मसूत्राणिचैवहि।। दद्याच्चैवद्विजाग्रेभ्यःपूज
यित्वाप्रणम्यच।। ततोनुकल्पयेच्छय्यांशास्त्रास्तरणसंस्थितां।। सच्छादनशुभांश्रेष्ठांसोपधानामलंकृतां।। कार
यित्वान्मनोमूर्तिकांचनीतुस्वशक्तितः।। न्यसेतस्यांतुशय्यायामर्चयित्वास्रगादिभिः।।आसनंपादुकेछ
त्रवस्त्रयुग्ममुपानहौ।। पवित्राणिचपुष्पाणिशय्यायामुपकल्पयेत्।। एवंशय्यांतुसंकल्प्यप्रणिपत्यच
तान्द्विजान्।। प्रार्थयेच्चानुमोदार्थंविष्णुलोकंव्रजाम्यहं।।एवमभ्यर्चितास्विप्रावदेयुस्तेनतदा।। व्रजनृत
नृश्रेष्ठविष्णोःस्थानमनामयं।। ततोविसर्जयेद्विप्रान्प्रणिपत्यानुगम्यच।। ततस्तुपूजयेद्भक्त्यागुरुंज्ञान
प्रदायकं।। तांशय्यांकल्पितांसम्यग्गुरुव्रतसमापकं।। प्रणम्यशिरसाशांतोगुरवेप्रतिपादयेत्।। एवंपू
ज्यहरिंविप्रान्गुरुंज्ञानप्रकाशकं।। कृत्वामासोपवासांश्चनरोविष्णुतनुंविशेत्।। कृत्वामासोपवासंश्चवि
ष्णुपूजनतत्परः।। नयेच्छांतमनाःकल्पंस्वर्गस्थोविजितेंद्रियः।। कृत्वामासोपवासांश्चनिर्वाप्यविधिवन्मुने।।
कुलानांशतमुद्धृत्यविष्णुलोकंव्रजेन्नरः।।यस्मिन्जातोमहापुण्यकुलमासोपवासकृत्।। सर्वपा
पविनिर्मुक्तोविष्णुलोकेमहीयते।। नरोमासोपवासानांकर्त्तापुण्यकृतांवरः।। पितृमातृकुला

ष्यांच समं विष्णुपुरीं व्रजेत्॥ नारीवा सुमहाभागा यथोक्तव्रतमास्थिता॥ कृत्वा मासोपवासं सा व्रजे
द्विष्णुं सनातनं॥ ॥नारदउवाच॥ सुदुःकरमिदं देव मूर्छायानिःकरं परं॥ व्रतं मासोपवासाख्यं भति
जनयते प्रभु॥ पीडितस्य भ्रष्टं देव मुमुर्षा व्रतिनस्तथा॥ त्यामोचानुग्रहो वाथ किंनु कार्यं पितामह॥
ब्रह्मोवाच॥ व्रतस्थं कर्शितं दृष्ट्वा मुमूर्षुं वा तपोधन॥ दृष्ट्वा तु ब्राह्मणास्तस्य कुर्युः सम्यगनुग्रहं॥ अ
मृतं वा पयः क्षीरं मिश्रमानं सकृन्निशि॥ यथेह न वियुज्येत प्राणैः क्षुत्पीडितो व्रती॥ अभिमूर्छा विनष्टी
पं मुमूर्षुं क्षुत्पीडितं॥ पाययित्वामृतं क्षीरं रक्षेदुत्वा फलानि च॥ अहोरात्रवयो नित्यं व्रतस्थं परि
पालयेत्॥ पयोमूलं फलं दत्वा विष्णुलोकं व्रजेत्तु सः॥ एवं मासोपवासस्थं मारूढं प्राणसंशये॥ अत्र
तघ्न गुणैर्दिव्यैः परिस्ते ब्राह्मणाज्ञया॥ नैते व्रतं विनिघ्नंति हवि विप्रान्नुमोति पुनव्रतं॥ अथ वृद्धव
नं विष्णु र्हत्ताविवर्तीत्तया॥ सर्वं विष्णुमयं यस्मात्ता व्रतस्थं क्षीणमुद्धरेत्॥ पदामुमुर्षन्निश्चेष्ट ३०१
परिम्लानोति मूर्छितः॥ तदा समुद्धरेत्क्षीणमिच्छंतं विमुखं स्थितं॥ परिपाल्य व्रती देहं व्रतशेषं
समापयेत्॥ यथोक्तं द्विगुणं तस्य फलं विप्रमुखोदितं॥ इंद्रियार्थे च संसक्ता सा देव विमत्ता मति॥

परितोषयते विष्णुनोपवासोयतात्मवान्॥ किंतस्यबहुभिस्तीर्थैःस्नानहोमजपैर्व्रतैः॥ जितेंद्रियगणोघो
रोनिर्जितोदुष्टचेतसा॥ जितेंद्रियःसदाशांतसर्वभूतहितेरतः॥ वासुदेवपरोनित्यंनक्लेशंकर्तुमर्हसि॥ कृ
त्वान्नूनंयथोक्तंतुवैष्णवंपदमव्ययं॥ प्राप्नोतिपुरुषोनित्यंपुनरावृत्तिदुर्लभं॥ येस्मरंतिसदाविष्णुंवि ६
शुद्धेनांतरात्मना॥ तेप्रयांतिचयंमुक्ता विष्णुलोकमनामयं॥ प्रभातेवार्द्धरात्रेवामध्यान्हेदिवस
क्षये॥ अच्युतंयेकीर्तयंतितेतरंतिभवार्णवं॥ आनंदितोथदुःखातेक्रुद्धःशांतोथवाहरिं॥ योनुकी
र्तयतेभक्त्यासगच्छेद्वैष्णवंपुरीं॥ गर्भजन्मजरारोगादुःखसंसारबंधनैः॥ नबाध्यतेनरोनित्यंवा
सुदेवमनुस्मरन्॥ स्थावरेजंगमेसत्वेस्थूलेसूक्ष्मेशुभाशुभे॥ विष्णुंपश्यतिसर्वत्रयःसविष्णुस्वयं
नरः॥ सर्वंविष्णुमयंज्ञात्वात्रैलोक्यंसचराचरं॥ यस्यशांतामतिस्तेनदृष्टजितोगरुडध्वजः॥ इति
कल्पानुकल्पानांव्रतानामुत्तमस्यच॥ सविष्णुलोकमाप्नोतिप्रसादाच्चक्रपाणिनः॥ विधिर्मासो
पवासस्ययथावत्परिकीर्तितः॥ सूतस्नेहान्मुनिश्रेष्ठसर्वलोकहितायवै॥ कृत्वाष्णुलाचयो

भक्त्या नरो विष्णुपुरीं व्रजेत्॥ नाभक्ताय प्रदातव्यं नदेयं दुष्टचेतसा॥ ॥इति विष्णुरहस्योक्तमासो
पवासव्रतं॥ ॥अथ मलमासव्रतं॥ ॥हेमाद्रौ पाद्मे॥ देवेशं शंकरं शंभुं सर्वदेवनमस्कृतं॥ ष
डाननो महातेजा प्रणम्य पर्यपृच्छत॥ ॥स्कंद उवाच॥ ॥देवदेव महादेव सर्वधर्मप्रवर्त्तक॥
व्रतानि बहुपुण्यानि श्रुतानि त्वत्प्रसादतः॥ नतृप्तिमधिगच्छामि धर्मतत्त्वं सुरेश्वर॥ व्रतांतरं महा
पुण्यं कथयस्व महाप्रभो॥ ॥ईश्वर उवाच॥ ॥शृणु वत्स प्रवक्ष्यामि व्रतं पापहरं शुभं॥ यस्या
नुष्ठानमात्रेण तुष्टो भवति भास्करः॥ दुःखं हरति यः क्षिप्रं प्रदद्यात्सौख्यमुत्तमं॥ स्कंद उवाच॥
मलमासं व्रतं स्कंद सर्वपापहरं नृणां॥ सकांस्यमन्नदानं च पूजनं भास्करस्य च॥ यस्यानुष्ठान
मात्रेण पुत्रदौहित्रवान्नरः॥ धनधान्यसमायुक्तः सर्वपापैः प्रमुच्यते॥ आसीत्पुरा महाराजा नृ
ऋषुः पृथिवीतले॥ धर्मप्रियस्तपोनिष्ठो देवपूजनतत्परः॥ प्रजानां पालको नित्यमतिथीनां च
पूजकः॥ गंतुं शक्रपदं सोथ ब्राह्मपानरवाहने॥ भोक्तुमाकारयद्देवादगस्त्यं मुनिपुंगवं॥ युक्ता ३०२

समारुह्यसोथतदानीमिंद्रमायया॥ मोहितेनैव -- मुक्तोब्रह्मविदांवरः॥ सपदायातिमूढेन ता
डितश्चमुनिस्तदा॥ क्रुद्धेन मुनि तातेन शापितःकुंभयोनिना॥ सर्पोभवतिहे पापमहाशठस्तदा
भवत्॥ राजाप्राप्तस्तदारकंदसर्पत्वमतिदारुणं॥ महारण्येमहाप्राज्ञसर्वसत्त्वविवर्जिते॥ देहभा
वेनतेनापिकृतान्स्तुपापराशयः॥ एकदातुमहारण्येकृष्णद्वैपायनोमुनिः॥ आजगाममहाभागतस्य
भाग्येननोदितः॥ तयोस्तुसंगतमभूदरण्येतरुसंकुले॥ तद्दर्शनात्ससस्मारपूर्वजन्मनिचेष्टितं॥
ततश्चविह्वलीभूतःप्रणम्यशिरसामुनिं॥ पतितोदंडवत्शापंउवाचवचनंरुदन्॥ पपातचम
हीपृष्ठेपापिदंडायतप्रभो॥ इतिश्रुत्वावचस्तस्यसमुनिःकरुणायुतः॥ उवाचवचनंसर्वशृण्व
घमनसेप्सितं॥ ॥सर्पउवाच॥ तातकेनविमुच्येयंअनंतादुःखसागरात्॥ मुक्तिर्भवेदस्माकं
कस्येदंकर्मणःफलं॥ व्यासउवाच॥ पूर्वजन्मनिराजेंद्रमलमासेसमागते॥ नार्चि

तो भास्करो विष्णुविधिना नक्तं व्रते॥ तत्कर्मपरिपाकेन बुद्धिस्ते विप्र योजने॥ शिबिकायां सम भवत्
शक्रमायासहायतः॥ तस्मात्सर्वप्रयत्नेन नक्तं व्रतमाचर॥ यस्यानुष्ठानमात्रेण स्वपदं प्रस्य
से ध्रुवं॥ सर्प उवाच॥ ॥विष्णुरूपं सहस्रांशुं मलिने मासि पूजयेत्॥ पूजितेन च सहस्रांशौ वि
ष्णुर्भवति पूजितः॥ मलमासस्तु मासानां मलिनः पापसंभवः॥ तस्य पापविशुध्यर्थं मलमासव्र
तं चरेत्॥ दिने दिने प्रदेयानि विविधान्नानि भक्तितः॥ दक्षिणाघृतयुक्तानि कांस्यपात्रयुता
नि च॥ विष्णुरूपी सहस्रांशुः सर्वपापप्रणाशनः॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु॥ अ
धिमासे तु संप्राप्ते गुडसर्पिसमायुतान्॥ दद्याद्दानेन मंत्रेण त्रयस्त्रिंशदपूपकान्॥ त्रयस्त्रिं
शदपूपानि दातव्यानि दिने दिने॥ साज्यानि गुडमिश्राणि अधिमासे नृपोत्तम॥ यावंति तत्र छि
द्राणि अपूपस्य च पार्थिव॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ चंद्रांशुनिर्मला रूपाः शालि

तंडुलमिश्रिताः॥ आहारःसर्वदेवानां तेप्रकुर्वंति मंगलं॥ सहिरण्यघृताभ्यक्तास्त्रयस्त्रिंशदपूपका
न्॥ अधिमासेतुसंप्राप्ते त्रयस्त्रिंशत्तुदेवताः॥ उद्दिश्यापूपदानेन पृथ्वीदानफलंलभेत्॥ मासाधि
केतुसंप्राप्ते यावत्सर्वानपूपकान्॥ तावद्वर्षमवाप्नोति विष्णुलोकंसनातनं॥ त्रयस्त्रिंशदपूपान्नंकां
स्यपात्रेविधायच॥ सघृतंसहिरण्यंच ब्राह्मणायनिवेदयेत्॥ नारायणजगद्बीज भास्करप्रतिरूप
क॥ व्रतेनानेन पुत्रांश्च संपदंचाभिवर्द्धय॥ प्रार्थनामंत्रः॥ अधिमासेयदाराजन्द्वादशीवाथपौ
र्णिमा॥ व्यतीपातादिनेवापि दद्यादन्नं च भक्तितः॥ साज्यपात्रंहिसगुडं त्रयस्त्रिंशदपूपकान्॥
कांस्यपात्रेविनिक्षिप्य हिरण्येनसमन्वितान्॥ उपानच्छत्रसंयुक्तान्विप्रायविनिवेदयेत्॥ इद
मशक्तपरं॥ तत्रमंत्रः॥ यस्यहस्तेगदाचक्रे गरुडोयस्यवाहनं॥ शंखःकरतलेयस्य समेविष्णुः
प्रसीदतु॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना॥ योवंचयतिभूतानि तस्मैकालात्मने
नमः॥ कुरुक्षेत्रमयोदेशःकालःपार्थद्विजोहरिः॥ पृथ्वीसममिदंदानं गृहाणपुरुषोत्तम॥ मला

नोचविशुध्यर्थंपापप्रशमनायच॥ पुत्रपौत्राभिवृध्यर्थंतवदास्यामिभास्कर॥ मंत्रेणानेन
वेदद्यात्त्रयस्त्रिंशदपूपकान्॥ अन्नदानात्परंदानंमलमासेनविद्यते॥ गृहेतस्यस्थिरालक्ष्मी
र्यदीस्यात्सूर्यसंन्निधौ॥ दारिद्र्यंनभवेत्तस्यरोगशोकविवर्जितः॥ व्याधिभ्योमुच्यतेरोगी
मूकोवाचस्पतिर्भवेत्॥ एवंतुविधिनाराजन्मलमासव्रतंचरेत्॥ पुत्रपौत्रैःसमायुक्तोमो
दतेपालयन्मही॥ इत्युक्त्वासमुनिस्कंदतत्रैवांतरधीयत॥ नहुषोमानुषंसर्वव्रतमेतच्चकार
ह॥ व्रतस्यास्यप्रभावेनसर्पोमानुषतांययौ॥ पुनर्व्रतंचकारेदंमुनिसर्पोपदेशितं॥ विमान
वरमारुह्यजगामेंद्रस्यमंदिरं॥ तस्मात्स्कंदनरैःकार्यंव्रतमेतदनुत्तमं॥ व्रतेनतोषितोदे
वोभास्करोभक्तवत्सलः॥ ददातिविपुलांलक्ष्मींपुत्रपौत्रादिसंपदः॥ ॥इतिव्रतार्केमल ३०४
मासव्रतं॥ ॥अथमलमासेव्रतांतरं॥ ॥अप्रसंभवः॥ श्रीरुवाच॥ देवदेवजगन्नाथ
भुक्तिमुक्तिप्रदायकः॥ कथयस्वप्रसादेनलोकानांहितकाम्यया॥ मुनीश्वराःप्रवदंतिह्र

कृष्णद्वैपायनादयः॥ अदत्तं नैव लभ्येत्त दत्तं चैवोपतिष्ठते॥ यथा वंध्यां गृहस्थस्य पति वंशस्य ना
शनी॥ तथा दान विहीनं तु जन्म सर्वं निरर्थकं॥ तथापि कथयंती ह देवज्ञाः शास्त्र कोविदाः॥ म
लिम्लुचे सदा प्राप्ते क्रियाः कार्याः कथं प्रभो॥ क्षौरमौंजीविहाय स्यव्रतं काम्यो पवासिकं॥ मलिम्लु
चे सदा त्याज्यं गृहस्थेन विशेषतः॥ श्रीरुवाच॥ अधि मासे च संप्राप्ते किं कार्यं ब्रूहि मे प्रभो॥
कस्योद्देशेन दातव्यं परत्र कृप्रदायकं॥ कृष्ण उवाच॥ शृणु देवि महाभाग सर्वलोकस्य हेतवे॥
स्वयं दाता स्वयं भोक्ता यो ददाति द्विजातये॥ नान्यो दातानभोक्ता च इह लोके परत्र च॥ असंक्रां
तेपि संसंप्राप्ते मासुद्दिश्य व्रतं चरेत्॥ अधि मासस्याधिपत्ये अहं वै पुरुषोत्तम॥ स्नानं दानं
जपो होमः स्वाध्यायः पितृ तर्पणं॥ देवार्चनमथान्यच्चयेयं कुर्वंति मनुष्यजाः॥ अक्षयं तद्भवेस
र्वं मम मोद्देशेन यत्कृतं॥ मल मासो गतः शून्यो येषां देवि प्रमादतः॥ दरिद्रपुत्र शोकं च पापपं
कविगर्हनं॥ मर्त्यलोकं भवेज्जन्म तेषां देवि भवेत्सदा॥ सुषप्रदासि देविलं ये ऽर्चयंति हि

जोत्तमाः॥ यदा मालिम्लुचो मासः प्राप्यते मानवैः प्रिये॥ महोत्सवस्तदा कार्य आत्मनो हितकांक्षि
भिः॥ कृष्णपक्षे चतुर्दश्यां नवम्यां वासुरेश्वरि॥ अष्टम्यां वाथ कर्तव्यं व्रतं शोकविनाशनं॥ य
थालाभोपहारैर्मासस्यास्मिन्मलिम्लुचे॥ पुण्यान्हि प्रातरुत्थाय कृत्वा पूजान्हिकीं क्रियां॥
गृह्णीयान्नियमं पश्चाद्वासुदेवं हृदि स्मरन्॥ उपवासस्य नक्तस्य एकभक्तस्य भामिनि॥ एकस्य
निश्चयं कृत्वा ततो विप्रान्निमंत्रयेत्॥ सपत्नीकान्सदाचारान्सुरूपान्सुखवेषकान्॥ श्रु
ताध्ययनसंपन्नान्कुलीनान्ज्ञातिसंभवान्॥ ततो मध्यान्हसमये लक्ष्मीयुक्तं सनातनं॥ स्था
पयेदव्रणे कुंभे वेदमंत्रैर्द्विजोत्तमैः॥ पूजयेत्परया भक्त्या गोत्रिभिः सपितामहं॥ गंधतोयेन सं
स्नाप्य पंचामृतशुभेन च॥ चंदनेन सुगंधेन पुष्पैर्नानाविधैः प्रिये॥ मिष्टान्नैर्नचयैं नैवेद्यैर्दी
पदीपकैर्भिरंजितः॥ आच्छादनसवस्त्रैश्च पीतवस्त्रैर्विशेषतः॥ घंटामृदंगनिर्घोषैः शंखध्वनि ३०५
समन्वितः॥ आरात्रिकं व्रती कुर्यात्कर्पूरागरुचंदनैः॥ अलाभे त्वन्यकेनापि फलमानं

त्यहेत्तवे।। ताम्रपात्रस्थिते तोये चंदनाक्षतपुष्पके।। अर्घ्यं दत्वा सपत्नीकः प्रहृष्टेनांतरात्मना।। मंत्रे
णानेन देवेशी ब्राह्मणैः सह मा स्मरन्।। नारिंगैर्नारिकेरैश्च फलैर्नानाविधैः शुभैः।। पंचरत्नसमायु
क्ते जानुनीकृतभूतले।। आरोप्य भाले हस्ताभ्यां श्रद्धाभक्तिसमन्वितः।। अर्घ्यदानमंत्रः।। देवदे
व महाभाग प्रलयोत्पत्तिकारक।। कृपासर्वस्यभूते श जगदानंदकारक।। गृहाणार्घ्यमिदं दे
व दयां कृत्वा ममोपरि।। अथ प्रार्थनामंत्रः।। स्वयंभुवे नमस्तुभ्यं ब्रह्मणेमिततेजसे।। नमोस्तु ते
श्रियानंद दयां कृत्वा ममोपरि।। एवं प्रार्थ्य प्रार्थ्य च गोविंदं पूजयेद्ब्राह्मणैः सह।। सपत्नीकान् शु
चीन्स्नातान् लक्ष्मीनारायणौ स्मरन्।। पूजयित्वा विधानेन भोजयेद्घृतपायसैः।। भोजयित्वा
विधानेन सपत्नीकं स्मरन् विभुं।। स्मर्त्तव्यो द्विजरूपेण पत्नी चैवमनुस्मरन्।। परिधाप्य यथाशक्त्या
वस्त्रालंकारकुंकुमैः।। द्राक्षाम्रैश्च कपित्थैश्च पनसैः कदलीफलैः।। नारिकेरैश्च नारिंगैः कूष्मां
डैर्दाडिमैः प्रियैः।। घृतपक्वान्नगोधूमैः शुभैः स्तैत्तालिकैर्वटैः।। शर्करैर्घृतपूरैश्च फणितैः घंड

मंडकैः॥ वृंताकिककर्कटी शाकैः शृंगबेरैः समूलकैः॥ अन्यैश्च विविधैः शाकै रम्यपाकैः पृथक्पृथक्॥
महाभोज्यैश्चलेह्याद्यैः कंदुलानि विशेषतः॥ गोरसानां विचित्राणि वासितानि द्रव्यैर्दिव्यैः॥ अन्यान्य
पि च देयानि दानानि विविधानि च॥ वित्तशाठ्यं न कुर्वीत आत्मनः श्रेय इच्छता॥ यथा च सरसं प्राप्य
परिवेष्य मृदु ब्रुवन्॥ इदं स्वादु इदं भोज्यं भवदर्थं विचिंतयेत्॥ याच्यतां रोच्यते यच्च यन्मया पावितं
प्रभो॥ धन्योस्म्यनुगृहीतोस्मि सार्थकृतं च मंदिरं॥ विसर्जयेत्ततो विप्रान्दत्वा तांबूलदक्षिणां॥
पात्राणि क्रमुकखंडानि चूर्णं च खदिरं शुभं॥ एला कर्पूर लवंगानि जातीफल तजत्वचं॥ मृगनाभि
मरीचीनि सुरमांसनखस्तथा॥ चतुर्भिर्मिलितैर्देवि तांबूलं मम वल्लभं॥ यो ददाति द्विजाग्र्या
पां स भवत्सुभगा नरः॥ सुभगा वसदाचारा वल्लभा स्वजने शुभे॥ पुत्राः सौभाग्यसंयुक्ता तां
ह्लाद्जायते बलं॥ पत्रैः स्तुके शवः प्रीतः पूगैरीशः सहांबया॥ चूर्णेनानलः स्वशक्त्या ३०६
खदिरेण तु मन्मथः॥ चतुर्भिः विश्वरूपा सोयं पुण्याति जगत्त्रयं॥ परितोष्य सपत्नीकान् हस्ते द

धाज्ञमोदकान्॥ आसीमांतमनुव्रज्य भुंजीत बंधुभिःसह॥ असंक्रांतं व्रतं नारी याकरोति हरिप्रि
ये॥ दारिद्र्यपुत्रशोकं च वैधव्यं न भवेत्सदा॥ पुरुषाश्चैव विधादेवि यदि कुर्यान्मलिम्लुचे॥ मलिं
म्लुचं प्राप्य नष्टजितौ यैः श्रीनाथः देवः परये हभक्त्या॥ कथं भवेत्तेषु सुखं च संपत्पुत्रोस्तु हत्स्वजन
जा च भार्या॥ ॥इति श्रीभविष्योत्तर पुराणे मलमासव्रतं॥ व्रतांतरं देवीपुराणे॥ ॥ईश्वर उवाच॥ शृ
णु देवि महात्म्यं च मलमासस्य पार्वति॥ ये च मासाः ससंक्रांतास्तेषां स्वामी रविस्मृतः॥ असंक्रांतास्तु
ये मासास्तेषां स्वामी जनार्दनः॥ तमुद्दिश्य च यत्किंचित्स्वल्पं वाय दि वा बहु॥ अक्षयं तद्भवेल्लकं तु
जन्मनायुयुतं ध्रुवं॥ मलिम्लुचे तु संप्राप्ते यो न कुर्यात्स्वशक्तितः॥ दानं वाथ व्रतं वापि विप्रभोजनमेव
च॥ मलिम्लुचेन देहेन स याति निरयं नरः॥ एकभक्तेन नक्तेन तथैवायाचितेन च॥ उपवासेन कुर्वी
ति मनसा संप्रयत्नतः॥ दाने वाथ व्रते वापि यस्य शक्तिर्न विद्यते शरीरशोषणं तेन कर्तव्यं तीर्थ
सेवनं॥ वचनाद्द्विजमुख्यानां सर्वव्रतफलं लभेत्॥ सर्वव्यापि यथा विष्णुः सर्वभूतकृपाकरः॥

मलिम्लुचे यथा दानं लोकद्वयसुखावहं॥ ॥श्रीदेव्युवाच॥ भाग्यहीनास्तु ये मर्त्याः प्रभो॥ वह्निं चरंति
हि॥ वित्तं का नास्ति येषां किं कार्यं तु मलिम्लुचे॥ निर्द्धनाश्च दुराचाराः परभाग्यायजीविनः॥ ईश्व
रउवाच॥ ॥दाने व्रते तथा नक्ते आयासे कायशोषणे॥ सर्वथा नास्ति सामर्थ्यं कर्त्तव्यं विप्रसेवनं॥
साधूनां सेवनं देवि सर्वतीर्थफलप्रदं॥ कालेन लभ्यते तीर्थं सद्यो वै साधुसेवनात्॥ साधूनां दर्शनं
चैव कीर्तनं श्रवणं तथा॥ मलमासे तु तथा देवि कर्त्तव्यं श्रेय इच्छता॥ पुण्यव्ययेन संप्राप्ता संपदो विवि
धा गृहे॥ ताभिः पुनः प्रकर्त्तव्यः संचयः पुण्यकर्मभिः॥ अन्यायेन महादेवि यः प्राप्तधनसंचयः॥ पुण्य
कर्मक्षयान्नेह प्राप्यते पुण्यसंचयः॥ तस्मात्पर्वणि संप्राप्ते द्रव्यं प्राप्तं प्रकल्पयेत्॥ यथा बीजांकुरं
न्यायावि वृद्धिं धर्मतत्परैः॥ विचार्य निश्चयः प्राप्तो धर्माद्दर्थो न संशयः॥ धर्मबीजं अर्थबलं फलाद्वी
जं सुरक्षितं॥ कर्त्तव्यं तत्क्षयं तेन प्ररोहार्थं भवे भवे॥ बीजांकुरं ततो भक्षेत्तस्यान दद्याद्धनं द्विजे २०७
लक्ष्मीनारायणं पूज्य भोजयेच्च द्विजोत्तमान्॥ इति श्री देवीपुराणे मलमासव्रतं॥ ॥अथवि

विशेषपूजा॥ मत्स्यायनमः॥ कूर्मायनमः॥ सहस्रशीर्षेनमः। देवायनमः। सहस्राक्षपदेनमः। हरयेनमः
पुरुषोत्तमायनमः॥ महादेवायनमः। सृष्टिस्थित्यंतकारिणेनमः॥ कृष्णायनमः। वासुदेवाय। लक्ष्मीकांता
यनमः। सुरेश्वरायनमः। स्वयंभुवेनमः। लक्ष्मीमितततेजसेनमः॥ ब्रह्मप्रियायनमः॥ देवायनमः॥ ब्रह्म
गोत्रेनमः। लक्ष्म्यैनमः। कमलायैनमः। पद्मायैनमः। श्रियैनमः॥ पद्मवासायैनमः॥ हरिवल्लभायै
नमः। क्षीराब्धितनयायैनमः। श्रियैनमः। इंदिरायैनमः। श्रीसूक्तेनपूजा॥ अर्घ्यमंत्रः॥ पुराण
पुरुषेशान सर्वशोकनिकृंतन॥ अधिमासेव्रतप्रीतोगृहाणार्घ्यंश्रियासह। पुराणपुरुषेशान
जगद्धातासनातन॥ सपत्नीकोददाम्यर्घ्यंसृष्टिस्थित्यंतकारिणे॥ देवदेवमहाभागप्रलयोत्प
त्तिकारक॥ कृपासर्वस्यभूतस्यजगदानंदकारक॥ गृहाणार्घ्यमिमंदेवदयांकृत्वाममोपरि॥
इतिश्रीभट्टनीलकंठात्मजभट्टशंकरकृतौव्रतार्कमासव्रतानि॥ ॥अथवारव्रतानि॥ तत्ररविवार
व्रतंमदनरत्नेसौरधर्मे॥ यस्योदयेस्याज्जगतःप्रबोधोयःकर्मसाक्षीभुवनस्यगोप्ता॥ कुष्ठादि

कव्याधिविनाशनोयःसभास्करोनोदुरितंनिहन्यात्॥ ॥मांधातोवाच॥ भगवन्सर्वज्ञानिनांश्रेष्ठकथ
यस्वप्रसादतः॥ त्वद्वक्त्राच्छ्रोतुमिच्छामिव्रतंपापप्रणाशनं॥सर्वकामप्रदंचैवसर्वामलविनाशनं॥ पू
जार्घ्यदानसहितंनैवेद्यंप्राशनान्वितं॥ एतत्कथयसर्वस्वंप्रसन्नोयदिमेप्रभो॥ ॥वसिष्ठउवाच
शृणुराजनप्रवक्ष्यामियद्गुह्यंव्रतमुत्तमं॥सर्वकामप्रदंपुंसांकुष्ठादिव्याधिनाशनं॥भानोस्तुष्टिक
रंराजन्भुक्तिमुक्तिप्रदायकं॥ यस्योदयेसुरगणामुनिसंघासुवारणाः॥दैत्यदानवयक्षाश्चकुर्व
न्तिसततार्चनं॥यस्योदयेतुसर्वेषांप्रबोधोनृपसत्तम॥ तस्यदेवस्यवक्ष्यामिव्रतंराजन्सविस्तरं॥
पूजार्घ्यप्राशनंदानंनैवेद्यंशृणुतत्वतः॥ सर्वतीर्थेषुयत्पुण्यंसर्वयज्ञेषुयत्फलं॥सर्वदानेनतपसा
यत्पुण्यंसमवाप्यते॥ प्रातस्नानेनयत्पुण्यंयत्पुण्यंरविवासरे॥ मार्गशीर्षादिमासेषुद्वादशस्व
पिभूपते॥सूर्यव्रतंकरिष्यामियावद्वर्षंदिवाकर॥ व्रतंसंपूर्णतांयातुत्वत्प्रसादात्प्रभाकर॥नि ३०८
यममंत्रः॥ ततःप्रातःसमुत्थायनद्यादौविमलेजले॥स्नात्वासंतर्पयेद्देवान्पितॄंश्चवसुधाधि

।घ॥ उपलिप्य शुचौ देशे सूर्यं तत्र सम शुचौ देशे सूर्यं तत्र समर्चयेत्॥ संलिखेत्तत्र पद्मं तु द्वादशारं सकर्णि
कं॥ ताम्रपात्रे तथा पद्मे रक्तचंदनवारिणा॥ ततः संपूजयेद्देवं दीनानाथं सुरेश्वरं॥ मासे मासे चये राज
न्विशेषांस्तान्शृणुष्व वै॥ मार्गशीर्षे यजेन्मित्रं नारिकेरार्घ्यमुत्तमं॥ नैवेद्यं तंदुलाद्या साज्याश्च
सगुडाः स्मृताः॥ पत्रत्रयं तु लस्यास्तु प्राश्य तिष्ठेज्जितेंद्रियः॥ दद्याद्विप्राय भोज्यं तु दक्षिणासहितं
नृप॥ पौषे विष्णुं समभ्यर्च्य नैवेद्यं कृशरं तथा॥ बीजपूरेण वै चार्घ्यं प्राश्यं घृतपलत्रयं॥ दद्याद्घृतं तु
विप्राय भोजनेन समन्वितं॥ माघे वरुणनामानं संपूज्याज्यां तिलान्गुडं॥ भोजनं दक्षिणां दद्यान्नै
वेद्यं तत्तती फलं॥ अर्घ्यं तेनैव दत्वा तु प्राश्य मुष्टित्रयं तिलाः॥ फाल्गुने सूर्यमभ्यर्च्य जंबीरार्घ्यं नि
वेदयेत्॥ पलत्रयं दधि प्राश्य नैवेद्यं सघृतं दधि॥ दधितंडुलदानं च भोजयेत्समुदाहृतं॥ चैत्रे भानुं
तु संपूज्य नैवेद्यं घृतपूरिका॥ फलं तु दाडिमं प्रोक्तं प्राश्य दुग्धपलत्रयं॥ विप्राय भोजनं दद्यान्मि
ष्टान्नं तु सदक्षिणं॥ वैशाखे तपनः प्रोक्तो माषान्नं सघृतं स्मृतं॥ अर्घ्यं दद्यात्तु द्राक्षाभिः प्राशयेद्गो

मयंस्मृतं॥ कुर्यान्माषान्नदानंतुसघृतंवैसदक्षिणं॥ इंद्रंज्येष्ठेयजेद्राजन्नैवेद्यंतुकरंभकं॥ अर्धश्चसह
कारपात्राप्राशयंजलांजलित्रयं॥ दध्योदनसमायुक्तंभोजनंब्राह्मणायतु॥ आषाढेरविमभ्यर्च्यपूजा
विर्पिटकंतथा॥ विप्रायभोजनंदद्यात्प्राशयेन्मरिचत्रयं॥ गभस्तिमान्श्रावणेर्घ्येत्रपुशीफलमेवच॥
मुष्टित्रयंचसक्तूनांप्राशनेसमुदाहृतं॥ विप्रायभोजनंदद्यात् दक्षिणासहितंनृप॥ यमोभाद्रपदेपूज्यंकूष्मा
ण्डंतंडुलाज्यकं॥ गोमूत्रंप्राशनंयुक्तंब्राह्मणेभोजनंतथा॥ हिरण्यरेताश्विधुनेवेद्यंशर्करास्मृतं॥ दा
डिमेनार्घ्यदानंतुप्राश्यखंडपलत्रयं॥ विप्रायपरयाभक्त्याभोजनंशालिशर्करा॥ दिवाकरःकार्ति
केचरंभायाःफलमेवच॥ पायसंचैवनैवेद्यंपायसंप्राशनेस्मृतं॥ एवंव्रतंसमाप्येततस्तुउद्यापनंच
रेत्॥ ततोगुरुगृहंगत्वागृहीत्वाच्चरणौशुभौ॥ उद्यापनंकरिष्येहमागच्छममवेश्मनि॥ माषकेनसु
वर्णस्यतुप्रतिमांकारयेद्रवेः॥ रथोरूप्यमयःकार्यःसर्वोपस्करसंयुतः॥ कृत्वाद्वादशपत्रंतुकम ३०२
लंरक्ततंडुलैः॥ स्थापयेद्व्रणंकुंभंपंचरत्नसमन्वितं॥ तस्योपरिन्यसेत्पात्रंताम्रंतंडुलपूरितं॥

णांश्च विसर्जयेत्॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं तु यत्कृतं॥ तत्सर्वं पूर्णतां यातु त्वन्मिदेवप्रसादतः॥ अ
नुव्रज्य गुरुं विप्रान् भोजनं तु समाचरेत्॥ वृद्धैश्च बंधुभिः सार्द्धं नत्वा देवं दिवाकरं॥ एवं यः कुरुते मर्त्यो वि
त्तशाठ्यविवर्जितः॥ सूर्यव्रतं महाराज तस्य पुण्यफलं शृणु॥ ब्राह्मणो लभते विद्यां क्षत्रियो राज्यमा
प्नुयात्॥ वैश्यास्समृद्धिं विपुलां शूद्रः सुखमवाप्नुयात्॥ अपुत्रो लभते पुत्रं कुमारी लभते पतिं॥ रो
गार्त्तो मुच्यते रोगी बद्धो मुच्येत बंधनात्॥ यं यं चिंतयते कामं स तत्तस्य भवति ध्रुवं॥ इत्थं य इदं
शृणुयाद्यैकचित्तो नवेन्नृप॥ सर्वकामनवाप्नोति प्रसादाद्भास्वतो नृप॥ ॥ इति सौरधर्मोक्तं सूर्यव्र
तं॥ अश्विनादिरविवारव्याख्या शादित्यव्रतं॥ स्कंद उवाच॥ शृणु दिव्यं परं पुण्यं आदित्याराधनं परं॥
यत्कृत्वा सर्वकामानां सकलं फलमाप्नुयात्॥ समुद्रतीरे विप्रेंद्र पुरी द्वारवती शुभा॥ वासुदेवय
दुवरे पुरा राज्यं प्रशासति॥ दूर्वासाः शंकरस्यांश आजगाम बलोत्कटः॥ कृष्णेन पूजितस्तत्र अ ३९
र्घ्यपाद्यासनादिभिः॥ भोजनं तस्य यद्वृत्तं यथाभिलषितं मुने॥ संपूजितः स कृष्णेन यावद्गच्छत्यसौ

मुनिः॥ सांबेन हसितस्तस्य सुतेन स हसा किल॥ क्रुद्धोपि मुनिशार्दूलः कोपं संहृतिवान्स्वयं॥ पूजितो
न मया दानीमन्यत्कर्त्तुं कथं क्षमे॥ स गत्वा नारदः प्राह शांबेन हसितोस्मि भो॥ प्रभासं च रतः कार्यं त
स्य शिक्षायनं त्वया॥ इत्युक्तो नारदः प्रायात् द्वारकां कृष्णसंन्निधौ॥ स चक्रसैन्यं दर्शयस्व मम देव
किनंदन॥ देवमात्राभिषं कृत्वा हस्त्यश्वरथसंकुलं॥ नारदेनैवमुक्तस्तु तत्थैव कृतवान् विभुः॥ दृशि
ते तु बले प्राह नात्र शांबः प्रदृश्यते॥ मयैवानीयतां शीघ्रं द्वारवत्यास्त्वदंतिकं॥ गत्वैवमुक्ते मुनि
ना श्रेष्ठो जांबवतीसुतः॥ संस्पृंगारस्तत्यानीतो मकरध्वजदर्शनः॥ गत्वालिंग्य चुचुंबस्तं गोप्यः
कृष्णपरिग्रहाः॥ नारदः प्राह भगवान् दुश्चरितं तथानघ॥ क्रुद्धेन शौरिणा शप्तः कुष्ठी भव नरा
धिप॥ एवमुक्तस्तथा पुत्र कुष्ठरोगातुरोभवत्॥ शांबः प्रणम्याह पितः किमर्थं शापितस्त्वया॥ स्व
शक्तिज्ञानदृष्ट्यातु विचार्य सुविनिश्चितं॥ ध्यानाद्दुर्वाससो ज्ञाता विक्रिया यत्र कारणं॥ अत्र
हो मया पुत्र कार्यस्तस्य पतद्रुवो॥ आदित्यस्य व्रतं चैव कुरु कुष्ठविनाशनं॥ शांब उवाच॥

कथंतातमयाकार्यंव्रतंसर्वफलप्रदं॥ ।किंविधानंतुकेमंत्राःकिंदानंकिंचभोजनं॥ ॥श्रीकृष्णउवाच
मासमाश्वयुजंप्राप्यरविदिनंभवेत्॥ तदाव्रतमिदंग्राह्यंनरैस्त्रीभिर्विशेषतः॥ यावत्संवत्स
रंतावद्विधिनातेनपुत्रक॥ गोमयेनाम्बुसिक्तेकुर्यान्मंडलंवर्तुलंपुनः॥ रक्तपुष्पैरक्षताभिरर्घ्यं
तत्रप्रदापयेत्॥ मंत्रेणानेनभास्वंतमाचार्यःप्रतिवासरं॥ यथाशशिविमलःशर्वःसूर्यभास्कर
भानुभिः॥ तथाशास्सफलामह्यंकुरुनित्यंमयार्थितः॥ अर्घ्यमंत्रः॥ एवंतमर्चयेद्दत्त्वावर्षाचर्यंस
माप्यते॥ समाप्तेतुव्रतेवत्सकुर्यादुद्यापनविधिं॥ गोमयेनानुलिप्तायांभूमौमंडलमालिखेत्
रक्तचंदनरेखाभिःकुंकुमेनविशेषतः॥ तन्मध्येद्वादशदलंपद्माकारंयेद्बुधः॥ सिंदूरपूरित
दलंजपाकुसुमपूजितं॥ तन्मध्येस्थापयेत्कुंभंप्रवालांकुरसन्निभं॥ शालितंडुलसंपूर्णंशर्क
राचंदनार्चितं॥ तस्योपरिन्यसेत्पात्रंताम्रशत्म्यादिनिर्मितं॥ सौवर्णंभास्करंकृत्वापद्मह ३११
स्तंचशक्तितः॥ रक्तवस्त्रयुगोपेतंपात्रोपरिनिवेशयेत्॥ अथपंचामृतेनादौजपकुंकुमलेपितं॥

रक्तवस्त्रसमाछन्नंपुष्पमालाभिवेष्टितं॥ पंचामृतेनस्नपनमग्न्युत्तारणपूर्वकं॥ प्रतिष्ठांचततःकृत्वा
पूजांदेवस्यकारयेत्॥ चंदनैःकुसुमैरन्यैर्विविधैःकालसंभवैः॥ अखंडपट्टवस्त्रेणकमंडलुमुपानहौ
वर्द्धनीत्रितयंतत्रस्थापयेच्छिवसंनिधौ॥ संज्ञायावस्त्रयुग्मंतुकौसुंभंतुमहीपते॥ प्रतिपात्रेषुसंपू
ज्यसूर्योद्वादशनामभिः॥ मित्रोविष्णुःसवरुणःसूर्योभानुस्तथैवच॥ तपनेंद्रौरविंदुन्योगभस्ति
शमनस्तथा॥ हिरण्यरेतादिनकृत्पूज्याएतेप्रयत्नतः॥ मध्येसहस्रकिरणःसंपूज्यःसंज्ञयास
ह॥ पूगीफलैर्धूपदीपैर्वस्त्रनैवेद्यसंयुतैः॥ नारिकेरेणचैवार्घ्यंदद्याद्देवस्यभक्तितः॥ मंत्रेणानेनरा
जेंद्रव्रतस्यपरिपूर्तये॥ नमःसहस्रकिरणसर्वव्याधिविनाशन॥ गृहाणार्घ्यंमयादत्तंसंज्ञयासहि
तोरवेः॥ आरात्रिकंततःकुर्यात्क्षमासंकल्पमेवच॥ संकल्पंचततःकुर्याद्ब्राह्मयेस्सूर्यदैवतं॥ ब्राह्म
णान्भोजयेद्भक्त्यामिष्टान्नैर्द्वादशप्रभो॥ दंपत्योर्भोजनंदेयंपरमान्नसमन्वितं॥ ततस्तुदक्षिणा
दयासमभ्यर्च्यस्रगादिभिः॥ उपहारादितत्सर्वंगुरवेप्रतिपादयेत्॥ गुरुंतत्रैवसंतोष्यब्राह्म

रणाद्वत्स कुरुष्व व्रतमुत्तमं ॥ एतच्छ्रुत्वा वचः सांबः पित्रा कृष्णेन भाषितं ॥ व्रतं चरित्वा संप्राप्तः सर्वसि
द्धिं सुदुर्लभां ॥ इदं यः शृणुयाद्भक्त्या श्रावयेद्वापि मानवः ॥ तावुभौ पुण्यकर्माणौ रविलोकमवा
प्नुतः ॥ ॥ इति स्कांदे आशादित्यव्रतं ॥ ॥ अथ सोमवारव्रतं ॥ देशकालौ स्मृत्वा अमुक कामइ
दं करिष्य इति संकल्प्य महाकालाय शूलिने शंभवे इति मंत्रेण षोडशोपचारान्कृत्वा परिवारदे
वताः पूजयेत् ॥ प्रागादिक्रमेण ब्राह्मणं विष्णुं स्कंदं महाकालं शूलिनं उमामहेश्वरौ नंदिकेश्वरं
आवाहनाद्युपचारैः चंडाय नम इति मंत्रेण ईशान्यां पंचोपचारैश्चंडं प्रपूजयेत् ॥ ततः प्रार्थनं ॥
दशभुजाय त्रिनेत्राय पंचवक्त्राय शूलिने श्वेतवृषारूढाय सुश्वेताभरणाय वै उमासहिताय
नमः ॥ त्राहि मां कृपया देव शरणागतं महेश्वर ॥ नंदिकेश्वराय नम इत्यनेन नंदिकेश्वरं पूजयेत् ॥ ततः पु
ष्पाणि गृहीत्वांगपूजा कार्या तत्प्रकारः ॥ देवाधिदेवाय नमः पादयोः । शंकराय नम इति जंघयोः ३१२
शिवाय इति जानुनोः । शूलपाणये नम इति गुल्फयोः ॥ शंभवे नम इति कट्यां । स्वयंभुवे नमः गुह्ये ॥

महादेवाय नम इति नाभौ विश्वकर्त्रे नमः उदरे ॥ सर्वतोमुखाय नमः पार्श्वयोः । स्थाणवे नमः स्तनयोः
नीलकंठाय नमः कंठे । श्रीकंठाय शिवाय नमः मुखे ॥ त्रिनेत्राय नमो नेत्रयोः । शशिभूषणाय नमः मु
कुटे । देवाधिदेवाय नमः सर्वांगे ॥ ॥ इति पूजाविधिः ॥ ॥ अथ कथा ॥ नारद उवाच ॥ अन्यात्तदपि
मे ब्रूहि येनाहं प्राप्नुयां पदं ॥ अव्यक्तां च शिवे भक्तिं पुत्रसौभाग्यसंपदः ॥ नंदिकेश्वर उवाच ॥ सो
मवारव्रतं पुण्यं कथ्यमानं निबोध मे ॥ श्रावणे चैत्र वैशाखे ज्येष्ठे वा मार्गशीर्षके ॥ प्रथमे सोमवा
रे च गृह्णीयाद्व्रतमुत्तमं ॥ यदा श्रद्धा भवेत्तत्र तु सोमवारव्रतं प्रति ॥ तदा चापि पुरस्कृत्य श्रद्धाभ
क्तिसमन्वितः ॥ सुस्नातश्च शुचिर्भूत्वा शुक्लांबरधरो नरः ॥ कामक्रोधाद्यहंकारद्वेषपैशून्यव
र्जितः ॥ आहरेच्छ्वेतपुष्पाणि मालतीमल्लिकादिकं ॥ श्वेतपद्मानि दिव्यानि चंपकानि तथै
व च ॥ कुंदमंदारजैः पुष्पैः पद्मैश्च शतपत्रकैः ॥ आचार्येण मया सार्द्धं शंकरं लक्षशंकर ॥ मा
लयजं च धूपेन धूपयेत्पार्वतीपतिं ॥ अन्यानि यान्यभीष्टानि तानि सर्वाणि दापयेत् ॥ पुनाग

पुष्पैश्च पूजयेत्पार्वतीपतिं॥ कामिनेन तु मंत्रेण व्यापकेन महेश्वरं॥ पूजयेन्मूलमंत्रेण त्र्यंबकेन ततः
परं॥ भवाय भवनाशाय महादेवाय धीमहि॥ उग्रायोग्रनाथाय शर्वाय शशिमौलिने॥ रुद्राय नील
कंठाय शिवाय भयहारिणे॥ शंकराय नमो जंघे शिवायेति च जानुनी॥ शूलपाणये नमो गुल्फक
घ्यो शंभुं प्रपूजयेत्॥ गुह्ये स्वयंभुनामानं पूजयेत्पार्वतीपतिं॥ महादेवायेति पूजयेन्नाभिमंडल
मि मंडले॥ उदरे विश्वकर्त्रे दिपार्श्वयोः सर्वतोमुखं॥ स्थाणुं स्तनौ च संपूज्य नीलकंठाय कंठ
तः॥ मुखे संपूजयेद्देवं श्रीकंठाय शिवाय च॥ त्रिनेत्राय नमो नेत्रं मुकुटे शशिभूषणं॥ नमो देवाधि
देवाय सर्वांगे पूजयेद्विभुं॥ एवं संपूज्य देवेशमुपहारैर्मनोहरैः॥ यथाविभवसारेण तस्य पुण्यफलं
शृणु॥ सोमवारयजं तेय पार्वत्या सह शंकरं॥ ते लभंत्य पायाल्लोकानु नरा वृत्ति दुर्लभात्॥ एकभ
क्तस्य यत्पुण्यं कथयामि समासतः॥ सप्तजन्मार्जितं पापमभेद्यं देवदानवैः॥ नश्यते चैकभक्तेन ना
त्र कार्या विचारणा॥ मासैकस्य तु यत्पुण्यं शृणुष्व तेन सुव्रत॥ अभाग्यो जातभाग्यस्याद्दुर्भगः ३१३

रक्तपुष्पैस्तु नैवेद्यैः फलैः कालोद्भवैस्तथा॥ पूजयेज्जपते मीशां धूपदीपैस्तयोत्तमैः॥ सूर्यायनमः॥ वरुणा
यनमः। माधवायनमः॥ धात्रेनमः। हयायनमः॥ भर्गायनमः॥ सुवर्णरेतसे। अत्रयेनमः॥ दिवाकरायनमः।
तपनायनमः। भानवेनमः॥ हंसायनमः॥ इति द्वादशनामभिः पूजा कार्या॥ नमो नमः पापविनाशनाय
विश्वात्मने सप्ततुरंगमाय॥ सामार्ग्ययजुर्निधये व्रतिभिः सदा वेदवेद्याय पोत्ताय नमः सवित्रे॥ प्रार्थनमंत्रः
अनेन मंत्रेणार्घ्यं॥ एवं संपूज्य भानुं तु नक्तं भुंजीत वाग्यतः॥ आचार्यं पूजयित्वा तु वस्त्रैराभरणैः शुभैः॥
तस्मै ताम्रप्रतिमां कुंभं सहिरण्यं प्रदापयेत्॥ प्रीयतां भगवान्देवो मम संसारतारकः॥ ब्राह्मणान्भो
जयेत्सश्चाद्द्वादश न्यादि विस्तरैः॥ तेभ्यस्तु कलशान्दद्याद्यथाशक्त्या तु दक्षिणां॥ एवं यः कुरुते सम्य
ग्व्रतमेतदनुत्तमं॥ आशादित्येति विख्यातं तस्य पुण्यफलं महत्॥ निर्व्याधिर्निपुणो जखी पुत्रपौ
त्रसमन्वितः॥ भुक्त्वा च भोगानम्लानमरैरपि दुर्लभान्॥ देहांतरे विसायुज्यं प्राप्नुयादुत्तमोत्तमं॥
प्राप्स्यते परमां वृद्धिं विमुक्तः कुष्ठरोगतः॥ आशाभंगो न तस्यास्ति कदाचिदपि जन्मनि॥ एतस्मात्का

पूर्वोक्तैरेव मंत्रैस्तु पूजयेत्पार्वतीपतिं ॥ नानापुष्पैः फलैर्द्रव्यैर्नानारत्नैः समर्चयेत् ॥ श्वेतवस्त्रयुगेनै
व नानामंत्रैर्महेश्वरं ॥ उपवीतं सोत्तरीयं भक्ष्याणि विविधानि च ॥ न्यानि यान्यभीष्टानि तानि
चान्यानि कल्पयेत् ॥ पुष्पमंडपिका कार्या वितानं तत्र शोभितं ॥ शय्यां तूलीं तथा दर्शं देवस्या
ग्रे प्रकल्पयेत् ॥ रात्रौ जागरणं कुर्याद्गीतवादित्रनिस्वनैः ॥ स्वगृह्योक्तविधानेन कृत्वाग्निस्था
पनं ततः ॥ ततो होमं च पूर्वाद्यैर्मंत्रकायैर्भिनस्ततः ॥ पालाशशमीसमिद्भिर्जुहुयाष्टधि
कं शतं ॥ आप्यायस्वेति मंत्रेण पृषदाज्ययुतस्ततः ॥ यवव्रीहितिलाज्येन पूर्णां पूर्णां पृथक्
पृथक् ॥ पूर्णाहुतिं ततो दद्यात्कृत्वा स्विष्टकृदादिकं ॥ होमांते च गुरुं पूज्य सपत्नीकं समा
हितः ॥ वस्त्रैराभरणैः श्रेष्ठैर्गृहोपकरणादिभिः ॥ श्वेतां वा कपिलां वापि सुशीलां च पयस्विनीं ॥ ३१४
सवत्सां रत्नपुच्छां च घंटावस्त्रविभूषितां ॥ दक्षिणासहितां दद्याच्छिवो मे प्रीयतामिति ॥ धे
नुर्जगतां माता नित्यं विष्णुपदे स्थिता ॥ सवत्सा च मया दत्ता प्रीयतां मे सदाशिवः ॥ ब्राह्म

णान् भोजयेद्विद्वान् स्त्रियो दश सुशोभनाः ॥ वस्त्रालंकारछन्नाद्य तेभ्यो देयं सदक्षिणं ॥ त्रयोदश प
याः देया वंशपात्रसमन्विताः ॥ पक्वान्नफलसंयुक्ता नानाभक्ष्यसमन्विताः ॥ पूजितं तु ततो दे
वं देवोपकरणानि च ॥ आचार्याय ततो दद्यात्प्रणिपत्य पुनः पुनः ॥ इमं देव गृहाण त्वं सर्वोपस्क
रसंयुतं ॥ परिपूर्णं व्रतमस्या विकृतं फलं ॥ यद्भक्त्या देवदेवेश मया व्रतमिदं कृतं ॥ न्यूनं वाथ
क्रियाहीनं परिपूर्णं तदस्तु मे ॥ इति संप्रार्थयेद्देवं द्विजं चैव पुनः पुनः ॥ भुंजीयात्सह धर्म
त्मा शिष्टैरिष्टैश्च बंधुभिः ॥ अनेनैव विधानेन यद्व्रतमाचरेत् ॥ यं यं चिंतयते कामं तं तं प्रा
प्नोति मानवः ॥ दाता सुखी वीततेजस्वी त्रिषु लोकेषु विश्रुतः ॥ विमानवरमारुह्य सोमलोके म
हीयते ॥ मन्वंतराणां शतं यावत्तावत्तत्रैव मोदते ॥ शिवलोकं ततो गत्वा शिवेन सह मोदते ॥
क्रीडते शंभुरूपेण पुनरावृत्तिदुर्लभः ॥ कलौ नवरितं पूर्वं सोमवारव्रतं शुभं ॥ नृपैः श्रेष्ठैः पुरा
पुराचीर्णं नास्तिके धर्मतत्परैः ॥ इति पठति रहस्यं यः शृणोतीह नित्यं लभतु वदति इति श्रेय

यान्यस्ययोवै। सकलकलुषहानो वंद्यमानो गणौघैः शिवविमलविमानैर्याति शैवंपुरं सः॥ ॥इति
श्रीस्कांदे सोमवारव्रतं संपूर्णं॥ ॥अथ भौमवारव्रतं॥ तत्र तद्यंत्रप्रकार उक्तः संग्रहे। त्रिकोणांश्च
र्व मुध्वस्त्यपंचधा विभजेत्ततः॥ तृतीयरेखा चिन्हाभ्यां लोछयेत्समभागतः। आद्यरेखाग्रयु
गलं तृतीयं चिन्हयोर्न्यसेत्॥ द्वितीयाग्रं समाकृष्य तृतीयं चिन्हयोर्न्यसेत्॥ युतारेखा
तृतीयां तु समां भज्यां त्समांशतः। तुर्याचिन्हद्वयेनाथ त्रिभिश्चिन्हैस्तु पंचमी॥ तृतीयां—
कुर्वीत पंचम्या मध्याचिन्हगे। तुर्याग्रयोजयेत्सम्यक् पंचम्याचिन्हयोर्द्वयोः। अथमानद्वये
दद्यात्सूत्रयुग्मं विचक्षणः। ---धिकासाम्य कोणानां विंशतिर्भवेत्॥ तृतीयातुर्ययोर्मध्यस्थि
तिचिन्हगृहेर्चयेत्। देवतद यतो मंत्री त्रिकोणे दक्षिणाक्रमात्॥ मंगलाद्यानुतार पूर्वोनमो
तानेकविंशति॥ एकविंशतिकोष्ठेषु नानामंत्रान्समालिखेत्॥ ततः पूजा प्रकर्तव्या पुत्रसंपत्ति ३१५
हेतवे॥ पूजाप्रकारमाह॥ सहिमभगवन् भौम अंगारक महाप्रभो॥ त्वयि सर्वसमायातं

सुभवोभवेत्॥ पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनं॥ कन्यार्थी लभते कन्यां रूपलावण्यशालिनीं॥
यं यं चिंतयते कामं तं तं प्राप्नोति मानवः॥ गृहे तस्य वसेल्लक्ष्मी सौख्यानि विविधानि च॥ रुद्रांशो धर्म
मार्गस्थो विघ्नहीनः क्षितिं चरेत्॥ अश्वमेधसहस्राणि फलं प्राप्नोति मानवः॥ इहलोके चिरं स्थित्वा प्रभु
क्त्वा भोगान्मनोरमान्॥ विमानवरमारुह्य रुद्रलोके महीयते॥ यथात्मानं तथा देवं यथा देवं त
था गुरुं॥ तोषयेच्च परं भक्त्या तेन पूर्णं भवेद्व्रतं॥ नंदिकेश्वर उवाच॥ उपवासेन नैवेद्यैर्समाचरंति
मानवाः॥ यदा वित्तं च वित्तं च जायते पुरुषस्य वै। तदेवोद्यापनं कुर्याद्व्रतसंपूर्णहेतवे॥ चलं वित्तं
चलं वित्तं चलं जीवितुमेव च॥ एवं ज्ञात्वा प्रयत्नेन व्रतस्योद्यापनं चरेत्॥ उमामहेश्वरौ हैमौ
वृषभेण समन्वितौ॥ यथाशक्त्या प्रकर्तव्यौ वित्तशाठ्यं न कारयेत्॥ मंडलं कारयेद्दिव्यं लिंगतो
भद्रकं तं शुभं॥ कलशं पयसा पूर्णं श्वेतवस्त्रयुगान्वितं॥ ताम्रपात्रं वेणुमयं कुंभयोरुपरि न्यसे
त्॥ स्थापयेन्मंडले दिव्ये कलशं कनकोज्वलं॥ तस्योपरि न्यसेद्देवमुमया सहितं शिवं॥

गारकाय॰ चरणान्मस्तकावधि वृष्ट्यपहर्त्रे नमः। नाभौ आराय॰ वक्षसि वक्राय॰ मूर्धनि भूमिजाय
नम इति न्यासान्कृत्वा हृदयादिन्यासं कुर्यात्। यथा ह्रां हृदयाय नमः॥ ह्रीं शिरसे स्वाहा॥ हूं शि
खायै वषट्। ह्रां ह्रीं ह्रूं कवचाय हुं। हंसः नेत्रत्रयाय वौषट्। खंखः अस्त्राय फट्॥ करन्यासः। ॐ हुं
कनिष्ठिकाभ्यां नमः॥ ॐ हूं मध्यमाभ्यां नमः। ॐ ह्रां ह्रीं हूं तर्जनीभ्यां नमः॥ ॐ हंसः अंगुष्ठाभ्यां
नमः। ॐ खंखः करतलकरपृष्ठाभ्यामिति न्यासान्कृत्वा आवाहयेत्॥ रक्तमाल्यांबरधरः श
क्तिशूलगदाधरः। चतुर्भुजो मेषगमो वरदस्याद्धरासुत इति ध्यानं। एह्येहि भगवन् [illegible] अंगारक
महाप्रभो त्वयि सर्वं समायातं त्रैलोक्यं सचराचरं॥ भौम मम आवाहयिष्यामि तेजोमूर्तिं दुरासदं॥ रु
द्ररूपमनिर्देश्यं वक्रं नररुधिरप्रियमिति। ततो अग्निर्मूर्धेति मंत्रेण सर्वोक्तभौवगायत्र्यावाहनादि
पुष्पांतां पूजां कृत्वा यंत्रस्थेकविंशतिकोष्ठेष्वंगानि पूजयेद्देवं विंशतिनामभिः॥ यथा। मंगला ३१८
य नमः। पादौ पूजयामि। भूमिपुत्राय॰ जानुनी॰ ऋणहर्त्रे॰ ऊरू॰ धनप्रदाय॰ कटिं स्थिरासनाय॰

गुह्यं॰ महाकायाय॰ उरः॰ सर्वकर्माविरोधकाय॰ वामबाहुं॰ लोहिताय॰ दक्षिणबाहुं॰ लोहिताक्षा
य॰ कंठं पू॰ सामगानां कृपाकराय॰ मुखं। धरात्मजाय॰ नासिकां॰ कुजाय॰ अक्षिणी॰ भौमाय॰ लला
टं॰ भूतिदाय॰ भ्रूमध्यं॰ भूमिनंदनाय॰ मस्तकं॰ अंगारकाय॰ शिखां॰ यमाय॰ सर्वांगं॰ सर्वरो
गहारकाय॰ बाहृदयं। वृष्टिकर्त्रे नमः मूर्धादिपादपर्यंतं पूजयामि। वृष्ट्यपहर्त्रे नमः चरणादिमस्त
कपर्यंतं पू॰ वृष्ट्यपहर्त्रे नमः दिशा पू॰ अत्र मूलमंत्र महोदधिमात्रे॥ अन्यत्र क्वचिदन्य [illegible] सप्रका
रः सचयथा। शिखायां मंगलः पातु भूमिपुत्रश्च मूर्धनि। ललाटं ऋणहर्ता च चक्षुषोश्च धनप्रदः। स्थि
रासनः श्रोत्रयोश्च महाकायश्च नासिकां॥ आस्यं दंतोष्ठजिह्वासु सर्वकर्माविरोधकः। हनूमे लोहितः
तु लोहिताक्षश्च कंठकं॥ स्कंधयोरुभयोरक्षेत् सामगानां कृपाकरः॥ धरात्मजो भुजौ पातु कुजो रक्षे
त्करद्वयं॥ भौमो मे हृदयं पातु भूमिदस्तु तथोदरे॥ भूमिनंदनश्च नाभौ ध्येयं लगारकं न्यसेत्। उ
रून्मम यमो रक्षेज्जान्वो रोगापहारकः। जंघयो वृष्टिकर्ता च अपहर्ता च गुल्फयोः॥ पादांगुष्ठे च पा

दौ च सर्वकामफलप्रदः॥ शक्तिर्मे पूर्वतो रक्षेत् शूलं रक्षेच्च दक्षिणे॥ पश्चिमे धनुषः पातु उत्तरे च शर
स्तथा। ऊर्ध्वं वज्राननः पातु अधस्तात्पृथिवीमम। एवं न्यस्त शरीरोऽसौ चिंतयेद्भूमिनंदनं॥ ॥अथ
कथा॥ ॥सूत उवाच॥ पूजयेद्देवदैत्यैस्तु मंगलो मंगलप्रदः। गौतमेन पुरा पृष्टो लोहितांगो महा
हः॥ ॥गौतम उवाच॥ ॥कथयस्व महाभाग गुह्यं पूजनमुत्तमं॥ मंत्रमाराधनं दानं सर्वपाप
प्रणाशनं॥ रूपं सुवर्णसंकाशं वाहनायुधसंयुतं॥ येन पूजितमात्रेण जायते सुखमुत्तमं॥
धर्मार्थकाममोक्षाणां कालेनैव फलप्रदं॥ सर्वपापप्रशमनं सर्वव्याधिविनाशनं॥ [illegible] सर्वसौ
भाग्यदं देवं दत्वा पातकनाशनं॥ सर्वयज्ञफलं प्रोक्तं सर्वकामफलप्रदं॥ तपसा जय दानानां फल
नैव तु लभ्यते॥ तद्व्रतं ब्रूहि मे देव लोहितांग महाग्रह। यस्मिन्नाराधिते मर्त्यः सर्वसौभाग्यवान्
भवेत्॥ मंगल उवाच॥ शृणु विप्र महाभाग सर्वज्ञ ऋषिगोत्तम। व्रतं च पूजनं दानं यद्व्रतं भुवनत्र
ये॥ आसीत्पूर्वं हि सर्वज्ञो ब्राह्मणो वेदपारगः॥ तस्य भार्या सुनंदा च नाम्ना ख्याता सुलोचना॥

त्रैलोक्यं सचराचरं॥ भौम मम आवाहयिष्यामि तेजोमूर्तिं दुरासदं॥ रूद्ररूपमनिर्देश्यं वक्रं च रुरुप्रियं॥
अग्निर्मूर्धेति मंत्रेण गायत्र्या मंगलस्य वा॥ गायत्री च अंगारकाय विद्महे शक्तिहस्ताय धीमहि॥
तन्नो भौमः प्रचोदयात्॥ ॥अथ पूजाविधिः॥ मंत्रमहोदधौ। मार्गशीर्षे वैशाखे वा शुक्लपक्षे भौ
मवारे अरुणोदयकाले अपामार्गकाष्टेन दंतधावनं विधाय नद्यादौ स्नात्वा रक्तवस्त्रं परिधाय र
क्तोत्तरीयं च धृत्वा मासपक्षाद्युल्लिख्य ऋणच्छेदाय पुत्रावाप्त्यर्थं वा भौमव्रतं करिष्ये इति संक
ल्प्य प्रार्थयेत्॥ अथ देवेश ते भक्त्या करिष्ये व्रतमुत्तमं॥ ऋणव्याधिविनाशाय धनसंतान
हेतवे इति॥ ततः कर्त्ता स्वदेहे न्यासान्कुर्याद्यथा॥ अंघ्रो मंगलाय नमः। जानुनी भूमिपुत्रा
य नमः॥ ऊर्वोः ऋणहर्त्रे॰ कटिदेशे धनप्रदाय॰ गुह्ये स्थिरासनाय॰ उरसे महाकायाय॰ वाम बा
हौ सर्वकर्मविरोधकाय॰ दक्षिणबाहौ लोहिताय॰ गले लोहिताक्षाय॰ मुखे॥ सामगानां कृपाकरा
य नमो धरात्मजाय॰ कुक्षौ कुजाय॰ ललाटे भौमाय॰ भ्रुवोर्मध्ये भूतिनंदाय॰ शिखायां अंगा

नारीपतिर्मानसा॥ ॥ब्राह्मण्युवाच॥ यदितुष्टोसिमेदेवत्तदाजीवतुमेपतिः॥ मंगलउवाच
देववत्तु अजरामरस्तवभर्त्ताभविष्यति॥ अन्यं ब्रूहिममाख्यानं वरं त्रिभुवनोत्तमं॥ ब्राह्मण्युवाच
यदितुष्टोसिमेदेवग्रहाणामधिपेश्वर॥ पेत्तास्मरतिदेवशः रक्तचंदनचर्चितं॥ रक्तपुष्पैश्चसंपू
जः प्रत्यूषभौमवासरे। बंधनंव्याधिरोधंच कदाचिन्नोपजायते॥ नसर्पाग्निशत्रुभयं वियोगंतु
विषस्यवै॥ मोकुरुषमहीपुत्र भक्त्तानांसौख्यदोभव॥ मंगलउवाच॥ एकविंशतिभौमांश्चमद्भ
क्तश्चजितेंद्रियः। एकान्नेनासितान्नेन चतुर्दशोपांत्तरे गृहे॥ अर्घ्यंचमंगलेमंत्रैर्वेदपो[illegible]स्तथा॥
युवारक्तमनद्वाहं सर्वोपस्करसंयुतं। स्वशक्त्याभोजयेद्विप्रान् दातव्यंचहिरण्यकं। तेषांवैग्रह
पीडाथनत्तेवत्तुकदाचन। भूतवेतालशाकिन्यो नभवंतिहहिंसकः। एवमुक्त्वातुवचनं तत्रमंगलोपि
दिवंगतः॥ मंगलोवाच॥ ॥इदंव्रतंतवाख्यातंसर्वसौख्यप्रदायकं॥ इदंव्रतंकरिष्यंतितेषांपीडान ३१८
जायते॥ स्त्रीभिर्व्रतंप्रकर्त्तव्यं पुरुषैश्चविशेषतः। तेषांमुक्तिर्नसंदेहोस्वर्गवासोनसंशयः॥ ॥इति
भविष्योत्तरेपुराणेभौमव्रतं॥ ॥अथोद्यापनविधिर्भविष्योसौवर्णमंगलंकृत्वास्वर्णपुष्पैः प्रपूजि

तं॥ रक्तांबरधरंविप्ररक्तचंदनचर्चितं॥ रक्तपुष्पैश्चसंपूज्य मंडलंचविधानतः॥ अष्टांगैरष्टपुष्पैश्चफलै
रर्घ्यंप्रदापयेत्॥ नारिकेरादिभिश्चैवकुंभावेचंनियोजयेत्॥ एकविंशतिकुंभांश्चरक्तचंदनचर्चितान्॥
ब्राह्मणान्भोजयित्वातुततःकुंभान्प्रदापयेत्॥ रक्तधेनुंवृषंचैकमेवंदद्याद्यथाविधि॥ शय्यासोपस्क
रान्दद्यादृतीनियमभेवच॥ भौमंतत्रप्रदातव्यंक्षिप्रंव्रतसमाप्तये॥ उमामहेश्वरंतत्रपरिधायस्वशक्ति
तः॥ आचार्यंचसपत्नीकंवित्तशाठ्यविवर्जितः। तस्यजन्मकृतंपापंविलयंयांतितत्क्षणात्॥ सदाच
नियमारूढप्रत्यूषेसुसमाहितः। याज्जीवंप्रकर्त्तव्यंव्रतमेतद्विधानतः। समृद्धाश्चभविष्यंतिपु
त्रपौत्रधनादिभिः। यश्चकश्चनविप्रेंद्रकरोतिमानवोभुवि॥ धनंसर्वमवाप्नोतिव्रतस्यास्यप्रभा
वतः॥ अंतेचपरमंस्थानंयत्रसूर्यादयोग्रहाः। गछंतीतिशेषः। यःश्रृणोतिव्रतंविप्रभौमव्रतपरायणः॥
तस्यमासकृतंपापंविलयंयांतितत्क्षणात्॥ नवकनकशरीरस्तेजसादुर्निरीक्ष्योहुतवहसम
कांतिर्मानवेलब्धजन्मा। अवनितनयएषस्तूयतत्तारतेसौयतत्तुतव विघ्नतिंभूमिजः सुप्र
भातं। एवंयःकुरुतेविप्रसंपूर्णफलभाग्भवेत्॥ ॥इतिव्रतार्कसोद्यापनंभौमव्रतंसंपूर्णं॥ ॥इ

इति श्रीमीमांसकभट्टनीलकंठात्मजभट्टशंकरकृतौ व्रतार्के वासरव्रतानि॥ ॥अथ संक्रांतिव्रतानि
हेमाद्रौ स्कांदे। नंदिकेश्वर उवाच॥ ॥अथातः संप्रवक्ष्यामि धान्यव्रतमनुत्तमं॥ यत्कृत्वा हि नरो रा
जा सर्वान्कामानवाप्नुयात्॥ अयने विषुवे चैव स्नानं कृत्वा विचक्षणः॥ व्रतस्य नियमं कुर्याद्ध्या
त्वा देवं दिवाकरं॥ करिष्यामि व्रतं देव त्वद्भक्तस्त्वत्परायणः॥ तदविघ्नेन मे यातु तव देव प्रसादतः॥ इ
त्युच्चार्य लिखेत्पद्मं कुंकुमेनाष्टपत्रकं॥ भास्करं पूर्वपत्रे तु आग्नेये च तथा रविं॥ विवस्वंतं तथा
याम्ये नैरृत्ये पूषणं तथा॥ आदित्यं वारुणे पत्रे वायव्ये तपनं तथा॥ मार्तंडमिति कौबेरे ऐशा
ने भानुमेव च॥ एवं चक्रमशोभ्यर्च्य विश्वात्मानं मध्यदेशतः॥ कृतांजलिपुटो भूत्वा अर्घ्यं दद्यात्स
मंत्रकं॥ कालात्मा सर्वदेवात्मा वेदात्मा विश्वतोमुखः॥ व्याधिमृत्युजराशोकसंसारभयना
शन॥ इत्यर्घ्यमंत्रः॥ पुष्पैर्धूपैः समभ्यर्च्य शिरसा प्रणिपत्य च॥ रविं ध्यात्वा ततो दद्याद्धान्य
प्रस्थं द्विजातये॥ एवं संवत्सरं पूर्णं कुर्यादुद्यापनक्रियां॥ अर्घ्यपात्रं हि सौवर्णं कारयेन्मंडलं शुभं॥ ३२९
द्विभुजं पूजयेद्भानुं रक्तवस्त्रयुगान्वितं॥ धान्यद्रोणेन सहितं तदर्धेन स्वशक्तितः॥ स्वर्णशृंगीरो

तस्य पत्न्यं न संजातं पुत्रत्वं न कदाचन। तेनान्यस्य सुता पुण्या गृहीत्वा पोषिता ध्रुवं॥ ब्राह्मणस्य कु
ले जाता सुरूपा रूपसंयुता॥ सर्वलक्षणसंपन्ना प्रयत्नेनैव गौतम। पुराजन्म तथा वाहमेकभावेन पू
जितः। ता पुत्री स्वगृहे नीत्वा ब्राह्मणेनैव पालिता॥ नित्यं हि पुष्पिता तस्या अष्टांगकनकद्युति। तत्सुव
र्णाभविप्रासो धनाढ्यो बलगर्वितः। कोटिकोटीश्वरो जातो राजते भुविमंडले। दृष्ट्वानंदकविप्रेण
दशवर्षा वरार्थिना। विवाहार्थं च विप्रस्य दत्ता सोमेश्वरस्य च॥ वेदोक्तविधिना तेन विवाहमकरो
त्तदा। वर्षैः कतिपयैर्विप्रसा कन्या प्रौढयौवना॥ ततः स्वदेशमार्गेण व्रजन्विप्रोप्यहर्निशं॥ निशांते
अध्वरघोरअरण्ये पर्वते त्तमे॥ सर्वशून्यव्रतं तस्मिन्महाल्लोभेन भावितः। मार्गे चलति विप्रोसौ
चौरैश्च विनिपातितः। तं पतिं मृतमालोक्य सा नारी शोकपीडिता॥ पतिना सह विप्रेण मरणे कृत
निश्चया। स्वपतिं तन्मयं विप्रं चिंतयंति पदे पदे। पतिं प्रदक्षिणीकृत्य चितायाश्च समीपतः॥ तस्मि
न्क्षणे तु तुष्टोहं वरार्थं च प्रचोदिता। वरं ब्रूहि महाभागे यस्ते मनसि वर्तते। इत्युवाच ततो वत्रे सा

तिलवणसंक्रांतिव्रतं॥ ॥अथभोगसंक्रांतिव्रतं॥ तत्रैवसंक्रांतिदिवसंप्राप्ययोषित्तस्तुसमाहूयेत्॥ कुंकुं
मंकज्जलंचैवसिंदूरकुसुमानिच॥ सुगंधीनिचद्रव्याणितांबूलंशालिसंयुतं॥ तंडुलान्फलसंयुक्तांस्ताभ्यो
दद्याद्द्विजसत्तमः॥ दद्यात्सहृष्टमनसामिथुनेभ्यःप्रयत्नतः॥ भोजयित्वायथाशक्तिवस्त्रयुग्मंप्रदाप
येत्॥ एवंसंवत्सरस्यांतेरविसंपूज्यपूर्ववत्॥ धेनुंसदक्षिणांदद्यात्सपत्नीकद्विजातये॥ स्यात्सुखी
सर्वमर्त्येषुभोगीजन्मनिजन्मनि॥ ॥इतिभोगसंक्रांतिव्रतं॥ ॥अथरूपसंक्रांतिव्रतंतत्रैव
संक्रांतिवासरेस्नानंतैलेनकृत्वाविचक्षणः॥ हेमपात्रेघृतंकृत्वाहिरण्येनसमन्वितं॥ स्वरूपंवी
क्ष्यतत्पात्रंब्राह्मणायनिवेदयेत्॥ एकभक्तंततःकृत्वाभक्त्याचैवसमन्वितं॥ व्रतांतेकांचनंदद्यात्
घृतधेनुसमन्वितं॥ इतिरूपसंक्रांतिव्रतं॥ ॥अथतेजसंक्रांतिव्रतं॥ ॥शालितंडुलसंयुक्तंकर
कंकारयेच्छुभं॥ तन्मध्येदीपकंस्थाप्यप्रज्वलंतंस्वतेजसा॥ तन्मुखेमोदकंस्थाप्यब्राह्मणायनि
वेदयेत्॥ अर्घ्यंचपूर्ववत्कार्यमेकभक्तंचपूर्ववत्॥ संवत्सरेतुसंपूर्णेकुर्यादुद्यापनंबुधः॥ शोभ ३२०

नंदीपकंकार्यंसुवर्णेनतुनारद॥ ताम्रेणकरकंकार्यंतन्मध्येदीपकंन्यसेत्॥ कपिलासहदातव्याकरके
णद्विजातये॥ ॥अथसौभाग्यसंक्रांतिः॥ पूर्ववद्भानुमभ्यर्च्यतथाचैवसुवासिनीः॥ सौभाग्यएकसंयु
क्तंवस्त्रयुग्मंसयोषित्॥ विज्ञायवेदविदुषेभक्त्यातत्प्रतिपादयेत्॥ एवंसंवत्सरेपूर्णेकृत्वाब्राह्मणभो
जनं॥ पर्वतंलवणंकृत्वायथाविभवसारतः॥ कांचनंकमलंकृत्वाभास्करंचैवकारयेत्॥ गंधपुष्पादि
नापूज्यविप्रायप्रतिपादयेत्॥ सौभाग्याष्टकंतुएक्षवराजिकातद्वन्निष्पावाश्चसुशोभनाः॥ धान्यकंजी
रकंचैवकौसुंभंकुंकुमंतथा॥ लवणंचाष्टमंतत्रहसौभाग्याष्टकमुच्यते॥ ॥अथतांबूलसंक्रांतिः॥
तांबूलंचंदनाभ्यांचदद्यात्ताम्रद्विजोत्तमे॥ एवंसंवत्सरंपूर्णंरात्रौरात्रौततःपरं॥ तांबूलंभक्षयेद्विप्रैः
कार्यंदेवनांतरं॥ संवत्सरांतेकमलंकृत्वाचैवतुकांचनं॥ पर्णकोशांश्चकुर्वीततथापूगफलालयं॥
चूर्णभांडंप्रकुर्वीतपूगप्रस्फोटनंतथा॥ मुखवासादिचूर्णानांभांडानिचद्विजर्षभ॥ द्विजदीपस
मावाद्यसर्वोपस्करसंयुतेः॥ द्रव्यैस्तुपूजयेद्भक्त्याषड्रसैर्भोजयेद्द्विजान्॥ उपकल्पितंतुयत्कि

विद्वाह्मणाय निवेदयेत्॥ एवं करोति या नारी तांबूलाख्यं व्रतोत्तमं॥ भर्त्तापुत्रैश्च पौत्रैश्च मोदते स्व
गृहे सदा॥ अथ मनोरथसंक्रांतिव्रतं॥ ।गुडेन पूर्णकुंभं च वत्सरं तु स्वशक्तितः॥ संक्रांतिवासरे
दद्या ब्राह्मणाय कुटुंबिने॥ एवं संवत्सरे पूर्णे स्वशक्त्यो द्यापनं भवेत्॥ गुडेन पर्वतं कृत्वा वस्त्र रत्नैश्च
भूषितं॥ अयने चोत्तरे दद्याद्वित्तशाठ्यं न कारयेत्॥ यं यं कामयते कामं तं तं प्राप्नोति पुष्कलं॥ श्री
षंधान्यसंक्रांतिव्रतं॥ ॥अथ विशोकसंक्रांतिः॥ ॥तत्रैव॥ अयने विषुवे चैव व्यतीपाते भवेद्यदि
एकभक्तं तु यः कुर्यात्तिलदानं पूर्वकं॥ कांचनं भास्करं कृत्वा यथा विभव शक्तितः॥ स्नापयेत्पं
चगव्येन गंधपुष्पैस्तु पूजयेत्॥ संछाद्य रक्तवस्त्राभ्यां ताम्रपात्रे निधापयेत्॥ भास्कराय नमः
पादौ रवेर्जंघे ति वै नमः॥ आदित्याय नमो जानू ऊरू चैव दिवाकरः॥ अर्यम्णाति कटिं पूज्य भानुं
चैवोदरं तथा॥ नमः पूष्णेति बाहुभ्यां अर्यम्णेति पुनस्तनौ॥ विवस्वते नमः कंठं सहस्रांशो मुखं स्मृ १२१
तं॥ प्रभाकर नमो नेत्रे तेजोराशे न नमः शिरः॥ वरुणाय नमः केशान्पादादौ पूजयेद्द्रवि॥ अर्घ्यं

प्य खुरां कांस्यदोहां पयस्विनीं॥ रविः सूर्यं द्विजं ध्यात्वा तत्सर्वं विनिवेदयेत्॥ अग्निष्टोमसहस्राणां फलं प्राप्नो
ति मानवः॥ सप्तजन्मसहस्राणि धनधान्यसमन्वितः॥ निर्व्याधिर्निरुजो धीमान् रूपवानभिजायते॥
इति धानासंक्रांतिव्रतं॥ ॥अथ लवणसंक्रांतिव्रतं तत्रैव॥ ॥अथातः संप्रवक्ष्यामि लवणसंक्रांतिमु
त्तमं॥ संक्रांतिवासरं प्राप्य स्नानं कृत्वा शुभैर्जलैः॥ वस्त्रालंकारसंवीतो भक्तिभावसमन्वितः॥ कुंकु
मेन लिखेत्पद्ममष्टपत्रं सकर्णिकं॥ भास्करं पूजयेद्भक्त्या सप्तधान्यसमन्वितः॥ तदग्रे लवणपात्रं
सगुडं स्थापयेद्बुधः॥ पूजितस्त्वं यथाशक्त्या प्रसीद मम भास्कर॥ लवणं सगुडं पात्रं ब्राह्मणाय नि
वेदयेत्॥ एवं संवत्सरे पूर्णे भानुं कुर्याद्धिरण्मयं॥ रक्तवस्त्रयुगच्छन्नं रक्तचंदनचर्चितं॥ कमलं लव
णपात्रं धेन्वा सार्धं द्विजाय ते॥ प्रदद्याद्भानुमुद्दिश्य विश्वात्मा प्रीयतामिति॥ एवं कृत्वा तु यः पुण्यं प्राप्य
ते भुवि मानवैः॥ तत्फलं न गदितुं शक्यं वर्षकोटिशतैरपि॥ लवणाचलदानस्य फलमाप्नोति मान
वः॥ सर्वकामसमृद्धात्मा विमानवरमध्यगः॥ सूर्यलोके वसेत्कल्पं पूज्यमानः सुरासुरैः॥ इ

लंबमस्रुकेशांतोलंबभ्रूःसकृशोदरः॥ शिरालोदीर्घजिह्वाश्वसूर्याग्नियमसंनिभः॥ सभोक्तुकाम
स्त्रैलोक्यंरवीदुभ्यांनिवारितः॥ सोपृच्छदथसूर्येंदू क्षुधितोभक्षयामिकं॥ त्रैलोक्यंभोक्तुकामो
हंभवद्भ्यांविनिवारितः॥ क्रोधःक्षुधोमांबाधतेयात्येतेकुत्रत्तमया॥ ॥सूर्यसोमावूचतुः॥ को
पदृष्टेर्नोविविधादपिपाताद्भवानभूत्॥ व्यतीपातस्ततोनामभवान्क्षुविभविष्यति॥ यस्मिन्का
लेत्वदुत्पत्तिस्तदाकल्याणकारिणः। व्यतीपातायमद्देहेत्वयियःपापकारकः॥ नदत्तंक्षुधितोभुंक्ष्व
तत्रकोपानिपाल्यत्तां॥ ॥व्यतीपातउवाच॥ ॥नमोवांपितरौमेस्तुक्रोधपातःसभोजनः॥ दत्तो
भवद्भ्यामधुनाप्रसादक्रियतांमम॥ ॥रवींदूऊचतुः॥ ॥स्नानदानजपहोमपूर्वंकंयत्वदीय
समयेसमाचरेत्॥ तस्यपुण्यमिहत्वप्रसादत्तोनंनमस्तुसुत्तमावन्तुग्रहात्॥ तत्कालंत्ववदिध
भ्जनंयस्तस्येष्टंभवतुफावत्सभद्रतेपः। पुत्रायुर्धनसुखकीर्तिपुष्टिरूपारोगाद्यंगुणिजनवल्ल ३२४
भेत्त्वपूर्वं॥ ॥वराहउवाच॥ एतस्मात्कारणाद्भूमेव्यतीपातोव्यतेनरः॥ अर्चितेचफलंय

स्यात्तदुक्तंत्वसमासतः। विस्तरेणार्चितफलंगदितंकेनशक्यते॥ यथार्च्येतव्यतीपातःसविधिःश्रूयता
मिह॥ शुभेव्यतीपातदिनेव्यगाहयेत्संसेव्यमानेनमहानदीजले। उपावसेद्वैपवमानजापकोजप
श्चमंत्रंव्यतिपातत्तेनमः॥ छादितेतांम्रपात्रेछाशर्करापूरितेघटे॥ कांचनंभ्जेप्रतिष्ठाप्यहेममथ्यु
जेनरं॥ अथभुजमष्टादशभुजंउत्पत्तिवाक्येव्यतीपातमूर्त्तेरष्टदशभुजत्वश्रवणात्॥ उत्पत्ति
वाक्यानुसारित्वाच्चविनियोगवाक्यस्य॥ तथाभगवद्गीतासुचत्वारोमनवस्तथेतिचत्वारश्चतु
र्दशेत्यर्थः। गंधपुष्पाक्षतैर्धूपदीपवस्त्रनिवेदनैः। भक्ष्यैर्भोज्यैःफलैश्चित्रैर्मासिमार्गंत्रिरर्चयेत्॥ नम
स्तेस्तुव्यतीपातसोमसूर्यसुतप्रभो॥ यद्यद्दानादिकंकिंचित्तदनंतमिहास्तुमे॥ इत्युक्तापंच
रत्नाद्यंसुपुष्पाक्षतमंजलिं॥ प्रक्षिप्यतत्क्षणादेवसर्वपापक्षयोभवेत्॥ यदिद्वितीयेचदिनेव्य
तीपातोभवेन्नहि॥ तदापूर्णोपवासस्तुदद्यात्तत्सकलंगुरोः। पारणंचव्यतीपातेकुर्यात्संप्राश्य
गोमयं॥ अथकस्मिन्दिनेधात्रिव्यतीपातोभवेद्यदि॥ तत्रैवन्हितदादत्वाउपचारात्समाचरेत्॥

कुर्यादेवं मासि मासि व्यतीपातांस्त्रयोदश ॥ चतुर्दशे तु संप्राप्ते कुर्यादुद्यापनं बुधः ॥ व्यतीपाताय स्वा
हेति क्षीरवृक्षसमिद्युतं ॥ आज्यक्षीरफलान्नानि च होतव्यं वै शतं त्रयं ॥ शर्कराघटपूर्णेन सहासोप
स्करं नरः ॥ शय्यां चापस्करैर्युक्तां प्रदद्याद्वृत्तदर्शिने ॥ वंदे व्यतीपात महन्महांतं रविंदुसूनुं सकल
प्रलब्ध्यै समस्तपापस्य मम क्षयोस्तु पुण्यस्य चानंतफलं समास्तु ॥ इति समीर्य गुरुः परिपूज्य तेक
टकुंडलकंठविभूषणैः ॥ सकलमेव समर्प्य यथोचितं तदृफलमप्यमिह ध्रुणु लन्म हि गां च पय
स्विनीं । दद्यात्सुवर्णवरदक्षिणां ॥ तस्मै शय्यां समादाय सारदारुमयीं दृढां ॥ दत्तपत्रसितां रम्यां
हेमपट्टैरलंकृतां ॥ हेमतूलीप्रतिछन्नां शुभां गेंदुकधानकीं ॥ प्रच्छादनपटीयुक्तां धूपगंधादिवासि
तां ॥ तांबूलकुंकुमक्षोदकर्पूरागरुचंदनं ॥ दीपिकोपानहच्छत्रं प्रदद्याच्चामरासनं ॥ देहांतेस्व
र्यलोकाय विमाने रत्नसप्रभैः । अप्सरोगणसंभोगैर्गानृत्यविलासिभिः ॥ गत्वा कल्पानबुद ३२५
शतं साक्षरं त्रिदशार्चितः ॥ तदंते राजस्यारोजेंद्रकपसौभाग्यभाग्भवेत् ॥ कीर्त्यायोगुणधनायुरारो

ततो नीराजनं दत्वा देयः पुष्पांजलिस्ततः ॥ प्रदक्षिणनमस्कारान्कृत्वा च तदनंतरं ॥ शैवं पंचाक्षरं जप्त्वा शिवाय सं
निवेदयेत् । ततो जागरणं कार्यं शिवस्मरणपूर्वकं ॥ ततः प्रातः समुत्थाय कृत्वा स्नानादिकं पुनः ॥ पूजनीयो म
हादेवो घृतसेचनपूर्वकं ॥ भोजनीयास्ततः शैवा भक्ष्यैर्भोज्यैश्च यत्नतः ॥ ततः स्वयं च भोक्तव्यं बंधुभिः स
हसादरं ॥ अनेन व्रतवर्येण दारिद्र्यं नाशमेष्यति सर्वथा ॥ भोगांश्च विपुलान्भुक्त्वा शिवलोकं गमिष्यसि ॥
इति घृतकंबलविधिः ॥ इति श्रीभट्टनी॰ संक्रांतिव्रतानि ॥ ॥ अथ व्यतीपातयोगव्रतं ॥ हेमाद्रौ म
दनरत्ने च वाराहे । धरण्युवाच ॥ यस्त्वयोक्तो व्यतीपातस्तस्य कर्म वदस्व तत् ॥ कदा पुनः कथं पूज्यः पूजि
ते वात्र किं फलं ॥ ॥ वराह उवाच ॥ ॥ यदा बृहस्पतेर्भार्यां त्वरया जगृहे शीतगुः ॥ मित्रत्वात्प्राह तस्य स्व
स्त्यजं भार्यां बृहस्पतेः ॥ चक्रे चेंद्रो न तद्वाक्यं हितं शिक्षापितस्तदा ॥ रुष्टस्तदा किलादित्यो दीप्तदृ
ष्ट्याभ्युदैक्षत ॥ तावत्सोमोपि रुष्टास्यस्ततोन्यान्यमवैक्षत । उभयोर्दृष्टिसंपाते क्रुधयोः सोम
सूर्ययोः उद्भूतास्योऽभवद्घोरः पुरुषः पिंगलेक्षणः ॥ दंष्ट्रोष्ठदीर्घदशनो भृकुटीकुटिलाननः ॥ कपि

कृत्वा प्रतिमासं तु दापयेत् ॥ विधिनानेन वर्षान्ते प्रीयतां मे दिवाकरः ॥ पूजाविधानं सर्वं तु धान्यसं
क्रान्तिवद्भवेत् ॥ सौवर्णं कलशं कृत्वा सूर्यं चोपरि विन्यसेत् ॥ हस्ते सुवर्णघटितं पंकजं चैव निवे
शयेत् ॥ गोदानं तत्र दातव्यमेवं संपूर्णतां व्रजेत् ॥ जन्मतां शतसहस्रं धनयुक्तो भवेन्नरः ॥
आयुरारोग्यसंपन्नः सूर्यलोके महीयते ॥ ॥ अथ संक्रान्त्युद्यापनं ॥ हेमाद्रौ मात्स्ये । नंदि
केश्वर उवाच ॥ अथान्यदपि वक्ष्यामि संक्रान्त्युद्यापनं फलं ॥ विषुवे वायने चैव संक्रान्तिव्रतमा
चरेत् ॥ पूर्वेद्युरेकभक्तेन दंतधावनपूर्वकं ॥ संक्रान्तिवासरे प्रातस्तिलैः स्नानं विधीयते ॥ रवि
संक्रमणे प्राप्ते चंदनेनाष्टपत्रकं ॥ पद्मं सकर्णिकं कुर्यात्तस्मिन्नावाहयेद्रविं ॥ कर्णिकायां न्य
सेत्सूर्यमादित्यं पूर्वतस्ततः ॥ नमः सोमार्चिषे याम्ये नमो ऋग्मंडलाय तु ॥ नमः सवित्रे नैऋ
त्ये वारुण्यां तपनं बुधः ॥ मार्तंडमुत्तरे विष्णुमीशाने विन्यसेत्सदा ॥ द्विजाय सोदकुंभं तिल ३२२
पात्रं हिरण्मयं ॥ कमलं तु यथाशक्त्या कारयित्वा निवेदयेत् ॥ चंदनोदकपुष्पैश्च देवायार्घ्यं

न्यसेद्भुवि ॥ विश्वाय विश्वरूपाय विश्वधाम्ने स्वयंभुवे ॥ नमोनंत नमो धात्रे ऋक्सामयजुषां पते ॥ अनेन वि
धिना सर्वं मासि मासि समाचरेत् ॥ वत्सरांते तथा कुर्यात्सर्वं द्वादशधा नरः ॥ संवत्सरांते घृतपायसे
न संतर्प्य वह्निं द्विजपुंगवांश्च ॥ कुंभान्पुनर्द्वादश धेनुयुक्तान्सरत्नहैरण्मयपद्मगर्भान् ॥ पय
स्विनीः शीलवतीश्च दद्यात्ताः स्वरूप्याः खुरवस्त्रयुक्ताः ॥ गावोऽथवा सत्यलकाः स्यदा होम
ल्याबरा वा चतुरोप्यशक्तः ॥ द्वे वाप्यशक्तः कपिलामथैकां निवेदयेन्ब्राह्मणपुंगवाय ॥
हैमीं च दद्यात्पृथिवीं सशेषं कृत्वाथ रौप्यामथ वा पृथु ताम्रीं ॥ पैष्टीमशक्तो प्यति लैर्विधाय सौव
र्णसूर्येण समं प्रदद्यात् ॥ न वित्तशाठ्यः पुरुषोत्र कुर्यात्कुर्वन्नधो याति न संशयोत्र ॥ यावन्महें
द्रप्रमुखा नगेंद्राः पृथ्वी च सप्ताब्धियुता हि तिष्ठेत् ॥ तावत्स गंधर्वगणेरशेषैः संपूज्यते नारदनाक
पृष्ठे ॥ ततस्तु कर्मक्षयमाप्य सोथ द्वीपाधिपः स्यात्कुलशीलयुक्तः ॥ स्पृष्टं सुरवंद्यं गवयुः सभार्यः
प्रभूतपुत्रान्वयवंदितांघ्रिः ॥ ॥ इति संक्रान्त्यु[illegible] ॥ द्यापनं ॥ ॥ अथ घृतस्नपन

हेमाद्रौ भविष्ये। उत्तरे त्वयने प्राप्ते घृतप्रस्थे नयोहरिं॥ स्नापयित्वा ब्राह्मणाय उपवासं प्रयछति॥ स
र्वपापविनिर्मुक्तः सूर्यलोके चिरं वसेत्॥ ततो भवति भूपालः प्रजानंदविवर्धनः॥ ॥इति रविघृतस्न
पनं॥ ॥अथ शिवरहस्ये घृतकंबलः॥ माघे मासि महादेवेयः कुर्याद्घृतकंबलं। स भुक्त्वा सकला
न्भोगानंतमोक्षं च विंदति। मेरोश्च पतयो जाता घृतकंबलदानतः॥ जातिस्मराश्च ते जाता मुक्ताश्च
ते शिवार्चकाः॥ पुरा सुनागसंविप्रं जा बालश्रुतिपारगं॥ पप्रच्छ कर्णो गोधर्मं दारिद्र्यनाश
कं॥ ॥सुनाग उवाच॥ असितायाः सिता ना चा धेनोर्घृतमनुत्तमं॥ सपादनीयं यत्नेन
धनीभूतं च शोधितं॥ संपादनीयं यत्नेन धनीभूतं च शोधितं॥ तद्घृतं तुलयातीर्णं प्रस्थसार्ध
शतत्रयं॥ महाकंबलं तधि घृतस्य परिकीर्तितं॥ तदर्धं वा तदर्धं वा स्नाय नेयं शिवालये। घृतेनाभ्य
नदेवेशमभिषिच्य महेश्वरं॥ धनीभूतं घृतं देयं ततः शंकरमस्तके॥ ततस्तिलैः सर्षपैश्च बिल्व
पत्रैश्च कोमलैः॥ हेमपद्मैश्च देवेशः पूजनीयो महेश्वरः॥ धूपदीपादिकं देयं महानैवेद्यमादरात्॥ ३२३

सर्वं वस्त्रकार्यं ब्राह्मणाय निवेदयेत्॥ एवं संवत्सरे पूर्णे कांचनेन दिवाकरं॥ सपद्महस्तं संपूज्य यथा
विभवशक्तितः॥ कारयेत्पूजयेद्भक्त्या रक्तवस्त्रेण वेष्टयेत्॥ ततो होमं प्रकुर्वीत सर्वमंत्रैस्तु नारद॥
द्वादश कपिला दद्याद्वस्त्रालंकारसंयुताः॥ अशक्तः कपिलामेकां वित्तशाठ्यविवर्जितः॥ आयुरा
रोग्यमैश्वर्यं भार्यापुत्रसमन्वितः॥ ॥आयुरायुःसंक्रांतिव्रतं॥ अथान्यां च प्रवक्ष्यामि आयुःसं
क्रांतिमुत्तमं॥ संक्रांतिदिवसे पूज्य पूर्ववद्धि दिवाकरं॥ कांस्ये क्षीरं घृतं दद्यात्सहिरण्यं स्वशक्तितः॥
मंत्राः पृथक्दाने पूजासे वप्र कीर्तिता॥ सुक्षीरं सुरभीजातं पीयूषसमर्पिसंयुक्। आयुरा
रोग्यमैश्वर्यमतो देहि द्विजार्पितः॥ अनेन विधिना वर्षं सर्वं दद्याद्दलं द्रितः॥ उद्यापनादिकं सर्वं धा
न्यसंक्रांतिवद्भवेत्॥ निर्व्याधिश्चैव दीर्घायुस्तेजस्वी कीर्तिमांस्तथा॥ अपमृत्युभयं नास्ति
जीवेच्च शरदां शतं॥ ॥इत्यायुःसंक्रांतिः॥ अथ धनसंक्रांतिः॥ हेमाद्रौ स्कांदे॥ संक्रांतिदि
वसे पूज्य भास्करं तु विधानतः॥ कलशं निर्व्रणं गृह्य वारिपूर्णं निधापयेत्॥ सुवर्णयुक्तं तं

तत्रैवनारदीयपुराणोक्तंव्यतीपातव्रतं॥ ॥युधिष्ठिरउवाच॥ ॥केनव्रतेनचीर्णेन न पश्येद्यमशासनं॥
परिपृच्छाम्यहंविप्रव्रतानांव्रतमुत्तमं॥ तद्व्रतंब्रूहिदेवर्षेकृत्वाजयतिविप्रय॥ ॥मार्कंडेयउवाच॥ श्रृ
णुराजन्व्रतं [illegible] मिदंहर्यश्वेनपुराकृतं॥ तेनैवज्ञातदत्तंशूकरायचदुःखिते
एकदातुमृगंगत्वासहर्यश्वोराजसत्तमः॥ भ्रमंश्चरन्वनेराजन्दृष्टवांस्तत्रशूकरं॥ दग्धपादकटिंचैव
दग्धग्रीवमुखोदरं॥ दृष्ट्वातथाविधंतंतुकृपांचक्रेदयापरः॥ केनकर्मविपाकेनह्यवस्थांप्राप्तवान
यं॥ अहोकष्टमहोकष्टंशूकरेणोपभुज्यते॥ अवश्यमनुसर्तव्यंकृतंकर्मशुभाशुभं॥ इत्युक्त्वा
तत्स्वरूपेपाराजातंप्राहशूकरं॥ इयत्तींकिमवस्थांतेतन्ममब्रूहिशूकर॥ तच्छ्रुत्वानृपतेर्वाक्यंनिश्च
स्यठकरोमुक्कः॥ स्मृत्वापुराकृतंकर्मप्रस्तुवाचकथंनृप॥ श्रृणुराजन्नहंपूर्वंवैश्योविश्वसखोभवं॥
आज्ञाकृज्ञोनदाताहमाश्रितस्यचकिंचन॥ श्रुताश्चिबहवोधर्माःपुराणश्रुतिचोदिताः॥ तथापिपाप ३२६
बुध्याहंनकारोम्यात्मनोहितं॥ आशापाशमनुप्राप्तोभग्वाशास्त्रविनिर्गताः॥ कृतंचान्यायमेवाहं

नकिंचित्सुकृतंकृतं॥ एकदातुद्विजःकश्चिद्व्यतीपातेगृहेमम॥ आगतोयाचतेमांतुनकिंचिद्दत्तवानहं॥ म
यानिराकृतोत्यंतंवचोभिर्निष्ठुरैस्तथा॥ व्यतीपातोध्रुवंवैश्यकिंचिद्देह्यर्थिनेखलु॥ तन्मेरुरूपंभ
वतितवैवान्यजन्मनि॥ कुपितेनमयातस्मैनिष्ठुराक्समीरिता॥ ततश्चकुपितोविप्रोममशापमथा
ददत्॥ आशाग्निर्दहतेयद्वत्त्वमांगरिपृथक्पृथक्॥ तथैवत्वत्तवांगानिदावाग्निःपुरुषाधमः॥ अ
रण्येनिर्जलेदेशेनिर्जनेद्रुतविस्तृते॥ तत्रशूकरयोनौत्वंप्रसूतिस्समवाप्नुहि॥ प्रसादितो
मयापुत्रपुनरप्युक्तवांस्तथा॥ ज्ञानित्वंशूकरत्वेपिइत्युक्त्वाथजगामसः॥ तेनशापेनराजन्वैशूकर
त्वमवाप्नुयात्॥ अहंदुःखीहसंजातोनिर्जनेनिर्जलेवने॥ ॥राजोवाच॥ ॥केनत्वंमुच्यतेपापान्मम
चक्षेनस्त्रकर॥ येनशक्यामयाकर्तुंतवशापस्यसंक्षयः॥ ॥वाराहउवाच॥ श्रूयतांममराजेंद्रमु
क्तिस्याद्येनकर्मणा॥ व्यतीपातव्रतंनामकृत्वाराजस्त्वयाधुना॥ यथामातासुतस्येहसर्वत्रसुख
कारिणी॥ तथाव्रतमिदंराजन्निहलोकेपरत्रच॥ तथैवाभ्युदितेसूर्येनिःशेषंचेतमादरात्॥ इदं

व्रतं तथैव हि सर्वपापं व्यपोहति॥ यथा विष्णुर्ददातीह नृणां परमनिर्वृत्ति॥ ददात्येव न संदेहः तत्तथा व्र
तमिदं शुभं॥ शतमिंदुक्षये दानं सहस्रं तु दिनक्षये॥ विषुवे शतसाहस्रं व्यतीपाते ह्यनंतकं॥ व्यती
पातव्रतस्यास्य विधानं शृणु तत्वतः॥ माघे वा फाल्गुने वापि अन्यस्मिन्मासि वा भवेत्॥ व्यतीपात
दिने यस्मिन् प्रारंभेद्व्रतमुत्तमं॥ तिलैः पूर्णा शिरा वंत्त स्नुगुडं गुडदेर्पयेत्॥ शंखचक्रगदापाणिपद्म
हस्तं हिरण्मयं॥ वस्त्रयुग्मेन संवेष्ट्य पूजयेद्गरुडध्वजं। गोक्षीरेण च संपूर्णं कांस्यभाजनमुत्त
मं॥ स्थापयेद्देवदेवेशं स्थानं तत्रैव कल्पयेत्॥ शय्या च संनिधौ तस्य स्थाप्य देव मनुस्मरेत्॥
अनंतशायिने देवं मनंतफलदं शुभं॥ लक्ष्म्या सह हि नित्यं विष्णुं भक्त्या संपूजयेद्गुरुं॥ वैदिकेन च मं
त्रेण जातीपुष्पैः समर्चयेत्॥ पायसेन च नैवेद्यं शर्करासंयुतेन च॥ दत्वा निवेद्य देवस्य प्रार्थनां प्रार्थ
येद्व्रती॥ व्यतीपातदिने देव तव सर्वं समर्पितं॥ भवत्वनंतफलदं मम जन्मनि जन्मनि॥ देवदेवं
हृषीकेशं प्रार्थयित्वा ततो व्रती॥ तत्सर्वमुपवेद्य द्याच्छ्रोत्रियाय कुटुंबिने॥ व्रतोपदेष्टे विप्राय ब्रा ३२७

ग्य धनधान्यवान्॥ प्रतापाढ्यो महैश्वर्ययुक्तो भोगी बहुश्रुतः। जनसौभाग्यसंपन्नैर्यावज्जन्माष्टकं युतं॥
दर्शे दशगुणं दानं तच्छतघ्नं रविक्षये॥ शतघ्नं तच्च संक्रांतौ शतघ्नं विषुवे ततः॥ युगादौ तद्दशगुणम
यने तच्छताहतं॥ सोमग्रहे तच्छतघ्नं तच्छतघ्नं रविग्रहे॥ असंख्येयं व्यतीपाते दानं वेदविदो विदुः॥ उत्स
त्तौ लक्षगुणं कोटिगुणं भ्रमणानाडिकायां तु॥ अर्बुदगुणितं पतनेन्जपदाना द्यक्षयं पातिते। जन्म
द्वाविंशतिनाडी भ्रामणं त्वेकविंशति। व्यतीपातस्य पतनं दशासस्थितिं विदुः। संप्राप्तेत्तेय
व्यतिपातकाले पुनःपुनस्तद्द्विशतीतरश्मी॥ प्रयच्छतः कल्पशतार्बुदानि विवर्धमानं न हि ही
यते तत्॥ तस्मान्महित्वं व्यतिपातपूजां कुरुष्व चेत्पुण्यमनंतमिष्टं। यदि स्थिरत्वं सततं तवेष्टं स
मतरित्वं पदमीक्षितं तव॥ गणयित्वा व्यतिपातकाले चार्चति यो नरः॥ सर्वपापहरो तस्य भव
तो भानुसीतगो॥ पठति लिखति यः शृणोति वे तत् कथयति पश्यति कारयत्यवश्यं॥ रविशशिदि
वमाप्य सोपि देवैश्चिरसमयं परिपूज्यमान आस्ते॥ ॥इति वाराहोक्तं व्यतीपातव्रतं॥ ॥अथ

यइदंशृणुयाद्भक्त्या विष्णुलोके महीयते॥ ॥इति व्यतीपातव्रतं॥ ॥अथ लक्षपूजाविधिः॥ ॥ई
श्वरउवाच॥ लक्षपूजाविधिं देवि कथयामि समासतः॥ यां कृत्वा प्राणिनः सर्वे मम सन्निधिभागिनः
शिवरात्रे तथाष्टम्यां सोमवारे समारभेत्॥ शुभेन्यस्मिन्दिने वापि शिवभक्तं द्विजोत्तमं॥ सपत्नी
कं सपुत्रं तमनूचानमनिंदकं॥ धर्मज्ञं दोषरहितं संतुष्टं परिपूज्य च॥ आचार्यं वरयेत्प्राज्ञः सु
स्नातो भूषितो व्रती॥ कुस्वरं श्यामलं दीनमति दीर्घं जडं तथा॥ देवतानभिसक्तं च बधिरं दी
र्घलिंगकं॥ वेदहीनं दुराचारं मलिनं बहुभाषिणं॥ निंदकं पिशुनं दुष्टमंधकं च विवर्जयेत्॥
नित्यं विवर्त्य संकल्पं संकल्प्य मनसेप्सितं॥ चंपकैर्मल्लिकापुष्पैर्जातीकिंशुकपाटलैः॥ ने
द्यावर्तैः श्रियावर्तैर्द्रोणपुष्पैः कदंबकैः॥ अन्यैः शिवागमप्रोक्तैर्बिल्वशाखादलैस्तथा॥ ना
गवल्लीदलैर्वापि रक्तैर्नानाविधैरपि॥ धान्यैश्च विविधैः शुद्धैरखंडैर्व्रीहितंडुलैः॥ लक्षपूजां
प्रकुर्वीत मूलमंत्रेण शांभवे॥ स्वर्णपुष्पं प्रत्ययुतं कर्पूरावर्तिकं भवेत्॥ इत्येकस्मिन्दिने वापि द्व्या ३२८

वा त्रिदिनेपि वा॥ पुष्पलाभानुसारेण बहुभिर्वा दिनैर्यजेत्॥ समाप्तौ श्रीशिवायैकं सौवर्णपुष्पमर्पये
त्॥ पुष्पांजलित्रयं स्वर्णबिल्वशाखासमन्वितं॥ भवः शर्वस्तथा रुद्रस्ततः पशुपतिः स्मृतः॥ उग्रो
महातपो भीमईशानश्चाष्टनामभिः॥ पुष्पांजलित्रयं दत्वा स्तुत्वा स्तुत्वा पुनः पुनः॥ क्षमाप्य च म
हेशानं प्रार्थयेत्तदनंतरं॥ विरूपाक्ष महेशान विश्वरूप महेश्वर॥ मया कृतां लक्षपूजां गृहीत्वा
वरदो भव॥ इति प्रार्थनमंत्रः॥ मृत्युंजयाय यज्ञाय देवदेवाय शंभवे॥ अमृतेशाय शर्वाय महा
देवाय ते नमः॥ इति नमस्कारमंत्रः॥ ॥इति लक्षपूजाविधिः॥ अथोद्यापने॥ शिवस्य शतप
लेन पंचामृतेन स्नापनं॥ नारिकेलार्घ्यदानं च ध्वजपताके शिवोपरि॥ श्वेतवस्त्रद्वयं देयं द्वि
जायाश्च शिवस्य च॥ पूजांते च तथा होमं तिलद्रव्येण कारयेत्॥ ततस्त्वनंतरं पूजामाचार्य
स्यैव कारयेत्॥ ततः प्रार्थनामंत्रः॥ नमः शिवाय शांताय सगणाय ससूनवे॥ सर्वेश्वराय देवाय
कारणत्रयहेतवे॥ निवेदयामि चात्मानं त्वं गति परमेश्वर॥ समोस्खलितपादानां भूमिरेवावलंबनं॥

त्वयिज्ञातापराधानां त्वमेवशरणं प्रभो॥ ततो विप्रा भोजनीयाः शक्त्या वा द्वादश वाथवा॥ आचार्यं पू
जयेत्पश्चाच्छक्त्या दद्याच्च दक्षिणां॥ पूर्णेंदुवचनात्कृत्वा मम संन्निधिभाग्भवेत्॥ यद्द्वारे मत्तमातंगाः
वायुवेगास्तुरंगमाः॥ पूर्णेंदुवदनानार्यो लक्षपूजाविधेः फलं॥ ॥ इति ब्रह्मांडपुराणे लक्षपूजा
तदुद्यापनविधिः॥ ॥ लक्षपूजाविविधिर्भूयः शृणु नान्यमनाः क्वचित्॥ यां कृत्वा मुच्यते पापै
र्नारी वाथ नरोपि वा॥ ब्रह्महा गुरुगामी च मद्यपो वा धनापहः॥ सकृत्पूजनमात्रेण मुच्यते किमु
नान्यतः॥ नातः परतरं किंचित्त्रिषु लोकेषु विद्यते॥ किं कुलेन किमाचारैः किं शीलेन गुणेन तु॥ यो
हरिं पूजयेत्सम्यक् स कुलीनः स बुद्धिमान्॥ जंबुद्वीपमहापुण्यजन्म यः प्राप्य मानवः॥ इमा
मकृत्वा मूढात्मा कोन्यस्तस्मादधोगतिः॥ धर्महीनस्य मर्त्यस्य विना यांत्यपत्यांति च॥ स
लोह कारभस्त्रेव तस्य जन्म निरर्थकं॥ पूजयेत्पूजयेद्विष्णुं भूयो भूयोपि पूजयेत्॥ माघे
वा कार्तिके चैत्रे आषाढे श्रावणेपि वा॥ अन्येषु पुण्यमासेषु व्रतमेतत्समाचरेत्॥ आतस्मा ३२९

त्समपायविशेषतः॥ भूमिर्वाथ सुवर्णं वा दक्षिणा तु विधीयते॥ ब्राह्मणान्भोजयित्वा तु व्रतमेतत्समापये
त्॥ इदं व्रतं त्वया देव गृहीतं पूर्वजन्मनि॥ स्वर्गापवर्गदं नृणां फलं तव ददाम्यहं॥ एवमुक्त्वा नृपश्रेष्ठ श
कराय फलं ददौ॥ तत्क्षणात्तेन पुण्येन शूकरो मुक्तकिल्बिषः॥ मुक्तः शूकरदेहाच्च सर्वाभरणभूषि
तः॥ दिव्यं विमानं संस्थाप्य वाक्यं चेदमुवाच ह॥ हे नराः किं न जानीध्वं व्यतीपातव्रतोत्तमं॥ इहैव सुखदं
नृणां परत्र च परां गतिः॥ दृष्टा माया विनिर्मुक्तो व्रतस्यास्य प्रभावतः॥ विश्वासः क्रियतामस्मिन्
व्यतीपातव्रतोत्तमे॥ इत्युक्त्वा स्वर्गदो राजो वै पश्य तत्तदा॥ तं दृष्ट्वा विस्मितो भूत्वा देवदेवदेवस्य च
क्रिणः॥ हर्यश्वः प्राप्तवांस्तेन विष्णोस्तत्परमं पदं॥ अतस्त्वं कुरु राजेंद्र व्यतीपातव्रतोत्तमं सर्व
पापक्षयकरं नृणां इह सुखप्रदं॥ इदं यः कुरुते मर्त्यः श्रद्धया भावसंमितः॥ सर्वपापविनिर्मुक्तो वि
ष्णुसायुज्यमाप्नुयात्॥ ययातु पुत्रकामिन्या कृतं सा लभते सुतान्॥ स्त्रीकामेन हि हितं वत्स लभेन्ना
रीमनुत्तमे॥ व्यतीपातव्रतमिदं व्यतीपातदिने पठेत्॥ ज्ञानवान्धनवान्श्रीमान् इहैव च सुखी भवे॥

अर्पयेत्तु दशांशेन तद्दशांशेन तर्पणैः॥ तद्दशांशेन मार्जनं तु तद्दशांशेन भोजनं॥ तच्छक्तांशे
न वा कुर्याद्दिजाराध्यो विवर्जितः॥१

मिवर्जितैः॥ होमसंख्याविधानेन लक्षसंख्याय दा भवेत्॥ स्वर्णा कृतिं ततः कृत्वा प्रणिपत्य समाप
येत्॥ लक्ष्मीनारायणं देवं शंखचक्रगदाधरं॥ सुवर्णप्रतिमां कृत्वा वित्तपूर्वं विचक्षणः॥ ब्राह्म
णाय सुशीलाय स्वदारनिरताय च॥ पत्नीपुत्रव्रतेदानमक्षय्यफलमश्नुते॥ जलशायी ब्रह्मपि
ता ब्रह्मगर्भः सनातनः॥ अनंतभोगशयनः प्रियतां परमः पिता॥ ॥इति दानमंत्रः॥ ॥तुलस्य
भावपुष्पैर्वा बिल्वैर्वा व्रणवर्जितैः॥ सुगंधैः ऋतुसंभूतैः शस्तैः पादपपल्लवैः॥ सहस्रं द्विसहस्रं
वा त्रिसहस्रं यथाविधि॥ उपक्रमदिने यावत्संख्यत्यहं तावती भवेत्॥ उपक्रमदिने वापि द्यु त्स
मे पि वा व्रती॥ उद्यापनं प्रकुर्वीत पूर्वोक्तेनैव मार्गतः॥ अन्यथा दोषमाप्नोति हीनांगे जायते भु
वि॥ एवं यः कुरुते मर्त्यो नारी वा गतभर्तृका॥ देहांते ज्ञानवान् भूत्वा विष्णुलोकमवाप्नुयात्॥ आ
शपानं भोजयेच्छक्त्या स्वयं भुंजीत वाग्यतः॥ तुलसी दर्शनं स्पर्शं नमस्कारः प्रदक्षिणा॥ दा
नं च हरिपूजा च धारणं तज्जलं च यत्॥ भक्षणं हर्षदं चैव विष्णुलोकप्रदायकं॥ महापातकयुक्तो ३३०
वा युक्तो वा सर्वपातकैः॥ विष्णुपूजाविधानेन जीवन्मुक्तो न संशयः॥ ॥इत्यग्निपुराणे लक्षपूजा

विधिः॥ ॥अथ लक्षनमस्कारविधिः॥ ॥अंबरीष उवाच॥ ॥इक्ष्वाकूणां कुलगुरो भो ब्रह्मन् धर्म
वित्तम॥ ब्रूहि पापक्षयकरं व्रतं सर्वोत्तमव्रतं॥ ब्रह्मघ्नस्य सुरापस्य गुरुदाराभिमर्षिणः॥ सुव
र्णस्तेयिनश्चैव पष्ठीसंपर्षिणान्यपि॥ संकीर्णपापिनश्चैव संकलीकारिणा पि वा॥ गुरोर्विश्वा
सहीनस्य व्रतभ्रष्टस्य पापिनः॥ संध्याकर्मविहीनस्य जगत्युन्मादवर्त्तिनः॥ दासीवेश्यासं
गमिनश्चंडालीगामिनस्तथा॥ परस्वहारिणश्चैव देवद्रव्यापहारिणः॥ ब्राह्मणं भीतिदस्यैव वृत्ति
छेदकरस्य च॥ परस्यलोलुपस्याथ रहस्य कृत्तपायिनः॥ पंचयज्ञविहीनस्य दुःशास्त्रनिरतस्य च॥
गुरुनिंदादिसंश्रोतुर्गुरुद्रव्यापहारिणः॥ नारीणां च विशेषेण प्रायश्चित्तं महाव्रतं॥ वेदेर्वेद
पुराणैश्च स्मृतिभिश्चैव निश्चितं॥ ॥वसिष्ठ उवाच॥ ब्रह्महत्यादिपापानां प्रायश्चित्तं महाव्रतं॥ ब्र
ह्महत्यादिपापानां प्रायश्चित्तं यदीच्छति॥ तदा लक्षनमस्कारव्रतं कुरु महीपते॥ संकीर्णकानां पा
पानां प्रायश्चित्तं यदीच्छति॥ तदा० पते॥ संकलीकरणानां च मलिनीकरणस्य च॥ अपात्रीकरणानां च

मायश्चित्तं यदीछसि ॥ तदा ०पते ॥ भ्रातृपत्नीसुतानां च गामिनः कामिनस्तथा ॥ स्वसुस्च मातृव
ध्वनामिछया गमनस्य च ॥ दासीवेश्यासंगजस्य संक्षयं यदि वांछसि ॥ तदा ०पते ॥ परस्वहारिणस्यापि
देवस्वहरणस्य च ॥ रहस्यभेदकस्यापि रदस्य कृतपापिनः ॥ त्यागस्वपंचयज्ञानां दुःशास्त्राभिरतस्तथा
गुरुनिंदाश्रुतस्यापि गुरुस्वहरणस्य च ॥ त्वेद्यानां चैव चाष्याणां संक्षयं यदि वांछसि ॥ तदा ०पते ॥ कृ
तस्य जातस्य संक्षयं यदि वांछसि ॥ तदा ०पते ॥ शृणु भूप विधिं वक्ष्ये संकल्पनियमादिकं ॥ चातुर्मा
स्येतु संप्राप्ते केशवे शयनं गते ॥ आषाढस्य सिते पक्षे एकादश्यां समाहिता ॥ संकल्पं देवदेवस्य पु
रतश्च कृपाणिनः ॥ मम लक्ष्मनमस्कार व्रतस्य पुरुषोत्तम ॥ निर्विघ्नं व्रतं सांगं कुरु त्वं कमयाहर ॥
पापपंकनिमग्नं मा पापकोशास्य भाजनं ॥ व्रतेनानेन सुप्रीतः सद्य एव जगत्पते ॥ इति संकल्पमनसा का
र्त्तिक्यां तु समापयेत् ॥ प्रातः स्नात्वा व्रतं कुर्यात् मध्यान्हे सदा मुनिः ॥ यद्वा नक्तं द्वानभुंजीतभुंजी ३२३
त लघुभोजनं ॥ अन्यैर्व्रतं नवदेत्कापि नाये ध्यायेत्कथंचन ॥ देवतानां जपं होमं नत्यजेतु कथं

नविधायात्तदंतधावनपूर्वकं ॥ धृतवस्त्रधरो भूत्वा नित्यकर्म समाचरेत् ॥ देवपूजागृहं वापि देवालयमथा
पि वा ॥ गोमयेनानुलिप्याशु धातुनाम्नन्मयेन वा ॥ चतुर्भिर्ब्राह्मणैः सार्द्धं कृत्वा च स्वस्तिवाचनं ॥ नां
दीश्राद्धं प्रकुर्वीत लक्ष्मपूजाविधौ द्विज ॥ प्राणायामत्रयं कृत्वा देशकालौ वदेत्सुधीः ॥ ससंकल्पं
यथाशक्त्या प्रत्यहं पूजयाम्यहं ॥ एवं संकल्प्य विधिवन्मंत्रमेतमुदीरयेत् ॥ गृहीतस्मिन्व्रते देवप
चलेयदि मे भवेत् ॥ तदा भवतु संपूर्णं त्वत्प्रसादाज्जगद्गुरो ॥ एवं संप्रार्थ्य देवेशं नियमात्तुलसीदलैः ॥
पंचामृतैः स्नापयित्वा शालग्रामशिलां शुभां ॥ गंधपुष्पाक्षतैर्भक्त्या पूजयेत्प्रथमं बुधः ॥ प्रत्य
त्यहं यावती पूजा तावत्या वर्त्तिभिर्व्रती ॥ पद्मान्यापि चतावंति लिखेत्संचभिधातुभिः ॥ महाव्रत
मिदं ब्रह्मन् देवानामपि दुर्लभं ॥ तुलसीदलैः शुभैः स्वस्थैः रत्नपौरतिशोभनैः ॥ कृष्ण्यंडवर्जितैः
देवं पूजयेत्तस्य नामभिः ॥ विष्णुनामसहस्राणि यथावाप्सतनामभिः ॥ संख्यापूर्णफलापूजा
संख्याहीना तु निःफला ॥ तद्वितो मौनवान् भूत्वा विष्णुलोकपरायणः ॥ एवं संपूज्य विधिवत्पूजां
ते होममाचरेत् ॥ सहस्रनामभिर्होमं स्वाहाकारसमन्वितं ॥ मधुमिश्रैस्तिलैर्लाजमिश्रितैः कृ

रपुराणेवसिष्ठांबरीषसंवादे लक्षनमस्कारविधानं ॥ अथ कार्त्तिके मासे वैशाखे वा लक्षवर्तिविधिः ॥ मा
सपक्षद्युल्लिख्यामुककामो लक्ष्मीसहितं विष्णुं सावित्रीसहितं ब्राह्मणं उमया सहितं शिवं यथा मि
लितोपचारैः पूजयिष्ये इति संकल्प्य षोडशोपचारैः पूजां कुर्यात् ॥ अथोद्यापनकथा ॥ ॥सूत उ०॥
आर्यावर्ते पुरा काचिद्द्विजस्याभूल्लक्षणाभिधा ॥ तस्याभुजंगः इस्रदोभूद्दासो नाम महाबली ॥ एकदा लक्ष
णा सा तु प्राप्ता गोदावरीतटे ॥ ददर्श कोटिशः सैव विप्रा शास्त्रछंदचारिणी ॥ तां लक्षणा तु सुस्नातां स्थि
तां गोदवरीतटे ॥ बालां वैधव्यदोषेण रुदंतीं कुररीमिव ॥ मृतं पतिं पुरस्थाप्य बंधुभिः परिवारितां ॥ आ
क्रंदंतीं ततो वीक्ष्य शनैस्तां प्रत्यपद्यत ॥ लुठंतीं भुवि कायेन मुक्तकेशीं तीमुरो बहु ॥ जडानामपि कारु
ण्यं जायते तां तु पश्यतां ॥ तदा सा लक्षणा वाक्यं स्वभुजंगमुवाच ह ॥ कुलजानां तु नारीणां दुःखमयमतिदा
रुणा ॥ अवस्थात्रयमेतासां तत्रयं तु सदारुणा ॥ कन्यात्वं जीवभर्तृत्वं विधवात्वमिति त्रिधा ॥ पार ३३२
वश्यं च नारीणां दुःखमामरणांतिकं ॥ मृतापत्यत्ववैधव्ये तथैवाङ्गपुत्रता स्त्रियः ॥ असत्यमे

तत्त्रितयं वैधव्यं तत्र चोत्तरं ॥ शोच्यं तीव्रं च नारीणां कस्येदं कर्मणः फलं ॥ निवर्तते तथ केनैवं पृच्छंतीमि
ति तामथ ॥ उवाच दासनामा सो भुजंगः सूनृतं वचः ॥ शृणु भद्रे प्रवक्ष्यामि तत्पृष्टाः स्म पुरा द्विजाः ॥ देवा
नां चैव लोकानां हितार्थं मंत्रकोविदाः ॥ शास्त्रज्ञानात्स्वभावाच्च जीवानां यत्सुराकृते ॥ जानंति कर्म
जं फलं ते पृष्टव्याधतव्रताः ॥ भुजंगवचनं श्रुत्वा तथैवमिति सा पुनः ॥ तत्रागते महादृष्टेः याचकं नाम
वै द्विजं ॥ पप्रच्छ तत्तदादीनां प्रश्नं यावनतानसा ॥ मुने त्वहं दुराचारा वेश्यास्मि नु लक्षणाह्वया ॥ त
थापि तेदयापात्री एष्वत्तीमे सुबोधय ॥ साध्वीनां समचितानां जनाः सर्वे समभुवि दुर्गंधो वसुगंधो
वा यथा वायोः समो भवेत् ॥ मुने दृश्यं नारीणां त्रितीयाति वदुःसहा ॥ कर्मणा जायते केन केन वाथ निव
र्तते ॥ एतद्विस्तार्य मे ब्रह्मन्कृपया वद सुव्रत ॥ इति तस्या वचः श्रुत्वा याजको वाक्यमब्रवीत् ॥ दैव
कर्मणि पित्र्ये च नार्यैः पाके व्यवस्थिताः ॥ अकस्माच्च रजः दृष्ट्वा स्पृष्ट्वा भांडाद्युपस्करान् ॥ अज्ञानाद्द
र्शनाद्वापि कामाल्लोभात्कचित्स्त्रियः ॥ अवेदयित्वा गच्छंति तेन दुष्यंति पक्वियत ॥ क्रियालोपगता

च्येताः पापात्तस्मादुरत्ययात् ॥ दशामिमां प्राप्नुवंति सर्वा अपि न संशयः ॥ बाल्ये वा यौवने वापि वार्द्धे
केवा कदाचन ॥ तत्रायाति दुराचारो परा नैवाभिकांक्षति ॥ श्वश्रूश्वशुरपतिबंधूनां नित्यं चारादुरः सह ॥ ए
तत्साहाय्यतो नारी या बाधयति सत्क्रियाः ॥ बाल्ये वैधव्यमाप्नोति सा नारी नात्र संशयः ॥ एतत्कर्मसा
हाय्यमीमनीरज [redacted] सा दूषिता चय ॥ मृतापत्यात्त
थाप्यत्वा वैधव्यं यौवने व्रजेत् ॥ या नारीत्रिरजो दृष्ट्वा सर्वभाजादिसंकरं ॥ कुरुते यदि सा नारी वैध
व्यं सार्द्धके व्रजेत् ॥ याचानुकूल्यरहिता पतिधर्मेषु सर्वदा ॥ बाल्ये वैधव्यमापन्ना गतिहीना भव
त्यलं ॥ सर्वासामपि वैधव्ये निदानं पुष्यतां च न ॥ शांतिं तस्य प्रवक्ष्यामि कर्मणो स्यापि लक्षणे ॥ कृते
तु मुनिपं चम्या व्रते पापं चयोषिता ॥ पापं गच्छति नारीणामिति वेदविदो विदुः ॥ शूर्पसवायनं द
त्वा कृते लक्ष्मीव्रतादिके ॥ मूला वशेषं व्रजति रजोदोषा न संशयः ॥ निर्मूलं तु व्रजत्याशु लक्ष्मव्रते २३३
व्रते कृते ॥ रजसोत्थं महापापं नारीणां नात्र संशयः ॥ इति तद्वचनं श्रुत्वा पुनः पप्रच्छ लक्ष्मणा ॥ मन

च न ॥ अतिथिं पूजयेन्नित्यं यथाशक्त्यानुसारतः ॥ कार्त्तिके मासि संप्राप्ते पौर्णमास्यां ततः परं ॥ सं
स्थाप्य कलशं पूर्णं सवस्त्रं सपिधानकं ॥ विष्णोश्च प्रतिमां तत्र पूजयेद्विष्णु नामिके ॥ नामाभिः केशवाद्यैश्च
अंगपूजा विधीयते ॥ नैवेद्यांतं समभ्यर्च्य कुर्यात्पश्चाद्व्रतर्पणं ॥ पौरुषेण सूक्तेन गोधूमतंडुलैः ॥ दव तिल
देवजगन्नाथ सर्वव्रतफलप्रद ॥ व्रतेनानेन सुप्रीतो गृहाणार्घ्यं मयार्पितं ॥ इति चार्घ्यत्रयं दत्वा पश्चा
द्धोमं समाचरेत् ॥ पौरुषेयेण सूक्तेन शतमष्टोत्तरं सदा ॥ होमशेषं समाप्याथ पूर्णाहुतिमतः परं ॥
आचार्यं पूजयेत्पश्चाद्दद्याद्गोमिथुनं गुरोः ॥ ब्राह्मणान्भोजयेत्पश्चात्षड्विंशति पंचया ॥ दक्षिणं
च यथाशक्त्या वाचयेदाशिषस्तथा ॥ अनुज्ञातश्च तैः पश्चाद्वै स्वयं भुंजीत बंधुभिः ॥ इदं व्रतं महापुण्यं पा
पारण्य दवानलं ॥ पापपर्वतकुलिशं पापाब्धितरणोडुपं ॥ सर्वपापहरं स्त्रीणां सद्यो विष्णोः प्रसादनं ॥
नानेन सदृशं किंचित्त्रिषु लोकेषु विद्यते ॥ सर्वेषामाश्रमाणां च विहितं श्रुतिचोदितं ॥ नारीणां सध
वानां च विधवानां विशेषतः ॥ सर्वेषामपि पापानां प्रायश्चित्तमिदं भवेत् ॥ ॥ इति श्री भविष्योत्त

वर्त्यादिशांशतः कुर्यात्तर्पणं तु विचक्षणः ॥ तर्पणस्य दशांशेन होमं कुर्याद्विचक्षणः ॥ तर्पणोक्तमंत्रे
पापायसं च घृतान्वितं ॥ पालाशसमिधश्चैव मंत्रेणानेन वै ह्नवे ॥ घृतेन विष्णुगायत्र्या होमस्यायं विधिः
स्मृतः ॥ कलशेषु तथा स्थाप्य विधानं च सवस्त्रकं ॥ प्रतिमां तत्र संस्थाप्य वेदारणपूर्वकं ॥ प्राणप्रति
ष्ठया स्थाप्य प्राणांस्तस्यां समाहितः ॥ आवाहनादि पुष्पांतं पूजां कुर्याद्यथाविधि ॥ तत्र मासादेव
स्या प्रतिमाः कारयेत्ततः ॥ श्रिया च सहितं देवं मध्यगं पूजयेद्धरिं ॥ तद्दक्षिणे चतुर्वक्त्रं सावित्र्या स
हितं तथा ॥ उत्तरे वामया शंभुं पुरतो गरुडं तथा ॥ ब्रह्मा विष्णुः तथा वन्ही रविर्देवो निशाकरः ॥ रुद्र
शेषो जगद्व्यापी तेजोरूपी महेश्वरः ॥ निरंजनः कलाध्यक्षो विश्वरूपी जगत्प्रभुः ॥ स्वःप्रकाशः
स्वयंज्योतिश्चतुर्बाहो जलाशयः ॥ परब्रह्मेति द्विदशनामभिः पूजयेद्धरिं ॥ शिरो ललाटके नेत्रे
कर्णौ नृसिंमुखे तथा ॥ कंठस्कंधे तथा बाह्वोस्तने वक्षस्यथोदरे ॥ नाभौ कट्यां च जघने ऊरो जानोश्च २३४
गुल्फके ॥ पादौ तदप्रक्रमशो अंगान्येवं तु पूजयेत् ॥ धूपदीपं ततो दत्वा नैवेद्यं च निवेदयेत् ॥ य

द्रव्यं लक्षपूजायास्तद्द्रव्यं कनस्य च ॥ कृत्वा निवेद्ये तस्मै पश्चात्पूजां समाचरेत् ॥ भक्त्या च जगदाल
ने अथ देवं क्षमापयेत् ॥ देवदेव जगन्नाथ भक्तानां कार्यकारक ॥ प्रसादाद्देहयावे शीघ्रं कार्यप्र त
दो भव ॥ अनेनैव विधानेन लक्षपूजां करोति यः ॥ पुत्रैः पौत्रैः प्रपौत्रैश्च सुखमाप्नोति निश्चितं ॥ आचा
र्यं पूजयेत्पश्चाद्ब्राह्मणान्न्वलिजस्तथा ॥ गौर्देया च सवत्सा च सालंकारगुणान्विता ॥ त्रिंशत्पलकां
स्य पात्रं घृतेन परिपूरितं ॥ सुवर्णवर्त्तिसंयुक्तं आचार्याय निवेदयेत् ॥ अथवा तद्दशपलं तथा घृ
तसमन्वितं ॥ अथवा तु यथाशक्तिं दद्यादावश्यकं विदं ॥ व्रता भवितु वे दद्यात्कांस्यं वै घृतपूरितं ॥
यावज्जीवं जीवयती भवत्येव न संशयः ॥ रजोदोषविमुक्तिः स्यात्पौर्णमास्यो ददाति या ॥ ब्राह्मणा
न्भोजयेत्पश्चाद्वित्तशाठ्यं न कारयेत् ॥ एवं करोति या नारी तस्याः पुण्यफलं शृणु ॥ अथ सर्वाणि पापानि
रहस्यानि कृतानि वै ॥ नश्यंति तानि सर्वाणि व्रतस्यास्य प्रभावतः ॥ चंडालगामिनी वापि तथा शू
द्राभिगामिनी ॥ कारुकं रजकादीनां गामिनीष्वारिणी ॥ ब्रह्मक्षत्रियविट्वैश्यप्रतिलोमाभिगा

मिनी॥ मातुलेयपितृव्यादीन्भ्रातृपुत्राभिगामिनी॥ बालघ्नी वा पतिघ्नी वा मातापित्रोर्वधे रता॥
गोघ्नी वा तस्करी वापि स्वजः संकरकारिणी॥ एवमादिमहापापैरावृत्तापि कुलांगना॥ कृत्वा चै
तद्व्रतं सम्यङ्मुच्यते नात्र संशयः॥ व्रतानामुत्तमं चैतत्स्त्रीणामावश्यकं त्विदं॥ एवं वर्त्तिप्रदाने
न विष्णोरमिततेजसः॥ कोट्यो ब्रह्महत्यानामगम्यागमकोट्यः॥ तथैवान्युग्रपापानि को
ट्योथ सहस्रशः॥ नश्यंति नात्र संदेहो नारीणां वा नरस्य वा॥ किं लक्षवर्त्तिभिर्विष्णोः कृते चारार्त्ति
कार्पणे॥ किमत्र बहुनोक्तेन नानेन सदृशं व्रतं॥ पुरुषोपि व्रतं कृत्वा पूर्वोक्तैः पापसंचयैः॥ मुच्यते
नात्र संदेहो मधुशासनशासनात्॥ एतत्सर्वं मयाख्यातं पृच्छतस्तव मानद॥ व्रतं कुरु सुखं तिष्ठ य
थाभिरोचते मनः॥ इति तद्वचनं श्रुत्वा पुनः पप्रच्छ लक्ष्मणा॥ अज्ञानाद्दुष्टभावाद्वा न विश्वासो मम
वहि॥ प्रत्ययार्थं मम ब्रह्मन्प्रत्यक्षं कुरु मेधुना॥ इति तस्या वचः श्रुत्वा याज्ञको वाक्यमब्रवीत्॥
कथं तत्सत्योभ्रत्वाया चतां करुणानिधिः॥ सा प्रोवाच पुनर्विप्र विस्मयोत्फुल्ललोचना॥ नचैवं ३३५

साशंकितास्मृतासादरं मुनिपुंगवं॥ साधु साधु महाभाग चित्रं मे भयविह्वलं॥ लक्षवर्त्तिव्रतस्यास्य विधा
नं कीदृशं वद॥ कस्मिन्मासे तु कर्त्तव्यं कस्य वा तत्समर्पणं॥ उद्यापनं कथं कार्यं किं फलं तस्य वा मुने॥
तया पृष्टो याज्ञकोपि लोकानां हितकाम्यया॥ फलं विधानं तत्सर्वमवदद्दत्तांवरः॥ ॥मुनिरुवाच
लोमशस्य मुनीनां च संवादं कथयामि ते॥ कालो हि कार्त्तिको मासो वैशाखो माघ एव च॥ सहस्रगु
णितं धत्ते व्रतमेतद्धि कार्त्तिके॥ तस्मात्कोटिगुणं धत्ते माघमासे व्रतोत्तमं॥ तस्मादनंतगुणितं फलं
वैशाखमासके॥ एतस्मिन्मासत्रितये यस्मिन्मासे समाप्यते॥ तस्मान्मासद्वयात्पूर्वं प्रारब्धव्यमिदं
व्रतं॥ अंते मासि प्रकुर्वीत समासि च विचक्षणः॥ सहस्रवर्त्तिभिः कुर्यादारार्त्तिं विष्णवे च वै॥ गोघृते
नाथ तैलेन सम्यग्युक्तैर्मनोहरैः॥ यस्मिन्मासे समाप्तिः स्यात्पौर्णिमायां तु कारयेत्॥ उद्यापनं विधाने
न व्रतसंपूर्णकारकं॥ प्रातः स्नात्वा शुचिर्भूत्वा पंचगव्यं तु प्राशयेत्॥ पुण्याहवाचनं कृत्वा आचार्यं वर
येत्ततः॥ त्रयोदशर्त्विजो भद्र साग्निकान्वृणुयात्ततः॥ सतिलैश्च यवैः कुर्याद्दशनयं कृत्वाहि द्विजः॥

धव्यमापन्नारोदितेयाकुमारिका॥अस्याःपतिःकथंजीवेद्वैधव्यंनैवगच्छति॥तथाकुरुमुनिश्रेष्ठदयाश्र
मवर्त्ताधने॥इतितस्यवचःश्रुत्वाविस्मितोवाक्यमब्रवीत्॥अद्यवैमकरंप्राप्तोभास्करोलोकभास्करः॥
माघोयंचवरोमासःसर्वक्रतुफलाधिकः॥तत्रगत्वाकुरुस्नानंगंगायामद्यहारिणि॥स्नानंकृष्णार्
पंकृत्वादेहितस्मैकृतायवै॥तेनजीवेदयंनूनंब्रह्मघ्नोयंसुरापिच॥तस्मादयंराजयक्ष्माश्रयेणतुम्य
तिंगतः॥तथापिमाघमासस्यपुण्यदुर्ज्जीवितोध्रुवं॥दापयित्वातयावर्त्तिकांस्यपात्रंविधान
तः॥जीवयतीभवेद्दासुयावद्धामरणान्तिकं॥लक्ष्मणातद्वचःश्रुत्वाजलंस्पृष्ट्वायवाग्यतः॥स्नानंकृ
ष्णार्पणंकृत्वाददौतस्मैफलंतदा॥तत्पुण्यस्यप्रभावेनतत्क्षणादेवबोधितः॥स्वभुजंगंप्रेषयित्वा
पात्रंचकांस्यकं॥कुमार्यादापयामासवैधव्यास्यापनुत्तये॥एतत्पुण्यप्रभावेनकुमारीसापिशोभ
ना॥तदाभवज्जीवपतीबभूवबहुपुत्रिका॥कुमारीशोभनानामतत्पतिःकर्णभोजकः॥त
द्बांधवास्तदासर्वेतुष्टुवुःस्तांसुलक्षणां॥याजकंचापिसंप्रीत्यंजग्मुस्तेस्वंनिकेतनं॥लक्ष्मणा

पापि च दोषेण भुजंगेन च संयुता ॥ प्रातस्नानं तदा कृत्वा अन्नमेतच्च कारसा ॥ ततस्तु मरणं प्राप्तो दासस्त
स्याः सहाप कृतत्र । गयो नाम महाराजा चक्रवर्त्ति बभूव ह ॥ सा लक्षणा च तत्पत्नी सर्वलक्षणसंयु
ता ॥ बभूव लोकविख्याता जीवभर्त्री सुपुत्रिका ॥ तस्माद्यो माघमासस्य सहायं वा करिष्यति ॥
धर्मस्य तत्फलं प्राप्य मुच्यते नात्र संशयः ॥ नित्यं स्नातुमशक्तश्चेत्कुर्यात्सतु दिनत्रयं ॥ द्वादश्यां
रथसप्तम्यां पौर्णमास्यां तथैव च सोपि पूर्णफलः प्राप्य विष्णुलोके महीयते ॥ तदेव कर्मजफलं
महापातकनाशनं ॥ यो न स्नाति नरो माघे मकरस्थे दिवाकरे ॥ ब्रह्महा स तु विज्ञेयो सर्वकर्म
सुगर्हितः ॥ नारी वापि नरो वापि न स्नाया दरुणोदये ॥ रौरवं नरकं प्राप्य यावदाभूतसंप्लवं ॥ रोगो
युक्त हस्तो यस्तु पादौ प्रक्षाल्य वाग्यतः ॥ धौतवस्त्रं परीधाय त्रिरात्रं ब्रह्मचारिणा ॥ गायत्र्यामंत्रितं
चांभः प्रोक्षयन्मूर्ध्नि सद्विलः ॥ सोपि स्नानफलं प्राप्य मोदते विष्णुमंदिरे ॥ ये चेदं शृण्वंति सततं ये पठं ३३६
ति नरोत्तमाः ॥ ते सर्वपापनिर्मुक्ता यास्यंति पदमव्ययं ॥ ॥ इति वायुपुराणे लक्षवर्त्तिकाकार्थं ॥

अथलक्षरुद्रवर्तिविधिः॥ ॥ तत्रादौरुद्रपूजा॥ ॥ देवदेवजगन्नाथ प्रार्थयेहंजगत्पते॥ त्वदाहंप्री
तिभावेन लिंगेस्मिन्सन्निधौभव॥ अवाहनं॥ कर्तस्वरमयंदिव्यंनानामणिविभूषितं॥ अनेकशक्ति
संयुक्तमासनंप्रतिगृह्यतां॥ आसनं॥ गंगादिसर्वतीर्थेभ्योमयाप्रार्थनयाहृतं॥ तोयमेतत्सुखस्प
र्शंपाद्यार्थंप्रतिगृह्यतां॥ वरेण्यंयज्ञपुरुषंप्रजापालनतत्पर॥ नमोमहात्म्यदेवायगृहाणार्घ्यंन
मोस्तुते॥ अर्घ्यं॥ पाटलीउशीरकर्पूरसुरभिःस्वादु शीतलं॥ तोयमाचमनीयार्थंशिवत्वंप्रति
गृह्यतां॥ आचमनीयं॥ पंचामृतंमयानीतंपयोदधिघृतंमधु॥ कर्पूरशर्करायुक्तंगृहाणत्रिपु
रांतक॥ पंचामृतं॥ मंदाकिन्याःसमानीतंहेमांभोरुहवासितं॥ स्नानायतेमयाभक्त्यानीरंस्वी
क्रियतांशिव॥ स्नानं॥ सर्वभूताधिकेसौम्येलोकलज्जानिवारके॥ मयोपपादितेतुभ्यंवाससी
प्रतिगृह्यतां॥ गंधं॥ रंजिताःकुंकुमेनेव अक्षतास्तुसुशोभनाः॥ त्राहिमांसर्वपापेभ्योगृहाणवृ
षभध्वज॥ अक्षतान्॥ माल्यादीनिसुगंधीनिमालत्यादीनिवैप्रभो॥ कौतूहलंसर्वकंवैकैंचि

त्प्रश्नंकरोम्यहं॥श्रुतानिदेवदेवेशव्रतानिनियमस्तथा॥तीर्थानिचमयादेवयज्ञदानान्यनेकशः॥
नास्तिमेनिश्चयोदेवभ्रामितोहंत्वयापुनः॥कथयस्वमहादेवयद्गोप्यंव्रतमुत्तमं॥ शिवउवाच
शृणुनारदयत्नेनव्रतानामुत्तमंव्रतं॥रुद्रवर्त्यांमहापुण्यंसर्वोपद्रवनाशनं॥सुखसंस्पर्शकंचै
वपुत्रराज्यसमृद्धिदं॥शंकरप्रीतिजनकंशिवलोकप्रदंशिवे॥स्वभर्त्रासहबंधमहास्नेहकरंपरं॥
शृणु२नारदयत्नेनगिरिशायत्रतुष्यति॥दीपानांलक्षकंयस्तुकुर्यात्परमधार्मिकः॥यावत्का
लमुज्वलतिदीपास्तेलिंगसन्निधौ॥ब्राह्मणोयुगसाहस्रंतावत्स्वर्गेमहीपते॥कौस्तुभेनसमायु
क्तादीपादत्ताःशिवालये॥शिवलोकेचकैलासेतिष्ठंतिशिवमूर्तयः॥एवंहिबहवःसंतिदी
पाश्चद्विजसत्तम॥अधुनासंप्रवक्ष्यामियत्पूर्वंकथितंतव॥यत्कृत्वाकृतकृत्याःस्युःदेवासुरनरेश्वराः॥
येवैज्ञात्वाप्रकुर्वंतितेज्ञात्वादुःखभागिनः॥रुद्रवर्तिसमंनास्तित्रिषुलोकेषुसुव्रते॥अतएवस ३३७
दाकार्यंव्रतमेतत्सुप्रभे॥मयाहृतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां॥पुष्पाणि॥ वनस्पत्युद्भवो॥

हिउद्यापनविधिंवद॥ ॥ईश्वरउवाच॥ शृणुनारद महाभागयत्वंश्रोतुमिहार्हसि॥ तदहंतेप्र
वक्ष्यामिविस्तरेणमहामते॥ क्षिप्रायास्तटेरम्ये उज्जनीतिपुरीशुभा॥ तस्यामास्त्यास्सुगंधा
चवारस्त्रीसातिसुंदरा॥ तयाकृतंव्रतंदंडमंदःश्चैवसुदुःसह॥ सुवर्णानांशतंत्रांष्टप्रतिज्ञांक
त्वत्यथ॥ युवानश्चततथाविप्रश्चसेवितास्तुसुगंधया॥ राजानोराजपुत्राश्चनयाकृत्यंपुनःपुन
तेषांरूपाद्गृही॥ तावधिकृतस्ताश्चसुगंधया॥ एवंहिबहवोलोकाल्लुंताश्चसुगंधया॥ कदाचि
त्सागताक्षिप्रांकौतुकाविष्टमानसा॥ ददर्शमनसारम्या ऋषिभिःपरिसेविता॥ केचिध्यानपरा
विप्राः केचिज्जयपरायणाः॥ केचिच्छिवार्चयाविप्रः केचिद्विप्राः प्रभंजने॥ तेषांमध्येवसिष्ठो
हितयादृष्टामहामुने॥ उपादेष्टातुसर्वत्रकुशलानीतिमार्गवित्॥ तस्यादर्शनभवच्छुद्धिर्भावि
पुण्यबलात्तदा॥ धिगताशाजीवनेहिविषयेषुविशेषतः॥ विनम्रकंधरा भूत्वाप्राणिपत्य ३२०
पुनःपुनः॥ स्वकर्मपरिहारायपप्रच्छमुनिपुंगवं॥ ॥सुगंधोवाच॥ अनाथनाथविप्रेंद्रसर्ववे

दविशारद॥ प्रसीदयाहिमांदेवशरणागतवत्सल॥ मयाकृतानिविप्रेंद्रपापानिसुबहूनिच॥
तस्यपापस्यनाशायकारणंब्रूहिमेप्रभो॥ ॥ईश्वरउवाच॥ एवमुक्तस्तयाविप्रोवसिष्ठोमु
निराट्तदा॥ तथाज्ञात्वाथतत्सर्वंतस्याःकर्मपुरातनं॥ ततश्चाब्रवीत्समुनिर्वचनःस्तांसत्यसं
गरः॥ ॥वसिष्ठउवाच॥ शृणुसुश्रोणिसुभगेत्वपापस्यसंक्षयः॥ येनजातेनपुण्येनसर्वंतत्क्ष
यामिते॥ कुरुस्वतीर्थगमनंत्रिषुलोकेषुविश्रुतं॥ प्रयागमितिचाख्यातंसर्वदेवाभिरक्षितं॥ स्ना
त्वातत्रकुरुष्वत्वंव्रतंत्रैलोक्यदुर्लभं॥ रुद्रवर्त्यामहापुण्यंशिवप्रीतिकरंपरं॥ कर्तव्यमितिशेष
कार्यासतीत्तुभिःकार्यारुद्रवर्तिःशिवप्रिया॥ लक्षसंख्याचकर्तव्यागव्याज्येनपरिप्लुता॥ देया
शिवालयेनित्यंभक्तियुक्तेनचेतसा॥ कृत्वाव्रतमिदंभद्रेप्राप्स्यसित्वंपरांगतिं॥ ॥ईश्वरउवाच॥
ततःसाकेशमादायभृत्यंचैववसुमित्रकं॥ आगच्छत्तीर्थराजेवेदत्वादानानिभूरिशः॥ व्रतंकृत्वाययौ
काशींसुमित्रेणसमन्विता॥ कृत्वासर्वाणितीर्थानिविश्वेशंप्रणिपत्यच॥ उपोषित्वारात्रिमेको

जागरन्तथा कृते ॥ स्नात्वा चोत्तरवाहिन्यां दत्वा दानानि भूरिशः ॥ ततश्चैवं कृतं तत्र वसिष्ठेनोदितं तु
यत् ॥ यथोक्तविधिना सर्वं तथा चानुष्ठितं व्रतं ॥ ततः सा सरीरेण तस्मिन् लिंगे लयं गता ॥ एव
या कुरुते नारी व्रतमेतत्सुदुर्लभं ॥ यं यं चिंतयते कामं व्रतस्यास्य प्रभावतः ॥ पुत्रपौत्रधनैश्चैव जा
यते नात्र संशयः ॥ प्रसंगेनापि वक्ष्यामि माणिक्यवर्तिसंज्ञिकं ॥ व्रतमित्तिशेषः ॥ तस्या दानेन वि
प्रेंद्र मद्ईशिन भागिनी ॥ जायते सा प्रियासा हि यावदाभूतसंप्लवं ॥ अथ उद्यापनं वक्ष्ये व्रत
संपूर्णहेतवे ॥ प्रारंभः कार्तिके माघे वैशाखे कार्तिके तथा ॥ तिथिनाद्यापनं कार्यं यथोक्तविधि
ना ततः ॥ कलशं ताम्रमयं चैव वस्त्रयुग्मेन वेष्टयेत् ॥ तस्योपरि न्यसेद्देवं उमया सहितं शिवं ॥ सु
वर्णनिर्मितं देवं वृषवृषभेण समन्वितं ॥ पूर्वोक्तेन विधानेन पूजां कृत्वा विधानतः ॥ रात्रौ जागरणं
कार्यं कथाश्रवणपूर्वकं ॥ ततः प्रभाते विमले स्नात्वा नद्यां विधानतः ॥ आचार्यं वरयेद्भक्त्या हि
जैरेकादशैः सह ॥ होमश्चैव तदा कार्यो घृतपायसबिल्वकैः ॥ रुद्रसूक्तं पठन् विप्रः मूलमंत्रेण ३३१

दिव्यो गंधाढ्यः सुमनोहरः ॥ आघ्रेयः सर्वदेवानां धूपोयं प्रतिगृह्यतां ॥ धूपं ॥ आज्यं च वर्तिसंयुक्तं
वह्निना योजितं मया ॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापह ॥ दीपं ॥ अन्नं चतुर्विधं स्वादु रसैः ष
ड्भिः समन्वितं ॥ भक्ष्यभोज्यसमायुक्तं नैवेद्यं प्रतिगृह्यतां ॥ नैवेद्यं ॥ कर्पूरवासितं तोयं मंदाकिन्याः स
माहृतं ॥ आचमनं जगन्नाथ मया दत्तं हि भक्तितः ॥ आचमनीयं ॥ पूगीफलं महद्दिव्यं नागवल्ली
दलैर्युतं ॥ कर्पूरैलालवंगादि तांबूलं प्रतिगृह्यतां ॥ तांबूलं ॥ हिरण्यगर्भ गर्भस्थमिति दक्षिणा ॥ मं
दारचंपकजुषाशतपत्रजातीकल्हारकिंशुकसरोरुहबंधुकानि ॥ धत्तूरकुंदकरशिरीषकुरंटवृषा
णबिल्वादि देव मम भक्तियुता गृहाण ॥ मंत्रपुष्पं ॥ नमस्ते देवदेवेश नमस्ते धरणीधर ॥ नमस्ते
विश्वरूपाय नमस्ते पुरुषोत्तम ॥ नमस्कारः ॥ मंत्रहीनं क्रियाहीनं ॥ इति प्रार्थना ॥ ॥ अथ क
था ॥ नारद उवाच ॥ देवदेव जगन्नाथ जगदानंदकारक ॥ दुर्लभं ॥ मया ख्यातं व्रतमिदं किम
न्यच्छ्रोतुमर्हसि ॥ ॥ नारद उवाच ॥ ॥ केन चीर्णं व्रतमिदं कथयस्व प्रसादतः ॥ पूजाविधिं च मे ब्रू

वापुनः॥ ततःशूर्पाद्भुतिंकृत्वाब्राह्मणैस्वस्तिवाचनं॥ आचार्यंपूजयेद्भक्त्या वस्त्रालंकारभूषणैः॥
तस्मै देवायवत्साय गौरकाद्विजसत्तम॥ ऋत्विजस्तोषयेत्सम्यग्वाहस्त्रालंकारभूषणैः॥ तत्रैव भो
जनायाश्वासपत्नीकाःप्रत्यलततः॥ एवंविधिंयाकुरुते सर्वपापैःप्रमुच्यते॥ कथांश्रुत्वाविधाने
नस्थाप्यसर्वंनिवेदयेत्॥ अश्वमेधसहस्रस्य वाजपेयशतस्य च॥ कथाश्रवणमात्रेणफलंतल्लु
भतेनरः॥ ॥इतिभविष्योत्तरपुराणेरुद्रलक्षवर्त्तिकथोद्यापनंसमाप्तं॥ ॥अथअगस्त्यस्यार्घ्यं
हेमाद्रौमदनरत्नेचपाद्ममात्स्ययोः कथमर्घ्यप्रदानादिकर्त्तव्यंतस्यवैमुने॥ विधानंयदग
स्त्यस्यपूजनंतद्वदस्वमे॥ ॥पुलस्त्यउवाच॥ प्रत्यूषसमये विद्वान्कुर्याद्दस्योदने निशि॥ स्ना
नंशुक्लतिलैःस्तद्वच्छुक्लमाल्यांबरोगृही॥ निरुदये दिनमुखेस्नानंकुर्यादितिहेमाद्रिः॥ स्थ
पयेदव्रणंकुंभंमाल्यवस्त्रविभूषितं॥ पंचरत्नसमायुक्तंघृतपात्रेणसंयुतं॥ नानाभक्ष्यफलै
र्युक्तंताम्रपात्रसमन्वितं॥ अंगुष्ठमात्रपुरुषंतत्थैवसौवर्णमत्यायतबाहुदंडं॥ चतुर्मु

जंकुंभमुखेनिधायधान्यानिसप्तांकुरसंयुतानि॥ सकाशपुष्पाक्षतशक्तियुक्तं मंत्रेणदद्यार्घ्यद्विजपुंग
वाय॥ उत्क्षिप्तलंबोदर दीर्घबाहो अनन्यजेतायमहिषुरवस्तुः॥ श्वेतांच दद्याद्यदिशक्तिरस्तिरौप्यैः
खुरैर्हेममुखींसवत्सां॥ हेममुखीहेमशृंगी॥ धेनुबकक्षीरवतीप्रणम्यसवस्त्रघंटाभरणांद्विजाय
आसप्तरात्रादुदयायमस्यदातव्यमेतत्तत्फलंनरेणायममस्य॥ अगस्त्यस्यउदयात्पूर्वंमासप्तरात्रि
मवधीकृत्यैकस्मिन्दिनेऽर्घोदातव्यइत्यर्थः॥ यावत्समासप्तदशाथवाथवास्तुरप्यार्घमप्यत्रव
दंतिकेचित्॥ प्रत्यहंचफलत्यागमेवंकुर्वन्न्वमुच्यति॥ होमंकुर्यात्ततःपश्चाद्दूर्जयेन्मानवःफलं॥
होमश्चवक्ष्यमाणार्घमंत्रेणाज्येन॥ अनेनविधिनायस्तुपुमानर्घंनिवेदयेत्॥ चक्रवर्तित्वमाप्नोति
रूपारोग्यसमन्वितः॥ सैतवलोकानाप्नोतिसप्तधान्यःप्रयच्छति॥ यावदायुश्चयःकुर्यात्सपरंब्रह्म ३४०
गच्छति॥ प्रकारांतरंभविष्ये॥ कन्यायामागतेसूर्ये अर्वाग्दिवससप्तमेदिने॥ कांचनंकारयित्वातुयथाश
क्त्यासुशोभनं॥ पुरुषाकृतिंसुशांतंचजटामंडलधारिणं॥ कमंडलुकरंशिष्यैःस्वर्गैश्चपरिवारितं॥

मृत्युनंविषहंतारंदक्षाक्षितधरंमुनिं॥ तस्मिन्कुंभेसमालग्नंवंदनेनततोन्यसेत्॥ स्नापितंतंचानुलिप्तं
चचंदनेनसुगंधिना॥ पूजितंजातिकुसुमैर्दद्याद्धूपैःसुधूपितं॥ ततश्चार्घप्रदातव्यंयेद्रव्यैस्तानुभृ
णुष्वमे॥ खर्जूरैर्नालिकेरैश्च कूष्मांडैस्त्रपुसैरपि॥ कर्कटिकारवेल्लैश्चकमरैर्जिप्रपूरकैः॥ रंताकैर्दा
डिमैश्चैवनारिंगकदलीफलैः॥ दूर्वांकुरैःकुशैःपद्मैर्नवैलोसल दलैस्तथा॥ नानाप्रकारैर्भक्षैश्च
गोभिर्वस्त्रैरसैःशुभैः॥ विरूढसप्तधान्यैश्चवंशपात्रेनिधापितैः॥ सोवर्णरोप्यपात्रेणताम्रवंशमयेन
च॥ मूर्ध्निस्थितेननम्रेपाजानुभ्यामवनीगतः॥ दक्षिणाभिमुखोभूत्वाध्यायेगस्त्यंक्षणंनृप॥ दद्या
दर्घ्यंप्रयत्नेनचतस्त्रंकुरुनंदन॥ श्लुलयाकारमर्घपात्रंसकाशपुष्पाक्षतं॥ काशपुष्पप्रतीकाशंवह्नि
मारुतसंभव॥ मित्रावरुणयोःपुत्रकुंभयोनेनमोस्तुते॥ विंध्यवृद्धिक्षयकरमेघतोयविषापह॥ रत्नव
ल्लभदेवेशलंकावासिनमोस्तुते॥ वातापिर्भक्षितोयेनसमुद्रःशोषितःपुरा॥ लोपामुद्रापतिःश्री
मान्योसौतस्मैनमोनमः॥ येनोदितानिपापानिविलयंयांतिव्याधयः॥ तस्मैनमोस्त्वगस्त्यायसानि

ष्यायसपुत्रिणे॥ ब्राह्मणोवेदमंत्रेण दद्यादर्घ्यन्नृपोत्तम॥ अगस्त्यःखनमानःखनित्रैःप्रजामपत्यंबलमि
छमानः॥ उभौवर्णावृषिरुग्रःपुपोषसत्यादेवेष्वाशिषोजगाम॥ देवेवमर्घ्यंकौम्भ्यप्रणिपत्यविसर्जयेत्॥ अ
र्चितस्त्वंयथाशक्त्यानमोगस्त्यमहर्षये॥ ऐहिकामुष्मिकींदत्वाकार्यसिद्धिंव्रजस्वमे॥ विसर्जनमंत्रः
विसर्जयित्वागस्त्यंतंविप्रायप्रतिपादयेत्॥ दैवज्ञव्यासरूपायवेदवेदांगवेदिने॥ अगस्त्योमेनम
स्यास्तु अगस्त्योस्मिन्धनेस्थितः॥ अगस्त्योद्विजरूपेणप्रतिगृह्णातुसत्कृतः॥ अगस्त्यसप्तजन्मोत्थं
नाशयित्वास्त्वयोवरः॥ अमलंविमलंसौख्यंप्रयच्छत्वंमहामुने॥ प्रतिग्रहमंत्रः॥ एवंयःकुरुतेभक्त्याऽगस्त्य
व्रतमादरात्॥ फलमेकंतथाधान्यरसमेकंपरित्यजेत्॥ संपूर्णेचततथावर्षेपुनरन्यमुपक्रमेत्॥ त
था॥ दत्वार्घ्यंसप्तवर्षाणिक्रमेणानेनपांडव॥ पुमान्फलमवाप्नोतितमेकाग्रमनाःशृणु॥ ब्राह्मणस्याश्च
तुर्वेदःसर्वशास्त्रविशारदः॥ क्षत्रियःपृथिवींसर्वांप्राप्नोत्यर्णवमेखलां॥ वैश्यानांधान्यनिष्पत्तिर्गो
धनंचापिविंदति॥ शूद्राणांधनमारोग्यंसत्यंनबाधिकंभवेत्॥ स्त्रीणांपुत्रःप्रजायंतेसौभाग्यंग ३५१

द्विजायते॥ अगस्त्यः स्वनमानेतिपठन्मंत्रमिमंमुने॥ यथालाभंकृतार्थेनसर्वेषान्नखशक्तितः॥ अर्घ्यं
दद्यादगस्त्यायश्रद्धमंत्रविधिःस्त्वयं॥ काशपुष्पप्रतीकाशवन्हिमारुतसंभव॥ मित्रावरुणयोःपुत्र
कुंभयोनेनमोस्तुते॥ तथा॥ दत्वार्घ्यंतुविधानेन नमःकुंभोद्भवायच॥ त्यजेदगस्त्यमुद्दिश्यधान्यमे
कंफलंरसमिति॥ तथाद्विजोलाभमुपाहृतार्यःप्राप्नोतिवेदान्नृपदांश्चपुत्रान्॥ क्षत्रंमहीश्वरिधनं
चवैश्यःशूद्रंसुखंधर्मफलंचसर्वं॥ अगस्त्यमर्घ्यंतस्त्वयेपूजयिष्यंतिमानवाः॥ तेषांसंवत्सरंपुण्य
मन्नियोगाद्भविष्यति॥ पुराणसमुच्चये॥ अप्राप्तेभास्करेकंन्यांशेषसप्तदिनेषुच॥ अर्घ्यंदद्याद
गस्त्याययावत्कन्यांरविर्व्रजेत्॥ प्रार्थनामंत्रः॥ येनोदितेनपापानियांतिस्वर्याधियोलयं॥ त
स्मैनमोस्त्वगस्त्यायसशिष्यायसपुत्रिणइति॥ ॥इतिव्रतार्केऽगस्त्यार्घविधिः॥ ॥अथाद्भु
तसारोक्तोऽश्वत्थप्रदक्षिणोद्यापनविधिः॥ मासपक्षाद्युल्लिख्यामुककामोविष्णुस्वरूपमश्वत्थत ३४२
रुममुकसंख्ययाप्रदक्षिणाभिःसेवयिष्येइतिसंकल्प्यततोश्वत्थतरुषोडशोपचारैःसंपूज्यल

क्षसंख्याप्रदक्षिणाकुर्यात्॥ भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद॥ स्त्रीणांपुत्रविहीनानांनराणां
सुखसंपदां॥ उपायंचैवमेब्रूहिसुखसिद्धिःकथंभवेत्॥ ॥अथर्वणउवाच॥ पुराब्रह्मादयोदेवाःसर्वे
विष्णुसमाश्रिताः॥ अष्टछंद्वेदवेशाराक्षसैपीडितास्त्वयं॥ कथरक्षोपशमनमस्कामंब्रूहिमेप्रभो॥
श्रीविष्णुरुवाच॥ ॥अहमश्वत्थरूपेणसंभवामिचभूतले॥ तस्मात्सर्वप्रयत्नेनकुरुध्वंतरुसेवनं॥
तेनसर्वाणिभद्राणिभविष्यंतिनसंशयः॥ विष्णुर्यदुक्तवांस्तेभ्यस्तद्व्रतंतेवदाम्यहं॥ नदानैर्नतपो
भिश्चनाध्वरैर्भूरिदक्षिणैः॥ अश्वत्थसेवनादन्यत्कलौनास्तिपराक्रिया॥ तद्विधानंनिमित्तानि
संख्याक्लृप्तिंचपूजनं॥ हवनंतर्पणंविप्रभोजनंनियमंतथा॥ व्रताधिकारिणस्तत्रविधानंचविशेषतः
एतत्सर्वंपिप्पलाद्यैन्वक्ष्यामितवसुव्रत॥ दारुणेविविधोत्पातेदिव्यभौमांतरिक्षजे॥ परचक्रभये
देशविप्लवेदेशविग्रहे॥ स्वप्नेदुर्निमित्तेचसंग्रामेद्भुतदर्शने॥ मारीभयेराजभयेतथाचोराग्निजे
भये॥ क्षयापस्मारकुष्ठादिप्रमेहेविविधेज्वरे॥ उदरेमूत्रकृच्छ्रेचग्रहभयस्ततथैवच॥ अशक्तेष्वनु

रोगेषु व्रणरोगे तथैव च ॥ एतेषां रोगनाशाय कुर्यादश्वत्थसेवनं ॥ प्रातरुत्थाय नद्यादौ स्नात्वा सम्यक्कृ
तक्रियः ॥ अश्वत्थदेशमाश्रित्य गोमयेनोपलेपयेत् ॥ तमश्वत्थमलंकृत्य शुद्धायां गैरिकेन च ॥ हृज्ञा
द्रव्याणि संपाद्य पुण्याहं वाचयेत्ततः ॥ ऋत्विजां वरणं कृत्वा ततः पूजां समारभेत् ॥ आराधयेदादौ विष्णुं ध्या
नावाहनपूर्वकं ॥ तथैव पिप्पलतरुं नारायणमयं द्विज ॥ श्वेतगंधाक्षतैः पुष्पैर्धूपदीपनिवेदनैः ॥ अर्च
र्चयेत्पुरुषसूक्तेन तथैव ध्यानपूर्वकं ॥ श्वेतवर्णां सलक्ष्मीकं चिंतयेत्पुरुषोत्तमं ॥ इति ध्यात्वावाहना
द्यैरुपचारैश्च षोडशैः ॥ ततः प्रदक्षिणं कुर्यात्तत्सर्वं सफलं भवेत् ॥ लक्षमेकं द्विलक्षं वाथ चतुः
पंचलक्षकं ॥ कार्यस्य गौरवं ज्ञेयं द्वादशांतं समाचरेत् ॥ ब्रह्मचारी हविष्याशी ह्यधःशायी जितेंद्रि
यः ॥ मौनी ध्यानपरो भूत्वा पिप्पलस्य स्तुतिं पठेत् ॥ विष्णोर्नामसहस्रं च पौरुषं वैष्णवं तथा ॥ वि
ष्णुत्रयस्य पुण्यानि सूक्तानि च पठेत्पुनः ॥ ततो लक्षदशांशेन सघृतं पायसं चरुं ॥ जुहुयात्प्रत्यहं च
वह्नौ स्वगृह्योक्तविधानतः ॥ तत्संख्ययात्तर्पणं च कुर्यादिति तेन वारिणा ॥ तर्पणस्य दशांशेन मिष्टान्नं उ ४२

हस्र द्विमत् ॥ विधवानां महत्पुण्यं वर्द्धते पांडुनंदन ॥ कन्या भर्त्तारमाप्नोति व्याधेर्मुच्येत दुर्दिनः ॥ येषु देशे
षु गस्त्यर्षे पूजेयं क्रियते जनैः ॥ तेषु देशेषु पर्जन्यः कामवर्षी प्रजायते ॥ ईतयः प्रशमं यांति नश्यंति व्या
धयस्तथा ॥ पठंति ये स्तवं गस्त्यं ये व्रतं शृण्वंति वा परे ॥ ते सर्वपापनिर्मुक्ताश्चिरं स्थित्वा महीतले ॥ गृह
सयुक्त । विमानेन स्वर्गं याति नरोत्तमाः ॥ मर्त्ये यदिच्छसि गृहं परमर्द्धियुक्तं भोगान्शरीरमरुजं प
शुपुत्रपुष्टिं ॥ तद्दत्तु वल्लभ मुनेरुदये महार्घ्यमर्घ्यं प्रयच्छ फलवस्त्ररसैः सधान्यैः ॥ विष्णुरहस्येपि ॥
काशपुष्पमयीं रम्यां कृत्वा मूर्तिं तु वारुणेः ॥ प्रदोषे विन्यसेत्तां तु पूर्णकुंभे स्वलंकृते ॥ कुंभस्थं पूज
येत्तत्तु पुष्पधूपविलेपनैः ॥ दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरं ॥ प्रभाते तं समादाय पायात्पु
ण्यं जलाशयं ॥ निशावसाने तां पश्यन् जलांते प्रति मां मुनेः ॥ अर्घ्यं दद्याद्गस्त्याय भक्त्या सम्यगुपो
षितः ॥ पुष्पैर्मूलैः फलैर्गंधैर्धूपैरत्यसुगंधिभिः ॥ द्राक्षाखर्जूरकर्कटुनालिकेरादिभिः शुभैः ॥ पंचरत्न
समायुक्तं हेमरूप्यसमन्वितं ॥ सप्तधान्यभृतं पात्रं वदनेन समायुतं ॥ ततस्तां ताम्रमयं कृत्वा दद्यादर्घ्यं

भोजयेद्द्विजान् ॥ ब्राह्मणानांस्वयंकुर्याद्यथोक्तनियमंतथा ॥ असमर्थश्चयत्कर्तुंसर्वमन्येनकारयेत् ॥
उक्तप्रमाणादधिकंफलंदशगुणंभवेत् ॥ ततश्चतुर्गुणंपीठंरकृत्वातुरजस्वकं ॥ द्रोणमर्द्धंतदर्द्धंवा
तिलोपरिविनिक्षिपेत् ॥ श्वेतवस्त्रेणसंछाद्यपूर्ववत्पूजयेत्तरं ॥ दरिद्रायसुशीलायश्रोत्रियाय
कुटुंबिने ॥ उदङ्मुखाय विप्रायस्वयंपूर्वमुखस्थितः ॥ सुवर्णंवृक्षराजंचमंत्रेणप्रतिपादयेत् ॥ इह
जन्मनिवान्यस्मिन्बाल्ययौवनवार्द्धके ॥ मनोवाक्कायजंदोषंत्वय्ययमेवविधेस्मृतः ॥ आचार्यंयो
माधिकारोसर्वंविप्रेणकारयेत् ॥ कृत्यंकृतंव्रतंस्यात्तेव्रतस्यपरिपूर्तये ॥ हेमाश्वत्थतरुंदद्यात्
कांगांचपयस्विनीं ॥ स्वर्णशृंगींरौप्यखुरींवस्त्रादिभिरलंकृतां ॥ पलमेकंतदर्द्धंवातदर्द्धार्द्धेनवापु
नः ॥ हेमाश्वत्थतरुंकुर्यात्स्कंधशाखासमन्वितः ॥ उत्तमःप्रथमःकल्पोद्वितीयोमध्यमःस्मृतः ॥
तृतीयंस्त्वधमंप्रोक्तोदरिद्रणांनचान्यथा ॥ पिप्पलोवृक्षराजेंद्रोह्यग्निगर्भस्त्वमेवहि ॥ प्र
भुर्वनस्पतीनांचपूर्वजन्मनियत्कृतं ॥ अघौघंनाशयेक्षिप्रंत्तवरूपप्रदानतः ॥ दानमंत्रः ॥ अ

मुंतरूंगृहाण त्वं विष्णुरूपद्विजोत्तम॥ रवीकृत्यदुष्कृतं घोरं क्षिप्रं शांतिंप्रयछमे॥ विप्रप्रार्थनामं
त्रः॥ एवंव्रतंयःकुरुते तस्यपुण्यफलंश्रृणु॥ पुत्रार्थील्लभते पुत्रंधनार्थील्लभतेधनं॥ राज्यार्थील्ल
भते राज्यंबद्धोमुच्येतबंधनात्॥ क्षयापस्मारकुष्टादिसर्वरोगैःप्रमुच्यते॥ मनसाशत्रुपीडांचनवरा
जारयंतथा॥ इहजन्मनिवान्यास्मिन्कृतैःपापैःप्रमुच्यते॥ यंयंचिंतयते कामंतंतंप्राप्नोतियसंश
यं॥ इहैवभोगानाप्नोतिविष्णोसायुज्यमाप्नुयात्॥ ॥ इतिव्रतार्कसोद्यापनं अश्वत्थव्रतं॥
अथलिंगोद्यापनं॥ लिंगेरुद्रयामले॥ अथातःसंप्रवक्ष्यामिप्रतिष्टांलैंगिकस्यच॥ प्रतिष्टामु
द्यापनपरं॥ येनयस्यविधानेनव्रतंसंपूर्णतामियात्॥ सहस्रंवाथलक्षंवापूजयित्वायथाविधि
कोटिंवाथायुतेनैनकामनावाप्रपूर्यते॥ समाप्तेतुव्रतेराजन्विनिर्माथमहेश्वरं॥ स्थापयित्वातु
कलशेसंपूज्यावर्दिभिःक्रमात्॥ गंधैर्माल्यैस्तथादीपैःनैवेद्यैर्विविधैस्तथा॥ हिरण्यगाराव
सोसिशिवायविनिवेदयेत्॥ दंडवत्प्रणतोभूत्वास्तुत्वानैवविशेषतः॥ एकाग्रमनसोभूत्वा ततोमं

दशकद्वाभ्यामधिका विंशतिः परा॥ चत्वारिंशच्चतुर्भिश्च ब्राह्मणान्भोजयेत्ततः॥ आचार्यं प्रथमं
पूज्य ब्राह्मणेष्वच ततः परं॥ गणेशं च दिगीशांश्च पूजयेच्च विधानतः॥ वस्त्रैश्च दक्षिणाभिश्च पूजयेच्छिव
तत्परान्॥ मृत्युंजयेन मंत्रेण अग्नौ हुत्वाथ पायसं॥ अग्नौ हुत्वा शक्तित इत्यपि क्वचित्पाठः॥ तद्दा
तु घृतमेव द्रव्यं। रुद्रेणाप्यथवा हुत्वा नमो मंत्रेण वा पुनः॥ नमो मंत्रो नमो भवायेति शंभवाय च
यद्वा रुद्रेणा तत्प्रतिमंत्रेण यद्वा मृत्युंजयमंत्रो नमो मंत्रो वा तद्दशांशतलिंगस्त द्दशांशेन तर्पणं तद्द
शांशेन मार्जनं॥ लिंगं संपूज्य च युक्तमाचार्याय निवेदयेत्॥ शिव शक्त्यात्मा न यस्या जगद्देतच्चरा
चरं॥ स्यादेतेन च मे सर्वं करोतु भगवान् शिवः॥ कैलासवासी गौरीशो भगवान्भगनेत्रजित्॥ चरा
चरात्मको लिंगरूपी दिशतु वांछितं॥ ततश्च दक्षिणा कार्या नमस्कुर्यात्पुनः पुनः॥ सोद्यापनं व्रतं कृ
त्वा प्राप्नुयात्परमं पदं॥ शिवलोके समासाद्य तत्रैव वसते ध्रुवं॥ ॥इति व्रतार्के पार्थिवलिंगोद्यापनं॥
अथ तुलसीविवाहविधिः॥ ॥विष्णुयामले॥ अदावेवाथ तुलसी वने वा स्वगृहेपि वा॥ मासत्रयेण ३४५

संबध्यात्तत्रो यजनमारभेत्॥ सौम्यायने प्रकर्त्तव्यं गुरुशुक्रोदये तथा॥ अथवा कार्त्तिकमासि भीष्म
पंचदिनेषु वा॥ वैवाहिकेषु नक्षत्रेषु पौर्णमायां विशेषतः॥ मंडपं कारयेत्तत्र कुंडवेदीविवाहवत्॥ ब्राह्म
णांश्च शुचिस्नातान्वेदवेदांगपारगान्॥ ब्राह्मणं दैशिकं चैव चतुरश्च तथर्त्विजः॥ ग्रहयज्ञं पुरस्कृ
त्वा मातृपूजां यजनस्य च॥ कृत्वा नांदीमुखश्राद्धं सौवर्णं स्थापयेद्धरिं॥ कृत्वा चरान्यतुलसीलग्ने स्व
स्तमितेरवौ॥ ज्योतिःशास्त्रप्रसिद्धगोलिकलग्ने इत्यर्थः॥ संपूज्यालंकृतानां च प्रदद्याद्विधिना ह
रेः॥ षष्ठीचतुर्थवासःसूक्तेन मंत्रेण वस्त्रयुग्मेन वेष्टयेत्॥ यदाबध्नाति मंत्रेण कंकणं पाणिपल्लवे॥
को अदादिति मंत्रेण कन्यादानं विधीयते॥ कर्तव्यश्च ततो होमो विशेषाद्विधिपूर्वकं॥ आचार्यं वि
द्विकां कुंडं कुर्याच्च न वा कृती॥ ॐ नमो भगवते वासुदेवाय स्वाहा॥ ॐ नारायणाय स्वाहा॥
माधवाय स्वाहा॥ गोविंदाय स्वाहा॥ विष्णवे॰ मधुसूदनाय॰ वामनाय॰ श्रीधराय॰ हृषीकेशा
य॰ पद्मनाभाय॰ दामोदराय॰ उपेंद्राय॰ वासुदेवाय॰ अनिरुद्धाय॰ अच्युताय॰ अनंताय॰ गदि

नेस्वाहा॥ वक्षिपो॰ विष्वक्सेनाय॰ वैकुंठाय॰ जनार्दनाय॰ मुकुंदाय॰ अधोक्षजाय॰॥ यजमा
नः सपत्नीकः॥ महामात्यैश्च गोत्रिजैः प्रदक्षिणा॥ धत्रवीतचत्तस्रो विष्णुना सह॥ स विष्णुस्तुलस्या इ
त्यर्थः॥ पठेयुः शांतिकाध्यायांस्तथा वैष्णवसंहितां॥ गायंति मंगलं नार्यो भेरीतूर्यादिनिःस्व
नैः॥ गोपदं च तथा शक्त्या माचार्याय प्रदापयेत्॥ ऋत्विग्भ्यो दापयेद्वस्त्रं एवमन्येषां चैव दक्षिणा॥
ब्राह्मणान्भोजयेत्पश्चात् सर्पिःक्षीरैः सशर्करैः॥ एवं प्रतिष्ठितां देवीं विष्णुनाच समर्पयेत्॥ अज
न्मोपार्जितं पापं दर्शनेनेन प्रणश्यति॥ ॥ ॥ इति व्रतार्के तुलस्या विवाहः॥ ॥ इति श्री मन्मी
मांसकयोरावारणरीणधुरीण भट्टशंकरसूरिसूनुभट्टनीलकंठात्मज शंकरकृतौ व्रतार्कस्य समा
प्तिमगमत्॥ ॥ व्रतार्के वितथं यंथे सुग्रहार्थे विपश्चितः॥ तन्मयं च वितानर्थान् शायामि यथा
क्रमं॥ व्रतस्य लक्षणं चादौ कालं दर्शौ ततः परं॥ व्रताधिकारिणः पश्चाद्व्रतं धर्म॥ उपवासस्य धर्माश्च २४६
हविष्याणि व्रतं तथा॥ पंचरत्नस्वरूपं च पल्लवानां ततः परं॥ पंचगव्यस्वरूपं च मंत्राः स्तस्य यथाक्रमं॥

त्रमुदीरयेत्॥ अंगहीनं विहीनं च क्रियाहीनं महेश्वर॥ पूजितोसि मया देव तत्क्षमस्व मया क्षमे॥ यद्द
यपहतैः पुष्पैः प्रशस्तैर्भवि दूषितैः॥ केशकीटादिभिर्विद्धैः पूजितोसि मया प्रभो॥ मंत्रेणाक्षरहीनेन पु
ष्पेण विकलेन च॥ पूजितोसि महादेव तत्सर्वं क्षम्यतां मम॥ व्रतं संपूर्णतां यातु फलं चाक्षय्यमस्तु
मे॥ ब्राह्मणान् भोजयित्वाथ दद्यात्तेभ्यश्च दक्षिणां॥ यथाशक्त्या धेनुवस्त्रं हिरण्यं व्रतदक्षिणा॥ अ
थान्यप्रकारं भविष्ये॥ नारद उवाच॥ कथमुद्यापनं चास्य किंप्रकारं महाफलं॥ कथयाशु महा
देव लोकानामुपकारकं॥ ॥ ईश्वर उवाच॥ यैः शिवं समुपास्यैव लिंगे प्रासा मनोरथाः॥ तत्प्रमाण
तु सौवर्णं यथाशक्त्याथवा मुने॥ रौप्यं ताम्रमथापि स्यादष्टम्यां च यथाक्रमं॥ चतुर्दश्यामभ
द्रायां सोमवारेथ योजयेत्॥ मंडले लिंगतो भद्रे कलशं तत्र विन्यसेत्॥ उपोष्य प्रथमं वन्हिसंपू
ज्य च महेश्वरं॥ गीतवादित्रनिर्घोषैर्जागरं तत्र कारयेत्॥ स्तोत्रैश्च विविधैः सूक्तैः पूजयेत्परमे
श्वरं॥ चतुर्दशी दर्शयुक्ता अष्टमी नवमीयुता॥ पुरा पोत्र कर्तव्या रोद्रयुक्ते पुनर्वसौ॥ पंचकं

यायामथोच्यते॥ सौभाग्यशयनं चादौ गौर्यादोलोत्सवस्ततः॥ अरुंधतीव्रतं पश्चाद्दक्षिया
ख्यं तृतीयकं॥ स्वर्णगौरीव्रतं पश्चाद्धरितालव्रतं ततः॥ हस्तगौरीव्रतं चाथ कोटीश्वरव्रतं
तथा॥ बृहद्गौरीव्रतं पश्चात्ततः सौभाग्यसुंदरी॥ चतुर्थ्यां कथ्यंते गणेशस्य व्रतानि तु॥
संकटाख्यचतुर्थ्याश्च दूर्वागणपतेस्ततः॥ कपर्दीशव्रतं पश्चाद्गौरीव्रतमनंतरं॥ पंचम्याम
थ कथ्यंते व्रतानि च यथाक्रमं॥ व्रतं च ऋषिपंचम्या उद्यापनसमन्वितं॥ व्रतं च नागपंचम्या ना
गदष्टव्रतं तथा॥ उपांगललितायाश्च व्रतं सम्यक्प्रकीर्तितं॥ षष्ठ्यां व्रतान्यथोच्यंते आम
तुल्ललितायाव्रतं॥ कपिलाव्रतमन्यत्तु स्कंदषष्ठीव्रतं ततः॥ सप्तम्यामथ कथ्यंते व्रतं गंगाख्य
मादिमं॥ शीतलाख्यव्रतं पश्चान्मुक्ताभरणव्रतं॥ व्रतं वैश्यसप्तम्यास्तस्यां स्नानविधिस्तथा॥
अचलाख्यं व्रतं तस्यामथाष्टम्यां व्रतानि वै॥ कथ्यंते प्रथमं तत्र बुधयुक्ताष्टमीव्रतं॥ दशाफल
व्रतं पश्चात्ततो जन्माष्टमीव्रतं॥ ज्येष्ठाव्रतं ततः प्रोक्तं ततो दूर्वाष्टमीव्रतं॥ महालक्ष्मीव्रतं प्रोक्त ३४७

पंचामृतस्वरूपंचषड्रसानांतथैवतु ॥ समंसर्वगंधयक्षकर्दमकौत्तथा ॥ पंचवर्णास्ततःप्रोक्ताकौतुका
ख्यमतःपरं ॥ मृदःसप्तमिताप्रोक्ताधातवस्तत्समाःस्मृताः ॥ सप्तधान्यंततःप्रोक्तंतथाष्टादशसंख्यकं ॥
कुंभस्यलक्षणंपश्चात्प्रतिमाद्रव्यतन्मितिः ॥ अतांदेवोचसंख्यायाअष्टोत्तरशतादिका ॥ होमद्रव्य
प्रतिनिधिर्मंत्रदेवतयोस्तथा ॥ कथनंचायनांदेशाद्रव्यप्रतिनिधेस्तथा ॥ पवित्रलक्षणंपश्चाद्वि
धौधांसिततःपरं ॥ धूपाश्चापिततःप्रोक्ताहोमयोग्याग्नयोपिच ॥ हेमरूप्यादिधातूनांधान्याना
मानमीरितं ॥ होमद्रव्यस्यमानंचऋत्विजांवरणंतथा ॥ सर्वतोभद्रसंज्ञंचलिंगतोभद्रमेवच ॥ अ
थमंडलदेवाश्चमुद्राणांलक्षणानिच ॥ षोडशाद्युपचाराणांकथनंचष्ट्यकष्ट्यकं ॥ विधिश्चो
द्यापनानुक्तोव्रतांगेतथाविधिः ॥ उपयुक्तपदार्थानामित्येवंपरिभाषणं ॥ ॥ अथव्रतानि
ल कथ्यंतेप्रतिपत्प्रभृतिक्रमात् ॥ चैत्रशुक्लप्रतिपदिसंवत्सरविधिस्मृतः ॥ आरोग्यप्रतिपत्पश्चा
द्विधाप्रतिपदस्तथा ॥ तिलकव्रतकंप्रोक्तंबिल्वरोटकव्यकंतथा ॥ विधिर्यमोद्वितीयायात्रैती

ततो दूर्वाष्टमीव्रतं ॥ महालक्ष्मीव्रतं प्रोक्तमशोकाख्यमतः परं ॥ नवम्यामथ कथ्यंते श्रीरामनव
मीव्रतं ॥ दैव्यास्तु पूजनं पश्चान्नवम्यां सद्भ्युगीरितं ॥ दशम्यामथ कथ्यंते व्रतमाशाख्यमा
दिमं ॥ पश्चाद्दशाहराख्यायां विधिः स्नानादिको मतः ॥ दशावतारसंज्ञं च विज्ञेयाद्दशमीव्रतं ॥ ए
कादश्यामथोच्यंते सामान्यव्रतमादिशं ॥ निर्जलाख्यव्रतं पश्चाच्छयन्यैकादशीव्रतं ॥ गो
पद्माख्यव्रतं पश्चात्संबोधनविधिस्ततः ॥ भीष्मपंचकसंज्ञं च ततो वैतरणीव्रतं ॥ सोद्यापनं च
शुक्लायां कृष्णायां च प्रकीर्तितं ॥ उभयैकादशी पश्चात्तद्वच्च प्रकीर्तिता ॥ द्वादश्यामथ कु
थ्यंते श्रवणद्वादशीव्रतं ॥ वामनाख्यजयंत्याश्च सुरूपाख्यमतः परं ॥ त्रयोदश्यामथोच्यंते जय
पार्वतिसंज्ञकं ॥ गौत्रिरात्रिव्रतं पश्चादशोकाख्यमतः परं ॥ प्रदोषाख्यव्रतं पश्चात्ततोऽनंगत्र
योदशी ॥ चतुर्दश्यामथोच्यंते नृसिंहाख्यव्रतं शुभं ॥ अनंतस्य व्रतं पश्चादुद्यापनसमन्वितं ॥
कदलीसंज्ञकं पश्चाद्वैकुंठाख्यचतुर्दशी ॥ शिवरात्रिव्रतं पश्चादुद्यापनसमन्वितं ॥ पूर्णिमायां

मथोच्यंते सावित्रीव्रतमादिमं ॥ गोपद्मारव्यव्रतं चान्यत्कोकिलारव्यमतःपरं ॥ रुक्षबंधविधिः
प्रोक्तः पूर्णिमायां ततः शुभः ॥ उमामहेश्वरारव्यं च ततः कोजागराभिधं ॥ अमाव्रतान्यथोच्यं
ते तत्र गौरीतपोव्रतं ॥ अर्धोदयव्रतं पश्चात्सोमवत्यास्ततःपरं ॥ मासव्रतानि कथ्यंते तत्रादौ स्व
स्तिकव्रतं ॥ वरलक्ष्मीव्रतं पश्चाद्दानाफलव्रतं ततः ॥ धारणापारणारव्यं च व्रतं मासोपवासकं ॥
मलमासव्रतं पश्चाद्वासरस्य व्रतान्यथ ॥ रविवारव्रतं चाद्यं मासादित्यव्रतं ततः ॥ सोमवार
व्रतं पश्चाद्भौमवारव्रतं ततः ॥ संक्रांतेरथ कथ्यंते व्रतानि विविधानि च ॥ उपायनं ततः प्रोक्तं
घृतेन स्नपये ततः ॥ घृतकंबलकः प्रोक्तो व्यतीपातव्रतं ततः ॥ लक्षपूर्विधिः प्रोक्तो नमस्कारविधि
स्ततः ॥ लक्षवर्तिविधिः पश्चादगस्त्यार्घ्यविधिस्ततः ॥ अश्वत्थस्य विधिः प्रोक्तो लिंगस्योद्या
पनं ततः ॥ तुलस्यास्तु विवाहश्च इत्येवं कथितः क्रमः ॥ सनिर्णयानि यानीह कथितानि व्रतानि
तु ॥ तेषाद्रुतात्तये भट्टशंकरोनुक्रमं व्यधात् ॥ संपूर्ण ॥ छ ॥ छ ॥ शके १६७४ आंगिरस॰

३८

नभस्याद्यतिथौशुक्लेआषाढ्यांभानुवासरे॥ लिखितंजीवशर्मेणव्रतार्कस्यचपुस्तकं॥ ॥श्रीकृष्णार्पणं॥
इदंपुस्तकव्रतार्कनरगुंदमध्य उडवा परमेष्ठीरसन्निधौजीवणपाठकलिखितं॥ छ॥ छ॥ छ॥ छ॥ छ

९८

इति

व्रतार्कः

98

समाप्तः

हस्तलिखित- समयः- १६७४ शके भाद्रपद शु. १ तिथौ भौमौ

नीलकण्ठात्मज शंकरप्रणीतः

३४२

श्रीगणेशायनमः॥अथव्रतार्कानुक्रमणिकारंभः॥